TIGHT BINDING BOOK

UNIVERSAL
LIBRARY
OU_184329
UNIVERSAL
LIBRARY

OUP—390—29-4-72—10,000.

OSMANIA UNIVERSITY LIBRARY

Call No. S294·1 Accession No. PG S650

Author VAIK

Title कृष्णयजुर्वेदीयतैत्तिरीयसंहित

1948 - भाग - 6

This book should be returned on or before the date last marked below.

(अथ तृतीयाष्टके पञ्चमः प्रपाठकः)।

(तत्र प्रथमोऽनुवाकः)।

हरिः ॐ।

पूर्णा पश्चादुत पूर्णा पुरस्तादुन्मध्यतः पौर्णमासी जिगाय। तस्यां देवा अधि संवसन्त उत्तमे नाक इह मादयन्ताम्। यत्ते देवा अदधुर्भागधेयममावास्ये संवसन्तो महित्वा। सा नो यज्ञं पिपृहि विश्ववारे रयिं नो धेहि सुभगे सुवीरम्। निवेशनी संगमनी वसूनां विश्वा रूपाणि वसून्यावेशयन्ती। सहस्रपोषꣳ सुभगा रराणा सा न आ गन्वर्चसा(१) संविदाना। अग्नीषोमौ प्रथमौ वीर्येण वसून्रुद्रानादित्यानिह जिन्वतम्। माध्यꣳ हि पौर्णमासं जुषेथां ब्रह्मणा बृद्धौ सुकृतेन सातावथास्मभ्यꣳ सहवीराꣳ रयिं नि यच्छतम्। आदित्याश्चाङ्गिरसश्चाग्निनाऽदधत ते दर्शपूर्णमासौ प्रैप्सन्तेषामाङ्गिरसा निरुप्तꣳ हविरासीदथाऽऽदित्या एतौ होमावपश्यन्तावजुहवुस्ततो वै ते दर्शपूर्णमासौ (२) पूर्व आऽलभन्त दर्शपूर्णमासावालभमान एतौ होमौ पुरस्ताज्जुहुयात्साक्षादेव दर्शपूर्णमासावा लभते ब्रह्मवादिनो वदन्ति स त्वै दर्शपूर्णमासावा लभेत य एनयोरनुलोमं च प्रतिलोमं च विद्यादित्यमावास्यायां ऊर्ध्वं तदनुलोमं पौर्णमास्यै प्रतीचीनं

(दर्शपूर्णमासेष्ट्यङ्गभूतान्वारम्भणीयेष्टिविधिः)

तत्प्रातिलोमं यत्पौर्णमासीं पूर्वामालभेत प्रतिलोममेनावा लभेतामुमपक्षीयमाणमन्वपक्षीयेत सारस्वतौ होमौ पुरस्ताज्जुहुयादमावास्यां वै सरस्वत्यनुलोममेवैनावा लभतेऽमुमाप्यायमानमन्वा प्यायत आग्नावैष्णवमेकादशकपालं पुरस्तान्निर्वपेत्सरस्वत्यै चरुꣳ सरस्वते द्वादशकपालं यदाग्नेयो भवत्यग्निर्वै यज्ञमुखं यज्ञमुखमेवादौ पुरस्ताद्धत्ते यद्वैष्णवो भवति यज्ञो वै विष्णुर्यज्ञमेवाऽऽरभ्य प्र तनुते सरस्वत्यै चरुर्भवति सरस्वते द्वादशकपालोऽमावास्यां वै सरस्वती पूर्णमासः सरस्वान्तावेव साक्षादा रभत ऋध्नोत्याभ्यां द्वादशकपालः सरस्वते भवति मिथुनत्वाय प्रजात्यै मिथुनौ गावौ दक्षिणा समृद्ध्यै (४)॥

(वर्चसा वै ते दर्शपूर्णमासावप तनुते सरस्वत्यै पञ्चविꣳशतिश्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां तृतीयाष्टके पञ्चमप्रपाठके प्रथमोऽनुवाकः॥ १॥

(अथ तृतीयाष्टके पञ्चमः प्रपाठकः)।

(तत्र प्रथमोऽनुवाकः)।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्॥

प्रपाठके चतुर्थे हि काम्या नैमित्तिकाः श्रुताः।
प्रपाठके पञ्चमे तु सोमेष्ट्योः शेष उच्यते॥

(दर्शपूर्णमासेष्वङ्गभूतान्वारम्भणीयेष्टिविधिः)

तत्र प्रथमानुवाके दर्शपूर्णमासेष्वङ्गभूतान्वारम्भणीयेष्टिर्विधातव्या।

तत्रैषः—"पूषा पश्चाद्यस्ते देवा अदधुरिति सारस्वतौ होमौ हुत्वाऽन्वारम्भणीयामिष्टिं निर्वपति" इति। पाठस्तु—

पूषा पश्चादिति। पूषा पौर्णमास्यभिमानिदेवता पश्चाद्यज्ञभूमेः पश्चिमायां दिश्युज्जिगमयोत्कर्षेण जयं प्राप्तवती। अपि च पूर्वस्यां दिशि तयोर्दिशोरपव्यदेशेऽप्युज्जिगाय। तस्यां पौर्णमास्यामधिष्ठायेह यज्ञे सम्यग्वसन्तः सर्वे देवा उत्तमे नाके भोगबहुले स्वर्गे मादयन्तामस्मान्हर्षयन्तु। हेऽमावास्ये यद्यस्मात्कारणात्ते महित्वा महिम्ना सम्यङ्निवसन्तो देवा भागधेयमदधुर्विभागं प्राप्तवन्तस्तस्मात्कारणादे विश्ववारे सर्वानिष्टनिवारिकेऽमावास्याभिमानिदेवते सा त्वं नोऽस्मदीयं यज्ञं पिपृहि पूर्णं कुरु। हे सुभगे सौभाग्ययुक्ते नोऽस्मभ्यं रयिं धनं सुवीरं शोभनपुत्रं च भेहि संपादय। अथ तत्रैव विकल्पितावन्यौ मन्त्रावाह—

निवेशनीति। सा तादृशी देवता नोऽस्मान्प्रत्यागच्छागच्छतु। कीदृशी तदुच्यते, निवेशनी सम्यक्निवेशयित्री गृहेषु नितरामस्मान्प्रवेशयन्ती। वसूनां संवेशनी धनानां प्रापयित्री। स्वप्यन्ते मणिमुक्तादिभिर्बहुभिः प्रकारैर्निरूप्यन्त इति स्वपाणि बहूनीत्यर्थः। तानि वसूनि धनानि विश्वा सर्वाण्यप्यावेशयन्ती, अस्मद्गृहेषु प्रवेशयन्ती। सहस्रपोषं रराणा सहस्रलक्षादिधनपुष्टिं प्रयच्छन्ती। सुभगा सौभाग्ययुक्ता। वर्चसा संविदाना बलेन संयोजयन्ती। हेऽमावासौ युवां प्रथमौ देवानां मध्ये मुख्यावतो वर्धिष्णुतो(ण) भवदीयसामर्थ्यनेह कर्मणि वस्वादीज्जिन्वतं प्रीणयतम्। माध्यं पश्चात्पुरस्ताच्च पौर्णमासीदेवतया रक्षिते मध्यदेशे क्रियमाणमिदं पौर्णमासं पौर्णमासीसंबन्धि हविर्जुषेथाम्। कीदृशौ युवां, ब्रह्मणा वृद्धौ स्तुतिरूपेण संतुष्टौ सुकृतेन सात्वा सम्यगनुष्ठितेनानेन कर्मणा फलस्य दातारौ हविःसेवनानन्तरमस्मभ्यं सहवीरं पुत्रसहितं रयिं नियच्छतं नितरां प्रयच्छतम्। अथ होमं विधातुं प्रस्तौति—

आदित्याश्चेति। आदित्या देवा आङ्गिरस ऋषयश्चाऽऽधानादूर्ध्वं यदा दर्शपूर्णमासौ प्राप्तुमैच्छंस्तदा तेषामुभयेषां मध्ये येऽङ्गिरस ऋषयस्ते सारस्वतहोमावज्ञात्वा प्रथममेवान्वारम्भणीयेष्ट्यर्थं हविर्निर्वापं कृतवन्तः। अथ तदानीमादित्या देवा एतावन्वारम्भणीयेष्टियज्ञभूतौ सारस्वतहोमौ कर्तव्यावितिनिश्चित्य तावजुहवुः। ततोऽन्वारम्भणीयेष्टेः साङ्गत्वादङ्गिरोभ्यः पूर्वभाविन एव सन्तौ दर्शपूर्णमासावुपक्रान्तवन्तः। इदानीं विधत्ते—

दर्शपूर्णमासाविति। दर्शपूर्णमासावारब्धुमिच्छन्पुरुष आरम्भणीयेष्टेरुपक्रमे पूर्णा पश्चादिति मन्त्राभ्यां जुहुयात्। तेन होमेन विलम्बमन्तरेणैव दर्शपूर्णमासावारब्धुं योग्यो भवति। उक्तयोर्होमयोर्देवताविशेषं विधातुं प्रस्तौति—

ब्रह्मवादिन इति। अत्रेदं चिन्त्यते—किं पौर्णमासी प्रथममालब्धव्या आहोस्विदमावास्येति। तदर्थमन्यदप्येतच्चिन्तनीयम्—कालस्य स्वरूपं कीदृशमनुलोमं कीदृशं च प्रतिलोममिति। न चेयमप्रस्तुता चिन्ता। यो यजमान एतयोर्दर्शपूर्णमाससंबन्धिकालयोरनुलोमं प्रतिलोमं च स्वरूपं वेद स एव दर्शपूर्णमासारम्भे मुख्योऽधिकारी नान्य इति ब्रह्मवादिनः परस्परमाहुः। तत्र कश्चिद्बुद्धिमाननुलोमप्रतिलोमभागमेवं ब्रूते। अमावास्याया ऊर्ध्वं शुक्लप्रतिपदमारभ्यानुलोमं कालस्वरूपं दिने दिने चन्द्रस्य वर्धमानत्वात्। पौर्णमास्याः प्रतीचीनमुदितं कृष्णप्रतिपदमारभ्य कालस्य यत्स्वरूपं तत्प्रतिलोमं दिने दिने चन्द्रस्यापक्षीयमाणत्वात्। एवं सति यदि पौर्णमासीं पूर्वगामिनीं कृत्वा यागारम्भं कुर्यात्तदा प्रतिलोमस्वरूपेणैव तौ दर्शपूर्णमासावारब्धवान्भवति। तथा सति पौर्णमास्यामारब्धायां सत्यां समनन्तरमेव चन्द्रोऽपक्षीयते। तं चापक्षीयमाणमनु यजमानोऽप्यपक्षीयेत। अतः प्रातिलोम्यदोषपरिहारकृते देवताविशेषौ विधत्ते—

सारस्वताविति। आरम्भणीयेष्टेः पुरस्ताद्यौ होमौ तौ सारस्वतौ। सरस्वती च सरस्वांश्च ययोर्होमयोस्तौ सारस्वतौ। एतदीयहोमेन प्रातिलोम्यदोषस्य परिहृतत्वादानुलोम्येनैव तौ दर्शपूर्णमासयागावारब्धवान्भवति। तथा वर्धमानचन्द्रमनु यजमानो वर्धते।

प्राच्याङ्गरूपौ होमौ विधायाङ्गिरूपामन्वारम्भणीयेष्टिं त्रिहविष्कां विधत्ते—

आग्नावैष्णवमिति। पूर्वत्रामावास्यायाः प्रथमारम्भे सत्यानुलोम्येन दोषाभावेऽपि तत्प्राथम्यमुपेक्ष्य प्रातिलोम्यदोषपरिहारप्रयत्नो विहितस्तदन्यथानुपपत्त्या पौर्णमास्येव प्रथममालब्धव्येति गम्यते। तादृशपौर्णमास्यारम्भात्पुरस्तादिदं हविस्त्रयं निर्वपेत्। तत्राऽऽग्नावैष्णवं प्रशंसति—

यदाग्नेय इति। अग्निमन्तरेण यज्ञस्यानिष्पत्तेराग्नेयेव यज्ञस्य मुखमत आग्नेयेन हविषा यज्ञमुखमेवोद्दिश्य प्रथमतः समृद्धिं संपादयति। यज्ञस्य सर्वा-

१ ख. °मानं च°।

(अथ तृतीयाष्टके पञ्चमः प्रपाठकः)।

(तत्र प्रथमोऽनुवाकः)।

हरिः ॐ।

पूर्णा पश्चादुत पूर्णा पुरस्तादुन्मध्यतः पौर्णमासी जिगाय। तस्यां देवा अधि संवसन्त उत्तमे नाक इह मादयन्ताम्। यत्ते देवा अददुर्भागधेयममावास्ये संवसन्तो महित्वा। सा नो यज्ञं पिपृहि विश्ववारे रयिं नो धेहि सुभगे सुवीरम्। निवेशनी संगमनी वसूनां विश्वा रूपाणि वसुन्यावेशयन्ती। सहस्रपोषꣳ सुभगा रराणा सा न आ गन्वर्चसा(१) संविदाना। अग्नीषोमौ प्रथमौ वीर्येण वसून्रुद्रानादित्यानिह जिन्वतम्। माध्यꣳ हि पौर्णमासं जुषेथां ब्रह्मणा वृद्धौ सुकृतेन सातावथास्मभ्यꣳ सहवीराꣳ रयिं नि यच्छतम्। आदित्याश्चाङ्गिरसश्चाग्नीनाऽदधत ते दर्शपूर्णमासौ प्रैप्सन्तेषामङ्गिरसा निरुप्तꣳ हविरासीदथाऽऽदित्या एतौ होमावपश्यन्तावजुहवुस्ततो वै ते दर्शपूर्णमासौ (२) पूर्व आऽलभन्त दर्शपूर्णमासावालभमान एतौ होमौ पुरस्ताज्जुहुयात्साक्षादेव दर्शपूर्णमासावा लभते ब्रह्मवादिनो वदन्ति स त्वै दर्शपूर्णमासावा लभेत य एनयोरनुलोमं च प्रतिलोमं च विद्यादित्यमावास्यायां ऊर्ध्वं तदनुलोमं पौर्णमास्यै प्रतीचीनं

तत्प्रातिलोमं यत्पौर्णमासीं पूर्वामालभेत प्रतिलोममेनावा लभेतामुमपक्षीयमाणमन्वर्प(३)क्षीयेत सारस्वतौ ह्योमौ पुरस्ताज्जुहुयादमावास्यां वै सरस्वत्यनुलोममेवैनावा लभतेऽमुमाप्यायमानमन्वा प्यायत आग्नावैष्णवमेकादशकपालं पुरस्तान्निर्वपेत्सरस्वत्यै चरुꣳ सरस्वते द्वादशकपालं यदाग्नेयो भवत्याग्निर्वै यज्ञमुखं यज्ञमुखमेवर्द्धिं पुरस्ताद्धत्ते यद्वैष्णवो भवति यज्ञो वै विष्णुर्यज्ञमेवाऽऽरभ्य प्र तनुते सरस्वत्यै चरुर्भवति सरस्वते द्वादशकपालोऽमावास्यां वै सरस्वती पूर्णमासः सरस्वान्तावेव साक्षादा रभत ऋध्नोत्याभ्यां द्वादशकपालः सरस्वते भवति मिथुनत्वाय प्रजात्यै मिथुनौ गावौ दक्षिणा समृद्ध्यै (४)॥

(वर्चसा वै ते दर्शपूर्णमासावर्प तनुते सरस्वत्यै पञ्चविꣳशतिश्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां तृतीयाष्टके पञ्चमप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ तृतीयाष्टके पञ्चमः प्रपाठकः)।

(तत्र प्रथमोऽनुवाकः)।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्॥
प्रपाठके चतुर्थे हि काम्या नैमित्तिकाः श्रुताः।
प्रपाठके पञ्चमे तु सोमेष्टयोः शेष उच्यते॥

(दर्शपूर्णमासेष्टयङ्गभूतान्वारम्भणीयेष्टिविधिः)

तत्र प्रथमानुवाके दर्शपूर्णमासेष्टयङ्गभूतान्वारम्भणीयेष्टिर्विधातव्या ।

कल्पः—" पूर्णा पश्चाद्यत्ते देवा अदधुरिति सारस्वतौ होमौ हुत्वाऽन्वारम्भणीयामिष्टिं निर्वपति " इति । पाठस्तु—

पूर्णा पश्चादिति । पूर्णा पौर्णमास्यभिमानिदेवता पश्चाद्यङ्गभूमेः पश्चिमायां दिश्युज्जिगायोत्कर्षेण जयं प्राप्तवती । अपि च पूर्वस्यां दिशि तयोर्दिशोर्मध्यदेशेऽप्युज्जिगाय । तस्यां पौर्णमास्यामधिष्ठायेह यज्ञे सम्यग्वसन्तः सर्वे देवा उत्तमे नाके भोगबहुले स्वर्गे मादयन्तामस्मान्हर्षयन्तु । हेऽमावास्ये यद्यस्मात्कारणात्ते महित्वा महिम्ना सम्यङ्निवसन्तो देवा भागधेयमदधुर्हविर्भागं प्राप्तवन्तस्तस्मात्कारणाद्धे विश्ववारे सर्वानिष्टनिवारिकेऽमावास्याभिमानिदेवते सा त्वं नोऽस्मदीयं यज्ञं पिपृहि पूर्णं कुरु । हे सुभगे सौभाग्ययुक्ते नोऽस्मभ्यं रायिं धनं सुवीरं शोभनपुत्रं च भेहि संपादय । अथ तत्रैव विकल्पितावन्यौ मन्त्रावाह—

निवेशनीति । सा तादृशी देवता नोऽस्मान्प्रत्यागन्नागच्छतु । कीदृशी तदुच्यते, निवेशनी समीचीनेषु गृहेषु नितरामस्मान्प्रवेशयन्ती । वसूनां संगमनी धनानां प्रापयित्री । रूप्यन्ते मणिमुक्तादिभिर्बहुभिः प्रकारैर्निरूप्यन्त इति रूपाणि बहूनीत्यर्थः । तानि वसूनि धनानि विश्वा सर्वाण्यप्यावेशयन्ती, अस्मद्गृहेषु प्रवेशयन्ती । सहस्रपोषं रराणा सहस्रलक्षादिधनपुष्टिं प्रयच्छन्ती । सुभगा सौभाग्ययुक्ता । वर्चसा संविदाना बलेन संयोजयन्ती । हेऽग्नीषोमौ युवां प्रथमौ देवानां मध्ये मुख्यावतो वर्धिणातो(ण) भवदीयसामर्थ्येनेह कर्मणि वस्वादीञ्जिन्वतं प्रीणयतम् । माध्यं पश्चात्पुरस्ताच्च पौर्णमासीदेवतया रक्षिते मध्यदेशे क्रियमाणमिदं पौर्णमासं पौर्णमासीसंबन्धि हविर्जुषेथाम् । कीदृशौ युवां, ब्रह्मणा वृद्धौ स्तुतिरूपेण संतुष्टौ सुकृतेन सातौ सम्यगनुष्ठितेनानेन कर्मणा फलस्य दातारौ हविःसेवनानन्तरमस्मभ्यं सहवीरं पुत्रसहितं रयिं नियच्छतं नितरां प्रयच्छतम् । अथ होमं विधातुं प्रस्तौति—

आदित्याश्चेति । आदित्या देवा आङ्गिरस ऋषयश्चाऽऽधानादूर्ध्वं यदा दर्शपूर्णमासौ प्राप्तुमैच्छंस्तदा तेषामुभयेषां मध्ये येऽङ्गिरस ऋषयस्ते सारस्वतहोमावज्ञात्वा प्रथममेवान्वारम्भणीयेष्टयर्थं हविर्निर्वापं कृतवन्तः । अथ तदानीमादित्या देवा एतावन्वारम्भणीयेष्टयङ्गभूतौ सारस्वतहोमौ कर्तव्यावितीत्थं निश्चित्य तावजुहवुः । ततोऽन्वारम्भणीयेष्टेः साङ्गत्वादाङ्गिरस्याः पूर्वभाविन एव सन्तौ दर्शपूर्णमासावुपक्रान्तवन्तः । इदानीं विधत्ते—

दर्शपूर्णमासाविति। दर्शपूर्णमासावारब्धुमिच्छन्पुरुष आरम्भणीयेष्टेरुपक्रमे पूर्णा पश्चादिति मन्त्राभ्यां जुहुयात्। तेन होमेन विलम्बमन्तरेणैव दर्शपूर्णमासावारब्धुं योग्यो भवति। उक्तयोर्होमयोर्देवताविशेषं विधातुं प्रस्तौति—

ब्रह्मवादिन इति। अत्रेदं चिन्त्यते—किं पौर्णमासी प्रथममालब्धव्या आहोस्विदमावास्येति। तदर्थमन्यदप्येतच्चिन्तनीयम्—कालस्य स्वरूपं कीदृशमनुलोमं कीदृशं च प्रतिलोममिति। न चेयमप्रस्तुता चिन्ता। यो यजमान एतयोर्दर्शपूर्णमाससंबन्धिकालयोरनुलोमं प्रतिलोमं च स्वरूपं वेद स एव दर्शपूर्णमासारम्भे मुख्योऽधिकारी नान्य इति ब्रह्मवादिनः परस्परमाहुः। तत्र कश्चिद्बुद्धिमाननुलोमप्रतिलोमभागमेवं ब्रूते। अमावास्याया ऊर्ध्वं शुक्लप्रतिपदमारभ्यानुलोमं कालस्वरूपं दिने दिने चन्द्रस्य वर्धमानत्वात्। पौर्णमास्याः प्रतीचीनमुरितनं कृष्णप्रतिपदमारभ्य कालस्य यत्स्वरूपं तत्प्रतिलोमं दिने दिने चन्द्रस्यापक्षीयमाणत्वात्। एवं सति यदि पौर्णमासीं पूर्वगामिनीं कृत्वा यागारम्भं कुर्यात्तदा प्रतिलोमस्वरूपेणैव तौ दर्शपूर्णमासावारब्धवान्भवति। तथा सति पौर्णमास्यामारब्धायां सत्यां समनन्तरमेव चन्द्रोऽपक्षीयते। तं चापक्षीयमाणमनु यजमानोऽप्यपक्षीयेत। अतः प्रातिलोम्यदोषपरिहारकृते देवताविशेषौ विधत्ते—

सारस्वतावितिः। आरम्भणीयेष्टेः पुरस्ताद्यौ होमौ तौ सारस्वतौ। सरस्वती च सरस्वांश्च ययोर्होमयोस्तौ सारस्वतौ। एतदीयहोमेन प्रातिलोम्यदोषस्य परिहृतत्वादानुलोम्येनैव तौ दर्शपूर्णमासयागावारब्धवान्भवति। तथा वर्धमानचन्द्रमनु यजमानो वर्धते।

प्राच्याङ्गरूपौ होमौ विधायाङ्गिरूपामन्वारम्भणीयेष्टिं विधत्ते—

आग्नावैष्णवमिति। पूर्वत्रामावास्यायाः प्रथमारम्भे सत्यानुलोम्येन दोषाभावेऽपि तत्प्राथम्यमुपेक्ष्य प्रातिलोम्यदोषपरिहारप्रयत्नो विहितस्तदन्यथानुपपत्त्या पौर्णमास्येव प्रथममालब्धव्येति गम्यते। तादृशपौर्णमास्यारम्भात्पुरस्तादिदं हविस्त्रयं निर्वपेत्। तत्राऽऽग्नावैष्णवं प्रशंसति—

यदाग्नेय इति। अग्निमन्तरेण यज्ञस्यानिष्पत्तेराग्नेयेव यज्ञस्य मुखमत आग्नेयेन हविषा यज्ञमुखमेवोद्दिश्य प्रथमतः समृद्धिं संपादयति। यज्ञस्य सर्वा-

---

१ ख. °मानं च°।

(दर्शपूर्णमासेष्टचङ्गभूतान्वारम्भणीयेष्टिविधिः)

ङ्कृत्यापित्वाद्विष्णुत्वमतो वैष्णवेन हविषा यज्ञमेवोपक्रम्य प्रकर्षेण विस्तृतवान्भवति। उत्तरं हविर्द्वयं प्रशंसति——

सरस्वत्या इति। स्त्रीलिङ्गनिर्देशादमावास्यायाः सरस्वतीत्वम्। तथा पुंलिङ्गशब्दनिर्देशात्पूर्णमासः सरस्वान्। तथा सत्येनेन देवताद्वयेन तदात्मकौ दर्शपूर्णमासौ यागावेव व्यवधानमन्तरेणोपक्रान्तवान्भवति। किंचाऽऽभ्यां देवताभ्यां यजमानः समृद्धिं प्राप्नोति।

तृतीये हविषि सारस्वतीं परित्यज्य सरस्वत्स्वीकारं प्रशंसति——

द्वादशकपाल इति। द्वितीयहविषः स्त्रीदेवताकत्वादितरस्य पुंदेवताकत्वं यजमानस्य मिथुनत्वाय संपद्यते। तच्च प्रजोत्पत्त्यर्थं भवति। तत्र दक्षिणां विधत्ते——**मिथुनौ गावाविति**। अत्र विनियोगसंग्रहः——

पूर्णेत्यारम्भणीयेष्टौ द्वौ सारस्वतहोमयोः।
मन्त्रौ विकल्पितावन्याविति चत्वार ईरिताः॥

अत्र मीमांसा।

नवमाध्यायस्य प्रथमे पादे चिन्तितम्——

"अन्वाधानाङ्गमारम्भो यद्वा पुरुषसंस्कृतिः।
फलवत्त्वादादिमोऽन्त्यः पुंयोगाच्च पृथक्फलम्" इति।

दर्शपूर्णमासयोरन्वाधानस्य प्रयमप्रवृत्त्यर्थत्वेनाऽऽरम्भरूपत्वात्। आरम्भप्रयुक्तेयमिष्टिरन्वाधानस्याङ्गम्, तथा सति यागफलेनैव फलवती स्यात्। कर्तुः संस्कारपक्षे तु पृथक्फलं कल्प्येत। तस्मात्प्रतिप्रयोगमन्वाधानावृत्तौ तदङ्गभूतेयमिष्टिरिति प्राप्ते ब्रूमः——आरम्भो नाम पुरुषस्य प्रथमप्रवृत्तिर्नत्वाधानपदार्थः। अतो नाग्न्यन्वाधानाङ्गं किंत्वारप्स्यमानो निर्वपेदिति पुरुषयोगात्तत्संस्कारोऽयम्। न च फलकल्पनाप्रसङ्गः। कृतारम्भस्य पुरुषस्य प्रयोगपरिगृहीतत्वेन पृथक्फलाकाङ्क्षाया अभावात्। नन्वेवमपि तत्तत्प्रयोगमारप्स्यमानस्य संस्कारायाऽऽवृत्तिः स्यान्नैवम्। प्रयोगमारप्स्यमान इत्यश्रुतत्वात्। दर्शपूर्णमासावारप्स्यमान इति श्रूयते। तयोश्चैक एवाऽऽरम्भः। तस्मान्नास्त्यावृत्तिः। तत्रैवान्यच्चिन्तितम्——

प्रतिप्रयोग आ(मा)रम्भयाजिरस्ति न वाऽस्त्यसौ।
अङ्गत्वेन न तत्तुल्यधर्म आधानवद्भवेत्॥

" आग्नावैष्णवमेकादशकपालं निर्वपेद्दर्शपूर्णमासावारप्स्यमानः " इति विहितेयमारम्भणीयेष्टिर्दर्शपूर्ण (* मासयोर्यावज्जीवमावर्त्यमानयोः प्रतिप्रयोगमावर्तनीया । कुतः । प्रयाजादिवदङ्गत्वादिति चेत् । नैतदुक्तम् । कुतः । सर्वप्रयोगसाधारणत्वात् । यावज्जीवं मया दर्शपूर्ण)मासौ कर्तव्यावित्यध्यवसाय आरम्भः । स चैक एव । तेन चाऽऽरम्भेण प्रयुक्तेयमिष्टिः । तस्मान्नाऽऽवर्तनीया । यथाऽऽधानं सर्वक्रतुसाधारणत्वात्सकृदेव कर्तव्यं तद्वत् । आधानस्य सकृदनुष्ठानमेकादशस्य तृतीयपादे वक्ष्यते ।

दशमाध्यायस्य प्रथमपादे चिन्तितम्—

तस्यां साऽस्ति न वाऽङ्गत्वेऽप्यस्याः पृथगुपक्रमात् ।
अस्ति मैवं वचोऽशक्तेर्विधाने चातिदेशने ॥

इयमारम्भणीया साऽपीष्टित्वाद्दर्शपूर्णमासप्रकृतिः । अतस्तस्यामपि दर्शपूर्णमासयोरिवाऽऽरप्स्यमानपुरुषसंस्काराय साऽनुष्ठेया न वेति संशयः । चोदकप्राप्तत्वादनुष्ठेया । ननु सोमाङ्गदीक्षणीयादिवदस्या दर्शपूर्णमासाङ्गत्वेनाऽऽरम्भद्वारं लुप्यते । न । वैषम्यात् । ऋत्विग्वरणादिना सोममारभ्यानुतिष्ठतः पुरुषस्यानुष्ठानमध्ये दीक्षणीया प्रवर्तते । दर्शपूर्णमासारम्भस्त्वन्वारम्भणीयायामनुष्ठितायां पश्चात्संपद्यते । ततो दर्शपूर्णमासोपक्रमादन्य आरम्भणीयोपक्रम इति द्वारसद्भावादारम्भणीयामारप्स्यमानस्य(नः स्व)संस्कारार्थमन्यामारम्भणीयां कुर्यात् । अनवस्था तु लोकसिद्धबीजाङ्कुरादिदृष्टान्तेन समाधेयेत्येवं प्राप्ते ब्रूमः आरम्भणीयायामारम्भणीयान्तरं न कर्तव्यम् । कुतः । अङ्गान्तरवदतिदेष्टुमशक्यत्वात् । तथा हि—प्रकृतौ समिधो यजतीत्यादिवाक्यैः प्रयाजाद्यङ्गानां स्वरूपमतिदिश्यते । प्रकरणेन चाङ्गाङ्गिभावो बोध्यते । ततः सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकाम इत्यादिकायां विकृतौ निर्वापानुमितं चोदकवाक्यमेवं प्रवर्तते । इष्टिवच्चरौ प्रयाजाद्यङ्गान्यनुष्ठेयानि । एवं सत्यारम्भणीयामिदं वक्तव्यं किमाग्नावैष्णवमेकादशकपालं निर्वपेद्दर्शपूर्णमासावारप्स्यमान इत्येतद्वाक्यं समिदादिवदङ्गभूतामारम्भणीयां विदधातु, किंवा यथा सौर्यादिवाक्यमङ्गातिदेशमनुमापयति तथा दर्शपूर्णमासाङ्गभूतायामारम्भणीयायामन्यस्या आरम्भणीयाया अतिदेशमनुमापयतु, उतोभयं करोत्विति । नाऽऽद्योऽङ्गविधावुपक्षीणत्वेनातिदेशानुमाने शक्त्यभावात् । न द्वितीयोऽविहितत्वेनातिदे-

* धनुश्चिह्नान्तर्गतं न्यायमालास्थम् ।

(सौमिकब्रह्मत्वविधिः)

ष्टुमयोग्यस्याङ्गस्यातिदेशे शक्त्यभावात्। न तृतीयो वाक्यभेदापत्तेः। नन्वनेन न्यायेन सौर्यवाक्येऽपि वाक्यभेदः प्रसज्येतैकस्यैव वाक्यस्य यागविध्यङ्गातिदेशयोः प्रवृत्तत्वात्। मैवम्। वाक्यद्वयसद्भावात्। प्रत्यक्षं वाक्यं यागविधायकमनुमितं वाक्यमङ्गातिदेशकम्। तर्ह्यत्रापि तादृशं वाक्यद्वयं भवतीति चेद्दाढम्। अत एवाऽऽरम्भणीयायां प्रयाजाद्यङ्गान्यनुष्ठीयन्ते तद्वदारम्भणीयान्तररूपमप्यङ्गमनुष्ठीयतामिति चेन्न। दर्शपूर्णमासप्रकरणे प्रयाजाद्यङ्गविधायकसामिदादिवाक्यवदारम्भणीयान्तररूपाङ्गविधायिनः कस्यचिद्वाक्यस्याभावात्। नहि प्रकृतावविद्यमानमङ्गं विकृतावतिदेशमर्हति। तस्मात्संप्रतिपन्नस्यैवाऽऽरम्भणीयाविधायिनो वाक्यस्याङ्गस्वरूपविधानाय सामिदादिवाक्यस्थानीयत्वमतिदेशाय सौर्यवाक्यस्थानीयत्वं चेत्याकारद्वयं वर्णनीयम्। तथा सत्यावृत्तिलक्षणो वाक्यभेदः केन वार्येत। तस्मादारम्भणीयायामारप्स्यमानपुरुषसंस्कारायाऽऽरम्भणीया न कर्तव्या॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये तृतीयकाण्डे पञ्चमप्रपाठके
प्रथमोऽनुवाकः॥ १॥

(अथ तृतीयाष्टके पञ्चमप्रपाठके द्वितीयोऽनुवाकः)।

ऋषयो वा इन्द्रं प्रत्यक्षं नापश्यन्तं वसिष्ठः प्रत्यक्षमपश्यत्सोऽब्रवीद्ब्राह्मणं ते वक्ष्यामि यथा त्वत्पुरोहिताः प्रजाः प्रजनिष्यन्तेऽथ मेतरेभ्य ऋषिभ्यो मा प्र वोचे इति तस्मा एतान्स्तोमभागानब्रवीत्ततो वसिष्ठपुरोहिताः प्रजाः प्राजायन्त तस्माद्वासिष्ठो ब्रह्मा कार्यः प्रैव जायते रश्मिरसि क्षयाय त्वा क्षयं जिन्वेति (१) आह देवा वै क्षयो देवेभ्य एव यज्ञं प्राऽऽह प्रेतिरसि धर्माय त्वा धर्मं जिन्वेत्याह मनुष्या

वै धर्मो मनुष्येभ्य एव यज्ञं प्राहाऽऽन्विति-
रसि दिवे त्वा दिवं जिन्वेत्याहैभ्य एव लोके-
भ्यो यज्ञं प्राऽऽहं विष्टम्भोऽसि वृष्ट्यै त्वा
वृष्टिं जिन्वेत्याह वृष्टिमेवाव (२) रुन्धे
प्रवाऽस्यनुवाऽसीत्याह मिथुनत्वायोशिगसि व-
सुभ्यस्त्वा वसूञ्जिन्वेत्याहाष्टौ वसव एकादश
रुद्रा द्वादशाऽऽदित्या एतावन्तो वै देवास्तेभ्य
एव यज्ञं प्राऽऽहौजोऽसि पितृभ्यस्त्वा पितॄञ्जि-
न्वेत्याह देवानेव पितॄननु सं तनोति तन्तुरसि
प्रजाभ्यस्त्वा प्रजा जिन्व (३) इत्याह पितॄ-
नेव प्रजा अनु सं तनोति पृतनाषाडसि पशु-
भ्यस्त्वा पशूञ्जिन्वेत्याह प्रजा एव पशूननु सं
तनोति रेवदस्योषधीभ्यस्त्वौषधीर्जिन्वेत्याहौ-
षधीष्वेव पशून्प्रति ष्ठापयत्यभिजिदसि युक्त-
ग्रावेन्द्राय त्वेन्द्रं जिन्वेत्याहाभिजित्या अधि-
पतिरसि प्राणाय त्वा प्राणम् (४) जिन्वे-
त्याह प्रजास्वेव प्राणान्दधाति त्रिवृदसि प्रवृद-
सीत्याह मिथुनत्वाय सꣳरोहोऽसि नीरोहोऽ-
सीत्याह प्रजात्य वसुकोऽसि वर्षिष्ठोऽसि वस्य-
ष्टिरसीत्याह प्रतिष्ठित्यै (५) ।

(जिन्वेत्यव प्रजा जिन्व प्राणं त्रिꣳशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां तृतीयाष्टके
पञ्चमप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(सौमिकब्रह्मत्वविधिः)

(अथ तृतीयकाण्डे पञ्चमप्रपाठके द्वितीयोऽनुवाकः)।

इष्टिरन्वारम्भणीया समन्त्रा प्रथमे श्रुता।

अथ द्वितीयानुवाके सौमिकब्रह्मत्वविधिरुच्यते।

यदुक्तं सूत्रकारेण—" वासिष्ठो ब्रह्मा ज्योतिष्टोमे यो वा कश्चित्स्तोमभागान्विद्यात् " इति। तदेतद्विधातुं प्रस्तौति—**ऋषयो वा इति।** वसिष्ठप्रमुखाः सर्वेऽप्यृषयः कदाचिदिन्द्रमुखान्मन्त्रविशेषानवगन्तुमागतास्तदानीमिन्द्रोऽनधिकारिभ्यो मन्त्रा न वक्तव्या इत्यभिप्रेत्यान्तर्हितोऽभूत्। अन्तर्धानं प्राप्यावस्थितं तमिन्द्रमृषयश्चक्षुषा नापश्यन्। तदानीं योगसामर्थ्ययुतो वसिष्ठो दिव्येन चक्षुषा तमिन्द्रमपश्यत्। स इन्द्रस्तं वसिष्ठं प्रत्येवमब्रवीत्। सौमिकब्रह्मत्वोपयोगिमन्त्रजातं यस्मिन्प्रतिपाद्यते तादृशं ब्राह्मणमहं तुभ्यं वक्ष्यामि। त्वमेव पुरोहितो मन्त्रोपदेष्टा यासां प्रजानां तास्त्वत्पुरोहितास्तथाविधाः प्रजा यथोत्पत्स्यन्ते तथाविधमेतद्वक्ष्यमाणस्य ब्राह्मणस्य सामर्थ्यात्। तादृशं ब्राह्मणं श्रुत्वाऽथानन्तरं त्वं मामितरेभ्यो मन्त्रानधिकारिभ्य ऋषिभ्यो मा प्रवोच इत्युक्त्वा तस्मै वासिष्ठायैतान्रश्मिरसीत्यादिकान्स्तोमभागनामकान्मन्त्रानब्रवीत्। स्तोमा बाह्विष्पवमानादीनि स्तोत्राणि तान्स्तोमान्भजन्त इति स्तोमभागाः। एतान्हि मन्त्रानुच्चार्य ब्रह्मा स्तोत्राण्यभ्यनुजानाति। तस्मादेते स्तोमभागा इत्युच्यन्ते। तत इन्द्रप्रसादात्सर्वाः प्रजा वसिष्ठपुरोहिता उत्पन्नाः। वसिष्ठं गुरुत्वेन पुरस्कृत्य वर्तन्त इत्यर्थः। इदानीं विधत्ते—

तस्माद्वासिष्ठ इति। यस्माद्वसिष्ठस्य ब्रह्मत्वोपयुक्तं सर्वमिन्द्र उक्तवांस्तस्मात्सोमयागं चिकीर्षुणा पुरुषेण यो वसिष्ठगोत्रोत्पन्नस्तदीयविद्यासंप्रदायेन स्तोमभागाभिज्ञो वा भवति स एव ब्रह्मा कार्यः। तथा सत्ययं यजमानस्तथाविधाः प्रजा जनयति। ते च स्तोमभागमन्त्राश्चतुर्थकाण्डस्य चतुर्थप्रपाठकादौ समाम्नाताः। ते चैकत्रिंशत्संख्याकाः। तेष्वेकैको मन्त्र एकैकं स्तोत्रमभ्यनुज्ञातुं ब्रह्मणा प्रयोक्तव्यः। अत एव सूत्रकार आह—" रश्मिरसि क्षयाय त्वा क्षयं जिन्वो स्तुतेति प्रसौति सर्वस्तोत्राणामेष कल्प उत्तरमुत्तरं स्तोमभागानां दधाति द्वादशाग्निष्टोमे पञ्चदशोक्थ्ये षोडश षोडाशिनि सप्तदश वाजपेय एकोनत्रिंशतमविरात्रे त्रयस्त्रिंशतमप्तोर्यामे " इति। तत्रैकत्रिंशं स्तोमभागं विरावृत्य(वर्त्य) त्रयस्त्रिंशत्संख्याऽप्तोर्यामे पूरणीया।

तत्र प्रथमं स्तोमभागमनूद्य व्याचष्टे—

रश्मिरसीति । पञ्चमकाण्डेऽष्टमप्रपाठके रश्मिरित्येवाऽऽदित्यमसृजत प्रेतिरिति धर्ममित्यादिना मन्त्राणामादित्यधर्मादिदृष्टिहेतुत्वाभिधानादादित्यादिपरतया मन्त्रा व्याख्येयाः । हे आदित्य त्वं रश्मिरसि रश्मिमुक्तोऽसि । देवा यस्मिन्संघे क्षियन्ति निवसन्ति सोऽयं संघः क्षयस्तस्मै क्षयाय देवसंघाय तत्प्रीत्यर्थं हे आदित्य त्वां स्मरामि । अतः क्षयं देवसंघं जिन्व प्रीणय । अस्मिन्मन्त्रे क्षयशब्दस्य देवा एवार्थः । अतो देवेभ्य एवैनं यज्ञं होता प्रोक्तवान्भवति ।

द्वितीयस्तोमभागे धर्मानुष्ठातृत्वान्मनुष्या धर्मशब्देन विवक्षिता इत्येतद्दर्शयति—

प्रेतिरसीति । हे धर्माभिमानिदेव त्वं प्रेतिरसि प्रकृष्टेतिर्गतिः प्राण्युपकाररूपा यस्यासौ प्रेतिः । अतो धर्मानुष्ठातृपुरुषार्थं त्वां स्मरामि । तं धर्मानुष्ठातृपुरुषं प्रीणय । अनेन मन्त्रेण धर्मोपलक्षितमनुष्यार्थमिमं मन्त्रमुक्तवान्भवति ।

तृतीयचतुर्थपञ्चमस्तोमभागानां तात्पर्यं दर्शयति—

अन्वितिरसीति । हे द्युलोकाभिमानिदेव त्वमन्वितिरसि । देवानामनुकूलेतिर्गतिर्यस्यासावन्वितिः । तादृशं त्वां द्युलोकार्थं स्मरामि । तं च द्युलोकं प्रीणय । यद्यप्यन्तरिक्षभूलोकप्रतिपादकौ चतुर्थपञ्चमौ स्तोमभागावत्र नानूदितौ तथाऽपि तृतीयस्य तदुपलक्षकत्वमभिप्रेत्यैभ्य एव लोकेभ्य इति समुदायतात्पर्यं दर्शितम् ।

षष्ठस्तोमभागं वृष्टिप्राप्तिहेतुत्वेन प्रशंसति—

विष्टम्भोऽसीति । हे वृष्ट्यभिमानिदेव त्वं विष्टम्भोऽसि विशेषेणोदकस्य धारकोऽसि । सप्तमाष्टमस्तोमभागयोः प्रतीकद्वयमनूद्याह्नो रात्रेश्च प्रतिपादकत्वेन मिथुनत्वसंपत्तिं दर्शयति—

प्रवाऽस्यनुवाऽसीति । हेऽह्नोऽभिमानिदेव त्वं प्रवाऽसि । जगत्प्रवासकत्वरूपेण प्रकर्षेण वाति गच्छति प्रवर्तत इति प्रवा । हे रात्र्यभिमानिदेव त्वमनुवाऽसि । निद्रादिव्यवहारस्यानुकूलत्वेन वाति गच्छति वर्तत इत्यनुवा । तयोर्द्वंद्वेन मिथुनत्वमभिप्रेत्याधनत्वम् ।

नवमदशमैकादशस्तोमभागानां संग्रहेण तात्पर्यं दर्शयति—

उशिगसीति । हे वसुगणपालक त्वमुशिगसि । उशिक्कामयमानः । रुद्रा-

---

१ क. योर्द्वित्वेन ।

(सौमिकब्राह्मत्वविधिः)

दित्यप्रतिपादकयोरपि स्तोमभागयोर्बसुविषयस्तोमभागेनैवोपलक्षितत्वात्संगृह्य तात्पर्याभिधानम्।

देवप्रतिपादकेभ्यस्त्रिभ्यः स्तोमभागेभ्य ऊर्ध्वं पितृप्रतिपादकस्य द्वादशस्य स्तोमभागस्याभिधानादेवानां पितॄणां च नैरन्तर्यं संपादितं भवतीत्येतद्दर्शयति—

ओजोऽसीति। हे पितृपालक देव त्वमोजोऽसि बलरूपोऽसे।

पितृप्रतिपादकस्तोमभागादूर्ध्वं प्रजाप्रतिपादकस्य त्रयोदशस्य स्तोमभागस्याभिधानात्पितॄणां च प्रजानां च नैरन्तर्यं सिध्यतीत्येतद्दर्शयति—

तन्तुरसीति। हे प्रजाभिमानिदेव त्वं तन्तुरसि पुत्रपौत्रादिविस्तारहेतुरसि।

पशुप्रतिपादकेन चतुर्दशेन स्तोमभागेन प्रजानां च पशूनां च नैरन्तर्यं सिध्यतीत्येतद्दर्शयति—

पृतनाषाडसीति। हे पशुपालक देव त्वं पृतनाषाडसि। पृतनां परकीयसेनामस्मत्पशूनामपहन्त्रीं सहते विनाशयतीति पृतनाषाट्।

ओषधिप्रतिपादकेन पञ्चदशेन स्तोमभागेन पशुस्तोमभागानन्तरभाविनां पशूनामोषधीषु प्रतिष्ठापनं भवतीत्येतद्दर्शयति—

रेवदस्योषधीभ्य इति। हे ओषधिपालक देव त्वं रेवदसि धनवानसि। पञ्चमकाण्डे राश्मिरित्येवाऽऽदित्यमसृजतेत्यारभ्य रेवदित्योषधीरित्यन्तेषु पञ्चदशेषु (शसु) मन्त्रेष्वसृजतेति ब्राह्मणेन व्याख्यातत्वात्तदभिमानिदेवपरत्वेन मन्त्राणामादिवाक्यान्यस्माभिर्व्याख्यातानि। अथ षोडशस्तोमभागस्याऽऽदिवाक्यं वज्रपरत्वेन तत्रैव व्याख्यातमतोऽत्रापि वज्रसाध्याभिजयार्थत्वं दर्शयति—

अभिजिदसीति। हे वज्र त्वमभिजिद्युक्तग्रावाऽसि। अभितो जयतीत्यभिजित्। युक्ताः संयुक्ता ग्रावाणो यस्यासौ युक्तग्रावा। यथा पाषाणा दृढा एवमस्यापि दृढत्वात्पाषाणगुणेन दार्ढ्येन संयोग एव ग्रावसंयोग इत्युच्यते।

सप्तदशेन स्तोमभागेन प्राणानां स्थापनं दर्शयति—

अधिपतिरसीति। हे प्राणाभिमानिदेव त्वमधिपतिरसि प्राणानामाधिक्येन पालयिताऽसि। अपानचक्षुःश्रोत्रप्रतिपादकानामष्टादशैकोनविंशविंशानां त्रयाणां स्तोमभागानां प्राणप्रतिपादकस्तोमभागेनैवोपलक्षितत्वमभिप्रेत्य संग्रहेण तात्पर्यं दर्शयितुं प्राणानिति बहुवचनं निर्दिष्टम्।

एकविंशद्वाविंशत्रयोविंशचतुर्विंशानां स्तोमभागानां चतुर्णां मिथुनत्वसंपादकत्वं दर्शयति—

(विष्ण्वतिक्रमोक्तिः)

त्रिवृदसीति। हे मिथुनीभाव त्वं त्रिगुणोऽसि प्रवर्तकश्चासि। पुमान्योषित्संयोगश्चेत्येवं त्रैगुण्यम्। संयोगानन्तरभावी मन्थनव्यापारः प्रवृत्तिः। एताभ्यां त्रैगुण्यप्रवृत्तिप्रतिपादकाभ्यां मन्थनसमाप्तिविश्लेषरूपमिथुनीभावावयवद्वयप्रतिपादकावुत्तरावपि स्तोमभागावुपलक्ष्येते। संवृन्मन्थनव्यापारसमाप्तिः। विवृद्वंपत्योर्विश्लेषः। अनेन स्तोमभागचतुष्टयेन मिथुनत्वं साकल्येन संपादितम्।

पञ्चविंशषाड्विंशसप्तविंशाष्टाविंशानां स्तोमभागानां चतुर्णां प्रजोत्पादनपरत्वं दर्शयति—

सꣳरोहोऽसीति। हे प्रजननव्यापार त्वं संरोहोऽसि संरोहश्चासि। शुक्रशोणिससंश्लेषेण गर्भाभिव्यक्तिः संरोहः। निःशेषाणामवयवानामभिव्यक्तिर्नीरोहः। एताभ्यामुभाभ्यां स्तोमभागाभ्यां प्ररोहप्रतिपादकावन्यावपि स्तोमभागावुपलक्ष्येते। प्रथमस्यापत्यस्योत्पत्तिः प्ररोहः। पश्चाद्भाविनामपत्यानामुत्पत्तिरनुरोहः। एतेन स्तोमभागचतुष्टयेन प्रजोत्पत्तिः संपद्यते॥

एकोनत्रिंशत्त्रिंशैकत्रिंशस्तोमभागैस्त्रिभिरुत्पन्नानां प्रजानां प्रतिष्ठां दर्शयति—

वसुकोऽसीति। हे उत्पन्नप्रजाभिमानिदेव त्वं वसुको वासयिताऽसि। वेषायानुकूला श्रीर्यस्य सः। व्याप्तिसमर्थश्चासि वसोर्निवासस्याष्टिर्व्याप्तिर्यस्यासौ वस्यष्टिः। अनेन स्तोमभागत्रयेण प्रजानां प्रतिष्ठा संपद्यते।

इति श्रीमत्सायणार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये तृतीयकाण्डे पञ्चमप्रपाठके द्वितीयोऽनुवाकः॥ २॥

(अथ तृतीयाष्टके पञ्चमप्रपाठके तृतीयोऽनुवाकः)।

अग्निना देवेन पृतना जयामि गायत्रेण छन्दसा त्रिवृता स्तोमेन रथंतरेण साम्ना वषट्कारेण वज्रेण पूर्वजान्भ्रातृव्यानधरान्पादयाम्यवैनान्बाधे प्रत्येनान्नुदेऽस्मिन्क्षयेऽस्मिन्भूमित्र्येके योऽस्मान्द्वेष्टि यं च वयं द्विष्मो विष्णोः

(विष्णवतिक्रमोक्तिः)

क्रमेणात्येनान्क्रामामीन्द्रेण देवेन पृतना जयामि त्रैष्टुभेन छन्दसा पञ्चदशेन स्तोमेन बृहता साम्ना वषट्कारेण वज्रेण (१) सह-जान्विश्वेभिर्देवेभिः पृतना जयामि जागतेन छन्दसा सप्तदशेन स्तोमेन वामदेव्येन साम्ना वषट्कारेण वज्रेणापरजानिन्द्रेण सयुजो वयꣳ सासह्याम पृतन्यतः। घ्नन्तो वृत्राण्यप्रति। यत्ते अग्ने तेजस्तेनाहं तेजस्वी भूयासं यत्ते अग्ने वर्चस्तेनाहं वर्चस्वी भूयासं यत्ते अग्ने हरस्ते-नाहꣳ हरस्वी भूयासम् (२)।

(बृहता साम्ना वषट्कारेण वज्रेण षट्चत्वारिꣳशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां तृतीयाष्टके पञ्चमप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ तृतीयकाण्डे पञ्चमप्रपाठके तृतीयोऽनुवाकः)।

यदब्रह्मत्वं स्तोमभागैर्द्वितीये तदुदीरितम्।

अथ तृतीयानुवाके विष्णवतिक्रमा उच्यन्ते। कल्पः—"अग्निना देवेन पृतना जयामीति विष्णवतिक्रमान्" इति। प्रथममन्त्रपाठस्तु—

अग्निना देवेनेति। देवश्छन्दः स्तोमः साम वज्रश्चेत्येतानि परकीयां पृतनामभि-भवितुं साधनानि। पृतना जित्वा भ्रातृव्यानधरान्पादयामि। त्रिविधा हि भ्रातृव्याः पूर्वजाः सहजा अपरजाश्चेति। पितृपितामहादिष्वप्यनुवर्तमानाः पूर्वजाः। सपत्नमातृजाः सहजाः। इदानीमेव स्वकार्यघातिनोऽपरजाः। तेषु त्रिविधेषु मध्ये ये पूर्वजास्ताञ्शत्रून्कृत्तो नीचा यथा भवन्ति तथा संपादयामि। संपाद्य चैतानवबाधे येनावपता यथा भवन्ति तेन तथा शृङ्खलादिना बाधं

करोमि । कृत्वा चैनान्प्रतिनुदे प्रत्येकं विनाशयामि । किंचास्मिन्क्षये मदीये निवासगृहे । अथवा किमनेन सङ्कोचेनास्मिन्भूमिलोके सर्वस्मिन्यो भ्रातृव्योऽस्मानुदासीनानपि द्वेष्टि । यं च भ्रातृव्यमुदासीनमपि वयं द्विष्मः । एतान्सर्वान्विद्वेषिणो विष्णुरूपस्य यजमानस्य मम क्रमेण पादविन्यासेनातिक्रामामि लङ्घयामि । द्वितीयमन्त्रपाठस्तु—

इन्द्रेण देवेनेति । अत्र भ्रातृव्यानधरान्पादयामीत्यादिकमनुषज्य पूर्ववद्व्याख्येयम् । तृतीयमन्त्रपाठस्तु—

विश्वेभिर्देवेभिरिति । अत्रापि भ्रातृव्यानधरानित्यादिकमनुषज्य व्याख्येयम् । त्रिवृदादिस्तोमानां रथंतरादिसाम्नां च स्वरूपं समिधमातिष्ठेत्यनुवाके दर्शितम् ।

कल्पः—" इन्द्रेण सयुजो वयमित्याहवनीयमुपातिष्ठते " इति । पाठस्तु—

इन्द्रेणेति । पृतनामस्मद्विरोधिनीं सेनामात्मन इच्छन्तीति पृतन्यतस्तान्शत्रून्वयं सासह्यामातिशयेन सोढुं शक्ताः स्मः । कीदृशा वयम् । इन्द्रेण सयुजः परमैश्वर्ययोगादाहवनीय इन्द्रस्तेन सह युज्यन्ते युक्ता भवन्तीति सयुजः । वृत्राणि शत्रूनप्रत्यस्मान्प्रति प्रतिकूलत्वं यथा नास्ति तथा घ्नन्तो वधं कुर्वन्तः । हेऽग्ने ते त्वदीयं यत्तेजः कान्तिरूपं तेनाहमपि कान्तिमान्भूयासम् । वर्चो बलम् । हरो रश्मिरूपं तेजः । अत्र विनियोगसंग्रहः—

यजमानोऽग्निनेन्द्रेण विश्वेभिर्विष्णवतिक्रमान् ।
क्रामत्युत्तरयोर्भ्रातृव्यानित्याद्यनुषज्यते ॥
इन्द्रे पूर्वाग्न्युपस्थानं मन्त्राश्चत्वार ईरिताः ।
एते मन्त्रा उरुꣳ हि राजेत्यनुवाकात्पूर्वं द्रष्टव्याः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये तृतीयकाण्डे पञ्चमप्रपाठके
तृतीयोऽनुवाकः ॥ ३ ॥

---

१ ट. घ. ङ च. °व्यान्पा° ।

(अतिमोक्षमन्त्राः)

(अथ तृतीयाष्टके पञ्चमप्रपाठके चतुर्थोऽनुवाकः)।

ये देवा यज्ञहनो यज्ञमुषः पृथिव्यामध्यासते। अग्निर्मा तेभ्यो रक्षतु गच्छेम सुकृतो वयम्। आऽगन्म मित्रावरुणा वरेण्या रात्रीणां भागो युवयोर्यो अस्ति। नाकं गृह्णानाः सुकृतस्य लोके तृतीये पृष्ठे अधि रोचने दिवः। ये देवा यज्ञहनो यज्ञमुषोऽन्तरिक्षेऽध्यासते। वायुर्मा तेभ्यो रक्षतु गच्छेम सुकृतो वयम्। यास्ते रात्रीः सवितः (१) देवयानीरन्तरा द्यावापृथिवी बियन्ति। गृहैश्च सर्वैः प्रजया न्वग्ने सुवो रुहाणास्तरता रजाꣳसि। ये देवा यज्ञहनो यज्ञमुषो दिव्यध्यासते। सूर्यो मा तेभ्यो रक्षतु गच्छेम सुकृतो वयम्। येनेन्द्राय समभरः पयाꣳस्युत्तमेन हविषा जातवेदः। तेनाग्ने त्वमुत वर्धयेमꣳ संजातानाꣳ श्रैष्ठ्य आ धेह्येनम्। यज्ञहनो वै देवा यज्ञमुषः (२) मन्ति त एषु लोकेष्वासत आददाना विमथ्नाना यो ददाति यो यजते तस्य। ये देवा यज्ञहनः पृथिव्यामध्यासते ये अन्तरिक्षे ये दिवीत्याहेमानेव लोकाꣳस्तीर्त्वा सगृहः सपशुः सुवर्गं लोकमेत्यप वै सोमेनेजानाद्देवताश्च यज्ञश्च क्रामन्त्याग्नेयं पश्वेकपालमुदवसानीयं निर्वपेदग्निः सर्वा

देवताः (३) पाङ्क्तो यज्ञो देवताश्चैव यज्ञं चाव रुन्धे गायत्रो वा अग्निर्गायत्रछन्दास्तं छन्दसा व्यर्धयति यत्पञ्चकपालं करोत्यष्टाकपालः कार्योऽष्टाक्षरा गायत्री गायत्रोऽग्निर्गायत्रछन्दाः स्वेनैवैनं छन्दसा समर्धयति पङ्क्त्यो याज्यानुवाक्ये भवतः पाङ्क्तो यज्ञस्तेनैव यज्ञान्नैति (४) ॥

(सवितर्देवा यज्ञमुषः सर्वा देवताश्चित्वारिंशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां तृतीयाष्टके पञ्चमप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ तृतीयकाण्डे पञ्चमप्रपाठके चतुर्थोऽनुवाकः)।

विष्णवतिक्रमणे मन्त्रास्तृतीये समुदीरिताः।

अथ चतुर्थेऽतिमोक्षमन्त्रा उच्यन्ते।

कल्पः—" वेदमुपस्थ[1] आधायान्तर्वेद्यासीनोऽतिमोक्षाञ्जपति " इति ।

अतिमोक्षशब्देन ये देवा यज्ञहन इत्यादयो मन्त्रा विवक्षिताः। सूत्रकारेणान्यत्र ये देवा यज्ञहन इत्यतिमोक्षा इत्युक्तत्वात्। पाठस्तु—

ये देवा इति। अत्र यज्ञमुष इति पदं पृथक्कृत्य मन्त्रभेदः कर्तव्यः। तत्र प्रथममन्त्रे पृथिव्यामध्यासत इत्याद्यन्तभागोऽनुषञ्जनीयः। द्वितीयमन्त्रे तु ये देवा इत्ययं पूर्वभागोऽनुषञ्जनीयः। देवानां मध्ये म्लेच्छजातयः केचिद्देवा यज्ञभागार्हाः सन्तो द्रष्टुमसहमानाः केचिद्यज्ञं विनाशयन्ति। अपरे तु यज्ञसाधनान्यपहृत्यान्यत्र गच्छन्ति। तत्र यज्ञविघातिनो ये देवाः पृथिव्यां यं कंचिद्देशमधिष्ठायावतिष्ठन्ते तेभ्यो यज्ञविघातिभ्योऽग्निर्मां रक्षतु। वयं सुकृतः सुष्ठु यज्ञं निष्पादितवन्तो गच्छेम यज्ञफलं प्राप्नुयाम। एवं यज्ञमुषां मन्त्रोऽपि व्याख्येयः। तृतीयमन्त्रपाठस्तु—

---

१ स. घ. ङ. च. °पस्थाया°।

(अतिमोक्षमन्त्राः)

आऽगन्मेति। हे वरेण्या मित्रावरुणा श्रेष्ठौ मित्रावरुणौ यज्ञसंबन्धिनीनां रात्रीणां मध्ये वर्तमानायामस्यां रात्रौ युवयोः संबन्धी वशानूबन्ध्यारूपो यो भागोऽस्ति तेन वयं नाकं स्वर्गसुखं गृह्णाना आगन्म सर्वतः प्राप्ताः स्मः। कुत्रैतत्स्वर्गसुखग्रहणमिति तदुच्यते—सुकृतस्यास्य यज्ञस्य संबन्धिनि तृतीये लोके। कीदृशे। अधिरोचनेऽधिकं भासमाने। भासमानोऽपि लोकः कुत्रेति तदुच्यते—दिवः पृष्ठे स्वर्गस्योपरि। पृथिव्यन्तरिक्षापेक्षया तृतीयत्वम्। पाताललोकोऽपि तादृशो भवतीति व्यवच्छेदाय दिवः पृष्ठ इत्युक्तम्। रौरवादिनरकव्यावृत्तये सुकृतस्येत्युक्तम्। नरको हि दुष्कृतस्य न सुकृतस्य।

अथ पूर्ववदनुषङ्गभेदभिन्नौ चतुर्थपञ्चममन्त्रावाह—

ये देवा इति। पूर्ववद्व्याख्येयम्। षष्ठमन्त्रमाह—

यास्ते रात्रीरिति। हे सवितर्द्यावापृथिवी अन्तरा द्यावापृथिव्योर्मध्ये ते तव संबन्धिन्यो या रात्रीर्यज्ञानुष्ठानयोग्या रात्रयो वियन्ति विशेषेण गच्छन्ति प्रवर्तन्ते। यद्यप्येकैव रात्रिः सुत्याकर्मार्हा तथाऽपि दीक्षोपसत्सहिता बहवो रात्रयो भवन्ति। तासां च सवितृप्रेरितत्वात्तत्संबन्धः। कीदृश्यो रात्रयः। देवयानीर्देवान्यान्तीति देवयान्यो दैविककर्मयुक्ता इत्यर्थः। तासु रात्रिषु कर्मानुतिष्ठन्तः सर्वैर्गृहैश्च प्रजयाऽनु गृहवार्तीभिर्भृत्यैः पुत्रादिना च सार्धं सुवो रुहाणाः स्वर्गं प्राप्नुवन्तो यजमाना यूयं रजांसि रञ्जनीयानि सुखानि तरत प्राप्नुत।

पूर्ववदनुषङ्गभेदभिन्नौ सप्तमाष्टममन्त्रावाह—

ये देवा इति। पूर्ववद्व्याख्येयम्। अथ नवमं मन्त्रमाह—

येनेन्द्रायेति। हे जातवेदो येनोत्तमेन हविषोत्तमहविःस्वरूपेण पयांसि क्षीररसस्वादून्सोमरसानिन्द्राय[1] तमभरः संभृतवानसि तेन हविषा हेऽग्ने त्वामिमं यजमानं वर्धय। उतापि चैनं यजमानं सजातानां श्रैष्ठ्ये स्वाम्य आधेहि। अथैतान्प्रशंसति—

यज्ञहनो वा इति। कपटरूपधारिणः केचन देवा यज्ञभागरहिता यज्ञशालादाहाद्युपद्रवेण यज्ञघातिनो भवन्ति। अपरे च ग्रहचमससोमरसापहारेण यज्ञमुषो भवन्ति। एवमुभयविधा ये सन्ति ते त्रिष्वप्येतेषु लोकेष्वतिष्ठन्ते। किं कुर्वन्तः। यो यजमानो दक्षिणां ददाति तदीयं दक्षिणाद्रव्यं गवादिकमपहरन्ती-

---

१ क. घ. ङ. च. °निन्द्रियाय।

(अतिमोक्षमन्त्राः)

(न्त इ)त्यर्थः । यो यजमानो यजते तदीयं ग्रहचमसादिकं विमथ्नाना भङ्ग-परित्यागादितो विलोडयन्तः । तस्योपद्रवस्य सर्वस्यैतैर्मन्त्रैः परिहारं दर्शयति—

ये देवा इति । अत्र यज्ञमुष इत्यत्र पृथङ्मन्त्रत्वं दर्शयितुं तत्पदं परित्यज्यानुषङ्गेण सह यज्ञहन इत्येतावदेवोदाहृतम् । एतैर्मन्त्रैरुपद्रवसहितानिमाँल्लोकानुत्तीर्य सगृहः कलत्रपुत्रादिसहितः सपशुर्गवाश्वादिपशुसहितः स्वर्गं प्राप्नोति। त एते मन्त्रा उरुꣳ हि राजेत्येतस्मादनुवाकात्पूर्वं द्रष्टव्याः। अथोदवसानीयं विधत्ते—

अप वै सोमेनेति । यः सोमेनेष्टवानभवत्, एतस्मादेवताश्च यज्ञश्चापक्रामन्ति । अनेन यजमानेन प्रयोजनाभावं मन्वाना एनं परित्यजन्ति । अतस्तदपक्रमणं वारयितुमाग्नेयेन पञ्चकपालं तादृशपुरोडाशेन साध्यमुदवसानीयाख्यं कर्म कुर्यात् । अयमग्निः सर्वदेवतात्मको यज्ञश्च पाङ्क्तः पञ्चसंख्योपेतः । "ते देवा बिभ्यतोऽग्निं प्राविशन्" "धानाः करम्भः परिवापः पुरोडाशः पयस्या तेन पाङ्क्तीराप्यते" इत्यादिश्रुतिद्वयात् । अत आग्नेयत्वेन सर्वा देवता अवरुन्धे पञ्चकपालेन यज्ञमप्यवरुन्धे ।

अथ पञ्चकपालं दूषयित्वाऽष्टाकपालं विधत्ते—

गायत्रो वा इति । अग्नेर्गायत्र्याश्च प्रजापतिमुखजन्यत्वेन गायत्रोऽग्निः । पञ्चकपाले सति तमग्निं स्वकीयेन च्छन्दसा वियोजयति । अष्टाकपाले तु सति गायत्र्या अष्टाक्षरत्वादाग्निं स्वकीयेन च्छन्दसा समृद्धं करोति ।

अत्राग्ने तमद्याश्वमित्येते अक्षरपङ्क्त्यौ विधत्ते—

पङ्क्त्यौ याज्येति । अत्र तु गायत्रत्वसिद्धयेऽष्टाकपालः स्वीकृतस्तथाऽपि पाङ्क्तमन्त्रपाठेन धानादिद्वारा पाङ्क्तयज्ञादप्ययं यजमानो नापगच्छति ।

अत्र विनियोगसंग्रहः—

ये देवा इत्यतीमोक्षान्मन्त्रानेताञ्जपेन्नव ।
यज्ञहन्यज्ञमुट्चेति भेदान्मन्त्राभिदेष्यते ॥

इति श्रीमत्सायणार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये तृतीयकाण्डे पञ्चमप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

———

(आदित्यग्रहमन्त्रोक्तिः)

(अथ तृतीयकाण्डे पञ्चमप्रपाठके पञ्चमोऽनुवाकः)।

सूर्यो मा देवो देवेभ्यः पातु वायुरन्तरिक्षायजमानोऽग्निर्मा पातु चक्षुषः। सक्ष शूष सवितर्विश्वचर्षण एतेभिः सोम नामभिर्विधेम ते तेभिः सोप नामभिर्विधेम ते। अहं परस्तादहमवस्तादहं ज्योतिषा वि तमो ववार। यदन्तरिक्षं तदु मे पिताऽभूदहꣳ सूर्यमुभयतो ददर्शाहं भूयासमुत्तमः समानानाम् (१) आ समुद्रादाऽन्तरिक्षात्प्रजापतिरुदधिं च्यावयातीन्द्रः प्र स्नौतु मरुतो वर्षयन्तूꣳम्भय पृथिवीं भिन्दीदं दिव्यं नभः। उद्गो दिव्यस्य नो देहीशानो वि सृजा दृतिम्। पशवो वा एते यदादित्य एष रुद्रो यदग्निरोषधीः प्रास्याग्नावादित्यं जुहोति रुद्रादेव पशूनन्तर्दधात्यथो ओषधीष्वेव पशून् (२) प्रतिष्ठापयति कविर्यज्ञस्य वि तनोति पन्थां नाकस्य पृष्ठे अधि रोचने दिवः। येन हव्यं वहसि यासि दूत इतः प्रचेता अमुतः सनीयान्। यास्ते विश्वाः समिधः सन्त्यग्ने याः पृथिव्या बर्हिषि सूर्ये याः। तास्ते गच्छन्त्वाहुतिं घृतस्य देवायते यजमानाय शर्म। आशासानः सुवर्यꣳ रायस्पोषꣳ स्वश्वियम्। बृहस्पतिना राया स्वगाकृतो मह्यं यजमानाय तिष्ठ (३)॥

(समानानामोषधीष्वेव पशून्मह्यं यजमानायैकं च)।

(इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां तृतीयाष्टके पञ्चमप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ तृतीयकाण्डे पञ्चमप्रपाठके पञ्चमोऽनुवाकः)।

अतीमोक्षजपे मन्त्राश्चतुर्थे समुदीरिताः।

अथ पञ्चमेऽनुवाक आदित्यग्रहमन्त्रा उच्यन्ते।

कल्पः—"सूर्यो मा देव इति दर्मैर्हस्तेनापिधायोत्तिष्ठति" इति। पाठस्तु—

सूर्यो मा देव इति। अयमादित्यग्रहः सूर्यवाय्वात्मकोऽतः सूर्यरूपोऽयं देवो यज्ञविघातिभ्यो मां पातु। तथा वायुरूपोऽयं विघ्नकारिदेवयुक्ताद्अन्तरिक्षान्मां पातु। तथा यजमानो यागहेतुरयमग्निश्चक्षुषो विरोधिदेवदृष्टेः सकाशान्मां पातु। हे सोम सक्षादीनि चत्वारि यानि तव नामानि एतैर्नामभिस्ते तव विधेम परिचर्यां करवाम। यानि च पूर्वोक्तानि सूर्यवाय्वग्निनामानि तैर्नामभिस्तैश्च नामभिस्तव परिचर्यां करवाम। हे सक्ष पात्रसङ्ग, [हे] शूष ल्वन्, हे सवितः प्रेरक हे विश्वचर्षणे सर्वमनुष्यानुग्राहक। एतैः संबोधनरूपैर्नामभिर्विधेमेत्यन्वयः।

कल्पः—"अहं परस्तादित्यादित्यं यजमानोऽन्वारभत आहोमात्" इति।

पाठस्तु—

अहं परस्तादिति। अहं यजमानः परस्तात्परभागे ग्रहमन्वारभ इति शेषः। अहमवस्तादवरभागेऽपि ग्रहमन्वारभे। अहमस्याऽऽदित्यग्रहस्य ज्योतिषा विशेषेण तमो बबार वारितवानस्मि। उपरिभागाधोभागयोर्मध्यवर्ति यदन्तरिक्षं तदु तदपि मे पिता पितृवत्पालकमभूत्। अहं सूर्यमादित्यग्रहमुभयत ऊर्ध्वाधोभागयोर्दक्षिणोत्तरभागयोर्वा ददर्श दृष्टवानस्मि। अतोऽहं समानानां यजमानानां मध्य उत्तमो भूयासम्।

कल्पः—"आसमुद्रादिति दर्मैराच्यावयति" इति। पाठस्तु—

आ समुद्रादिति। प्रजापतिरिमं ग्रहं चतुर्दिक्षु समुद्रात्समुद्रपर्यन्तं दर्मैराच्यावयतीति। तथैवोर्ध्वभागेऽप्यन्तरिक्षादन्तरिक्षपर्यन्तमुदधिं समुद्रसमानमा-

१ क. दर्मे हस्ते°।

(आदित्यग्रहमन्त्रोक्तिः)

दित्यग्रहं च्यावयति । इन्द्रो गवामूध इव ग्रहं प्रस्नौतु प्रस्नुतं करोतु । मरुतो वर्षयन्तु मेघा इव संततधाराः कुर्वन्तु ।

कल्पः—" उन्नम्भय पृथिवीमिति वृष्टिकामस्य जुहुयात् " इति । पाठस्तु—

उन्नम्भय पृथिवीमिति । हे आदित्य पृथिवीमुन्नम्भयोत्कर्षेण क्लिन्नां कुरु । इदं दिव्यं नभो भिन्धि द्युलोकस्थाकाशवर्तिमेघामिव ग्रहं भिन्धि भिन्नं कुरु । दिव्यस्य दिवि भवस्योदन उदकस्य समृद्धिं नोऽस्मभ्यं देहि । ईशानः समर्थस्त्वं दृतिं विसृज जलविधारकं दृतिसमानं मेघं विमुञ्च । अथ विधत्ते—

पशवो वा इति । आदित्यग्रह इति यदेते पशवो वै तस्य पशुप्राप्तिहेतुत्वात् । अग्निरिति यदेष क्रूरो देवस्तस्मात्क्रौर्यपरिहारायाग्नावोषधीः प्रक्षिप्य पश्चादादित्यग्रहं जुहोति । तथा सति रुद्ररूपाग्निसकाशादादित्यग्रहरूपान्पशूनन्तर्हितानेव करोति । किंचौषधीष्वेवाऽऽदित्यग्रहरूपान्पशून्प्रतिष्ठितान्करोति ।

कल्पः—" कवियज्ञस्य वि ततनोति पन्थामिति ग्रहं हत्वा " इति । पाठस्तु—

कवियज्ञस्येति । यज्ञस्य कविर्विद्वानयमादित्यग्रहो नाकस्य पन्थां वितनोति स्वर्गस्य मार्गं वितनोति विस्तृतं करोति । कुत्रेति । तदुच्यते—अधिरोचन आधिक्येन भासमाने दिवः पृष्ठे द्युलोकस्योपरि । हेऽग्ने येन पथा हव्यं वहसि देवानां दूतस्त्वमितो निर्गत्य येन पथा यासि तादृशं पन्थानं वितनोतीति पूर्वत्रान्वयः । कीदृशो दूतः । प्रकर्षेण चेतते कर्मानुष्ठातारं जानातीति प्रचेताः । अमुतोऽमुष्मिन्स्वर्गे सनीयानतिशयेन फलस्य दाता ।

कल्पः—" यास्ते विश्वाः समिधः सन्त्यग्न इति दर्भानाहवनीये प्रास्य " इति । पाठस्तु—

यास्ते विश्वा इति । हेऽग्ने त्वदीयाः समिधः सम्यगदीप्यमाना ज्वाला याः सन्ति ता एव विशेषाकारेणोच्यन्ते—पृथिव्यां भूलोके बर्हिषि यज्ञदेशे या दीप्तयः सन्ति सूर्ये च या दीप्तयः सन्ति ते त्वदीयास्ता दीप्तयो घृतस्याऽऽहुतीर्गच्छन्तु प्राप्नुवन्तु । देवानात्मन इच्छतीति देवायंस्तस्मै देवायते यजमानाय शर्म सुखं प्रयच्छन्तु । आदित्यग्रहविषयास्त एते मन्त्राः कदा चन स्तरीरसीत्यनुवाकादूर्ध्वं द्रष्टव्याः ।

अथ कल्पे—" यूपं यजमान उपतिष्ठते नमः स्वरुभ्यः " इत्युपक्रम्यान्ते पठितम्—" आशासानः सुवीर्यमिति चोपस्थाय " इति । पाठस्तु—

आशासान इति । हे यूप त्वं यजमानाय महं रायस्पोषमाशासानस्तिष्ठ । कीदृशं पोषम् । सुवीर्यं शोभनेन भोगसामर्थ्येनोपेतं स्वश्वियं शोभनैरश्वैरुपेतम् । कीदृशो यूपः । बृहस्पतिना देवेन रायाद्यनेकधननिमित्तं स्वगाकृतो यजमानस्य स्वगतो यथा भवति तथा कृतः । सोऽयं मन्त्रः पशुप्रकरणगतात्समुद्रं गच्छेत्यनुवाकादूर्ध्वं द्रष्टव्यः । अत्र विनियोगसंग्रहः—

सूर्यो तृतीयसवन आदित्यग्रहहस्तकः ।
उत्तिष्ठेदहमित्यस्मात्स्वाम्यन्वारभते ग्रहम् ॥
आ समुच्च्यावयेद्दर्भैरुन्नं वृष्ट्यर्थिहोमकः ।
कविर्हरेद्ग्रहं यास्ते वह्नौ प्रास्यति दर्भकान् ॥
आशा यूपोपस्थितिः स्यात्सप्त मन्त्रा इहेरिताः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये तृतीयकाण्डे पञ्चमप्रपाठके
पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ तृतीयाष्टके पञ्चमप्रपाठके षष्ठोऽनुवाकः) ।

सं त्वा नह्यामि पयसा घृतेन सं त्वा नह्याम्यप ओषधीभिः । सं त्वा नह्यामि प्रजयाऽहमद्य सा दीक्षिता सनवो वाजमस्मे । प्रेतु ब्रह्मणस्पत्नी वेदिं वर्णेन सीदतु । अथाहमनुकामिनी स्वे लोके विशा इह । सुप्रजसस्त्वा वयꣳ सुपत्नीरुप सेदिम । अग्ने सपत्नदम्भनमदब्धासो अदाभ्यम् । इमं वि ष्यामि वरुणस्य पाशम् (१) यमधीत सविता सुकेतः । धातुश्च योनौ सुकृतस्य लोके स्योनं मे सह पत्या करोमि । प्रेहु-

(पत्नीविषया मन्त्राः)

दैव्यृतस्य वामीरन्वाभिस्तेऽग्रं नयत्वादितिर्यज्ञं ददातु रुद्रावसृष्टाऽसि युवा नाम मा मा हिꣳसिर्विसुभ्यो रुद्रेभ्य आदित्येभ्यो विश्वेभ्यो वो देवेभ्यः पत्नेजनीर्गृह्णामि यज्ञाय वः पत्नेजनीः सादयामि विश्वस्य ते विश्वावतो वृष्णियावतः (२) तवाग्ने वामीरनु संदृशि विश्वा रेतांꣳसि धिषीयागन्देवान्यज्ञो नि देषीदेवेभ्यो यज्ञमशिषन्नस्मिन्त्सुन्वति यजमान आशिषः स्वाहाकृताः समुद्रेष्ठा गन्धर्वमा तिष्ठतानु । वातस्य पत्मन्निड ईडिताः (३) ।

(पाशं वृष्णियावतस्त्रिꣳशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां तृतीयाष्टके पञ्चमप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ तृतीयकाण्डे पञ्चमप्रपाठके षष्ठोऽनुवाकः) ।

आदित्यग्रहमन्त्रा ये ते पञ्चम उदीरिताः ।

अथ षष्ठेऽनुवाके पत्नीविषया मन्त्रा उच्यन्ते ।

कल्पः—" अत्र दर्शपूर्णमासवत्पत्नीꣳ संनह्यति सं त्वा नह्यामीति विकारः " इति । पाठस्तु—

सं त्वा नह्यामीति । हे पत्नि त्वां पयसा घृतेन च निमित्तभूतेन संनह्यामि तदुभयसिद्ध्यर्थं सम्यग्योक्त्रेण बध्नामि । तथौषधीभिः सहितां अप उद्दिश्य तदुभयसिद्ध्यर्थं त्वां संनह्यामि । प्रजया निमित्तभूतयाऽहमध्वर्युरद्यास्मिन्कर्मणि त्वां संनह्यामि । अस्मे अस्मासु वाजमन्नं सनवः सनितुं दातुं सा पत्नी दीक्षिता भवतु ।

कल्पः—" प्रैतु ब्रह्मणस्पत्नीति प्रतिप्रस्थाता पत्नीमुदानयति" इति । पाठस्तु—

प्रैतु ब्रह्मण इति । ब्रह्मणो ब्राह्मणस्य यजमानस्य पत्नी प्रैतु पत्नीशालाया निर्गत्य प्रकर्षेण गच्छतु गत्वा प्रामोतु ।

कल्पः—"अथाहमनुकामिनीति पत्नी शालामुखीयमुपोपविश्य" इति । पाठस्तु—

अथाहमन्विति । अथाहमिह स्वे लोके स्थाने विशा उपविशामि । कीदृशी । अनुकामिनी यजमानस्याऽऽनुकूल्यं कामयमाना ।

कल्पः—" सुप्रजसस्त्वा वयमिति जपति " इति । पाठस्तु—

सुप्रजसस्त्वेति । हेऽग्ने सुप्रजसः शोभनापत्याः सुपत्नीर्धर्मपत्न्यो वयमद्व्यासः केनाप्यतिरस्कृताः सत्यस्त्वामुपसेदिम तव समीप उपविष्टाः स्मः । कीदृशं त्वां, सपत्नदम्भनं वैरिनाशकम् । अदाभ्यं केनाप्यतिरस्कार्यम् ।

कल्पः—" विचृत इमं वि ष्यामीति पत्नी योक्त्रम् " इति । पाठस्तु—

इमं वि ष्यामीति । सुकेतः शोभनज्ञानयुक्तः सविता प्रेरकोऽन्तर्यामी यं योक्त्ररूपं वरुणस्य पाशं पूर्वमबध्नीत तमिमं विष्यामि विमुञ्चामि । ततः सुकृतस्य फलभूत उत्तमे लोके धातुश्च परमेश्वरस्य योनौ स्थाने पत्या सह मे स्योनं सुखं करोमि ।

कल्पः—" प्रेषुदेहीति नेष्टा पत्नीमुदानयति " इति । पाठस्तु—

प्रेषुदेहीति । हे पत्नि प्रेहि शालामुखीयस्थानान्निर्गत्य पत्नेजनीरूप आनेतुं प्रकर्षेण गच्छोदेहि विलम्बमकृत्वोत्थाय गच्छ । ऋतस्य वामीर्यज्ञस्य प्रेरकोऽयमग्निस्ते गमनमनुमन्यमानोऽग्रं नयतु पुरतः प्रेरयतु । अदितिर्भूमिश्च मध्यं ददताम् । उभयोः पार्श्वयोर्मध्येऽवस्थितं मार्गं प्रयच्छतु । त्वं च रुद्रावसृष्टाऽसि क्रूरेणोपद्रवकारिणा देवेन विमुक्ताऽसि । अतो युवा नामासि युवतिर्वा बाधकेभ्यः पृथग्भूता वाऽसि । इत्यमाकारयन्तं मां नेष्टारं मा हिंसीर्मा बाधस्व ।

कल्पः—" पत्नेजनीर्गृह्णाति प्रत्यङ्क्ते(ङ्क्ति)ष्ठन्ती वसुभ्यो रुद्रेभ्य आदित्येभ्य इति " इति । पाठस्तु—

वसुभ्यो रुद्रेभ्य इति । हे आपो वो युष्मान्पत्नेजनीर्गृह्णामि । किमर्थं, वस्वादिदेवप्रीत्यर्थम् । किंच, यज्ञार्थमपि पत्नेजनीर्वो गृह्णामि ।

सादयामीति । कल्पः—" पत्नी पत्नेजनीः सादयति प्रत्यङ्क्ते(ङ्क्ति)ष्ठन्ती वसुभ्यो रुद्रेभ्य आदित्येभ्य इति " इति ।

---

१ क. घ. ङ. च. करोतु ।

(पत्नीविषया मन्त्राः)

अत्र सादयामीत्येतावानाम्नातो मन्त्रः। तस्य च शेषत्वेन वसुभ्य इत्यादिकं गृह्णामीतिपदव्यतिरिक्तं सर्वमनुषज्य पूर्ववद्व्याख्येयम्।

कल्पः—" विश्वस्य ते विश्वावत इति हिंकारमनुदुगात्रा पत्नीं संरूयापयति " इति।

हिंकारमुच्चार्यानन्तरमुद्गाता यथा पत्नीं पश्यति तथाऽध्वर्युरिमं मन्त्रमुच्चारयन्प्रदर्शयेदित्यर्थः। पाठस्तु—

विश्वस्य त इति। हेऽग्ने विश्वस्य ते संदृशि विश्वात्मकस्य तव कटाक्षवीक्षणे सति तथा विश्वमस्यास्तीति विश्ववान्। वृष्णियं बलमस्यास्तीति वृष्णियावान्, तादृशस्य तव वीक्षणे सति वामीवननीयस्यानुष्ठानस्य प्रवर्तकोऽहं विश्वा रेतांसि बहुपुत्रकारणानि सर्वाण्यपि वीर्याणि धिषीयानुक्रमेण पत्न्यां स्थापयेयं।

कल्पः—" अगन्देवानिति च पत्न्यैप उपप्रवर्तयति " इति। पाठस्तु—

अगन्देवानिति। अयं यज्ञो देवानगन्प्राप्नोत्। देवीर्द्योतमाना आपो देवेभ्योऽस्मदीयं यज्ञं नितरामशिषन्विस्पष्टमुक्तवत्यः। अस्मिन्यजमाने सुन्वति सोमाभिषवं कुर्वति स्वाहाकृताः स्वाहाकारेण संपादिताः समुदसमाने स्वर्गेऽवस्थिता आशिषः फलविशेषा ये संपद्यन्ते ते सर्वेऽप्यनुक्रमेण गन्धर्वं पत्न्या मम गन्धर्ववत्पियं यजमानमाविशत प्राप्नुवन्तु। वातस्य यज्ञप्रवर्तकस्य वायोः। " वाताद्वा अध्वर्युर्यज्ञं प्रयुङ्क्ते " इत्यन्यत्राऽऽम्नातम्। तस्य वायोः पत्मन्पतने प्रेरणे सतीडः फलसाधनभूताः स्तोत्रविशेषा ईडिता ऋत्विग्भिः प्रयुक्ताः। तस्मात्तत्फलं सर्वं यजमानः प्राप्नोतीति तात्पर्यार्थः। अत्र सं त्वा नह्यामीत्ययं योक्त्रबन्धनमन्त्रो दीक्षापकरण इन्द्रस्य योनिरसीत्येतस्मान्मन्त्रात्पूर्व द्रष्टव्यः। तत्रैवाथाहं सुप्रजस इत्येतौ द्रष्टव्यौ। इमं वि ष्यामीति मन्त्रोऽवभृथानुवाके देवीरापः एष व इत्येतस्मात्पूर्व द्रष्टव्यः। प्रेषुदेहीति मन्त्रो हृदे त्वेत्यनुवाके देवीरापो अपां नपादित्येतस्मात्पूर्वं द्रष्टव्यः। वसुभ्य इति ग्रहणसादनमन्त्रौ तनूदस्य वोऽक्षित्या उन्नय इत्येतस्मादूर्ध्वं द्रष्टव्यौ।

अत्र विनियोगसंग्रहः—

सं त्वा पत्न्यां योक्त्रबन्धः प्रैतु शालामुखे नयेत्।
अथाहमुपविश्यैषा सुप्रजेति जपेदथ॥

---

१ क. °येयम। क°। २ ख. °त्यत्र उ°।

(दर्शपूर्णमासाङ्गभूतानां स्रुचां वृक्षविशेषाणां विधानम्)

इमं काले योक्त्रमोकः प्रेहि पत्नीमुदानयेत्
वसु पत्नेजनीः पत्नी गृहीत्वा तेन सादयेत् ॥
विश्वस्य पत्नीमुद्भावा संख्यापयति सा त्वगन् ।
अग्नः प्रवर्तयन्(त्यू)रावत्र मन्त्रा दश स्मृताः ॥

इति श्रीमत्सायणार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेद-तैत्तिरीयसंहिताभाष्ये तृतीयकाण्डे पञ्चमप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ तृतीयाष्टके पञ्चमप्रपाठके सप्तमोऽनुवाकः) ।

वषट्कारो वै गायत्रियै शिरोऽच्छिनत्तस्यै रसः परोऽपतत्स पृथिवीं प्राविशत्स खादिरोऽभवत्तस्मात्खादिरः स्रुवो भवति छन्दसामेव रसेनावयति सरसा अस्याऽऽहुतयो भवन्ति तृतीयस्यामितो दिवि सोम आसीत्तं गायत्र्याऽहरत्तस्य पर्णमच्छिद्यत तत्पर्णोऽभवत्तत्पर्णस्य पर्णत्वं यस्य पर्णमयी जुहूः (१) भवति सौम्या अस्याऽऽहुतयो भवन्ति जुषन्तेऽस्य देवा आहुतीर्देवा वै ब्रह्मन्नवदन्त तत्पर्ण उपाशृणोत्सुश्रवा वै नाम यस्य पर्णमयी जुहूर्भवति न पापꣳ श्लोकꣳ शृणोति ब्रह्म वै पर्णो विष्मरुतोऽन्नं विष्मारुतोऽश्वत्थो यस्य पर्णमयी जुहूर्भवत्यान्नेनैवान्नमव रुन्धेऽश्वत्थ्युपभृद्ब्रह्मणैवान्नमव रुन्धेऽथो ब्रह्म (२) एव विश्यध्यूहति राष्ट्रं वै

(दर्शपूर्णमासाङ्गभूतानां स्रुचां वृक्षविशेषाणां विधानम्)

पर्णो विडश्वत्थो यत्पर्णमयी जुहूर्भवत्याश्वत्थ्युपभृद्राष्ट्रमेव विश्यधि गूहति प्रजापतिर्वा अजुहोत्सा यत्राऽऽहुतेः प्रत्यतिष्ठत्ततो विकङ्कत उदतिष्ठत्ततः प्रजा असृजत यस्य वै कङ्कतीध्रुवा भवति प्रत्येवास्याऽऽहुतयस्तिष्ठन्त्यथो प्रैव जायत एतद्वै स्रुचा रूपं यस्यैव रूपाः स्रुचो भवन्ति सर्वाण्येवैन रूपाणि पशूनामधि तिष्ठन्ते नास्यापरूपमात्मञ्जायते (१) ॥

(जहूरथो ब्रह्म सुचा सप्तदश च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां तृतीयाष्टके पञ्चमप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ तृतीयकाण्डे पञ्चमप्रपाठके सप्तमोऽनुवाकः) ।

षष्ठेऽनुवाके संप्रोक्ता योक्त्रबन्धादिमन्त्रकाः ।

अथ सप्तमेऽनुवाके दर्शपूर्णमासाङ्गभूतानां स्रुचां वृक्षविशेषा विधीयन्ते ।

तत्र स्रुववृक्षं विधत्ते —

वषट्कारो वा इति । वषट्काराभिमानी देवः केनापि विरोधेन गायत्र्याः शिरश्चिच्छेद । तदा तस्या गायत्र्य शिछन्नप्रदेशाज्जलं भूमौ पतित्वा खादिरो वृक्षोऽभवत् । अतः स्रुवः खादिरः कर्तव्यः । तथा सति स्रुवेण यद्यदवद्यति तत्सर्वं छन्दोरसेनावत्तं भवति । ततोऽस्य यजमानस्याऽऽहुतयः सरसा भवन्ति ।

अथ जुह्वा वृक्षविशेषं विधत्ते—

तृतीयस्यामिति । इतो भूलोकादारभ्य गण्यमानो यो द्युलोकस्तृतीयो भवति तत्र सोमः पूर्वमासीत् । तं च गायत्री समाहरत् । आहरत्यनेनेति व्युत्पत्त्यनुवाके प्रकाशितः । तस्याऽऽहियमाणस्य सोमस्यैकं पर्ण भूमौ पतित्वा पलाशवृक्षोऽभवत् । पर्णजन्यत्वात्तस्य वृक्षस्य पर्णमय संपन्नम् । तादृशेन पर्णवृक्षेण जुहूं निष्पादयेत् । तथा सति जुह्वा हूयमाना आहुतयः सर्वाः सोमबन्धिन्यो भवन्ति । देवाश्च ता आहुतीः प्रीतिपुरःसराः सेवन्ते ।

तं पर्णवृक्षं प्रकारान्तरेण प्रशंसति—

देवा वा इति । यदा देवा ब्रह्मतत्त्वविषये परस्परं संवादं रहसि कृतवन्तस्तदानीं पर्णवृक्षाभिमानी देवस्तद्वृक्षच्छायायामुपविष्टानां देवानां वचनमशृणोत् । तस्मात्सुश्रवा इति तस्य नाम संपन्नम् । यस्यादयं वृक्षः सुश्रवास्तस्माज्जुह्वास्तन्मयत्वे सति यजमानः शोभनं स्तुतिरूपमेव वाक्यं सर्वदा शृणोति न तु कदाचिदपि पापं श्लोकं निन्दावचनं शृणोति ।

अथ जुह्वाः पर्णमयीत्वं दृष्टान्तार्थमनुवदन्नुपभृतोऽश्वत्थवृक्षं विधत्ते—

ब्रह्म वै पर्ण इति । देवैरुच्यमानस्य ब्रह्मणः श्रवणात्पर्णवृक्षोऽपि ब्रह्मैव । वैश्यजात्यभिमानित्वेन मरुतां सृष्टत्वान्मरुतोऽपि विड्रूपाः । कृष्यादिपरैर्वैश्यैः संपादितत्वादन्नमपि मरुद्रूपम् । " मरुतां वा एतदोजो यदश्वत्थः " इति श्रवणादश्वत्थस्य मारुतत्वम् । एवं स्थिते सति यो यजमानो जुहूं पर्णमयीं करोति स एवोपभृतमाश्वत्थस्य कुर्यात् । उभयस्मिन्कृते सति जुहूरूपेण ब्रह्मणैवाश्वत्थस्वामिनां मरुतां विड्रूपान्नमवरुद्धं भवति । किंच, ब्राह्मणजातिमेव वैश्यजातावधिकत्वेन स्थापयति । तदुभयमपि प्रकारान्तरेण प्रशंसति—

राष्ट्रं वै पर्ण इति । पर्णवृक्षस्याभिब्राह्मणजातिनिवासस्थानत्वाद्राष्ट्रत्वं पर्णरूपत्वम् । मरुद्देवताद्वाराऽश्वत्थस्य विड्रूपत्वम् । अतः पूर्वोक्तरीत्या जुहूपभृतोर्वृक्षद्वयनिष्पादितयोः सत्योर्ब्रह्मरूपं राष्ट्रमश्वत्थरूपायां विश्यधिकत्वेन स्थापितं भवति ।

अथ ध्रुवाया वैकङ्कतवृक्षं विधत्ते—

प्रजापतिर्वा इति । प्रजापतिना पूर्वहुताऽऽहुतिर्यत्र स्थिता तस्माद्देशाद्वैकङ्कतवृक्ष उदपद्यत । तस्माद्वैकङ्कताद्यज्ञसाधनभूतात्प्रजा असृजत । तस्माद्ध्रुवां वैकङ्कतीं कुर्यात् । तथा सत्यस्य यजमानस्याऽऽहुतयः प्रतिष्ठिता भवन्ति । किंचायं प्रजा उत्पादयति । स्रुग्वृक्षविधिमुपसंहरति—

एतद्वै स्रुचामिति । खादिरत्वं पर्णमयीत्वमाश्वत्थत्वं वैकङ्कतत्वं चेति यदेतदेव क्रमेण स्रुचां [स्रुव]जुहूपभृद्ध्रुवाणां मुख्यं स्वरूपम् । तथा सति यस्य यजमानस्य स्रुच एवंरूपा भवन्ति, एनं यजमानं गवाश्वादिरूपाणि सर्वाण्यपि प्राप्नुवन्ति । किंचास्य यजमानस्याऽऽत्मन्स्वोदरे किंचिदप्यपत्यमपरूपं विरुद्धस्वरूपोपेतं न जायते, किंतु सर्वमप्यपत्यं सुस्वरूपमेव जायते ॥

---

१ ख. घ. च. 'श्वत्थं कृ° ।

(दधिग्रहमन्त्रोक्तिः)

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये तृतीयकाण्डे पञ्चमप्रपाठके
सप्तमोऽनुवाकः ॥ ७ ॥

(अथ तृतीयाष्टके पञ्चमप्रपाठकेऽष्टमोऽनुवाकः)।

उपयामगृहीतोऽसि प्रजापतये त्वा ज्योतिष्मते ज्योतिष्मन्तं गृह्णामि दक्षाय दक्षवृधे रातं देवेभ्योऽग्निजिह्वेभ्यस्त्वर्तायुभ्य इन्द्रज्येष्ठेभ्यो वरुणराजभ्यो वातापिभ्यः पर्जन्यात्मभ्यो दिवे त्वाऽन्तरिक्षाय त्वा पृथिव्यै त्वाऽपेन्द्र द्विषतो मनोऽप जिज्यासतो जह्यप यो नोऽरातीयति तं जहि प्राणाय त्वाऽपानाय त्वा व्यानाय त्वा सते त्वाऽसते त्वाऽद्भ्यस्त्वौषधीभ्यो विश्वेभ्यस्त्वा भूतेभ्यो यतः प्रजा आक्षिद्रा अजायन्त तस्मै त्वा प्रजापतये विभूदाव्ने ज्योतिष्मते ज्योतिष्मन्तं जुहोमि (१) ॥

(ओषधीभ्यश्चतुर्दश च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां तृतीयाष्टके
पञ्चमप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ तृतीयकाण्डे पञ्चमप्रपाठकेऽष्टमोऽनुवाकः)।

इष्टयङ्गानां स्रुचां वृक्षाः सप्तमे समुदीरिताः।

अथाष्टमे दधिग्रहमन्त्रा उच्यन्ते।

कल्पः—" उपयामगृहीतोऽसि प्रजापतये त्वा ज्योतिष्मते ज्योतिष्मन्तं गृह्णामीति दधि गृहीत्वा " इति। पाठस्तु—

(दधिग्रहमन्त्रोक्तिः)

उपयामगृहीत इति । हे दधिग्रह, उपयामेन पार्थिवपात्रेण गृहीतोऽसि । ज्योतिष्मते प्रजापतये ज्योतिष्मन्तं त्वा गृह्णामि । दक्षान्कर्मकुशलान्वर्धयतीति दक्षवृध्, तस्मै दक्षवृधे दक्षाय दक्षनाम्ने रातं पूर्वं प्रजापतिना दत्तम् । किंच देवेभ्यो रातं दत्तम् । कीदृशेभ्योऽग्निजिह्वेभ्यः । अग्निरेव जिह्वा येषां तेऽग्निजिह्वाः । ऋतं सत्यमात्मन इच्छन्तीत्यृतायवः । इन्द्रो ज्येष्ठो येभ्यस्त इन्द्रज्येष्ठाः । वरुणो राजा येषां ते वरुणराजानः । वातं वायुमाप्नुवन्तीति वातापिनो वाय्वाहारा इत्यर्थः । पर्जन्य एवाऽऽत्मा येषां ते पर्जन्यात्मानो वृष्ट्यादिसहिष्णव इत्यर्थः । ईदृशेभ्यो देवेभ्यो रातं त्वां गृह्णामि । तथा दिवे द्युलोकप्राप्त्यर्थं त्वां गृह्णामि । एवमन्तरिक्षाय त्वा पृथिव्यै त्वेत्युभयं योज्यम् ।

कल्पः—" अपेन्द्र द्विषतो मन इति हरति " इति । पाठस्तु—

अपेन्द्र द्विषत इति । त्रिविधो हि शत्रुर्द्विषञ्जिज्यासन्नरातीयंश्चेति । यजमानस्य विद्यमानं द्रव्यादिकं यो विनाशयति स द्विषन्नित्युच्यते । यस्तु द्रव्यमपहर्तुं शक्तोऽप्यस्य वयोहानिं मरणमेवेच्छति स जिज्यासन्नित्युच्यते । रातिर्दानमरातिरदानं तदात्मन इच्छति देयत्वेन प्राप्तं किमपि न ददातीत्यर्थः । तादृशोऽरातीयन्नित्युच्यते । हे इन्द्र त्वं द्विषतः शत्रोर्मनोऽपजहि । तथा जिज्यासतः शत्रोर्मनोऽपजहि । तथा यो नोऽस्माकमरातिमिच्छति तमपजहि ।

कल्पः—" प्राणाय त्वाऽपानाय त्वेति जुहोति " इति । पाठस्तु—

प्राणाय त्वेति । हे दधिग्रह प्राणाय प्राणभृत्वै त्वां जुहोमि । एवमपानाय त्वेत्यादिषु योज्यम् । प्राण ऊर्ध्ववृत्तिः । अपानोऽवाग्वृत्तिः । व्यानो मध्यवृत्तिः । शास्त्रीयमार्गवर्ती पुरुषः संस्तद्विपरीतोऽसन् । आप ओषधयश्च प्रसिद्धाः । ओषधीभ्य इत्यत्रानाम्नातमपि त्वेतिपदमनुषञ्जनीयम् । विश्वानि भूतानि सर्वप्राणिनस्तेषां सर्वेषां प्रीत्यै त्वां जुहोमि । किंच, यतः प्रजापतेः सकाशात्प्रजाः सर्वा अक्षिखद्राः खेदरहिता उत्पन्नाः स प्रजापतिर्विभुत्वमैश्वर्यं ददातीति विभूदावा । सर्वप्रकाशकत्वेन ज्योतिष्मन्तं त्वां जुहोमि ।

अत्र विनियोगसंग्रहः—

उपया दधि गृह्णात्यपेन्द्रेति हरति ग्रहम् ।
प्राणायेति जुहोत्येवं त्रयो मन्त्रा इहेरिताः ॥

एते च मन्त्रा यमग्ने पृत्सु मर्त्यमित्येतस्मान्मन्त्रादूर्ध्वं द्रष्टव्याः ॥

---

१ ख. घ. च. °हर्तुमशक्तोऽस्य ।

(दधिग्रहमन्त्रव्याख्यानम्)

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये तृतीयकाण्डे पञ्चमप्रपाठकेऽ-
ष्टमोऽनुवाकः ॥ ८ ॥

अथ तृतीयाष्टके पञ्चमप्रपाठके नवमोऽनुवाकः)।

यां वा अध्वर्युश्च यजमानश्च देवतामन्त-
रितस्तस्या आ वृश्च्येते प्राजापत्यं दधिग्रहं
गृह्णीयात्प्रजापतिः सर्वा देवता देवताभ्य एव
नि हनुवाते ज्येष्ठो वा एष ग्रहाणां यस्यैष
गृह्यते ज्यैष्ठ्यमेव गच्छति सर्वासां वा एतद्दे-
वतानाꣳ रूपं यदेष ग्रहो यस्यैष गृह्यते सर्वा-
ण्येवैनꣳ रूपाणि पशूनामुप तिष्ठन्त उषयाम-
गृहीतः (१) असि प्रजापतये त्वा ज्योति-
ष्मते ज्योतिष्मतं गृह्णामीत्याह ज्योतिरेवैनꣳ
समानानां करोत्यग्निजिह्वेभ्यस्त्वर्तायुभ्य इत्या-
हैतावतीर्वै देवतास्ताभ्य एवैनꣳ सर्वाभ्यो
गृह्णात्यपेन्द्र द्विषतो मन इत्याह भ्रातृव्याप-
नुत्त्यै प्राणाय त्वाऽपानाय त्वेत्याह प्राणानेव
यजमाने दधाति तस्मै त्वा प्रजापतये विभू-
दाव्ने ज्योतिष्मते ज्योतिष्मन्तं जुहोमि (२)
इत्याह प्रजापतिः सर्वा देवताः सर्वाभ्य एवैनं
देवताभ्यो जुहोत्याज्यग्रहं गृह्णीयात्तेजस्का-
मस्य तेजो वा आज्यं तेजस्व्येव भवति सोम-
ग्रहं गृह्णीयाद्ब्रह्मवर्चसकामस्य ब्रह्मवर्चसं वै
सोमो ब्रह्मवर्चस्येव भवति दधिग्रहं गृह्णीया-

(दधिग्रहमन्त्रव्याख्यानम्)

त्पशुकामस्योग्वै दध्यूर्क्पशव ऊर्जैवास्मा ऊर्जं पशूनव रुन्धे (३)

(उपयामगृहीतो जुहोमि त्रिचत्वारिंशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां तृतीयाष्टके पञ्चमप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ तृतीयकाण्डे पञ्चमप्रपाठके नवमोऽनुवाकः)।

दधिग्रहस्य ये मन्त्रा अष्टमे ते प्रकीर्तिताः ।

अथ नवमेऽनुवाके ते मन्त्रा व्याख्यातव्याः ।

तत्राऽऽदौ दधिग्रहं विधत्ते- —

यां वा अध्वर्युरिति । सोमयागे देवताबाहुल्यादध्वर्युयजमानौ प्रमादेन यस्या देवताया अन्तरायं कुर्वाते तस्या देवताया उभौ विच्छिनौ भवतस्तस्या देवताया अपराधिनावित्यर्थः । अतोऽपराधपरिहाराय प्रजापतिदेवताकं दधिग्रहं गृह्णीयात् । प्रजापतिश्च स्रष्टृत्वात्सर्वदेवतारूपः । अतस्तस्मै ग्रहं दत्त्वा सर्वदेवताभ्योऽन्तवन्तावित्येवं निह्नवमपलापं कुरुतः । तेनापलापेन देवता द्वेषं मुञ्चति ।

अस्य ग्रहस्य सर्वग्रहेभ्यः प्राथम्यं विधत्ते—

ज्येष्ठो वा इति । ग्रहाणां मध्ये ज्येष्ठः प्रथमभावी । तस्मात्प्रथमं गृह्णीयादित्यर्थः । यस्य यजमानस्यैष ग्रहः प्रथमं गृह्यते स यजमानो ज्यैष्ठ्यमेव गच्छति सर्वेषां यजमानानां मध्ये मुख्यत्वं प्राप्नोत्येव ।

तस्य ग्रहस्य प्रजापतिदेवताकत्वं प्रशंसति—

सर्वासां वा इति । एष प्रजापतिदेवताको ग्रह इति यदेतत्सर्वासामेव देवतानां स्वरूपम् । प्रजापतेः सर्वदेवतात्मकत्वात् । अतो यस्य यजमानस्यैष गृह्यत एनं यजमानं पशूनां सर्वाणि रूपाणि गवाश्वादीनि प्राप्नुवन्ति ।

अत्र ग्रहणमन्त्रस्य पूर्वभागे ज्योतिर्विशेषणं प्रशंसति—

उपयामगृहीत इति । एनं यजमानं समानानां मध्ये ज्योतिरेव तेजोयुक्तमेव करोति ।

उत्तरभागे प्रजापत्यवयवभूतानां देवतानां प्रतिपादकान्यग्निजिह्वेभ्य इत्यादीनि नवसंख्याकानि चतुर्थ्यन्तपदानि, तेषां तात्पर्यं संगृह्य दर्शयति—

अग्निजिह्वेभ्य इति । हरणमन्त्रगतस्यापलपनहेतोरित्येतस्य तात्पर्यं दर्शयति—

(दधिग्रहमन्त्रव्याख्यानम्)

अपेन्द्र द्विषत इति। होमपन्त्रपूर्वभागे प्राणादिपदतात्पर्यं दर्शयति--

प्राणाय त्वेति। प्रजापतिपदतात्पर्यं दर्शयति--

तस्मै त्वेति। एनं दधिग्रहम्।

अत्र काम्यान्गुणविशेषांस्त्रीन्विधत्ते--

आज्यग्रहं गृह्णीयादिति। स्पष्टोऽर्थः।

अत्र मीमांसा।

चतुर्थाध्यायस्य चतुर्थपादे चिन्तितम्--

नित्ये(त्य)नैमित्तिकत्वे वा नित्यतैव दधिग्रहे।
देवान्तरायाज्ज्यैष्ठ्याय स्यादस्योभयरूपता॥
निमित्तत्वद्योतिनोऽत्र यदिशब्दादयो नहि।
अतोऽस्य न निमित्तत्वं केवला नित्यतोचिता॥

ज्योतिष्टोमे श्रूयते--"यां वै कांचिदध्वर्युर्यजमानश्च देवतामन्तरितस्तस्या आवृश्च्येते यत्पाजा त्यं दधिग्रहं गृह्णाति शमयत्येवैनाम्" इति। सोऽयं दधिग्रहो नित्यो नैमित्तिकश्चेत्युभयात्मकः। कुतः। आकारद्वयसद्भावात्। देवतान्तरायेण तद्देवताक्षोभमुपन्यस्य ग्रहेण समाधानाभिधानादन्तरायो निमित्तं ग्रहो नैमित्तिक इति प्रतिभाति। तथा ज्येष्ठत्वमाम्नातम्--"ज्येष्ठो वा एष ग्रहाणाम्" इति। ज्येष्ठत्वं नाम प्रशस्तत्वं, तच्च नित्यत्वे सत्युपपद्यते। नैमित्तिकस्य पाक्षिकत्वादप्रशस्तत्वम्। तस्माद्धेतुद्वयबलादुभयात्मक इति चेन्नैवम्। देवतान्तरायस्यानिमित्तत्वात्। निमित्तत्वे यदिशब्द उपबध्येत, सप्तमी वा श्रूयेत, यच्छब्दो वाऽन्तरायकर्त्रोरध्वर्युयजमानयोः सामानाधिकरण्येन प्रयुज्येत। "यदि रथंतरसामा सोमः स्यादैन्द्रवायवाग्रान्गृह्णीयाद्धिन्वे जुहोति यो वै संवत्सरमुख्यमभूत्वाऽग्निं चिनुते" इत्यादिषु संप्रतिपन्ननिमित्तेषु तददर्शनात्। तस्मात्केवलनित्यत्वमेव दधिग्रहस्योचितम्। देवताक्षोभतत्समाधानोपन्यासो विधेयदधिग्रहस्तुतयेऽर्थवादः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये तृतीयकाण्डे पञ्चमप्रपाठके नवमोऽनुवाकः॥ ९॥

---

१ ख. अथा २ क. ख. घ. ङ. च. देवतान्त°। ३ क. ख. घ. ङ. च °ष्ठ्यात्स्याद्°। च. °ष्ठ्याच्च स्या°।

(अथ तृतीयाष्टके पञ्चमप्रपाठके दशमोऽनुवाकः)।

त्वे क्रतुमपि वृञ्जन्ति विश्वे द्विर्यदेते त्रिर्भवन्त्युमाः । स्वादोः स्वादीयः स्वादुना सृजा समदं ऊ षु मधु मधुनाऽभि योधि । उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णाम्येष ते योनिः प्रजापतये त्वा । प्राणग्रहान्गृह्णात्येतावद्वा अस्ति यावदेते ग्रहाः स्तोमाश्छन्दाꣳसि पृष्ठानि दिशो यावदेवास्ति तत् (१) अव रुन्धे ज्येष्ठा वा एतान्ब्राह्मणाः पुरा विदामक्रन्तस्मात्तेषाꣳ सर्वा दिशोऽभिजिता अभूव न्यस्यैते गृह्यन्ते ज्यैष्ठ्यमेव गच्छत्यभि दिशो जयति पञ्च गृह्यन्ते पञ्च दिशः सर्वास्वेव दिक्ष्वधृष्नुवन्ति नवनव गृह्यन्ते नव वै पुरुषे प्राणाः प्राणानेव यजमानेषु दधाति प्रायणीये चोदयनीये च गृह्यन्ते प्राणा वै प्राणग्रहाः (२) प्राणैरेव प्रयन्ति प्राणैरुद्यन्ति दशमेऽहन्गृह्यन्ते प्राणा वै प्राणग्रहाः प्राणेभ्यः खलु वा एतत्प्रजा यन्ति यद्वामदेव्यं योनेश्च्यवते दशमेऽहन्वामदेव्यं योनेश्च्यवते यद्दशमेऽहन्गृह्यन्ते प्राणेभ्य एव तत्प्रजा न यन्ति (३) ॥

(तत्प्राणग्रहाः सप्तत्रिꣳशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां तृतीयाष्टके पञ्चमप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(गवामयनेऽतिग्राह्यप्राणग्रहाभिधानम्)

(अथ तृतीयकाण्डे पञ्चमप्रपाठके दशमोऽनुवाकः)।

अनुवाके तु नवमे दधिग्रहविधिः श्रुतः।

अथ दशमेऽनुवाके गवामयनेऽतिग्राह्याः प्राणग्रहाश्चोच्यन्ते।

कल्पः—" अतिग्राह्यायतने चत्वार्यतिग्राह्यपात्राणि प्रतिदिशं निहितानि भवन्ति मध्ये पञ्चमम्" इत्युपक्रम्य पञ्चसु पात्रेषु तत्तन्मन्त्रैर्ग्रहणासादने अभिधायेदमुक्तम्—"तान्यस्मिन्पात्र आनीय सर्वान्मध्यमे गृह्णाति त्वे क्रतुमपि वृञ्जन्ति विश्व इति " इति। पाठस्तु—

त्वे क्रतुमपीति। हेऽतिग्राह्य त्वे त्वयि क्रतुमपि वृञ्जन्ति सर्वमपि क्रतुमृत्विजः समापयन्ति। ग्रहान्तरेभ्योऽस्य को विशेष इति। तदुच्यते—यद्यस्मात्कारणाद्द्विस्त्रिर्द्विवारं त्रिवारं वेत्येवं पञ्चसु पात्रेषु गृहीता एते रसा विश्वे सर्वेऽप्यूमा रक्षका भवन्ति तस्मात्त्वयि क्रतोः समापनं युक्तम्। अतस्त्वमपि स्वादोरपि रसातिशयेन स्वादु यथा भवति तथा स्वादुना संसृज स्वादुत्वेन संसर्गं कुरु। अत ऊ षु अतोऽपि सुष्ठु यथा भवति तथा मधु मधुनाऽभियोधि मधुनो भागं मधुना भागान्तरेणाभियोधि। य एवं मधुरस उपयामेन पार्थिवपात्रेण गृहीतोऽसि प्रजापतये जुष्टं प्रियमितरपात्रेभ्य आनीतं त्वां मध्यमपात्रे गृह्णामि। सोऽयं ग्रहणमन्त्रः। एष खरप्रदेशस्ते योनिस्तव स्थानम्। अतः प्रजापत्यर्थं त्वामत्र सादयामि। अनेन मन्त्रेण गवामयनस्य संवत्सरसत्रस्योपान्त्येऽह्नि महाव्रताख्येऽतिग्राह्यं गृह्णीयात्।

अथ चतुर्थकाण्डसमाम्नातैरयं पुरो भुव इत्यादिभिर्मन्त्रैः पृश्निग्रहवत्तोमोन्मानरूपान्ग्रहान्विधत्ते—

प्राणग्रहान्गृह्णातीति। यथा यत्पृश्नयो गृह्यन्त इत्यत्र वायुरसि प्राणो नामेत्यादिभिर्मन्त्रैः सोमोन्मानविशेषा एव ग्रहा इत्युक्तमेवमत्राप्यर्थं पुरो भुव इत्यादिभिः प्राणमन्त्रैः सोमोन्मानविशेषाः प्राणग्रहा इत्युच्यन्ते। तान्गृह्णीयात्सोमोन्मानं कुर्यादित्यर्थः। एते ग्रहा इति यावत्। एतावदेवात्रापेक्षितमस्ति। स्तोमास्त्रिवृत्पञ्चदशादयः। छन्दांसि गायत्र्यादीनि। पृष्ठानि माध्यंदिनपवमानानन्तरभावीनि स्तोत्राणि। दिशः प्राच्याद्याः। इत्येतादृशं यावदेवापेक्षितमस्ति तत्सर्वमैतैर्ग्रहैरवरुन्धे। प्रकारान्तरेण प्राणग्रहान्प्रशंसति—

ज्येष्ठा वा एतानिति। यस्मादेतान्ग्रहान्गृह्णन्तो ब्राह्मणा ज्येष्ठा दिशां जेतारश्चाभूवंस्तस्माद्यस्यैते गृह्यन्ते स इतरेभ्यो ज्यैष्ठ्यं प्राशस्त्यमेव प्राप्नोति नाना-

दिक्ष्ववस्थिताश्च पुरुषास्तस्य भवन्ति । प्राणग्रहपर्यायाणां सैख्यां विधत्ते--

पञ्च गृह्यन्त इति । अयं पुरो भुव इत्यादिभिर्मन्त्रैः प्रथमः पर्यायः । अयं दक्षिणा विश्वकर्मेत्यादिभिर्द्वितीयः । अयं पश्चाद्विश्वव्यचा इत्यादिभिस्तृतीयः । इदमुत्तरात्सुवरित्यादिभिश्चतुर्थः । इयमुपरि मतिरित्यादिभिः पञ्चमः । प्राच्यादय ऊर्ध्वान्ताः पञ्च दिशः । तासु दिक्षु सर्वास्वेनेन पञ्चविधग्रहणेन समृद्धिं प्राप्नुवन्ति । एकैकस्मिन्पर्याये सोमांशुसैख्यां विधत्ते--

नवनव गृह्यन्त इति । शिरोवस्थितेषु सप्तसु च्छिद्रेष्वधोवस्थितयोश्च द्वयोश्छिद्रयोः संचरन्तः प्राणा नवसंख्याकाः । नवांशुग्रहणेन तान्यजमानेषु स्थापयति(न्ति) । अस्य ग्रहणस्य कालं विधत्ते--

प्रायणीय इति । संवत्सरसत्रस्य प्रथममहः प्रायणीयं, चरममहरुदयनीयं, तयोरुभयोर्गृह्णीयात् । तथा सति तेषां ग्रहाणां प्राणरूपत्वात्प्राणैरेव संवत्सरमुपक्रम्य प्राणैरेव समापितवन्तो भवन्ति । कालान्तरं विधत्ते--

दशमेऽहन्निति । संवत्सरसत्रस्य द्वादशाहविकृतित्वात्तदीयान्यहान्यत्र प्रयोक्तव्यानि । तेषु यद्दशममहस्तस्मिन्प्राणग्रहान्गृह्णीयात् । वामदेव्याख्यस्य साम्नः कया नश्चित्र आ भुवदित्येषा योनिः । दशमेऽहनि तु तां योनिं परित्यज्यान्यस्यामृचि तत्साम गीयते । तथा सति वामदेव्यं स्वयोनेश्च्यवत इति यत्, एतेनापराधेन प्रजाः प्राणेभ्यो यन्त्यपगच्छन्ति । तत्र प्राणग्रहाणां प्राणरूपत्वाद्दशमेऽहनि तेषां ग्रहणेन प्रजाः प्राणेभ्यो नापगच्छन्ति ।

अत्र विनियोगसंग्रहः--

" त्वे गवामयने पात्रेऽतिग्राह्यग्रहणं भवेत् ।
अयं पुरो भुवः प्राणग्रहाणां पञ्च मन्त्रकाः ॥
सोमांशवो नव नव ग्राह्याः पर्यायपञ्चके ।
कया नश्चित्र एतस्या योनेर्भ्रष्टं तु साम तत् ।
अग्निं नर इति ह्यत्र गीयते दशमेऽहनि " ॥ इति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये तृतीयकाण्डे पञ्चमप्रपाठके
दशमोऽनुवाकः ॥ १० ॥

---

१ ख. घ. च. 'रं च वि° । २ क. ग्रहे ।

(पाशुकहोत्रेपयोगिमन्त्राभिधानम्)

(अथ तृतीयाष्टके पञ्चमप्रपाठके एकादशोऽनुवाकः)।

प्र देवं देव्या धिया भरता जातवेदसम्। हव्या नो वक्षदानुषक्। अयमग्निः पृथु प्र देवयुर्होता यज्ञाय नीयते। रथो न योरभीवृतो घृणीवाञ्चेतति त्मना। अयमग्निरुरुष्यत्यमर्त्यादिव जन्मनः। सहसाखित्सहीयान्देवो जीवातवे कृतः। इडायास्त्वा पदे वयं नाभा पृथिव्या अधि। जातवेदो नि धीमह्यग्ने हव्याय वोढवे (१)। अग्ने विश्वेभिः स्वनीक देवैरूर्णावन्तं प्रथमः सीद योनिम्। कुलायिनं घृतवन्तꣳ सवित्रे यज्ञं नय यजमानाय साधु। सीद होतः स्व उ लोके चिकित्वान्त्सादया यज्ञꣳ सुकृतस्य योनौ। देवावीर्देवान्हविषा यजास्यग्ने बृहद्यजमाने वयो धाः। नि होता होतृषदने विदानस्त्वेषो दीदिवाꣳ असदत्सुदक्षः। अदब्धव्रततप्रमतिर्वसिष्ठः सहस्रंभरः शुचिर्जिह्वो अग्निः। त्वं दूतस्त्वम् (२) उ नः परस्पास्त्वं वस्य आ वृषभ प्रणेता। अग्ने तोकस्य नस्तने तनूनामप्रयुच्छन्दीद्यद्बोधि गोपाः। अभि त्वा देव सवितरीशानं वार्याणाम्। सदावन्भागमीमहे। महीं द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम्। पिपृतां नो भरीमभिः। त्वामग्ने पुष्करादध्यथर्वा निरमन्थत।

न्यत । मूर्ध्नो विश्वस्य वाघतः । तमु (३) त्वा दध्यङ्ङृषिः पुत्र ईधे अथर्वणः । वृत्रहणं पुरंदरम् । तमु त्वा पाथ्यो वृषा समीधे दस्यु-हन्तमम् । धनंजयꣳ रणेरणे । उत बुवन्तु जन्तव उदग्निर्वृत्रहाऽजनि । धनंजयो रणेरणे । आ यꣳ हस्ते न खादिनꣳ शिशुं जातं न बिभ्रति । विशामग्निꣳ स्वध्वरम् । प्र देवं देववीतये भरता वसुवित्तमम् । आ स्वे योनौ निषीदतु । आ (४) जातं जातवेदसि प्रियꣳ शिशीतातिथिम् । स्योन आ गृहपतिम् । अग्निनाऽग्निः समिध्यते कविर्गृहपतिर्युवा । हव्यवाड्जुह्वास्यः । त्वꣳ ह्यग्ने अग्निना विप्रो विप्रेण सन्त्सता । सखा सख्या समिध्यसे । तं मर्जयन्त सुक्रतुं पुरोयावानमाजिषु । स्वेषु क्षयेषु वाजिनम् । यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानः सचन्ते यत्र पूर्वे साध्याः सन्ति देवाः ॥ (५) ।

(वोढवे दूतस्त्वं तमु सीदत्वा यत्र चत्वारि च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां तृतीयाष्टके पञ्चमप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

(पाशुकहौत्रोपयोगिमन्त्राभिधानम्)

पूर्णपयोऽग्निना देवेन ये देवाः सूर्यः सं त्वा वषट्कारः स खदिर उपया-मगृहीतोऽसि यां वै त्वे ऋतुं प देवमेकादश ॥ ११ ॥

पूर्णा सहजाश्स्तवाग्ने वामीः पाणिरेव षट्त्रिंशत् ॥ ३६ ॥

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां तृतीयाष्टके

पञ्चमः प्रपाठकः ॥ ५ ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां तृतीयाष्टकः ॥ ३ ॥

(अथ तृतीयकाण्डे पञ्चमप्रपाठक एकादशोऽनुवाकः) ।

अतिग्राह्यप्राणनामग्रहा दशम ईरिताः ।

अथैकादशे पाशुकहौत्रोपयोगिमन्त्रा उच्यन्ते । तत्र ब्राह्मणग्रन्थे तृतीय-काण्डे षष्ठप्रपाठकेऽञ्जन्ति त्वामध्वरे देवयन्त इत्यत्र पाशुकहौत्रमन्त्राः प्राये-णोक्ताः । अवशिष्टास्तु मन्त्रा इहाभिधीयन्ते । तत्राष्टभिर्मन्त्रैरुत्तरवेदिं प्रत्यग्निं प्रणयेत् । तेषु प्रथममन्त्रमाह—

प्र देवं देव्येति । हे ऋत्विग्यजमाना जातवेदसमुत्पन्नस्य जगतो वेदितारं देवं देव्या प्रकाशरूपया विवेकयुक्तया धिया प्रकर्षेण भरत पोषयत । सोऽपि जातवेदा आनुषगनुषक्त आदरयुक्तो नोऽस्माकं हव्या वक्षद्वर्वांषि वहतु ।

अथ द्वितीयमन्त्रमाह—

अयमु ष्य प्रेति। अयमेव स्यः सोऽग्निर्यज्ञार्थमुत्तरवेदिं प्रति प्रकर्षेण नीयते। कीदृशोऽग्निः। देवानात्मन इच्छतीति देवयुः । होता होमस्य निष्पादकः । रथो न योः, रथ इव यवयिता पृथक्कर्ता । यथा रथः स्वस्मिन्नारूढं पुरुषं भूमिष्ठेभ्यः पृथक्कृत्य ग्रामे नयति तथाऽयमग्निः स्वस्मिन्हुतं हविरितरेभ्यो हविर्भ्यः पृथ-क्कृत्य देवेषु नयति । अभीवृतो यजमानैराभिमुख्येन स्वीकृतः । घृणी-वान्रश्मियुक्तः । तादृशोऽग्निस्त्मना चेतति स्वयमेव यजमानभक्तिं जानाति ।

तृतीयमन्त्रपाठस्तु—

अयमग्निरिति । अयं प्रणीयमानोऽग्निर्जन्मनो जन्ममात्रेणोरुष्यति प्रबुद्धो भवितुमिच्छति । अमृतादिव । यथा पीतेनामृतेन मरणरहितः प्रवर्तते तद्वत् ।

किंचायं देवो जीवातवे जीवनौषधाय सहस्रसित्सहीयान्कृतो बलवतोऽप्यतिप्रबलः कृतः । यदाऽयमग्निः प्रबलो भवति तदा स्वयमपि विनाशरहितो जीवति, यजमानमपि यज्ञनिष्पादनेन जीवयतीत्यर्थः । चतुर्थमन्त्रपाठस्तु--

इडायास्त्वेति । हे जातवेदोऽग्ने हव्याय वोढवे हवींषि वोढुं त्वां वयं[नि] धीमहि नितरां स्थापयामः । कुत्रेति तदुच्यते--पृथिव्या अध्युपरि नाभा नाभिसदृश आहवनीयायतने । तच्चाऽऽयतनमिडापदसदृशं, यथा गोरूपाया इडायाः पदं घृतयुक्तं तथेदं घृताहुतियुक्तं, तादृशे स्थाने स्थापयामः ।

पञ्चममन्त्रपाठस्तु--

अग्ने विश्वेभिरिति । विश्वेभिर्देवैः स्वनीक सर्वेऽपि देवा अस्य सेनारूपास्तादृश हेऽग्ने प्रथमो देवानां मध्ये मुख्यस्त्वं योनिं सीद स्थानं प्राप्नुहि । कीदृशं योनिम् । ऊर्णावन्तं, यथा कम्बलास्तरणोपेतो देशो मृदुस्तथाऽयं सेव्यस्तादृशं, कुलायिनं, यथा पक्षिणां नीडः सम्यङ्निर्मित एवमयमपि तादृशं, घृतवन्तं घृताहुत्याधारभूतम् । यद्वाऽऽहवनीयाख्यं कुलायोपेतं घृताहुतियुक्तं यज्ञं सवित्रेऽनुष्ठात्रे यजमानाय साधु नय सम्यक्समाप्तिं गमय । षष्ठमन्त्रमाह--

सीद होतरिति । हे होतर्होमनिष्पादक चिकित्वानभिज्ञस्त्वं स्वकीयस्थान उत्तरवेदिरूपे सीदोपविश । यज्ञं चेमं सुकृतस्य योनौ पुण्यकर्मणो योग्यस्थाने सादय. स्थापय । देवान्वेति कामयत इति देवावीर्देवापिय इत्यर्थः । तादृशस्त्वं देवान्हविषा यजासि पूजयसि । हेऽग्ने यजमाने बृहद्यो धा दीर्घमायुः स्थापय । सप्तममन्त्रमाह--

नि होतेति । होतृषदने होमनिष्पादकस्य योग्यस्थान उत्तरवेदिरूपेऽयमग्निर्नितरामसदत्सम्यगुपाविष्टवान् । कीदृशोऽग्निः । होता देवानामाह्वाता । विदानः स्थानाभिज्ञः । त्वेषो दीप्तिमान् । दीदिवान्देवेभ्यो हविषो दाता । सुदक्षोऽत्यन्तकुशलः। अदब्धव्रतप्रमतिरहिंसिते कर्मणि प्रकृष्टा मतिर्यस्य स तथाविधः। वसिष्ठोऽतिशयेन वासयिता । सहस्रसंख्याकानि हवींषि भरति पोषयतीति सहस्रंभरः। शुचिः शुद्धा होममोग्या जिह्वा ज्वाला यस्यासौ शुचिजिह्वः। अष्टममन्त्रमाह--

त्वं दूतस्त्वमिति । हेऽग्ने त्वं देवानां दूतोऽसि । अग्निर्देवानां दूत आसीदिति श्रुत्यन्तरात् । त्वमु नः परस्पास्त्वमेवास्माकमतिशयेन पाहकः । त्वं वस्य-

---

१ क. घ. ङ. च. नाभौ ।

(पाशुकहौत्रेऽपयोगिमन्त्राभिधानम्)

स्वमेयाग्निमन्कर्मणि निवासयोग्यः। हे वृषभ देवश्रेष्ठ, आ प्रणेता त्वमेवाऽऽभत्य यागस्य प्रवर्तकः, तौ (नस्तौ)कस्यास्पदृत्यस्य तनूनां तने शरीराणां विस्तारेऽप्रयुच्छन्नमादमकुर्वन्दीधत्तमोनिवारणेन दीपयन्। अथवा देवेभ्यो हविर्ददानो गोपाः पालकः सन्बोधि बुध्यस्वाप्रमत्तो भवेत्यर्थः। एतेऽष्टौ मन्त्रा उत्तरवेदिं प्रत्यग्निप्रणयनकाले होत्रा पठनीयाः।

अथाग्निमन्थने पञ्च मन्त्राः पठनीयाः। तत्र प्रथमं मन्त्रमाह—

अभि त्वेति। हे सवितर्देव प्रेरक परमेश्वर वार्याणां निवारणीयानां विघ्नानामीशानं विनिवारणे समर्थं त्वामभि प्राप्तुमिति शेषः। सदाऽवन्सर्वदा हे रक्षक भागं भजनीयमभीमहे त्वत्प्रसादात्प्राप्नुमः। अथ द्वितीयो मन्त्रः—

महीद्यौरिति। महती द्यौः पृथिवी चेत्येते उभे नोऽस्मदीयमिमं यज्ञं मिमिक्षतामाज्यहोमादिभिर्वर्धयतैः सेक्तुमिच्छां कुरुताम्। भरीमभिर्भरणैर्नोऽस्मान्पिपृतां पूरयताम्। अथ तृतीयः—

त्वामग्न इति। हेऽग्नेऽथर्वारूप ऋषिः पुष्करादधि पद्मपत्रस्योपरि त्वां निरमन्थत निःशेषेण मथितवान्। अत एव पञ्चमकाण्डे ब्राह्मणमाम्नातम्—" पुष्करपर्णे ह्येतमुपश्रितमविन्दत् " इति। कीदृशात्पुष्करात्। मूर्ध्न उत्तमाङ्गवत्प्रशस्तात्। विश्वस्य वाघतः सर्वस्य जगतो वाहकात्। इदं हि पुष्करपर्णमाग्निमन्थनयज्ञनिष्पादनादिद्वारा सर्वं जगन्निर्वहति। अथ चतुर्थः—

तमु त्वेति। हेऽग्नेऽथर्वणः पुत्रो दध्यङ्नामक ऋषिस्तमु त्वेधे तमु त्वां प्रज्वलितवान्। कीदृशं त्वां, वृत्रहणं वैरिविनाशनं पुरंदरं रुद्ररूपेणासुरसंबन्धिनां त्रयाणां पुराणां विदारयितारम्। अथ पञ्चमः—

तमु त्वा पाथ्य इति। हेऽग्ने पाथ्यनामकः कश्चिदृषिस्तमु त्वा समीधे तमेवं त्वां सम्यक्प्रज्वलितवान्। कीदृशः पाथ्यः। वृषा श्रेष्ठः। कीदृशं त्वां, दस्युहन्तमं तस्कराणामतिशयेन हन्तारम्। रणेरणे धनंजयं तेषु तेषु संग्रामेषु धनस्य जेतारम्। अथ वह्नौ जात ऋग्द्वयं होता पठेत्। तत्रेयं प्रथमा—

उत ब्रुवन्त्विति। उत जन्तवः सर्वेऽपि प्राणिनः परस्परमेवं ब्रुवन्तु। किमिति, अग्निरुदजनीति। कीदृशोऽग्निः। वृत्रहा शत्रुघाती, रणेरणे धनंजयश्च। अथ द्वितीया—

---

१ ख. घ. ङ. च. °सिवह°।

(पाशुकहौत्रोपयोगिमन्त्राभिधानम्)

आ यꣳ हस्त इति। खादिनं हविषां भक्षकम्। यमग्निं हस्ते न पाणाविव कर्मस्थित्यर्थं आबिभ्रति आ निधानादृत्विजो धारयन्ति। कमिव। जातं शिशुं न सद्यः समुत्पन्नं शिशुमिव। कीदृशमग्निं, विशां स्वध्वरं प्रजानां सम्यगहिंसकम्। तमग्निं पुरतः पश्याम इति शेषः।

अस्याग्नेः पूर्वाग्निना सह मेलने प्र देवमित्याद्याः षड्ऋचो होता पठेत्। तत्र प्रथमामाह—

प्र देवं देववीति। देववीतये देवानां हविःस्वादनाय देवं दीप्तिमन्तमग्निं भरत हे ऋत्विजः प्रकर्षेण पोषयत। कीदृशं देवं, वसुवित्तममतिशयेन हविर्लक्षणधनाभिज्ञम्। स च देव आगत्य स्वे योनौ पूर्वाग्निरूपे स्वकीये स्थाने निषीदतु नितरामुप समीपे प्रविष्टो भवतु। द्वितीयामाह—

आ जातमिति। हे ऋत्विज इदानीं जातं प्रियमतिथिरूपमेनमग्निं पूर्वमेव स्थिते जातवेदसि शिशीत शयानं कुरुत। कीदृशे जातवेदसि। स्योने सुखरूपे। कीदृशं जातम्, आ गृहपतिं सर्वतो गृहस्य पालकम्। तृतीयामाह—

अग्निनाऽग्निरिति। पूर्वसिद्धेनाग्निना सहेदानीमानीतोऽग्निः समिध्यते सम्यक्प्रज्वाल्यते। कीदृशोऽग्निः। कविर्विद्वान्। गृहपतिर्गृहस्य पालयिता। युवा नित्यतरुणः। हव्यं वहतीति हव्यवाट्। जुहूरेवाऽऽस्यं मुखं यस्यासौ जुहूवास्यः। चतुर्थीमाह—

त्वꣳ ह्यग्ने अग्निनेति। हे नूतनाग्ने त्वं पूर्वेणाग्निना सह सम्यक्प्रज्वाल्यसे। कीदृशस्त्वम्। विप्रो ब्राह्मणजात्यभिमानी सन्विनाशराहित्येन सर्वदाऽवस्थितः। सखा सखिवदितरस्मिन्नग्नौ प्रीतियुक्तः। कीदृशेनाग्निना। विप्रेण सता सख्या च। पञ्चमीमाह—

तं मर्जयन्तेति। हे ऋत्विजस्तमिमं मथितमग्निं मर्जयन्त शोधयत। कीदृशं, सुक्रतुं सुष्ठु क्रतुनिष्पादकम्। आजिषु संग्रामेषु पुरोयावानं पुरतो गन्तारम्। स्वेषु क्षयेषु यजमानसंबन्धिषु स्वकीयगृहेषु वाजिनमन्नसंपादकम्। षष्ठीमाह—

यज्ञेन यज्ञमिति। देवा देवत्वं प्राप्तवो यजमाना यज्ञेन यज्ञसाधनेन नूतनेनाग्निना सह यज्ञं यज्ञसाधनं पुरातनमग्निमजयन्त पूजितवन्तः। तानि मिलितानि अग्निद्वयसाध्यानि[धर्माणि] कर्माणि सुकृतानि प्रथमान्यासन्मुख्यान्यभवन्। ते [ह] हिमानस्ते खलु महान्तो यजमाना नाकं सचन्ते स्वर्गं समवयन्ति। यत्र स्वर्गे पूर्वे यजमानाः साध्याः साध्यफलोपेता देवाः सन्ति ये(दे)वा भूत्वा वर्तन्ते, तं नाकं सेव(सच)न्त इति पूर्वत्रान्वयः।

(पाशुकहौत्रोपयोगिमन्त्राभिधानम्)

अत्र विनियोगसंग्रहः—

अथ पाशुकहौत्रस्य शेष औत्तरवेदिके ।
अग्निप्रणयने ह्यष्टौ प्र देवमिति मन्त्रकाः ॥
अथाग्निमन्थने पञ्च जाते वह्नावुत द्वयम् ।
प्र देऽग्न्योर्मेलने षट् स्युर्मन्त्रा अत्रैकविंशतिः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये तृतीयकाण्डे पञ्चमप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवीरबुक्कमहाराजस्याऽऽज्ञापरिपालकेन माधवाचार्येण विरचिते वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये तृतीयकाण्डे पञ्चमः प्रपाठकः ॥ ५ ॥

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवीरबुक्कमहाराजस्याऽऽज्ञापरिपालकेन माधवाचार्येण विरचिते वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये तृतीयः काण्डः समाप्तः ॥३॥

मूलक्रमेण तृतीयाष्टके—प्र० ५ । अ० ५५ ।
भाष्यक्रमेण तृतीयकाण्डे—प्र० ५ । अ० ५५ ।
मूलक्रमेणाऽऽदितः समष्टयश्चकाः—का० ३ । प्र० १९ । अ० २७६ ।
भाष्यक्रमेणाऽऽदितः समष्टयश्चकाः—का० ३ । प्र० १९ । अ० २७१ ।

समाप्तोऽयं श्रीमत्सायणाचार्यविरचितभाष्यस-
हितकृष्णयजुर्वेदीयतैत्तिरीयसंहिता-
यास्तृतीयः काण्डः ॥ ३ ॥

अथ साभाष्यकृष्णयजुर्वेदीयतैत्तिरीयसंहितायां

चतुर्थं काण्डम् ।

(तत्र प्रथमप्रपाठके प्रथमोऽनुवाकः) ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
तृतीयकाण्डे सोमस्य शेषः प्रायेण वर्णितः ।
चतुर्थे त्वग्निचित्यङ्गमन्त्राणां पाठ ईर्यते ॥
अवान्तरविशेषास्तु विनियोगे[1] प्रदर्शिताः ।
चतुर्थकाण्डमग्न्याख्यं सद्भिः पाठकैर्युतम् ॥
उखासंभरणे मन्त्राः प्रथमे पाठके श्रुताः ।
एकादशानुवाकाः स्युस्तदर्थाः[2] स्युः क्रमादमी ॥
अभ्यादानं मृदाक्रान्तिः खननं हरणं तथा ।
उखानिर्माणसंस्कारौ सामिधेन्यस्तथाऽऽप्रियः ॥
अग्न्युत्पादो धारणं च याज्या इत्यनुवाकगाः ॥ इति[3] ।

(इति भाष्यकारोपोद्घातः) ।

(अथ कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थोऽष्टकः) ।

(तत्र प्रथमप्रपाठके प्रथमोऽनुवाकः) ।

हरि ॐ ।

युञ्जानः प्रथमं मनस्तत्त्वाय सविता धियः ।
अग्निं ज्योतिर्निचाय्य पृथिव्या अध्याऽभरत् । युक्त्वाय मनसा देवान्त्सुवर्यतो धिया दिवम् । बृहज्ज्योतिः करिष्यतः सविता प्रसुवाति तान् । युक्तेन मनसा वयं देवस्य सवितुः सवे । सुवर्गेयाय शक्त्यै । युञ्जते मन

---

१ ख. च. °शेषस्तु । २ ख. च. °गेषु दर्शिताः । च° । ३ ख. च. °दर्थास्तु क्र° । ४ घ. ङ. °ति । अत्रा° ।

(अभ्यादानाभिधानम्)

उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः । वि होत्रा दधे वयुनाविदेक इत् (१) महीं देवस्य सवितुः परिष्टुतिः । युजे वां ब्रह्म पूर्व्यं नमोभिर्वि श्लोका यन्ति पथ्येव सूरयः । शृण्वन्ति विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुः । यस्य प्रयाणमन्वन्य इद्ययुर्देवा देवस्य महिमानमर्चतः । यः पार्थिवानि विममे स एतशो रजांसि देवः सविता महित्वना । देव सवितः प्र सुव यज्ञं प्रसुव (२) यज्ञपतिं भगाय दिव्यो गन्धर्वः । केतपूः केतं नः पुनातु वाचस्पतिर्वाचमद्य स्वदाति नः । इमं नो देव सवितर्यज्ञं प्र सुव देवायुवꣳ सखिविदꣳ सत्राजितं धनजितꣳ सुवर्जितम् । ऋचा स्तोमꣳ समर्धय गायत्रेण रथंतरम् । बृहद्गायत्रवर्तनि । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां गायत्रेण छन्दसाऽऽददेऽङ्गिरस्वदग्नेरसि नारिः (३) असि पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वदा भर त्रैष्टुभेन त्वा छन्दसाऽऽददेऽङ्गिरस्वदग्नेरसि नारिरसि त्वया वयꣳ सधस्थ आऽग्निꣳ शकेम खनितुं पुरीष्यं जागतेन त्वा छन्दसाऽऽददेऽङ्गिरस्वद्धस्त आधाय सविता विभ्रदग्निꣳ हि-

(अभ्यादानाभिधानम्)

कृण्वत्यौम्। तया ज्योतिरजस्रमिदग्निं खात्वी न आ भराऽऽनुष्टुभेन त्वा छन्दसाऽऽ ददेऽङ्गिरस्वत् (४) ॥

(इयज्ञं प सुव नारिरानुष्टुभेन त्वा छन्दसा त्रीणि च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके प्रथमप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ चतुर्थकाण्डे प्रथमप्रपाठके प्रथमोऽनुवाकः)।

तत्राभ्यादानप्रतिपादके प्रथमानुवाके प्रथमं तावद्धोममन्त्रा उच्यन्ते। कल्पः—" जुह्वामष्टगृहीतं गृहीत्वा युञ्जानः प्रथमं मन इति यजुरष्टाभिर्ऋग्भिरेकामाहुतिं जुहोति " इति। तत्र प्रथमामृचमाह—

युञ्जान इति। सविता प्रेरकः परमेश्वरः प्रथममग्निचयनविषये मनो युञ्जानः समादधानो धिय इष्टकादिविषयाणि ज्ञानानि तत्वाय तनित्वा विस्तार्याग्निं ज्योतिर्निचाय्य चीयमानमग्निं सफलानां कर्मणां प्रकाशनसाधनभूतं निश्चित्य पृथिव्या अध्यामरद्[1] भूमेरुपर्यानीतवान्[2]। अनन्तरं तमग्निमुखात्[3] क्षणपृथिव्यां स्थापयितुमुखानिर्माणाद् विभं होमं करोमीति भावः। अथ द्वितीयामाह—

युक्त्वाय मनसेति। सविता तानिन्द्रियविशेषान्भर्कर्षेण सुवति प्रेरयति। किं कृत्वा, देवान्क्रीडापरत्वेन चपलानिन्द्रियविशेषान्मनसा युक्त्वाय विषयेभ्यो नियम्य। कीदृशानिन्द्रियविशेषान्, सुवर्यतः स्वर्गं गच्छतः स्वर्गप्राप्त्यर्थमुद्यतानित्यर्थः। बृहज्ज्योतिः प्रौढं चीयमानमग्निं धिया दिवं करिष्यतस्तत्तदिष्टकादिविषयया प्रज्ञया द्योतमानं कर्तुमुद्यतान्। अथ तृतीयामाह—

युक्तेन मनसेति। यस्मात्पूर्वोक्तरीत्या सवितेन्द्रियाणि प्रेरयति तस्माद्वयं सवितुर्देवस्य प्रेरणे सति युक्तेन विषयेभ्यो नियमितेन मनसा सुवर्गेयाय स्वर्गलोके गीयमानस्याग्नेः संपादनाय शक्त्यै शक्ता भूयास्मेति शेषः। अथ चतुर्थीमाह—

युञ्जते मन इति। विप्रस्य ब्राह्मणस्य यजमानस्य संबन्धिनो विप्रा

---

१ घ. ङ. °कावि। २ ख. च. °रदाहृतवान्भूमे°। ३ ख. च. °न्। तदनन्तरम°। ४ ख. च. °क्षणं पृ°। ५ ख. च. °रोतीति।

(अभ्यादानाभिधानम्)

ऋत्विजो मनो युञ्जते प्रथमं स्वकीयं मनो विषयेभ्यो निवर्त्य समाहितं कुर्वन्ति । उतापि च धिय इष्टकादिविषयज्ञानानि युञ्जते संपादयन्ति । कीदृशस्य विप्रस्य । बृहतः प्रभूताग्निचयनोद्योगेनाभिवृद्धस्य विपश्चितो विदुषः प्रयोगाभिज्ञस्य । कीदृशा विप्राः । होत्रा होमशीलाः। कर्मण्यालस्यरहिता इत्यर्थः । एक इदेक एव सविता विदधे सर्वमिदं निर्मितवान् । कीदृशः सविता । वयुनावित्, ऋत्विग्यजमानाभिप्रायाभिज्ञः । कथमेक एव सर्वमिदं कृतवानिति न विस्मेतव्यम् । यतः सवितुर्देवस्य परिष्टुतिर्महीं परितः सर्वेषु वेदेषु श्रूयमाणा स्तुतिर्महती । अथ पञ्चमीमाह--

युजे वां ब्रह्मेति । यजमानः पत्नी चेत्येतौ हे दंपती वां युवयोरर्थे पूर्वैः पुरातनैर्महर्षिभिरनुष्ठितं ब्रह्म परिवृढमग्निचयनाख्यं कर्म नमोभिर्नमस्कारपूर्वकैरिष्टकोपधानादिभिर्युजे संपादयामि । तस्मिन्संपादिते सति श्लोका यजमानस्य कीर्तयो वियान्ति भूमौ विविधं प्रसरन्ति । तत्र दृष्टान्तः--पथ्या सूरा इव गीर्वाणमार्गेऽन्तरिक्षे सूर्यरश्मयो यथा प्रसरन्ति तद्वत् । किंच, अमृतस्य प्रजापतेः पुत्रा ये देवा दिव्यानि धामान्यातस्थुः प्राप्तवन्तस्तेऽपि विश्वे सर्वे शृण्वन्ति । यजमानस्य कीर्तिमिति शेषः । अथ षष्ठीमाह--

यस्य प्रयाणमिति । यस्य सवितुः प्रयाणं प्रवृत्तिमन्ये सर्वे देवा अनुययुरिदबश्यमनुगच्छन्त्येव । किं कुर्वन्तः । अस्य देवस्य महिमानमर्चंतोऽर्चयन्तः । किंच, यः सविता पार्थिवानि रजांसि विममे पृथिवीगतान्परमाणून्विशेषेण गणयित्वा निश्चितवान्स सविता देवो महित्वना महत्त्वेनैतशो व्याप्तवानेति सर्वत्र गच्छतीत्येतशः । अथ सप्तमीमाह--

देव सवितरिति । हे सवितर्देव यज्ञं प्रसुव प्रकर्षेण प्रेरय, यज्ञपतिं यजमानं च प्रसुव । किमर्थम् । भगाय सौभाग्याय । दिव्यो दिवि स्वर्गे भवः काश्चिदूर्ध्वः केतपूः केतं परकीयाचित्ते वर्तमानं ज्ञानं पुनाति शोधयतीति केतपूः । स च नोऽस्माकं केतं चित्तवर्तिज्ञानं पुनातु भ्रान्तिपरिहारेण शोधयतु । वाचस्पतिरद्यास्मिन्कर्मणि नोऽस्मदीयां वाचं स्वदाति स्वदयतु ।

इत्थमृचः सप्तोक्त्वाऽष्टमं यजुराह--

इमं नो देवेति । हे सवितर्देव नोऽस्मदीयमिमं यज्ञं प्रसुव । कीदृशं, देवै-

---

१ ख. च. °षयाणि ज्ञा° । २ ख. घ. ङ. च. देवषु । ३ क. घ. ङ. °रिहदं । ४ क. घ. ङ. पथ्याः । ५ ख. च. °न्ये दे° ।

(अभ्यादानाभिधानम्)

यौति मिश्री भवतीति देवायुस्तं देवायुवं, सखायं स्वनिष्पादकं यजमानं वेत्तीति सखिवित्तम्। सत्राणि द्वादशाहादीनि जयति वशी करोतीति सत्राजित्तम्। तानि हि चीयमानमग्निमपेक्षन्ते। धनं जयति फलरूपेण संपादयतीति धनजित्तम्। सुवः स्वर्गं जयति फलरूपेण संपादयतीति सुवर्जित्तम्।

अग्निचयनार्थानां चतुर्थकाण्डगतानां मन्त्राणां पञ्चमकाण्डे क्रमेणैव ब्राह्मणमाम्नातम्। तत्राऽऽदौ युञ्जान इत्यादिभिर्मन्त्रैर्होमं विधत्ते—

"सावित्राणि जुहोति प्रसूत्यै" [सं० का० ५ प्र० १ अ० १] इति। सविता येषु मन्त्रेषु प्रतीयते तानि सावित्राणि, तैर्होमे सति यजमानं सविता कर्मणि प्रसौति। द्रव्यं विधत्ते—

"चतुर्गृहीतेन जुहोति चतुष्पादः पशवः पशूनेवाव रुन्धे" [सं० का० ५ प्र० १ अ० १] इति। चतुःसंख्यां पुनः प्रशंसति—

"चतस्रो दिशो दिक्ष्वेव प्रतितिष्ठति" [सं० का० ५ प्र० १ अ० १] इति। पुनरपि प्रकारान्तरेण प्रशंसति—

"छन्दाꣳसि देवेभ्योऽपाक्रामन्न वोऽभागानि हव्यं वक्ष्याम इति तेभ्य एतच्चतुर्गृहीतमधारयन्पुरोनुवाक्यायै याज्यायै देवतायै वषट्काराय यच्चतुर्गृहीतं जुहोति छन्दाꣳस्येव तत्प्रीणाति तान्यस्य प्रीतानि देवेभ्यो हव्यं वहन्ति" [सं० का० ५ प्र० १ अ० १] इति।

नानाविधच्छन्दोयुक्तपुरोनुवाक्याद्यभिमानिनो देवा हविर्भाग्भ्यो देवेभ्योऽपरक्ताः सन्तोऽन्यत्रागच्छन्। किं ब्रुवन्तो गता इति, तदुच्यते—हे देवा भागरहितानि वयं छन्दांसि वो युष्मदीयानि हवींषि न वक्ष्यामो हविर्वहनं न करिष्याम इति ब्रुवन्तः। तदानीं देवा विचार्य होमकाले यच्चतुर्ग्रहणं तच्छन्दसां प्रीतिकरं भवत्विति तेषां भागमकल्पयन्। तत्र प्रथमग्रहणं पुरोनुवाक्याख्याया गायत्रीदेवतायास्तुष्टिकरं, द्वितीयग्रहणं याज्याख्यायास्त्रिष्टुब्देवतायास्तुष्टिकरं, तृतीयग्रहणं देवताख्याया जगतीदेवतायास्तुष्टिकरं, चतुर्थग्रहणं वषट्काराख्याया अनुष्टुब्देवतायास्तुष्टिकरम्। अतश्चतुर्गृहीतेन होमे सति च्छन्दोदेवताः प्रीणयति। ताश्च प्रीताः सत्यो हव्यं वहन्ति। सूत्रकारेण तु शाखान्तरमाश्रित्याष्टगृहीतत्वमुक्तम्।

अत्रेदं चिन्तनीयम्—किमेकैकं मन्त्रमुच्चार्य जुहुयात्, आहोस्वित्सर्वाणि

---

१ ख. च. °तमित्युक्त°।

(अभ्यादानाभिधानम्)

मन्त्राण्यु (?) च्चार्यंति । तत्र हेयोपादेयावुभौ पक्षौ क्रमेण दर्शयति——

" यं कामयेत पापीयान्स्यादित्येकैकं तस्य जुहुयादाहुतीभिरेवैनमप गृह्णाति पापीयान्भवति यं कामयेत वसीयान्स्यादिति सर्वाणि तस्यानुद्रुत्य जुहुयादाहुत्यैवैनमभि क्रमयति वसीयान्भवत्यथो यज्ञस्यैवैषाऽभिक्रान्तिः " [सं० का० ५ प्र० १ अ० १] इति ।

पापीयानतिशयेन पापो दरिद्र इत्यर्थः । एकैकं मन्त्रमुच्चार्य होमे सति संश्लेषाभावात्परस्परमपरक्ताभिराहुतीभिरेनं यजमानमपगृह्णाति धनादपेतं करोति । ततो दरिद्रो भवति । वसीयान्वसुमत्तरः । सर्वाण्युच्चार्य होमे तु मन्त्राणां परस्परसंश्लेषादेकयैवाऽऽहुत्या यजमानमभिक्रमयति अभिव्याप्तं करोति । ततो धनिको भवति । अपि च येयमभिक्रमणहेतुरेकाऽऽहुतिरेषा यज्ञस्यैवाग्निचयनरूपस्यैवाभिक्रान्तिः स्वाधीनो यज्ञो भवति । मन्त्रगतामष्टसंख्यां प्रशंसति——

" एति वा एष यज्ञमुखाद्दक्षा योऽग्नेर्देवताया एत्यष्टावेतानि सावित्राणि भवन्त्यष्टाक्षरा गायत्री गायत्रोऽग्निस्तेनैव यज्ञमुखाद्दक्षा अग्नेर्देवतायै नैति " [सं० का० ५ प्र० १ अ० १] इति ।

यो यजमानोऽग्निरूपाया देवताया एत्यपगच्छति एष यजमानो यज्ञोपक्रमादारभ्य यज्ञफलरूपाया ऋद्ध्या एत्यपगच्छति । अग्निर्वै यज्ञमुखमिति श्रुत्यन्तरादग्नेरपगम एव यज्ञमुखादपगमः । कस्तर्ह्यग्नेः सकाशादपगमस्य परिहार इति, तदुच्यते——प्रारम्भे सावित्राणां मन्त्राणामष्टत्वे सत्यष्टाक्षरा गायत्री संपद्यते । अग्निश्च गायत्रः । उभयोर्मुखजन्यत्वात् । ततो गायत्रीसंपत्तिरेवाग्निसंपत्तिरिति यज्ञमुखादग्निरूपादनपेतः सन्समृद्धेरपि नार्पेति ।

अष्टमन्त्रोपेतामेकामाहुतिं प्रशंसति——

" अष्टौ सावित्राणि भवन्त्याहुतिर्नवमी त्रिवृतमेव यज्ञमुखे वि यातयति " [सं० का० ५ प्र० १ अ० १] इति ।

त्रिवृत्स्तोमे स्तुचो नवसंख्याका अतोऽत्राष्टमन्त्रविशिष्टाहुतिगतया नवसंख्यया त्रिवृत्स्तोममेव यज्ञमुखे वियातयति विशेषेण प्रसारितवान्भवति ।

अत्रेदमपरं चिन्तनीयम्-किमृग्यूपान्षण्मन्त्रानुच्चार्यमं नो देव सवितरिति यजुः

१ क. घ. ङ. °पस्याऽऽका° ।

(अभ्यादानाभिधानम्)

समर्धं कृत्वा पश्चादेव सावितरित्यृचमन्तिमां कुर्यात्। किं वेतामृचं समर्धां कृत्वा तद्यजुरन्तिमं कुर्यादिति। तत्र हेयोपादेयपक्षौ क्रमेण दर्शयति—

"यदि कामयेत छन्दाꣳसि यज्ञयशसेनार्पयेयमित्यृचमन्तमां कुर्यान्छन्दा꣡꣯स्येव यज्ञयशसेनार्पयति यदि कामयेत यजमानं यज्ञयशसेनार्पयेयमिति यजुरन्तमं कुर्याद्यजमानमेव यज्ञयशसेनार्पयति" [सं० का०५ प्र०१ अ०१] इति।

यज्ञयशसं यज्ञफलमर्पयेयं संयोजयेयम्। छन्दोवच्छब्दा ऋषस्त्वन्तिमर्चं यज्ञफले छन्दा꣡꣯सु गच्छेत्। यजुस्तु च्छन्दोरहितत्वेन यज्ञफले छन्दा꣡꣯स्यपि न भवति, किंतु यजमानगाम्येव भवति। तस्माद्यजुरेवान्तिमं कुर्यादित्यर्थः।

कल्पः—"ऋचा स्तोमꣳ समर्धयत्यपरं चतुर्गृहीतं गृहीत्वा" इति। जुहोतीत्यनुवर्तते। पाठस्तु—

ऋचा स्तोममिति। हेऽग्ने स्तोत्रहेतुसामाधारभूतयर्चा स्तोमं स्तोत्रसृगावृत्तिरूपं संघातं वा समर्धय समृद्धं कुरु। गायत्रेण साम्ना सह रथंतरं साम समर्धय गायत्रसामैव वर्तनी मार्गो यस्य बृहत्साम्नस्तद्गायत्रवर्तनि, गायत्रसामसहितं बृहत्साम समर्धय। अस्मिन्मन्त्रे समर्धयेति पदस्य तात्पर्यं दर्शयति—

"ऋचा स्तोमꣳ समर्धयत्याह समृद्ध्यै" [सं० का०५ प्र०१ अ०१] इति।

कल्पः—"देवस्य त्वा सवितुः प्रसव इति चतुर्भिरभिमादत्ते वेणवीं कल्माषीं सुषिरामसुषिरां वोभयतःक्ष्णून्यतरतःक्ष्णुं वा प्रादेशमात्रीमरत्निमात्रीं व्याममात्रीमपरिमितां वा" इति। पाठस्तु—

देवस्य त्वेति। अत्रोखां निर्मातुं मृत्खननीया। खननहेतुः काष्ठविशेषोऽभिः। हेऽग्ने सवितुर्देवस्य प्रेरणे सत्यश्विनोः संबन्धिभ्यां मणिबन्धपर्यन्ताभ्यां बाहुभ्यां पूष्णः संबन्धिभ्यां साङ्गुलिभ्यां हस्ताभ्यां साधनभूताभ्यां सहायभूतेन गायत्रेण च्छन्दसा युक्तः संस्त्वामाददे स्वीकरोमि। तत्र दृष्टान्तः—अङ्गिरस्वदङ्गिरस ऋषयः पूर्वं यथा स्वीकृतवन्तस्तद्वत्। त्वं चाभ्रिरसि खननहेतुः काष्ठविशेषोऽसि। तथा नारिरसि न विद्यतेऽरिर्यस्यास्तत्र सेयं नारिः खननकाले पाषाणादिना तव नास्ति कुण्ठीभाव इत्यर्थः। अङ्गिरस्वच्छब्देन प्रथमयजुषः समाप्तत्वादभ्रिरसीत्यादिकं द्वितीयं यजुः। शत्रुरहिते हेऽग्ने पृथिव्याः सधस्थादुत्स-

१ क. ख. °वाहिभ्यां। २ क. ख. °वर्षां।

(अभ्यादानाभिधानम्)

ङ्गात्पुरीष्यमग्निमाभर । पुरीषशब्देन पांसुरूपा शुष्का मृदुच्यते, तदर्हतीति पुरीष्योऽग्निः । मृदमादायोखां कृत्वा तस्यामग्निरवस्थाप्यते । अतो मृदग्न्योरभेदोपचारेण मृदाहरणमेवाग्न्याहरणमिति विवक्षितत्वात्पुरीष्यमग्निमाहरेत्युच्यते । अयं चोपचारोऽग्निचयनप्रकरणे सर्वत्रानुवर्तिष्यते ।

अत एव पञ्चमकाण्डान्ते चोद्यपरिहारौ भविष्यतः--

" ब्रह्मवादिनो वदन्ति यन्मृदा चाद्भिश्चाग्निश्चीयतेऽथ कस्मादग्निरुच्यत इति यच्छन्दोभिश्चिनोत्यग्नयो वै छन्दाꣳसि तस्मादग्निरुच्यते " [सं० का० ५ प्र० ७ अ० ९] इति ।

अतः पांसुरूपमग्निमाहर्तुं त्रैष्टुभेन च्छन्दसा सहकारिणा युक्तस्त्वामाददे । अङ्गिरस्वदिति दृष्टान्तः पूर्ववत् । मृदाहरणेऽभ्यादाने च दृष्टान्तत्वाय द्विरङ्गिरस्वदित्युक्तम् । अथ तृतीयं यजुरुच्यते । हेऽग्ने त्वं बभ्रिर्भरणकुशला मृत्संपादनकुशलाऽसि । नारिरसीति पूर्ववत् । त्वया युक्ता वयं सधस्थे पृथिव्या उत्सङ्ग आ समन्तादग्निं पुरीष्यं खनितुं शकेम शक्ता भवेम, अतो जागतेन च्छन्दसा सहकारिणा युक्तस्त्वामाददे । अङ्गिरस्वदिति दृष्टान्तः पूर्ववत् । अथ चतुर्थं यजुरुच्यते । सविता प्रेरकः परमेश्वरः पुरा हिरण्मयीं सुवर्णनिर्मितामग्निं हस्ते स्थापयित्वा बिभ्रत्पोषितवान् । अतस्तया हिरण्मयाभ्या युक्ता त्वजस्रमित्सर्वदैव ज्योतिः प्रकाशमानमग्निं खात्वी, अग्नित्वेनोपचारितां मृदं खनित्वा नोऽस्मदर्थमाभराऽऽनय । आनुष्टुभेन च्छन्दसा सहकारिणा युक्तोऽहं त्वामाददे । अङ्गिरस्वदिति दृष्टान्तः पूर्ववत् । एतैर्मन्त्रैरभ्यादानं विधत्ते--

" चतुर्भिराभिमा दत्ते चत्वारि छन्दाꣳसि छन्दोभिरेव " [सं० का० ५ प्र० १ अ० १] इति ।

गायत्री त्रिष्टुब्जगत्यनुष्टुबिति च्छन्दसां चतुष्टयम् । मन्त्रेषु तेषां सहकारित्वेनाभिधानाच्छन्दोभिरेवाग्नेरादानं कृतवान्भवति ।

मन्त्रे प्रसवशब्दस्याभिप्रायं दर्शयति--

" देवस्य त्वा सवितुः प्रसव इत्याह प्रसूत्यै " [सं० का० ५ प्र० १ अ० १] इति । वंशनिर्मिताया अग्नेरन्तः सुषिरत्वं विधत्ते--

---

१ ख. च. °क्षित्वा पुरी° । २ ख. °रण्मयाऽभ्या । ३ ख. च. युक्तस्त्वम° ।

(अभ्यादानाभिधानम्)

" अग्निर्देवेभ्यो निलायत स वेणुं प्राविशत्स एतामूतिमनु समचरद्वेणोः सुषिरꣳ सुषिराऽग्निर्भवति सयोनित्वाय " [सं० का० ५ प्र० १ अ० १] इति ।

पुरा कदाचित्केनापि निमित्तेनापरक्तोऽग्निर्देवेभ्यो निरगच्छन्निर्गत्य देवानां दर्शनं धारयितुं वेणुं प्राविशत् । वेणोर्मध्ये सुषिरं स्थानं यदस्त्येषैव मूषिकस्य भूबिलवदूतिस्तामेतामूतिं वेणुमध्यगतच्छिद्ररूपामनुक्रमेण सम्यगचरत् । अतोऽग्नेः सुषिरवेणुप्रियत्वादग्निः सुषिरा कार्या । तच्च सुषिरत्वं सयोनित्वाय संपद्यते । योनिरग्नेः स्थानं तत्सहितत्वं सयोनित्वम् ।

अथाग्नेः कृष्णबिन्दुलाञ्छितत्वं विधत्ते——

" स यत्रयत्रावसत्तत्कृष्णमभवत्कल्माषी भवति रूपसमृद्धयै " [सं० का० ५ प्र० १ अ० १] इति ।

वेणुमध्ये संचरन्नग्निर्यस्मिन्यस्मिन्स्थाने[1] वासमकरोत्तत्स्थानं दाहेन कृष्णमभवत् । अतोऽग्निनिवासद्योतनायाग्नेः कल्माषी कृष्णबिन्दुलाञ्छिता कर्तव्या । तथा सत्यग्निरूपस्य चित्रत्वात्समृद्धिर्दृश्यते । यजमानस्य च रूपसमृद्धिर्भवति । अग्नेरुभयोरन्तयोस्तीक्ष्णत्वं विधत्ते——

" उभयतःक्ष्णूर्भवतीतश्चामुतश्चार्कस्यावरुद्धयै" [सं० का० ५ प्र० १ अ० १] इति ।

क्ष्णु तेजन इत्यस्माद्धातोरुत्पन्नः क्ष्णुशब्दस्तीक्ष्णत्वमाचष्टे । उभयोरग्रमूलयोस्तीक्ष्णाग्निरुभयतःक्ष्णूस्तादृशी कार्या । तदेतदुभयतस्तीक्ष्णत्वमितश्चामुतश्च लोकद्वयेऽप्यर्कस्यावरुद्ध्यै पूजायाः संपत्त्यै भवति ।

अग्नेर्दैर्घ्यपरिमाणं विधत्ते——

" व्याममात्री भवत्येतावद्वै पुरुषे वीर्यं वीर्यसंमिता " [सं० का० ५ प्र० १ अ० १] इति ।

चतुर्भिररत्निभिस्तुल्यो व्यामः । एतावती कार्या । उत्थिते पुरुषे वीर्यमेतावदेव । अत इयं वीर्यसंमिता भवति । पक्षान्तरं विधत्ते——

" अपरिमिता भवत्यपरिमितस्यावरुद्धयै " [सं० का० ५ प्र० १ अ० १] इति ।

---

१ क. घ. ङ. °ने बिलम° । २ क. घ. ङ. °तःक्ष्णुस्ता° ।

नियतपरिमाणरहितत्वमपरिमितत्वम् । तच्चापरिमितस्य बहुलस्यान्नादेः संपत्त्यै भवति । तादृश्या अग्नेर्वैणुकार्यत्वं विधत्ते—

"यो वनस्पतीनां फलग्रहिः स एषां वीर्यावान्फलग्रहिर्वेणुर्वैणवी भवति वीर्यस्यावरुद्धयै" [तै० क्र० ५ प्र० १ अ० १] इति ।

फलानि बहूनि गृह्णातीति फलग्रहिः । वनस्पतीनां मध्ये यः फलग्रहिरस्ति, एषां फलग्रहीणामपि मध्ये स वेणुरतिशयेन फलग्रहिः । व्रीह्याद्यग्रवद्वेणूनां समाप्तिसंवत्सरे गोधूमसदृशैर्बहुभिर्बीजैरुपेतत्वात् । त्वचि सारोपेतत्वेन वीर्यवांश्च । तस्मादियमग्नेर्वैणवी कार्या । तच्च वैणवत्वं वीर्यसंपत्त्यै भवति ।

अत्र विनियोगसंग्रहः—

युञ्जाष्टकेनकहोम कृत्वा स्तोमं पुनर्हुतिः ।
दैवत्याग्नेः चतुष्केणाऽऽदत्ते मन्त्रास्त्रयोदश ॥

अत्र मीमांसा ।

द्वादशाध्यायस्य तृतीयपादे चिन्तितम्—

चतुर्भिराग्नेयित्यत्र विकल्पो वा समुच्चयः ।
विकल्पः पूर्ववन्नैवं समूहे करणत्वतः ॥

अग्नौ श्रूयते—"चतुर्भिराग्नेयादत्ते" इति । अत्र पूर्वोक्तविभागमन्त्रवत्प्रतिमन्त्रं पृथक्करणत्वं नास्ति । चतुःसंख्यया समूहे करणत्वप्रतीतेः । तस्मान्मन्त्रान्ते कर्मसंनिपातस्य बाधनेन समुच्चयः स्यात् । न च पूर्वस्यैकैकमन्त्रस्यान्ते संनिपातेन(नै)[व समुच्चयः] स्यादिति शङ्कनीयम् । वाचनिकसंख्यया न्यायसिद्धस्य तस्य बाधितत्वात् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे प्रथमप्रपाठके
प्रथमोऽनुवाकः ॥ १ ॥

(अथ चतुर्थाष्टके प्रथमप्रपाठके द्वितीयाऽनुवाकः)।

**इमामगृभ्णन्रशनामृतस्य पूर्व आयुषि वि-
दथेषु कव्या । तया देवाः सुतमा बभूवुर्ऋत-**

१ क. घ. ङ. स्यैक । २ क. ग. ङ. पातो न ।

(मृदाक्रान्त्याभिधानम्)

स्य मामन्तमरमारपन्ती । प्रतूर्तं वाजिन्ना द्रव वरिष्ठामनु संवर्तम् । दिवि ते जन्म परममन्तरिक्षे नाभिः पृथिव्यामधि योनिः । युञ्जाथा रासभं युवमस्मिन्यामे वृषण्वसू । अग्निं भरन्तमस्मयुम् । योगेयोगे तवस्तरं वाजेवाजे हवामहे । सखाय इन्द्रमूतये । प्रतूर्वन (१) एह्यवक्रामन्नशस्ती रुद्रस्य गाणपत्यान्मयोभूरहि । उर्वन्तरिक्षमन्वीहि स्वस्तिगव्यूतिरभयानि कृण्वन् । पूष्णा सयुजा सह । पृथिव्याः सधस्थादग्निं पुरीष्यमङ्गिरस्वदच्छेमोऽग्निं पुरीष्यमङ्गिरस्वदच्छेमोऽग्निं पुरीष्यमङ्गिरस्वद्भरिष्यामोऽग्निं पुरीष्यमङ्गिरस्वद्धरामः । अन्वग्निरुषसामग्रमक्ष्यदन्वहानि प्रथमो जातवेदाः अनु सूर्यस्य (२) पुरुत्रा च रश्मीननु द्यावापृथिवी आ ततान । आगत्य वाज्यध्वनः सर्वा मृधो वि धूनुते । अग्निꣳ सधस्थे महति चक्षुषा नि चिकीषते । आक्रम्य वाजिन्पृथिवीमग्निमिच्छ रुचा त्वम् । भूम्या वृत्वाय नो ब्रूहि यतः खनाम तं वयम् । द्यौस्ते पृष्ठं पृथिवी सधस्थमात्मान्तरिक्षꣳ समुद्रस्ते योनिः । विरूपाय चक्षुषा त्वाभि तिष्ठ (३) पृतन्यतः । उत्क्रामं महते सौभगायास्मादास्था-

नोद्द्रविणोदा वाजिन्। वयꣳ स्याम सुमतौ
पृथिव्या अग्निं खनिष्यन्त उपस्थे अस्याः।
उदक्रमीद्द्रविणोदा वाज्यर्वाऽकः स लोकꣳ
सुकृतं पृथिव्याः। ततः खनेम सुप्रतीकम-
ग्निꣳ सुवो रुहाणा अधि नाक उत्तमे। अपो
देवीरुप सृज मधुमतीरयक्ष्माय प्रजाभ्यः।
तासाꣳ स्थानादुज्जिहतामोषधयः सुपिप्पलाः।
जिघर्मि (४) अग्निं मनसा घृतेन प्रति-
क्ष्यन्तं भुवनानि विश्वा। पृथुं तिरश्चा वयसा
बृहन्तं व्यचिष्ठमन्नꣳ रभसं विदानम्। आ
त्वा जिघर्मि वचसा घृतेनारक्षसा मनसा तज्जु-
षस्व। मर्यश्रीः स्पृहयद्वर्णो अग्निर्नाभिमृशे
तनुवा जर्हृषाणः। परि वाजपतिः कविरग्निर्ह-
व्यान्यक्रमीत्। दधद्रत्नानि दाशुषे। परि
त्वाऽग्ने पुरं वयं विप्रꣳ सहस्य धीमहि।
धृषद्वर्णं दिवेदिवे भेत्तारं भङ्गुरावतः। त्वमग्ने
द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि।
त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे
शुचिः (५)॥

(प्रतूर्वन्त्सूर्यस्य तिष्ठ जिघर्मि भेत्तारं विꣳशतिश्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थकाण्डे
प्रथमप्रपाठके द्वितीयोऽनुवाकः॥ २॥

(मृदाक्रान्त्यभिधानम्)

(अथ चतुर्थकाण्डे प्रथमप्रपाठके द्वितीयोऽनुवाकः)।

प्रथमेऽनुवाकेऽभ्र्यादानमुक्तम्। अथ द्वितीये मृदाक्रान्तिरुच्यते।

कल्पः—" इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीꣳ रशनामादाय " इति।

पाठस्तु—

इमामगृभ्णन्निति। कवयो विदांस ऋत्विजस्तानर्हन्तीति कव्या यज्ञाः। कव्या विदथेषु कव्येषु यज्ञेषु ज्योतिष्टोमादिषु ऋतस्याऽऽयुषि आयुरागमनमश्वस्याऽऽगमने निमित्तभूते सति। ऋतशब्दो यज्ञवाची सन्नत्र तत्साधनमश्वमुपलक्षयति। पूर्वे महर्षय इमां रशनामगृभ्णन्स्वीकृतवन्तः। अयमर्थः—रशनया बद्धमश्वमानीय मृत्खननस्थाने तमश्वमाक्रमय्य तया मृदा निष्पन्नायामुखायामग्निमुत्पाद्येष्टकाचिते देशे ज्योतिष्टोमादय ऋत्विग्भिरनुष्ठेयाः। एतत्सर्वं मनसि निधाय पूर्वे महर्षयोऽश्वागमनं निमित्तीकृत्य रशनां स्वीकृतवन्त इति। षोऽन्तकर्मणीत्यस्माद्धातोरुत्पन्नत्वात्सामञ्शब्दोऽवसानवाची। ऋतस्य सामन्यज्ञस्य परिसमाप्तये सरं सरणमृत्विग्यजमानानां प्रवृत्तिमारपन्ती कथयन्ती प्रापयन्तीत्यर्थः। या रशना पूर्वोक्तरीत्या यज्ञसमाप्तिपर्यन्तं प्रवृत्तिकारिणी भवति तया रशनया पुरा देवाः सुतमाबभूवुः सोमयागं प्राप्नुयुः। तादृशीमिमां रशनां गृहीतवन्तः। तामिमं मन्त्रं विनियुङ्क्ते—

" व्यृद्धं वा एतद्यज्ञस्य यदयजुष्केण क्रियत इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्ते यजुष्कृत्यै यज्ञस्य समृद्ध्यै" [सं०का०५प्र०१अ०२] इति।

यदज्ञमयजुष्केण मन्त्ररहितेन व्यापारेण निष्पाद्यते यज्ञस्य संबन्धि तदेतदङ्गं समृद्धिहीनमेव। तस्मादिमामिति मन्त्रमुच्चार्य रशनामादीत। अश्वोऽभिधीयते बद्ध्वा धार्यते यया रशनया सेयमश्वाभिधानी। यद्यपीमामगृभ्णन्नित्यृगेवैषा तथाऽपि यजुर्वेदपठितत्वाद्यजुष्ट्वोच्चारः। तस्मिन्मन्त्रे पठिते सति रशनादानं सयजुष्कत्वात्समृद्धं भवति।

कल्पः—" प्रतूर्तं वाजिन्ना द्रवेत्यश्वमभिदधाति " इति। पाठस्तु—

प्रतूर्तं वाजिन्निति। संवत्यते सम्यग्भज्यते मृद्ग्रहणार्थं सेव्यत इति संवत्योग्या भूमिः संवत्। सा च पादाघातेनातिशस्तत्वाद्वरिष्ठेत्युच्यते। हे वाजिन्नश्व वरिष्ठां संवतमनुलक्ष्य प्रतूर्तमाद्रवाति[1]शीघ्रमागच्छ। ते तवाश्वस्य दिवि द्युलोके

---

१ ख. च. °नु अभिल°।

(मुद्राक्रान्त्यभिधानम्)

परमोत्कृष्टं जन्म रोहितादिदेवाश्वरूपेण द्युलोके जन्म प्रसिद्धम्। "रोहितेन त्वाऽग्निर्देवतां गमयतित्याहते वै देवाश्वाः" इति ह्यन्यत्राऽऽम्नायम्। तथा तव नाभिरन्तरिक्षे वर्तते[1]। नियुन्नामका हि वायोरश्वास्तदीयं रथं वहन्तोऽन्तरिक्षे संचरन्ति, तद्रूपेणास्यान्तरिक्षवर्तित्वम्। नाभिशब्देन कृत्स्नशरीरमुपलक्ष्यते। तथा पृथिव्यामाध योनिर्भूमेरुपरि तव निवासस्थानं, तत्तु प्रत्यक्षमेव दृश्यते। एवंमहिमा त्वं शीघ्रमागच्छेति पूर्वत्रान्वयः। एतं मन्त्रं विनियुङ्क्ते—

" प्रतूर्तं वाजिन्ना द्रवेत्यश्वमभि दधाति रूपमेवास्यैतन्महिमानं व्याचष्टे " [सं० का० ५ प्र० १ अ० २] इति।

वाजिन्नाद्रवेत्येवं शीघ्रमागमनमश्वस्य स्वरूपभूतमेव महिमानमेतन्मन्त्रवाक्यं प्रकाशयति। अथवाऽस्य मन्त्रस्यैतद्रूपं वाक्यजातं द्युजन्मादिरूपं महिमानमेव व्याचष्टे। वस्तुतो द्युजन्माभावेऽपि प्रशंसार्थमेवमुच्यत इत्यर्थः।

कल्पः—"तूष्णीं गर्दभरशनामादाय युञ्जाथाꣳ रासभं युवमिति गर्दभम्" इति।

मन्त्रमन्तरेणैव गर्दभस्य रशनामादाय युञ्जाथामिति मन्त्रेण गर्दभमभिदध्यात्।

पाठस्तु—

युञ्जाथाꣳ रासभमिति। यजमानः पत्नी चेत्येतौ हे दंपती युवं रासभमस्मिन्याने युञ्जाथाम्। यानो मृद्वहनरूपो नियमविशेषस्तस्मिन्निमित्तभूते सति युवामुभौ गर्दभं रशनया बध्नीतम्। कीदृशौ युवाम्। वृषण्वसू यागनिष्पादनद्वारा फलाभिवर्षणनिमित्तभूतं वसु धनं ययोस्तौ वृषण्वसू। कीदृशं रासभम्। अग्निं भरन्तमग्निहेतुं मृदं वोढुं समर्थम्। अस्मयुमस्मानात्मन इच्छन्तमस्मद्धितैषिणमिति यावत्। एतं मन्त्रं विनियुङ्क्ते—

"युञ्जाथाꣳ रासभं युवमिति गर्दभमसत्येव गर्दभं प्रतिष्ठापयति तस्मादश्वाद्गर्दभोऽसत्तरः " [सं० का० ५ प्र० १ अ० २] इति।

गर्दभमित्यत्राभिदधातीति शेषोऽनुवर्तते। आस्मिन्याम इति मन्त्रेऽभिहितं मृद्वहनमसदित्युच्यते। भारवहनस्य निकृष्टव्यापारत्वात्। अत एतन्मन्त्रपाठेनासत्येव निकृष्ट एव व्यापारे गर्दभं स्थापितवान्भवति। यस्मादत्र निकृष्टकार्ये स्थापितस्तस्माल्लोकेऽपि गर्दभोऽश्वान्निकृष्टतरः। रजकादय एव हि तमादियन्ते न तु राजामात्यादयः।

---

१ ख. च. °ते। ययुर्नाम°। २ ख. घ. ङ. च. °मेवोच्य°।

(मृदाक्रान्त्यभिधानम्)

कल्पः—" योगेयोगे तवस्तरमिति लिसृभिरश्वप्रथमा अभिप्रव्रजन्ति यत्र मृदं खनिष्यन्तः स्युः " इति। तत्र प्रथमामाह—योगेयोग इति।

युज्यतेऽनुष्ठीयत इति योगः कर्म। योगेयोगे तत्तत्कर्मणि तवस्तरं बलवत्तरमश्वमिन्द्रमिन्द्रियप्रदभूतये रक्षणाय वाजेवाजे तत्तद्बलप्राप्तिनिमित्तं सखायः परस्परसख्यं प्राप्ता ऋत्विग्यजमाना वयं हवामह आह्वयामः।

अथ द्वितीयामाह—

प्रतूर्वन्नेहीति। हेऽश्व त्वमिह आगच्छ। किं कुर्वन्। प्रतूर्वन्, विरोधिनः शत्रून्हिंसन्नस्त्रशस्त्रैरवक्रामन्भ्रातृव्यैः क्रियमाणा अपकीर्तीर्निवारयन्। किंच रुद्रस्य क्रूरदेवस्य यद्गाणपत्यं पशुसमूहपतित्वं तस्माद्गाणपत्यादागत्य मयोभूरस्माकं सुखं भावयन्नि(न्नि)हि। उरु विस्तीर्णमन्तरिक्षमनु वीक्ष्येहि विश्वस्मिन्मेण गच्छ। किं कुर्वन्। गव्यूतौ गोसमूहे स्वरित श्रेयो यथा भवति तथा वर्तमानः स्वरितगव्यूतिस्तादृशस्त्वमभयानि कृण्वन्व्याघ्रादिभ्यो भयपरिहारं कुर्वन्। अथ तृतीयामाह—

पूष्णा सयुजेति। सह युज्यते सहायभूतो वर्तत इति सयुक्। तादृशेन पूष्णा पोषकेण देवेन सह हेऽश्व पृथिव्याः सधस्थात्पुरीष्यमभिमच्छेहि प्राप्तुं गच्छ। खनितुं योग्या कृत्स्नाऽपि मृत्तिका सह तिष्ठति मिलित्वा वर्ततेऽत्रेति सधस्थः प्रदेशविशेषः। तस्मात्प्रदेशादाप्तुमित्यन्वयः। आङ्गिरस्वदिति दृष्टान्तः पूर्ववत्। अत्र प्रथमायामृचि प्रथमभागे वीप्सायास्तात्पर्यं दर्शयति—

" योगेयोगे तवस्तरमित्याह योगेयोग एवैनं युङ्क्ते " [सं० का० ५ प्र० १ अ० २] इति।

रथवहनं योद्धृवहनं वा यद्यदश्वस्य योग्यं कर्म तत्र सर्वत्रैनमश्वं योजयत्येव लौकिकः। तस्मादत्रापि योगेयोग इति वीप्सोच्यते।

द्वितीयभागे वाजशब्दार्थं दर्शयति—

" वाजेवाजे हवामह इत्याहान्नं वै वाजोऽन्नमेवाव रुन्धे " [सं० का० ५ प्र० १ अ० २] इति।

तृतीयभाग इन्द्रशब्दतात्पर्यं दर्शयति—

---

१ ख. च. °मित्ते स°। २ क. घ. ङ. °म्भेणाऽऽग°। ३ ख. च. मिलिता।

" सखाय इन्द्रगूतय इत्याहेन्द्रियमेवाव रुन्धे " [सं० का० ५ प्र० १ अ० २] इति ।

अनेन मन्त्रेण साध्यमश्वपुरःसरं गमनं विधत्ते--

" अग्निर्देवेभ्यो निलायत तं प्रजापतिरन्वविन्दत्प्राजापत्योऽश्वोऽश्वेन सं भरत्यनुवित्त्यै " [सं० का० ५ प्र० १ अ० २] इति ।

केनाप्यपराधेन देवेभ्यो निर्गतमग्निं प्रजापतिरन्विष्य लब्धवान् । अश्वश्च प्रजापतिजन्यत्वात्प्राजापत्यः । तस्मादश्वेन सहाग्निहेतुं मृदं संभरितुं गच्छेत् । तच्च गमनमग्नेरनुवेदनाय भवति ।

तत्राश्वस्य गर्दभात्पुरतो गमनं विधत्ते--

" पापवस्यसं वा एतत्क्रियते यच्छ्रेयसा च पापीयसा च समानं कर्म कुर्वन्ति पापीयान्ह्यश्वाद्गर्दभोऽधं पूर्वं नयन्ति पापवस्यसस्य व्यावृत्त्यै तस्माच्छ्रेयाꣳसं पापीयान्पश्चादन्वेति " [सं० का० ५ प्र० १ अ० २] इति ।

श्रेयसोत्तमेन च साधनेन पापीयसा निकृष्टेनापि साधनेन समानं तुल्यमेकं कार्यं कुर्वन्तीति यत्तदेतत्पापवस्यसमेव क्रियते । पापमेव वसु धनं यस्य कर्मणस्तत्पापवसु, अतिशयेन पापवसु तत्पापवस्यसमत्यन्तं निकृष्टमित्यर्थः । गर्दभोऽश्वात्पापीयानिति प्रसिद्धम् । अत उभयोः समानं गमनं मा भूदित्यश्वं पूर्वं पुरतो नयेयुः । तथा सति पापवस्यसं निवारितं भवति । यस्मादेवं तस्माल्लोकेऽपि विद्याधनादिभिः श्रेयान्पुरुषः पुरतो गच्छति, निकृष्टः शिष्यो दरिद्रो वा पश्चादनुगच्छति ।

द्वितीयमन्त्रगतस्याशस्तीरवक्रामन्नित्यस्य तात्पर्यं दर्शयति--

" बहुर्वै भवतो भ्रातृव्यो भवतीव खलु वा एष योऽग्निं चिनुते वज्रोऽश्वः प्रतूर्वन्नेवाशस्तीरवक्रामन्नशस्तीरित्याह वज्रेणैव पाप्मानं भ्रातृव्यमव क्रामति " [सं० का० ५ प्र० १ अ० २] इति ।

भवतो भूतिमैश्वर्यं प्राप्नुवतः पुरुषस्य भ्रातृव्यो विघ्नकारी बहुर्भवत्येव । श्रेयांसि बहुविघ्नानीति न्यायात् । अतोऽत्र योऽग्निं चिनुत एष भवतीव खलु श्रेयः प्राप्नोत्येव खलु । अतोऽनेन भ्रातृव्यपरिहारोऽन्वेषणीयः । अश्वश्च वज्रयुक्तेन्द्रसमानः । अतोऽश्वं संबोध्याशस्तीरवक्रामन्नित्युक्त्याऽश्वरूपेण वज्रेणैव विघ्नकारिणं पाप्मानं भ्रातृव्यं निराकरोति ।

---

१ क. घ. ङ. अश्वस्य ।

(मृदाक्रान्त्यभिधानम्)

तन्मन्त्रगतस्यैव गाणपत्यादित्यस्य तात्पर्यं दर्शयति—

" रुद्रस्य गाणपत्यादित्याह रौद्रा वै पशवो रुद्रादेव पशून्निर्याच्याऽऽत्मने कर्म कुरुते " [सं० का० ५ प्र० १ अ० २] इति ।

पशूनां रौद्रत्वं वरादवगम्यते । "सोऽब्रवीद्वरं वृणा अहमेव पशूनामधिपतिरसानीति " इत्यत्र रुद्रस्य वर आम्नातः । तस्मादत्र रुद्रस्य गाणपत्यान्मयोभूरेहीत्युक्त्या पशुस्वामिनो रुद्रादेव तान्पशून्निःशेषेण याचित्वा तैः पशुभिः स्वार्थं कर्म करोति । तृतीयमन्त्रे सयुजेत्यस्य तात्पर्यं दर्शयति—

" पूष्णा सयुजा सहेत्याह पूषा वा अध्वनाꣳ संनेता समष्टयै " [सं० का० ५ प्र० १ अ० २] इति ।

पोषको देव एवोपद्रवपरिहारेण मार्गाणां सम्यङ्नेता भवति । अतस्तेन सह सम्पष्टयै संगत्यै पूष्णा सयुजेत्युच्यते ।

तस्मिन्नेव मन्त्रे पुरीष्यमिति विशेषणस्याङ्गिरस्वदिति दृष्टान्तस्य च तात्पर्यं दर्शयति—

" पुरीषायतनो वा एष यदग्निरङ्गिरसो वा एतमग्रे देवतानाꣳ समभरन्पृथिव्याः सदस्थादग्निं पुरीष्यमङ्गिरस्वदच्छेहत्याह सायतनमेवैनं देवताभिः संभरति " [सं० का० ५ प्र० १ अ० २] इति ।

पुरीषस्य पार्थिवः पूर्वोक्तरीत्या परम्परयाऽन्यायतनत्वम् । अतः पुरीष्यशब्देनाग्निं सायतनमेव संपादयति । अङ्गिरसश्च पुरा तमेतमग्निं देवतानां पुरतः संपादितवन्तः। अतोऽङ्गिरस्वदित्युक्त्या देवताभिः सहितमेनं संपादितवान्भवति ।

अग्निं पुरीष्यमिति । कल्पः—" अग्निं पुरीष्यमङ्गिरस्वदच्छेम इति येन द्वेष्येण संगच्छते तमभिमन्त्रयतेऽपश्यन्निर्दिशति " इति ।

मृत्खननं प्रति गच्छन्तः पुरुषा मार्गमध्ये यदि केनापि द्वेष्येण संगच्छेरन्[2], तदानीमिमं मन्त्रं पठेत् । इमो गच्छाम इत्यर्थः । शेषं पूर्ववत् । यदि द्वेष्यं न पश्यति तदाऽपि तं मनसा निर्दिश्य पठेत् ।

अनेन पाठेन द्वेष्यस्यानं विनाशयत इत्येतद्दर्शयति—

" अग्निं पुरीष्यमङ्गिरस्वदच्छेम इत्याह येन संगच्छते वाजमेवास्य वृङ्क्ते "[3] [सं० का० ५ प्र० १ अ० २] इति ।

---

१ ख. च. वरबलाद्° । २ ख. च, °त्खननं । ३ ख.च. पठेरन् ।

अग्निं पुरीष्यमिति । कल्पः—" अग्निं पुरीष्यमङ्गिरस्वद्धरिष्याम इति वल्मीकवपा या सूर्यस्योदेतोस्तामुद्धृत्योपतिष्ठते " इति ।

वल्मीकस्य योऽवयव उन्नततरोनाभिवृद्धः सेयं वपा, तथाविधासु वपासु मध्ये या वपा सूर्योदयस्याभिमुखा तस्या अग्रं किंचिदुद्धृत्य तां वपामनेन मन्त्रेणोपतिष्ठते । भरिष्यामः संपादयिष्यामः । शेषं पूर्ववत् ।

अनेन मन्त्रेण वपोपस्थानं विधत्ते—

"प्रजापतये प्रतिप्रोच्याग्निः संभृत्य इत्याहुरियं वै प्रजापतिस्तस्या एतच्छ्रोत्रं यद्वल्मीकोऽग्निं पुरीष्यमङ्गिरस्वद्धरिष्याम इति वल्मीकवपामुपतिष्ठते साक्षादेव प्रजापतये प्रतिप्रोच्याग्निꣳ सं भरति" [सं० का० ५ प्र० १ अ० २] इति ।

प्रजापतेः सकाशादनुज्ञां लब्ध्वाऽयमग्निः संपादनीय इत्येवमभिज्ञा आहुस्तच्चोपपन्नम् । प्रजापतिना पूर्वमग्नेर्लब्धत्वात् । तं प्रजापतिरन्वविन्दादिति पूर्वमेवोक्तम् । कथं तर्हि प्रजापतये वक्तव्यमिति चेदुच्यते—प्रजापतिना सृष्टत्वादियं पृथिव्येव प्रजापतिः । तस्याश्च वल्मीकवपैव श्रोत्रम् । अत एवाऽऽधानब्राह्मणे समाम्नातम्—" श्रोत्रꣳ ह्येतत्पृथिव्याः । यद्वल्मीकः " । इति । तस्मात्तां वपामनेन मन्त्रेणोपतिष्ठते । तेनोपस्थानेन व्यवधानमन्तरेणैव प्रजापतये कथयित्वाऽग्निं संभरति ।

अग्निं पुरीष्यमिति । कल्पः—" अस्वरसाणाः प्रत्यायन्त्यग्निं पुरीष्यमङ्गिरस्वद्धराम इति येन द्वेष्येण संगच्छते तमभिमन्त्रयतेऽपश्यन्निर्दिशति " इति ।

यद्वद्गमनकाले तद्वदागमनकालेऽपि । तत्र भरिष्याम इति पाठः । अत्र तु भराम इति विशेषः । यद्यप्यागमनस्य नायं कालस्तथाऽपि प्रसङ्गाद्बुद्धिस्थमन्त्रोऽयमाम्नातस्तं चोपरिष्टादुत्कर्षेत् ।

गमनकालीनमन्त्रवदस्यापि तात्पर्यं दर्शयति—

" अग्निं पुरीष्यमङ्गिरस्वद्धराम इत्याह येन संगच्छते वाजमेवास्य वृङ्क्ते " [सं० का० ५ प्र० १ अ० २] इति ।

कल्पः—" अन्वग्निरुषसामग्रमक्रन्यदिति वल्मीकवपायाः प्रक्रामति " इति । पाठस्तु—

अन्वग्निरुषसामिति । अयमग्निरुषसामुषःकालानामग्रमुपक्रममक्रन्यत्,

---

१ ख. च. वेमवेक्तं । २ ख. च. °न्त्रपद° ।

(मृदाकाङ्क्ष्यभिधानम्)

अनुक्रमेण प्रकाशितवान्। अयं वाजश्चेतः प्रथमो मुख्यः सन्नद्धान्यप्यङ्गरूपतं। किंच सूर्यस्य पुरुत्रा पुरून्बहून्रश्मीननुक्रमेणारूपत्। किंच द्यावापृथिवी उभे अप्यनुक्रमेणाऽऽततान सर्वतो व्याप्तवान्।

अत्रैव मन्त्रेषूषःकालादीनां क्रमेणाऽऽविर्भावः सिध्यतीत्येतद्दर्शयति—

"अन्वग्निरुषसामग्रमक्ष्यदित्याहानुरूपात्यै" [सं० का० ५, प्र० १ अ० २] इति।

कथम्—आगत्य वाज्यध्वन् आक्रम्य वाजिन्पृथिवीमिति द्वाभ्यां मूर्खेनमश्वमाक्रमय्य" इति। तत्र प्रथमायाः पाठस्तु—

आगत्येति। अयं वाज्यध्वनो मार्गादागत्य प्राप्य सर्वा मूर्धो मार्गश्रमादीन्सर्वान्बाधकान्विधूनुते विविधं कम्पयति। विनाशयतीत्यर्थः। यत्र पांसवः सहावतिष्ठन्ते तत्स्थानं सधस्थं, महति विस्तीर्णे सधस्थेऽग्रमश्वश्चक्षुषा दृष्ट्वाऽग्निमग्निहेतुं मृदं निधिकीषते निधातुं चेतुं संज्ञादयितुमिच्छति। अथ द्वितीयामाह—

आक्रम्येति। हे वाजिन्पृथिवीमाक्रम्य पादस्पर्शेन परीक्ष्य त्वं रुचा स्वकीयेन तेजसा मानसज्ञानेनेत्यर्थः। अग्निमिच्छाग्निहेतुं मृदं निश्चिनु। भूम्या वृत्त्याय पृथिव्या सह वरणं कृत्वा पृथिवीं पृष्टवेत्यर्थः। नोऽस्माकं ब्रूहि अयं प्रदेशोऽग्निहेतुमृद्योग्य इति कथय। यस्मात्प्रदेशात्तादृशी मृद्भ्यते तं प्रदेशं वयं खनाम।

अत्रैतयोर्द्वयोर्मन्त्रयोः पृथगुपयोगं दर्शयति—

"आगत्य वाजध्वन आक्रम्य वाजिन्पृथिवीमित्याहेच्छत्येवैनं पूर्वया विन्दत्युत्तरया" [सं० का० ५, प्र० १ अ० २] इति।

पूर्वस्यामृचि निधिकीषत इत्यभिधानादिच्छामात्रं तया संपद्यते। उत्तरस्यामृचि नो ब्रूहीत्युक्तत्वात्तया तं प्रदेशं लभते। विधत्ते—

"द्वाभ्यामा क्रमयति प्रतिष्ठित्या अनुरूपाभ्यां तस्मादनुरूपाः पशवः प्र जायन्ते" [सं० का० ५, प्र० १ अ० २] इति।

मन्त्रयोर्द्वित्वं हि द्वाभ्यां प्रतिष्ठित्यै संपद्यते। तत्र पूर्वो मन्त्र इच्छाया अनुरूपः। उत्तरमन्त्रो लाभस्यानुरूपः। तच्च पूर्वमुदाहृतम्। यस्मादनुरू-

---

१ ख. च. °न्यन्त्र° । २ ख. घ. °त। सू°। ३ ख. च. °थिव्यावुभ। ४ ख. घ. ङ. च. °हनन°। ५ क. घ. ङ. °नाग°।

पाभ्यां मन्त्राभ्यामाक्रमयति तस्माद्यजमानस्याग्निहोत्राद्यनुष्ठानस्यानुरूपा एव गवाद्याः पशवः प्रजायन्ते ।

कल्पः—" द्यौस्ते पृष्ठमित्यधस्य पृष्ठं संमार्ष्टि " इति । पाठस्तु—

द्यौस्ते पृष्ठमिति । हेऽध्व द्युलोकस्तव पृष्ठं, पृथिवी सधस्थं तवाग्निना सहावस्थानप्रदेशः । अन्तरिक्षलोकस्तव मध्यशरीरवर्ती जीवात्मा । समुद्रस्तव जन्मकारणम् । ' अप्सुयोनिर्वा अध्वः ' इति श्रुतेः । एवं स्तूयमानस्त्वं चक्षुषा विरूपाय, उखायोग्यां मृदं विलोक्य पृतन्यतः संग्रामं कर्तुमिच्छतः शत्रून्राक्षसादींस्तस्यां मृदि गूढरूपेणावस्थितानभितिष्ठ पादेनाऽऽक्रम्य विनाशय ।

मन्त्रोक्तं द्युलोकादिसंबन्धमुपपादयति—

" द्यौस्ते पृष्ठं पृथिवी सधस्थमित्याहैभ्यो वा एतं लोकेभ्यः प्रजापतिः समैरयद्रूपमेवास्यैतन्महिमानं व्याचष्टे " [सं० का० ५ प्र० १ अ० २] इति ।

पुरा कदाचित्प्रजापतिरेतमध्वमेतेषु लोकेष्वन्विष्य समानीतवान् । तस्मादिद्यमानमेव द्युलोकादिसंबन्धरूपं महिमानं मन्त्रो व्याचष्टे । अतो नास्माभिर्वक्तव्यं किंचिदस्ति ।

मृदाक्रमणवेलायामध्वपादस्याधस्तादद्वेष्यविषयध्यानं विधत्ते—

' वज्री वा एष यदश्वो दद्भिरन्यतोदद्भ्यो भूयाँल्लोमभिरुभयाददभ्यो यं द्विष्यात्तमधस्पदं ध्यायेद्वज्रेणैवैनꣳ स्तृणुते ' [सं०का०५प्र०१अ०२] इति ।

वज्रसमानं दन्तपङ्क्तिद्वयमस्यास्तीत्यश्वो वज्री, तस्मादन्यतोदद्भ्य एकदन्तपङ्क्तियुक्तेभ्यो गवादिभ्योऽयमश्वो दद्भिर्भूयान्दन्तैरधिकः । उभयाददभ्यो दन्तपङ्क्तिद्वययुक्तेभ्यश्च गर्दभादिभ्योऽयमश्वो लोमभिः केसरैः पुच्छगतैश्च भूयान् । अतस्तादृशस्याश्वस्याधस्पदं पादस्याधस्तादद्वेष्ये ध्याते सति, अश्वखररूपेण वज्रेणैवैनं द्वेष्यं हिनस्ति ।

कल्पः—' उत्क्रामोदक्रमीदिति द्वाभ्यां मृत्खनादुदश्वमश्वमुत्क्रमय्य ' इति ।

मृद्यस्मिन्प्रदेशे खन्यते स प्रदेशो मृत्खनः । तस्मादश्वमुदङ्मुखत्वेन निर्गमयेत् । तत्र प्रथममृचमाह—

---

१ ख. च. °न्त्रोक्तद्यु° । २ ख. च. °मानद° । ३ क. घ. ङ. °केभ्योऽश्वग° । ४ ख. च. °गलैश्च° ।

(मृदाक्रान्त्यभिधानम्)

उत्क्रामेति। हे वाजिन्द्रविणोदो धनप्रदस्त्वं यजमानस्य महते सौभगाय सौभाग्याभिवृद्ध्यर्थमस्मादास्थानात्खननप्रदेशादुत्क्रामोद्गतो भव। वयं पृथिव्याः सुमतावनुग्रहबुद्धौ स्याम तिष्ठेम। कीदृशा वयम्। अस्या उपस्थे पृथिव्या उपरि अग्निमभिहेतुं मृदं खनिष्यन्तः खनितुमुद्युक्ताः। अथ द्वितीयामाह—

उदक्रमीदिति। द्रविणोदा यामद्वारेण धनप्रदो वाजी तथैवान्नप्रद इयर्तीत्यर्वा गमनकुशल इत्यर्थः। तादृशोऽयमश्वः स्थानादस्मादुदक्रमीत्। स उत्क्रान्तोऽश्वः सुकृतमाक्रमणेन विरुद्धान्राक्षसादीनपहत्य[1] सुष्ठु कृतं पृथिव्याः संबन्धिनं लोकं खननप्रदेशमकः[2] कृतवान्। ततः प्रदेशादग्निमग्नियोग्यां भूमिं मृदं खनेम। कीदृशमग्निं, सुप्रतीकं सुमुखम्। ये खनितारो वयं ते कीदृशाः, सुवरधिरुहाणाः स्वर्गेऽधिरोहणकामाः। कीदृशे स्वर्गे, उत्तमे सुखयुक्ते नाके कं सुखमकं दुःखं तद्रहिते। तदिदं मन्त्रद्वयं विनियुङ्क्ते—

"उत्क्रामोदक्रमीदिति द्वाभ्यामुत्क्रमयति प्रतिष्ठित्या अनुरूपाभ्यां तस्मादनुरूपाः पशवः प्र जायन्ते" [सं० का० ५ प्र० १ अ० ३] इति।

मन्त्रयोरादावुत्क्रमणाभिधानादनुष्ठेयार्थं प्रत्यनुरूपत्वम्।

कल्पः—"अपो देवीरुप सृजेत्यश्वस्य पदेऽप उपसृज्य" इति। पाठस्तु—

अपो देवीरिति। देवीर्देवनशीला अप उपसृज। अस्मिन्खननप्रदेशेऽहमुपसृजामि। कीदृशीरपः। मधुमतीर्मधुराः। किमर्थम्। अयक्ष्माय प्रजाभ्यः प्रजानामारोग्याय। तासां प्रक्षिप्तानामपां स्थानादस्मात्प्रदेशात्सार्पिष्पलाः शोभनफला ओषधय उज्जिहतामुत्पद्यन्ताम्। अनेन मन्त्रेणोदकसेचनं विधत्ते—

"अप उप सृजति यत्र वा आप उपगच्छन्ति तदोषधयः प्रति तिष्ठन्त्योषधीः प्रतितिष्ठन्तीः पशवोऽनु प्रति तिष्ठन्ति पशून्यज्ञो यज्ञं यजमानो यजमानं प्रजास्तस्मादप उप सृजति प्रतिष्ठित्यै" [सं० का० ५ त० १ अ० ३] इति।

अपामोषधीनां पशूनां यज्ञस्य यजमानस्य प्रजानां चोत्तरोत्तरप्रतिष्ठा पूर्वपूर्वाधीनेति प्रसिद्धम्। तस्मात्सर्वप्रतिष्ठार्थमप उपसृजेत्।

कल्पः—"पदे हिरण्यं निधाय जिघर्म्यग्निमा त्वा जिघर्मीति मनस्वतीभ्यामेकामाहुतिं हिरण्ये हुत्वा" इति। तत्र प्रथमामृचमाह—

जिघर्म्यग्निमिति। अहमग्निं मनसा ध्यायन्घृतेन जिघर्मि क्षारयामि दीपयामि वा। कीदृशमग्निम्। विश्वा भुवनानि प्रतिक्ष्यन्तं सर्वेषु लोकेषु प्रत्येकं निवसन्तम्। तिरश्चा पृथुं तिर्यक्प्रमाणेन[3] विस्तृतं, वयसा बृहन्तं वयउपलक्षितेन[4]

---

१ ख. च. °पहृत्य। २ क. घ. ङ. °हमप उप°। ३ क. घ. ङ. °त्येकमेव नि°। ४ ख. च. °र्थक्रमणे°।

कालेन औढम् । पृथुमित्यनेन बहुदेशव्याप्तिः, बर्हसेत्यनेन च बहुकालव्याप्तिरुक्ता । किंच, यदन्नं व्यचिष्ठमतिशयेन विस्तिर्णमन्नं गमनं पूजनं वा यस्य तद्व्यचिष्ठं भक्ष्यभोज्यादिरूपेण बहुविधं स्वादुत्वेन पूज्यं चेत्यर्थः । तादृशमन्नं रभसं शीघ्रमेव विदानं लभमानम् । अथ द्वितीयामाह—

आ त्वा जिघर्मीति । हे अग्ने त्वामाजिघर्मि वचसा मन्त्रेणानेन घृतेन सर्वतः क्षारयामि । अरक्षसा मनसा क्रौर्यरहितेन चित्तेन तद्घृतं जुषस्व । अथ-मग्निर्मर्यश्रीर्मर्यैराश्रयणीयः, स्पृहयद्वर्णो यजमानैः स्पृहणीयरूपः, नाभिमृशेऽभिमर्शनं कर्तुं न शक्यः । तनूवा जर्हृषाणो घृतपानपुष्टेन शरीरेणात्यन्तं हृष्टः । ईदृशमग्निं त्वामाजिघर्मीति योजना । आभ्यां मन्त्राभ्यां हिरण्ये होमं विधत्ते—

" यदध्वर्युरनग्नावाहुतिं जुहुयादन्योऽध्वर्युः स्याद्रक्षाꣳसि यज्ञꣳ हन्युर्हिरण्यमुपास्य जुहोत्यग्निवत्येव जुहोति नान्योऽध्वर्युर्भवति न यज्ञꣳ रक्षाꣳसि घ्नन्ति " [सं० का० ५ प्र० १ अ० ३] इति ।

अग्निरहितभूप्रदेशे होमेनाध्वर्युरन्यो भवति । होमाधिकरणस्याग्नेरदर्शनात् । एतदेव च्छिद्रमुपलभ्य रक्षांसि यज्ञं विनाशयेयुः । अत एतद्दोषपरिहाराय भूमौ हिरण्यं निधाय तस्मिञ्जुहुयात् । तथा सति हिरण्यस्याग्निसदृशत्वादयं प्रदेशोऽग्निमानेव भवतीति नोक्तदोषद्वयम् ।

प्रथममन्त्रस्य प्रथमपादे मनःशब्दस्योपयोगं दर्शयति—

" जिघर्म्यग्निं मनसा घृतेनेत्याह मनसा हि पुरुषो यज्ञमभिगच्छति " [सं० का० ५ प्र० १ अ० ३] इति ।

मनसा यज्ञाभिगमनं नाम यज्ञं करिष्य इत्येवंरूपः संकल्पः ।

द्वितीयपादस्य तात्पर्यं दर्शयति—

" प्रतिक्ष्यन्तं भुवनानि विश्वेत्याह सर्वꣳ ह्येष प्रत्यङ्क्षेति " [सं० का० ५ प्र० १ अ० ३] इति ।

एषोऽग्निः सर्वं यजमानमुद्दिश्य प्रत्यङ्मुखः क्षेति निवसति ।

तृतीयपादे पृथुं बृहन्तमित्यनयोस्तात्पर्यं दर्शयति—

" पृथुं तिरश्चा वयसा बृहन्तमित्याहाल्पो ह्येष जातो महान्भवति " [सं० का० ५ प्र० १ अ० ३] इति ।

---

१ ख. च °मेधरा° । २ ख. च. °मुखं क्षे° ।

(मृदाक्रान्त्यभिधानम्)

एषोऽग्निर्जातमात्रेणाल्पः पश्चादाहुतिभिर्वर्धमानो देशव्याप्त्या कालव्याप्त्या च महान्भवति।

चतुर्थपादे व्यचिष्ठमिति पदेन सूचितं पूजार्थत्वलक्षणं स्वादुत्वं दर्शयति—

"व्यचिष्ठमन्नꣳ रभसं विदानमित्याहान्नमेवास्मै स्वदयति" [सं० का० ५ प्र० १ अ० ३] इति। वेदनं प्रशंसति—

"सर्वमस्मै स्वदते य एवं वेद" [सं० का० ५ प्र० १ अ० ३] इति।

द्वितीयमन्त्रस्य प्रथमपादे वचसेतिपदस्याभिप्रायं दर्शयति—

"आ त्वा जिघर्मि वचसा घृतेनेत्याह तस्माद्यत्पुरुषो मनसाऽभिगच्छति तद्वाचा वदति" [सं० का० ५ प्र० १ अ० ३] इति।

यस्मात्प्रथममन्त्रे मनसेत्युक्त्वा द्वितीयमन्त्रे वचसेत्युक्तं तस्माल्लोकेऽपि पुरुषो यत्कार्यं मनसा चिन्तयति तत्पश्चाद्वाचा वदति।

द्वितीयपादे रक्षोनिषेधवाचिशब्दस्य तात्पर्यमाह—

"अरक्षसेत्याह रक्षसामपहत्यै" [सं० का० ५ प्र० १ अ० ३] इति।

तृतीयपादे मनुष्यैराश्रयणीयत्वेन वर्णस्य स्पृहणीयत्वेन चाग्नौ पूज्यत्वं संपाद्यत इति दर्शयति—

"पर्यग्निः स्पृहयद्वर्णो अग्निरित्याहापचितिमेवास्मिन्दधाति" [सं० का० ५ प्र० १ अ० ३] इति। वेदनं प्रशंसति—

"अपचितिमान्भवति य एवं वेद" [सं० का० ५ प्र० १ अ० ३] इति।

मन्त्रयोरुभयोर्मनःशब्दोपेतत्वं प्रशंसति—

"मनसा वै तामाप्तुमर्हति यामध्वर्युरनग्नावाहुतिं जुहोति मनस्वतीभ्यां जुहोत्याहुत्योराप्त्यै" [सं० का० ५ प्र० १ अ० ३] इति।

अग्नौ हूयमानाऽऽहुतिर्मनसैव प्राप्तुमर्हति। अग्नौ हुतेत्येवं मनसा संकल्पयितुं शक्यत्वात्। तस्मादाहुत्योः प्राप्तये मनःशब्दयुक्ताभ्यामृग्भ्यां जुहुयात्। मन्त्रद्वित्वं प्रशंसति—

"द्वाभ्यां प्रतिष्ठित्यै" [सं० का० ५ प्र० १ अ० ३] इति।

कल्पः—"अपादाय हिरण्यं परिवाजपतिः कविरिति तिसृभिरभ्रिया मृत्खनं परिलिखति बाह्यां वर्षीयसीम्" इति। तत्र प्रथमामाह—

---

१ ख. च. °महा। अ°। २ ख. च. °नं प्रत्यूचं प°।

परि वाजपतिरिति । अयमग्निर्हव्यानि परितोऽक्रमीत्स्वीकृतवान् । कीदृशोऽग्निः, वाजपतिरन्नस्य पालयिता । किं कुर्वन्, दाशुषे हविर्दत्तवते यजमानाय रत्नानि दधद्रमणीयानि धनानि संपादयन् । अथ द्वितीयामाह—

परि त्वाऽग्न इति । सहसि बले भवः सहस्यः । " सहसस्पुत्रो अद्भुतः " इति श्रुत्यन्तरात् । तादृशबलवन्हेऽग्ने वयं त्वां परिधीमहि परितः स्वी कुर्मः । कीदृशं त्वां, पुरमसदृपेक्षितफलानां पूरयितारं, विप्रं ब्राह्मणजात्यभिमानिनं देवं, धृषद्वर्णं धृषन्वैरिणां धर्षयिता वर्णः स्वरूपविशेषो यस्यासौ धृषद्वर्णस्तं, दिवेदिवे प्रतिदिनं भङ्गुरावतो भेत्तारं भञ्जनीयं पापं भङ्गुरं तदस्यास्तीति भङ्गुरावान्विघातको राक्षसादिस्तस्य विनाशयितारम् । अथ तृतीयामाह—

त्वमग्ने द्युभिरिति । हेऽग्ने त्वं द्युभिः स्वर्गैर्निमित्तभूतैस्तत्र तत्र यागशालासु जायसे । किंच, त्वमशुशुक्षणिरार्द्रां भूमिं शीघ्रमेव शोषयिता जायसे । त्वमद्भ्यो वर्षधाराभ्योऽशनिरूपेण जायसे । त्वमश्मनस्परि पाषाणस्योपरि पाषाणान्तरसंघट्टनेन जायसे । त्वं वनेभ्यो दावाग्निरूपेण जायसे । ओषधीभ्य ओषधिकार्येभ्यो भेषजेभ्यस्त्वं जायसे । यद्वा वंशद्वयसंघर्षणादिभ्यो जायसे । नृणां नृपते सर्वेषामपि मनुष्याणां पालक त्वं गृहेगृहे शुचिः शुद्धिहेतुः सञ्जायसे । 'पुनर्दाहेन मृन्मयम् ' इत्यादिस्मृतेः । एतैर्मन्त्रैः साध्यं परिलेखनं विधत्ते—

" यज्ञमुखेयज्ञमुखे वै क्रियमाणे यज्ञꣳ रक्षाꣳसि जिघाꣳसन्त्येतर्हि खलु वा एतद्यज्ञमुखं यर्ह्येनदाहुतिरश्नुते परि लिखति रक्षसामपहत्यै " [सं० का० ५ प्र० १ अ० ३] इति ।

यज्ञस्य मुखं प्रारम्भो यज्ञमुखं, यदा यदा यज्ञः प्रारभ्यते तदा तदा रक्षांस्यागत्य यज्ञं हन्तुमिच्छन्ति । एवं च सत्यत्राप्यश्वपदाङ्कितमेतत्स्थानमाहुतिर्यदा प्राप्नोति तदानीमेतदेवाश्वपदस्थानं यज्ञप्रारम्भरूपं भवति । अतोऽत्र प्राप्तानां रक्षसामपहत्यै परिलेखनं कुर्यात् । तत्र मन्त्रत्रयं विनियुङ्क्ते—

" तिसृभिः परि लिखति त्रिवृद्वा अग्निर्यावानेवाग्निस्तस्माद्रक्षाꣳस्यप हन्ति " [सं० का० ५ प्र० १ अ० ३] इति ।

आहवनीयगार्हपत्यदक्षिणाग्निरूपेणाग्नेस्त्रिगुणत्वम् । सर्वस्मादप्येतस्मादग्ने रक्षसामपघातो मन्त्रत्रित्वेन संपद्यते ।

(मृद्वाकान्त्यभिधानम्)

परिवाजपतिरित्येतां विशेषाकारेण विधत्ते—

" गायत्रिया परि लिखति तेजो वै गायत्री तेजसैवैनं परि गृह्णाति " [सं० का० ५ प्र० १ अ० ३] इति ।

पादत्रयोपेतत्वादियं गायत्री । तस्याश्चाग्निना सह प्रजापतिमुखादुत्पन्नत्वात्तेजस्त्वम् । एनमग्निप्रदेशम् । त्वमग्ने द्युभिरित्येवां विधत्ते—

" त्रिष्टुभा परिलिखतीन्द्रियं वै त्रिष्टुगिन्द्रियेणैवैनं परि गृह्णाति " [सं० का० ५ प्र० १ अ० ३] इति । परि त्वाऽग्न इत्येतां विधत्ते—

" अनुष्टुभा परि लिखत्यनुष्टुप्सर्वाणि छन्दांसि परिभूः पर्याप्त्यै " [सं० का० ५ प्र० १ अ० ३] इति ।

वाग्रूपयमनुष्टुप्सर्वाणि च्छन्दांसि परितो भवति व्याप्नोतीति परिभूः । अतः सेयं पर्याप्त्यै संपद्यते ।

अस्या अनुष्टुभः पाठप्राप्तं मन्त्रद्वयमध्यवर्तित्वं प्रशंसति—

"मध्यतोऽनुष्टुभा वाग्वा अनुष्टुप्तस्मान्मध्यतो वाचा वदामः" [सं० का० ५ प्र० १ अ० ३] इति ।

अनुष्टुभा परिलिखतीति शेषः । यस्माद्वाग्रूपाऽनुष्टुब्मध्यतः पठिता तस्माद्वयमपि मुखमध्यवर्तिजिह्वासाध्यया वाचा संभाषणं कुर्मः ।

गायत्रीत्रिष्टुभोः पाठप्राप्तमाद्यन्तरूपत्वं प्रशंसति—

" गायत्रिया प्रथमया परि लिखत्यथानुष्टुभाऽथ त्रिष्टुभा तेजो वै गायत्री यज्ञोऽनुष्टुगिन्द्रियं त्रिष्टुक्तेजसा चैवेन्द्रियेण चोभयतो यज्ञं परि गृह्णाति " [सं० का० ५ प्र० १ अ० ३] इति ।

पूर्वं प्रशस्ताऽपि मध्यवर्तिन्यनुष्टुप्पुनरपि पार्श्वस्थाभ्यां सह प्रशस्यते । यज्ञनिष्पादकवाग्रूपत्वादनुष्टुभो यज्ञत्वम् । तस्मादुभयतो गायत्रीत्रिष्टुभोः पाठेन मध्यवर्तिनं यज्ञमेव तेजसा चैवेन्द्रियेण चोभयतः परिगृहीतवान्भवति ।

अत्र विनियोगसंग्रहः—

इमां रज्जुं सपादस्य प्रतु तुरगबन्धनम् ।
युञ्जा गर्दभमालभ्य योगे यान्ति त्रिभिर्मृदम् ॥
इमोन्तादग्निमित्यादेर्गमने देष्यमन्त्रणम् ।
श्यामोन्तेन वपा जप्या रामोन्तादुद्देष्यमन्त्रणम् ॥

---

१ क. घ. ङ. ॰सा चेन्द्रि॰ । २ ख. ॰र्मृदा । इ॰ ।

अन्वाग्नि गच्छेदागत्य द्वाभ्यामाक्रमयेद्ध्रुवम् ।
द्यौस्तेऽभ्रपृष्ठं समार्ष्टि सुत्का द्वाभ्यां तदुत्क्रमः ॥
अपः पदेऽपो निनयेज्जिघद्वाभ्यां जुहोति हि ।
परित्रिभिः परिलिखेदेकविंशतिरीरिताः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे प्रथमप्रपाठके
द्वितीयोऽनुवाकः ॥ २ ॥

(अथ चतुर्थाष्टके प्रथमप्रपाठके तृतीयोऽनुवाकः) ।

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां पृथिव्याः सधस्थेऽग्निं पुरीष्यमङ्गिरस्वत्खनामि । ज्योतिष्मन्तं त्वाऽग्ने सुप्रतीकमजस्रेण भानुना दीद्यानम् । शिवं प्रजाभ्योऽहिꣳसन्तं पृथिव्याः सधस्थेऽग्निं पुरीष्यमङ्गिरस्वत्खनामि । अपां पृष्ठमसि सप्रथा उर्वग्निं भरिष्यदपराजितम् । वर्धमानं महऽआ च पुष्करं दिवो मात्रया वरिणा प्रथस्व । शर्म च स्थः (१) वर्म च स्थो अच्छिद्रे बहुले उभे । व्यचस्वती सं वसाथां भर्तमग्निं पुरीष्यम् । सं वसाथाꣳ सुवर्विदा समीची उरसा त्मना । अग्निमन्तर्भरिष्यन्ती ज्योतिष्मन्तमजस्रमित् । पुरीष्योऽसि विश्वभराः । अथर्वा त्वा प्रथमो निरमन्थदग्ने । त्वामग्ने पुष्कराद्ध्यथर्वा निरमन्थत । मूर्ध्नो

---

१ ख. च. °द्दृङ्गमः ।

(खननाभिधानम्)

विश्वस्य वाघतः। तमु त्वा दध्यङ्ङृषिः पुत्र ईधे (२) अथर्वणः। वृत्रहणं पुरंदरम्। तमु त्वा पाथ्यो वृषा समीधे दस्युहन्तमम्। धनंजयꣳ रणेरणे। सीद होतः स्व उ लोके चिकित्वान्त्सादया यज्ञꣳ सुकृतस्य योनौ। देवावीर्देवान्हविषा यजास्यग्ने बृहद्यजमाने वयो धाः। नि होता होतृषदने विदानस्त्वेषो दीदिवाꣳ असदत्सु दक्षः। अदब्धव्रतप्रमतिर्वसिष्ठः सहस्रंभरः शुचिजिह्वो अग्निः। सꣳ सीदस्व महाꣳ असि शोचस्व (३) देववीतमः। वि धूममग्ने अरुषं मियेध्य सृज प्रशस्त दर्शतम्। जनिष्वा हि जेन्यो अग्ने अह्नाꣳ हितो हितेष्वरुषो वनेषु। दमे दमे सप्त रत्ना दधानोऽग्निर्होता नि षसादा यजीयान् (४)॥

(स्थ ईधे शोचस्व सप्तविꣳशतिश्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके प्रथमप्रपाठके तृतीयोऽनुवाकः॥ ३॥

(अथ चतुर्थकाण्डे प्रथमप्रपाठके तृतीयोऽनुवाकः)।

द्वितीये मृदाक्रमणमुक्तम्। अथ तृतीये खननमभिधीयते।

कल्पः—"देवस्य त्वा सवितुः प्रसव इति द्वाभ्यां खनति" इति।

प्रथममन्त्रपाठस्तु—

देवस्य त्वेति। स्पष्टोऽर्थः। द्वितीयमन्त्रपाठस्तु—

ज्योतिष्मन्तमिति। हेऽग्ने पृथिव्याः सधस्थ उपरिप्रदेशे पुरीष्यं पांसुयोग्यमग्निं त्वामङ्गिरस इवाहं खनामि। कीदृशं त्वां, ज्योतिष्मन्तं ज्वालायुक्तं, सुप्र-

तर्किं सुमुखम्, अजस्रेण भानुना दीप्तानं निरन्तरं वर्तमानेन रश्मिना प्रकाशमानं प्रजाभ्यः प्रजोपकारार्थं शिवं शान्तमत एवाहिंसन्तं हिंसामकुर्वन्तम् ।

एतन्मन्त्रद्वयसाध्यं खननं विधत्ते—

" देवस्य त्वा सवितुः प्रसव इति खनति प्रसूत्या अथो धूमेनैवैतेन जनयति ज्योतिष्मन्तं त्वाऽग्ने सुप्रतीकमित्याह ज्योतिरेवैतेन जनयति " [तै० का० ५ प्र० १ अ० ४] इति ।

प्रथममन्त्रे सवितुः प्रसव इत्युच्चारणं प्रेरणाय संपद्यते । किंचैतेन मन्त्रेण धूमेनैवोत्पादयति न तु ज्वालां, तस्मादुद्वितीयमन्त्रादौ ज्योतिष्मन्तमित्येतेन शब्देन ज्योतिर्जनयत्येव ।

तस्य मन्त्रस्य द्वितीयार्धे शिवशब्दतात्पर्यं दर्शयति—

" सोऽग्निर्जातः प्रजाः शुचाऽर्पयत्तं देवा अर्धर्चेनाशमयञ्छिवं प्रजाभ्योऽहिꣳसन्तमित्याह प्रजाभ्य एवैनꣳ शमयति " [तै० का० ५ प्र० १ अ० ४] इति ।

ज्वालासहित उत्पन्नमात्रेणैव प्रजाः सर्वाः संतापेनायोजयत्तं तादृशमग्निं शिवमित्याद्यर्धर्चेन देवाः शान्तमकुर्वन् । तस्मादस्यार्धर्चस्य पाठेन प्रजोपकारायैवैनं शान्तं करोति । मन्त्रद्वित्वं प्रशंसति—

" द्वाभ्यां खनति प्रतिष्ठित्यै " [तै० का० ५ प्र० १ अ० ४] इति । कल्पः—" अपां पृष्ठमसीति पुष्करपर्णमाहरत्येतयैव विवेष्टय " इति ।

मृदं प्रक्षेप्तुं पुटिकां कृत्वेत्यर्थः । पाठस्तु—

अपां पृष्ठमसि। हे पुष्करपर्ण त्वमपां पृष्ठमसि पृष्ठवदुपरिभागे वर्तमानमसि । कीदृशं त्वम् । समथाः सविस्तारमत एवोर्वग्निं भरिष्यदग्निसाधनमृदं बहुलं यथा भवति तथा भरितुं समर्थम् । अपरावपिष्ठं परावपो विनाशः, अतिशयेन तद्रहितम् । वर्धमानमप्संबन्धादिने दिने वृद्धियुक्तं, महो निर्लेपत्वाद्युक्त्या पूजनीयं, पुष्करमग्निनिष्पादनद्वारा पुष्टिकरं, तादृशं त्वं मात्रया परिमाणेन दिवो वरिणाऽऽकाशादप्याधिक्येनाऽऽतमन्तात्मथस्व विस्तृतं भव ।

तमेतं मन्त्रं विनियुङ्क्ते—

---

१ क. घ. तादृश ।

(खननाभिधानम्)

" अपां पृष्ठमसीति पुष्करपर्णमा हरत्यपां वा एतत्पृष्ठं यत्पुष्करपर्णꣳ रूपेणैवैनदा हरति " [सं० का० ५ प्र० १ अ० ४] इति ।

अपामुपरिवर्तमानत्वस्य विद्यमानस्यैवार्थस्याभिधायित्वादनुरूपेणैव मन्त्रेणैनत्पुष्करपर्णमाहरति ।

कल्पः—" शर्म च स्थो वर्म च स्थ इति द्वाभ्यामुत्तरेण मुखनं कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमाऽऽस्तृणात्युपरिष्टात्पुष्करपर्णमुत्तानम् " इति ।

प्रथममन्त्रपाठस्तु—

शर्म च स्थ इति । हे कृष्णाजिनपुष्करपर्णे उभे युवां शर्म च स्थः सुखकारिणी अपि भवथः । तथा वर्म च स्थः कवचवद्रक्षके अपि भवथः । कीदृशे, अच्छिद्रे छिद्ररहिते बहुले विस्तीर्णे व्यचस्वती आच्छादनप्रकारवती पुटिकादिसदृशे इत्यर्थः। तथाविधे युवां संवसाथां सम्यक्मृदमाच्छादयतम् । ततः पुरिष्यमाग्निं भर्तं धारयतम् । द्वितीयमन्त्रपाठस्तु—

सं वसाथामिति । हे कृष्णाजिनपुष्करपर्णे युवां त्वया स्वयमेव परनिरपेक्षे सती उरसोरःसदृशेन भवदीयस्वरूपेण संवसाथां सम्यगाच्छादयतम् । कीदृशे युवां, सुवर्विदा स्वर्गविदे स्वर्गलाभसाधने इत्यर्थः । समीची मृद्धनायानुकूले अजस्रमिन्निन्तरमेव ज्योतिष्मन्तमग्निमन्तः स्वोदरे भरिष्यन्ती धारयिष्यन्ती । अनेन मन्त्रद्वयेन साध्यं पुष्करपर्णस्य प्रसारणमुत्तरत्र विधातुमादौ पुष्करपर्णे मृदः संभरणं विधत्ते—

" पुष्करपर्णेन सं भरति योनिर्वाऽग्नेः पुष्करपर्णꣳ स्वयोनिमेवाग्निꣳ सं भरति " [सं० का० ५ प्र० १ अ० ४] इति ।

पुष्करपर्णस्याग्निस्थानत्वमारुणकेतुकचयने समाम्नातम्—" जानुदघ्नीमुत्तरवेदीं खात्वा । अपां पूरयित्वा गुल्फदघ्नम् । पुष्करपर्णैः पुष्करदण्डैः पुष्करैश्च संस्तीर्य । तस्मिन्विहायसे । अग्निं प्रणीयोपसमाधाय " इति । अतः पुष्करपर्णस्याग्नियोनित्वात्स्वयोनिमेवाग्निं संभृतवान्भवति ।

पुष्करपर्णवत्तेनैव मन्त्रद्वयेन कृष्णाजिनस्याऽऽस्तरणं विधातुमादौ कृष्णाजिने मृदः स्थापनं विधत्ते—

---

१ ख. च. च स्थोऽग्नेः सु° । २ ख. च. °स्थानीयत्व° ।

"कृष्णाजिनेन सं भरति यज्ञो वै कृष्णाजिनं यज्ञेनैव यज्ञꣳ सं भरति" [सं० का० ५ प्र० १ अ० ४] इति।

कृष्णाजिनस्य यज्ञरूपत्वं दर्शपूर्णमासप्रकरणेऽवगम्यते—"यज्ञो देवेभ्यो निलायत। कृष्णो रूपं कृत्वा। यत्कृष्णाजिने हविरभ्यवहन्ति। यज्ञादेव तद्यज्ञं मयुङ्क्ते" इति। तदिहापि कृष्णाजिनरूपेण यज्ञेनैवाग्निरूपं यज्ञं संभरति।

चर्मान्तरपरित्यागेन कृष्णाजिनस्वीकारे कारणं दर्शयति—

"यद्ग्राम्याणां पशूनां चर्मणा संभरेद्ग्राम्यान्पशून्छुचार्पयेत्कृष्णाजिनेन सं भरत्यारण्यानेव पशून्छुचार्पयति तस्मात्तमावत्पशूनां प्रजायमानानामारण्याः पशवः कनीयाꣳसः शुचा ह्येते" [सं० का० ५ प्र० १ अ० ४] इति।

ग्राम्यपशूनां गवादीनां चर्मण्यग्निसंभरणे गवादयः संतापेन संयोजिता भवन्ति। कृष्णाजिनेन संभरणे त्वारण्या एव पशवः संतापेन योज्यन्ते। यस्मादेवं तस्माल्लोकेऽपि चतुष्पात्त्वाद्याकारसाम्येन प्रजायमानानां पशूनां मध्ये ग्राम्याः श्रेष्ठा आरण्या एव कनिष्ठाः। यस्मात्ते शुचर्ताः शुचं प्राप्तास्तस्मात्तेषां कनिष्ठत्वं युक्तम्। नहि ग्राम्यगवादय इव शालाप्रवेशनभक्ष्यपदानादिभिरारण्या पोष्यन्ते[4]। सेयं तेषां शोकप्राप्तिः।

तस्य कृष्णाजिनस्य लोम्नामुपरि संभरणं विधत्ते—

"लोमतः सं भरत्यतो ह्यस्य मेध्यम्" [सं० का० ५ प्र० १ अ० ४] इति।

यस्मादस्य कृष्णाजिनस्यात इदं लोमयुक्तं स्थानं मेध्यं तस्मात्तत्र संभरेत्।

इदानीमुक्तसंभरणसिद्धये पूर्वोक्तमन्त्रद्वयसाध्यमुभयास्तरणं विधत्ते—

"कृष्णाजिनं च पुष्करपर्णं च सꣳस्तृणातीयं वै कृष्णाजिनमसौ पुष्करपर्णमाभ्यामेवैनमुभयतः परि गृह्णाति" [सं० का० ५ प्र० १ अ० ४] इति।

कृष्णाजिनपुष्करपर्णयोरधरोत्तरभावेन लोकद्वयरूपत्वम्।

कल्पः—"पुरीष्योऽसि विश्वभरा इति मृत्खननमभिमन्त्र्य" इति। पाठस्तु—

पुरीष्योऽसीति। हे खननप्रदेश त्वं पुरीष्योऽसि पुरीषस्य बहुलस्य पांसोर्योग्योऽसि। अत एव विश्वभरा असि। विश्वं कृत्स्नमुखारूपं बिभर्तीति विश्वभराः। हेऽग्नेऽथर्वारूय ऋषिः प्रथम इतरेभ्यः पूर्वभावी संस्त्वां निरमन्थन्निःशेषेण मथितवान्।

---

१ ख. च. °सब्राह्मणऽ। २ ख. च. हेतु। ३ क. घ. ङ. संपादने। ४ख. च. °न्ते। अतस्तेषां।

(खननाभिधानम्)

अत्राथर्वणः प्रथमनिर्मथनं नाम प्रथमदर्शनमित्यभिप्रायं दर्शयति—

"अग्निर्देवेभ्यो निलायत तमथर्वाऽन्वपश्यदथर्वा त्वा प्रथमो निरमन्थदग्न इत्याह य एवैनमन्वपश्यत्तेनैवैनꣳ सं भरति" [सं० का० ५ प्र० १ अ० ४] इति। अन्वपश्यदन्विष्य दृष्टवान्।

कल्पः—" त्वामग्ने पुष्करादधीति कृष्णाजिने पुष्करपर्णे च संभरति चतसृभिस्तिसृभिर्वा गायत्रीभिर्ब्राह्मणस्य त्रिष्टुग्भी र जन्यस्य " इति।

यद्यप्यत्र त्वामग्न इत्यादिकास्तिस्र एव गायत्र्यः समाम्नातास्तथाऽपि चतुष्टुवपक्षे पुरीष्योऽसि विश्वभरा इत्यनेन पूर्वोक्तेन मन्त्रेण सह संख्या पूरणीया। पुरीष्योऽसीत्ययं मन्त्रः पूर्वं व्याख्यातः। द्वितीयमन्त्रपाठस्तु—

त्वामग्न इति। हेऽग्नेऽथर्वाख्य ऋषिः पुष्करादधि पद्मपत्रस्योपरि त्वां निरमन्थत निःशेषेण मथितवान्। अत एव पञ्चमकाण्डे ब्राह्मणमाम्नातम्—"पुष्करपर्णे ह्येनमुपाश्रयन्तमविन्दन्" इति। कीदृशात्पुष्करात्। मूर्ध्नः उत्तमाङ्गस्य त्वष्टाद्विश्वस्य बाधतः सर्वस्य जगतो वाहकात्। इदं हि पुष्करपर्णमग्निमन्थनयज्ञनिष्पादनादिद्वारा सर्वं जगद्बिर्वहति। तृतीयमन्त्रपाठस्तु—

तमु त्वा दध्यङ्ङिति। हेऽग्नेऽथर्वणः पुत्रो दध्यङ्नामक ऋषिस्तमु त्वेवे तमेव त्वां प्रज्वलितवान्। कीदृशं त्वाम्। वृत्रहणं वैरिनाशनं पुरंदरं रुद्ररूपेणासुरसंबन्धिनां त्रयाणां पुराणां विदारयितारम्। चतुर्थमन्त्रपाठस्तु—

तमु त्वा पाथ्य इति। हेऽग्ने पाथ्यनामकः कश्चिदृषिस्तमु त्वा समीधे तमेव त्वां प्रज्वालितवान्। कीदृशः पाथ्यः। वृषा श्रेष्ठः। कीदृशं त्वाम्। दस्युहन्तमं तस्कराणामतिशयेन हन्तारं, रणेरणे धनंजयं तेषु तेषु संग्रामेषु धनस्य जेतारम्।

इत्थमिमा गायत्र्य उक्ताः। अथ त्रिष्टुभां चतसृणां मध्ये प्रथमामाह—

सीद होतरिति। हे होतर्होमनिष्पादक चिकित्वानभिज्ञस्त्वं स्वकीय एव स्थान उत्तरवेदिरूपे सीदोपविश। यज्ञं चेमं सुकृतस्य योनौ पुण्यकर्मणो योग्यस्थाने सादय स्थापय। देवान्वेति कामयत इति देवावीर्देवप्रिय इत्यर्थः। तादृशस्त्वं देवान्हविषा यजासि पूजयसि। हेऽग्ने यजमाने बृहदयो दीर्घमायुर्धाः स्थापय। अथ द्वितीयामाह—

नि होतेति। होतृपदेन होमनिष्पादकस्य योग्यस्थान उत्तरवेदिरूपेऽग्निर्नि-

१ ख. च. अर्थ। २ ख. च. °तुष्कप°। ३ ख. च. °ननि°।

तरामसदत्सम्यगुपविष्टवान् । कीदृशोऽग्निः । होता देवानामाह्वाता, विदानः स्थानाभिज्ञः, त्वेषो दीप्तिमान्, दीदिवान्देवेभ्यो हविषो दाता, सुदक्षोऽत्यन्तकुशलः । अदब्धव्रतप्रमतिरदब्धेऽविनाशिते व्रते कर्मणि प्रकृष्टा मतिर्यस्य स तथाविधः । वसिष्ठोऽतिशयेन वासयिता । सहस्रसंख्याकानि हवींषि भरति पोषयतीति सहस्रंभरः। शुचिः शुद्धा होमयोग्या जिह्वा ज्वाला यस्यासौ शुचिजिह्वः।

अथ तृतीयामाह--

स४सीदस्वेति । हेऽग्ने त्वमस्मिन्पुष्करपर्णे संसीदस्व सम्यगुपविश । त्वमेनेकक्रतुत्वान्महानसि, देवान्वेति गच्छतीति देववीरतिशयेन देववीर्देववीतमः । तादृशस्त्वं शोचस्व दीप्यस्व । हे प्रियेध्य मेधार्ह प्रशस्तोत्कृष्टाग्नेऽरुषमरोषणमनुग्रं दर्शनं द्रष्टुं शक्यं शान्तं धूमं विशेषेण सृज । अथ चतुर्थीमाह--

जनिष्वा हीति । हेऽग्ने त्वमद्यामद्ये प्रभातकाले जनिष्वोत्पद्यस्व । कीदृशस्त्वम् । जेन्यो जयशीलः । हितेषु हितो हविर्भुजो ये देवास्तुभ्यं हितमाचरन्ति, ये च मनुष्या ऋत्विग्यजमानास्तुभ्यं हितमाचरन्ति, तेषु सर्वेषु हितेषु त्वमपि हितो भवसि । वनेष्वरुषो नानाविधफलवृक्षोपेतेषु वनेषु कोपरहितो दावाग्निरूपेण वनानि न दहती(सी)त्यर्थः । अयमग्निर्देवेभ्यो यजमानानां गृहे गृहे निषसादोपविष्टः । कीदृशोऽग्निः । सप्त रत्ना दधानो रत्नसमानाज्वालाविशेषान्सप्तसंख्याकान्धारयमाणः । अत एव सप्तजिह्व इति सर्वत्र प्रसिद्धः ।

आथर्वणिकाश्चाऽऽमनन्ति--

" काली कराली च मनोजवा च
सुलोहिता या च सुधूम्रवर्णा ।
स्फुलिङ्गिनी विश्वरुची च देवी
लेलायमाना इति सप्त जिह्वाः " ॥ इति ।

स चाग्निर्होता देवानामाह्वाता यजीयानतिशयेन यष्टा ।

उक्तासु गायत्रीषु त्वामग्न इत्येतस्यां पुष्करादधीत्यस्यांशस्य तात्पर्यं दर्शयति--

" त्वामग्ने पुष्करादधीत्याह पुष्करपर्णे खेनमुपश्रितमवि दत् " [सं० का० ५ प्र० १ अ० ४ इति ।

अथवा यदाऽग्निमन्विष्टवांस्तदानीं कस्मिंश्चित्पुष्करपर्णेऽवस्थितमेनमाग्निं लब्धवान् । तस्मात्पुष्करादधीत्युक्तिर्युक्ता ।

(स्वननामिधानम्)

अनन्तरमन्त्रे परित्यज्यान्यमृषिं दधीच एव स्वीकारे कारणं दर्शयति—

"तमु त्वा दध्यङ्ङृषिरित्याह दध्यङ्वा आथर्वणस्तेजस्व्यासीत्तेज एवास्मिन्दधाति" [सं० का० ५ प्र० १ अ० ४] इति।

अन्यत्र मन्त्रान्तरे दधीचो महिमा प्रपञ्चितः—"दध्यङ्ह यन्मध्वाथर्वणो वामश्वस्य शीर्ष्णा" इत्यादौ। तस्माद्दधीचस्तेजस्वित्वम्।

उपरितनमन्त्रेण पाथ्यशब्देन दध्यङ्ङेव विवक्षितो नान्य इत्येतद्दर्शयति—

"तमु त्वा पाथ्यो वृषेत्याह पूर्वमेवोदितमुत्तरेणाभि गृणाति" [सं० का० ५ प्र० १ अ० ४] इति।

यः पूर्वमन्त्रोक्तो दध्यङ्स एवात्र सन्मार्गवर्तित्वात्पाथ्य इत्युच्यते। अतः पूर्वमन्त्रोदितमेवार्थमुत्तरेण मन्त्रेण प्रतिपादयति।

एतैर्मन्त्रैः साध्यमग्निसंभरणं विधत्ते—

"चतसृभिः सं भरति चत्वारि छन्दांसि छन्दोभिरेव" [सं० का० ५ प्र० १ अ० ४] इति।

त्वामग्न इत्याद्यास्तिस्रस्ततः पूर्वा पुरीष्योऽसीत्येका, तदेवं चतस्रः। गायत्री त्रिष्टुब्जगत्यनुष्टुगिति च्छन्दसां चतुष्टवम्। अतः संख्यासाम्याच्छन्दोभिरेवाग्निः संभृतो भवति। तीद्ध होतारित्यादीनां त्रिष्टुभां चतुष्टवम्। अत्रापि चतसृभिः संभरतीति विधिर्योजनीयः।

गायत्रीणां त्रिष्टुभां चाधिकारिभेदेन व्यवस्थां विधत्ते—

"गायत्रीभिर्ब्राह्मणस्य गायत्रो हि ब्राह्मणस्त्रैष्टुभी राजन्यस्य त्रैष्टुभो हि राजन्यः" [सं० का० ५ प्र० १ अ० ४] इति।

मुखजत्वसाम्येन ब्राह्मणो गायत्रो बाहुजत्वसाम्येन राजन्यस्त्रैष्टुभः।

अथ काम्यं समुच्चयं विधत्ते—

"यं कामयेत वसीयान्त्स्यादित्युभयीभिस्तस्य सं भरेत्तेजश्चैवास्मा इन्द्रियं च समीची दधाति" [सं० का० ५ प्र० १ अ० ४] इति।

तत्र गायत्रीभिस्तेजःप्राप्तिस्त्रिष्टुग्भिरिन्द्रियप्राप्तिः।

समुच्चितमन्त्रगतामष्टत्वसंख्यां प्रशंसति—

---

१ क. घ. ङ. च. °ष्टुबिति। २ ब. ङ. °तुष्टयेऽप्ययं च°। ३ ख. °ष्टुब्भिरि। ४ ख. च. छसं°।

"अष्टाभिः सं भरत्यष्टाक्षरा गायत्री गायत्रोऽग्निर्यावानेवाग्निस्तꣳ सं भरति" [सं० का० ५ प्र० १ अ० ४] इति ।

चतस्रस्त्रिष्टुभः प्रत्येकं क्रमेण प्रशंसति—

" सीद होतरित्याह देवता एवास्मै सꣳ सादयति नि होतेति मनुष्यान्तꣳ सीदस्वेति वयाꣳसि जनिष्ट्वा हि जेन्यो अग्ने अह्नामित्याह देवमनुष्यानेवास्मै सꣳ सन्नान्य जनयति " [सं० का० ५ प्र० १ अ० ४] इति ।

सीद होतरित्येतस्यां प्रथमायां त्रिष्टुभि देवानीरिति पदेन देवतानां संसादनं सूचितम् । यद्वा देवान्हविषा यजासीत्यनेन तत्सूचितम् । निहोतेत्यस्यां द्वितीयायां त्रिष्टुभि होतृषदन इति पदेन होत्रादीनां मनुष्याणां संसादनं सूचितम् । सꣳ सीदस्वेत्यस्यां तृतीयायां त्रिष्टुभि धूमं विसृजेत्येवमन्तरिक्षगामिना(णा) धूमेनान्तरिक्षचारिणां पक्षिणां सूचितत्वात्तेषां संसादनमुक्तम् । जनिष्वेत्यस्यां चतुर्थ्यां त्रिष्टुभि जनिष्वेत्युत्पादनस्य सूचितत्वात्पूर्वोक्तान्संसन्नान्देवान्मनुष्यांस्तदुपलक्षितानि वयांसि च प्रकर्षेण जनयति । अत्र विनियोगसंग्रहः—

देव द्वाभ्यां खनेच्चापां पद्मपत्रं समाहरेत् ।
शर्म द्वाभ्यां चर्मपत्रे स्तृणात्यथ पुरीष्यतः ॥
चतुर्ष्टया संभरति विप्रस्य क्षत्रियस्य तु ।
सीदेत्यादिचतुष्केण मन्त्रा द्वादश वार्णिताः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे प्रथमप्रपाठके
तृतीयोऽनुवाकः ॥ ३ ॥

(अथ चतुर्थकाण्डे प्रथमप्रपाठके चतुर्थोऽनुवाकः) ।

सं ते वायुर्मातरिश्वा दधातूत्तानायै हृदयं
यद्विलिष्टम् । देवानां यश्चरति प्राणथेन तस्मै

---

१ ख ग °क्षं प° । २ ग घ °तेवास्त° । ३ ग °रीष्यत° । ४ ख ग °क्षसंप° ।

(मृदाहरणाभिधानम्)

च देवि वर्षडस्तु तुभ्यम् । सुजातो ज्योतिषा सह शर्म वरूथमाऽसदः सुवः । वासो अग्ने विश्वरूपꣳ सं व्ययस्व विभावसो । उदु तिष्ठ स्वध्वरावा नो देव्या कृपा । दृशे च भासा बृहता सुशुक्वनिराऽग्ने याहि सुशस्तिभिः(१) ऊर्ध्व ऊ षु णं ऊतये तिष्ठा देवो न सविता । ऊर्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे । स जातो गर्भो असि रोदस्योरग्ने चारुर्विभृत ओषधीषु । चित्रः शिशुः परि तमाꣳस्यक्तः प्र मातृभ्यो अधि कनिक्रदद्गाः । स्थिरो भव वीड्वङ्ग आशुर्भव वाज्यर्वन् । पृथुर्भव सुषदस्त्वमग्नेः पुरीषवाहनः । शिवो भव (२) प्रजाभ्यो मानुषीभ्यस्त्वमङ्गिरः । मा द्यावापृथिवी अभि शूशुचो माऽन्तरिक्षं मा वनस्पतीन् । प्रेतु वाजी कनिक्रदन्नानदद्रासभः पत्वा । भरन्नग्निं पुरीष्यं मा पाय्यायुषः पुरा । रासभो वां कनिक्रदत्सुयुक्तो वृषणा रथे । स वामग्निं पुरीष्यमाशुर्वहादितः । वृषाऽग्निं वृषणं भरन्नपां गर्भꣳ समुद्रियम् । अग्न आ याहि (३) वीतय ऋतꣳ सत्यम् । ओषधयः प्रति गृह्णीताग्निमेतꣳ शिवमायन्तमभ्यत्र युष्मान् । व्यस्यन्विश्वा अमतीररातीर्निषीदन्नो अप दुर्मतिꣳ हनत् । ओषधयः प्रति मोदध्व-

(मृदाहरणाभिधानम्)

मेनं पुष्पावतीः सुपिप्पलाः। अयं वो गर्भ ऋत्वियः प्रत्नꣳ सधस्थमाऽसदत् (४)॥

(सुशस्तिभिः शिवो भव याहि षट्त्रिꣳशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके प्रथमप्रपाठके चतुर्थोऽनुवाकः॥ ४॥

(अथ चतुर्थकाण्डे प्रथमप्रपाठके चतुर्थोऽनुवाकः)।

तृतीयानुवाके मृत्खननमुक्तम्। अथ चतुर्थे मृदाहरणमुच्यते।

कल्पः—"सं ते वायुरिति मृत्खनेऽप आनीय" इति। पाठस्तु—

सं ते वायुरिति। हे पृथिवे उत्तानाया ऊर्ध्वाभिमुखेनावस्थिताया अस्तव हृदयं हृदयसदृशं यत्खननस्थानं विलिष्टं विशेषणाल्पीकृतं तत्खननस्थानं वायुः संदधातु तृणादिपूरणसहितेनानेन जलप्रक्षेपणेन वायुर्यथापूर्वं सम्यक्करोतु। कीदृशो वायुः। मातरिश्वा मातर्यन्तरिक्षे सर्वप्राणिनामियत्तापरिच्छेदकारिणि शेतेऽवतिष्ठत इति मातरिश्वा। यो वायुर्देवानां प्राणथेन प्राणभावेन चरति व्यवहरति। हे देवि पृथिवि तुभ्यं तस्मै वायवे च वषडस्तु। इदं तृणसहितं जलं हुतमस्तु। अनेन मन्त्रेण साध्यमञ्जलिजलप्रक्षेपं विधत्ते—

"क्रूरमिव वा अस्या एतत्करोति यत्खनत्यप उप सृजत्यापो वै शान्ताः शान्ताभिरेवास्यै शुचꣳ शमयति" [सं० का० ५ प्र० १ अ० ५] इति।

भूप्रदेशं खनतीति यत्तदेतत्पृथिव्याः क्रूरमेव करोति। हस्तादिच्छेदवद्व्यथाहेतुत्वात्। तत्कौर्यपरिहाराय मृत्खननप्रदेशेऽपोऽवनयेत्। आपश्च शीतलत्वेन शान्ताः। एतादृशीभिरेवास्याः पृथिव्याः खननजन्यं शोकं शमयति।

मन्त्रे देवतान्तरपरित्यागेन वायुकथने प्रयोजनमाह—

"सं ते वायुर्मातरिश्वा दधात्वित्याह प्राणो वै वायुः प्राणेनैवास्यै प्राणꣳ सं दधाति" [सं० का० ५ प्र० १ अ० ५] इति।

वायोर्देवप्राणत्वात्तेनैवास्याः पृथिव्याः प्राणसंधानं संपद्यते।

पुनरपि वायोरन्यत्प्रयोजनमाह—

---

१ ख. च. साध्यं जल°। २ घ. ङ. °लिप्र°।

(मृदाहरणाभिधानम्)

" सं ते वायुरित्याह तस्माद्वायुप्रच्युता दिवो वृष्टिरीर्ते " [सं० का० ५ प्र० १ अ० ५] इति ।

यस्मात्प्रयोजनान्तरमपि विवक्षितमिति वायुशब्दः प्रयुक्तस्तस्मादेव कारणाद्वृष्टिर्दिवः सकाशाद्वायुप्रच्युता सती प्रवर्तते ।

मन्त्रस्य चतुर्थपादे वषट्शब्दान्तर्गतेन षट्शब्देन स्मारितामृतुसंख्यामुपजीव्य प्रशंसति—

" तस्मै च देवि वषडस्तु तुभ्यमित्याह षड्वा ऋतव ऋतुष्वेव वृष्टिं दधाति तस्मात्सर्वानृतून्वर्षति " [सं० का० ५ प्र० १ अ० ५] इति ।

अत्राऽऽम्नातपाठानुसारेण षकारमभ्युपेत्य षड्वा ऋतव इति व्याख्यातम् । अथ शाखान्तरपाठानुसारेण षकारं परित्यज्य व्याचष्टे—

" यद्वषट्कुर्वाद्यातयामाऽस्य वषट्कारः स्याद्यन्न वषट्कुर्याद्रक्षाꣳसि यज्ञꣳ हन्युर्वडित्याह परोक्षमेव वषट्करोति नास्य यातयामा वषट्कारो भवति न यज्ञꣳ रक्षाꣳसि घ्नन्ति " [सं० का० ५ प्र० १ अ० ५] इति ।

अत्रेदं चिन्तनीयम् । किमस्मिन्मन्त्रे वषट्शब्दः प्रयोक्तव्यो न वेति । नाऽऽद्यः । अत्रैव वषट्कारस्य प्रयोगे सति गतसारत्वेन वक्ष्यमाणे वायव्यपश्वादौ वषट्कारासंभवप्रसङ्गात् । न द्वितीयः । वज्ररूपस्य वषट्कारस्याभावे रक्षोभिर्यज्ञविघातप्रसङ्गात् । एतद्दोषद्वयपरिहाराय षकारं परित्यज्य वडित्येवं ब्रूयात् । तथा सति वषट्कारस्य संपूर्णस्यानुक्तत्वान्न गतसारत्वमेकदेशस्योक्तत्वान्न यज्ञघातोऽपि । तदेवं ब्राह्मणेनैव पाठविकल्पस्य व्याख्यातत्वान्नित्यकाम्यप्रयोगविषयतया पाठद्वयं व्यवस्थापनीयम् ।

कल्पः—" समुद्यम्य कृष्णाजिनस्यान्तान्सुजातो ज्योतिषा सहेति क्षौमेण मौञ्जेनार्कमयेण वा दाम्नोपनह्यति " इति । पाठस्तु—

सुजातो ज्योतिषेति । हेऽग्ने सुजातः सुष्ठूत्पन्नस्त्वं ज्योतिषा त्वदीयेन ज्योतिषा सह शर्म सुखं यथा भवति तथा सुवः स्वर्गसदृशं वस्त्रं कृष्णाजिननिर्मितं गृहमासदः प्राप्नुहि । हे विभावसो विभैव दीप्तिरेव वसु धनं यस्यासौ विभावसुस्तादृश हेऽग्ने विश्वरूपं बहुप्रकाररूपं वासः कृष्णाजिनरूपं वस्त्रं संव्ययस्व सम्यक्परिधत्स्व । तमेतं मन्त्र विनियुङ्क्ते—

---

१ ख. च. °ज्ञहननप्र° । २ ख. घ. ङ. वषट्कारं । ३ ख. च. °त्येवं ब्रू° ।

" सुजातो ज्योतिषा सहेत्यनुष्टुभोप नह्यत्यनुष्टुप्त्वाणि छन्दाꣳसि छन्दाꣳसि खलु वा अग्नेः प्रिया तनूः प्रिययैवैनं तनुवा परि दधाति " [सं० का० ५ प्र० १ अ० ५] इति ।

श्रुत्यन्तरे वाग्वा अनुष्टुबित्युक्तत्वाद्वाग्द्वारा सर्वच्छन्दोरूपत्वम् । शास्त्रान्तर आधानप्रकरणे या ते अग्ने ऽनुष्टुप् पवमाना प्रिया तनूरित्यारभ्य या गायत्रे या त्रैष्टुभे या जागत इति च्छन्दःसु प्रियशरीरावस्थानकथनेन च्छन्दसामग्निप्रिय-शरीरत्वम् । अतः प्रियया वानयाऽनुष्टुब्रूपया तनुवा परिधानं कृतवान्भवति ।

एतद्वेदनं प्रशंसति—

" वेदुको वासो भवति य एवं वेद " [सं० का० ५ प्र० १ अ० ५] इति ।

वेदुको लाभशीलो वासः प्रति भवति । एतद्वेदिता वस्त्रं प्राप्नोतीत्यर्थः ।

कल्पः—" उदु तिष्ठ स्वध्वरोर्ध्व ऊ षु ण ऊतय इति सावित्रीभ्यामुत्ति-ष्ठति " इति । तयोः प्रथमामाह—

उदु तिष्ठेति । हे स्वध्वर सुष्ठु यागनिर्वाहकाग्न उदु तिष्ठासिष्ठैवोत्थाय च नोऽस्मान्देव्या कृपा देवनस्वभावया क्रीडापरया कृपयाऽव पालय । हेऽग्ने बृहता भासा प्रौढेन तेजसा सुशुक्रनिः सुष्ठु शुचां रश्मीनां वनिता यः सोऽयं सुशु-क्रनिः । तादृशः सन्सुशस्तिभिः शोभनकीर्तिभिः सह दृशे सर्वैः प्राणिभिर्द्र-ष्टुमायाहि । अथ द्वितीयामाह—

ऊर्ध्व ऊ ष्विति । हेऽग्ने नोऽस्माकमूतये रक्षणायोर्ध्वं ऊ षु तिष्ठोर्ध्व एव सन्नव-स्थितो भव । क इव । देवो न सविता, यथा सविता देव ऊर्ध्व एव सन्नस्मान्रक्षति तद्वत् । यस्त्वमूर्ध्वः स त्वं वाजस्य सनितोऽन्नस्य दाता भव । यद्यस्मात्कारणा-दङ्गिरोभिर्मन्त्राभिर्यज्ञकैर्वाघद्भिर्हव्यवाहकैर्ऋत्विग्भिर्विह्वयामहे वयं त्वां विविध-माह्वयामस्तस्मादूर्ध्व एव तिष्ठेति सर्वत्रान्वयः । एतन्मन्त्रद्वयं विनियुङ्क्ते—

" वारुणो वा अग्निरुपनद्ध उदु तिष्ठ स्वध्वरोर्ध्व ऊ षु ण ऊतय इति सावित्रीभ्यामुत्तिष्ठति सवितृप्रसूत एवास्योर्ध्वां वरुणपेनिमुत्सृजति " [सं० का० ५ प्र० १ अ० ५] इति ।

---

१ स. च. °थनाच्छ° । २ स. च. °न्त्रादिभिर्यज्ञ° ।

(मृदाहरणाभिधानम्)

योऽयमग्निरत्र कृष्णाजिनेनोपनद्धः सोऽयं वारुण उपद्रवकारिणो वरुणस्याधीनः। अतस्तत्परिहाराय सवितृलिङ्गकाभ्यामेताभ्यामृग्भ्यां बद्धमग्निं गृहीत्वोत्तिष्ठेत्। द्वितीयमन्त्रे देवो न सवितेत्युक्तत्वादेते सावित्र्यौ, एताभ्यामुत्थाने सवित्रैवानुज्ञातोऽस्याग्नेर्वरुणमोनिं वरुणकृतां बाधां परिहरति।

मन्त्रद्वित्वं प्रशंसति—

" द्वाभ्यां प्रतिष्ठित्यै " [सं० का० ५ प्र० १ अ० ५] इति।

कल्पः—" स जातो गर्भो असीति हरति " इति। पाठस्तु—

स जातो गर्भ इति। हेऽग्ने स त्वं द्यावापृथिव्योर्गर्भः सन्निदानीं जातोऽसि। कीदृशस्त्वं, चारुः पूजनीयः। ओषधिषु विभृतो भुज्यमानास्वोषधीषु जाठराग्निरूपः सन्विशेषेण पोषितः। चित्रो नानावर्णाभिर्ज्वालाभिर्विचित्ररूपः। इदानीमुत्पन्नत्वाच्छिशुः। तमांसि पर्यक्तः परिहर्तमभिव्यक्तः। तादृशस्त्वं मातृभ्य ओषध्यर्थमधिकनिकृद्दाधिकं क्रन्दन्प्रगाः प्रकर्षेण गच्छ। यथा लोके शिशुर्मातरमुद्दिश्य क्रन्दनादरेण स्वसदनं गच्छति तद्वदित्यर्थः।

अस्य मन्त्रस्य प्रथमपादेऽभिहितं द्यावापृथिवीगर्भत्वं विशदयति—

" स जातो गर्भो असि रोदस्योरित्याहेमे वै रोदसी तयोरेष गर्भो यदग्निस्तस्मादेवमाह " [सं० का० ५ प्र० १ अ० ५] इति।

इमे द्यावापृथिव्यावेव रोदःशब्दाभिधेये। तयोर्मध्ये समुत्पन्नत्वात्तद्गर्भत्वम्। यस्मादेवं तस्मान्मन्त्रो युक्तमेवाऽऽह।

द्वितीयपादे विभृतश्चारुरिति पदयोर्निमित्तनैमित्तिकभावेनान्वयं दर्शयति—

"अग्ने चारुर्विभृत ओषधीष्वित्याह यदा ह्येतं बिभरन्त्यथ चारुतरो भवति" [सं० का० ५ प्र० १ अ० ५] इति।

यस्मिन्काले जठरे प्रविष्टा ओषधय एतमुदराग्निं विशेषेण पोषयन्ति तदानीमयमग्निश्चारुतरः पटुतरो भवति।

चतुर्थपादे प्र मातृभ्य इत्येतस्य तात्पर्यं दर्शयति—

" प्र मातृभ्यो अधि कनिक्रदद्वा इत्याहौषधयो वा अस्य मातरस्ताभ्य एवैनं प्र ब्रूषयति " [सं० का० ५ प्र० १ अ० ५] इति।

ओषधीनामुक्तरीत्या जठराग्निजनकत्वान्मातृत्वम्। अतो मात्रर्थमेवैनमग्निं

---

१ ख. च. °पनिबद्धः। २ ख. छ. °ग्निं इस्ते गृ°।

प्रकर्षेण गमयति । अत एवोत्तरत्रौषधयः प्रतिगृह्णीतेति मन्त्रेणौषधीषु स्थापनं विधास्यति ।

कल्पः—" स्थिरो भव वीड्वङ्ग इति गर्दभस्य पृष्ठ आदधाति " इति ।

पाठस्तु—

स्थिरो भवेति । अग्नेर्हेतुभूतं पुरीषं यो गर्दभो वहति *तादृश हे गर्दभ, इयर्ति गच्छतीत्यर्वा । हेऽर्वन्गमनकुशल त्वं स्थिरश्चलनरहितो भव । वीड्वङ्गो दृढकाय आशुर्वेगवान्वाज्यन्नहेतुश्च भव १ तथा पृथुर्विस्तीर्णपृष्ठः सुषदोऽग्नेः सुखासनश्च भव । तमेतं मन्त्रं विनियुङ्क्ते—

" स्थिरो भव वीड्वङ्ग इति गर्दभ आ सादयति सं नह्यत्येवैनमेतया स्थेम्ने " [सं० का० ५ प्र० १ अ० ५] इति ।

गर्दभस्योपरि स्थैर्यार्थमेतयर्चैनमग्निं सम्यग्बद्धवान्भवति । अग्निरूपा मृद्यथा भूमौ न पतति तथा स्थापनीया । गर्दभं स्थापनं प्रशंसति—

" गर्दभेन सं भरति तस्माद्गर्दभः पशूनां भारभारितमः " [सं० का० ५ प्र० १ अ० ५] इति ।

यस्मादग्नेर्वहनीयं बलीवर्दादिकमनादृत्य गर्दभेनैव मृदं वाहयन्ति तस्माल्लोकेऽपि गवादीनां पशूनां मध्ये गर्दभ एव भारभारितमः । वोढव्यो द्रव्यविशेषो भारस्तं भरति धारयतीति भारभरी, अतिशयेन भारभरी भारभारितमः । प्रौढं भारं वहतीत्यर्थः । प्रकारान्तरेण तदेव प्रशंसति—

"गर्दभेन सं भरति तस्माद्गर्दभोऽप्यनाद्येऽत्यन्यान्पशून्मेध्यान्हन्ति तेनैनमर्कं संभरन्ति " [सं० का० ५ प्र० १ अ० ५] इति ।

यस्मादेतेन गर्दभेनार्कमग्निं संभरन्ति, यागद्वाराऽग्नेर्हेतुत्वादियं मृदेवाग्निम् । तच्चार्चनीयत्वादर्कशब्दाभिधेयम् । यस्मादेतं वहति तस्माल्लोके गर्दभो भक्ष्यस्याल्पत्वेऽप्यन्यान्पशूनतिक्रम्य मेदस्वी भवति । अनाशब्दो वर्णविकारेणान्नवाची, तस्य लेशोऽल्पत्वम् । जीर्णतृणतुषादिभक्षणेनैव गर्दभो जीवति, न तु बलीवर्दा-

* मन्त्रे पुरीषवाहन इति संबुद्ध्यर्थं प्रथमेत्यनेनाविरोधेन व्याख्यानम् ।

१ ख. च. °र्दादीनना° । २ क. घ. ङ. च. °स्मादने° । ३ ख. °रति । या° । ४ ख. च. तस्यार्थं° । ५ ख. च. °यत्वम् । ६ ख. च. °दन्नाद्यं ।

(मृदाहरणाभिधानम्)

श्वादीनामिव तत्तत्काले घृततैलादिपानं वा चणककुलित्थादिखाद्यभक्षणं वा तस्यास्ति, तथाऽपि मेदस्वित्वम्। एतदग्नसंभरणाल्लभ्यते।

पुनरपि प्रकारान्तरेण तदेव प्रशंसति—

" गर्दभेन सं भरति तस्माद्गर्दभो द्विरेताः सन्कनिष्ठं पशूनां प्र जायतेऽग्नि-र्यस्य योनिं निर्दहति " [सं० का० ५ प्र० १ अ० ५] इति।

यस्मादुपरि धार्यमाणो मृदूपोऽग्निरस्य गर्दभस्य प्रजोत्पादनसामर्थ्यं निर्दग्धं करोति तस्माल्लोके गर्दभो द्विरेता अपि सन्पशूनां मध्ये कनिष्ठमपत्यमुत्पादयति। अश्वादिवद्बहुमूल्यानर्हत्वात्कनिष्ठत्वम्। गर्दभस्य स्वकीयं रेत एकमश्वतरस्य रेतो द्वितीयमिति द्विरेतस्त्वम्। एतच्च सप्तमकाण्डे स्पष्टमाम्नातम्—" तासां परिगृहीतानामश्वतरोत्यप्रवत तस्यानुहाय रेत आऽदत्त तद्गर्दभे न्यमार्ट् तस्माद्गर्दभो द्विरेताः " इति। यद्यपि कनिष्ठोत्पादनं निन्दाहेतुस्तथाऽप्यग्निभरणस्य लिङ्ग-त्वेन प्रशंसैव संपद्यते।

कल्पः—" शिवो भव प्रजाभ्य इत्याहितमभिमन्त्रयते " इति। पाठस्तु—

शिवो भवेति। अङ्गिरोभिर्ऋषिभिः पूर्वं संपादितत्वादङ्गस्तौष्टवाद्वाऽयम-ग्निराङ्गिराः। हेऽङ्गिरोऽग्ने त्वं मानुषीभ्यः प्रजाभ्यः शिवः शान्तो भव। किंच, त्वं द्यावापृथिवी अभिलक्ष्य मा शूशुचः शोकं संतापं मा कार्षीः। तथाऽन्त-रिक्षमभि मा शूशुचः। तथा वनस्पतीनभि मा शूशुचः।

प्रजानामर्थे शिवो भवेत्युक्तायाः शान्तेः प्रसङ्गं दर्शयति—

" प्रजासु वा एष एतर्ह्यारूढः स ईश्वरः प्रजाः शुचा पदहः शिवो भव प्रजाभ्य इत्याह प्रजाभ्य एवैनꣳ शमयति " [सं० का० ५ प्र० १ अ० ५] इति।

यदाऽयमग्निर्गर्दभमारोहत्येतर्हि एतस्मिन्काल एषोऽग्निः प्रजास्वेवाऽऽरूढो भवति। गर्दभस्य प्रजान्तःपातित्वान्मनुष्यवच्चेतनत्वेन प्रजापतेरुत्पन्नत्वात्तदन्तः-पातित्वम्। ततः प्रजास्वारूढोऽग्निस्ताः प्रजाः संतापेन प्रदग्धुं समर्थः स्यात्। तस्माच्छिवो भवेति प्रार्थनेन प्रजार्थमेवैनमग्निं शान्तं करोति।

तस्य मन्त्रस्य द्वितीयपादे मानुषीभ्य इति विशेषणं मनुत्पादितमृगगवादि-व्यावृत्तप्रजाविषयमित्येतद्दर्शयति—

---

१ ख. च. ग्रहमन्त्रपाठेन।

" मानुषीभ्यस्त्वमङ्गिर इत्याह मानव्यो हि प्रजाः" [सं० का० ५ प्र० १ अ० ५] इति ।

यथा प्रथमार्धे चेतनविषया शान्तिः प्रार्थिता तथोत्तरार्धेऽप्यचेतनविषया शान्तिः प्रार्थितेत्येतद्दर्शयति—

" मा द्यावापृथिवी अभि शूशुचो मोऽन्तरिक्षं मा वनस्पतीनित्याहैभ्य एवैनं लोकेभ्यः शमयति " [सं० का० ५ प्र० १ अ० ५] इति ।

कल्पः—" प्रैतु वाजी कनिक्रददिति तिसृभिरत्वरमाणा अश्वप्रथमाः प्रत्यायन्ति " इति । तत्र प्रथमामाह—

प्रैतु वाजीति। अयं वाजी तुरगः कनिक्रदद्धर्षेण हेषाशब्दं कुर्वन्प्रैतु प्रथमं गच्छतु । अथ रासभो गर्दभो नानद्धर्षेण शब्दं कुर्वन्पत्वा गमनशीलः पुरीष्यमग्निं दाहकं भरन्नपि स्वकीयादायुषः पुरा मा पाद्यपमृत्युना मृतो मा भूत् ।

अथ द्वितीयामाह—

रासभो वामिति। हे वृषणा सेचनसमर्थौ वध्वगर्दभौ वां युवयोर्मध्ये रासभो गर्दभोऽयं कनिक्रदद्धर्षेण भृशं क्रन्दन्रथे सुयुक्तो रथसदृशे भृद्धारे सुष्ठु प्रयुक्तः। वां युवयोर्मध्ये स तादृशो गर्दभो दूतो राजप्रेषितदूतवदाशुः शीघ्रगामी सन्नितोऽस्मात्स्थानात्पुरीष्यमग्निं वहाद्वहतु । अथ तृतीयामाह—

वृषाऽग्निमिति। वृषा वर्षणे सेचने समर्थो गर्दभो वृषणं फलाभिवर्षणसमर्थमग्निं भरन्वहंश्छत्विति शेषः । कीदृशमग्निम् , अपां गर्भं मेघस्थानां जलानां मध्ये विद्युद्रूपं, समुद्रियं समुद्रे वडवाग्निरूपेणोत्पन्नम् । तादृशं हेऽग्ने वीतये प्रजनाद्यर्थमृतं सत्यं च प्रत्यायाहि । ऋतसत्यशब्दाभ्यां मन्त्रब्राह्मणानुसारेण द्यावापृथिव्यौ विवक्षेयते । अवश्यंभाविनः क्षुप्यादिफलस्य हेतुत्वात्पृथिव्या ऋतत्वम् । अवश्यंभाविनः कर्मफलस्य हेतुत्वात्स्वर्गस्य सत्यत्वम् ।

अत्र प्रथममन्त्रस्य प्रथमपादे वाजिशब्देनाश्वो विवक्षित इत्येतद्दर्शयति—

" प्रैतु वाजी कनिक्रददित्याह वाजी ह्येषः " [सं० का० ५ प्र० १ अ० ५ इति]। हिशब्देन लोकप्रसिद्धिर्दर्शिता ।

१ क. घ. ङ. ञ. °माणाः । २ ख. च. °त्वाऽऽयाः । ३ ख. च. तत्र ।

(मृदाहरणाभिधानम्)

द्वितीयपादे गर्दभशब्दपरित्यागेन रासभशब्दप्रयोग ऋषिव्यवहारानुसारीत्येतद्दर्शयति—

" नानदद्रासभः पत्वेत्याह रासभ इति ह्येतमृषयोऽवदन् " [सं० का० ५ प्र० १ अ० ५] इति । तृतीयपादार्थं प्रत्यक्षप्रसिद्धिं दर्शयति—

" भरन्नग्निं पुरीष्यमित्याहाग्निꣳ ह्येष भरति " [सं० का० ५ प्र० १ अ० ५] इति ।

चतुर्थपादेऽग्निवहनप्रयुक्तापमृत्युपरिहारायाऽऽयुष्प्रार्थनं दर्शयति—

"मा पाद्यायुषः पुरेत्याहाऽऽयुरेवास्मिन्दधाति तस्माद्गर्दभः सर्वमायुरेति तस्माद्गर्दभे पुराऽऽयुषः प्रमीते बिभ्यति" [सं० का० ५ प्र० १ अ० ५] इति ।

यस्मादनेन मन्त्रेणाऽऽयुः स्थापितं तस्मात्तृणादिदुराहारं भक्षयन्नपि गर्दभोऽश्वादिवच्छूलादिना न म्रियते, किंतु सर्वमायुरेति । यस्माच्च गर्दभस्य सर्वायुःप्राप्तिः स्वाभाविकी तस्मालोके तिर्यग्विषयवैद्यशास्त्रे प्रसिद्धादायुषः पुरा कदाचिदकस्माद्गर्दभे मृते सत्युत्पातोऽयमिति प्रजा बिभ्यति ।

तृतीयमन्त्रस्य प्रथमपादे गर्दभस्यापत्योत्पादकत्वेन वृषत्वमग्नेश्च फलाभिवर्षकत्वेन वृषत्वं प्रसिद्धमित्येतद्दर्शयति—

" वृषाऽग्निं वृषणं-भरन्नित्याह वृषा ह्येष वृषाऽग्निः " [सं० का० ५ प्र० १ अ० ५] इति ।

द्वितीयपादे वैद्युतरूपेण जलगर्भत्वमग्नेः प्रसिद्धमिति दर्शयति—

" अपां गर्भꣳ समुद्रियमित्याहापाꣳ ह्येष गर्भो यदग्निः " [सं० का० ५ प्र० १ अ० ५] इति ।

तृतीयपादे वीतय इतिशब्देन प्रजननाद्यर्थः साक्षाद्विवक्षितः, द्यावापृथिव्योर्वियोगस्त्वग्निकृतप्रजननार्थ इत्येतदभिप्रायं दर्शयति—

" अग्न आ याहि वीतय इति वा इमौ लोकौ व्यैतामग्न आ याहि वीतय इति यदाहानयोर्लोकयोर्वीत्यै " [सं० का० ५ प्र० १ अ० ५] इति ।

पुरा द्यावापृथिव्याख्यौ लोकावेकीभावमापन्नौ सन्तौ यदा वियुक्तौ भवतस्तदानीमावयोर्मध्ये प्रजननाद्यर्थं हेऽग्ने समायाहीत्यनेनाभिप्रायेणाग्निकृतप्रजननादिव्यापारस्यावकाशं दातुं वियुक्तावभूताम् । तस्मादयं मन्त्रः प्रजननाद्यर्थमग्न्यागमनं वदंस्तदवकाशप्रदाद्यावापृथिव्योर्वियोगाय संपद्यते ।

अस्य मन्त्रस्य चरमभागे गन्तव्यत्वेन निर्दिष्टयोर्ऋतसत्ययोस्तात्पर्यं दर्शयति—

(मृदाहरणाभिधानम्)

" प्रच्युतो वा एष आयतनादगतः प्रतिष्ठा[१] स एतर्ह्यध्वर्युं च यजमानं च ध्यायत्युत[२] सत्यमित्याहेयं वा ऋतमसौ सत्यमनयोरेवैनं प्रति ष्ठापयति नाऽऽर्ति-मार्छत्यध्वर्युर्न यजमानः " [सं० का० ५ प्र० १ अ० ५] इति ।

एषोऽग्निः खननप्रदेशात्स्वकीयादायतनात्प्रच्युतोऽन्यत्रापि न क्वचित्प्रतिष्ठां गतः । सोऽग्निरेतस्मिन्काले कुपितोऽध्वर्युयजमानौ हन्तुं ध्यायति । अतोऽस्य प्रतिष्ठार्थं द्यावापृथिवीविवक्षया मन्त्र ऋतसत्यशब्दौ प्रयुङ्क्ते । तेनानयोर्लोकयोरग्नेः स्थापनादध्वर्युयजमानौ न विनश्यतः ।

कल्पः—" उत्तरेण विहारं परिश्रित ओषधयः प्रतिगृह्णीताग्निमेतमिति द्वाभ्यामोषधीषु पुष्पवतीषु फलवतीषूपावहरति " इति । तत्र प्रथममाह—

ओषधय इति । हे ओषधयोऽत्रास्मिन्परिश्रिते देशे युष्मानभिमुखीकृत्याऽऽय-न्तमागच्छन्तं शिवं शान्तमेतमग्निं प्रतिगृह्णीत स्वीकुरुत । अयं चाग्निर्युष्मासु निषीदन्नोऽस्माकं दुर्मतिमपहनत्प्रमादालस्यादियुक्तां बुद्धिमपहन्तु । किं कुर्वन्, विश्वा अरातीरमतीर्व्यस्यञ्शत्रुसमाना रोगजन्या बाधाः सर्वाः परिहरन् ।

अथ द्वितीयामाह—

ओषधयः प्रतीति । पुष्पावतीः प्रशस्तपुष्पोपेताः सुपिप्पलाः शोभनफ-लोपेता हे ओषधय एनमग्निं प्रति मोदध्वं हृष्टा भवत । अयमग्निर्वो युष्माकमृ-त्विय ऋतुकालीनो गर्भो भूत्वा प्रत्नं पुरातनं सधस्थं गर्भयोग्यं स्थानमासदत्मा-नवान् ।

अथ प्रथममन्त्रस्य प्रथमपाद ओषधिप्रतिग्रहेप्रार्थनायां कारणं दर्शयति—

"वरुणो वा एष यजमानमभ्यैति यदग्निरुपनद्ध ओषधयः प्रति गृह्णीताग्नि-मेतमित्याह शान्त्यै " [सं० का० ५ प्र० १ अ० ५] इति ।

कृष्णाजिने बद्धो योऽग्निः स एष बन्धकेन वरुणपाशेन युक्त्वाद्वरुणः सन्यजमानमभिलक्ष्य बाधितुमागच्छति । अतस्तच्छान्त्यर्थमोषधिप्रतिग्रहः ।

तृतीयपादेऽरातिशब्देन राक्षसाः सूचिता इति दर्शयति—

" व्यस्यन्विश्वा अमतीररातीरित्याह रक्षसामपहत्यै " [सं० का० ५ प्र० १ अ० ५] इति ।

---

१ ख. °जनिता वा° । २ ख, च. °हणप्रार्थनया सूचितां वरुणशान्तिं द° । ३ ख. च. °धीभिः प्र° ।

(मृदाहरणाभिधानम्)

चतुर्थपादे दुर्बुद्धिपरिहारोऽनुष्ठानप्रतिष्ठार्थ इति दर्शयति—

" निषीदन्नो अप दुर्मतिꣳ हनदित्याह प्रतिष्ठित्यै " [सं० का० ५ प्र० १ अ० ५] इति ।

द्वितीयमन्त्रस्य प्रथमपाद ओषधिप्रार्तिमोदपार्थनया जाठराग्निसमृद्धिरित्येतद्दर्शयति—

" ओषधयः प्रति मोदध्वमेनामित्याहौषधयो वा अग्नेर्भागधेयं ताभिरेवैनꣳ समर्धयति " [सं० का० ५ प्र० १ अ० ५] इति ।

ओषधयोऽन्नरूपेण जाठराग्नेर्भागः पुरोडाशरूपेणाग्निदेवताया भागः । अत ओषधिस्थापनेनाग्निद्वयस्य समृद्धिः ।

द्वितीयपादे सुपिप्पलशब्दतात्पर्यं दर्शयति—

" पुष्टावतीः सुपिप्पला इत्याह तस्मादोषधयः फलं गृह्णन्ति" [सं० का० ५ प्र० १ अ० ५] इति ।

यस्मादत्र सुपिप्पला इत्युक्तं तस्माल्लोकेऽप्योषधयः स्वकाले संपूर्णं फलं गृह्णन्ति ।

द्वितीयार्धे सधस्थमाऽसददित्यस्य तात्पर्यं दर्शयति—

" अयं वो गर्भ ऋत्वियः पत्नीꣳ सधस्थमाऽसददित्याह याभ्य एवैनं प्रच्यावयति तास्वेवैनं प्रति ष्ठापयति " [सं० का० ५ प्र० १ अ० ५] इति ।

मृत्खनेनभूमौ[1] पूर्वमुत्पन्नाभ्यो याभ्य ओषधीभ्यः प्रच्याव्यायमग्निरानीतस्तस्मिन्नुपावहरणप्रदेशे तास्वेवौषधिजातिषु[2] स्थापितवान्भवति ।

ओषधयः प्रतिगृह्णीतेत्यादिकं मन्त्रद्वयं विनियुङ्क्ते—

" द्वाभ्यामुपावहरति प्रतिष्ठित्यै " [सं० का० ५ प्र० १ अ० ५] इति ।

अत्र विनियोगसंग्रहः—

सं मृत्खनेऽपो निनयेत्सुजौ संभृतबन्ध[न]म् ।
उदुद्वाभ्यां समुत्थाय सजातस्त्वाहरेन्मृदम् ॥
स्थिरो गर्दभ आधाय शिव आहितमन्त्रणम् ।
प्रैतुत्रिभिः शनैर्याति ह्योषद्वाभ्यामिमां मृदम् ॥
उपाहरेदोषधीषु[3] मन्त्रा द्वादश वर्णिताः ॥ इति ।

---

१ च. °नभू° । २ ख. च. °षधीषु । ३ ख. ज. °जातो इत°।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे प्रथमप्रपाठके
चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ चतुर्थकाण्डे प्रथमप्रपाठके पञ्चमोऽनुवाकः) ।

वि पाजसा पृथुना शोशुचानो बाधस्व द्विषो रक्षसो अमीवाः । सुशर्मणो बृहतः शर्मणि स्याममेरहꣳ सुहवस्य प्रणीतौ । आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे । यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः । तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः । मित्रः (१) सꣳसृज्य पृथिवीं भूमिं च ज्योतिषा सह । सुजातं जातवेदसमग्निं वैश्वानरं विभुम् । अयक्ष्माय त्वा सꣳ सृजामि प्रजाभ्यः । विश्वे त्वा देवा वैश्वानराः सꣳ सृजन्त्वानुष्टुभेन छन्दसाऽङ्गिरस्वत् । रुद्राः संभृत्य पृथिवीं बृहज्ज्योतिः समीधिरे । तेषां भानुरजस्र इच्छुक्रो देवेषु रोचते । सꣳसृष्टां वसुभी रुद्रैर्धीरैः कर्मण्यां मृदम् । हस्ताभ्यां मृद्वीं कृत्वा सिनीवाली करोतु (२) ताम् । सिनीवाली सुकपर्दा सुकुरीरा स्वौपशा । सा तुभ्यमदिते मह ओखां दधातु

(उखानिर्माणाभिधानम्)

हस्तयोः। उखां कृणोतु शक्त्या बाहुभ्याम-दितिर्धिया। मातेव पुत्रं यथोपस्थे साऽग्निं बिभर्तु गर्भ आ। मखस्य शिरोऽसि यज्ञस्य पदे स्थः। वसवस्त्वा कृण्वन्तु गायत्रेण छन्दसाऽङ्गिरस्वत्पृथिव्यसि रुद्रास्त्वा कृण्वन्तु त्रैष्टुभेन छन्दसाऽङ्गिरस्वदन्तरिक्षमसि (३) आदित्यास्त्वा कृण्वन्तु जागतेन छन्दसाऽङ्गिरस्वद्द्यौरसि विश्वे त्वा देवा वैश्वानराः कृण्वन्त्वानुष्टुभेन छन्दसाऽङ्गिरस्वद्दिशोऽसि ध्रुवाऽसि धारया मयि प्रजाꣳ रायस्पोषं गौपत्यꣳ सुवीर्यꣳ सजातान्यजमानायादित्यै रास्नाऽस्यदितिस्ते बिलं गृह्णातु पाङ्क्तेन छन्दसाऽङ्गिरस्वत्। कृत्वाय सा महीमुखां मृन्मयीं योनिमग्नये। तां पुत्रेभ्यः सं प्रायच्छददितिः श्रपयानिति (४)॥

(मित्रः करोत्वन्तरिक्षमसि प चत्वारिं च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके प्रथमप्रपाठके पञ्चमोऽनुवाकः॥ ५॥

(अथ चतुर्थकाण्डे प्रथमप्रपाठके पञ्चमोऽनुवाकः)।

चतुर्थेऽनुवाके मृदाहरणमुक्तम्। अथ पञ्चम उखानिर्माणमुच्यते—कल्पः—" वि पाजसेति विस्रस्य " इति। पाठस्तु—

वि पाजसेति। हेऽग्ने पृथुना विस्तृतेन पाजसा बलेन शोशुचानो दीप्यमानस्त्वं द्विषः शत्रून्रक्षसो राक्षसानमीवा रोगांश्च विशेषेण बाधस्व। अहं तुभ्य-

र्मणः शोभनसुखस्य बृहतः प्रौढस्य सुवहस्य सुखेनाऽऽहर्तुं शक्यस्याग्नेः प्रणीतौ परिचर्यायां सत्यां यच्छर्म सुखं तस्मिन्सुखे स्यां सर्वदाऽवतिष्ठेय । तमिमं मन्त्रं विनियुङ्क्ते--

"वारुणो वा अग्निरुपनद्धो वि पाजसेति वि स्रꣳसयति सवितृप्रसूत एवास्य विषूचीं वरुणपाशं वि सृजति" [सं० का० ५ प्र० १ अ० ६] इति ।

यद्यप्यमन्त्रकेण लौकिकविस्रंसनेन लौकिकबन्धो निवर्तते तथाऽपि सवितृप्रेरणमन्तरेण वरुणपाशस्य निवृत्त्यभावात्सवितृप्रेरणाय मन्त्रपाठः । अस्य मन्त्रस्य बन्धविमोचनायैव सवित्रा परमेश्वरेण निर्मितत्वात्तत्पाठे सति सवितृप्रेरितो भवति । वरुणस्य संबन्धिनी पाशबन्धकृता बाधा वरुणपाशः । सा च विषूची सर्वतः प्रसृता बहुना रज्जुभिरावेष्टयाऽऽहतत्वात् । अस्याग्नेस्तादृशीं वरुणपाशं मन्त्रेण विमोचितवान्भवति ।

कल्पः--" आपो हि ष्ठा मयोभुव इति तिसृभिरप उपसृज्य " इति ।

तत्र प्रथमामाह--

आपो हि ष्ठेति । हिशब्द एवकारार्थः प्रसिद्ध्यर्थो वा । हे आपो यूयमेव मयोभुवः स्थ सुखस्य भावयित्र्यो भवत । स्नानपानादिहेतुत्वेन सुखोत्पादकत्वं प्रसिद्धम् । तास्तादृश्यो यूयं नोऽस्मानूर्जे रसाय भवदीयरसानुभवार्थं दधातन स्थापयत । किंच महे महते रणाय रमणीयाय चक्षसे दर्शनाय दधातन, अस्मान्परतत्त्वसाक्षात्कारयोग्यान्कुरुतेत्यर्थः । अथ द्वितीयामाह--

यो वः शिवतम इति । वो युष्माकं शिवतमः शान्ततमः सुखैकहेतुर्यो रसोऽस्ति, इहास्मिन्कर्मणि नोऽस्मांस्तस्य भाजयत [तं] रसं प्रापयत । तत्र दृष्टान्तः--उशतीरिव मातर इति । कामयमानाः प्रीतियुक्ता मातरो यथा वत्सान्स्वकीयस्तन्यरसं प्रापयन्ति तद्वत् । अथ तृतीयामाह--

तस्मा अरमिति । यस्य रसस्य क्षयाय क्षयेण निवासेन जिन्वथ यूयं प्रीता भवथ, तस्मै रसाय वो युष्मानरं गमायालं भृशं प्राप्नुमः । किंच हे आपो यूयं नोऽस्माञ्जनयथ प्रजोत्पादकान्कुरुथ । एतैर्मन्त्रैः साध्यं जलमेलनं विधत्ते--

" अप उप सृजत्यापो वै शान्ताः शान्ताभिरेवास्य शुचꣳ शमयति " [सं० का० ५ प्र० १ अ० ६] इति । अस्याग्नेः शुचं शोकं दाहमित्यर्थः ।

---

१ क. च. °वेष्ट्य धत° । २ ख. च. °लसेचनं ।

(उखानिर्माणाभिधानम्)

आपो हि ष्ठेत्याद्यृचस्तत्र विनियुङ्क्ते—

" त्रिसृभिरुप सृजति त्रिवृद्वा अग्नेर्यावानेवाग्निस्तस्य शुचꣳ शमयति " [सं० का० ५ प्र० १ अ० ६] इति।

आहवनीयादिरूपेणाग्नेस्त्रैगुण्यम्। तस्य सर्वस्याग्नेर्मन्त्रत्रयेण दाहशान्तिः।

कल्पः—" मित्रः सꣳसृज्य पृथिवीमिति द्वाभ्यां संसर्जनीयैः संसृजत्यर्मकपालैः पिष्टैर्वैष्णवङ्गरिर्वीहिबुषैः पलाशकषायेण शर्कराभिः पिष्टाभिः कृष्णाजिनलोमभिरजलोमाभिः " इति। तत्र प्रथमामाह—

मित्रः सꣳसृज्येति। मित्रनामकः सर्वेषामाप्तो देवः पृथिवीं भूमिं विस्तृतामिमां मृदं, चषालेन दृष्टा मुद्युपसृष्टा अपश्च ज्योतिषा ज्योतिःशब्दोपलक्षितेन दार्ढ्यहेतुना वक्ष्यमाणार्मकपालादिना संसृज्याग्निं सुजातमकरोदिति शेषः। अग्निशब्दोपलक्षितामुखां निर्मितवानित्यर्थः। कीदृशमग्निं, जातवेदसमुत्पन्नप्राण्यभिज्ञं वैश्वानरं सर्वपुरुषोपकारकत्वेन तत्संबन्धिनं विभुं सर्वेषु यजमानगृहेषु व्याप्तम्। अथ द्वितीयामाह—

अयक्ष्माय त्वेति। हेऽग्ने त्वां प्रजाभ्यः प्रजानामयक्ष्माय रोगाभावाय संसृजामि अर्मकपालादिभिः संयोजयामि। वैश्वानराः सर्वपुरुषोपकारिणो विश्वे सर्वेऽपि देवा आनुष्टुभेन च्छन्दसा सहकारिणा युक्तास्त्वां संसृजन्तु। किंवत्। आङ्गिरस्वत्। यथाऽङ्गिरसः पूर्वं संयोजितवन्तस्तद्वत्।

मध्ये देवतान्तरपरित्यागेन मित्रस्यैव स्वीकारे कारणं दर्शयति—

" मित्रः सꣳसृज्य पृथिवीमित्याह मित्रो वै शिवो देवानां तेनैवैनꣳ सꣳसृजति शान्त्यै " [सं० का० ५ प्र० १ अ० ६] इति।

देवानां मध्ये मित्रः शिवः शान्तः। अतोऽग्नेः शान्त्यै मित्रस्य स्वीकारः।

अथ दार्ढ्यहेतुभिः कपालैः संसर्गं विधत्ते—

" यद्वाम्याणां पात्राणां कपालैः सꣳसृजेद्वाम्याणि पात्राणि शुचार्पयेदर्मकपालैः सꣳसृजत्येतानि वा अनुपजीवनीयानि तान्येव शुचार्पयति " [सं० का० ५ प्र० १ अ० ६] इति।

पाकसाधनानां भाण्डानां कपालैः संसर्गे सति सर्वाण्यपि भाण्डानि शुचार्पयेत्, गृहदाहादिकृतेन भङ्गेन योजितानि भवेयुः। अतस्तन्मा भूदित्यर्मकपालैः संयोजयेत्। चिरकालशून्यग्रामभूमाववस्थितानि पुरातनान्यर्मकपालानि, तेषां

प्राणिभिरनुपजीवनीयत्वात्तान्येव भङ्क्त्रेन योजितानि भवन्ति, न तु गृहोपकरणानि भाण्डानि । अथ भूमिष्ठैः क्षुद्रपाषाणैश्चूर्णीकृतैः संसर्गं विधत्ते—

" शर्कराभिः सꣳसृजति धृत्या अथो शंत्वाय " [सं० का० ५ प्र० १ अ० ६] इति ।

धृत्यै निर्माणकाले भङ्क्त्रराहित्येन दाढर्याय । अथो शंत्वाय पाककालेऽपि भङ्क्त्रराहित्येन सुखावस्थानाय । द्रव्यान्तरसंसर्गं विधत्ते—

" अजलोमैः सꣳसृजत्येषा वा अग्नेः प्रिया तनूर्यदजा प्रिययैवैनं तनुवा सꣳसृजत्यथो तेजसा " [सं० का० ५ प्र० १ अ० ६] इति ।

अजत्वजातेरग्नेश्च प्रजापतिमुखजत्वसाम्यादजेयमग्नेः प्रिया तनूः । न केवलं प्रियत्वं किंत्वग्निसंबन्धात्तेजोरूपत्वमपि । अतः प्रियया तन्वा तेजसा चाग्निं समर्धयति । पुनरपि द्रव्यान्तरसंसर्गं विधत्ते—

" कृष्णाजिनस्य लोमभिः सꣳसृजति यज्ञो वै कृष्णाजिनं यज्ञेनैव यज्ञꣳ सꣳसृजति " [सं० का० ५ प्र० १ अ० ६] इति ।

अन्यत्र " यज्ञो देवेभ्यो निलायत कृष्णो रूपं कृत्वा " इत्युक्त्वाद्यज्ञस्य कृष्णाजिनत्वम् । अतः कृष्णाजिनरूपेण यज्ञेनाग्निरूपं यज्ञं संसृजति ।

कल्पः—" रुद्राः संभृत्य पृथिवीमिति मृदं संक्षिप्य " इति । पाठस्तु—

रुद्राः संभृत्येति । रुद्रनामका देवाः पृथिवीमुखानिष्पादिकां मृदं संभृत्य सम्यग्भरणं कृत्वोखाकरणाय मृदु यथा भवति तथा हस्ताभ्यां संघट्टनं कृत्वेत्यर्थः । तथा कृत्वा बृहज्ज्योतिः सभीधिरे प्रौढमग्निं दीपितवन्तः । तेषां रुद्राणामयमग्निर्भानुर्भासमानोऽजस्र इन्धिरन्तर एव शुक्रो दीप्तियुक्तो देवेषु रोचते शोभते ।

कल्पः—"सꣳसृष्टां वसुभिरिति तिसृभिः कर्त्रे प्रयच्छति " [सं० का० ५ प्र० १ अ० ६] इति । तत्र प्रथमामाह—

सꣳसृष्टां वसुभिरिति । पूर्वमन्त्रे रुद्रशब्देन वसवोऽप्युपलक्षिताः । अतो धीरैर्बुद्धिमद्भिर्वसुभी रुद्रैश्च या मृद्धर्मकपालादिभिः संयोजिता सती कर्मण्योक्ता कर्मयोग्या संपन्ना जाता तां मृदं सिनीवाली देवी पुनरपि हस्ताभ्यां मृदीं कृत्वा करोतु, उखां निष्पादयतु । अथ द्वितीयामाह—

---

१ ख. च. मृत्पा° । २ ख. च. °पि स्वह° ।

(उखानिर्माणाभिधानम्)

सिनीवालीति। या सिनीवाली सुकपर्दा, कपर्दोऽत्र स्त्रीणामुचितः केशबन्धविशेषः। शोभनः कपर्दो यस्याः सा सुकपर्दा। कुरीरशब्देन स्त्रीभिः शृङ्गारार्थं शिरसि धार्यमाणं जालकमुच्यते। शोभनं कुरीरं यस्याः सा सुकुरीरा। उपशेते सम्यक्शयनं करोति यैरवयवविशेषैस्ते सर्व उपशास्तेषां समूह औपशः। शोभन औपशो यस्याः सा स्वौपशा। हे महे पृथिवि अदिते भूमिदेवि सा सिनीवाली तुभ्यं तव हस्तयोरुखामादधातु। अथ तृतीयामाह—

उखां करोत्विति। इयमदितिर्धिषया बुद्धिकौशलेन बाहुभ्यां हस्तकौशलेन शक्त्या शरीरबलेन चेमामुखां करोतु। यथा लोके माता स्वकीयं पुत्रमुपस्थ उत्सङ्गे बिभर्ति तथा साऽदितिर्गर्भे स्वोत्सङ्गे तमग्निमा कर्मसमाप्तेर्बिभर्तु।

उक्तस्य मन्त्रचतुष्टयस्य तात्पर्यं दर्शयति—

" रुद्राः संभृत्य पृथिवीमित्याहैता वा एतं देवता अग्रे समभरन्ताभिरेवैनꣳ सं भरति " [सं० का० ५ प्र० १ अ० ६] इति।

रुद्रा वसवः सिनीवाल्यदितिश्चेत्येतच्छब्दपरामृष्टा देवताः।

मखस्येति। कल्पः—" मखस्य शिरोऽसीति पिण्डं कृत्वा " इति।

हे मृत्पिण्ड त्वं मखस्य यज्ञस्य शिरः स्थानमसि।

तत्र मखशब्दार्थं दर्शयति—

" मखस्य शिरोऽसीत्याह यज्ञो वै मखस्तस्यैतच्छिरो यदुखा तस्मादेवमाह " [सं० का० ५ प्र० १ अ० ६] इति।

यज्ञस्येति। कल्पः—"यज्ञस्य पदे स्थ इति कृष्णाजिनं पुष्करपर्णं चाभिमृशति " इति।

हे कृष्णाजिनपुष्करपर्णे युवामुभे यज्ञस्य पादरूपे स्थः।

कृष्णाजिनपुष्करपर्णयोर्यज्ञपात्रिहेतुत्वाद्यज्ञपदत्वं प्रसिद्धमित्येतद्दर्शयति—

" यज्ञस्य पदे स्थ इत्याह यज्ञस्य ह्येते पदे अथो प्रतिष्ठित्यै " [सं० का० ५ प्र० १ अ० ६] इति।

कल्पः—" वसवस्त्वा छृण्वन्तु गायत्रेण छन्दसेति चतुर्भिर्यजुर्भिर्मह्युखां करोति बहुभार्यस्याध्वर्युरेकभार्यस्य क्रियमाणामेतैरेव यजमानोऽनुमन्त्रयते " इति। पाठस्तु—

---

१ ख. च. कुरुते। २ ख. °ते दे°। ३ ख च. °रुखां मृदमा°।

(उखानिर्माणाभिधानम्)

वसवस्त्वा छृण्दन्त्विति । हे उखे वस्वाख्या देवाः सहकारिणा गायत्रेण च्छन्दसा सहाङ्गिरस इव त्वां छृण्वन्तु निष्पादयन्तु । त्वं च पृथिवीरूपाऽसि । एवमुत्तरेषु त्रिष्वपि योज्यम् । वैश्वानराः सर्वमनुष्योपकारिणः । हे उखे त्वं ध्रुवाऽसि दृढाऽसि । अतो मय्यध्वर्यावन्यस्मिन्वोखाकर्तरि प्रजादिकं धारय स्थापय । यजमानार्थमपि प्रजादिकं संपादय । सोऽयं धृवाऽसीत्यादिरनुभागः पूर्वेष्वपि त्रिष्वनुषज्यते ।

संसृष्टामित्याद्यृग्भिः कर्त्रे प्रदानं वसवस्त्वेत्यादिभिर्यजुर्भिर्यजमानानुमन्त्रणं च क्रमेण विधत्ते--

" प्रान्याभिर्यच्छत्यन्वन्यैर्मन्त्रयते मिथुनत्वाय " [तै० का० ५ प्र० १ अ० ६] इति ।

अन्याभिर्वसवस्त्वेत्यादियजुर्भ्यो विलक्षणाभिर्ऋग्भिरन्यैः संसृष्टामित्यादिभ्य ऋग्भ्यो विलक्षणैर्वसवस्त्वेत्यादिभिर्यजुर्भिर्ऋचां स्त्रीलिङ्गत्वाद्यजुषामतथात्वान्मिथुनत्वम् । निर्मातव्याया उखायाः कक्ष्यात्रयं विधत्ते--

" त्र्युद्धिं करोति त्रय इमे लोका एषां लोकानामाप्त्यै " [तै० का० ५ प्र० १ अ० ६] इति ।

उद्धिरूर्ध्वमवस्थितोऽवयवविशेषः । यथा भाण्डस्योपर्यन्यद्भाण्डं तस्याप्युपरि पुनरप्यन्यद्भाण्डमिति कक्ष्यात्रयं तथेयमेकैवोखा कक्ष्यात्रययुक्ता कार्या ।

वसवस्त्वेत्यादिभिर्मन्त्रैर्यजमानस्यानुमन्त्रणं पूर्वं विहितमिदानीं तैरेव मन्त्रैः कर्तुः कर्मनिष्पादनं विधत्ते-

" छन्दोभिः करोति वीर्यं वै छन्दाꣳसि वीर्येणैवैनां करोति" [तै० का० ५ प्र० १ अ० ६] इति ।

छन्दोभिश्छन्दोलिङ्गकैर्वसवस्त्वेत्यादिभिर्मन्त्रैः ।

अदित्या इति । कल्पः-" अदित्यै रास्नाऽसीति रास्नां करोति " इति ।

रशनासदृशी भाण्डस्य गलगता रेखा रास्ना । हे रेखे त्वमदित्यै भूमिरूपाया उखाया रास्ना काञ्चीगुणस्थानीया रशनाऽसि ।

कल्पः-" अदितिस्ते बिलं गृह्णात्विति बिलं कृत्वा " इति । पाठस्तु--

अदितिस्ते बिलमिति । हे उखेऽदितिर्भूमिः सहकारिणा पाङ्क्तेन च्छन्दसा सहाङ्गिरस इव ते तव बिलमन्तश्छिद्रं गृह्णातु करोतु । एवं मन्त्रं विनियुङ्क्ते-

(उखानिर्माणाभिधानम्)

"यजुषा बिलं करोति व्यावृत्यै" [सं० का० ५ प्र० १ अ० ६] इति।

लौकिकस्य हि भाण्डस्य मन्त्रमन्तरेणैव बिलं क्रियते। अत्र तु समन्त्रकमिति व्यावृत्तिः। उखायाः प्रादेशपरिमाणं विधत्ते—

"इयतीं करोति प्रजापतिना यज्ञमुखेन संमिताम्" [सं० का० ५ प्र० १ अ० ६] इति।

यज्ञपुरुषस्य मुखं मूर्धचु(चि)बुकयोर्मध्यवर्ति प्रादेशमात्रं, तच्च प्रजापतिसृष्टत्वात्प्रजापतिस्वरूपं, तेन मुखेन परिमिता भवति। तत्परिमाणं हस्तेनाभिनीय प्रदर्शनार्थमियतीत्युच्यते। अथ विधत्ते—

"द्विस्तनां करोति द्यावापृथिव्योर्दोहाय" [सं० का० ५ प्र० १ अ० ६] इति।

यथा योषितः स्तनावेवमस्या उखाया द्वौ स्तनाकारौ मृदा निष्पाद्यौ।

तथा सति द्वित्वसाम्याद्द्यावापृथिव्योः सारांशदोहनं संपद्यते।

पक्षान्तरं विधत्ते—

"चतुस्तनां करोति पशूनां दोहाय" [सं० का० ५ प्र० १ अ० ६] इति। पुनरप्यन्यं पक्षं विधत्ते—

"अष्टास्तनां करोति छन्दसां दोहाय" [सं० का० ५ प्र० १ अ० ६] इति।

अष्टौ छन्दांसि मन्त्रान्तरे समाम्नातानि—"गायत्री त्रिष्टुब्जगत्यनुष्टुक्पङ्क्त्या सह। बृहत्युष्णिहा ककुत्" इति।

अष्टत्वसंख्यासाम्याच्छन्दसां सारदोहनं संपद्यते। तदेतत्सर्वं सूत्रकारेण संगृहीतम्—"अश्रीणां रास्नायाश्च संधौ द्वौ चतुरः षडष्टौ वा स्तनान्करोति" इति। अधिकारिविशेषेणाश्रिषु संख्याविशेषं विधत्ते—

"नवाश्रिमभिचरतः कुर्यात्त्रिवृतमेव वज्रꣳ संभृत्य भ्रातृव्याय प्र हरति स्तृत्यै" [सं० का० ५ प्र० १ अ० ६] इति।

त्रिवृत्स्तोमस्य नवभिर्वह्निभिरुपेतत्वादश्रिसंख्या त्रिवृत्संपद्यते। स च त्रिवृत्स्तोमो वैरिविनाशकत्वाद्वज्रसमानः। अतो नवसंख्या भ्रातृव्याय वज्रप्रहरणं संपद्यते। अभिचाराभावे त्वश्रिसंख्यां सूत्रकारो दर्शयति—"कुर्वीश्चतस्रोऽश्रीः प्रतिदिशमुन्नयत्यष्टाश्रीर्वा" इति।

---

१ ख. च. °तीमित्यु°। २ ख. च. °रूप्यायास्त्रिवृत्वं संप°।

कल्पः—" कृत्वाय सा महीमुखामित्युत्तरतः सिकतासु प्रतिष्ठाप्य " इति।

पाठस्तु—

कृत्वाय सेति। सेयमदितिर्मृन्मयीं मृत्कार्यामग्नये योनिमग्नेः कारणभूतां महीं महतीमुखां कृत्वाय निष्पाद्य ततस्तामुखां पुत्रेभ्यः स्वपुत्रसदृशेभ्यः अपणकारिभ्यः संप्रायच्छत्सम्यग्दत्तवती। किं ब्रुवतीति तदुच्यते—अपयानिति अपयन्तु भवन्त इति ब्रुवती। तमेतं मन्त्रं विनियुङ्क्ते—

" कृत्वाय सा महीमुखामिति नि दधाति देवतास्वेवैनां प्रति ष्ठापयति " [सं० का० ५ प्र० १ अ० ६] इति।

अदितिपुत्राणां देवतारूपत्वाद्देवतासु प्रतिष्ठापनं संपद्यते।

अत्र विवियोगसंग्रहः—

वि पा विस्रंसयेदापस्त्रिभिर्मृदि जलं क्षिपेत्।
मित्रोद्वाभ्यां शर्करादियोगो रुद्रेति संक्षिपेत्॥
संसृत्रिभिर्मृत्तिकां तामुखाकर्त्रे प्रयच्छति।
मख पिण्डकृतिर्यज्ञ चर्मपर्णाभिमर्शनम्॥
कुर्याद्वसचतुर्भिस्तां ध्रुवासीत्यनुषज्यते।
अदि रा नामदि बिलं कुर्यात्कृत्वाय तामुखाम्॥
सिकतासु स्थापयीत मन्त्रा एकोनविंशतिः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे प्रथमप्रपाठके
पञ्चमोऽनुवाकः॥ ५॥

(अथ चतुर्थाष्टके प्रथमप्रपाठके षष्ठोऽनुवाकः)।

वसवस्त्वा धूपयन्तु गायत्रेण छन्दसाङ्गिर-
स्वद्रुद्रास्त्वा धूपयन्तु त्रैष्टुभेन छन्दसाऽङ्गिर-
स्वदादित्यास्त्वा धूपयन्तु जागतेन छन्दसाऽ-
ङ्गिरस्वद्विश्वे त्वा देवा वैश्वानरा धूपयन्त्वानु-

---

१ ख, च. किं कुर्वती°।

(उखासंस्काराभिधानम्)

ष्टुभेन छन्दसाऽङ्गिरस्वादिन्द्रस्त्वा धूपयत्वङ्गिरस्वद्विष्णुस्त्वा धूपयत्वाङ्गिरस्वद्वरुणस्त्वा धूपयत्वाङ्गिरस्वदादितिस्त्वा देवी विश्वदेव्यावती पृथिव्याः सधस्थेऽङ्गिरस्वत्खनत्ववट देवानां त्वा पत्नीः (१) देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थेऽङ्गिरस्वद्धत्तूखे धिषणास्त्वा देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थेऽङ्गिरस्वदभीन्धतामुखे मास्त्वा देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थेऽङ्गिरस्वच्छ्रपयन्तूखे वरूत्रयो जनयस्त्वा देवीर्विश्वदेव्यावतीः पृथिव्याः सधस्थेऽङ्गिरस्वत्पचन्तूखे । मित्रेतामुखां पचैषा मा भेदि । एतां ते परि ददाम्यभित्यै । अभमिमू (२) माहिना दिवं मित्रो बभूव सप्रथाः । उत श्रवसा पृथिवीम् । मित्रस्य चर्षणीधृतः श्रवो देवस्य सानसिम् । द्युम्नं चित्रश्रवस्तमम् । देवस्त्वा सवितोद्वपतु सुपाणिः स्वङ्गुरिः । सुबाहुरुत शक्त्या । अप्यमाना पृथिव्याशा दिश आ पृण । उत्तिष्ठ बृहती भवोर्ध्वा तिष्ठ ध्रुवा त्वम् । वसवस्त्वाऽऽच्छृन्दन्तु गायत्रेण छन्दसाऽङ्गिरस्वद्रुद्रास्त्वाऽऽच्छृन्दन्तु त्रैष्टुभेन छन्दसाऽङ्गिरस्वदादित्यास्त्वाऽऽच्छृन्दन्तु जागतेन छन्दसाऽङ्गिरस्वद्विश्वे त्वा देवा वैश्वानरा आ च्छृन्दन्त्वानुष्टुभेन छन्दसाऽङ्गिरस्वत् (३) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
प्रथमप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ चतुर्थकाण्डे प्रथमप्रपाठके षष्ठोऽनुवाकः) ।

पञ्चमेऽनुवाक उखानिर्माणमुक्तम् । अथ षष्ठे तत्संस्कारोऽभिधीयते ।

कल्पः—" वसवस्त्वा धूपयन्तु गायत्रेण छन्दसेति सप्तभिरश्वशकेनोखां धूपयन्ति " इति । पाठस्तु—

वसवस्त्वेति । हे उखे त्वामष्टौ वसवः सहकारिणा गायत्रेण च्छन्दसा सहाङ्गिरस इव धूपयन्तु अश्वशकजन्येन धूमेन संस्कुर्वन्तु । एवमुत्तरेष्वपि षट्सु योजनीयम् । एतान्मन्त्रान्विनियुङ्क्ते—

" सप्तभिर्धूपयति सप्त वै शीर्षण्याः प्राणाः शिर एतद्यज्ञस्य यदुखा शीर्षन्नेव यज्ञस्य प्राणान्दधाति तस्मात्सप्त शीर्षन्प्राणाः " [सं० का० ५ प्र० १ अ० ७] इति ।

शिरोवर्तिषु सप्तसु च्छिद्रेषु संचरन्तः प्राणाः सप्तसंख्याकाः । उखा च यज्ञशिरःस्थानीया । तस्मात्सप्तभिर्धूपने सति यज्ञस्य शिरस्येव प्राणानवस्थापयति । यस्मादेवं तस्मात्प्रतिपुरुषं शिरसि च्छिद्रभेदेन सप्त प्राणा वर्तन्ते ।

धूपसाधनं विधत्ते—

" अश्वशकेन धूपयति प्राजापत्यो वा अश्वः सयोनित्वाय " [सं० का० ५ प्र० १ अ० ७] इति ।

अश्वस्य शकोऽश्वशकस्तेन । अश्वस्य प्राजापत्यत्वमसकृदुक्तम् । अग्निरपि प्राजापत्यः । " प्रजापतिरग्निमचिनुत " इति श्रवणात् । अत उभयोः समानयोनित्वम् ।

कल्पः—" अदितिस्त्वेति देवीत्यनेन गार्हपत्यमवटे खात्वा " इति । पाठस्तु—

अदितिस्त्वेति । विश्वेषां देवानां योग्या उपचारा विश्वदेव्यास्तेऽस्यां सन्तीति विश्वदेव्यावती । तादृशीयमदितिर्देवी पृथिव्याः सधस्थे भूम्या उपरि हेऽवट त्वामङ्गिरस इव खनतु । अस्मिन्मन्त्रे खननकर्तृत्वमदितेरुपपादयति—

" अदितिस्त्वेत्याहेयं वा अदितिरस्यामेवादित्यां खनत्यस्यां अकूरंकाराय न हि स्वः स्वं हिनस्ति " [सं० का० ५ प्र० १ अ० ७] इति ।

(उखासंस्काराभिधानम्)

इयं भूमिरेवात्रादितिशब्देन विवक्षिता। अवटखननं हि भूम्यामेव। ततोऽदितेः खननकर्तृत्वे सति भूमेर्हिंसा न भवति। न हि लोके कश्चिदपि स्वयं स्वात्मानं हिनस्ति। तस्मात्खननलक्षणक्रूरकार्यकरणाभावायेदमदितिकर्तृत्वं संपाद्यते।

कल्पः—" लोहितपचनीयैः संभारैरवस्तीर्य देवानां त्वा पत्नीरिति तस्मिन्नुखामवदधाति " इति। पाठस्तु—

देवानां त्वेति। विश्वेदेव्यावतीः कृत्स्नदेवार्होपचारयुक्ता या देवानां पत्न्यो देव्यस्ताः पृथिव्याः सधस्थ उपर्यङ्गिरस इव हे उखे त्वां दधतु स्थापयन्तु।

देवपत्नीनामुखाकर्तृत्वं पुरातनमित्येतदर्शयति—

" देवानां त्वा पत्नीरित्याह देवानां वा एतां पत्नयोऽग्रेऽकुर्वन्ताभिरेवैनां दधाति " [सं० का० ५ प्र० १ अ० ७] इति।

पुरा देवपत्नीभिरुखायाः कृतत्वादिदानीमपि ताभिरेव स्थापितो भवति।

कल्पः—" लोहितपचनैः संभारैः प्रच्छाद्य धिषणास्त्वा देवीरिति चतुर्भिरुखायामग्निमभ्यादधाति " इति। पाठस्तु—

धिषणास्त्वेति। विद्याभिमानिन्यो देवता धिषणाः। हे उखे त्वां ता देवता अभीन्धतामभितो ज्वालयन्तु। छन्दोभिमानिन्यो देवता ग्रास्तास्त्वां श्रपयन्तु तव पच्यमानतां संपादयन्तु। वरूत्रयो जनय इति पदभेदेन मन्त्रभेदः। होतृप्रशास्त्रादिषु तासु होत्रकेष्वभिमानिन्यो देवता वरूत्रयः। सेनेन्द्रस्येत्याद्यनुवाकेनोक्ता देवपत्न्यो जनयः। तत्र वरूत्रयस्त्वां पचन्तु तव पक्वतां संपादयन्तु। तथा जनयस्त्वां पचन्तु पक्वत्वपरीक्षां कुर्वन्तु। वरूत्रय इति मन्त्रे त्वा देवीरित्याद्युत्तरभागोऽनुषज्यते।

एषु मन्त्रेषु धिषणादिशब्दानामस्मदुक्तार्थपरतां दर्शयति—

" धिषणास्त्वेत्याह विद्या वै धिषणा विद्याभिरेवैनामभीन्धे ग्रास्त्वेत्याह छन्दाꣳसि वै ग्राश्छन्दोभिरेवैनाꣳ श्रपयति वरूत्रयस्त्वेत्याह होत्रा वै वरूत्रयो होत्राभिरेवैनां पचति जनयस्त्वेत्याह देवानां वै पत्नीर्जनयस्ताभिरेवैनां पचति " [सं० का० ५ प्र० १ अ० ७] इति। स्पष्टोऽर्थः।

---

१ क. घ. ङ. °ननमपि भूम्या एव। २ क. घ. ङ. °पि स्वा°। ३ क. घ. ङ. संपद्यते। ४ ख. च. एतेषु।

अदितिस्त्वा देवीत्यादीनामुक्तानां मन्त्राणां संख्यां प्रशंसति—

" षड्भिः पचति षड्वा ऋतव ऋतुभिरेवैनां पचति " [सं० का० ५ प्र० १ अ० ७] इति ।

अवटखननादीनामपि पाकाङ्गत्वेन षड्भिः पचतीत्युच्यते ।

वरूत्रयो जनय इत्यनयोः स्वाभिप्रेतं मन्त्रभेदं दर्शयितुं पचन्तित्येवमन्तस्य भागस्यानुषङ्गरूपामावृत्तिं दर्शयति—

" द्विः पचन्तित्याह तस्माद्द्विः संवत्सरस्य सस्यं पच्यते " [सं० का० ५ प्र० १ अ० ७] इति ।

वरूत्रयः पचन्तु जनयः पचन्तित्येवं द्विः प्रयोगः ।

कल्पः—" मित्रैतामुखां पचेति पच्यमानां तिसृभिर्मैत्रीभिरुपचरति " इति ।

तत्र प्रथमामाह—

मित्रैतामुखामिति । हे मित्र सर्वप्राणिहितकारिन्देव त्वमेतामुखां पच पक्वां कुरु । एषा चोखा मा भेदि भिन्ना मा भवतु । एतामुखामभित्यै भेदाभावाय ते तुभ्यं परिददामि परित्राणाय ददामि । अथ द्वितीयामाह—

अभीमामिति । मित्र इमामुखामभिबभूवाभितः प्राप्तवान् । कीदृशो मित्रः, सप्रथाः सविस्तारः प्रचुरकीर्तिरित्यर्थः । कीदृशीमिमां, महिना दिवं महिम्ना द्युलोकसदृशीम् । उतापि च अवसा पृथिवीं अवणेन पृथिवीसदृशीम् ।

अथ तृतीयामाह—

मित्रस्येति । चर्षणीधृतो मनुष्याणां धारयितुर्मित्रस्य देवस्य श्रवः श्रोतुं योग्यं यशो महदस्तीति शेषः । सानसिं फलदानशीलं द्युम्नं द्रविणमदं चित्रश्रवस्तमं चित्रं श्रवः कीर्तिर्यस्यासौ चित्रश्रवाः, अतिशयेन तादृशस्तमेतादृशमुखारूपं स मित्रः पचतीति शेषः ।

देवान्तरपरित्यागेन मित्रदेवताकमन्त्रस्वीकारे कारणं दर्शयति—

" वारुण्युखाऽभीद्धा मैत्रियोपैति शान्त्यै " [सं० का० ५ प्र० १ अ० ७] इति ।

---

१ ख. च. °स्तुतिमन्त्रभा° । २ क. घ. ङ. °विस्तरः । ३ क. घ. ङ. °वर्तीति । ४ ख. च. देवतान्त° ।

(उखासंस्कारासभिधानम्)

अभीद्धा पञ्चलिता येयमुखा सेयमुखत्वाद्दारुणी, तस्या मैत्र्यर्चा शान्तिर्भवति ।

कल्पः—" पक्वां देवस्त्वा सवितोद्वपत्वित्युद्वास्य " इति । पाठस्तु—

देवस्त्वेति । हे उखे सविता देवस्त्वां स्वकीयया शक्त्योद्वपतु, अवटादूर्ध्वमानयतु । कीदृशः सविता, सुपाणिः शोभनौ पाणी यस्यासौ सुपाणिः । शोभना अङ्गुलयो यस्यासौ स्वङ्गुलिः । छान्दसो रेफः । उतापि च शोभनौ बाहू यस्यासौ सुबाहुः । मणिबन्धस्योभयोऽवस्थितौ भागौ पाणिशब्देन बाहुशब्देन चोच्येते । अस्मिन्मन्त्रे सवितृशब्दतात्पर्यं दर्शयति—

" देवस्त्वा सवितोद्वपत्वित्याह सवितृप्रसूत एवैनां ब्रह्मणा देवताभिरुद्वपति " [सं० का० ५ प्र० १ अ० ७] इति ।

सविता प्रेरितः सन्नेनां ब्रह्मणा मन्त्रेण देवताभिश्च सहो[द्वपत्यु]द्वपनं कृतवान्भवति ।

कल्पः—" अपद्यमाना पृथिव्याशा दिश आ पृणेत्युत्तरतः सिकतासु प्रतिष्ठाप्य " इति । पाठस्तु—

अपद्यमानेति । हे उखे पृथिवि पृथिव्यां भूमौ त्वमपद्यमाना अकुत्सिता[१]प्नुवती, आशा दिश आपृण प्राच्याद्या दिश आग्नेयादिविदिशश्च सर्वतः पूरय, उत्तिष्ठावटादहिरागत्योत्थिता भव, उत्थाय च बृहती पौढा भव । तादृशी त्वमूर्ध्वा सती ध्रुवा स्थिरा भव । ऊर्ध्वोर्ध्वमुखी स्थिरा तिष्ठ ।

अस्मिन्मन्त्रे यद्दिशामापूरणमुक्तं सेयमग्नेः प्रभया व्याप्तिरित्येतत्तात्पर्यं दर्शयति—

" अपद्यमाना पृथिव्याशा दिश आ पृणेत्याह तस्मादग्निः सर्वा दिशोऽनु वि भाति " [सं० का० ५ प्र० १ अ० ७] इति ।

यस्मादुखायाः सर्वदिक्पूर्तिः प्रार्थ्यते तस्मादुखया मिश्रितोऽग्निः स्वतेजसः सर्वा दिशः प्रकाशयति ।

उत्तरार्धेन स्थिरप्रतिष्ठा प्रार्थ्यत इति दर्शयति—

" उत्तिष्ठ बृहती भवोर्ध्वा तिष्ठ ध्रुवा त्वमित्याह प्रतिष्ठित्यै " [सं० का० ५ प्र० १ अ० ७] इति ।

---

१ ख. च. सेयं दुःस्पर्शाद्वा" । २ क. घ. ङ. ंप्नुः—ं° । ३ ख. घ. ङ. च. अस्य मन्त्रस्य य° ।

कल्पः—" वसवस्त्वाऽऽ च्छृन्दन्तु गायत्रेण छन्दसेति चतुर्भिरजाक्षीरेणोखामा च्छृणत्ति " इति । पाठस्तु—

वसवस्त्वेति । हे उखे वसुनामका देवा अङ्गिरस इव त्वां सिञ्चन्तु । एवमुत्तरत्रापि योज्यम् । एतैर्मन्त्रैः साध्यं सेचनं विधत्ते—

" असुर्यं पात्रमनाच्छृण्णमा च्छृणत्ति देवत्राऽकः " [सं० का० ५ प्र० १ अ० ७] इति ।

यज्ञसाधनं पात्रमग्निदग्धं तद्द्रवद्रव्येण यदा न सिक्तं भवति तदानीमितरयोग्यं भवेत्, तत्परिहारायाऽऽसिञ्चेत् । सिक्तं पात्रं देवत्रा देवेष्वकः करोति । देवयोग्यं भवतीत्यर्थः । सेचनसाधनं विधत्ते—

" अजक्षीरेणाऽऽच्छृणत्ति परमं वा एतत्पयो यदजक्षीरं परमेणैवैनां पयसाऽऽच्छृणत्ति " [सं० का० ५ प्र० १ अ० ७] इति ।

लोकेऽजाक्षीरस्य सर्वव्याधिपरिहारहेतुत्वाद्देवेऽपि " आग्नेयी वा एषा । यदजा " इत्युक्तत्वात्परमत्वम् ।

लोके दग्धस्य पात्रस्य मन्त्रमन्तरेणैव सेचनं कुर्वन्ति । अतस्तद्व्यावृत्त्यर्थमिह मन्त्रेण सेचनं विधत्ते—

" यजुषा व्यावृत्त्यै " [सं० का० ५ प्र० १ अ० ७] इति ।

सामान्येन मन्त्रं विधाय विशेषेण च्छन्दोलिङ्गकान्मन्त्रान्विधत्ते—

" छन्दोभिरा च्छृणत्ति छन्दोभिर्वा एषा क्रियते छन्दोभिरेव छन्दांस्या च्छृणत्ति " [सं० का० ५ प्र० १ अ० ७] इति ।

पूर्वं वसवस्त्वा छृण्वन्तु गायत्रेण च्छन्दसेति च्छन्दोलिङ्गकैर्मन्त्रैरेषा क्रियते । अत इयं च्छन्दोरूपा । तस्मादुखारूपाणि च्छन्दांसि मन्त्ररूपैश्छन्दोभिरेवाऽऽसिक्तानि भवन्ति । अत्र विनियोगसंग्रहः—

वसवः सप्तभिर्धूपोऽदितिस्त्वेत्यवटं खनेत् ।
देवोखां तत्र संस्थाप्य धिषणेति चतुष्टयात् ।
अग्निं क्षिपेन्मन्त्रभेदो वरूजनपदद्वयात् ।
मित्रत्रयेणोपचारो देव उद्वासयेदुखाम् ॥

---

१ क. घ. ङ. °रूत्रजनयद्° ।

(पञ्चपञ्चद्भूताग्निकसामिधेन्यभिधानम्)

अपेति सिकतास्वेतां निधाय वसवेत्यतः ।
चतुष्टयादजाक्षीरं सिञ्चेद्द्वाविंशतिर्मंताः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे प्रथमप्रपाठके
षष्ठोऽनुवाकः ॥ ६ ॥

(अथ चतुर्थाष्टके प्रथमप्रपाठके सप्तमोऽनुवाकः) ।

ममास्त्वाऽग्न ऋतवो वर्धयन्तु संवत्सरा ऋषयो यानि सत्या । सं दिव्येन दीदिहि रोचनेन विश्वा आ भाहि प्रदिशः पृथिव्याः । सं चेध्यस्वाग्ने प्र च बोधयैनमुच्च तिष्ठ महते सौभगाय । मा च रिषदुपसत्ता ते अग्ने ब्रह्माणस्ते यशसः सन्तु माऽन्ये । त्वामग्ने वृणते ब्राह्मणा इमे शिवो अग्ने (१) । संवरणे भवा नः । सपत्नहा नो अभिमातिजिच्च स्वे गये जागृह्यप्रयुच्छन् । इहैवाग्ने अधि धारया रयिं मा त्वा नि क्रन्पूर्वचितो निकारिणः । क्षत्रमग्ने सुयममस्तु तुभ्यमुपसत्ता वर्धतां ते अनिष्टृतः । क्षत्रेणाग्ने स्वायुः सꣳरभस्व मित्रेणाग्ने मित्रधेये यतस्व । सजातानां मध्यमस्थेधि राज्ञामग्ने विहव्यो दीदिहीह । अति (२) निहो अति स्निधोऽत्यचित्तिमत्यरातिमग्ने । विश्वा ह्यग्ने दुरिता सहस्वायास्मभ्यꣳ सहवीराꣳ रयिं दाः । अनाधृष्यो जातवेदा अनि-

(पञ्चपश्वङ्गभूताग्निकसामिधेन्याभिधानम्)

दृतो विराडग्ने क्षत्रभृद्दीदिहीह । विश्वा आशाः प्रमुञ्चन्मानुषीर्भियः शिवाभिरद्य परि पाहि नो वृधे । बृहस्पते सवितर्बोधयैनꣳ सꣳशितं चित्संतरा꣡ꣳ सꣳ शिशाधि । वर्धयैनं महते सौभगाय (३) विश्व एनमनु मदन्तु देवाः । अमुत्र भूयादध यद्यमस्य बृहस्पते अभिशस्तेरमुञ्चः । प्रत्यौहतामश्विना मृत्युमस्माद्देवानामग्ने भिषजा शचीभिः । उद्वयं तमसस्परि पश्यन्तो ज्योतिरुत्तरम् । देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् (४) ॥

(इमे शिवो अग्नेऽति सौभगाय चतुस्त्रिꣳशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके प्रथमप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ चतुर्थकाण्डे प्रथमप्रपाठके सप्तमोऽनुवाकः) ।

षष्ठेऽनुवाक उखासंस्कार उक्तः । अथ सप्तमेऽनुवाके पञ्चपश्वङ्गभूता आग्निक्यः सामिधेन्य उच्यन्ते ।

कल्पः—" एकविंशतिं चतुर्विंशतिं वा पराचीः सामिधेनीरन्वाहैकादश प्राकृतीः समास्त्वाऽग्न इति दशाऽऽग्नीकीः " इति । तत्राऽऽद्यामाह—

समास्त्वाऽग्न इति । समाशब्दः संवत्सरवाची । संवत्सरशब्देन तु तदवयवा मासा अर्धमासाश्चोपलक्ष्यन्ते । हेऽग्ने संवत्सर ऋतवो मासा अर्धमासाश्चेत्येते कालविशेषाः । तथर्षयो मन्त्रद्रष्टारः । तथा यानि सत्यानि सत्यवचनानि सन्ति ते सर्वेऽपि त्वां वर्धयन्तु । त्वैर्वर्धितस्त्वं दिव्येन द्युलोकार्हेण रोचनेन तेजसा संदीदिहि सम्यग्दीप्यस्व । किंच त्वदीयया दृष्ट्या पृथिव्याः संबन्धिनीः प्रदिशः सर्वा दिशो विदिशश्चाऽऽभाहि सर्वतो भासय । अथ द्वितीयामाह—

---

१ ख. च. तत्र प्रथमामा° ।

(पञ्चपश्वङ्गभूताग्निकसामिधेन्यभिधानम्)

सं चेध्यस्वाग्न इति। हेऽग्ने त्वं समिध्यस्व च स्वयमपि दीप्तो भव। एनं प्रबोधय च यजमानं कर्मानुष्ठानाय प्रबुद्धं कुरु। महते सौभगायोत्तिष्ठ च यजमानस्यात्यन्तसौभाग्यार्थमुद्युक्तोऽपि भव। हेऽग्ने ते तवोपसत्ता परिचारकश्च मा रिषन्मा हिंस्यताम्। किंच ते त्वदीया ब्रह्माणो ब्राह्मणा ऋत्विग्यजमाना यशसः सन्तु यशस्विनो भवन्तु। अन्ये त्वत्परिचर्याविमुखा यशस्विनो मा भूवन्। अथ तृतीयामाह—

त्वामग्न इति। हेऽग्न इमे ब्राह्मणा ऋत्विग्यजमानास्त्वां वृणते संभजन्त आराधयन्ति। हेऽग्ने नोऽस्माकं संवरणेऽपराधानामाच्छादने निमित्तभूते सति शिवः शान्तो भव, अपराधं मा प्रकटयेत्यर्थः। किंच नोऽस्माकं सपत्नहा वैरिघाती, अभिमातिजित्पापजयकारी च भूत्वा स्वे गये स्वकीये गृहेऽप्रयुच्छन्प्रमादमकुवञ्जागृहि सावधानो भव। अस्मद्धितं विचारयेत्यर्थः। अथ चतुर्थीमाह—

इहैवाग्न इति। हेऽग्न इहैव गृह एव रयिं धनमविचारयाऽऽविक्येन संपादय। पूर्वचितो येऽस्मत्तोऽपि पूर्वमग्नेश्चेतारस्तेऽस्मान्प्रति निकारिणो निराकर्तारो भूत्वा त्वामस्माभिश्चीयमानमग्निं मा निकर्मैव निराकुर्वन्तु। हेऽग्ने तुभ्यं तव क्षत्रं बलं सुयममस्तु सुस्थितं भवतु। ते तवोपसत्ता परिचारकोऽनिष्टृतः केनापि नितरामहिंसितः सन्वर्धताम्। अथ पञ्चमीमाह—

क्षत्रेणाग्न इति। हेऽग्ने क्षत्रेण त्वदीयेन बलेन स्वायुरस्मदीयं शोभनमायुः संरभस्व संरक्षाऽऽयुःसंरक्षणेऽप्रमत्तो भव। हेऽग्ने मित्रधेये मित्राणामस्माकं धारणे मित्रेणानुग्रहयुक्तेन चित्तेन यतस्व प्रयत्नं कुरु। अग्निना सह प्रजापतेर्मुखतो जातत्वाद्ब्राह्मणा अग्नेः सजातास्तेषां मध्यमस्था एधि मध्यमे पदेशेऽवस्थितो भव। सर्वदा ब्राह्मणान्पूजयेत्यर्थः। हूयतेऽग्नौ हवा यज्ञा विविधाश्च ते हवाश्च विहवाः। विहवानर्हतीति विहव्यः। हेऽग्ने त्वमिह भूमौ राज्ञां विहव्यो विविधयज्ञप्रवर्तकः सन्दीदिहि, अतिशयेन दीप्यस्व। अथ षष्ठीमाह—

अति निहो अतीति। निकृष्टानि शत्रूकरादिजन्मानि जिहीते प्राप्नोति

१ ख. च 'सौभगार्थं'। २ ग. घ. सुस्थिरं। ३ ख. घ ङ. च. 'णान्याच्च'।

(पञ्चपश्वङ्गभूताग्निकसामिधेन्यभिधानम्)

यैर्दुरितैस्तानि दुरितानि हकारान्तेन निहशब्देनोच्यन्ते । शरीरशोषणादिहेतवो रोगविशेषाः सिधशब्देनोच्यन्ते । हेऽग्ने निहो दुरितान्यतिसहस्वातिशयेन विनाशय । सिधो रोगांश्चातिसहस्व । अचित्तिं कर्मानुष्ठानविषयमज्ञानं चातिसहस्व । अरातिं कर्मविघ्नकारिणं शत्रुं चातिसहस्व । हिशब्दोऽपिशब्दार्थः । किंबहुना, हेऽग्ने विश्वान्यपि दुरितान्यनिष्टकारणानि सहस्व विनाशय । अथानन्तरमस्मभ्यं सहवीरां वीरैः पुत्रैः सहितां रयिं धनं दा देहि । अथ सप्तमीमाह—

अनाधृष्य इति । हेऽग्ने त्वमिह कर्मणि दीदिहि दीप्यस्व । कीदृशस्त्वम् । अनाधृष्य इतः परं केनाप्यधर्षणीयः । जातवेदा उत्पन्नसमस्तजगदभिज्ञः । अनिष्टुत इतः पूर्वमपि केनाप्यहिंसितः । विराड्विविधं राजमानः । क्षत्रं बलं बिभर्तीति क्षत्रभृत् । किंच यथोक्तविशेषणविशिष्टस्त्वं शिवाभिः शान्ताभिरनुग्रहदृष्टिभिरद्यास्मिन्कर्मणि नोऽस्माञ्वृधेऽभिवृद्धये परिपाहि सर्वतः पालय । किं कुर्वत् । विश्वा आशा निषिद्धाचरणविषयाः सर्वास्तृष्णा मानुषीर्भियो मनुष्येषु प्रसक्ता व्याध्यादिभीतिश्च प्रमुञ्चन्प्रकर्षेण निवारयन् । अथाष्टमीमाह—

बृहस्पत इति । अत्र बृहस्पतिसवितृशब्दावग्निपरौ । सामिधेनीनामाग्नेयत्वात् । बृहस्पतिसवितृभ्यां तुल्य हेऽग्न एनं यजमानं बोधय कर्माणि बुद्धिमन्तं कुरु । संशितंचित्पूर्वमेव निशितबुद्धिमप्येनं संतरां संशिशाधि पुनरप्यतिशयेन सम्यगनुशासनवन्तं कुरु । एनं यजमानं महते सौभगाय वर्धय । विश्वे सर्वेऽपि देवा एनं यजमानमनुमदन्तु समीचीनोऽयमिति हृष्यन्तु । अथ नवमीमाह—

अमुत्रभूयादिति । भूयो भावः । अमुत्र स्वर्गे भूयोऽमुत्रभूयः । स्वर्गे चिरावस्थानमित्यर्थः । पञ्चमी निमित्तार्था । अधशब्दो धकारयुक्त इदानीमित्येतस्मिन्नर्थे वर्तते । हे बृहस्पतितुल्याग्नेऽमुत्रभूयात्स्वर्गे चिरावस्थानं निमित्तीकृत्याधेदानीं यमस्थामिशस्तेर्यमसंबन्धिहिंसानिमित्तात्पापात्पादस्मानमुञ्चो मोचितवानसीति यत्तेनास्माकं परलोकविषये चिन्ता नास्तीति शेषः । हेऽग्ने देवानां भिषजावश्विनौ देवौ शचीभिः स्वकीयशक्तिभिरस्माद्यजमानान्मृत्युं मत्यौहताम्, अमृत्युमिह लोके निराकुरुताम् । अथ दशमीमाह—

उद्वयं तमस इति । वयं तमस उत्तरं ज्योतिस्तमसो विनाशकत्वेनोत्कृष्टमग्निसंबद्धं ज्योतिरुत्तरि पश्यन्त उत्कर्षेण सर्वतोऽवलोकयन्तो देवत्रा देवेषु मध्ये सूर्यं देवं सूर्यरूपेण वर्तमानमग्निसंबद्धमेवोत्तमं ज्योतिरगन्म प्राप्तास्म ।

---

१ स. च. स्व । अं° । २ क. घ. ङ. °विधो रा° । ३ क. घ. ङ. °श्वेऽपि स° ।
४ स. च. प्राप्ताः स्मः । अं° ।

(आप्रीनामकप्रयाजयाज्याभिधानम्)

अत्र विनियोगसंग्रहः—

समास्त्वा सामिधेन्यः स्युर्दशैता आग्निके पशौ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे प्रथमप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ चतुर्थकाण्डे प्रथमप्रपाठकेऽष्टमोऽनुवाकः)।

ऊर्ध्वा अस्य समिधो भवन्त्यूर्ध्वा शुक्रा शोचीꣳष्यग्नेः। द्युमत्तमा सुप्रतीकस्य सूनोः। तनूनपादसुरो विश्ववेदा देवो देवेषु देवः। पथ आऽनक्ति मध्वा घृतेन। मध्वा यज्ञं नक्षसे प्रीणानो नराशꣳसो अग्ने। सुकृद्देवः सविता विश्ववारः। अच्छायमेति शवसा घृतेनेडानो वह्निर्नमसा। अग्निꣳ स्रुचो अध्वरेषु प्रयत्सु। स यक्षदस्य महिमानमग्नेः सः (१) ईमन्द्रासु प्रयसः। वसुश्चेतिष्ठो वसुधातमश्च। द्वारो देवीरन्वस्य विश्वे व्रता ददन्ते अग्नेः। उरुव्यचसो धाम्ना पत्यमानाः। ते अस्य योषणे दिव्ये ऽ योनावुषासानक्ता। इमं यज्ञमवतामध्वरं नः। दैव्या होतारावूर्ध्वमध्वरं नोऽग्रे जिह्वामभि गृणीतम्। कृणुतं नः स्विष्टिम्। तिस्रो देवीर्बर्हिरेदꣳ सदन्त्विडा सरस्वती(२) भारती। मही गृणाना। तन्नस्तुरीपमद्भुतं

पुरुक्षु त्वष्टा सुवीरम् । रायस्पोषं वि ष्यतु नाभिमस्मे । वनस्पतेऽवं सृजा ररांणस्त्मना देवेषु । अग्निर्हव्यꣳ शमिता सूदयाति । अग्ने स्वाहा कृणुहि जातवेद इन्द्राय हव्यम् । विश्वे देवा हविरिदं जुषन्ताम् । हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् । स दाधार पृथिवीं द्याम् (३) उतेमां कस्मै देवाय हविषा विधेम । य. प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव । य ईशे अस्य द्विषदश्चतुष्पदः कस्मै देवाय हविषा विधेम । य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः । यस्य छायाऽमृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम । यस्येमे हिमवन्तो महित्वा यस्य समुद्रꣳ रसया सह (४) आहुः । यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम । यं क्रन्दसी अवसा तस्तभाने अभ्यैक्षेतां मनसा रेजमाने । यत्राधि सूर उदितौ व्येति कस्मै देवाय हविषा विधेम । येन द्यौरुग्रा पृथिवी च दृढे येन सुवः स्तभितं येन नाकः । यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम । आपो ह यन्महतीर्विश्वमायन्गर्भं दधाना जनयन्तीरग्निम् । ततो देवानां निर-

(आप्रीनामकप्रयाजयाज्यामिधानम्)

वर्ततासरेकः कस्मै देवाय हविषा विधेम।
यश्चिदापो महिना पर्यपश्यद्दक्षं दधाना जन
यन्तीरग्निम्। यो देवेष्वधि देव एक आसी-
त्कस्मै देवाय हविषा विधेम (६)॥

(अग्नेः स सरस्वती द्याश्च पृह विश्वं चतुस्त्रिंशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
प्रथमप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ चतुर्थकाण्डे प्रथमप्रपाठकेऽष्टमोऽनुवाकः)।

सप्तमेऽनुवाकेऽग्निचयनाङ्गभूते पशौ सामिधेन्योऽभिहिताः। अथाष्टमे प्रयाजयाज्या आप्रीनाम(मि)का उच्यन्ते।

कल्पः—" ऊर्ध्वा अस्य समिधो भवन्तीति प्रयाजानामाप्रियो भवन्ति " इति। तत्र प्रथमामाह—

ऊर्ध्वा अस्येति। प्रयाजानां सर्वेषामग्निविशेषा एव देवताः। तत्र प्रथमप्रयाजदेवतामग्निविशेषरूपामर्थं समिच्छब्द आचष्टे। सम्यगिध्यते प्रकाश्यत इति व्युत्पत्तेः। बहुवचनं पूजार्थम्। अस्याग्नेः स्वरूपविशेषभूताः समिधः समिन्नामिका देवता ऊर्ध्वा भवन्ति, अस्मच्छ्रेयार्थमुद्युक्ता भवन्तु। तेदुद्योगाच्छोचींषि ज्वालास्वरूपाण्यूर्ध्वा भवन्तूत्तमानि भवन्तु। कीदृशानि शोचींषि, शुक्रा भास्वराणि द्युमत्तमाऽतिशयेन दीप्तिमन्ति। कीदृशस्याग्नेः, सुप्रतीकस्य सुमुखस्य सूनोः पुत्रवद्धितकारिणः। अथ द्वितीयामाह—

तनूनपादसुर इति। तनूं न पातयति न विनाशयतीति तनूनपात्, शरीरपालक इत्यर्थः। एतन्नामकः कश्चिदग्निविशेषो मधवा मधुरेण घृतेन पथ आनक्ति स्वर्गसाधनत्वेन तन्मार्गभूतानि हवींषि घृतेनाऽऽक्तानि करोतु। कीदृशस्तनूनपात्। असून्-प्राणान्राति ददातीत्यसुरः। अत एव शरीरपालक इति युक्तम्। विश्वं वेत्तीति विश्ववेदाः। देवो द्योतनात्मको मनुष्यैः पूजनीयो वा। न केवलं मनुष्येष्वेव देवोऽपि तु देवेष्वप्यधिको देवः। अथ तृतीयामाह—

---

१ ख. च. तथो°। २ ख. च. °न्तूत्तमानि। ३ ख. °नू तनन्मा°।

(आप्रीनामकप्रयाजयाज्याभिधानम्)

मध्वा यज्ञमिति । नरैः शंसनीयो नराशंसः । एतन्नामकः कश्चिदग्निविशेषः । हेऽग्ने त्वं नराशंसो भूत्वा मध्वा मधुरेण घृतेन प्रीणानस्तृप्यन्निमं यज्ञं नक्षसे प्राप्नोषि निर्वर्तयसीत्यर्थः । कीदृशो नराशंसः । सुष्ठु करोति वैकल्यं परिहरतीति सुकृत् । देवो द्योतनात्मकः सविता कर्मण्यस्माकं प्रेरकः । विश्वानि दुरितानि वारयतीति विश्ववारः । अथ चतुर्थीमाह—

अच्छायमेतीति । ईडान इत्यग्निविशेषस्य नामधेयम् । स्तुतिप्रियत्वादीडान इत्युच्यते । एतन्नामकोऽयं वह्निः शवसा बलेन युक्तः सन्नच्छ यज्ञं प्राप्तुमेति गच्छति । तमग्निमध्वरेषु प्रयत्सु यज्ञेषु प्रवर्तमानेषु स्रुचो घृतेन जुहूनिष्ठेनाऽऽज्येन नमसा नमस्कारेण च परिचरेमेति शेषः । अथ पञ्चमीमाह—

स यक्षदस्येति । बर्हिर्नामकः कश्चिदग्निविशेषः प्राकृते बर्हिरग्र आज्यस्य वेत्विति मन्त्रे प्रसिद्धत्वादिह प्रसिद्धवाचकेन तच्छब्देन परामृश्यते । स तादृशो बर्हिर्नामकोऽग्निविशेषोऽस्य सामान्यरूपस्याग्नेर्महिमानं यक्षद्यजतु पूजयतु । स*ईं स एव बर्हिर्नामकोऽग्निर्मन्द्रासु हर्षजनिकासु स्तुतिरूपासु ऋक्षु प्रयसः प्रयासवान्, अधिकपरिचर्यायुक्त इत्यर्थः । किंचायं बर्हिर्नामकोऽग्निर्वसुः प्राणिनां वासयिता चेतिष्ठोऽतिशयेनाभिज्ञो वसुधातमश्च यजमानार्थं द्रव्यस्यातिशयेन धारयिता ।

अथ षष्ठीमाह—

द्वारो देवीरन्वस्येति । द्वार्शब्देन स्त्रीमूर्तिधरः कश्चिदग्निविशेष उच्यते । पूजार्थं बहुवचनम् । या देव्यो द्वार्शब्दाभिधेयाः प्रथममग्नेर्व्रतमाचरन्ति ता द्वारो देवीरनु विश्वे सर्वे यजमाना अस्याग्नेः संबन्धीनि व्रतानि कर्माणि दद्रन्वे हविः प्रयच्छन्ति । कीदृशीर्द्वारः । उरुव्यचसो विस्तीर्णगतीर्धाम्ना तेजसा पत्यमानाः प्राप्यमाणास्तेजस्विनीरित्यर्थः । अथ सप्तमीमाह—

ते अस्येति । उषासेत्युषःकालरूपा काचिदग्नेर्मूर्तिः, नक्तेति च रात्रिरूपा काचिदग्नेर्मूर्तिः । उषासा च नक्ता चोषासानक्ता । एतन्नामिके ये अस्याग्नेर्मूर्ती ते नोऽस्मदीयमिमं यज्ञं योनावस्मिन्स्थानेऽध्वरं हिंसारहितं यथा भवति तथाऽवतां रक्षताम् । कीदृश्यौ ते, योषणे परस्परमिश्रिते । तत्र दृष्टान्तः—दिव्ये[1]ने, यथा द्युलोकस्थे मूर्ती भासमाने भवत एवमेते मूर्ती । अथाष्टमीमाह—

---

* मन्त्रेऽनुस्वारलोपश्छान्दसः ।

---

१ ख. च न, दिव्ये इव, यं ।

(आग्नीनामकप्रयाजयाज्यानिधानम्)

दैव्या होताराविति। होतृशब्दाभिधेयौ द्वावग्निविशेषौ। होतृत्वं च द्विविधं दैव्यं मानुषं च। तत्रैतौ होतारौ दैव्यौ। हे दैव्या होतारावग्नेर्जिह्वां ज्वालामभिलक्ष्य प्रवृत्तमूर्ध्वमत्युच्छ्रितं नोऽध्वरमस्मदीयमिमं यज्ञं गृणीतं प्रख्यापयतम्। किंच नोऽस्मदर्थं स्विष्टिं कृणुतं वैगुण्यं परिहृत्यैतामिष्टिं शोभनां कुरुतम्। अथ नवमीमाह—

तिस्रो देवीरिति। इडा सरस्वती भारतीत्यादिशब्दवाच्यास्तिस्रो देव्योऽग्निमूर्तयो याः सन्ति ता इदं बर्हिरिमं यज्ञमासदन्तु प्राप्नुवन्तु। तासां प्रत्येकविशेषणमाह—मही महती गृणाना यज्ञं प्रख्यापयन्ती। अथ दशमीमाह—

तन्नस्तुरीपमिति। त्वष्टेति कश्चिदग्निविशेषः। सोऽयमस्मे अस्मासु तदैश्वर्यं, विष्यतु विशेषेणावसितं करोतु संपूर्णं करोत्वित्यर्थः। कीदृशमैश्वर्यं, नोऽस्मदर्थं तुरीपं तूर्णमेव प्राप्यमाणम्। अद्भुतं गवाश्वादिबाहुल्येनाऽऽश्चर्यरूपं, पुरुक्षु पुरुभिर्बहुभिर्मनुष्यैः क्षूयते शब्द्यते प्रशस्यत इति पुरुक्षु [तादृशम्]। शोभना वीराः पुत्रा यस्मिंस्तत्सुवीरं, रायो धनस्य पोषः पुष्टिर्यस्मिंस्तद्रायस्पोषं, नाभिं रथचक्रगतानामराणां नाभिरिव सर्वेषां बन्धूनामाश्रयभूतं [तादृशम्]।

अथैकादशीमाह—

वनस्पतेऽवेति। वनस्पतिनामकः कश्चिदग्निविशेषः। हे वनस्पते त्वं रराणो दानशीलः सन्नमस्माभिर्यष्टव्येषु त्वमवसृजास्मद्दत्तं हविः स्वयमेव स्थापय। अस्माभिः प्रार्थितोऽयमग्निः शमिता दुरितोपशमस्य कर्ता सन्हव्यं सूदयाति, अस्मदीयं हविर्देवेषु सूदयतु। अथ द्वादशीमाह—

अग्ने स्वाहेति। स्वाहाकाराभिमानी कश्चिदग्निविशेषः। तादृश हे जातवेदोऽग्न इन्द्रार्थमिदं हव्यं स्वाहा कृणुहि स्वाहुतं कुरु। विश्वे देवाः सर्वेऽपि देवास्तदा तदा मया दीयमानमिदं हविर्जुषन्ताम्। यद्यप्येकादशैव प्रयाजास्तथाऽपि द्वितीयतृतीययोर्मन्त्रयोः पुरुषभेदेन व्यवस्थितत्वान्मन्त्राणां द्वादशसंख्या न विरुध्यते। सा च व्यवस्था सूत्रकारेण दर्शिता—"नराशंसो द्वितीयः प्रयाजो वसिष्ठज्ञानकानां तनूनपादितरेषां गोत्राणाम्" इति।

कल्पः—"हिरण्यगर्भः समवर्तताग्र इति स्रुच्यमाघारयति" इति। पाठस्तु—

---

१ ख. °मिमिव।

हिरण्यगर्भ इति। हिरण्ये ब्रह्माण्डरूपे गर्भरूपेणावस्थितः प्रजापतिर्हिरण्यगर्भः। स च भूतस्य प्राणिजातस्याग्रे समवर्तत प्राणिजातोत्पत्तेः पुरा स्वयं शरीरधारी बभूव। स च जात उत्पन्नमात्र एक एवोत्पत्स्यमानस्य सर्वस्य जगतः पतिरासीत्। स एव पृथिवीं द्यां विस्तीर्णां दिवं दाधार धृतवान्। उतापि चेमां भूमिं दाधार। तादृशाय कस्मै प्रजापतये देवायाऽऽधाररूपेण हविषा विधेम परिचरेम।

कल्पः—"यः प्राणतो य उन्मिषदा इति प्राजापत्यस्य" इति।

यः पशुः प्राजापत्यस्तस्यैते याज्यानुवाक्ये इत्यर्थः। तत्र वपायां द्वे ऋचौ पुरोडाशे द्वे ऋचौ हविषि द्वे ऋचाविति षड्ऋचो याज्यानुवाक्याः।

तत्र प्रथमामाह—

यः प्राणत इति। यः प्रजापतिरेक इदेक एव प्राणतः श्वासयुक्तस्य निमिषतश्चक्षुर्निमेषयुक्तस्य च सर्वस्य जगतो महित्वा स्वमहिम्ना राजा बभूव। अत एव यः प्रजापतिरस्य द्विपदो मनुष्यादेश्चतुष्पदो गवादेश्चेशे नियमनाय समर्थो भवति। तादृशाय कस्मै देवाय हविषा विधेम। अथ द्वितीयामाह—

य आत्मदा इति। यः प्रजापतिरात्मदाः शरीरेषु जीवरूपेणाऽऽत्मप्रदो बलदाः सामर्थ्यप्रदश्च, यस्य प्रजापतेः प्रशिषमाज्ञां विश्वे सर्वे मनुष्या उपासते नाविवर्तन्ते। किंच यस्य प्रशिषं देवा अप्युपासते। अमृतममरणं मोक्षरूपं यस्य च्छाया, यस्य प्रजापतेश्छायावत्स्वाधीनं, मृत्युः प्राणिनां मरणमपि यस्य च्छायेव स्वाधीनस्तादृशाय कस्मै देवाय हविषा विधेम। अथ तृतीयामाह—

यस्येमे हिमवन्त इति। इमे हिमवन्तो हिमवत्प्रमुखाः पर्वता यस्य महित्वा महिम्ना वर्तन्ते। रसया भूम्या सहावस्थितं समुद्रं यस्य स्वाधीनमाहुः। इमा दृश्यमानाः प्रदिशः प्राच्यादिदिशो यस्याधीना आहुः। यस्य प्रजापतेर्बाहू धर्माधर्माविति शेषः। तादृशाय कस्मा इत्यादि। अथ चतुर्थीमाह—

यं क्रन्दसी इति। प्रजापतेः क्रन्दनाद्रोदनादुत्पन्ने द्यावापृथिव्यौ क्रन्दसी। अत एवान्यत्राऽऽम्नातम्—"यदरोदीत्तदनयो रोदस्त्वम्" इति। ते च द्यावापृथिव्यावसा रक्षणेन निमित्तेन यं प्रजापतिं मनसाऽभ्यैक्षेतामभित ईक्षणं कृतवत्यौ, अयमावां रक्षतित्याशासनं कृतवत्यावित्यर्थः। कीदृशौ द्यावापृ-

---

१ क. ख. ङ. गर्भेणा°। २ ख. च. °ष्पदः पश्वादे°। ३ ख. च. ते आ°। ४ ख. च. कीदृश्यौ।

(आप्रीनामकप्रयाजयाज्याभिधानम्)

थिन्वौ, तस्तभाने देवानां मनुष्याणां चावस्थानाय स्तम्भिते, रेजमाने दीप्यमाने सूरः सूर्यो यत्राधि यस्मिन्प्रजापतावधिश्रित्योदितौ व्येति उदयविषये विविधं गच्छति, तादृशाय कस्मै देवाय हविषा विधेम । अथ पञ्चमीमाह—

येन द्यौरुग्रेति । उग्रा पुण्यरहितैः प्राणिभिर्दुष्पापा द्यौः पृथिवी चेत्येते उभे येन प्रजापतिना दृढे कृते । सुवः स्वर्गसुखं येन प्रजापतिना स्तभितं पुण्यकृत्सु व्यवस्थापितम् । नाको दुःखरहितो मोक्षो येन प्रजापतिना ज्ञानिषु स्तभितः । यश्च प्रजापतिरन्तरिक्षे लोके रजसो राजसस्य यक्षगन्धर्वादेर्विमानो विमाता निर्माता, तादृशाय कस्मा इत्यादि । अथ षष्ठीमाह—

आपो ह यदिति । यद्यस्य प्रजापतेरनुग्रहान्महतीर्महित्य आपो विश्वमायन्विश्वाकारं प्राप्ताः । अत एव स्मर्यते—

" अप एव ससर्जाऽऽदौ तासु वीर्यमवासृजत् ।
तदण्डमभवद्धैमम् " इति ।

कीदृश्य आपः, दक्षमग्निचयने कुशलं यजमानं दधाना धारयन्त्य उत्पादयन्त्यः । तथा चेतव्यमग्निं जनयन्तीरुत्पादयन्त्यः । ततस्तस्मात्प्रजापतेर्देवानां सर्वेषामसुर्जीवनहेतुः प्राण एको निरवर्तत निष्पन्नः । तादृशाय कस्मा इत्यादि । सेयमृक्षष्ठी हविषो याज्या । तत्रैवाभ्यां विकल्पितां याज्यामाह—

यश्चिदाप इति । आप इति द्वितीयाबहुवचनम् । यश्चिद्य एव प्रजापतिः पूर्वोक्तरीत्या विश्वाकारेण परिणता महतीरापो महिना स्वमहिम्ना पर्यपश्यद्दर्शं तथाविधसामर्थ्याय कटाक्षेण वीक्षितवान् । कीदृशीरपः । दक्षं दधाना अग्निं जनयन्तीः । पूर्ववदन्याख्येयम् । यः प्रजापतिर्देवेषु सर्वेष्वधिको देव आसीत्तादृशाय कस्मा इत्यादि ।

एतस्मिन्नूर्ध्वा अस्येत्यादावष्टमानुवाके प्रयाजयाज्या आप्रीनामिका आघारमन्त्रो याज्यानुवाक्याश्चोक्ताः । पूर्वस्मिंस्तु सप्तमेऽनुवाके सामिधेन्योऽभिहिताः । तासामेतासामुभयविधानामृचां पशुप्रयोगान्तः पातित्वेन पशुविधिमन्तरेण व्याख्यातुमशक्यत्वात्पशुविधिरादौ वक्तव्यः । तेभ्योऽपि पशुभ्यः पुरुषशीर्षस्य पूर्वं संपादनीयत्वादादौ तत्संपादनं विधत्ते—

---

१ ख. च. 'धित्यौ' । २ घ. ङ. 'वाक्षिपत्' । ३ क. ख. ङ. 'दर्थात्तया' ।

" एकविंशत्या माषैः पुरुषशीर्षमच्छैत्यमेध्या वै माषा अमेध्यं पुरुषशीर्षममेध्यैरेवास्यामेध्यं निरवदाय मेध्यं कृत्वाऽऽ हरति " [सं० का० ५ प्र० १ अ० ८] इति ।

एकविंशतिसंख्याकानि माषबीजानि स्वीकृत्य तैर्युक्तः पुरुषशीर्षं प्राप्तुं गच्छेत् । तथा च सूत्रकारेणोक्तम्--" सप्तैकविंशतिं वा माषानादाय पुरुषशिरोऽच्छैति वैश्यस्य राजन्यस्य चेषुहतस्याशनिहतस्य वा माषानुपन्युप्यायं योऽसि यस्य त इदं शिर इति पुरुषशिरः प्रच्छिद्यैतेन त्वमत्र शीर्षण्यानेधीति सप्तधा वितृण्णां वल्मीकवपां शिरसः स्थाने प्रति[1] निदधाति" इति । माषास्तावदपूतत्वाद्यज्ञानर्हाः । पुरुषशीर्षं चास्पृश्यत्वाद्यज्ञानर्हम् । ततो यथा रजका मलरूपेणोषेण वस्त्रमलमपनीय शोधयन्ति, एवमत्राप्यमेध्यैर्माषैः शिरोनिष्ठममेध्यभागं निःसार्य तच्छिरो यज्ञयोग्यं कृत्वा समानयति । माषसंख्यां प्रशंसति-

" एकविंशतिर्भवन्त्येकविंशो वै पुरुषः पुरुषस्याऽऽप्त्यै " [सं० का० ५ प्र० १ अ० ८] इति ।

एकविंशतिसंख्यापूरकत्वं पुरुषस्यान्यत्राऽऽम्नातम्-" दश हस्त्या अङ्गुलयो दश पद्या आत्मैकविंशः " इति । अतोऽत्र माषसंख्या पुरुषप्राप्त्यै संपद्यते । शिरश्छेदादूर्ध्वं शिरोरहिते कबन्धे वल्मीकवपास्थापनं विधत्ते--

" व्यृद्धं वा एतत्प्राणैरमेध्यं यत्पुरुषशीर्षꣳ सप्तधा वितृण्णां वल्मीकवपां प्रति नि दधाति सप्त वै शीर्षण्याः प्राणाः प्राणैरेवैनत्समर्धयति मेध्यत्वाय " [सं० का० ५ प्र० १ अ० ८] इति ।

यच्छिन्नं शिरस्तदेतत्प्राणैर्वियुक्तत्वादमेध्यम् । अतस्तदपनीयान्तःस्थितसप्तच्छिद्रोपेतां वल्मीकस्य कस्मिंचिद्वपाकारां मृत्संहतिं शिरसः स्थाने प्रतिनिदधाति । जीवतः पुरुषस्य शिरोगतच्छिद्रेषु सप्तसु संचरन्तः प्राणा अपि सप्तैव । अतः सप्तच्छिद्रोपेतायां वपायास्तत्र स्थापनेनैतच्छिरोऽपि प्राणैः समृद्धं भवत्येव । तच्च प्राणोपेतत्वं मेध्यत्वाय संपद्यते ।

तत्र सूत्रकारेण योऽस्य कोष्ठ[2] जगत इति तिस्र ऋचः पठित्वाऽन्ते यदुक्तं " तिसृभिर्यमगाथाभिः परिगायति " इति, तदेतद्विधत्ते--

---

१ क. घ. ङ. °तिद्[3] । २ ख. च अत्राग्रि । ३ ख. च. यदुक्तं ।

(आग्नीनामकप्रयाजयाज्याभिधानम्)

" यावन्तो वै मृत्युबन्धवस्तेषां यम आधिपत्यं परीयाय यमगाथाभिः परि गायति यमादेवैनद्वृङ्क्ते " [सं० का० ५ प्र० १ अ० ८] इति ।

हिरण्यकक्ष्यान्सुधुरानित्यादिमन्त्रेणाऽऽज्ञाता अन्यत्रापि कालान्तकादिशब्दैराज्ञाता मृत्युबन्धवो यावन्तः सन्ति तेषां सर्वेषामाधिपत्यं यमः प्राप्तवान् । यमो गीयते यास्वृक्षु ता यमगाथाः । तासां पाठेन यमस्तकाशादेनत्पुरुषशिरो वृङ्क्ते वर्जितं करोति । ताश्च यमगाथा योऽस्य कौष्ठ्येत्याद्या आरण्यकाण्डे पितृमेधप्रपाठके समाम्नाताः । अत्रापेक्षितानां यमगाथानां संख्यां विधत्ते—

" तिसृभिः परि गायति त्रय इमे लोका एभ्य एवैनल्लोकेभ्यो वृङ्क्ते " [सं० का० ५ प्र० १ अ० ८] इति ।

एनच्छिरो लोकेभ्यः पृथक्कृत्य स्वाधीनं करोतीत्यर्थः ।

प्रसङ्गात्पुरुषार्थं कंचिन्निषेधं दर्शयति—

" तस्माद्दायते न देयं गाथा हि तद्वृङ्क्ते " [सं० का० ५ प्र० १ अ० ८] इति ।

यस्तु ब्राह्मणो याजनाध्यापनप्रतिग्रहान्पारित्यज्य गानेनैव जीविकां संपादयति तादृशाय ब्राह्मणाय शास्त्रीयं देयं किमपि न दद्यात् । हि यस्माद्गाथा गानविधैव तद्द्रव्यममेध्यं कृत्वा वृङ्क्ते देवपितृकार्येभ्यो वर्जयति, तस्मात्तादृशाय न देयम् ।

यदुक्तं सूत्रकारेण—" अग्निभ्यः कामाय पशूनालभते मुष्करान्पाजापत्यमजं तूपरमुपाकृत्यार्श्यकषभ[1]श्चित्रस्तान् " इति । तदेतद्विधत्ते—

" अग्निभ्यः पशूना[2]लभते कामा वा अग्नयः कामानेवाव रुन्धे " [सं० का० ५ प्र० १ अ० ८] इति ।

काम्यन्त इति कामाः पशवादयः, तद्देवतोऽग्नयः, तस्मात्कामान्प्राप्नोत्येव ।

एतेषु पशुषु कंचिद्विशेषं विधत्ते—

" यत्पशूनाऽऽलभेतानवरुद्धा अस्य पशवः स्युर्यत्पर्यग्निकृतानुत्सृजेद्यज्ञवेशसं कुर्याद्यत्स[2]स्थापयेद्यातयामानि शीर्षाणि स्युर्यत्पशूना लभते तेनैव पशूनव रुन्धे यत्पर्यग्निकृतानुत्सृजति शीर्ष्णामयातयामत्वाय प्राजापत्येन स[2]स्थाप-

---

१ ख. च. °हर्षभ° । २ ख. च. °श्वर्षभ° । घ. ङ. °श्वृष° ।

यति यज्ञो वै प्रजापतिर्यज्ञ एव यज्ञं प्रति ष्ठापयति " [सं० का० ५ प्र० १ अ० ८] इति ।

अत्रेदं चिन्तनीयम्—किमाग्नेयाः पशव एव नाऽऽलभ्याः, किंवा तान्पशूनुपाकृत्य पर्यग्निकरणादूर्ध्वमुत्सृजेत्, आहोस्वित्समाप्तिपर्यन्तमनुतिष्ठेदिति । नाऽऽद्यः । पशुप्राप्त्यभावप्रसङ्गात् । न द्वितीयः । मध्ये परित्यागेन यज्ञभ्रंशप्रसङ्गात् । न तृतीयः । अत्रैवाश्वैवृषभवृष्णिबस्ताशिरसां गतसारत्वेन भविष्यन्त्यां चित्यामनुपधेयत्वप्रसङ्गात् । एतद्दोषत्रयपरिहारायेत्थं कर्तव्यम्—आलम्भेनोत्सर्गेण च प्रथमतृतीयदोषौ न भविष्यतः । प्राजापत्येन तूपरेण समापनाद्यज्ञभ्रंशरूपो मध्यमदोषोऽपि न भविष्यति । यज्ञोत्पादकत्वात्प्रजापतिर्यज्ञ एव । ततो यज्ञरूपे प्रजापतावेव क्रियमाणं यज्ञं प्रतिष्ठापयति समापयति ।

इत्थमुपोद्घातत्वेन पशवो विहिताः । अथानुवाकद्वयोक्तौ मन्त्रौ व्याख्यातव्यौ । यद्यपि सामिधेन्यः पूर्वानुवाकोक्ताः पूर्वमेवानुष्ठेयाश्च तथाऽप्यभ्यर्हितं पूर्वमिति वैयाकरणोक्तन्यायेन प्रयाजयाज्यानां प्रीतिहेतूनामभ्यर्हितत्वाद्वा सूचीकटाहन्यायेनाल्पवक्तव्यत्वाद्वा ता एवाऽऽप्रीः प्रथमं विधत्ते—

" प्रजापतिः प्रजा असृजत स रिरिचानोऽमन्यत स एता आप्रीरपश्यत्ताभिर्वै स मुखत आत्मानमाऽप्रीणीत यदेता आप्रियो भवन्ति यज्ञो वै प्रजापतिर्यज्ञमेवैताभिर्मुखत आप्रीणाति " [सं० का० ५ प्र० १ अ० ८] इति ।

प्रजासृष्टौ सामर्थ्यस्योपक्षीणत्वादिक्तोऽहमिति स प्रजापतिरमन्यत । ततः सामर्थ्यपूरिका एता आप्रीर्मनसा विचार्य निश्चितवान् । ततस्ताभिरेवाऽऽप्रीभिः स प्रजापतिर्यज्ञप्रारम्भ एव स्वात्मानं प्रीतमकरोत् । तस्मात्प्रयाजानुष्ठानार्थं एता आप्रीनामिका ऋचो भवेयुः । आत्मानमाप्रीणात्येताभिरित्यूर्ध्वा अस्येत्याद्या ऋच आप्रियः । प्रजापतिजन्यत्वाद्यज्ञः प्रजापतिरेव । अतः प्रजापतिवदेतमेव यज्ञमेताभिर्ऋग्भिर्मुखत एव प्रीतं करोति ।

तासामाप्रीणां बहुप्रकारच्छन्दस्त्वं पाठप्राप्तं प्रशंसति—

" अपरिमितछन्दसो भवन्त्यपरिमितः प्रजापतिः प्रजापतेराप्त्यै " [सं० का० ५ प्र० १ अ० ८] इति ।

---

१ ख. च. °श्वर्षभ° । २ ख. च. °बस्तानां ग° । ३ ख. च. भाविन्यां । ४ घ. ङ. °ष्यत्यां पि° । ५ ख. च. °ण पशुना स° । ६ क. घ. ङ. °ज्ञं स° । ७ क. ख. ङ. °धीकम° । ८ ख, ग. °त्याप्सूची° । ९ ख. च. तथा प्रया° । १० ख. च. °मिता ।

(आग्नीनामकप्रयाजयाज्यानिधानम्)

बहुपकारच्छन्दस्त्वं चैवं द्रष्टव्यम्—सर्वाश्चैतास्त्रिपदाः। आसामाद्या अन्त्याश्च पादा एकादशाक्षराः। मध्यमः पञ्चाक्षरः षडक्षरः सप्ताक्षरोऽष्टाक्षरश्च पादः। ता एताः पिपीलिकामध्यास्त्रिपदा उष्णिहः। दैव्या होतारावूर्ध्वं तिस्रो देवीरिति च गायत्र्याविति।

एषां छन्दसां मध्यमपादेषु यदेतत्तारतम्यं तदिदं प्रशंसति—

"ऊनातिरिक्ता मिथुनाः प्रजात्यै" [सं० का० ५ प्र० १ अ० ८] इति।

पञ्चाक्षरत्वमारभ्याष्टाक्षरत्वपर्यन्तेषूत्तरोत्तरापेक्षया पूर्वपूर्वस्योनत्वं पूर्वपूर्वापेक्षया तूत्तरोत्तरस्यातिरिक्तत्वम। एवं कोटिद्वयात्मकत्वान्मिथुनत्वं, तच्च प्रजननाय संपद्यते।

आद्यन्तपादापेक्षया मध्यमपादस्य यदल्पत्वं तदिदं प्रशंसति—

"लोमशं वै नामैतच्छन्दः प्रजापतेः पशवो लोमशाः पशूनेवाव रुन्धे" [सं० का० ५ प्र० १ अ० ८] इति।

लोमसदृशं सूक्ष्मं मध्यमस्य च्छन्दसस्तदिदं लोमशं, यथा हस्तपादतदङ्गुल्याद्यपेक्षया लोम्नः सूक्ष्मत्वम्, एवमाद्यन्तपादापेक्षया मध्यमपादस्य सूक्ष्मत्वमित्यर्थः। प्रजापतेः सृष्टा ऐते पशवस्ते सर्वे लोमशाः। अतोऽस्य च्छन्दसो लोमशत्वमाभ्येन पशुप्राप्तिर्भवति।

एतास्वापीषु च्छन्दसां नानाविधत्वं प्रशंसति—

"सर्वाणि वा एता रूपाणि सर्वाणि रूपाण्यग्नौ चित्ये क्रियन्ते तस्मादेता अग्नेश्चित्यस्य भवन्ति" [सं० का० ५ प्र० १ अ० ८] इति।

ऊर्ध्वा अस्येत्याद्या या आग्नेयस्ताः सर्वाणि रूपाणि न्यूनातिरिक्तभावेन विविधरूपयुक्ता भासन्ते। यश्च वक्ष्यमाणप्रकारेण चेतव्योऽग्निस्तस्मिन्नग्नौ सर्वाणि रूपाणि क्रियन्ते। पक्षित्वनिष्पत्तये पक्षपुच्छादीनि बहूनि रूपाणि कामनाभेदेन श्येनकङ्कादिरूपाणि च। यस्मादाग्नीनां चित्याग्नेश्चास्ति सादृश्यं तस्मादेता अग्नेश्चित्यस्याऽऽप्रियो भवितुं योग्याः।

तदेवमष्टमानुवाकोक्ता आग्नीध्र्याख्याय बहुवक्तव्यतया पूर्वमुपेक्षिताः सप्त-

---

१ ख. च °मपदे°। २ क. ग. ङ. °रप°। ३ ख. च. मध्यं यस्य। ४ ख. च. ये।

मानुवाक्योक्ताः सामिधेन्यः प्राप्तावेतरतया व्याख्यायन्ते। तत्रैतासां सामिधेनीनां प्राकृतीभिः सामिधेनीभिः[1] समुच्चयमभ्युपेत्य संख्याविशिष्टाः सामिधेनीर्विधत्ते—

"एकविंशतिꣳ सामिधेनीरन्वाह रुग्वा एकविंशो रुचमेव गच्छत्यथो प्रतिष्ठामेव प्रतिष्ठा ह्येकविंशः" [सं० का० ५ प्र० १ अ० ८] इति।

सूत्रकारेण—"एकादश प्राकृतीः समास्त्वाग्न इति दशाऽऽग्निकीः" इति स्मृतम्। सप्तमकाण्डे—"य एवं विद्वाꣳस एकविंशतिरात्रमासते रोचन्त एव" इत्येकविंशतिसंख्यायां दीप्तिहेतुत्वश्रावणादत्रत्यया संख्यया बुद्धिस्थ एकविंशस्तोमो दीप्तिरूपः। तथा प्रकृतौ काम्यसामिधेनीप्रस्तावे एकविंशस्तोमानां प्रतिष्ठेत्युक्तत्वात्प्रतिष्ठारूपश्च। अतस्तया संख्यया रुचं प्रतिष्ठां च प्राप्नोति।

तत्रैव विकल्पितं पक्षान्तरं विधत्ते—

"चतुर्विंशतिमन्वाह चतुर्विंशतिरर्धमासाः संवत्सरः संवत्सरोऽग्निर्वैश्वानरः साक्षादेव वैश्वानरमव रुन्धे" [सं० का० ५ प्र० १ अ० ८] इति।

तत्र शास्त्रान्तरोक्ता उपेमसृक्षि वाजयुरित्याद्यास्तिस्रो धाय्याः प्रक्षिप्य चतुर्विंशतिसंख्या पूरणीया। विधेयां नराणां हितो वैश्वानरः। दाहपाकादिकारित्वाद्धितत्वम्। तादृशोऽग्निः संवत्सररूपः। 'संवत्सरं मुख्यं भूत्वा' इत्यग्नेः संवत्सरसंबन्धस्य वक्ष्यमाणत्वात्। ततश्चतुर्विंशतिसंख्याया अर्धमाससंवत्सरद्वारेण मुख्यमेव वैश्वानरं प्राप्नोति।

प्रकृतौ यदुक्तं 'त्रिः प्रथामन्वाह त्रिरुत्तमाम्' इति, तदेतदपवदितुं विधत्ते—

"पराचीरन्वाह पराङ्इव हि सुवर्गो लोकः" [सं० का० ५ प्र० १ अ० ८] इति।

पराचीरनावृताः। स्वर्गलोकेऽपि पराङ्इव न कदाचिदावर्तन्ते। तदेतत्सर्वं सूत्रकारेण संगृहीतम्—"एकविंशतिं चतुर्विंशतिं वा पराचीः सामिधेनीरन्वाह" इति।

तत्राऽऽग्निकीषु प्रथमाया ऋचः प्रथमपादे संवत्सरवाचिनः समाशब्दस्य ऋतुशब्दस्य [च] तात्पर्यं दर्शयति—

"समास्त्वाऽग्न ऋतवो वर्धयन्त्वित्याह समाभिरेवाग्निं वर्धयत्यृतुभिः संवत्सरम्" [सं० का० ५ प्र० १ अ० ८] इति।

---

१ ख. च. °ता दशाऽऽग्नेक्यो व्या°। २ ख. च. °भिः सह सं°।

(आप्रीनामकप्रयाजयाज्याभिधानम्)

ऋतवः प्रवर्तमानाः संवत्सरं पूरयन्ति । संवत्सरश्चोखाभिधारणेनाग्निं वर्धयति ।

एवमृतूनां संवत्सरस्य चाभिवृद्धिसाधनत्वं प्रतिपाद्य चतुर्थपादे 'आ भाहि' इत्यस्य तात्पर्यं दर्शयति—

" विश्वा आ भाहि प्रदिशः पृथिव्या इत्याह तस्मादग्निः सर्वा दिशोऽनु वि भाति " [सं० का० ५ प्र० १ अ० ८] इति।

नवम्या ऋचस्तृतीयपादे प्रत्यौहतामितिपदस्य तात्पर्यं दर्शयति—

" प्रत्यौहतामश्विना मृत्युमस्मादित्याह मृत्युमेवास्मादप नुदति " [सं० का० ५ प्र० १ अ० ८] इति ।

दशम्या ऋचः प्रथमपादे तमःशब्दार्थं दर्शयति—

" उद्वयं तमसस्परीत्याह पाप्मा वै तमः पाप्मानमेवास्मादप हन्ति " [सं० का० ५ प्र० १ अ० ८] इति । चतुर्थपादे ज्योतिःशब्दार्थं दर्शयति—

" अगन्म ज्योतिरुत्तममित्याहासौ वा आदित्यो ज्योतिरुत्तममादित्यस्यैव सायुज्यं गच्छति " [सं० का० ५ प्र० १ अ० ८] इति ।

सायुज्यं सहभावम् ।

उद्वयं तमसस्परीत्यस्या ऋचः पाठप्राप्तं चरमभावित्वं प्रशंसति—

" न संवत्सर स्तिष्ठति नास्य श्रीस्तिष्ठति यस्यैताः क्रियन्ते ज्योतिष्मतीमुत्तमामन्वाह ज्योतिरेवास्मा उपरिष्टाद्धाति सुवर्गस्य लोकस्यानुरूप्यायै " [सं० का० ५ प्र० १ अ० ८] इति ।

यस्य यजमानस्यैताः समास्त्वाऽग्न इत्याद्याः सामिधेन्यः क्रियन्ते तस्य स्वर्गाधिगत्यर्थमनुरूप्याग्निधारणहेतुः संवत्सरो वा, एतदग्निसाधनसमूहरूपा श्रीर्वा न तिष्ठति न पर्यामोति, ज्योतिर्विरहात्ताभ्यां स्वर्गो नाधिगम्यत इत्यर्थः । अथ स्वर्गाधिगतिक्षमां ज्योतिष्मतीमृचमुत्तमां ब्रूयात् । पश्यन्तो ज्योतिरित्येवं ज्योतिःशब्दस्य विद्यमानत्वादुद्वयं तमसस्परीत्येषा ज्योतिष्मती । अस्मै यजमानार्थं ज्योतिष उपरि धारणादूर्ध्वदेशवर्ती स्वर्गलोकोऽनुरूप्यो भवति । अत्र विनियोगसंग्रहः—

ऊर्ध्वाः प्रयाजयाज्याः स्युर्द्वादशाऽऽप्रीतिनामिकाः ।
हिर सुवाघारहोमो यः प्राणेति द्वयं द्वयम् ॥

(अग्न्युत्पादनाभिधानम्)

याज्यानुवाक्ये हि वपापुरोडाशहविःषु ताः ।
यश्चिद्विकल्पितो मन्त्र इति विंशतिरीरिताः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे प्रथमप्रपाठकेऽ-
ष्टमोऽनुवाकः ॥ ८ ॥

(अथ चतुर्थाष्टके प्रथमप्रपाठके नवमोऽनुवाकः ।)

आकूतिमग्निं प्रयुजꣳ स्वाहा मनो मेधा-
मग्निं प्रयुजꣳ स्वाहा चित्तं विज्ञातमग्निं प्रयु-
जꣳ स्वाहा वाचो विधृतिमग्निं प्रयुजꣳ स्वाहा
प्रजापतये मनवे स्वाहाऽग्नये वैश्वानराय स्वाहा
विश्वे देवस्य नेतुर्मर्तो वृणीत सख्यं विश्वे
राय इषुध्यसि द्युम्नं वृणीत पुष्यसे स्वाहा मा
सु भित्था मा सु रिषो दꣳहस्व वीडयस्व सु ।
अम्ब धृष्णु वीरयस्व (१) अग्निश्चेदं करि-
ष्यथः । दꣳहस्व देवि पृथिवि स्वस्तय आसुरी
माया स्वधया कृताऽसि । जुष्टं देवानामिद-
मस्तु हव्यमरिष्टा त्वमुदिहि यज्ञे अस्मिन् ।
मित्रैतामुखां तपैषा मा भेदि । एतां ते परि
ददाम्यभित्त्यै । द्रप्नः सपिरासुतिः प्रत्नो होता
वरेण्यः । सहसस्पुत्रो अद्भुतः । परस्या अधि
संवतोऽवराꣳ अभ्या (२) तर । यत्राहमस्मि
ताꣳ अव । परमस्याः परावतो रोहिदश्व
इहाऽऽ गहि । पुरीष्यः पुरुप्रियोऽग्ने त्वं तरा

(अग्न्युत्पादनाभिधानम्)

मूर्धः । सीद त्वं मातुरस्या उपस्थे विश्वान्यग्ने वयुनानि विद्वान् । मैनामर्चिषा मा तपसाऽभि शूशुचोऽन्तरस्याꣳ शुक्रज्योतिर्वि भाहि । अन्तरग्ने रुचा त्वमुखायै सदने स्वे । तस्यास्त्वꣳ हरसा तपञ्जातवेदः शिवो भव । शिवो भूत्वा मह्यमग्नेऽथो सीद शिवस्त्वम् । शिवाः कृत्वा दिशः सर्वाः स्वां योनिमिहाऽसदः (३)॥

(वीरयस्वाऽऽतपन्त्रिꣳशतिश्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके प्रथमप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ चतुर्थकाण्डे प्रथमप्रपाठके नवमोऽनुवाकः) ।

अष्टमेऽनुवाक आप्रियो याज्यानुवाक्याः प्रोक्ताः । अथ नवमेऽनुवाकेऽग्न्युत्पादनमभिधत्ते ।

कल्पः—" यत्प्राग्दीक्षाहुतीभ्यस्तत्स्त्वाऽऽकूत्यै प्रयुजेऽग्नये स्वाहेति पञ्चाऽऽध्वरिकीर्हुत्वाऽऽकूतिमग्निमिति षडाग्निकीर्विष्णे देवस्य नेतुरिति पूर्णाहुतिं सप्तमीम् " इति । पाठस्तु—

आकूतिमग्निमिति । आकूतिः सङ्कल्पोऽस्मदीयानुष्ठानविषयस्तां प्रयुजं प्रेरकमग्निमुद्दिश्य स्वाहुतमिदमस्तु । अनुष्ठेयस्मरणसाधनं यन्मनः स्मृतस्य धारणसामर्थ्यरूपा या मेधा तदुभयं प्रति प्रयुजं प्रेरकमग्निमुद्दिश्य स्वाहुतमिदमस्तु । अविज्ञातस्यानुष्ठानस्य ज्ञानसाधनं यच्चित्तं यदपि तेन चित्तेन ज्ञातु(त)मनुष्ठानं तदुभयं प्रति प्रेरकमग्निमुद्दिश्य स्वाहुतमिदमस्तु । वाचो मन्त्रपाठरूपाया विधृतिर्विधारणं तां प्रति प्रेरकमग्निमुद्दिश्य स्वाहुतमिदमस्तु । मनवे मनुष्याणां जनकाय प्रजापतये स्वाहुतमिदमस्तु । विशेषां नराणामनुग्रहीतृत्वेन वैश्वानराय वाग्नये स्वाहुतमिदमस्तु । विश्वे विश्वात्मकस्य नेतुर्जगन्निर्वाहकस्य देवस्य सख्यमनुग्रहं मर्तो मरणधर्मान्यजमानः सहसा वृणीत याचेत । तच्च सख्यमीदृशेन

स्तोत्रेण लभ्यते । विभे विश्वात्मकस्य रायो धनस्येषुध्यसीशिषे त्वं नियन्ताऽसीति स्तुत्या पुष्यसे यज्ञपोषणाय द्युम्नं धनं वृणीत याचेत । इदं हविस्तव हुतमस्तु ।

आकूतिमित्यादिभिर्वैश्वानराय स्वाहेत्यन्तैर्मन्त्रैः साध्यं होमं विधत्ते—

" षड्भिर्दीक्षयति षड्वा ऋतव ऋतुभिरेवैनं दीक्षयति " [सं० का० ५ प्र० १ अ० ९] इति । होमेन दीक्षाख्यं संस्कारं कुर्यादित्यर्थः ।

विश्वे देवस्य नेतुरिति पूर्णाहुतिं सप्तसंख्यामिति विधिमभिप्रेत्य विधेयगतां सप्तसंख्यां प्रशंसति—

" सप्तभिर्दीक्षयति सप्त छन्दाꣳसि छन्दोभिरेवैनं दीक्षयति " [सं० का० ५ प्र० १ अ० ९] इति ।

गायत्री त्रिष्टुब्जगतीत्यादिमन्त्रोक्तेषु च्छन्दःस्वष्टस्वन्ययोरुष्णिक्ककुभोरेकीकारेण च्छन्दसां सप्तत्वम् ।

विश्वे देवस्येतिमन्त्रे यदनुष्टुप्छन्दो यच्चास्य मन्त्रस्योत्तमत्वं चरमरूपत्वं तदुभयं प्रशंसति—

" विश्वे देवस्य नेतुरित्यनुष्टुभोत्तमया जुहोति वाग्वा अनुष्टुप्तस्मात्प्राणानां वागुत्तमा " [सं० का० ५ प्र० १ अ० ९] इति ।

यस्मादिहानुष्टुब्वाग्रूपा सर्वमन्त्रेष्वन्त्या च तस्माल्लोकेऽपि प्राणानां चक्षुरादीन्द्रियाणां मध्ये वागुत्कृष्टा । वाचा हि विद्वत्सभायां राजसभायां च पूज्यो भवति ।

अशेषजगद्व्यवहारसमर्थत्वेन मन्त्रौ प्रस्तौति—

" एकस्माक्षरादनाप्तं प्रथमं पदं तस्माद्यद्वाचोऽनाप्तं तन्मनुष्या उपजीवन्ति पूर्णया जुहोति पूर्ण इव हि प्रजापतिः प्रजापतेराप्त्यै न्यूनया जुहोति न्यूनाद्धि प्रजापतिः प्रजा असृजत प्रजानाꣳ सृष्ट्यै " [सं० का० ५ प्र० १ अ० ९] इति ।

यस्मादस्यामृचि प्रथमं पदं प्रथमः पाद एकेनाक्षरेण न्यूनं तस्मान्मनुष्या वाचः स्वरूपमनाप्तमसंपूर्णमुपजीवन्ति । मूलाधारादुत्पन्नो वायुर्मूर्धपर्यन्तं वसतो वक्त्रे तत्तत्स्थानेषु वर्णानुत्पादयति । तदिदं वर्णाभिव्यक्तिलक्षणं वाक्चतुर्थं पदम् । पूर्वाणि तु त्रीणि पदानि कण्ठादध एव गूढत्वान्नाभिव्यञ्जयितुं शक्यन्ते । तथा चाऽऽम्नायते—" गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति " इति । तुरीयं वैखर्याख्यवाचो रूपम् । एते-

१ स. च. स्तुत्वा । २ घ. ङ. °र्दिवैश्वा° । ३ स. च. °न्त्रेषु व्याप्ता च । ४ स. च. मन्त्रं ।

(अग्न्युत्पादनाभिधानम्)

नासंपूर्णे वाग्व्यवहारसामर्थ्यं दर्शितम्। किंचेयमृगुत्तरेषु पादेष्वक्षरसंपूर्णा। तेन सृष्टिपूर्णप्रजापतिसाम्यात्तत्प्राप्तये भवति। प्रथमपादे यदक्षरन्यूनत्वं तेन सृष्टिशून्यजगद्बीजसाम्यात्प्रजोत्पत्तये भवति। हि यस्मान्नितरामूनात्पक्षीनविकारादुपादानात्प्रजा असृजत।

कल्पः—"यत्प्राङ्मुष्टिकर्मणस्तत्कृत्वा शणकुलायेन मुञ्जकुलायेन वोखां पृष्ठाद्य मा सु भित्था इति द्वाभ्यामाहवनीये प्रवृणक्ति" इति। तत्र प्रथमामाह—

मा सु भित्थेति। हे उखे त्वं मा भित्था भिन्ना मा भव। तदिदमभिन्नत्वं सुष्ठु कर्तव्यम्। तथा मा रिषः स्फुटितेनापि हिंसिता मा भव। तदेतदस्फुटनं सुष्ठु कर्तव्यम्। सर्वात्मना द्वैधीभावो भेदः। लेशस्य पृथग्भावः स्फुटनं, तदुभयं तव मा भूदित्यर्थः। दृंहस्व भेदाभावाय दृढा भव। सुवीर्यस्व स्फुटनाभावाय स्वाङ्गानि सुष्ठु दृढी कुरु। हे भृष्णु भर्षणयुक्ते हेऽम्ब मातुसदृशि वीरयस्व वीरवदाचर। अग्निश्च त्वं च मिलित्वेदमस्मदीयं कर्म करिष्यथः। अथ द्वितीयामाह—

दृꣳहस्व देवीति। हे पृथिवि देवि, मृत्कार्यत्वात्पृथिवीरूपत्वं, मन्त्रैर्निष्पाद्यत्वादेवतात्वं, तथाविधे हे उखे स्वस्तये यजमानार्थं दृंहस्व दृढा भव। आसुरी माया शम्बरायसुरनिर्मितमायेव स्वधया कृताऽसि, कव्यप्रदानवाचिना स्वधाशब्देनान्नमात्रमुपलक्ष्यते, अन्नेन निमित्तभूतेन तच्चेतुयागसिद्ध्यर्थं त्वं निष्पादिताऽसि। आसुरी माया यद्दृश्चित्यरचनारूपं चित्रं वस्तु सहस्रा भूत्वा प्रतिभाति तद्वत्त्वमपि द्विस्तनत्वादिरचनायुक्ता निष्पन्नाऽसीत्यर्थः। त्वन्मुखान्निष्पत्स्यमानमिदं हव्यं देवानां जुष्टं प्रियमस्तु। त्वमप्यरिष्टा केनाप्यहिंसिता सत्यस्मिन्यज्ञ उदिसुदृता भव। अस्यामुखायां परितोऽङ्गारानोप्य तापनं विधत्ते—

" यदग्नेः प्रवृज्यादभूतमव रुन्धीत यदङ्गारेषु भविष्यदङ्गारेषु प्र वृणक्ति भविष्यदेवाव रुन्धे भविष्यन्ति भूयो भूतात् " [सं० का० ५ प० १ अ० ९] इति।

यदि ज्वालायामुखां पतपेत्तदानीं यदस्य गृहे भूतं पूर्वं विद्यमानं धनमस्ति तदेव स्वाधीनं भवति, न तु भविष्यत्। यदि, अङ्गारेषु पतपेत्तदानीं गृहे भवि-

---

१ क. ख. घ. ङ. °त्प्रकृतेरवि° । २ क. घ. ङ. °न वो° । ३ ख. चोखां । ४ ख. ग. स्फुटनेना° । ५ ख. च. °रानारोप्य।

ष्यदविद्यमानं धनं प्राप्नोति । हि यस्माज्जना भविष्यद्धनं भूताद्भूयोऽधिकं मन्यन्ते । न खलु कश्चिदपि भूतार्थं प्रति यतते भविष्यदर्थं तु सर्वोऽपि प्रयतते। अङ्गारेषु काष्ठैः समिन्धनेन ज्वाला भाविनी । अतोऽङ्गाराणां भाविधनहेतुत्वं युक्तम् । तस्मिन्प्रतापने मा सु मित्था इत्यादिमन्त्रद्वयं विनियुङ्क्ते—

" द्वाभ्यां प्र वृणक्ति द्विपाद्यजमानः प्रतिष्ठित्यै " [सं० का० ५ प्र० १ अ० ९] इति ।

कल्पः—" मित्रैतामुखां तपेति प्रदक्षिणमङ्गारैः परिन्धे " इति । पाठस्तु—

मित्रैतामुखामिति । हे मित्रैतामुखां तप तप्तां कुरु । एषोखा मा भेदि मा भिद्यताम् । अभित्त्यै भङ्गाभावार्थमेतामुखां ते तव हस्ते परितो दधामि ।

देवतान्तरपरित्यागेन मित्रायैवोखायाः परिदाने कारणं दर्शयति—

" ब्रह्मणा वा एषा यजुषा संभृता यदुखा सा यद्भिद्येताऽऽर्तिमार्छेद्यजमानो हन्येतास्य यज्ञो मित्रैतामुखां तपेत्याह ब्रह्म वै मित्रो ब्रह्मनेवैनां प्रतिष्ठ पयति नाऽऽर्तिमार्छति यजमानो नास्य यज्ञो हन्यते " [सं० का० ५ प्र० १ अ० ९] इति ।

येयमुखा सैषा परब्रह्मस्वरूपेण वसवस्त्वा रुद्रवन्त्वित्यादिना यजुषा संपादिता । परब्रह्मण उत्पन्नत्वाद्यजुषो ब्रह्मत्वम् । तथाविधेन यजुषोत्पन्नाया उखायाः कदाचिदपि भेदो न युक्तः । कुलालेन निर्मिताद्यजुष्काद्घटादिलक्षणत्वात् । एवं सति यदि कदाचित्प्रमादाद्भिद्येत तदानीं यजमानो म्रियेत यज्ञोऽपि विनश्येत् । मित्रायोखायाः परिदाने तु मित्रस्य परब्रह्मरूपत्वाद्ब्रह्मणयेवोखा प्रतिष्ठापिता भवति । ततो यजमानस्य यज्ञस्य च नास्ति हानिः ।

अथ भेदे सति प्रायश्चित्तं विधत्ते—

" यदि भिद्येत तैरेव कपालैः सꣳ सृजेत्तेनैव ततः प्रायश्चित्तिः " [सं० का० ५ प्र० १ अ० ९] इति ।

पक्वाया उखाया भेदे तदीयैरेव कपालैर्मृदन्तरं मिश्रयित्वा पुनरप्युखां निष्पादयेत् । सैव पुनर्निष्पादितोखा ततो भेदरूपादपराधात्प्रायश्चित्तिर्विमोचनहेतुः ।

(अग्न्युत्पादनाभिधानम्)

पूर्वं सामान्याकारेणोखायाः प्रतपनमाहवनीये विहितम्। अथ गतश्रियो विशेषं विधत्ते—

" यो गतश्रीः स्यान्मथित्वा तस्याव दध्याद्भूतो वा एष स स्वां देवतामुपैति " [सं० का० ५ प्र० १ अ० ९] इति।

योऽग्निचयने प्रवृत्तो गतश्रीः शुश्रुवान्ग्रामणी राजन्यो वा भवेत्तस्य मथितमग्निमुखायामवदध्यात्। न त्वाहवनीय उखायाः प्रवृञ्जनं कार्यम्। एष त्रयाणां गतश्रियां मध्येऽन्यतमो भूतो भूतिमानेश्वर्योपेतः। अतः प्रभुत्वात्स्वकीयामेव मथिताग्निरूपां देवतामुपेतुमर्हति न त्वाहवनीयदेवतान्तराम्।

यस्तु गतश्रीः सन्पुनर्भूतिं कामयेत तस्य मथिताग्निमपोह्य पूर्ववत्प्रवृञ्जनमपि विधत्ते—

" यो भूतिकामः स्याद्य उखायै संभवेत्स एव तस्य स्यादतो ह्येष संभवत्येष वै स्वयंभूर्नाम भवत्येव " [सं० का० ५ प्र० १ अ० ९] इति।

आहवनीये प्रतप्तायामुखायां योऽग्निः संभवेत्स एव तस्य भूतिकामस्य गतश्रियः कार्यो न तु मथितः। हि यस्मादत उखायामेष संभवति तस्मान्मथनापेक्षामन्तरेण स्वयमेवोत्पन्नत्वादेष स्वयंभूरित्युच्यते। एवं सति यजमानो भवत्येव भूतिं प्राप्नोत्येव। यजमानद्वेषिणोऽध्वर्योः प्रकारान्तरं विधत्ते—

"यं कामयेत भ्रातृव्यमस्मै जनयेयमित्यन्यस्तस्याऽऽहृत्याव दध्यात्साक्षादेवास्मै भ्रातृव्यं जनयति " [सं० का० ५ प्र० १ अ० ९] इति।

यमुद्दिश्य शत्रुमस्मै जनयेयमिति कामयेताध्वर्युस्तस्यान्यतो गृहान्तरादिप्रदेशादग्निमानीयोखायां प्रक्षिपेत्। तथा सति विलम्बमन्तरेणैव भ्रातृव्यं जनयति। अथ कामनाविशेषेणान्यमग्निं विधत्ते—

" अम्बरीषादन्नकामस्याव दध्यादम्बरीषे वा अन्नं श्रियते सयोन्येवान्नमव रुन्धे " [सं० का० ५ प्र० १ अ० ९] इति।

घृतादिना शाकादिभर्जनार्थं यल्लोकिकं लोहादिपात्रं तदम्बरीषं तस्मिन्प्रतप्ते घृतप्रक्षेपेण प्रौढा ज्वालोत्पद्यते। ततोऽग्निमाहृत्योखायामवदध्यात्। लोके हि तस्मिन्नम्बरीषे शाकादिकमन्नं धार्यते। अतः काम्यमानेनान्नेनैतस्याग्नेः समानयोनित्वाद्यजमानोऽन्नं प्राप्नोत्येव।

---

१ घ. ङ. 'पोह्य पूर्वं'।

तदेवं प्रयुज्यनगसङ्गतान्विधीन्परिसमाप्य प्रकृतप्रयुज्यनोपयुक्तं द्रव्यं विधत्ते—

" मुञ्जानेव दधात्यूर्वै मुञ्जा ऊर्जमेवास्मा अपि दधाति " [सं० का० ५ प्र० १ अ० ९] इति ।

शुष्कान्मुञ्जारूप्यांस्तृणविशेषानुखायां प्रक्षिपेत् । महिष्यादिभिर्भक्ष्यत्वान्मुञ्जा ऊर्मूपाः । अन्नमेव यजमानाय संपादयतीति ।

कल्पः—" द्रुवघ्नः सर्पिरासुतिरिति तस्यां करुमुकमुल्लिखितं घृतेनाङ्क्त्वाऽवदधाति मुञ्जांश्च " इति । पाठस्तु—

द्रुवघ्नः सर्पिरिति । अत्रोत्पत्स्यमानोऽग्निरेतैर्विशेषणैः प्रशस्यते । द्रुशब्देन वृक्षा उच्यन्ते । " द्रुषदमित्याह । वनस्पतयो वै द्रु । वनस्पतीनामेवैतेन सूयते " इति श्रुत्यन्तरात् । द्रुशब्दाभिधेया वृक्षा अन्नं यस्यासौ द्रुवघ्नः । सर्पिरेवाऽऽहारत्वेन सूयते प्रक्षिप्यतेऽस्मिन्निति सर्पिरासुतिः। पत्नः पुरातनः। होता देवानामाह्वाता । वरेण्यो वरणीयः । सहसो बलस्य पुत्रैः । मथनहेतुना बलेनोत्पद्यमानत्वात् । अद्भुत आश्चर्यरूपः ।

अनेन मन्त्रेण साध्यं कुमुकावधानं विधत्ते—

"अग्निर्देवेभ्यो निलायत स कुमुकं प्राविशत्करुमुकमव दधाति यदेवास्य तत्र न्यक्तं तदेवाव रुन्धे " [सं० का० ५ प्र० १ अ० ९] इति ।

कुमुकमल्पं काष्ठशकलम्। न्यक्तं विलीनमग्निरूपम् । तत्र तस्मिन्नेव शकलेऽस्याग्नेर्यदेव रूपं न्यक्तं विलीनं तत्प्राप्नोति । चूर्णरूपं कुमुकमिति सूत्रकारेणोक्तम् । अस्य कुमुकस्य घृताक्तत्वं विधत्ते—

" आज्येन सं यौत्येतद्वा अग्नेः प्रियं धाम यदाज्यं प्रियेणैवैनं धाम्ना समर्धयत्यथो तेजसा " (सं० का० ५ प्र० १ अ० ९] इति ।

संयौति तत्कुमुकं संमिश्रयेत् । आज्यस्याग्निस्थानत्वम् " आ प्यायतां घृतयोनिरग्निः " इत्यादिमन्त्रवर्णाद्घृतेन ज्वालोत्पत्तेश्चावगन्तव्यम् । ज्वालोत्पत्तिरेवात्राथो तेजसा समर्धयतीत्युच्यते ।

कल्पः—" परस्या अधि संवत इति वैकङ्कतीं समिधमादधाति " इति ।

पाठस्तु—

---

१ क. घ. ङ. °सङ्गत° । २ स. च. °हिषादिभक्ष्य° । ३ ख. च. °ते प्रेर्यते° । ४ ख. च. °त्रः । धन° ।

(अग्न्युत्पादनाभिधानम्)

परस्या अधीति । सम्यग्वनुते देवान्भजते यस्यां क्रियायां सा क्रिया संवत् । परस्याः संवतोऽभ्युत्कृष्टाया इष्टेरधिष्ठानं त्वमवरान्निकृष्टानप्यस्मानभ्यावराऽभिमुख्येनाऽऽगत्य दुःखात्तारय । यत्र येषु बन्धुष्वमहास्मि तानपि बन्धून्मव रक्ष । अनेन मन्त्रेण साध्यं समिदाधानं विधत्ते——

" वैकङ्कतीमा दधाति भा एवाव रुन्धे" [सं०का०५ प्र०१अ०९] इति ।

आग्नेयी दीप्तिर्विकङ्कतवृक्ष एवावतिष्ठते । अत एवाऽऽधानब्राह्मणे स्तूयते—" अग्नेः तृष्टस्य यतः । विकङ्कतं मा आच्छत् " इति । अतो वैकङ्कतसमिधा दीप्तिः प्राप्यते ।

कल्पः—" परमस्याः परावत इति शमीमयीम् " इति । पाठस्तु——

परमस्या इति । परावच्छब्दो दूरदेशवाची । हेऽग्ने परमस्याः परावतोऽत्यन्तदूरदेशादिहास्मिकर्मणि त्वमागहि आगच्छ । कीदृशस्त्वं, रोहिदश्वो लोहितवर्णोऽश्वो यस्यासौ रोहिदश्वः । अत एवान्यत्राप्याम्नायते—" रोहितेन त्वाऽग्निर्देवतां गमयतु " इति। पुरीषमुखाहेतुभूतं पांसुमर्हतीति पुरीष्यः । पुरूणां यजमानानां प्रियः पुरुप्रियः । तादृशस्त्वं मृधः शत्रूंस्तरातिलङ्घय ।

अनेन मन्त्रेण साध्यं समिदाधानं विधत्ते——

" शमीमयीमा दधाति शान्त्यै " [सं० का० ५प्र० १अ० ९] इति ।

शमीवृक्षस्याग्निदाहशमनहेतुत्वात्तदीयया समिधा शान्तिर्भवति । अत एवाऽऽधानब्राह्मणे पठ्येते——" प्रजापतिराग्नेमसृजत । सोऽबिभेत्स मा भक्षयतीति । तꣳ शम्याऽशमयत् । तच्छम्यै शमित्वम् " इति ।

कल्पः——" सीद त्वं मातुरस्या उपस्थ इति तिसृभिर्जातमुख्यमुपतिष्ठते " इति । तत्र प्रथमामाह——

सीद त्वं मातुरिति । हेऽग्ने त्वं मातृसमानाया अस्या उखाया उपस्थ उत्सङ्गे[1] सीदोपविश । कीदृशस्त्वं, विश्वानि वयुनानि सर्वाज्ञानोपायान्विद्वानेनामुखामर्चिषा स्वदीयदीप्त्या मा शूशुचोऽत्यन्तं मा दीपय । तपसा संतापेनाभि मा शूशुचः । अर्चिः कारणं तपः कार्यं, कारणेनैवत्तापो भवति, कार्येण तु भूयान् । तदुभयं मा कुर्वित्यर्थः । अस्यामुखायामन्तः शुक्रज्योतिर्निर्मलप्रकाशः सन्विभाहि विशेषेण दीप्यस्व । अथ द्वितीयामाह——

---

१ ख. च. शूयते ।

(अग्न्युत्पादनाभिधानम्)

अन्तरग्ने रुचेति। हेऽग्ने उखायै तस्या उखाया अन्तर्मध्ये स्वे सदने स्वकीये स्थाने रुचा दीप्त्या युज्यस्वेति शेषः। हे जातवेदस्त्वं तस्या उखायाः शिवो भव सुखप्रदो भव। किं कुर्वन्। हरसा तेजसा तपञ्ज्वलन्। अथ तृतीयामाह--

शिवो भूत्वेति। हेऽग्ने मह्यं मदर्थं शिवः शान्तो भूत्वाऽथो अनन्तरं त्वं शिवः सन्सीद सर्वान्प्रति शान्तः सन्नुपविश। सर्वा दिशः शिवाः शान्ताः कृत्वेहास्यामुखायां स्वां योनिं स्वकीयं स्थानमासद आगत्योपविश।

एतान्मन्त्रान्विनियुङ्क्ते--

" सीद त्वं मातुरस्या उपस्थ इति तिसृभिर्जातमुप तिष्ठते त्रय इमे लोका एष्वेव लोकेष्वविदं गच्छत्यथो प्राणानेवाऽऽत्मन्धत्ते " [सं० का० ५ प्र० १ अ० ९] इति।

आविदं रूपाणि। किंच प्राणापानव्यानानां त्रित्वात्तानपि त्रिसंख्यया स्वात्मनि स्थापयति। अत्र विनियोगसंग्रहः--

आकूतिं सप्तभिर्दीक्षाहुतिर्मा स्विति च द्वयात्।
पूर्वाग्नौ प्रवृणक्त्योखां मित्राङ्गारैः समिध्यते॥
द्व्यन्नः कृमुकमाधत्ते परं वैकङ्कतीं परम्।
शमीमयीं सीद जातं तिसृभिश्चोपतिष्ठते॥
नवमे त्वनुवाकेऽस्मिन्मन्त्राः षोडश वार्णिताः॥

अत्र मीमांसा।

दशमाध्यायस्य तृतीयपादे चिन्तितम्--

षड्भिर्दीक्षयतीत्यग्निगतं प्राकृतबाधकम्।
समुच्चितं वा बाधः स्यात्कार्यैक्यात्पाठवाक्यतः॥
अग्नौ होमाङ्गता कल्प्तेरतिदिष्टेन तुल्यता।
विनाऽऽवृत्तिं द्वादशत्वसिद्धये स्यात्समुच्चयः॥

अग्निचयने दीक्षाहुतयः श्रूयन्ते--" षड्भिर्दीक्षयति " इति। प्रकृतावपि-- " स्रुवेण चतस्रो जुहोति दीक्षितत्वाय" इत्यादिना दीक्षाहुतयः षड् विहिताः।

---

१ स. च. °प्त्या दीप्यस्वे°। २ स. च. त्रित्वसं°। ३ घ. ङ. °क्यगम्। अ°।

(अग्निधारणाभिधानम्)

तत्र मन्त्रा भिन्नाः—" आकूत्यै प्रयुजेऽग्नये स्वाहा " इत्यादयः प्राकृता मन्त्राः, " आकूतिमग्निं प्रयुजꣳ स्वाहा " इत्यादयो वैकृताः । तत्र वैकृतमाहुतिमन्त्रषट्कं प्राकृतस्य बाधकं किंवा प्राकृतेन समुच्चितमिति संशये बाधकमिति तावत्प्राप्तम् । कुतः । कार्यैक्यात् । दक्षिणीयाङ्गभूताहुत्युपकारलक्षणं यत्कार्यं प्राकृतानां मन्त्राणां तदेव वैकृतानामपि । न च विकृतौ तन्न प्रतीयत इति शङ्क्यम् । स्वाहान्तपाठरूपेण लिङ्गेन मन्त्राणामाहुत्युपकारकत्वप्रतीतेः । आहुतीनां च षड्भिर्दीक्षयतीति वाक्येन दक्षिणीयाङ्गत्वप्रतीतेः । तस्माच्छ्रूयमाणैर्मन्त्रैरतिदिष्टानां बाध इति पूर्वः पक्षः । अग्नौ मन्त्राणां स्वरूपं यद्यपि श्रुतिसिद्धं तथाऽपि होमाङ्गत्वं लिङ्गेन कल्पनीयम् । तथा चातिदेशकैः कल्प्यैर्मन्त्रैस्तुल्यबलत्वान्न बाध्यबाधकता । एवमपि न समुच्चये प्रमाणमस्तीति चेत् । अस्त्येव । द्वादश जुहोतीति संख्याविधानेन तृप्तिसिद्धेः । न च वैकृतानामेव षण्णामावृत्त्या संख्या सिध्यतीति वाच्यम् । आवृत्तेरश्रुतत्वात् । न च सा कल्पयितुं शक्यतेऽन्यथाऽपि संख्योपपत्तेः । तस्मात्समुच्चय इति सिद्धान्तः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे प्रथमप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ चतुर्थकाण्डे प्रथमप्रपाठके दशमोऽनुवाकः) ।

यदग्ने यानि कानि चाऽऽ ते दारूणि दध्मसि । तदस्तु तुभ्यमिद्घृतं तज्जुषस्व यविष्ठ्य । यदत्त्यपजिह्विका यद्वम्रो अतिसर्पति । सर्वं तदस्तु ते घृतं तज्जुषस्व यविष्ठ्य । रात्रिꣳरात्रिमप्रयावं भरन्तोऽश्वायेव तिष्ठते घासमस्मै । रायस्पोषेण समिषा मदन्तोऽग्ने मा ते प्रतिवेषा रिषाम । नाभा (१) पृथिव्याः समि-

---

१ ख. ग. °दादुपदिश्यमानमं । २ ङ. ग. घ. च °त्यौ ।

धानमग्निꣳ रायस्पोषाय बृहते हवामहे। इरं-
मदं बृहदुक्थं यजत्रं जेतारमग्निं पृतनासु
सासहिम्। याः सेना अभीत्वरीराभ्याधिनी-
रुगणा उत। ये स्तेना ये च तस्करास्ताꣳस्ते
अग्नेऽपि दधाम्यास्ये। दꣳष्ट्राभ्यां मलिम्लु-
रजम्भ्यैस्तस्करा꣣ उत। हनूभ्याꣳ स्तेनान्भग-
वस्ताꣳस्त्वं खाद सुखादितान्। ये जनेषु मलि-
म्लवः स्तेनासस्तस्करा वने। ये (२) कक्षेष्व-
घायवस्ताꣳस्ते दधामि जम्भयोः। यो अस्म-
भ्यमरातीयाद्यश्च नो द्वेषते जनः। निर्ह्यायो
अस्मान्दिप्साच्च सर्वं तं भस्मसा कुरु। सꣳ-
शितं मे ब्रह्म सꣳशितं वीर्यं बलम्। सꣳशितं
क्षत्रं जिष्णु यस्याहमस्मि पुरोहितः। उदेषां
बाहू अतिरमुद्वर्च उदु बलम्। क्षिणोमि ब्रह्म-
णाऽमित्रानुन्नयामि(३) स्वाꣳ अहम्। दृशानो
रुक्म उर्व्या व्यद्यौद्दुर्मर्षमायुः श्रिये रुचानः।
अग्निरमृतो अभवद्वयोभिर्यदेनं द्यौरजनयत्सु-
रेताः। विश्वा रूपाणि प्रति मुञ्चते कविः
प्रासावीद्भद्रं द्विपदे चतुष्पदे। वि नाकमख्य-
त्सविता वरेण्योऽनु प्रयाणमुषसो वि राजति।
नक्तोषासा समनसा निरूपे धापयेते शिशुमे-
कꣳ समीची। । द्यावा क्षामा रुक्मः (४)
अन्तर्वि भाति देवा अग्निं धारयन्द्रविणोदाः।

(अग्निधारणाभिधानम्)

सुपर्णोऽसि गरुत्मान्त्रिवृत्ते शिरो गायत्रं चक्षुः स्तोम आत्मा साम ते तनूर्वामदेव्यं बृहद्रथन्तरे पक्षौ यज्ञायज्ञियं पुच्छं छन्दाꣳस्यङ्गानि धिष्ण्याः शफा यजूꣳषि नाम। सुपर्णोऽसि गरुत्मान्दिवं गच्छ सुवः पत (५)॥

(नामा वने ये नयामि क्षामां रुक्मोऽष्टाविꣳशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके प्रथमप्रपाठके दशमोऽनुवाकः॥ १० ॥

(अथ चतुर्थकाण्डे प्रथमप्रपाठके दशमोऽनुवाकः)।

नवमेऽनुवाकेऽग्न्युत्पादनमुक्तम्। अथ दशमेऽग्निधारणमुच्यते।

कल्पः—" यद्ग्ने यानि कानि चेति पञ्चभिरौदुम्बरमपरशुवृक्णमुख्य इध्ममभ्यादधाति " इति। तत्र प्रथमामाह—

यदग्ने यानि कानीति। हेऽग्ने ते त्वदर्थं यानि कानि च दारूणि, दारुशब्देन कुठारच्छेदरहितमविदारितं काष्ठमुच्यते। तादृशानि यानि कान्यप्यरण्ये पतितानि काष्ठान्यानीय दध्मसि धारयाम इति यत्तत्सर्वं तुभ्यं त्वदर्थं घृतमिद्घृतमेव घृतवत्तिषयमस्तु। हे यविष्ठ्य युवतम तद्दारुजां जुषस्व। अथ द्वितीयामाह—

यदक्न्युपजिह्विकेति। जिह्वाः प्रधानज्वालाः। तत्समीपवर्तिनी क्षुद्रज्वालोपजिह्विका। अस्माभिररण्यादानीतेषु दारुषु मध्ये यद्दारु महारण्ये दावाग्नेरुपजिह्विका स्वल्पज्वालाऽस्ति भक्षयतीषद्दहतीत्यर्थः। वनशब्दः पिपीलिकासदृशं क्षुद्रजीवमाचष्टे। स च यत्काष्ठमतिसर्पति अतिशयेन सर्पति प्राप्नोति। काष्ठावयवेषु तत्र तत्र सारं भक्षयतीत्यर्थः। तत्सर्वमित्यादि पूर्ववत्। अथ तृतीयामाह—

रात्रिꣳरात्रिमिति। हेऽग्ने ते तव प्रतिवेशाः प्रत्यासन्ना वयं मा रिषाम हिंसां न प्राप्नुमः। किं कुर्वन्तः। रायस्पोषेण धनपुष्ट्या धनपोषेणेषाऽन्नेन च सम्यङ्मदन्तः। तथा रात्रिं रात्रिमहरहः प्रतिदिनं पृथग्भावमकृत्वा। एकमपि

---

१ ख. च. °तमिव।

दिनमवर्जयित्वेत्यर्थः । अस्मा अग्नये घासं समिद्रूपं भक्ष्यं भरन्तः संपादयन्तः । तत्र दृष्टान्तः—तिष्ठतेऽश्वायेव वाजिशालायां बद्ध्वा स्थापिताय प्रौढायाश्वायैकमपि दिनमवर्जयित्वा यथा घासं प्रयच्छन्ति तद्वत् । अथ चतुर्थीमाह—

नाभा पृथिव्या इति । बृहते प्रौढाय रायस्पोषायाग्निमिमं वयं हवामह आह्वयामः । कीदृशमग्निं, पृथिव्या नाभा समिधानमुखाया मध्ये सम्यग्दीप्यमानम् । इरया समिद्रूपेणान्नेन माद्यतीतीरंमदस्तम् । बृहन्ति प्रौढान्युक्थानि प्रशंसनानि यस्यासौ बृहदुक्थस्तम् । यजत्रं यागहेतुं, जेतारं राक्षसादिविषये जयशीलं, पृतनास्वग्निं संग्रामेष्वग्रे गच्छन्तं, सासहिमस्मदपराधानामतिशयेन सोढारम् । अथ पञ्चमीमाह—

याः सेना इति । याः काश्चित्परकीयाः सेना अभीत्वरीरस्मदाभिमुख्येन गमनशीला आव्याधिनीः सर्वतोऽस्मान्पीडयन्त्य उगणा उत्कृष्टगणोपेता बहुस्तोमा इत्यर्थः । एवंविधा याः सेनाः सन्ति, उतापि च ये स्तेना गुप्तचोरा ये च तस्कराः प्रकटचोरास्तान्सर्वांस्तवाऽऽस्ये मुखेऽपिदधामि प्रक्षिपामि ।

एतान्मन्त्रान्विनियुङ्क्ते———

" न ह स्म वै पुराऽग्निरपरशुवृक्णं दहति तदस्मै प्रयोग एवर्षिरस्वदयद्यदग्ने यानि कानि चेति समिधमा दधात्यपरशुवृक्णमेवास्मै स्वदयति " [सं० का० ५ प्र० १ अ० १०] इति ।

पूर्वैत-मन्त्रप्रयोगात्पूर्वं कदाचिदप्यग्निरपरशुवृक्णं परशुच्छेदरहितं काष्ठं न ह स्म वै दहति सर्वथा न दहति । अविदारितं काष्ठमग्नौ प्रक्षिप्तमपि न भस्मी भवति, किंतु ज्वालया क्वचित्कृष्णं भवतीत्यर्थः । एवं सति प्रयोगः प्रयुज्यमान ऋषिरेव यदग्ने यानीति मन्त्र एवास्मा अग्नये तत्काष्ठमविदारितमस्वदयत्स्वादूकृतवान् । एतदर्थमेव यदारु तद्घृतमस्तिवति मन्त्रे पठ्यते । तस्माद्यदग्न इत्यादिमन्त्रैः समिधमादध्यात्तेनास्मा अग्नये परशुच्छेदरहितं काष्ठं स्वदयत्येव ।

एतदेवं प्रशंसति—

" सर्वमस्मै स्वदते य एवं वेद " [सं०का० ५ प्र० १ अ० १०] इति ।

तत्काष्ठमपरशुवृक्णमभ्याधेयं तस्य जातिविशेषं विधत्ते—

---

१ ङ. घ. ङ. च. 'दयन्ति' ।

(अग्निधारणाभिधानम्)

"औदुम्बरीमा दधात्यूर्वा उदुम्बर ऊर्जमेवास्मा अपि दधाति" [सं० का० ५ प्र० १ अ० १०] इति।

यदग्न इत्यादिमन्त्रसंघरूपं सूक्तं प्रशंसति—

"प्रजापतिरग्निमसृजत तꣳ सृष्टꣳ रक्षाꣳस्यजिघाꣳसन्त्स एतद्रक्षोघ्नमपश्यत्तेन वै स रक्षाꣳस्यपाहत यद्रक्षोघ्नं भवत्यग्नेरेव तेन जातद्रक्षाꣳस्यप हन्ति" [सं० का० ५ प्र० १ अ० १०] इति।

रक्षोघ्नोऽयमग्निस्तत्सूक्तं राक्षोघ्नं यदग्ने यानि कानि चेत्यारभ्याग्निनानुन्नयापि स्वाꣳ अहमित्येतदन्तम्। अनेन सूक्तेन रक्षांसि प्रजापतिर्हतवान्। तस्मादस्याप्येनेन सूक्तेन तथैव भवितव्यम्। तेन सूक्तेनोत्पन्नादग्नेः सकाशाद्रक्षांसि विनाशयति।

कल्पः—"दꣳष्ट्राभ्यां मलिम्लूनित्याश्वत्थीं समिधमादधाति" इति। पाठस्तु—

दꣳष्ट्राभ्यामिति। गुप्ताः प्रकटाश्चेति द्विविधाश्चोराः। प्रकटा अपि द्विविधाः, अरण्येषु मार्गमध्येऽपहृत्य प्रत्यक्षमेव पलायमानाः प्रकटाः। ततोऽप्यतिप्रकटा निर्भया ग्रामेष्वेवाऽऽगत्य बन्दिकराः। त एतेऽत्र मलिम्लव इत्युच्यन्ते। मलं पापाधिक्यमेषामस्तीति मलिनाः। तथाविधा भूत्वा म्लोचयन्ति चौर्यं कुर्वन्तीति मलिम्लवस्तान्। दन्तपङ्क्तिमध्ये याभ्यां तीक्ष्णदन्ताभ्यां क्रमुकादिकं भक्ष्यते ते दꣳष्ट्रे। ततः पुरोवर्तिनो बहिर्दृश्यमाना दन्ता जम्भ्याः। अन्तर्लीने तु हनू। तत्र मलिम्लून्दꣳष्ट्राभ्यां पीडयित्वा जम्भ्यैस्तस्करानपि पीडयित्वा हनूभ्यां स्तेनान्पीडयित्वा हे भगवः पूजनीयाग्ने तान्सर्वान्सुखादितान्पुनर्जीवनरहितान्यथा भवन्ति तथा त्वं खाद भक्षय। एतन्मन्त्रसाध्यं समिदाधानं विधत्ते—

"आश्वत्थीमा दधात्यश्वत्थो वै वनस्पतीनाꣳ सपत्नसाहो विजित्यै" [सं० का० ५ प्र० १ अ० १०] इति।

सपत्नान्सहतेऽभिभवतीति सपत्नसाहः। अश्वरूपधारिणोऽग्नेरस्मिन्वृक्षेऽवस्थितत्वादश्वत्थस्य सपत्नसाहत्वम्। तत्रावस्थानमाधानब्राह्मणे श्रूयते—"अग्निर्देवेभ्यो निलायत। अश्वो रूपं कृत्वा। सोऽश्वत्थे संवत्सरमतिष्ठत्। तदश्वत्थस्याश्वत्थत्वम्" इति। अतस्तदीया समिद्विजयाय संपद्यते।

---

१ ख. च. बन्दीकाराः।

कल्पः--" ये जनेषु मलिम्लव इति वैकङ्कतीम् " इति। आदधातीति शेषः। पाठस्तु--

ये जनेष्विति। ग्रामवर्तिषु जनेषु वनेषु गच्छत्सु च ये त्रिविधाः पूर्वोक्ताश्चोराः सन्ति, ये चान्ये व्याघ्रादयः कक्षेषु स्थित्वाऽघायवो भवन्ति, अघं पापं हिंसनमिच्छन्तीत्यघायवः, तान्सर्वांस्तव जम्भयोर्दधामि।

एतन्मन्त्रसाध्यं समिदाधानं विधत्ते--

" वैकङ्कतीमा दधाति मा एवाव रुन्धे " [सं० का० ५ प्र० १ अ० १०] इति।

कल्पः--"यो अस्मभ्यमरातीयादिति शमीमयीम् " इति। पाठस्तु--

यो अस्मभ्यमिति। पूर्वं चोरभेदा दर्शिताः। इदानीं शत्रुभेदा उच्यन्ते। ते च त्रिविधा अरातयो द्वेषिणो निन्दकाश्चेति। तत्र दातव्यत्वेन प्राप्तं धनं यो न ददाति सोऽयमरातिः। कार्यविघातं यः करोति स द्वेषी। वाग्दौर्जन्यमात्रं यः करोति स निन्दकः। हन्तुकामश्चतुर्थः। तत्र योऽस्मभ्यमस्माकमरातीयादरातित्वमिच्छति, यो यजमानानस्मान्द्वेषते कार्यनाशेन बाधते, योऽप्यन्योऽस्मान्निन्दान्निन्दति, यश्चापरोऽस्मान्दिप्साद्दम्भितुं हिंसितुमिच्छति, तं सर्वं जनं मस्मसा कुरु। चूर्णजन्यशब्दस्यानुकरणं मस्मसेति, चूर्णी कुर्वित्यर्थः।

एतन्मन्त्रसाध्यं समिदाधानं विधत्ते--

" शमीमयीमा दधाति शान्त्यै" [सं० का० ५ प्र० १ अ० १०] इति।

कल्पः--"सꣳ शितं मे ब्रह्मोदेषां बाहू अतिरमित्युत्तमे यजमानं वाचयंस्तूष्णीमौदुम्बर्यौ समिधावादधाति " इति। तत्र प्रथमामाह--

सꣳ शितं मे ब्रह्मेति। मे मदीयं ब्रह्म ब्राह्मण्यं संशितं सम्यक्तीक्ष्णीकृतं शास्त्रीयमार्गवर्ति कृतमित्यर्थः। तथा वीर्यमिन्द्रियशक्तिः। बलं शरीरेजशक्तिः। तदुभयं संशितं सम्यक्स्वकार्यक्षमं, तथा यस्य क्षत्रस्य राज्ञोऽहं पुरोहितोऽस्मि मे मदीयं तत्क्षत्रं जिष्णु जयशीलं यथा भवति तथा संशितम्। अस्त्विति शेषः। अथ द्वितीयामाह--

उदेषां बाहू इति। एषां स्वकीयानां राजब्राह्मणादीनां मध्य एकैकस्य बाहू उदतिरमुत्कर्षेण वर्धितवानस्मि। लौकिकोक्तिरियम्। लोके हि योऽन्य-

---

१ ख. °रश° ।

(अग्निधारणाभिधानम्)

स्मादुत्कृष्टो भवति तं जना एवमाहुः—स्वकीयहस्तमुपरितनं कृतवानिति। वर्चः कान्तिः। तामप्युदतिरम्। बलं शारीरं तदप्युदतिरम्। ब्रह्मणा मन्त्रसामर्थ्येनामित्राऽऽशून्क्षिणोमि क्षीणान्करोमि। स्वान्स्वकीयान्पुरुषानहमुन्नयाम्युत्कर्षं प्रापयामि।

एतन्मन्त्रसाध्यं यजमानवाचनं विधत्ते—

" सꣳ शितं मे ब्रह्मोदेषां बाहू अतिरमित्युत्तमे औदुम्बरी वाचयति ब्रह्मणैव क्षत्रꣳ सꣳशयति क्षत्रेण ब्रह्म तस्माद्ब्राह्मणो राजन्यवानत्यन्यं ब्राह्मणं तस्माद्राजन्यो ब्राह्मणवानत्यन्यꣳ राजन्यम् " [सं० का० ५ प्र० १ अ० १०] इति।

उत्तमे राक्षोघ्नसूक्तस्यान्तिमे ऋचौ यजमानं वाचयेत्। औदुम्बर्यौ द्वे समिधौ तूष्णीमादध्यादिति शेषः। प्रथममन्त्रे ब्रह्मक्षत्रयोः संशितत्वं यदुक्तं तत्र परस्परोपकारो विज्ञायते। ब्राह्मणेनैव पुरोहितेन राजा धर्मे तीक्ष्णीकृतो भवति। राज्ञा नियामकेन ब्राह्मणोऽपि संशितः स्वाचारे नियमितो भवति। यस्मादेवं तस्माद्राजन्येन स्वामिना युक्तो ब्राह्मणः स्वामिरहितं ब्राह्मणमत्येति। राजाऽपि धर्मबोधकेन पुरोहितेन ब्राह्मणेन युक्तस्तद्रहितमधार्मिकं राजन्यं राजानमत्येति।

कल्पः—" एकविंशतिर्निर्बाधो रुक्मः सूत्रोतस्तं दृशानो रुक्म इति समासिनो यजमानोऽन्तार्निर्बाधं प्रतिमुच्य बहिर्निर्बाधान्कुरुते " इति। पाठस्तु—

दृशानो रुक्म इति। दृशानो दर्शनीयरूपो रुक्मः सुवर्णनिर्मितः फलकाकार आभरणविशेष उर्व्या महत्या दीप्त्या व्यद्यौद्द्योतते स्म। किं कुर्वन्। दुर्मर्षमतिरस्कार्यमायुर्जीवनं श्रिये श्रयितुं रुचानो वाञ्छन्। तथाविधोऽग्निर्वयोभिरन्नैर्हविर्भिरमृतोऽभवत्। यद्यस्मादेनमग्निं द्यौर्द्युलोकवासिदेवगणः सुरेताः सन्नजनयत्तस्मादमृतत्वं युक्तम्। अत्र रुक्मस्याग्निधारणाङ्गत्वादग्नित्वमुपचरितम्। अनेन मन्त्रेण साध्यं रुक्मप्रतिमोकं विधत्ते—

" मृत्युर्वा एष यदग्निरमृतꣳ हिरण्यꣳ रुक्मस्तन्तरं प्रति मुञ्चतेऽमृतमेव मृत्योरन्तर्धत्ते " [सं० का० ५ प्र० १ अ० १०] इति।

अग्नेर्दाहेन विनाशकत्वान्मृत्युत्वं, हिरण्यस्याग्निसंपर्केऽपि अस्मीभावादर्शनाद-

---

१ घ. ङ. 'धो यो रु'।

मृतत्वम् । एवं सति धारयिष्यमाणस्याग्नेः स्वकीयस्योरसश्चान्तरं मध्यवर्ती यथा भवति तथा रुक्मं दीर्घसूत्रेण प्रोतं गले प्रतिमुञ्चेत् । तेन प्रतिमुक्तेन दाहकादग्निरूपान्मृत्योरमृतं रुक्मं व्यवधानरूपं कृतवान्भवति ।

तस्य रुक्मस्य बिन्दसदृशानाकारविशेषान्विधत्ते—

" एकविंशतिर्निर्बाधो भवत्येकविंशतिर्वै देवलोका द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविंश एतावन्तो वै देवलोकास्तेभ्य एव भ्रातृव्यमन्तरेति " [सं० का० ५ प्र० १ अ० १०] इति ।

सुवर्णफलके निम्नोन्नतभावमापद्य स्पर्शकारिणं पुरुषं निःशेषेण बाधन्त इति निर्बाधाः स्फोटसदृशा अवयवविशेषाः । ते चैकविंशतिसंख्याका यस्मिन्रुक्मे सोऽयमेकविंशतिनिर्बाधः । तादृशं रुक्मं कुर्यात् । लोक्यन्ते भुज्यन्ते यैर्देशकालादिसाधनविशेषैस्ते लोकाः । मासादयश्च देवानां भोगसाधनानीति त एव लोका इत्युच्यन्ते । अतो निर्बाधगतयैकविंशतिसंख्यया मासादिकेभ्य आदित्यान्तेभ्य एकविंशतिलोकेभ्यो भ्रातृव्यमन्तारितं करोति ।

विहितान्निर्बाधान्प्रशंसति—

" निर्बाधैर्वै देवा असुरान्निर्बाधेऽकुर्वत तन्निर्बाधानां निर्बाधत्वं निर्बाधी भवति भ्रातृव्यानेव निर्बाधे कुरुते" [सं० का० ५ प्र० १ अ० १०] इति ।

चर्मखड्गधारिणो देवाश्चर्मणो बहिर्भागे खचितैः कांस्यादिमयैः पीठस्फोटाकारैर्निर्बाधैः स्वग्रहणार्थमागतानसुरानास्फाल्य भूमिपतनादिरूपे निर्बाधे स्थितानकुर्वत । यस्मान्निश्चितबाधा एते तस्मान्निर्बाधाः । अतोऽत्र रुक्मस्य निर्बाधित्वेन भ्रातृव्यान्सर्वान्निश्चितबाधे पतितान्कुरुते ।

कल्पः—" विश्वा रूपाणीति शिक्यपाशं प्रतिमुञ्चते " इति । पाठस्तु—

विश्वा रूपाणि प्रतीति । कविर्विद्वान्वरेण्यः श्रेष्ठः सविता विश्वा रूपाणि समस्तानि जगद्रूपाणि प्रतिमुञ्चते स्वस्मिन्स्वी करोति । प्रकाशयतीत्यर्थः । द्विपदे चतुष्पदे मनुष्याणां पशूनां च भद्रं स्वस्वव्यवहारप्रकाशनरूपं श्रेयः प्रासावीत्संपादितवान् । नाकं स्वर्गं विशेषेणाख्यत्प्रकाशितवान् । उषसः प्रयाणमनूषःकालेऽतीते सति विराजति विशेषेण प्रकाशते ।

---

१ क. घ. ङ °कालसा° । २ख. स्वर्मह° । ३ख. च. निश्चितबाधेऽवस्थि° । ४ ख. °र्बाधत्वे° ।

(अग्निधारणाभिधानम्)

अनेन मन्त्रेण साध्यं शिक्यपाशप्रतिमोकं विधत्ते—

" सावित्र्या प्रति मुञ्चते प्रसूत्यै " [सं० का० ५ प्र० १ अ० १०] इति । सविता वरेण्य इति मन्त्रलिङ्गादियं सावित्री सम्यक्प्रेरणाय संपद्यते ।

कल्पः—" नक्तोषासेति कृष्णाजिनमुत्तरम् " इति । प्रतिमुञ्चत इत्यनुवर्तते । पाठस्तु—

नक्तोषासेति । नक्तं चोषाश्च नक्तोषासा रात्रिदिवसावित्यर्थः । समनसा परस्परमेकमतियुक्ते, विरूपे रात्रिः कृष्णा दिवसस्तु शुक्ल इत्येवं विलक्षणरूपे, समीची समीच्यावनुकूले सत्यौ, एकं शिशुमग्निं धापयेते यजमानकर्तृकमग्निधारणं संपादयतः । द्यावा द्युलोके क्षामा क्षितौ भूलोकेऽन्तस्तदुभयमध्यवर्तिन्यन्तरिक्षे रुक्मो विभाति । अयमग्निर्विशेषेण प्रकाशते । दीव्यन्ति विहरन्तीति देवाः प्राणाः । ते च द्रविणोदा यागद्वारेण द्रविणं धनरूपं फलं प्रयच्छन्ति । तादृशा यजमानस्य प्राणा अग्निमेतं धारयन्भृतवन्तः ।

एतन्मन्त्रसाध्यं कृष्णाजिनप्रतिमोकं विधत्ते—

" नक्तोषासेत्युत्तरयाऽहोरात्राभ्यामेवैनमुद्यच्छते " [सं० का० ५ प्र० १ अ० १०] इति ।

पूर्वा सावित्रीमृचमपेक्ष्येयमुत्तरा तया कृष्णाजिनं प्रतिमुञ्चत इति शेषः । तथा सति तन्मन्त्रप्रतिपादिताभ्यामहोरात्राभ्यामेवैनमूर्ध्वं धृतवान्भवति ।

तस्य मन्त्रस्य चतुर्थपादे देवशब्देन प्राणा विवक्षिता इति दर्शयति—

" देवा अग्निं धारयन्द्रविणोदा इत्याह प्राणा वै देवा द्रविणोदा अहोरात्राभ्यामेवैनमुद्यत्य प्राणैर्दाधार " [सं० का० ५ प्र० १ अ० १०] इति ।

उद्यमनमात्रमहोरात्रयोः कृत्यं, धारणं तु प्राणानामित्यर्थः ।

रुक्मशिक्यपाशकृष्णाजिनानां यः प्रतिमोकस्तस्य काल उपवेशनं विधत्ते—

" आसीनः प्रति मुञ्चते तस्मादासीनाः प्रजाः प्र जायन्ते " [सं० का० ५ प्र० १ अ० १०] इति ।

तस्मादासीनप्रतिमोकालोकेऽपि प्रजा आसीना एवोत्पद्यन्ते न तूत्थिताः ।

कृष्णाजिनस्य शिक्याद्बहिर्देशवर्तित्वं विधत्ते—

---

१ क. ग. ङ. [illegible]।

" कृष्णाजिनमुत्तरं तेजो वै हिरण्यं ब्रह्म कृष्णाजिनं तेजसा चैवैनं ब्रह्मणा चोभयतः परि गृह्णाति" [सं० का० ५ प्र० १ अ० १०] इति ।

शिक्यस्यैकतो रुक्ममन्यतः कृष्णाजिनमिति तेजोरूपेण रुक्मेण वेदरूपेण कृष्णाजिनेन चोभयतः शिक्यं परिगृहीतं भवति । कृष्णाजिनस्य ब्रह्मरूपत्वं दीक्षाप्रकरणे समाम्नातम्—" ब्रह्मणो वा एतद्रूपम् । यत्कृष्णाजिनम् " इति । शिक्यस्योद्यमनहेतुरज्जुसंख्यां विधत्ते—

" षड्द्यामꣳ शिक्यं भवति षड्वा ऋतव ऋतुभिरेवैनमुद्यच्छते " [सं० का० ५ प्र० १ अ० १०] इति । पक्षान्तरं विधत्ते—

" यद्द्वादशोद्यामꣳ संवत्सरेणैव " [सं० का० ५ प्र० १ अ० १०] इति ।

द्वादश मासाः संवत्सर इत्युक्तत्वात्संवत्सरेणैवैनमुद्यच्छते ।

शिक्यस्य प्रकृतिद्रव्यं विधत्ते—

" मौञ्जं भवत्यूर्ग्वै मुञ्जा ऊर्जैवैनꣳ समर्धयति " [सं० का० ५ प्र० १ अ० १०] इति ।

कल्पः—" सुपर्णोऽसि गुरुत्मानित्युरुख्यमवेक्षते " इति । पाठस्तु—

सुपर्णोऽसि गुरुत्मानिति । हे अग्ने त्वं सुपर्णः पक्षिरूपोऽसि । पक्ष्याकारेण चेष्यमाणत्वात् । अत एवाऽऽम्नायते—" वयसां वा एष प्रतिमया चीयते यदग्निः " इति । तत्र दृष्टान्तः—यथा गरुत्मान्पक्षिराजस्तद्वत् । पक्ष्याकारस्यावयवाः सं(पा)ध्यन्ते त्रिवृत्ते शिरो बृहद्रथंतरे पक्षौ वामदेव्यं पुच्छं यज्ञायज्ञियं पुच्छसंधानं तोत्रे योऽयं त्रिवृत्स्तोमः स एव स्तोमस्तव शिरस्थानीयः । प्रजापतिमुखजन्यत्वेनोक्तत्वात् । यद्वायन्नाख्यं साम तत्त्वदीयं चक्षुः । यः पञ्चदशादिस्तोमस्तव स जीवात्मा । यद्वायदेव्यं साम तच्छिरोव्यतिरिक्ततनुस्थानीयम् । ये बृहद्रथंतराख्ये सामनी ते तव पक्षस्थानीये । यद्यज्ञायज्ञियाख्यं साम तत्तव पुच्छस्थानीयम् । यानि गायत्र्यादीनि च्छन्दांसि तानि हृदयाद्यङ्गस्थानीयानि । ये सौमिकवेद्यां होत्रियादिधिष्ण्यास्ते तव शफस्थानीयाः । यानि यजूंषि तानि तव नामस्थानीयानि । एतं मन्त्रं विनियुङ्क्ते—

" सुपर्णोऽसि गरुत्मानित्यवेक्षते रूपमेवास्यैतन्महिमानं व्याचष्टे " [सं० का० ५ प्र० १ अ० १०] इति ।

---

१ ग. च. "वैश्य" इ° ।

(चातुर्मास्यगतवैश्वदेवाख्यपर्वविहितहविषां याज्यापुरोनुवाक्याभिधानम्)

अवेक्षते, उरुव्यमिति शेषः । मन्त्रस्वरूपेणैवार्थप्रतीतेर्नात्र पृथग्व्याख्यातव्यमस्ति । कल्पः—" सुपर्णोऽसि गुरुत्मानित्यादायोत्थाय" इति । पाठस्तु—

सुपर्णोऽसि गुरुत्मानिति । हेऽग्ने त्वं गरुड इव पक्षिरूपोऽसि । अत आकाशं प्रति गच्छ । ततोऽपि स्वर्गलोकं प्राप्नुहि । मन्त्रस्य स्वर्गप्राप्तिपरत्वं दर्शयति—

" दिवं गच्छ सुवः पतेत्याह सुवर्गमेवैनं लोकं गमयति " [सं० का० ५ प्र० १ अ० १०] इति । एनं यजमानमात्मानम् ।

अत्र विनियोगसंग्रहः—

यदग्ने पञ्चभिः काष्ठं वह्नावौदुम्बरं क्षिपेत् ।
दंष्ट्राऽऽश्वत्थीमादधाती ये ज वैकङ्कतीं तथा ॥
यो अस्मभ्यं शमीकाष्ठं संशितद्वयवाचनम् ।
दृशा रुक्मं निजे कण्ठे बद्ध्वा विश्वेतिमन्त्रतः ॥
साग्न्युखाशिक्यपाशं तु स्वाम्यत्र प्रतिमुञ्चते ।
नक्तोऽजिनं चोपरिष्टात्सुपर्णोऽग्निमवेक्षते ।
सुपर्णः साग्निरुत्तिष्ठन्मन्त्राः पञ्चदशेरिताः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे प्रथमप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ चतुर्थाष्टके प्रथमप्रपाठक एकादशोऽनुवाकः)।

अग्ने॒ यं य॒ज्ञम॑ध्व॒रं वि॒श्वतः॑ परि॒भूरसि॑ ।
स इद्दे॒वेषु॑ गच्छति । सोम॒ यास्ते॑ मयो॒भुव॑ ऊ॒तयः॑ सन्ति दा॒शुषे॑ । ताभि॑र्नोऽवि॒ता भ॑व ।
अ॒ग्निर्मू॒र्धा भु॑वः । त्वं नः॑ सोम॒ या ते॒ धा॒मानि॑ । तत्सा॑वि॒तुर्वरे॑ण्यं भ॒र्गो दे॒वस्य॑ धीमहि ।
धि॒यो यो नः॑ प्रचो॒दया॑त्॒ । अ॒चि॒त्ती यच्च॑क्ष्मा

दैव्ये जनें दीनैर्दक्षः प्रभूती पुरुषत्वता (१) देवेषु च सवितर्मानुषेषु च त्वं नो अत्र सुवतादनागसः। चोदयित्री सूनृतानां चेतन्ती सुमतीनाम्। यज्ञं दधे सरस्वती। पावीरवी कन्या चित्रायुः सरस्वती वीरपत्नी धियं धात्। आभिरच्छिद्रꣳ शरणꣳ सजोषा दुराधर्षं गृणते शर्म यꣳसत्। पूषा गा अन्वेतु नः पूषा रक्षत्वर्वतः। पूषा वाजꣳ सनोतु नः। शुक्रं ते अन्यद्यजतं ते अन्यत् (२) विषुरूपे अहनी द्यौरिवासि। विश्वा हि माया अवसि स्वधावो भद्रा ते पूषन्निह रातिरस्तु। तेऽवर्धन्त स्वतवसो महित्वनाऽऽ नाकं तस्थुरुरु चक्रिरे सदः। विष्णुर्यद्धाऽऽवदूषणं मदच्युतं वयो न सीदन्नधि बर्हिषि प्रिये। प्र चित्रमर्कं गृणते तुराय मारुताय स्वतवसे भरध्वम्। ये सहाꣳसि सहसा सहन्ते (३) रजस्तुग्रो अग्ने पृथिवी मखेभ्यः। विश्वे देवा विश्वे देवाः द्यावा नः पृथिवी इमꣳ सिधमद्य दिविस्पृशम्। यज्ञं देवेषु यच्छताम्। प्र पूर्वजे पितरा नव्यसीभिर्गीर्भिः कृणुध्वꣳ सदने ऋतस्य। आ नो द्यावापृथिवी दैव्येन जनेन यातं महि वां वरूथम्। अग्निꣳ स्तोमेन बोधय समिधानो अमर्त्यम्। हव्या देवेषु नो दधत्। म हव्यवाडमर्त्य उशिग्दूतश्चमोहितः।

(चातुर्मास्यगतवैश्वदेवाख्यपर्वविहितहविषां याज्यापुरोनुवाक्याभिधानम्)

अग्निर्धिया समृण्वति। शं नो भवन्तु वाजे-
वाजे (४) ॥
(पुरुषत्वतां यजतं तं अन्यत्सहन्ते चनोहितोऽष्टौ च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
प्रथमप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

युञ्जान इमामगृभ्णन्देवस्य सं ते वि पाजसा वसवस्त्वा समीस्वोर्ध्वा अ-
स्याऽऽकूतिं यदग्ने यान्यग्ने यं यज्ञमेकादश ॥ ११ ॥

युञ्जानो वर्म च स्थ आदित्यास्त्वा भारती स्वाऽ अह॰
षट्चत्वारिꣳशत् ॥ ४६ ॥
हरिः ॐ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
प्रथमः प्रपाठकः ॥ १ ॥

(अथ चतुर्थकाण्डे प्रथमप्रपाठक एकादशोऽनुवाकः)।

दशमेऽनुवाके वह्निधारणमुक्तम्। अथैकादशे चातुर्मास्यगते वैश्वदेवाख्ये प्रथमपर्वणि विहितानां हविषां याज्यानुवाक्या उच्यन्ते।

तत्र प्रथमस्याऽऽज्यभागस्य चोदकप्राप्तामपवादेनान्यां पुरोनुवाक्यामाह—

अग्ने यं यज्ञमिति। हेऽग्नेऽध्वरं हिंसारहितं यं यज्ञं विश्वतः परिभूरसि सर्वतः प्राप्तवानसि, स इत्स एव यज्ञो देवेषु गच्छति।

अथ द्वितीयस्याऽऽज्यभागस्य पुरोनुवाक्यामाह—

सोम यास्ते इति। हे सोम दाशुषे हविर्दत्तवते यजमानाय मयोभुवः सुखं भावयितुस्ते तव या ऊतयो रक्षणप्रकाराः सन्ति ताभिरूतिभिर्नोऽस्माकमविता रक्षको भव।

अथाऽऽग्नेयमष्टाकपालं निर्वपतीत्यस्मिन्हविषि याज्यापुरोनुवाक्ययोः प्रतीके दर्शयति—

अग्निर्मूर्धेति। अग्निर्मूर्धेति पुरोनुवाक्या। भुवो यज्ञस्येति याज्या। एतच्चोभयमैष्टिके हौत्रकाण्डे समाम्नातं, तच्चास्माभिरुदाहृत्य चक्षुषी वा एते यज्ञस्येत्यस्मिन्ननुवाके व्याख्यातम्।

---

१ क. घ. ङ. च. °रुपाह्व°।

(चातुर्मास्यगतवैश्वदेवाख्यपर्वविहितहविषां याज्यापुरोनुवाक्याभिधानम्)

अथ सौम्यं चरुमित्यस्मिन्हविषि याज्यापुरोनुवाक्ययोः प्रतीके दर्शयति—

त्वं नः सोमेति । त्वं नः सोम विश्वत इति पुरोनुवाक्या । या ते धामानीति याज्या । एतच्चोभयं स प्रत्नवन्नि काव्येत्यनुवाके व्याख्यातम् ।

अथ सावित्रं द्वादशकपालमित्येतस्य हविषः पुरोनुवाक्यामाह—

तत्सवितुर्वरेण्यमिति । यः सविताऽस्माकं बुद्धीः प्रेरयति तस्य सवितुर्देवस्य वरणीयं भर्गस्तेजो ध्यायेम । तत्रैव याज्यामाह—

अचित्ती यदिति । पूरुषस्य भावः पूरुषत्वं पूरुषत्वमेव पूरुषत्वता । सा च प्रभूत्यतिबहुला देहेन्द्रियादिसंघातेषु पुरुषोऽहमस्मीतितादात्म्याभिमानभ्रान्तिरत्यन्तं दृढेत्यर्थः । तथा सत्यचित्ती कर्तव्याकर्तव्ययोरज्ञानेन दीनैर्दक्षैर्विषयलम्पटतया दीनत्वं प्राप्तैः स्वस्वव्यापारकुशलैरिन्द्रियैर्दैव्ये जने देवतासंबन्धिनि शरीरे यच्चकृम यत्पापं वयं कृतवन्तः, हे सवितस्त्वं देवेषु मनुष्येषु चास्मिन्कर्मणि नोऽस्माननागसः पापरहिता यथा भवामस्तथा सुवतात्प्रेरय ।

अथ सारस्वतं चरुमित्यस्य पुरोनुवाक्यामाह—

चोदयित्रीति । सूनृतानां प्रियवाक्यानां(णां) चोदयित्री प्रेरयित्री सुमतीनां शोभनबुद्धीनामस्माकं कृत्यं चेतन्ती जानन्ती सरस्वती यज्ञमिमं दधे धारितवती ।

तत्रैव याज्यामाह—

पावीरवी कन्येति । सरस्वती धियं धादस्मदीये कर्मणि सावधानां बुद्धिं धारयतु । कीदृशी, पावीरवी पातॄन्वीरांश्च वयति जनयतीति पावीरवी । कन्या कमनीया । चित्रायुर्वीचित्रं जीवनं यस्याः सा । वीरपत्नी वीराणां पालयित्री । आभिश्छन्दोभिर्युक्ता सरस्वती सजोषा यजमानेन समानप्रीतिः सती गृणते स्तुवते यजमानाय शर्म यंसत्सुखं प्रयच्छतु । कीदृशं शर्म, अच्छिद्रमविच्छिन्नं शरणं रक्षकं दुराधर्षमन्यैर्धर्षयितुमशक्यम् ।

अथ पौष्णं चरुमित्यस्य पुरोनुवाक्यामाह—

पूषा गा अन्वेत्विति । अयं पूषा नोऽस्माकं गा अन्वेतु रक्षणाय पृष्ठतो गच्छतु । किंचायं पूषाऽर्वतोऽश्वान्रक्षतु । पूषा नोऽस्मभ्यं वाजमन्नं सनोतु संपादयतु । तत्रैव याज्यामाह—

शुक्रं ते अन्यादिति । हे पूषंस्ते तव शुक्रं शुद्धस्वरूपमन्यदनेकप्रकारम्, उदयकाले रक्तवर्णं रूपमन्यत्, मध्याह्नकाले श्वेतवर्णं रूपमन्यत्, इत्येवमने-

(चातुर्मास्यगतवैश्वदेवाख्यपर्वविहितहविषां याज्यापुरोनुवाक्याभिधानम्)

कपकारत्वम्। तथा ते तव यजतं पूजनमप्यन्यत्। प्रातःकाले मित्रस्य वर्षणीधृत इत्यादिभिर्मन्त्रैः पूज्यसे। मध्याह्ने त्वा सत्यमित्यादिभिः। तथा त्वया निष्पादिते अहनी अपि, विषुरूपे नानारूपे। अहःशब्दश्छान्दसत्वान्न्यायेन रात्रिमप्युपलक्षयति। अहः प्रकाशोपेतं रात्रिस्तमोयुक्तेति नानारूपत्वम्। एवं हि चित्रकार्यकृदपि त्वं द्यौरिवासि। आकाशं यथैकरूपं तद्वत्त्वमपि पक्षपातराहित्यादेकरूपोऽसि। मीयन्ते पदार्था याभिश्चित्तवृत्तिभिस्ताश्चित्तवृत्तयो मायाः। कव्यदानवाचिना च स्वधाशब्देन कृत्स्नमप्यन्नमुपलक्ष्यते। हे स्वधावोऽन्नवन्विधा हि मायाः सर्वा अपि अन्यदीयचित्तवृत्तीरिवासि रक्षसि। हे पूषन्निह कर्मणि ते तव रातिर्भद्राऽस्तु फलप्रदानं समीचीनं भवतु।

अथ मारुतं सप्तकपालमित्यस्य पुरोनुवाक्यामाह—

तेऽवर्धन्तेति। तवो बलं, स्वं स्वाधीनं तवो येषां ते स्वतवसः। तादृशास्ते मरुतो महीत्वना महत्त्वेन स्वकीयेनावर्धन्त। ते मरुतो नाकं स्वर्गमातस्थुः प्राप्तवन्तः। उरु सदश्चक्रिरे स्वर्गे यजमानाय स्थानं कृतवन्तः। वृषणं कामानां वर्षकं, मदच्युतं हर्षक्षारकमत्यन्तं हर्षकारणमित्यर्थः। तादृशं यद्बर्हिर्मरुतस्तबन्धि कर्म विष्णुर्ह विष्णुरेवाऽऽवत्पालितवांस्तस्मिन्प्रिये बार्हीषि मरुतोऽधिष्ठाय वयो न वय इव सीदन्। यथा पक्षिणः सायंकाले वृक्षे सीदन्ति तद्वदेव तिष्ठन्तीति। तत्रैव याज्यामाह—

प्र चित्रमर्कमिति। हे ऋत्विग्यजमानाश्चित्रमर्कं विविधमर्चनं मारुताय मरुत्समूहाय प्रभरध्वं प्रकर्षेण संपादयत। कीदृशाय मारुताय, गृणते हविर्दानाय गृणते, तुराय शीघ्रगामिने(णे), स्वतवसे स्वाधीनबलायं। हे ऋत्विग्यजमाना ये भवन्तः सहसा मरुतां बलेन सहांसि वैरिबलानि सहन्तोऽभिभवन्ति ते यूयं भरध्वमिति पूर्वत्रान्वयः। हेऽग्ने त्वमेव तत्पश्येत्यध्याहारः। किं द्रष्टव्यं तदाश्चर्यमिति तदुच्यते—इयं पृथिवी मखेभ्यो मारुतयज्ञेभ्यो रेजते कम्पते। कथं नामैतदीया यज्ञा निर्विघ्नेन समाप्यन्त इति प्रयत्नं करोति एतदिदमिति।

अथ वैश्वदेवीमामिक्षामित्येतस्मिन्हाविषि याज्यानुवाक्ययोः प्रतीके दर्शयति—

विश्वे देवा इति। विश्वे देवा ऋतावृध इति पुरोनुवाक्या। विश्वे देवाः शृणुतेति याज्या। एतच्चोभयं नवोनवो भवतीत्येस्मिन्ननुवाके व्याख्यातम्।

---

१ ख. च. °वं विचि°। २ ख. च. °र्ययुक्तोऽपि। ३ क. घ. ङ. °र्षकार°। ४ ख. च. °य। ये। ५ ख. च. °वन्त ऋत्विग्यजमानाः स°। ६ ख. च. °वन्तीति। ७ ख. च. °ति त°।

द्यावापृथिव्यमेककपालमित्यस्य पुरोनुवाक्यामाह—

द्यावा नः पृथिवीति । द्यावापृथिवी द्युदेवता पृथिवीदेवता चेत्युभे अद्यास्मिन्दिने नोऽस्मदीयमिमं यज्ञं देवेषु समर्पयेताम् । कीदृशं यज्ञं, सिद्धं फलस्य साधकं, दिविस्पृशम् , अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठत इति न्यायेन स्वर्गस्पर्शयुक्तम् । तत्रैव याज्यामाह—

प्र पूर्वजे पितरेति । प्रपूर्वजे प्रथमोत्पन्ने द्यावापृथिव्यौ पितरा मातापितृसमाने । " द्यौः पिता । पृथिवी माता " इति श्रुत्यन्तरात् । हे ऋत्विग्यजमाना ऋतस्य सदने यज्ञस्य स्थाने नव्यसीभिरतिशयेन नूतनाभिर्गीर्भिर्मन्त्ररूपाभिर्वाग्भिः कृणुध्वं द्यावापृथिव्योः स्तुतिं कुरुध्वम् । हे द्यावापृथिव्यौ दैव्येन जनेन देवसंबन्धिना पुरुषसमूहेन सह नोऽस्मान्प्रत्यायातम् । वां युवयोः संबन्धि वरूथं यज्ञगृहं महि पूज्यम् । अथ तत्रैव स्विष्टकृतः पुरोनुवाक्यामाह—

अग्निꣳ स्तोमेनेति । हे यजमान त्वं समिधानोऽग्निं दीपयन्नमर्त्यं मरणरहितमग्निं स्विष्टकृद्रूपं स्तोमेन स्तोत्रेण तोषयित्वाऽनेन प्रकारेण बोधय । केन प्रकारेणेति तदुच्यते—नोऽस्मदीयानि हव्या हवींषि देवेषु दधत्स्थापयेति । तत्रैव याज्यामाह—

स हव्यवाडिति । स्विष्टकृद्रूपोऽग्निर्धिया करुणायुक्तेन चेतसा समृण्वति सम्यगिह प्राप्नोतु । कीदृशोऽग्निः । हव्यं वहतीति हव्यवाट् । अमर्त्यो मरणरहितः । उशिगनुग्रहपूर्वमस्मान्कामयमानः । दूतो देवानामाज्ञाकारी । चनोहितः, चनसां मनुष्याणां यजमानानां हितोऽभीष्टकारी ।

अथ वाजिनो यजतीति विहिते कर्मणि याज्यानुवाक्ययोः प्रतीके दर्शयति—

शं नो भवन्त्विति । शं नो भवन्तु वाजिन इति पुरोनुवाक्या । वाजेवाजेऽवत वाजिन इति याज्या । एतच्चोभयं देवस्याहः सवितुः प्रसव इत्यनुवाके व्याख्यातम् । अत्र विनियोगसंग्रहः—

अथ याज्या वैश्वदेवे चातुर्मास्यादिपर्वणि ।
अग्न सो अनुवाक्ये ते अग्नीषोमाज्यभागयोः ॥
अग्निर्भुवस्तथाऽऽग्नेये त्वं नो या ते च सौमिके ।
तत्सेति युग्मं सावित्रे चोद सारस्वते तथा ॥

१ ख. प्राप्नोति ।

(आसन्याम्मुखाग्निस्थापनप्रतिपादनम्)

पूषा पौष्णे मारुते ते विष्णे द्वे वैश्वदेविके ।
द्यावा द्यावापृथिव्ये स्यादग्नि स्विष्टकृतो यजेः ।
शं वाजे वाजिने मन्त्रा द्वाविंशतिरुदीरिताः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे प्रथमप्रपाठक
एकादशोऽनुवाकः ॥ ११ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ॥
पुमार्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य
श्रीवीरबुक्कमहाराजस्याऽऽज्ञापरिपालकेन माधवाचार्येण विर-
चिते वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिता-
भाष्ये चतुर्थकाण्डे प्रथमः प्रपाठकः ॥ १ ॥

(अथ चतुर्थोऽष्टके द्वितीयः प्रपाठकः) ।

(तत्र प्रथमोऽनुवाकः) ।

हरि ॐ ।

विष्णोः क्रमोऽस्यभिमातिहा गायत्रं छन्द आ रोह पृथिवीमनु वि क्रमस्व निर्भक्तः स यं द्विष्मो विष्णोः क्रमोऽस्यभिशस्तिहा त्रैष्टुभं छन्द आ रोहान्तरिक्षमनु वि क्रमस्व निर्भक्तः स यं द्विष्मो विष्णोः क्रमोऽस्यरातीयतो हन्ता जागतं छन्द आ रोह दिव्यनु वि क्रमस्व निर्भक्तः स यं द्विष्मो विष्णोः (१) क्रमोऽसि शत्रूयतो हन्ताऽऽनुष्टुभं छन्द आ रोह दिशोऽनु वि क्रमस्व निर्भक्तः स यं द्विष्मः । अक्रन्ददग्निस्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः सम-

ऋन् । सयो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः । अग्नेऽभ्यावर्तिन्नभि न आ वर्तस्वाऽऽयुषा वर्चसा सन्या मेधया प्रजया धनेन । अग्ने (२) अङ्गिरः शतं ते सन्त्वावृतः सहस्रं त उपावृतः । तासां पोषस्य पोषेण पुनर्नो नष्टमा कृधि पुनर्नो रयिमा कृधि । पुनरूर्जा नि वर्तस्व पुनरग्न इषाऽऽयुषा । पुनर्नः पाहि विश्वतः । सह रय्या नि वर्तस्वाग्ने पिन्वस्व धारया । विश्वप्स्न्या विश्वतस्परि । उदुत्तमं वरुण पाशमस्मदवाधमम् (३) वि मध्यमꣳ श्रथाय । अथा वयमादित्ये व्रते तवानागसो अदितये स्याम । आ त्वाऽहार्षमन्तरभूर्ध्रुवस्तिष्ठाविचाचलिः । विशस्त्वा सर्वा वाञ्छन्त्वस्मिन्राष्ट्रमधि श्रय । अग्ने बृहन्नुषसामूर्ध्वो अस्थान्निजगन्वान्तमसो ज्योतिषागात् । अग्निर्भानुना रुशता स्वङ्ग आ जातो विश्वा सध्र्यप्राः । सीद त्वं मातुरस्याः (४) उपस्थे विश्वान्यग्ने वयुनानि विद्वान् । मैनामर्चिषा मा तपसाऽभि शूशुचोऽन्तरस्याꣳ शुक्रज्योतिर्वि भाहि । अन्तरग्ने रुचा त्वमुषायै सदने स्वे । तस्यास्त्वꣳ हरसा तपञ्जातवेदः शिवो भव । शिवो भूत्वा मह्यमग्नेऽथो सीद शिवस्त्वम् । शिवाः कृत्वा

(आसन्द्यामुखाग्निस्थापनप्रतिपादनम्)

दिशः सर्वाः स्वां योनिमिहाऽसदः। हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोण-सत्। नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् (५)॥

(दिवमनु वि क्रमस्व निर्भक्तः स यं द्विष्मो विष्णोर्धनेनाग्नेऽधममस्याः शुचिषत्पोडश च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके द्वितीयप्रपाठके प्रथमोऽनुवाकः॥ १॥

(अथ चतुर्थकाण्डे द्वितीयः प्रपाठकः)।

तत्र प्रथमोऽनुवाकः।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्॥ १॥
आद्यप्रपाठके ह्युक्ष्यो योऽग्निः सोऽयं प्रपञ्चितः।
प्रपाठके द्वितीये तु स्याद्देवयजनग्रहः॥ २॥
चयनार्थस्तत्र चानुवाका एकादशेरिताः।
आसन्द्यां स्थापनं वात्सप्रसूक्तेन ह्युपस्थितिः॥ ३॥
+उखाग्नेर्नयनं गार्हपत्याग्निचयनं भुवः।
कर्षणं चौषधावापो लोष्टक्षेपादिकं तथा॥ ४॥
रुक्मादेरुपधानं स्वयमातृण्णादिकस्य च।
निधानं पशुशीर्षाणां याज्या अर्था उदीरिताः॥ ५॥

तत्र प्रथमानुवाक आसन्द्यामुखाग्निस्थापनं प्रतिपाद्यते।

कल्पः—" उपरि नाभेर्धारयमाणो विष्णोः क्रमोऽसीति चतुरो विष्णुक्रमान्प्राचः क्रामति " इति। पाठस्तु—

+ उखाग्नेश्चयनमिति ख. पुस्तके टिप्पण्यां पाठः।

विष्णोः क्रमोऽसीति । यज्ञमयोगं कृत्स्नं व्याप्नोतीति विष्णुर्यजमानः । यद्वा विष्णुना परमेश्वरेणाभेदोपचारं कृत्वा विष्णुरित्युच्यते । हे प्रथमपादविन्यास त्वं विष्णोरभिमातिहा पापघाती क्रमोऽसि । पाप्मा वा अभिमातिरिति श्रुत्यन्तरम् । तादृशस्त्वं गायत्रं छन्द आरोहानुग्राहकत्वेन स्वी कुरु । ततः पृथिवीमनु विक्रमस्व भूदेवतात्मकमिमं प्रदेशं विशेषेण प्राप्नुहि । यमभिमातिं वयं द्विष्मः सोऽयं निर्भक्तोऽस्मात्प्रदेशान्निःसारितः । एवमुत्तरेष्वपि योज्यम् । अभिशस्तिहा मिथ्यापवादघाती । अरातिरवश्यदातव्यस्य दानाभावस्तमात्मन इच्छतीत्यरातीयंस्तस्य हन्ता विनाशकः । प्रहारेण हन्तृत्वं शत्रुत्वं तदिच्छतीति शत्रूयंस्तस्य हन्ता विनाशकः । अत्र सर्वत्र यजमानः स्वात्मानं विष्णुत्वेन भावयेत् । चतुर्णां क्रमाणां प्रदेशान्पृथिव्यादिलोकरूपत्वेन भावयेत् । गायत्रादिच्छन्दोभिमानिदेवतास्तेषां क्रमाणामनुग्राहिकाः ।

एतैर्मन्त्रैः साध्यान्विष्णुक्रमान्विधत्ते—

"विष्णुमुखा वै देवाश्छन्दोभिरिमाँल्लोकाननपजय्यमभ्यजयन्यद्विष्णुक्रमान्क्रमते विष्णुरेव भूत्वा यजमानश्छन्दोभिरिमाँल्लोकाननपजय्यमभि जयति विष्णोः क्रमोऽस्यभिमातिहेत्याह गायत्री वै पृथिवी त्रैष्टुभमन्तरिक्षं जागती द्यौरानुष्टुभीर्दिशश्छन्दोभिरेवेमाँल्लोकान्यथापूर्वमभि जयति" [सं० का० ५ प्र० २ अ० १] इति ।

देवाः पूर्वं स्वेषु विष्णुमेव मुख्यं कृत्वा छन्दोभिमानिदेवैः सहिता अनपजय्यमन्यैर्जेतुं यथा न शक्यते तथेमाँल्लोकानभ्यजयन् । अतो यजमानो विष्णुक्रमैस्तथा जयति । गायत्रादिच्छन्दोदेवानां पृथिव्यादिलोकस्वामित्वेन तैः सह लोकानां जेतुं शक्यतया मन्त्रेषु गायत्रं छन्द आरोहेत्यादि पठितमित्यभिप्रायः ।

कल्पः—"अक्रन्ददग्निरित्येतामनुद्रुत्य" इति । पाठस्तु—

अक्रन्ददग्निरिति । अयमग्निरक्रन्ददस्मदनिष्टनिवारणार्थं गर्जतु । किमिव, स्तनयन्निव द्यौः । यथा द्युलोकस्थो मेघः सस्यशोषभीतिनिवारणाय स्तनयति तद्वत् । किं कुर्वन् । क्षाम दाहकमस्मद्विरुद्धं रोरिहल्लोलिहानः, वीरुधः समञ्जन्पुष्पफलसमृद्धलतावदस्मदनुकूलानि सम्यगभिव्यञ्जयन् । हि यस्माज्ज्ञान

१ ख. च. भीतिं निवारयति ।

(आसन्न्यामुखाग्निस्थापनप्रतिपादनम्)

उत्पद्यमानः सन्न ईं तदानीमेवेद्धो दीप्तः सन्विश्वं जगदरुग्व्यरुग्व्यपश्यति। रोदसी द्यावापृथिव्योरन्तर्भानुना रश्मिना स्वयमाभाति समन्तात्प्रकाशते।

एतस्य मन्त्रस्यानुवचनं विधत्ते—

" प्रजापतिरग्निमसृजत सोऽस्मात्सृष्टः पराङेत्तमेतयाऽन्वैदक्रन्ददिति तया वै सोऽग्नेः प्रियं धामावारुन्ध यदेतामन्वाहाग्नेरेवैतया प्रियं धामावरुन्धे " [सं० का० ५ प्र० २ अ० १] इति[1]।

स सृष्टोऽग्निरस्मात्प्रजापतेः पराङ्भावृत्तिरहित ऐदगच्छत्। अक्रन्ददित्येतयर्चा तमग्निमनुगम्य स प्रजापतिस्तयैवर्चाऽग्नेः प्रियं स्थानं प्राप्तवान्। अत एवास्या अनुवचनमग्नेः प्रियस्य स्थानस्य संपादनाय भवति।

कल्पः—" अग्नेऽभ्यावर्तिन्निति चतसृभिः प्रदक्षिणमावर्तते " इति।

तत्र प्रथमामाह—

अग्नेऽभ्यावर्तिन्निति। आभिमुख्येनाऽऽवर्तितुं शीलमस्यास्तीत्यभ्यावर्ती, तादृश हेऽग्न आयुरादिभिः सह नोऽस्मानभिलक्ष्याऽऽवर्तस्व। आयुरपमृत्युरहितं वर्चः कान्तिर्बलं वा, सनिर्धनदानं, मेधा श्रुतार्थधारणशक्तिः। प्रजा पुत्रादिः। धनं सुवर्णम्। धनशब्देन संपादयितव्यमुच्यते। सनिशब्देन संपादितस्य बन्धुभ्यः प्रदानशक्तिरुच्यते। अथ द्वितीयामाह—

अग्ने अङ्गिर इति। हेऽङ्गिरोऽङ्गसौष्ठवयुक्ताग्ने ते तवाऽऽवृतः शतं सन्तु। आवृतिशक्तयः शतसंख्याका भवन्तु। तथा ते तवोपावृत उपावृतिशक्तयः सहस्रसंख्याका भवन्तु। स्वस्यैवाऽऽवर्तनमावृत्। समीपवर्तिनां पुरुषाणां द्रव्यविशेषाणां चाऽऽवर्तनमुपावृत्। अस्मासु स्नेहातिशयात्त्वमपि पुनः पुनरावर्तस्व, त्वदीयाः पुरुषास्त्वदीयानि च द्रव्याणि पुनः पुनरावर्तन्तामित्यर्थः। तासामावृतिशक्तीनां शतसहस्रसंख्याकानां यः पोषः समृद्धिस्तस्यापि पोषस्यान्यः पोषोऽयुतलक्षादिसंख्याकाभिवृद्धिस्तादृशेन पोषेण नोऽस्मदीयं नष्टं धनं पुनर्भूयोऽभ्याभ्यावृतं कुरु। पुनर्भूयोऽपि रयिं पूर्वमसंपादितं धनमाभिः सर्वतः संपादितं कुरु। अथ तृतीयामाह—

पुनरूर्जेति। हेऽग्ने त्वमूर्जा क्षीरादिरसेन सह पुनर्निवर्तस्वाऽऽगच्छ।

---

१ ख. च. °ति सृष्टः सोऽग्नि°। २ ख. °र्वसं°।

(आसन्यामुखाग्निस्थापनप्रतिपादनम्)

इषाऽग्नेनाऽऽयुषा सह पुनरागच्छ । नोऽस्मान्पुनः पुनः कृताद्भिश्चतः सर्वस्माद्-परिधात्पाहि । अथ चतुर्थीमाह—

सह रय्येति । हेऽग्ने रय्या धनेन सह निवर्तस्व । प्सा भक्षण इति धातुः । विश्वैः सर्वैः प्स्यायते भक्ष्यते पीयत इति विश्वप्स्नी । तादृश्या वृष्टिधारया विश्वतस्परि सर्वेषां तृणधान्यलतापादपानामुपरि पिन्वस्व सिञ्च ।

एतैर्मन्त्रैरावर्तनं विधत्ते—

" इश्वरो वा एष पराङ्प्रदघो यो विष्णुक्रमान्क्रमते चतसृभिरा वर्तते चत्वारि छन्दाꣳसि छन्दाꣳसि खलु वा अग्नेः प्रिया तनूः प्रियामेवास्य तनुव-मभि पर्यावर्तते " [सं० का० ५ प्र० २ अ० १] इति ।

यो यजमानो विष्णुक्रमानाचरत्येष पराङ्गावृत्तिरहितः प्रदघ ईश्वरः प्रकर्षेण गन्तुं समर्थः पुनरावृत्तिं न लभत इत्यर्थः । अत आवृत्तिलाभाय चतसृभिर्ऋग्भि-रावृत्तिं कुर्यात् । गायत्री त्रिष्टुब्जगत्यनुष्टुबिति चतुर्णां छन्दसामभ्यादानादावुपात्त-त्वादग्निशरीरत्वम् । आवृत्तौ प्रादक्षिण्यं विधत्ते—

" दक्षिणा पर्यावर्तते स्वमेव वीर्यमनु पर्यावर्तते तस्माद्दक्षिणोऽर्धं आत्मनो वीर्यावत्तरोऽथो आदित्यस्यैवाऽऽवृतमनु पर्यावर्तते " [सं० का० ५ प्र० २ अ० १] इति ।

दक्षिणा प्रादक्षिण्येन, दक्षिणभागमवस्थाप्य वामभागस्य परिभ्रमणं प्राद-क्षिण्यम् । पुरुषस्य दक्षिणभागे सामर्थ्यातिशयसद्भावात्तदेवानुसृत्याऽऽवृत्तिः कृता भवति । यस्माद्दक्षिणभागे वीर्यं श्रुतेरभिप्रेतं भवति तस्माल्लोकेऽपि सर्वेषु व्यापारेषु दक्षिणहस्तस्यैव वीर्यातिशय उपलभ्यते । किंच, आदित्यो मेरुं प्रदक्षिणी करोति तदप्यत्रानुसृतं भवति ।

कल्पः—" उदुत्तममिति शिक्यपाशमुन्मुच्य " इति । पाठस्तु—

उदुत्तमं वरुणेति । हे वरुणोत्तममुत्तमाङ्गे शिरसि स्थापितं त्वदीयं पाशमु-(मस्मदस्मत्त उ)त्कृष्य श्रथाय विनाशय । अधममधमाङ्गे स्थापितं पादप्रदेशे स्थापितं पाशमवकृष्य विनाशय । मध्यममप्रदेशे स्थापितं पाशं विच्छेदय । अथ पाशत्रयविनाशानन्तरं हे आदित्य सूर्यसदृश वरुण वयमनागसः पापर-हिताः सन्तस्तव व्रते त्वदीये कर्मणि अदितयेऽखण्डितत्वाय स्याम योग्या भवेम ।

---

१ ख. च. °भिरग्नेऽभ्यावर्तिन्नित्यादिभिर्क्°।

(आसन्द्यामुखाग्निस्थापनप्रतिपादनम्)

अनेन मन्त्रेण शिक्यपाशोन्मोकमभिप्रेत्य मन्त्रगतस्य वरुणपाशस्य प्रसङ्गं दर्शयति—

" शुनःशेपमाजीगर्तिं वरुणोऽगृह्णात्स एतां वारुणीमपश्यत्तया वै स आत्मानं वरुणपाशादमुञ्चद्वरुणो वा एतं गृह्णाति य उखां प्रतिमुञ्चत उदुत्तमं वरुण पाशमस्मदित्याहाऽऽत्मानमेवैतया वरुणपाशान्मुञ्चति " [सं० का० ५ प्र० २ अ० १] इति ।

शुनःशेपो नाम ऋषिः स चाजीगर्तेरस्य पुत्रस्तं कदाचिद्वरुणोऽगृह्णाद्गृहीतवान् । वरुणगृहीतत्वं च जलोदरव्याधिनाऽभिव्यज्यते । स च शुनःशेपस्तत्परिहारायोदुत्तममित्येतां वारुणीमृचमपश्यत् । ततस्तयैवर्चा स शुनःशेपः स्वात्मानं वरुणपाशान्मोचितवान् । अतोऽत्रापि यो यजमान उखां प्रतिमुञ्चते सोऽयं वरुणगृहीतः संस्तत्परिहारायोदुत्तममित्यनया शिक्यपाशमुन्मुच्य तन्मन्त्रप्रसादेन वरुणपाशान्मुक्तो भवति ।

कल्पः—" आ त्वाऽहार्षमित्याहृत्य " इति । पाठस्तु—

आ त्वाऽहार्षमिति । हेऽग्ने त्वामाहार्षमाहृतवानस्मि । त्वं चोखाया अन्तर्भूरवस्थितोऽसि । अविचाचलिरित्यन्तं चलनरहितो ध्रुवस्त्वञ्च स्थिरस्तिष्ठ । तवां विशः प्रजास्त्वां वाञ्छन्तु । अस्मिन्यजमाने राष्ट्रमधिश्रयाधिकं स्थापय ।

अस्य मन्त्रस्य प्रथमपादे वह्नेराहरणं प्रसिद्धमेव प्रतीयत इति दर्शयति—

" आ त्वाऽहार्षमित्याहाऽऽ ह्येनꣳ हरति " [सं० का० ५ प्र० २ अ० १] इति । द्वितीयपादेऽन्वयव्यतिरेकाभ्यां प्रतिष्ठा सिध्यतीत्याह—

"ध्रुवस्तिष्ठाविचाचलिरित्याह प्रतिष्ठित्यै " [सं०का०५प्र०२अ०१] इति ।

तृतीयपादे प्रजासमृद्धिं चतुर्थपादे राज्यस्थैर्यं च क्रमेण दर्शयति—

" विशस्त्वा सर्वा वाञ्छन्त्वित्याह विशैवैनꣳ समर्धयत्यस्मिन्राष्ट्रमधि श्रयेत्याह राष्ट्रमेवास्मिन्ध्रुवमकः " [सं० का० ५ प्र० २ अ० १] इति ।

विशा प्रजया । एनं यजमानम् । अस्मिन्यजमाने । अकः करोति ।

चतुर्थपादपाठकाले यजमानविषयं काम्यं मनसा ध्यानं विधत्ते—

" यं कामयेत राष्ट्रꣳ स्यादिति तं मनसा ध्यायेद्राष्ट्रमेव भवति " [सं० का० ५ प्र० २ अ० १] इति ।

---

१ ख. च. °ष्ट्रमिदम° ।

यं यजमानमुद्दिश्य राज्यमास्त्विति कामयेताध्वर्युस्तं चतुर्थपादोच्चारणकाले ध्यायेत् ।

कल्पः—" उपतिष्ठतेऽग्ने बृहन्नुषसामूर्ध्वो अस्थात् " इति । पाठस्तु—

अग्ने बृहन्निति । अयमग्निर्बृहन्नुषसामग्र उषसां मुख ऊर्ध्वोऽस्थात्, अग्निहोत्रादौ वोह्यमान उत्तिष्ठति । ज्योतिषा स्वकीयेन तेजसा तमसो निर्जगन्निर्गतः सन्नागात् । कीदृशोऽग्निः । रुशता तमो हिंसता भानुना रश्मिना स्वङ्कः शोभनशरीरः । किंच जात उत्पन्नमात्र एव विश्वा तस्थानि सर्वाणि स्थानानि आपाः स्वकीयेन तेजसा सर्वत्र पूरितवान् ।

अस्य मन्त्रस्य प्रथमार्धे भागत्रयं क्रमेण व्याचष्टे—

" अग्ने बृहन्नुषसामूर्ध्वो अस्थादित्याहाग्रमेवैन[१] समानानां करोति निर्जगन्वान्तमस इत्याह तम एवास्मादप हन्ति ज्योतिषाऽगादित्याह ज्योतिरेवास्मिन्दधाति " [तै० का० ५ प्र० २ अ० १] इति ।

कल्पः—" सीद त्वं मातुरस्या उपस्थ इति तस्यां चतसृभिरुलूखलं सादयति " इति ।

औदुम्बर्या(रा)सन्द्याः प्रकृतत्वात्तैव तस्यामिति परामृश्यते ।

तत्र प्रथममाह—

सीद त्वमिति । हेऽग्ने त्वं मातृसमानाया अस्या आसन्द्या उखाया उपस्थ उत्सङ्गे सीदोपविश । कीदृशस्त्वं, विश्वानि वयुनानि सर्वाज्ञानोपायान्विद्वान् । एनोमुखामर्चिषा स्वकीयदीप्त्या मा शूशुचोऽत्यन्तं मा दीदय । तपसा संतापेनापि माऽभिशूशुचः । अर्चिः कारणं, तपः कार्यम् । कारणेनैष(नेषत्) तापो भवति । कार्येण तु भूयान्, तदुभयं मा कुर्वित्यर्थः । अस्यामुखायामन्तः शुक्रज्योतिर्निर्मलप्रकाशः सन्विभाहि विशेषेण दीप्यस्व । अथ द्वितीयामाह—

अन्तरग्ने रुचेति । हेऽग्न उखायै तस्या उखाया अन्तर्मध्ये स्वे तदने स्वकीये स्थाने रुचा दीप्त्या युज्यस्व । हे जातवेदस्त्वं तस्या उखायाः शिवो भव सुखप्रदो भव । किं कुर्वन्हरसा तेजसा तपञ्चलन् । अथ तृतीयामाह—

शिवो भूत्वेति । हेऽग्ने मह्यं मदर्थं शिवः शान्तो भूत्वाऽथो अनन्तरं त्वं शिवः सीद सर्वान्प्रति शान्तः सन्नुपविश । सर्वा दिशः शान्ताः कृत्वेहास्यां-

---

१ ख. च. °न्या उप । २ ख. च. °नामासन्दीम° । ३ ख. च. आसन्द्याः । ४ च, °त्यामासन्द्यां स्वां ।

(आसन्यामुखाग्निस्थापनप्रतिपादनम्)

मुखायां स्वां योनिं स्वकीयं स्थानमासद आगत्योपविश । अथ चतुर्थीमाह—

हꣳसः शुचिषदिति । हन्ति स्वयमाहवनीयादिदेशेषु गच्छतीति वा वैरिणं हिनस्तीति वा हंसोऽयमग्निः । शुचौ यजमाने सीदतीति शुचिषत् । यजमानं वासयतीति वसुः । अन्तरिक्षे धूमज्वालारूपेण सीदतीत्यन्तरिक्षसत् । होता देवानामाह्वाता । वेद्यां यज्ञसंबन्धिन्यां सीदतीति वेदिषत् । अतिथिर्दुरोणतदतिथिसमानः सन्दुरोणेषु यजमानगृहेषु सीदतीति दुरोणसत् । नृषु मनुष्येषु जठराग्निरूपेण सीदतीति नृषत् । वरे श्रेष्ठे श्रोत्रियगृहे सीदतीति वरसत् । ऋते यज्ञे तन्निष्पादकत्वेन सीदतीति ऋतसत् । व्योमन्याकाशे सूर्यरूपेण सीदतीति व्योमसत् । अप्सु वृष्टिधारारूपासु वैद्युतरूपेण जायते प्रादुर्भवतीत्यब्जाः । गोकार्ये घृते ज्वालारूपेण जायते व्यज्यत इति गोजाः । ऋतार्थं यज्ञार्थमेव जातत्वादृतजाः । अद्रौ पर्वते दावानलरूपेण जायत इत्यद्रिजाः । इदꣳसोऽग्निर्यदृतं प्रौढमग्निचयनोपेतं यज्ञं निष्पादयतीति शेषः ।

एतन्मन्त्रसाध्यमग्निस्थापनं विधत्ते—

" चतसृभिः सादयति चत्वारि छन्दाꣳसि छन्दोभिरेव " [सं० का० ५ प्र० २ अ० १] इति ।

सादयतीत्यनुवर्तते । सीद त्वं मातुरित्यादिभिश्चतसृभिरौदुम्बर्यामुख्याग्निं स्थापयेत् । छन्दोभिरेव स्थापितवान्भवति ।

हꣳस इत्यादिकायामुत्तमायामृचि च्छन्दोविशेषं प्रशंसति—

" अतिच्छन्दसोत्तमया वर्ष्म वा एषा छन्दसां यदतिच्छन्दा वर्ष्मणैवैनꣳ समानानां करोति " [सं० का० ५ प्र० २ अ० १] इति ।

" अतिच्छन्दस्यन्यच्छन्दसामन्तर्भावात्सर्वेषामन्येषां छन्दसामियमतिच्छन्दा (क)शरीरम् । अ(य)मीदृशयोत्तमया सादनेनैनं यजमानं समानानामन्येषां पुरुषाणां शरीरस्थानीयमेव करोति, तस्मादनयोत्तमया सादयति ।

अत्रोत्तमायां ये बहवः सच्छन्दाः शुचिषदित्यादयस्तान्प्रशंसति—

"सदृती भवति सत्त्वमेवैनं गमयति" [सं० का० ५ प्र० २ अ० १] इति[4] ।

ऋचो बहुभिः सच्छन्दैरुपेतत्वेनैनं यजमानं सत्त्वं चिरकालावस्थत्वं गमयति प्रापयति । अत्र विनियोगसंग्रहः—

---

१ क. घ. ङ. °जमाने । २ क. घ. ङ. °विषयं प्र° । ३ ख. च. °च्छन्क्योयुक्तर्मति-च्छन्दा शरी° । ४ ख. च. °ति । हंस इत्यादिकाया° अ° । ५ ख. च, °तत्वात्सैषु छन्दो । एवं । ६ ख. च °वस्थायित्वं प्रा° ।

(आसन्दीस्थापिताग्नेरुपस्थानम्)

विष्णोश्चतुर्भिराक्रामेदक्रन्देत्यनुवक्त्यथ ।
अग्ने चतुर्भिरावृत्त उदु पाशं विमुञ्चति ॥
आ त्वोख्यमाहरेदग्नेऽभ्युपस्थाय चतुष्टयात् ।
सीदेत्यादेस्तथाऽऽसन्द्यां सादयेत्षोडशोदिताः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे द्वितीयप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ चतुर्थाष्टके द्वितीयप्रपाठके द्वितीयोऽनुवाकः) ।

दिवस्परि प्रथमं जज्ञे अग्निरस्मद्द्वितीयं परि जातवेदाः । तृतीयमप्सु नृमणा अजस्र-मिन्धान एनं जरते स्वाधीः । विश्मा ते अग्ने त्रेधा त्रयाणि विश्मा ते सध्र विभृतं पुरुत्रा । विश्मा ते नाम परमं गुहा यद्विश्मा तमुत्सं यत आजगन्थ । समुद्रे त्वा नृमणा अप्स्वन्त-र्नृचक्षा ईधे दिवो अग्न ऊधन् । तृतीये त्वा (१) रजसि तास्थिवाꣳसमृतस्य योनौ महिषा अहिन्वन् । अक्रन्ददग्निः स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन् । सद्यो जज्ञानो वि हीमिद्धो अख्यदा रोदसी भानुना भात्य-न्तः । उशिक्पावको अरतिः सुमेधा मर्तेष्व-ग्निरमृतो नि धायि । इयर्ति धूममरुषं भरि-भ्रदुच्छुक्रेण शोचिषा द्यामिनक्षत् । विश्वस्य

(आसन्दीस्थापिताग्निरुपस्थानम्)

केतुर्भुवनस्य गर्भ आ (२) रोदसी अपृणाज्जायमानः। वीडुं चिदद्रिमभिनत्परायञ्जना यदग्निमयंजन्त पञ्च। श्रीणामुदारो धरुणो रयीणां मनीषाणां प्रार्पणः सोमगोपाः। वसोः सूनुः सहसो अप्सु राजा वि भात्यग्र उषसामिधानः। यस्ते अद्य कृणवद्भद्रशोचेऽपूपं देव घृतवन्तमग्ने। प्र तं नय प्रतरं वस्यो अच्छाभि सुम्नं देवभक्तं यविष्ठ। आ (३) तं भज सौश्रवसेष्वग्न उक्थउक्थ आ भज शस्यमाने। प्रियः सूर्ये प्रियो अग्ना भवात्युज्जातेन भिनदुज्जनित्वैः। त्वामग्ने यजमाना अनु द्यून्विश्वा वसूनि दधिरे वार्याणि। त्वया सह द्रविणमिच्छमाना व्रजं गोमन्तमुशिजो वि वव्रुः। दृशानो रुक्म उर्व्या व्यद्यौद्दुर्मर्षमायुः श्रिये रुचानः। अग्निरमृतो अभवद्वयोभिर्यदेनं द्यौरजनयत्सुरेताः (४)॥

(तृतीयं त्वा गर्भ आ षोडशाऽऽ यच्चत्वारिं च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके द्वितीयप्रपाठके द्वितीयोऽनुवाकः॥ २॥

(अथ चतुर्थकाण्डे द्वितीयप्रपाठके द्वितीयोऽनुवाकः)।

प्रथमेऽनुवाके वह्नेरासन्द्यां स्थापनमुक्तम्। द्वितीये तस्याग्नेरुपस्थानमुच्यते। कल्पः—" दिवस्परीत्येकादशर्चेनाभिस्त्वोदशभिर्वा वात्सप्रेणोपतिष्ठते पूर्वेद्युर्विष्णुक्रमान्क्रामत्युत्तरेद्युरुपतिष्ठत एवं सदा कुर्यादहः सोमं क्रीणीयात्तदहरुभयं समस्येत्प च क्रामेदुप च तिष्ठति " इति। तत्र प्रथमामाह—

(आसन्दीस्थापिताग्नेरुपस्थानम्)

दिवस्परि प्रथममिति । अग्निः प्रथमं दिवस्परि द्युलोकस्योपरि जज्ञे सूर्यरूपेणोत्पन्नः । अस्मत्पर्यस्मदीयस्य मनुष्यलोकस्योपरि जातवेदा द्वितीयं जज्ञे प्रसिद्धवह्निरूपेण द्वितीयं जन्म प्राप्तवान् । अप्सु समुद्रे तृतीयं जज्ञे वडवानलरूपेणोत्पन्नः । अजस्रं त्रिष्वपि जन्मसु नृमणा नृषु यजमानेषु मनोऽनुग्रहबुद्धिर्यस्यासौ नृमणाः । एनमीदृशमग्निमिन्धानः पुरोडाशादिभिर्दीपयन्स्वाधीः स्वायत्तचित्तो जरते जीर्यते जरापर्यन्तं परिचरतीत्यर्थः । अथ द्वितीयामाह—

विश्मा ते अग्न इति । हेऽग्ने यानि पूर्वस्मिन्मन्त्रे दिवस्परीत्यादिना त्रेधा स्वरूपाण्युक्तानि आदित्याग्निवडवानलरूपाणि तानि त्रयाणि त्रित्वसंख्याकानि रूपाणि, वयं विश्म ज्ञातुमिच्छाम । किंच ते तव पुरुत्रा पुरुषु प्रदेशेषु गार्हपत्याहवनीयान्वाहार्यपचनाग्नीध्रीयशालाग्नित्वरूपेषु सद्म विभक्तमवस्थानं संपादितं तदपि विश्म ज्ञातुमिच्छाम । किंच ते तव परममुत्कृष्टं गुहा गुह्यं गोप्यं देवेद्ध मन्विद्धेत्यादिमन्त्रप्रतिपाद्यं नाम यदस्ति तदपि विश्म । देवेद्धादीनां नामत्वं मन्त्रान्तरे संबुद्धिबलादवगम्यते—अग्ने देवेद्ध मन्विद्ध मन्द्रजिह्वेति । किंच यत्त उत्सादद्वृष्टिरूपात्प्रस्रवणादाजगन्थ वैद्युतरूपेण त्वमागतोऽसि तमुत्सं विश्म ।

अथ तृतीयामाह—

समुद्रे त्वेति । हेऽग्ने त्वामीदृशे यजमानोऽहं दीपयामि । कीदृशो यजमानः, नृमणा नृषु मनुष्येषु कर्मानुष्ठानपरेषु ऋत्विक्षु मनोऽनुसंधानकारणं चित्तं यस्यासौ नृमणाः, नृचक्षा नृषु पुरुषेषु वेदपारं गतेषु मध्ये चष्टे मन्त्रान्विस्पष्टं वक्तीति नृचक्षाः । कीदृशं त्वाम् । समुद्रे तस्थिवांसं वडवानलरूपेण स्थितम् । तथाऽप्सु वृष्टिरूपास्वन्तर्वैद्युतरूपेण तस्थिवांसम् । तथा दिवो द्युलोकस्योधःधस्थानीये तृतीये समुद्रवृष्टचपेक्षया तृतीयस्थाने रजसि रञ्जनात्मके तेजोमण्डले सूर्यरूपेण तस्थिवांसम् । महिषा महान्तो यजमाना ऋतस्य योनौ यज्ञस्य संबन्धिनि वेदिस्थानेऽहिन्वंस्त्वां प्रीणयन्ति । अथ चतुर्थीमाह—

अक्रन्ददग्निरिति । अयमग्निरक्रन्ददस्मदनिष्टनिवारणार्थं गर्जतु । किमिव, स्तनयन्निव द्यौः । यथा द्युलोकस्थो मेघो गर्जन्सस्यशोषभीतिं निवारयति तद्वत् । किं कुर्वन् । क्षाम दाहकमस्माद्विरुद्धं रेरिहल्लेलिहानो वीरुधः समञ्जन्पुष्पलतावदस्मदनुकूलानि सम्यगभिषिञ्चन् । हि यस्माज्जज्ञान उत्पद्यमानः सद्य ईं

१ स. च. तमप्युत्सं । २ स. च. °कारि चिं ।

(आसन्दीस्थापिताग्नेरुपस्थानम्)

तदानीमेवेद्धो दीप्तो विविधं जगदरुग्यत्प्रख्यापयति। रोदसी द्यावापृथिव्योरन्तर्भानुना रश्मिना स्वयमाभाति समन्वात्मकाशते। अथ पञ्चमीमाह—

उशिक्पावक इति। उशिगनुग्रहपूर्वमस्मान्कामयमानः। पावकः शोधकः। अरतिर्यागरहितेषु प्रीतिरहितः। सुमेधाः शोभना मेधा सेवकाभिप्रायधारणशक्तिर्यस्यासौ सुमेधाः। अमृतो मरणरहितः। तादृशोऽग्निर्मर्तेषु मनुष्येषु निधायि निहितः। अरुषमरोषं चक्षुराद्युपद्रवरहितं धूमं भरिभ्रदतिशयेन धारयन्नुदियर्युर्ध्वं प्रसारयति। शुक्रेण शोचिषा निर्मलेन तेजसा प्रभारूपेण द्यामिनक्षन्नक्षति व्याप्नोति। अथ षष्ठीमाह—

विश्वस्य केतुरिति। विश्वस्य केतुर्जगतो ज्ञाता भुवनस्य गर्भो गर्भवदन्तरवस्थितो जायमानो जातमात्र एव सन्रोदसी द्यावापृथिव्यावापृणात्सर्वतः स्वतेजसा पूरयति। यद्वा पञ्च यजमानसहिते ऋत्विग्भूताः पञ्चसंख्याका जना अग्निमयजन्त तदानीं परायन्नाहुतिरूपेणाऽऽदित्यस्य समीपं गच्छन्वीडुंचिद्दृढमेवार्दि पर्वतसमानं मेघमभिनद्विदारितवान्। अथ सप्तमीमाह—

श्रीणामुदार इति। श्रीणां गवाश्वादीनां संपदामुदार उत्कर्षेण प्रापयिता। रयीणां धनानां धरुणो धारयिता। मनीषाणामपेक्षितानां स्वर्गादिफलानां प्रार्पणः प्रापयिता। सोमगोपा यजमानेनानुष्ठेयस्य सोमयागस्य रक्षिता। वसोर्निवासहेतोः सहसो मथनवेगरूपस्य बलस्य सूनुः पुत्रः। अप्सु वृष्टिरूपासु राजा वैद्युतरूपेण दीप्यमानः। उषसामग्रे प्रातःकाल इधानोऽग्निहोत्रिभिर्दीप्यमानो विभाति विशेषेण भासते। अथाष्टमीमाह—

यस्ते अद्येति। हे भद्रशोचे कल्याणदीप्तेऽग्ने देव ते तवाद्यास्मिन्दिवसे घृतवन्तमपूपमुपस्तरणाभिघारणोपेतं पुरोडाशं यो यजमानः कृणवत्करोति। हे यविष्ठ युवतम देवभक्तं देवेषु भक्तियुक्तं तं पुरोडाशकारिणं यजमानमभियुन्नमच्छाभिमतं धनं प्राप्तुं प्रकर्षेण नय प्रेरय। कीदृशं युन्नं, पतरां प्रकृष्टतरं वस्योऽतिशयेन निवासकारणम्। अथ नवमीमाह—

आ तं भजेति। शोभनं श्रवः कीर्तिः सुश्रवस्तस्य संबन्धीनि तत्कारणानि कर्माणि सौश्रवसानि तेषु कर्मसु, उक्थ उक्थे निष्केवल्यशउगादिरूपे तच्छस्त्रे शस्यमाने सति तं देवभक्तं यजमानमाभज सर्वतः संप्रेरय निर-

---

१ स. घ. ङ. च. °हिता ऋ°। २ स. च. °चिद्दृढ°। ३ स. च. °तरां व°।

(आसन्दीस्थापिताग्निरुपस्थानम्)

ष्तरं कर्मानुष्ठायिनं कुर्वित्यर्थः । आभजेति द्विरुक्तेर्वाक्यद्वयमिदं कर्तव्यं, सौश्रवसेषु कर्मसु प्रेरयेत्येकं वाक्यम् । तत्तच्छस्त्रे प्रेरयेत्येकं वाक्यम् । अयं यजमानः सूर्ये प्रियो भवति भवतु । अग्ना वह्नावपि प्रियो भवतु । तथा जातेनोत्पन्नेन पुत्रेणोद्भिनदद्भेदमभिवृद्धिं प्राप्नोतु । तथा जनित्वैर्जनिष्यमाणैः पौत्रादिभिश्चोद्भिनदत् । अथ दशमीमाह—

त्वामग्ने यजेति । हेऽग्ने यजमानाः सर्वेऽनुद्यून्प्रतिदिनं त्वामनु त्वामेवानुगच्छन्तो वार्याणि वरणीयानि विश्वा वसूनि सर्वाणि धनानि दधिरे धृतवन्तः । त्वया सहावस्थितास्ते यजमाना द्रविणमिच्छमानाः पुनरप्यधिकं द्रव्यं काङ्क्षन्त उशिजो धनसाध्यानि कर्माणि कामयमाना गोमन्तं बहुभिर्गोभिर्युक्तं व्रजं गोनिवासस्थानं विवव्रुर्विशेषेण वृतवन्तः । अथैकादशीमाह—

दृशानो रुक्म इति । दृशानो दर्शनीयो रुक्मः सुवर्णसदृश उर्व्या महत्या दीप्त्या व्यद्यौद्विद्योतते स्म । किं कुर्वन्, दुर्मर्षमितरैरतिरस्कार्यमायुर्जीवनं श्रिये श्रयितुं रुचानो वाञ्छन् । तथाविधोऽग्निर्वयोभिरन्नैर्हविर्भिरमृतोऽभवत् । यद्यस्मादेनमग्निं द्यौर्द्युलोकवासिदेवगणाः सुरेताः सन्नजनयत्तस्मादमृतत्वं युक्तम् ।

तदेतदेकादशमन्त्रात्मकं सूक्तं विनियुङ्क्ते—

" वात्सप्रेणोप तिष्ठत एतेन वै वत्सप्रीर्भालन्दनोऽग्नेः प्रियं धामावारुन्धाग्नेरेवैतेन प्रियं धामाव रुन्धे " [सं० का० ५ प्र० २ अ० १] इति ।

वत्सप्रीनामकेन महर्षिणाऽर्धर्चात् दिवस्परीत्यादिकं सूक्तं वात्सप्रं, तेनाग्निमुपतिष्ठेत । भालन्दनस्य पुत्रो वत्सप्रीनामको महर्षिरेतेन सूक्तेनाग्नेः प्रियं धाम स्थानं प्राप्तवान् । ततो यजमानोऽपि तथा प्राप्नोति ।

तस्य सूक्तस्यैकादशमन्त्रसमूहात्मकत्वं विधत्ते—

" एकादशं भवत्येकधैव यजमाने वीर्यं दधाति " [सं० का० ५ प्र० २ अ० १] इति ।

एकधैव युगपदेव । समूहस्य युगपत्प्रवृत्तत्वात् ।

तदिदं सूक्तं विष्णुक्रमांश्च लोकद्वयहेतुत्वेन प्रशंसति—

" स्तोमेन वै देवा अस्मिँल्लोक आर्ध्नुवन्छन्दोभिरमुष्मिन्तस्तोमस्येव खलु वा एतद्रूपं यद्वात्सप्रं यद्वात्सप्रेणोपतिष्ठत इममेव तेन लोकमभि जयति यद्विष्णुक्रमान्क्रमतेऽमुमेव तैर्लोकमभि जयति " [सं० का० ५ प्र० २ अ० १] इति ।

(आसन्दीस्थापितानेरुपस्थानम्)

गीत्याश्रयाणामावृत्तानामृचां समूहः स्तोमः स्तुतिहेतुर्मन्त्रसमूह एतल्लोकसमृद्धिप्राप्तिसाधनं, समूहाकारमन्तरेण विशिष्टानि च्छन्दांसि स्वर्गसमृद्धिकारणानि । तथा सति वात्सप्रसूक्तं समूहरूपत्वादेतल्लोकसमृद्धिकरम् । छन्दःशब्दोपेता विष्णुक्रममन्त्रास्तु बहुत्वात्स्वर्गसमृद्धिहेतवः ।

उभयानुष्ठानस्य कालविशेषं विधत्ते——

" पूर्वेद्युः प्र क्रामत्युत्तरेद्युरुप तिष्ठते तस्माद्योगेऽन्यासां प्रजानां मनःक्षेमेऽन्यासां तस्माद्यायावरः क्षेम्यस्येशे तस्माद्यायावरः क्षेम्यमध्यवस्यति " [सं० का० ५ प्र० २ अ० १] इति ।

अलब्धस्य लाभो योगो लब्धस्य परिपालनं क्षेमः । काश्चित्प्रजा योगः श्रेयानिति मन्यन्त आर्जनशीला बहुव्ययाः । काश्चित्क्षेम एव श्रेयानिति मन्यन्त इतः परमर्जयितुमशक्त्या व्ययभीरवः । तदिदं प्रजानां मनोवैलक्षण्यं क्रमे(म)णोपस्थानकालहेतुकम् । यस्मात्प्रयाणशीलस्य पुरुषस्यार्जयितुमवकाशो नास्ति तस्माद्यायावरः प्रयाणशीलः पुरुषः क्षेम्यस्येशे विद्यमानद्रव्यरक्षणस्यैव प्रभुर्भवति । यस्मादेवं लोके दृष्टं तस्मादत्र देवयजनदेशं प्रति यायावरो यजमानः साधनान्तरसंपादनेच्छां परित्यज्य विद्यमानान्येवाग्न्यादिसाधनान्युपस्थानादिव्यापारैः परि(र)क्षितुमध्यवस्यति ।

सोमविक्रयित्वं द्योतयितुं तदङ्गानुष्ठानकालविशेषं चावगमयितुं दक्षिणाङ्गं किंचिद्विधत्ते——

" मुष्टी करोति वाचं यच्छति यज्ञस्य धृत्यै " [सं० का० ५ प्र० २ अ० १] इति ।

स्वाहा यज्ञं मनसेत्यादिभिर्मन्त्रैर्हस्तयोरङ्गुल्याकुञ्चनं मुष्टीकरणम् । मौनं वाग्यमः । तदुभयं यज्ञस्य पलायनपरिहाराय भवति ।

अत्र विनियोगसंग्रहः——

दिवस्परीत्यनुवाके वात्सप्रेणोपतिष्ठते ॥

---

१ ख. च. °न्येवोख्याग्न्या° । २ ख. च. परीक्षि° । ३ ख. च. °स्य पालनदार्ढ्याय भ° । ४ ख. च. °व इत्य° । ५ ख. च. °केन वा° ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेद-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे द्वितीयप्रपाठके
द्वितीयोऽनुवाकः ॥ २ ॥

(अथ चतुर्थाष्टके द्वितीयप्रपाठके तृतीयोऽनुवाकः) ।

अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः । प्र प्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे । उदु त्वा विश्वे देवा अग्ने भरन्तु चित्तिभिः । स नो भव शिवतमः सुप्रतीको विभावसुः । प्रेदग्ने ज्योतिष्मान्याहि शिवेभिरर्चिभिस्त्वम् । बृहद्भिर्भानुभिर्भासन्मा हिꣳसीस्तनुवा प्रजाः । समिधाऽग्निं दुवस्यत घृतैर्बोधयतातिथिम् । आ (१) अस्मिन्हव्या जुहोतन । प्रप्रायमग्निर्भरतस्य शृण्वे वि यत्सूर्यो न रोचते बृहद्भाः । अभि यः पूरुं पृतनासु तस्थौ दीदाय दैव्यो अतिथिः शिवो नः । आपो देवीः प्रति गृह्णीत भस्मैतत्स्योने कृणुध्वꣳ सुरभावु लोके । तस्मै नमन्तां जनयः सुपत्नीर्मातेव पुत्रं बिभृता स्वेनम् [अप्स्वग्ने सधिष्टव (२) सौषधीरनु रुध्यसे । गर्भे सञ्जायसे पुनः । गर्भो अस्योषधीनां गर्भो वनस्पतीनाम् । गर्भो विश्वस्य भूतस्याग्ने गर्भो अपामसि । प्रसद्य भस्मना योनिमपृथि-

(चयनार्थदेवयजनपरिग्रहाभिधानम्)

वीमग्ने । स॰सृज्य मातृभिस्त्वं ज्योतिष्मान्पुनराऽसदः । पुनरासद्य सदनमपश्यं पृथिवीमग्ने । शेषे मातुर्यथोपस्येऽन्तरस्या॰ शिवतमः । पुनरूर्जा (३) नि वर्तस्व पुनरग्न इषाऽऽयुषा । पुनर्नः पाहि विश्वतः । सह रय्या नि वर्तस्वाग्ने पिन्वस्व धारया । विश्वप्न्या विश्वतस्परि । पुनस्त्वाऽऽदित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः । घृतेन त्वं तनुवो वर्धयस्व सत्याः सन्तु यजमानस्य कामाः । बोधा नो अस्य वचसो यविष्ठ म॰हिष्ठस्य प्रभृतस्य स्वधावः । पीयति त्वो अनु त्वो गृणाति वन्दारुस्ते तनुवं वन्दे अग्ने । स बोधि सूरिर्मघवा वसुदावा वसुपतिः । युयोध्यस्मद्द्वेष॰सि (४) ॥

(आ त्वोर्जाऽनु षोडश च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके द्वितीयप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ चतुर्थकाण्डे द्वितीयप्रपाठके तृतीयोऽनुवाकः) ।

द्वितीयानुवाके वह्नेरुरुव्यस्योपस्थानमुक्तं, तृतीये चयनार्थस्य देवयजनस्य परिग्रहोऽभिधीयते ।

कल्पः—" व्रतकालेऽग्नपतेऽग्नस्य नो देहीत्यौदुम्बरीं समिधं व्रतेऽवस्वाऽभ्यादधाति " इति । व्रतार्थं क्षीरदेवे । पाठस्तु—

अग्नपतेऽग्नस्येति । हेऽग्नपतेऽग्नेऽग्नभोक्तस्य रोगरहितस्य पुष्टिपतो वह्नेर्नो

रत्नस्य प्राप्तिं नोऽस्मभ्यं दोहि । प्रकर्षेण हविषो दातारं यजमानं प्रतारिषः प्रकर्षेण दुरितात्तारय । नोऽस्माकं द्विपदे चतुष्पदे मनुष्याय पशवे चोर्जं बलं धेहि संपादय । अस्य मन्त्रस्य प्रथमपादेऽन्नपतिशब्दार्थं दर्शयति-

"अन्नपतेऽन्नस्य नो देहीत्याहाग्निर्वा अन्नपतिः स एवास्मा अन्नं प्र यच्छति" [सं० का० ५ प्र० २ अ० २] इति ।

द्वितीयपादेऽनमीवशब्दार्थं दर्शयति--

"अनमीवस्य शुष्मिण इत्याहायक्ष्मस्येति वावैतदाह" [सं० का० ५ प्र० २ अ० २] इति ।

उत्तरार्धे तारिषो धेहीति पदयोस्तात्पर्यं दर्शयति--

"प्र प्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पद इत्याहाऽऽशिषमेवैतामा शास्ते" [सं० का० ५ प्र० २ अ० २] इति ।

कल्पः--"उदु त्वा विश्वे देवा इत्युरुव्यमुद्यम्य" इति । पाठस्तु--

उदु त्वा विश्व इति । हेऽग्ने विश्वे सर्वेऽपि देवाः प्राणरूपाश्चित्तिभिरुद्यमनकुशलाभिर्धीवृत्तिभिरुदूर्ध्वमेव त्वां भरन्तु । स त्वं नोऽस्माकं शिवतमः शान्ततमः सुप्रतीकः सुमुखो विभावसुः प्रभया वासयिता च भव ।

अस्य मन्त्रस्य प्रथमपादे देवशब्दार्थं दर्शयति--

"उदु त्वा विश्वे देवा इत्याह प्राणा वै विश्वे देवाः प्राणैरेवैनमुद्यच्छते" [सं० का० ५ प्र० २ अ० २] इति ।

दीव्यन्ति स्वस्वकार्येषु व्यवहरन्तीति देवाः प्राणाः ।

द्वितीयपादे बुध्न्यादिशब्दान्परित्यज्य चित्तिशब्दप्रयोगस्य तात्पर्यं दर्शयति--

"अग्ने भरन्तु चित्तिभिरित्याह यस्मा एवैनं चित्तायोद्यच्छते तेनैवैनꣳ समर्धयति" [सं० का० ५ प्र० २ अ० २] इति ।

चित्तिशब्देन चित्ताभिप्रेतकार्यं समुच्यते । तथा सति यस्मै कार्यायेदमुद्यमनं तेनैव कार्येणैनमग्निं समृद्धं करोति ।

यदुक्तं सूत्रकारेण--"सीद त्वं मातुरस्या उपस्थ इति चतसृभिर्द्वीषे शकटे प्रउग शुरुव्यमासादयति" इति । ईषाग्रयोर्मेलनस्थानं प्रउगम् । तदेतत्सूत्रोक्तमासादनं विधत्ते--

१ ब. ङ. ञ. चित्तश्च । २ ब. च. सूच्यते । ३ घ. ङ. °उगे शकट्मा° ।

(चयनार्थदेवयजनपरिग्रहाभिधानम्)

" चतसृभिरा सादयति चत्वारि छन्दाꣳसि छन्दोभिरेवातिच्छन्दसोत्तमया वर्ष्म वा एषा छन्दसां यदतिच्छन्दा वर्ष्मैवैनꣳ समानानां करोति सद्वती भवति सत्त्वमेवैनं गमयति " [सं० का० ५ प्र० २ अ० २] इति ।

सीद त्वमित्यादयश्चतस्र ऋचस्तद्ब्राह्मणं चेत्येतत्सर्वं प्रथमानुवाके व्याख्यातम् । कल्पः—" प्रेदग्ने ज्योतिष्मान्याहीति प्रयाति " इति । पाठस्तु—

प्रेदग्ने ज्योतिष्मानिति । हेऽग्ने शिवेभिरार्चीभिः शान्ताभिर्ज्वालाभिर्ज्योतिष्मान्प्रकाशयुक्तस्त्वं प्रेधाहि देवयजनप्रदेशं प्रयाह्येव । बृहद्भिर्भानुभिः पौढै रश्मिभिर्भासञ्जगद्वभासयंस्तनुवा स्वकीयेन दाहकेन शरीरेण प्रजा मा हिंसीः ।

अस्य मन्त्रस्य प्रथमपादे ज्योतिष्मच्छब्दस्य तात्पर्यं दर्शयति—

" प्रेदग्ने ज्योतिष्मान्याहीत्याह ज्योतिरेवास्मिन्दधाति " [सं० का० ५ प्र० २ अ० २] इति ।

चतुर्थपादे हिंसां निषेद्धुं प्रसार्कं दर्शयति—

" तनुवा वा एष हिनस्ति यꣳ हिनस्ति मा हिꣳसीस्तनुवा प्रजा इत्याह प्रजाभ्य एवैनꣳ शमयति " [सं० का० ५ प्र० २ अ० २] इति ।

अग्निर्यं पुरुषं हिनस्ति न तं शस्त्रेण प्रहृत्य हन्ति, किंतु ज्वालामयेन स्वशरीरेणैव तं दग्ध्वा हन्ति । अतस्तनुवा मा हिꣳसीरिति प्रार्थ्यते ।

प्रयाणकाले शकटस्य ध्वनौ सति प्रायश्चित्तं विधत्ते—

" रक्षाꣳसि वा एतद्यज्ञꣳ सचन्ते यदन उत्सर्जत्यक्रन्ददित्यन्वाह रक्षसामपहत्यै " [सं० का० ५ प्र० २ अ० २] इति ।

यदनः शकटमुत्सर्जति गमने ध्वनिं करोत्येतद्यज्ञसाधनं शकटं रक्षांसि सचन्ते समवयन्ति । अतस्तत्परिहारायाक्रन्ददग्निरित्येतामृचमनुब्रूयात् । सा च पूर्वानुवाके समाम्नाता व्याख्याता च । विधत्ते—

" आनसा वहन्त्यपचितिमेवास्मिन्दधाति तस्मादनस्वी च रथी चातिथीनामपचिततमौ " [सं० का० ५ प्र० २ अ० २] इति ।

एतन्नामनसा शकटेन देवयजनप्रदेशं वहन्ति प्रापयेत् । तथा सत्यस्मिन्नग्नौ पूजां संपादितवान्भवति । यस्मादेवं तस्माल्लोकेऽपि गमनकाले शकटारूढरथारूढाश्वतिथीनां सर्वेऽतिपूजितौ । परिवृढो हि तथा गच्छति न दरिद्रः ।

---

१ क. घ. ङ. हिंसानिषेधा° । २ क. घ. ङ. °ऽयमानेन ।

एतद्वेदनं प्रशंसति—

" अपचितिमान्भवति य एवं वेद" [तै० का० ५ प्र० २ अ० २] इति ।

कल्पः—" समिधाऽग्निं दुवस्यतेति घृतानुषिक्तामवसिते समिधमादधाति " इति । पाठस्तु—

समिधाऽग्निमिति । हे क्षत्रिययजमाना एतमग्निं समिधा दुवस्यत परिचरत । घृतानुषिक्तयाऽनया परिचरतेत्यर्थः । घृतैरेतस्येष्टेरतिथिमिवैनं बोधयतोद्दीपयत । ततश्चास्मिन्नग्नौ हव्यानि हवींष्याजुहोतन साकल्येन जुहुत ।

तमेतं मन्त्रं विनियुङ्क्ते—

" समिधाऽग्निं दुवस्यतेति घृतानुषिक्तामवसिते समिधमा दधाति यथाऽतिथय आगताय सर्पिष्वदातिथ्यं क्रियते तादृगेव तत् " [तै० का० ५ प्र० २ अ० २] इति । अवसिते प्रयाणे समाप्ते सति । सर्पिष्वद्घृतयुक्तमन्नम् ।

कल्पः—"उत्तरया त्रिष्टुभा राजन्यस्य " इति । समिधमादधातीत्यनुवर्तते ।

पाठस्तु—

प्रप्रायमग्निरिति । अयमग्निर्भरतस्य हविर्भृतवतो यजमानस्याऽऽह्वानं प्रशृण्वेऽतिप्रकर्षेण शृणोतु । यद्योऽग्निः सूर्यो न सूर्य इवाधिकं [भा] भासमानः सन्बृहद्दीचतेऽत्यन्तं दीप्यते । योऽग्निः पृतनासु संग्रामेषु पूरुं जयपूर्तिमभितस्थौ सर्वतः करोति, सोऽग्निर्नोऽस्माकमतिथिर्दीदाय भवतु, अतिथिरिवेहास्मास्वा(ह समा)गच्छतु । कीदृशोऽग्निः, दैव्यो देवेभ्यो हितः, शिवः परममङ्गलरूपः ।

समिधाऽग्निं प्रप्रायमग्निरित्यनयोः समिदाधानमन्त्रयोर्विषयव्यवस्थां विधत्ते—

" गायत्रिया ब्राह्मणस्य गायत्रो हि ब्राह्मणस्त्रिष्टुभा राजन्यस्य त्रैष्टुभो हि राजन्यः " [तै० का० ५ प्र० २ अ० २] इति ।

समिधाऽग्निमिति गायत्री, प्रप्रायमिति त्रिष्टुप् ।

कल्पः—" आपो देवीः प्रतिगृह्णीत भस्मैतदिति तिसृभिरप्सु भस्म प्रवेशयति " इति । तत्र प्रथमामाह—

आपो देवीरिति । हे आपो देवीर्दैव्यो भस्मोत्थाग्नेरुपरि संचितं भस्म

---

१ क. घ. ङ. °तत्स्पृष्टै° । २ ख. च. °र्भिरणव° । ३ ख. च. इव भा° । ४ ख. च. °हद्दिवीच° । ५ ख. च. °दायाति° । ६ क. घ. ङ. °रिव चास्मा° ।

(स्वयनार्थदेवयजनपरिग्रहाभिधानम्)

प्रतिगृह्णीत। एतदेवाभिप्रेत्य सूत्रकारेणोक्तम्—"यद्युखां भस्माभिनिषीदेदुरुव्यमा-दायोदकान्तं गत्वा" इति। एतत्प्रतिगृहीतं भस्म स्योने सुखकरे सुरभावु सुगन्धयुक्त एव लोके स्थाने कृणुध्वं स्थापयत। शोभनः पतिर्वरुणो यासां ताः सुपत्न्यः। आपो वरुणस्य पत्नय आसन्नित्यन्यत्र श्रूयते। जनयोऽग्नेर्जनन्य आपः। वाडवैद्युतरूपमग्निं प्रत्यपां जनयितृत्वम्। ईदृश्य आपस्तस्मा अग्नये नमन्तां पेशी भवन्तु, तमग्निं पालयितुं वश्याः सावधाना भवन्त्वित्यर्थः। हे आपो माता पुत्रं पोषयति यद्वत्तद्वदेनमग्निं सुष्ठु बिभृत पोषयत दीपयत।

अथ द्वितीयामाह—

अप्स्वग्न इति। हेऽग्ने तव सधिः सहो बलं भस्मरूपमप्सु वर्तते। स त्वमोषधीरनुरुध्यसे व्रीहियवाद्योषधीरनुसरसि। जाठराग्निरूपेण तत्स्वीकारात्। अरण्योर्गर्भे स्थितः सन्पुनः पुनः सम्यग्जायसे। अथ तृतीयामाह—

गर्भो अस्योषधीनामिति। भेषजरूप ओषधिविशेष उत्पद्यमानत्वा-त्त्वमोषधीनां गर्भोऽसि। तथाऽरणीभ्यामुत्पद्यमानत्वाद्वनस्पतीनां गर्भोऽसि। हेऽग्ने विश्वस्य भूतस्य सर्वस्य प्राणिजातस्य जठरे वर्तमानतया गर्भोऽसि। तथा वाडवैद्युतरूपेणापां गर्भोऽसि। एतैर्मन्त्रैः साध्यं प्रवेशनं विधत्ते—

"अप्सु भस्म प्र वेशयत्यप्सुयोनिर्वा अग्निः स्वामेवैनं योनिं गमयति" [तै० का० ५ प्र० २ अ० २] इति।

आपो देवीरित्यादिकान्मन्त्रान्विनियुङ्क्ते—

"तिसृभिः प्र वेशयति त्रिवृद्वा अग्निर्यावानेवाग्निस्तं प्रतिष्ठां गमयति" [तै० का० ५ प्र० २ अ० २] इति। आहवनीयादिरूपेणाग्नेस्त्रिवृत्त्वम्।

कल्पः—"भस्मनोपादाय प्रपीड्य प्रसद्य भस्मनेति द्वाभ्यामुखायां प्रत्यव-धाय" इति। तत्र प्रथमामाह—

प्रसद्य भस्मनेति। हेऽग्ने भस्मना सह योनिं कारणभूतां पृथिवीं प्रसद्य, किं पृथिवीमेव, नेत्याह—अपश्च योनिभूताः प्रतिपद्य, किंच मातृभिराद्भिः

---

१ क. घ. ङ. प्रक्षा। २ ख. च. पालयति। ३ ख. च. °रूपेस्तृणविशेषरूप°।

पृथिव्या च संसृज्यैकीभूय त्वं ज्योतिष्मान्भृशं ज्योतिः संपन्नः पुनः पश्चादासदः स्वयमेव स्थानमुखामासीद । अथ द्वितीयामाह--

पुनरासद्येति । हेऽग्ने पुनरपि सदनं स्वस्थानमपः पृथिवीं चाऽऽसद्य प्रतिपद्य पुनरस्यामेवोखायामन्तर्मध्ये शिवतमः शान्ततमः शेषे शयनं करोषि । यथा मातुरुपस्थ उत्सङ्गे सुतः सुखं शेते तद्वत् । एतौ मन्त्रौ विनियुङ्क्ते--

" परा वा एषोऽग्निं वपति योऽप्सु भस्म प्रवेशयति ज्योतिष्मतीभ्यामेव दधाति ज्योतिरेवास्मिन्दधाति " [सं० का० ५ प्र० २ अ० २] इति ।

यो यजमान उखाग्निसंबद्धं भस्माप्सु प्रवेशयति[1] स एषोऽग्निं परावपति नाशयति । अतो विनाशपरिहाराय जलगतं भस्म निष्पीड्य ज्योतिष्मच्छब्दोपेताभ्यामृग्भ्यामुखायामवदध्यात् । त्वं ज्योतिष्मान्पुनरासद इत्येवं ज्योतिष्मच्छब्दोपेतत्वम् । मन्त्रौ द्वित्वं प्रशंसति--

" द्वाभ्यां प्रतिष्ठित्यै " [सं० का० ५ प्र० २ अ० २] इति ।

कल्पः--" पुनरूर्जासह रय्येति पुनरुदैति " इति । निष्पीडितभस्मोपेतायामुखायामग्निं स्थापयेदित्यर्थः । तत्र प्रथममाह--

पुनरूर्जा नीति । हेऽग्ने त्वमूर्जा क्षीरादिरसेन सह पुनर्निवर्तस्वाऽऽगच्छ । इषाऽन्नेनाऽऽयुषा सह पुनरागच्छ । नोऽस्मान्पुनर्विश्वतः सर्वस्मादपराधात्पाहि ।

अथ द्वितीयामाह--

सह रय्या नीति । हेऽग्ने रय्या धनेन सह निवर्तस्व । प्सा भक्षण इति धातुः । विश्वैः सर्वैः प्सायते भक्ष्यते पीयत इति विश्वप्स्नी, तादृश्या वृष्टिधारया विश्वतस्परि सर्वेषां तृणौसस्यलतापादपौदीनामुपरि पिन्वस्व सिञ्च ।

मन्त्रद्वयं विनियुङ्क्ते--

" परा वा एष प्रजां पशून्वपति योऽप्सु भस्म प्रवेशयति पुनरूर्जा सह रय्येति पुनरुदैति प्रजामेव पशूनात्मन्धत्ते " [सं० का० ५ प्र० २ अ० २] इति ।

भस्मनोऽप्सु प्रवेशनेन विनाशितायाः प्रजायाः पशूनां च स्वात्मनि स्थापनाय पुनरुदैति पूर्वमुखाया अपनीतमग्निं पुनरपि निष्पीडितभस्मसहितायाः

---

१ क. घ. ङ. त्वं भृशं ज्योतिष्मान्संप° । २ ख. च. °ति ए° । ३ ख. च. °न्त्रद्वयं प्र° । ४ ख. च. °पयतीत्य° । ५ ख. च. °न्पुनः पुनः कृताद्विश्व° । ६ क. घ ङ. °णधान्यल° । ७ क. घ. ङ. °पाना° ।

(चयनार्थदेवयजनपरिग्रहाभिधानम्)

मुखायां मन्त्रद्वयेन स्थापयेत् । तत्र मन्त्रद्वयबलात्प्रजायाः पशूनां च स्वात्मनि स्थापनं भवति ।

कल्पः—" पुनस्त्वाऽऽदित्या रुद्रा वसवः समिन्धतामिति पुनरूर्ज्जमुपसमिन्धे " इति ' पाठस्तु—

पुनस्त्वाऽऽदित्या इति । हेऽग्ने त्वामादित्या रुद्रा वसवश्च पुनः समिन्धतामुपशान्तं पुनः संदीपयन्तु । हे वसुनीथ वसूनां धनानां नीथ प्रापयितर्ब्राह्मणो ब्राह्मणा ऋत्विजो यज्ञैर्निमित्तभूतैस्त्वां पुनः समिन्धताम् । त्वं घृतेन तृप्तः संस्तनुवोऽस्मदीयशरीराणि वर्धयस्व । तत्त्वयस्त्वयि तुष्टे सति यजमानस्य कामाः सत्याः सन्तु । अस्मिन्मन्त्रे रुद्राद्युक्तेस्तात्पर्यं दर्शयति—

" पुनस्त्वाऽऽदित्या रुद्रा वसवः समिन्धतामित्याहैता वा एतं देवता अग्रे समैन्धत ताभिरेवैनꣳ समिन्धे " [सं० का० ५ प्र० २ अ० २] इति ।

कल्पः—"बोधा स बोधीति बोधयतीभ्यामुपतिष्ठते " इति ।

तत्र प्रथमामाह—

बोधा नो अस्येति । हे स्वधावः स्वधोपलक्षितान्नवन्यविष्ठ युवतम नोऽस्मदीयस्यास्य वचसः स्तुतिरूपस्य बोध तात्पर्यं बुध्यस्व । कीदृशस्य वचसः, मंहिष्ठस्यातिशयेनाभिवृद्धिहेतोः प्रभूतस्य प्रकृष्टेनाऽऽदरेण संपादितस्य । पीयति त्वः । ओप्यायी वृद्धावित्यस्माद्धातोरुत्पन्नः पीयतिशब्दः । त्वशब्द एकशब्दार्थे वर्तते । भवदीयस्तुतिकारिणोर्द्वयोर्यजमानयोर्मध्ये त्व एकः स्तोता यजमानः पीयति वृद्धिमधिकं वक्ति उचितोक्तिमुल्लङ्घ्य निन्दारूपेणातिप्रशंसारूपेण वा यत्किंचिद्वक्ति । त्वोऽनुगृणाति, एकः स्तोताऽनुकूलमुचितमेव वक्ति । अतोऽस्मदभिप्रायं बुध्यस्वेति प्रार्थ्यते[1] । वन्दारुरभिवन्दनपरोऽहं हेऽग्ने त्वदीयां तनुवं वन्दे । अथ द्वितीयामाह—

स बोधि सूरिरिति । हेऽग्ने स त्वं बोधि अस्मदभिप्रायं बुध्यस्व । कीदृशस्त्वं, सूरिर्विद्वान्मघवाऽन्नवान्वसुदावा वसुपदो वसुपतिर्धनपतिः । तादृशस्त्वं द्वेषांसि शत्रुभिः कृतान्द्वेषानस्मद्युयोध्यस्मत्तः[2] पृथक्कुरु । तदेतन्मन्त्रद्वयं विनियुङ्क्ते—

---

१ ख. च. °त । अतो व° । २ ख. च. °ध्यस्माकमराकुरु । ३ क. ग. ङ. °स्मत्पृथ°।

(गार्हपत्यचयनाभिधानम्)

" बोधा स बोधीत्युप तिष्ठते बोधयत्येवैनं तस्मात्सुप्त्वा प्रजाः प बुध्यन्ते" [सं० का० ५ प्र० २ अ० २] इति ।

बोधेति मन्त्रेण स बोधीति मन्त्रेण चैतमाग्निं बोधयत्येव । यस्मादेव शाम्बर्यग्निं पुनरुद्बोधयति तस्माल्लोकेऽपि प्रजाः स्वापं प्राप्य पुनः प्रबुध्यन्ते ।

उपस्थानदेशं विधत्ते--

" यथास्थानमुप तिष्ठते तस्माद्यथास्थानं पशवः पुनरेत्योप तिष्ठन्ते " [सं का० ५ प्र० २ अ० २] इति ।

आहवनीयस्य दक्षिणभागो यजमानस्योपस्थानदेशः । अतोऽत्रापि दक्षिणदेश एव स्थित्वोपतिष्ठेत । यस्मादेवं तस्माल्लोकेऽपि पशवः प्रातःकाले शालाया निर्गत्यारण्ये गत्वा सायं पुनरागत्य स्वं स्वं स्थानमेव सेवन्ते ।

अत्र विनियोगसंग्रहः--

अन्वाऽऽदधाति समिधमुद्यच्छेदुद्वयाऽनलम् ।
प्रेत्यथात्यथ समिधा गम्यन्ते समिधं क्षिपेत् ॥
राजन्यश्चेत्प्रेति मन्त्र आपो भस्माप्तु वेशयेत् ।
त्रिभिः प्रसेति तु द्वाभ्यामुखायां स्थापयेदमुम् ॥
पुनर्द्वाभ्यामुदेत्याग्निं पुनस्त्वेति समिन्धयेत् ।
बोधद्वाभ्यामुपस्थानं मन्त्राः पञ्चदशेरिताः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे द्वितीयप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ चतुर्थाष्टके द्वितीयप्रपाठके चतुर्थोऽनुवाकः) ।

अपेत वीत वि च सर्पतातो येऽत्र स्थ पुराणा ये च नूतनाः । अदादिदं यमोऽवसानं पृथिव्या अक्रन्निमं पितरो लोकमस्मै ।

अग्नेर्भस्मास्यग्नेः पुरीषमसि संज्ञानमसि कामधरणं मयि ते कामधरणं भूयात् । सं या वः

---

१ स. च. °तिष्ठते । व° ।

(गार्हपत्यचयनाभिधानम्)

प्रियास्तनुवः सं प्रिया हृदयानि वः। आत्मा वो अस्तु (१) संप्रियः संप्रियास्तनुवो मम। अयꣳ सो अग्निर्यस्मिन्त्सोममिन्द्रः सुतं दधे जठरे वावशानः। सहस्रियं वाजमत्यं न सप्तिꣳ ससवान्त्सन्त्स्तूयसे जातवेदः। अग्ने दिवो अर्णमच्छा जिगास्यच्छा देवाꣳ ऊचिषे धिष्ण्या ये। याः परस्ताद्रोचने सूर्यस्य याश्चावस्तादुपतिष्ठन्त आपः। अग्ने यत्ते दिवि वर्चः पृथिव्यां यदोषधीषु (२) अप्सु वा यजत्र। येनान्तरिक्षमुर्वाततन्थ त्वेषः स भानुरर्णवो नृचक्षाः। पुरीष्यासो अग्नयः प्रावणेभिः सजोषसः। जुषन्तां हव्यमाहुतमनमीवा इषो महीः। इडामग्ने पुरुदꣳसꣳ सनिं गोः शश्वत्तमꣳ हवमानाय साध। स्यान्नः सूनुस्तनयो विजावाऽग्ने सा ते सुमतिर्भूत्वस्मे। अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः। तं जानन्न (३) अग्न आ रोहाथा नो वर्धया रयिम्। चिदसि तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद परिचिदसि तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद लोकं पृण छिद्रं पृणाथो सीद शिवा त्वम्। इन्द्राग्नी त्वा बृहस्पतिरस्मिन्योनावसीषदन्। ता अस्य सूददोहसः सोमꣳ

श्रीणन्ति पृश्नयः । जन्मन्देवानां विशस्त्रिष्वा
रोचने दिवः (४) ।

(अस्त्योषधीषु जानन्नष्टाचत्वारिंशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
द्वितीयप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ चतुर्थकाण्डे द्वितीयप्रपाठके चतुर्थोऽनुवाकः) ।

तृतीयेऽनुवाके वह्नेरुख्यस्य चयनदेशं प्रति नयनमुक्तम् । अथ चतुर्थे गार्हपत्यचयनमुच्यते ।

कल्पः—" अपवृत्ते दीक्षापरिमाणेऽपेत वीतेति गार्हपत्यचितेरायतनं *व्याममात्रं चतुरस्रं परिमण्डलं वोद्धृत्य " इति । पाठस्तु—

अपेत वीतेति । यमस्य सर्वभूम्यधिपतित्वात्तद्भृत्याः पृथिव्यां सर्वत्र वर्तन्ते । हे यमभृत्या अत्र देवयजनस्थाने पुरातना ये यूयं स्थ नूतनाश्च ये यूयं स्थ ते सर्वेऽप्यपेतास्मात्स्थानादपगच्छत । वीतात्यन्तं विदूरं गच्छत । विसर्पत चातोऽस्मात्स्थानादपेत्य सानिध्यं परित्यज्य विविधं गच्छत । पृथिव्या इदमवसानं स्थानमस्मभ्यं यमोऽदात् । पितरश्चास्मै यजमानायेमं लोकमकल्पन्नेतच्चयनस्थानं कृतवन्तः । तमेतं मन्त्रं विनियुङ्क्ते—

" यावती वै पृथिवी तस्यै यम आधिपत्यं परीयाय यो वै यमं देवयजनमस्या अनिर्याच्याग्निं चिनुते यमायैनꣳ स चिनुतेऽपेतेत्यध्यवसाययति यममेव देवयजनमस्यै निर्याच्याऽऽत्मनेऽग्निं चिनुते " [सं०का०५प्र०२अ०३] इति ।

सर्वस्याः पृथिव्या आधिपत्ये यमेन प्राप्ते सति यो यजमानो यमं प्रत्यस्याः पृथिव्याः संबन्धि देवयजनमयाचित्वा तत्राग्निं चिनुते, तच्चयनं यमार्थमेव भवति न तु स्वयं तत्फलभाग्भवति । अतो यमं याचितुमपेतेति मन्त्रेणाध्यवसाययति देवयजनं निर्चिनुयात् । अतो याचितत्वात्स्वार्थमेव तच्चयनं भवति । तमिमं मन्त्रं प्रशंसति—

" इष्वग्रेण वा अस्या अनामृतमिच्छन्तो नाविन्दन्त देवा एतद्यजुरपश्यन्नपेतेति यदेतेनाध्यवसाययत्यनामृत एवाग्निं चिनुते " [सं०का०५प्र०२अ०३] इति ।

* सर्वेषुपुस्तकेषु व्यायामस्त्रिरत्नि इति पाठो दृश्यते । स भ्रमादिव्यः ।

१ क. घ. ङ. °र्यं नूं ।

(गार्हपत्यचयनाभिधानम्)

मृतैः प्राणिभिराक्रान्तमामृतं तथा न भवतीत्यनामृतं, तादृशमस्याः पृथिव्याः संबन्धि स्थानमिच्छन्तोऽपेक्षमाणा देवा बाणाग्रेण परिमितमीषदपि नाविन्दन्नालभन्त, सर्वमपि भूमिस्थानं प्रेतैराक्रान्तमेवेत्यर्थः। यद्यत्स्थानमन्विष्यते तत्र तत्र विचारणायां बहवः प्रेता अतीता भवन्ति । एतदेवाभिप्रेत्य महाभारते स्मरन्ति—

'अत्र भीष्मशतं दग्धं द्रोणानां च शतत्रयम्' इति ।

एवं सति देवास्तत्परिहारोपायं विचार्यैतद्यजुर्यजुर्वेदस्थमपेक्षीतेत्येतं मन्त्रमपश्यन्। तस्मादनेन मन्त्रेण प्रेतानां निःसारितत्वात्तैरनाक्रान्त एव स्थानेऽग्निं चिनुते । गार्हपत्यचितिस्थानस्योद्धननं विधत्ते—

"उद्धन्ति यदेवास्या अमेध्यं तदप हन्ति" [सं० का० ५ प्र० २ अ० ३] इति ।

अस्याः पृथिव्या उपरि निष्ठीवनादिना यत्स्थानमेध्यं जातं तदुद्धननेन विनिवार्यते । उद्धते प्रदेशे जलेनावोक्षणं विधत्ते—

"अपोऽवोक्षति शान्त्यै" [सं० का० ५ प्र० २ अ० ३] इति ।

उद्धननेन निष्पन्ना भूमिर्जलेन शान्ता भवति ।

कल्पः—"अग्नेर्भस्मासीति सिकता निवपति" इति । पाठस्तु—

अग्नेर्भस्मेति । हे सिकतास्वरूप त्वमग्नेर्भस्म भासकमसि । सिकताधारो ह्यग्निरतितीक्ष्णो भवति । तथा त्वमग्नेरवस्थानाय पुरीषमसि पांसुरूपमसि ।

एतन्मन्त्रसाध्यं सिकतावापं विधत्ते—

"सिकता नि वपत्येतद्वा अग्नेर्वैश्वानरस्य रूपꣳ रूपेणैव वैश्वानरमव रुन्धे" [सं० का० ५ प्र० २ अ० ३] इति ।

आधानप्रकरणे—"वैश्वानरस्य रूपम् । पृथिव्यां परिश्रिता" इत्यामातत्वात्सिकताशरीरं वैश्वानरस्याग्नेः स्वरूपम् ।

कल्पः—"संज्ञानमित्यूषान्" इति । निवपतीत्यनुवर्तते । पाठस्तु—

संज्ञानमसीति । हे ऊषस्वरूप त्वं संज्ञानं पशुसंबन्धि सम्यग्ज्ञानमसि । पशवो ह्याघ्राणेन सम्यग्ज्ञात्वा ऊषमूषप्रदेशं लिहन्ति । तथा कामधरणमसि यज्ञियांशत्वेन ब्राह्मणे वक्ष्यमाणत्वाद्यज्ञद्वारा कामानां धारकमसि । अतस्ते यत्कामधरणं तामर्थ्यं तन्मयि भूयात् । एतन्मन्त्रसाध्यमूषनिवपनं विधत्ते—

---

१ ख. च. स्मर्यते ।

" ऊषान्नि वपति पुष्टिर्वा एषा प्रजननं यदूषाः पुष्टचामेव प्रजननेऽग्निं चिनुतेऽथो संज्ञान एव संज्ञानꣳ ह्येतत्पशूनां यदूषाः " [सं० का० ५ प्र० २ अ० ३] इति ।

पुष्टिहेतुत्वं प्रजोत्पत्तिहेतुत्वं चोषाणां यज्ञद्वारा द्रष्टव्यम् । तस्मादूषनिवापे सति पुष्टिहेतौ प्रजननहेतौ च देशेऽग्निश्चितो भवति । किंच संज्ञानहेतावेव देशेऽग्निश्चितो भवति । ऊषाणां पशुज्ञानहेतुत्वं लोके प्रसिद्धम् । पशवो ह्यूषरप्रदेशं ज्ञात्वा तत्रत्यं लवणोदकमेव पातुं गच्छन्ति । पीत्वा च पुष्टिं प्राप्नुवन्ति । अतः संज्ञानत्वं पुष्टिहेतुत्वं च ।

यदुक्तं सूत्रकारेण—' तान्निवपन्यददश्वन्द्रमसि कृष्णं तदिहास्तीति मनसा ध्यायति ' इति । तदेतद्विवृणोति—

"द्यावापृथिवी सहाऽऽस्तां ते वियती अब्रूतामस्त्वेव नौ सह यज्ञियमिति यदमुष्या यज्ञियमासीत्तदस्यामदधात्त ऊषा अभवन्यदस्या यज्ञियमासीत्तदमुष्यामदधात्तददश्वन्द्रमसि कृष्णमूषान्निवपन्नेतौ ध्यायेद्द्यावापृथिव्योरेव यज्ञियेऽग्निं चिनुते " [सं० का० ५ प्र० २ अ० ३] इति ।

पुरा सृष्टिकाले प्रजापतिना सृष्टे द्यावापृथिव्यौ जतुकाष्ठवत्संश्लिष्टे तिष्ठतः। ते यदा प्रजापत्यनुज्ञया वियुज्येते तदानीं परस्परानुरागेणैवं भागं कृतवत्यौ नावावयोर्यद्यज्ञयोग्यं सारं तत्सहैवास्त्विति । ततोऽमुष्या दिवो यद्यज्ञयोग्यं सारमासीत्तदस्यां पृथिव्यां सा द्यौः स्थापितवती । तच्च सारं भूमाविदानीं दृश्यमानास्ते प्रसिद्धा ऊषा आसन् । यच्चास्याः पृथिव्या यज्ञयोग्यं सारमासीत्तत्सारममुष्यां दिवि सा पृथिवी स्थापितवती । तत्स्थापितं चन्द्रमसि दृश्यमानं कृष्णरूपमभूत् । अत उभयोः सारयोरेकीभावायोषान्निवपन्ददश्वन्द्रमसि कृष्णरूपं ध्यायेत् । तेन ध्यानेन द्यावापृथिव्योः संबन्धिनि यज्ञयोग्ये सारेऽग्निं चितवान्भवति ।

कल्पः—" सं या वः प्रियास्तनुव इत्यूषान्तिकताश्च सꣳसृज्य " इति ।

पाठस्तु—

सं या व इति । हे सिकतोषा वो युष्माकं याः प्रियास्तनुवः स्युस्ताः परस्परं संसृज्यन्ताम् । वो युष्माकं प्रिया अधिष्ठानानि हृदयान्यपि संसृज्यन्ताम् ।

१ क. ख. ङ. षण्णां ।

(गार्हपत्यचयनाभिधानम्)

तथा वो युष्माकमात्माऽपि संप्रियोऽस्तु। अपि च ममापि तनुवः संप्रियाः सन्तु।

कल्पः—" अयꣳ सो अग्निरिति चतस्रो मध्ये प्राचीरिष्टका गार्हपत्यचितावुपदधाति " इति।

अयꣳ सो अग्निरित्येतस्मिन्सूक्ते प्रथमामाह—

अयꣳ सो अग्निरिति। यस्मिन्गार्हपत्यचितिरूपेऽग्नौ वावशानः कामयमान इन्द्रः सुतमभिषुतं सोमं जठरे दधे स्वोदरे धारयति स तादृशोऽयमग्निरिदानीमिष्टकाभिश्चीयत इति शेषः। हे जातवेदोऽत्यं सप्तिं न सत्वरगमनकुशलमश्वमिव सहस्रियं सहस्रसंख्याकेन धनेन संमितं वाजमन्नं ससवान्दत्तवान्सन्यजमानैः स्तूयसे। अथ द्वितीयामाह—

अग्ने दिवो अर्णमिति। हे इष्टकारूपाग्ने दिवः सकाशादर्णमुदकमच्छाऽऽभिमुख्येन जिगासि प्राप्नोषि। यागद्वारेण पुष्टिं संपादयसीत्यर्थः। ये देवा धिष्ण्या धिष्ण्याधारास्तन्दिवानच्छाऽऽभिमुख्येनोचिषे हविः स्वी कुरुतेति ब्रूषे। त्वय्यवोपहिते त्वया समाहूता इव देवा आगत्य हविः स्वी करिष्यन्तीत्यर्थः। सूर्यस्य रोचने दीप्तिरूपे[1] मण्डले सन्ति या आपः परस्तादूर्ध्वप्रदेश उपतिष्ठन्ते, याश्चावस्तादधोभागे वर्तन्ते ताः सर्वास्त्वय्युपहित इहाऽऽगमिष्यन्तीति शेषः।

अथ तृतीयामाह—

अग्न इति। हे यजत्र यागनिष्पादकाग्ने ते तव यद्वर्चो दिवि सूर्यरूपेण वर्तते, पृथिव्यां वह्निज्वालारूपेण वर्तते। तथा यत्तेज ओषधीषु तत्फलपरिपाककालाकारेण वर्तते, अप्सु वडवानलरूपेण वर्तते, येन त्वदीयेन वर्चसा विद्युद्रूपेणोरु विस्तीर्णमन्तरिक्षमाततन्थ सर्वतो विस्तारितवानसि। प्रकाशितवानित्यर्थः। त्वेषो दीप्तिमान्स त्वदीयवर्चःसमूहो भानुर्भासकोऽर्णवः समुद्ररूपविस्तीर्णो नृचक्षा मनुष्यान्प्रख्यापयिता। तथाविधतेजोरूपामिष्टकामुपदधामीति शेषः। अथ चतुर्थीमाह—

पुरीष्यास इति। अग्नय इष्टकारूपा आहुतं हव्यं जुषन्ताम्। कीदृशा अग्नयः। पुरीषे पांसुरूपे भवाः पुरीष्यासः। प्रावणेभिः प्रकर्षेण संभजनशीलैर्मनोभिः सजोषसः परस्परं समानप्रीतयः। अनर्वाणो रोगरहिताः। इषोऽभीष्टप्राप्तिहेतवः। महीः प्रौढाः। तथाविधाग्निरूपामिष्टकामुपदधामीति शेषः।

---

१ ख. च. °पे च स्थाने स°। २ ख. च. °र्ध्वदिशि उ°। ३ ख. च. ङ. °ति। एतेऽग्न°। ४ क. घ. ङ. °ण भ°।

कल्पः—" इडामग्नेऽयं ते योनिर्ऋत्विय इति द्वे पुरस्तात्समीची " इति । उपदधातीत्यनुवर्तते । तत्र प्रथमामाह—

इडामग्ने पुरुदꣳसमिति । हेऽग्ने हवमानाय होतुं प्रवृत्ताय यजमानाय गोः सनिं गवादिपशूनां दातारं साध संपादय । कीदृशं सनिम् । इडां सर्वैरीड्यं प्रशंसनीयम् । पुरुदंसं बहुधा दर्शनीयम् । शश्वत्तममत्यन्तमविच्छेदेन वर्तमानम् । किंच त्वत्प्रसादान्नोऽस्माकं सूनुः स्यात्पुत्रोऽस्तु । कीदृशः, तनयः, औरस इत्यर्थः । पुत्रसामान्यस्य सूनुशब्देनोक्तत्वाद्दत्तपुत्रादिव्यावृत्तये विशेषविवक्षया तनयशब्दः प्रयुज्यते । विजावा विविधानां जनयिता । हेऽग्ने ते तव सा सुमतिस्तथाविधाऽनुग्रहबुद्धिरस्मे भूत्वस्मासु भवतु । अथ द्वितीयामाह—

अयं ते योनिरिति । हेऽग्नेऽयमिष्टकारूपः पदार्थस्ते तव योनिरुत्पत्तिहेतुः, ऋत्विय ऋतुकालीनस्त्रीपुरुषसंगमतुल्य इति । यतो योनेरिष्टकारूपाज्जात उत्पन्नस्त्वमरोचथा दीप्तिमानसि, तं तथाविधं योनिमिष्टकारूपं जानन्नवगच्छन्त्सन्नारोह प्राप्नुहि । अथानन्तरं नोऽस्माकं रयिं धनं वर्धय ।

कल्पः—" एवं पश्चाच्चिदसि परिचिदसीति समीची तिरश्ची वा द्वे " इति । उपदधातीत्यनुवर्तते । प्रथममन्त्रपाठस्तु—

चिदसि तयेति । भोगांश्चिनोति संपादयतीति चित् । हे इष्टके त्वं चिदसि । यया देवतया त्वमभिमन्यसे तया देवतयाऽनुगृहीता त्वं ध्रुवा स्थिरा भूत्वा सीदावतिष्ठ । तत्र दृष्टान्तः—अङ्गिरस्वत् । अङ्गिरोभिरुपाहितेष्टका यथा ध्रुवा भवति तद्वत् । द्वितीयमन्त्रपाठस्तु—

परिचिदासि तयेति । परितो भोगांश्चिनोति संपादयतीति परिचित् । शेषं पूर्ववत् । तया देवतयेत्यादिवाक्यं पूर्वेष्वप्युपधानमन्त्रेषु प्रयोक्तव्यम् । तथा च सूत्रकारेणोक्तम्—" तया देवतयाऽन्ततो दधाति " इति ।

उक्तेषूपधानमन्त्रेष्वयꣳ सो अग्निरित्यारभ्याथा नो वर्धया रयिमित्येतदन्तं षड्ऋचमेकं सूक्तं, तदिदं प्रशंसति—

" अयꣳ सो अग्निरिति विश्वामित्रस्य सूक्तं भवत्येतेन वै विश्वामित्रोऽग्नेः प्रियं धामावारुन्धाग्नेरेवैतेन प्रियं धामाव रुन्धे " [सं० का० ५ प्र० २ अ० ३] इति ।

---

१ ख. च. °षवाची त° । २ क. घ. ङ. एनं ।

(गार्हपत्यचयनाभिधानम्)

तस्मिन्सूक्ते चतसृभिराद्याभिर्ऋग्भिः साध्यमिष्टकोपधानं विधत्ते—

" छन्दोभिर्वै देवाः सुवर्गं लोकमायन् चतस्रः प्राचीरुप दधाति चत्वारि छन्दाꣳसि छन्दोभिरेव तद्यजमानः सुवर्गं लोकमेति " [सं० का० ५ प्र० २ अ० ३] इति।

छन्दोयुक्ताभिश्चतसृभिर्ऋग्भिरुपधायेत्यध्याहारः। देववद्यजमानोऽपि च्छन्दोयुक्ताभिर्ऋग्भिश्चतस्र इष्टकाः प्रागग्रा उपदध्यात्।

अथ सूक्तगताभ्यां पञ्चमषष्ठमन्त्राभ्यामुपरितनयजुर्भ्यां च साध्यमिष्टकोपधानं विधत्ते—

" तेषाꣳ सुवर्गं लोकं यतां दिशः समक्लीयन्त ते द्वे पुरस्तात्समीची उपादधत द्वे पश्चात्समीची ताभिर्वै ते दिशोऽदृꣳहन्यद्द्वे पुरस्तात्समीची उपदधाति द्वे पश्चात्समीची दिशां विधृत्यै " [सं० का० ५ प्र० २ अ० ३] इति।

यदा चतस्र इष्टका उपधाय ते देवाः स्वर्गं लोकं गच्छन्ति तदा तेषां संबन्धिन्यो दिशः पालकाभावात्समक्लीयन्त सम्यग्विशीर्णा अभवन्, दिग्वर्तिन्यः प्रजा विक्लवा अभवन्नित्यर्थः। तन्मा भूदिति देवाः पुरस्ताद्दिशि ऋग्भ्यां द्वे इष्टके पश्चाच्च यजुर्भ्यां द्वे इष्टके उपादधत। ताभिश्चतसृभिरिष्टकाभिस्ते देवा दिशोऽदृꣳहन्दृढीकृतवन्तः। तथा यजमानोऽप्युपदध्यात्।

अथ पूर्वमुपहिताश्चतस्रश्च इदानीमुपहिताश्चतस्रश्च मिलित्वा पुनः प्रशंसति—

" अथो पशवो वै छन्दाꣳसि पशूनेवास्मै समीचो दधात्यष्टावुप दधात्यष्टाक्षरा गायत्री गायत्रोऽग्नियावानेवाग्निस्तं चिनुतेऽष्टावुप दधात्यष्टाक्षरा गायत्री गायत्री सुवर्गं लोकमञ्जसा वेद सुवर्गस्य लोकस्य प्रज्ञात्यै " [सं० का० ५ प्र० २ अ० ३] इति।

दिशां विधारणायोपधानं पूर्वमुक्तम्। अपि च च्छन्दसां पशुप्राप्तिहेतुत्वेन पशुरूपत्वाच्छन्दोयुक्ताभिर्ऋग्भिरुपधानेन समीचः पशून्संपादयति। उपरितनाभ्यां द्वाभ्यां सहाष्टत्वेन गायत्रीसाम्यम्। मुखजत्वेन गायत्रीसंबद्धोऽग्नियावास्ति तं सर्वं चिनुते। किंच गायत्र्याः स्वर्गलोकाभिज्ञत्वात्तत्साम्यं स्वर्गाभिज्ञानाय संपद्यते।

कल्पः—" अवशिष्टं त्रयोदशभिर्लोकंपृणाभिः पच्छादयति लोकं पृण ता अस्य सूददोहस इति द्वाभ्यां मन्त्राभ्यामेकैकां लोकंपृणामुपदधाति " इति ।

तत्र प्रथमामाह—

लोकं पृण छिद्रमिति । हे इष्टके लोकं गार्हपत्यचयनार्थं प्रदेशं पूर्वोक्ताभिरिष्टकाभिरनाक्रान्तमवशिष्टं स्थानं पृण पूरय । तथा छिद्रं पृण द्वयोरिष्टकयोर्मध्ये किंचिदपि च्छिद्रं तथा न दृश्यते तथा पूरय, अत्यन्तं श्लिष्टा भवेत्यर्थः। अथो अपि च त्वं शिवा शान्ता सती सीद तिष्ठ । इन्द्राग्नी बृहस्पतिश्चेत्येते देवा अस्मिन्योनौ स्थाने त्वामसीषदन्सादितवन्तः । अथ द्वितीयामाह—

ता अस्य सूददोहसेति । दिवो द्योतने स्वर्गे य प्रकाशकेऽस्य जन्मन्यजमानस्य जन्मनि निमित्तभूते सति देवानां संबन्धिन्यो विशः प्रजारूपाः पृश्नयो[1] गोसदृशाः सूददोहसोऽन्नस्य दोहयित्र्यस्ता इष्टकाः सोमं श्रीणन्ति पक्वं कुर्वन्ति। कदा, त्रिष्वा समन्ताद्यानि प्रातःसवनादीनि तेषु, निरन्तरं सोमपाकहेतव एता इष्टका इत्यर्थः । एतन्मन्त्रद्वयसाध्यमुपधानं विधत्ते—

" त्रयोदश लोकंपृणा उप दधात्येकविंशतिः संपद्यन्ते प्रतिष्ठा वा एकविंशः प्रतिष्ठा गार्हपत्य एकविंशस्यैव प्रतिष्ठां गार्हपत्यमनु प्रति तिष्ठति " [सं० का० ५ प्र० २ अ० ३] इति ।

लोकमिष्टकानाक्रान्तमवशिष्टं देशं पूरयन्तीति लोकंपृणाः, एतन्नामिका इष्टकास्त्रयोदशसंख्याका उपदध्यात् । एवं सति पूर्वोक्ताभिरष्टाभिरिष्टकाभिः सहैकविंशतिः संपद्यन्ते । तथा सत्येकविंशः स्तोमो यथा स्तोमान्तराणां त्रिवृदादीनां प्रतिष्ठा तथा नित्यं धार्यो गार्हपत्योऽप्याहवनीयाद्यग्नीनां प्रतिष्ठा । तदुभयप्रतिष्ठामनु यजमानः प्रतितिष्ठतीति । वेदनं प्रशंसति—

" प्रत्यग्निं चिक्यानस्तिष्ठति य एवं वेद " [सं० का० ५ प्र० २ अ० ३] इति ।

चिक्यानश्चयनं कृतवान्भूत्वा प्रतितिष्ठतीत्यर्थः ।

एवं निरूपिता येयमेका चितिः, ईदृशीनां चितीनामुपर्यधोभावेन वर्तमानानां पञ्चसंख्यां विधत्ते—

---

१ ख. घ. ङ. च. °भ्यां द्वाभ्यां म° । २ ख. च. °योऽल्पगो° । ३ ख. च. °दा आ त्रि° ।

(गार्हपत्यचयनाभिधानम्)

" पञ्चचितीकं चिन्वीत प्रथमं चिन्वानः पाङ्क्तो यज्ञः पाङ्क्ताः पशवो यज्ञमेव पशूनव रुन्धे " [सं० का० ५ प्र० २ अ० ३] इति ।

प्रथमं चिन्वानः प्रथमवारमग्निचयनं कुर्वन्यजमानः पञ्चचितीकं पञ्चसंख्याकाश्चितयोऽनन्तरोक्ता यस्याग्नेस्तादृशं चिन्वीत । धानादिपयस्यान्तैः पञ्चभिर्हविर्भिर्युक्तत्वात्पाङ्क्तो यज्ञः । सपुच्छैश्चतुर्भिः पादैः पाङ्क्ताः पशवः । एवं चयनं कृत्वा यज्ञं पशूंश्च प्राप्नोति ।

द्वितीयवारमग्निचयनं कुर्वतः संख्यां विधत्ते—

" त्रिचितीकं चिन्वीत द्वितीयं चिन्वानस्त्रय इमे लोका एष्वेव लोकेषु प्रति तिष्ठति[1] " [सं० का० ५ प्र० २ अ० ३] इति ।

तृतीयवारमग्निचयनं कुर्वतः संख्यां विधत्ते—

" एकचितीकं चिन्वीत तृतीयं चिन्वानः एकधा वै सुवर्गो लोक एकवृतैव सुवर्गं लोकमेति " [सं० का० ५ प्र० २ अ० ३] इति ।

एकधैकप्रकारः, सुखैकस्वाभाव्यात्स्वर्गस्य तद्धेतुकर्मसमाप्तेः पूर्वं पुनरावृत्त्यभावाच्च । एकवृतैकगुणया चित्या त्रिगुणत्वपञ्चगुणत्ववर्जितया ।

पांसुपक्षेपं विधत्ते—

" पुरीषेणाभ्यूहति तस्मान्मांसेनास्थि च्छन्नम् " [सं० का० ५ प्र० २ अ० ३] इति ।

यस्मादस्थिसमाः कठिना इष्टका मांससमेन मृदुना पांसुनाऽभ्यूहत्याच्छादयति तस्मान्लोकेऽपि मांसेनास्थि च्छन्नम् । वेदनं प्रशंसति—

" न दुश्चर्मा भवति य एवं वेद " [सं० का० ५ प्र० २ अ० ३] इति ।

चितिगतां पुरीषगतां च संख्यां मिलित्वा प्रशंसति—

" पञ्च चितयो भवन्ति पञ्चभिः पुरीषैरभ्यूहति दश संपद्यन्ते दशाक्षरा विराडन्नं विराड्विराज्येवान्नाद्ये प्रति तिष्ठति " [सं० का० ५ प्र० २ अ० ३] इति ।

एकां चितिं कृत्वा पुरीषेणाऽऽच्छादयेत् । तस्या उपरि द्वितीयां चितिं कृत्वा तामप्याच्छादयेत् । एवं चितिपञ्चकेन पुरीषपञ्चकेन च दशसंख्यासंपत्तेर्विराट्छन्दोद्वारेणान्ने प्रतितिष्ठति । अत्र विनियोगसंग्रहः—

---

१ ख. ब. ङ. च. °ति । द्वितीयं चिन्वानस्त्रय । त° ।

(आहवनीयचयनार्थं भूकर्षणाभिधानम्)

अपोद्धन्ति चितिस्थानमग्नेस्तु सिकतां(ता) वपेत् ।
संज्ञानमूषान्निवपेत्संधा(याः) संसृजते द्वयम् ॥
अयं चतसृभिः प्राचीरिष्टका आदधाति हि ।
इडां द्वाभ्यां पुरस्तादृद्धे चिदुद्वाभ्यां पश्चिमे द्वयम् ।
लोकं लोकंपृणा द्वाभ्यां मन्त्रा अत्र चतुर्दश ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे द्वितीयप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ चतुर्थाष्टके द्वितीयप्रपाठके पञ्चमोऽनुवाकः) ।

समित्तꣳ सं कल्पेथाꣳ संप्रियौ रोचिष्णू सुमनस्यमानौ । इषमूर्जमभि संवसानौ सं वां मनाꣳसि सं व्रता समु चित्तान्याऽकरम् । अग्ने पुरीष्याधिपा भवा त्वं नः । इषमूर्जं यजमानाय धेहि । पुरीष्यस्त्वमग्ने रयिमान्पुष्टिमाꣳ असि । शिवाः कृत्वा दिशः सवाः स्वां योनिमिहाऽसदः । भवतं नः समनसौ समोकसौ (१) अरेपसौ । मा यज्ञꣳ हेꣳसिष्टं मा यज्ञपतिं जातवेदसौ शिवौ भवतमद्य नः । मातेव पुत्रं पृथिवी पुरीष्यमग्निꣳ स्वे योनावभारुखा । तां विश्वेदेवैर्ऋतुभिः संविदानः प्रजापतिर्विश्वकर्मा वि मुञ्चतु । यदस्य पारे रजसः शुक्रं ज्योतिरजायत । तन्नः पर्षदति द्विषोऽग्ने वैश्वानर स्वाहा । नमः सु ते निर्ऋते

(आहवनीयचयनार्थं भूकर्षणाभिधानम्)

विश्वरूपे (२) अयस्मयं वि चृता बन्धमेतम् । यमेन त्वं यम्या संविदानोत्तमं नाकमधि रोहयेमम् । यत्रौ देवी निर्ऋतिराबबन्ध दामं ग्रीवास्वविचर्त्यम् । इदं ते तद्वि ष्यामि यु॒षो न मध्यादथा जीवः पितुमद्धि प्रमुक्तः । यस्यास्ते अस्याः क्रुर आसञ्जुहोम्येषां बन्धानामवसर्जनाय । भूमिरिति त्वा जना विदुर्निर्ऋतिः (३) इति त्वाऽहं परि वेद विश्वतः । असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यां तस्करस्यान्वेषि । अन्यमस्मदिच्छ सा ते इत्या नमो देवि निर्ऋते तुभ्यमस्तु । देवीमहं निर्ऋतिं वन्दमानः पितेव पुत्रं दमये वचोभिः । विश्वस्य या जायमानस्य वेद शिरः शिरः प्रति सुरी वि चष्टे । निवेशनः संगमनो वसूनां विश्वा रूपाऽभि चष्टे (४) शचीभिः । देव इव सविता सत्यधर्मेन्द्रो न तस्थौ समरे पथीनाम् । सं वरत्रा दधातन निराहावान्कृणोतन । सिञ्चामहा अवटमुद्रिणं वयं विश्वाऽहाऽदस्तमक्षितम् । निष्कृताहावमवटꣳ सुवरꣳ सुपेचनम् । उद्रिणꣳ सिञ्चे अक्षितम् सीरा युञ्जन्ति कवयो युगा वि तन्वते पृथक् धीरा देवेषु सुम्नया । युनक्त सीरा वि युग

(आहवनीयचयनार्थं भूकर्षणाभिधानम्)

तनोत क्षुते योनौ वपतेह (५) बीजम् ।
गिरा च श्रुष्टिः सभरा असन्नो नेदीय इत्सृण्यः
पक्वमाऽयत् । लाङ्गलं पवीरवꣳसुशेवꣳसुम-
तिस्सरु । उदित्कृषति गामविं प्रफर्व्यं च
पीवरीम् । प्रस्थावद्रथवाहनम् । शुनं नः
फाला वि तुदन्तु भूमिꣳ शुनं कीनाशा अभि
यन्तु वाहान् । शुनं पर्जन्यो मधुना पयोभिः
शुनासीरा शुनमस्मासु धत्तम् । कामं काम-
दुघे धुक्ष्व मित्राय वरुणाय च । इन्द्रायाग्नये
पूष्ण ओषधीभ्यः प्रजाभ्यः । घृतेन सीता
मधुना समक्ता विश्वैर्देवैरनुमता मरुद्भिः ।
ऊर्जस्वती पयसा पिन्वमानाऽस्मान्सीते पय-
साऽभ्याववृत्स्व (६) ॥

(समोकसौ विश्वरूपे विदुर्नक्षतिरभि चष्ट इह मित्राय द्वाविꣳशतिश्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
द्वितीयप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ चतुर्थकाण्डे द्वितीयप्रपाठके पञ्चमोऽनुवाकः) ।

चतुर्थेऽनुवाके गार्हपत्यचयनमुक्तम् । अथ पञ्चमेऽनुवाक आहवनीयचयनार्थं भुवः कर्षणमुच्यते ।

कल्पः—" समितमिति तस्यां चतसृभिरुख्यं संनिवपति " इति ।

तत्र प्रथमामाह—

समितꣳ **समिति** । येयं गार्हपत्यचितिः पूर्वानुवाकेऽभिहिता तस्यामुख्याग्नि-संनिवपनवेलायां द्वावग्नी संपद्येते । पूर्वसिद्धोऽग्निरेको द्वितीयसिद्धोऽग्निरपरः ।

(आहवनीयचयनार्थं भूकर्षणाभिधानम्)

तावुभौ संवोध्येदमुच्यते—हेऽग्नी युवामुभौ समितं संगतौ भवतम्। संगत्य च संकल्पेथां सम्यग्यज्ञस्य कल्पनं निष्पादनं कुरुतम्। कीदृशावग्नी, संप्रियौ सम्यक्परस्परं प्रीतियुक्तौ, रोचिष्णू दीप्यमानौ, सुमनस्यमानौ परस्परं सौमनस्यं प्राप्तौ, इषमन्नमूर्जं रसं च (चाभि)संवसानौ [सर्वतः] सम्यक्संपादयन्तौ। वां युवयोर्मनांसि मनोजन्यान्संकल्पान्समाकरं सर्वतः संगतानि करोमि। तथा व्रतानि कर्माणि समाकरम्। तथा चित्तानि कर्मविषयज्ञानानि समाकरम्।

अथ द्वितीयामाह—

अग्नेः पुरीष्येति। हे पुरीष्य पांसुयुक्ताग्ने मिलितोभयाग्निस्वरूप त्वं नोऽस्माकमधिपा भवाधिकं पालयिता भव। तादृशस्त्वं यजमानायान्नं रसं च संपादय।

अथ तृतीयामाह—

पुरीष्यस्त्वमिति। हेऽग्ने द्रव्यात्मक त्वं पुरीष्यः पुरीषार्हो रयिमान्धनवान्पुष्टिमानप्यसि। सर्वा दिशः शिवाः शान्ताः कृत्वेह चितौ स्वां योनिं स्वकीयं स्थानमासदः प्राप्नुहि। अथ चतुर्थीमाह—

भवतं न इति। योऽग्निः पुरातनो यश्चोरुष्यसौ युवां नोऽस्मान्प्रति समनसौ समानमनस्कौ विप्रतिपत्तिरहितौ समोकसौ समाननिवासस्थानावरेपसौ पापचित्तरहितौ यज्ञस्य यज्ञपतेश्च हिंसां मा कुरुतम्। अद्यास्मिन्कर्मणि हे जातवेदसौ नोऽस्मान्प्रति शिवौ शान्तौ भवतम्। एतान्मन्त्रान्विनियुङ्क्ते—

"वि वा एतौ द्विषाते यश्च पुराऽग्नेर्यश्चोरुष्याः समितामिति चतसृभिः सं नि विपति चत्वारि छन्दांसि छन्दांसि खलु वा अग्नेः प्रिया तनूः प्रिययैवैनौ तनुवा सꣳ शास्ति" [सं० का० ५ प्र० २ अ० ४] इति।

अग्निं चिकीर्षतः पुरुषस्य यश्च पूर्वसिद्ध आहितोऽग्नेर्यश्चोरुष्यां वर्तमान इदानींतनोऽग्निरेतावुभौ परस्परं विद्विषाते। अहमेवाऽऽहुत्याधारो भूयासं न त्वमित्येवंरूपो विद्वेषः। अतो विद्वेषपरिहाराय संनिवपति तावुभौ संयोजयेत्। अभ्यादानादिषु गायत्र्यादिच्छन्दसां साधनत्वाच्छन्दांस्यग्नेः प्रिया तनूः। तथा सत्यत्र मन्त्रगतया चतुःसंख्यया चतुर्णां गायत्र्यादिच्छन्दसां बुद्धिस्थत्वात्प्रिययैव तनुवा संगतौ यथा भवतस्तथा संज्ञानं कृतवान्भवति।

प्रथममन्त्रगतस्य समितामितिपदस्य तात्पर्यं दर्शयति—

---

१ क. घ. ङ. भवेतं।

(आहवनीयचयनार्थं भूकर्षणाभिधानम्)

"समितमित्याह तस्माद्ब्रह्मणा क्षत्रꣳ समेति" [तै० का० ५ प्र० २ अ० ४] इति।

यस्मादयं मन्त्रः संगतौ भवतमिति ब्रूते तस्माल्लोकेऽपि पुरोहितरूपेण ब्राह्मणेन क्षत्रियरूपो राजा संगच्छते। अत एवान्यत्र श्रुत्योदाहृतं—"तस्माद्ब्राह्मणो राजन्यवान्, तस्माद्राजन्यो ब्राह्मणवान्" इति।

तमेवाग्न्योः संगमं पुनः प्रशंसति—

"यत्तंन्युप्य विहरति तस्माद्ब्रह्मणा क्षत्रं ज्येति" [तै० का० ५ प्र० २ अ० ४] इति।

यस्मादग्निद्वयं संयोज्य तस्मिन्संयुक्तेऽग्नौ विहरणमुत्तरकालीनं विविधमनुष्ठानं करोति तस्माल्लोकेऽपि ब्राह्मणक्षत्रिययोः संयुक्तयोः ततोः पश्चाद्ब्राह्मणेन नियमितः क्षत्रियो विविधं शास्त्रीयं राज्यपरिपालनं प्राप्नोति।

कल्पः—"मातेव पुत्रमिति शिक्यादुखां निरू(रु)ह्य" इति। पाठस्तु—

मात्रेव पुत्रमिति। यथा लोके माता पुत्रं बिभर्ति तथा पृथिवीरूपेयमुखा स्वे योनौ स्वकीयगर्भस्थाने पुरीष्यमेतमग्निमभार्बिभर्ति। तामुखां प्रजापतिर्विमुञ्चतु शिक्यपाशान्मुक्तां करोतु। कीदृशः प्रजापतिः। विश्वैर्देवैर्ऋतुभिश्च संविदान ऐकमत्यं गतः। विश्वं सृष्टिरूपं कर्म यस्यासौ विश्वकर्मा।

अस्मिन्मन्त्र ऋतुभिरिति पदस्य तात्पर्यं दर्शयति—

"ऋतुभिर्वा एतं दीक्षयन्ति स ऋतुभिरेव विमुच्यो मातेव पुत्रं पृथिवी पुरीष्यमित्याहर्तुभिरेवैनं दीक्षयित्वर्तुभिर्वि मुञ्चति" [तै० का० ५ प्र० २ अ० ४] इति।

एतं यजमानमृतुभिः पुत्रं संस्कुर्वन्ति। "षड्भिर्दीक्षयति षड्वा ऋतव ऋतुभिरेवैनं दीक्षयति" इत्युक्तत्वात्। अतस्तादृशयजमानसंबन्धी स उरुर्योऽग्निरत्राप्यृतुभिरेव विमोचनीयो भवति। अतो विमोचनसाधनेऽस्मिन्मन्त्र ऋतुप्रयोगाद्दीक्षाविमोकयोरेकसाधनत्वं संपद्यते। यद्यपि दीक्षा यजमानस्य विमोकश्चोरुयस्य तथाऽप्यभेदोपचारेणैकविषयत्वोपन्यासः।

कल्पः—"यदस्य पारे रजस इति वैश्वानर्यां शिक्यमादत्ते" इति।

पाठस्तु—

यदस्य पार इति। रजसो रजःसदृशस्य धूमस्य पारेऽवस्तानेऽस्याग्नेः

---

१ स. च. °र्याऽग्नेः।

(आहवनीयचयनार्थं भूकर्षणाभिधानम्)

शुक्रं निर्मलं यज्ज्योतिरजायत तस्माज्ज्योतिर्द्विषोऽति द्वेष्टृनतिक्रम्य नोऽस्मान्पर्व-मणीयतु । हे वैश्वानरोख्याग्ने त्वदीयं शिक्यं स्वाहा सुष्ठ्वाहुतम् । तमेतं मन्त्रं विनियुङ्क्ते—

"वैश्वानर्या शिक्यमा दत्ते स्वदयत्येवैनत्" [तं० का० ५ प्र० २ अ० ४] इति ।

वैश्वानरशब्दो यस्यामृच्यस्ति सेयं वैश्वानरी । 'अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः' इति स्मृतेर्जाठराग्निरूपस्य वैश्वानरस्य स्वादुत्वकारि-त्वात्तदीयमन्त्रेणोपात्तं शिक्यं स्वादुकृतं भवति ।

कल्पः—"नैर्ऋतीरिष्टकाः कृष्णास्तिलस्तुषपक्वास्ताः शिक्यं रुक्मसूत्रमा-सन्दीं चाऽऽदाय दक्षिणमपरमवान्तरदेशं गत्वा नमः सु ते निर्ऋत इति स्वकृत इरिणे प्रदरे वा शिक्यं निधाय" इति । पाठस्तु—

नमः सु त इति । हे निर्ऋते दक्षिणपश्चिममध्यमस्थितावान्तरदिगभिमानिनि देवते विश्वरूपे बहुविधरूपयुक्ते ते तुभ्यं नमोऽस्तु । अयस्मयं लोहनिर्मितं शृङ्ख-लावद्दृढमेतं बन्धं स्वर्गप्राप्तिप्रतिबन्धकमिमं पाप्मानं विवृत विनाशय । ततस्त्वं यमेनाग्निना यम्या पृथिव्या च संविदानैकगत्यं गता सतीमं यजमानमुत्तमं नाकं सर्वसुखोपेतं दुःखमात्ररहितं स्वर्गमधिरोह्य प्रापय ।

अत्रोदाहृते सूत्रे या इष्टका अभिहितास्ता विधत्ते—

"नैर्ऋतीः कृष्णास्तिलस्तुषपक्वा भवन्ति निर्ऋत्यै वा एतद्भागधेयं यत्तुषा निर्ऋत्यै रूपं कृष्णा रूपेणैव निर्ऋतिं निरवदयते" [तं० का० ५ प्र० २ अ० ४] इति ।

निर्ऋतिर्देवता यासामिष्टकानां ता नैर्ऋत्यः । तुषा इति यत्तदेतन्निर्ऋते राक्ष-सदेवताया भागधेयम् । अत एवैष्टिकप्रकरणे रक्षसां भागोऽसीति तुषोपवाप-मन्त्र आम्नातः । रूपं च निर्ऋतिदेवतायाः कृष्णम् । अतस्तदानुकूल्यायेष्टका-स्तुषपक्वाः कृष्णवर्णाश्च कुर्युः । तथा सत्यनुरूपेणैव भागेन निर्ऋतिं निरव-दयते निःसारितवान्भवति ।

दक्षिणपश्चिमावान्तरदिशमनुकूल्या निर्दिश्य विधत्ते—

"इमां दिशं यन्त्येषा वै निर्ऋत्यै दिक्स्वायामेव दिशि निर्ऋतिं निरवदयते" [तं० का० ५ प्र० २ अ० ४] इति ।

---

१ क. घ. ङ. °दुका°।

(आहवनीयचयनार्थं भूकर्षणाभिधानम्)

कल्पः—" यत्ते देवी निर्ऋतिराबबन्धेति शिक्यजालेनाः प्रच्छाद्य " इति ।

एना वक्ष्यमाणमन्त्रैरुपधेया इष्टकाः । अर्थक्रमेणामं मन्त्रो वक्ष्यमाणेभ्यस्त्रिभ्य उत्तरभावी, पाठक्रमेण तु पूर्वभावी । तत्पाठस्तु—

यत्ते देवीति । हे यजमान ते तव ग्रीवासु ग्रीवायाः संबन्धिषु प्रदेशविशेषेषु निर्ऋतिर्देवी यद्दाम स्वकीयं पाशमविचर्त्यं विनाशयितुमशक्यमाबबन्ध दृढं बबन्ध, तदिदं ते दाम त्वदीयग्रीवास्थं पाशं विष्यामि विमुञ्चामि । तच्च विमोचनं त्वदीयस्याऽऽयुषो मध्यादारभ्य न भवति, किंतु कृत्स्नेऽप्यायुषि । अथ पाशविमोकानन्तरं त्वं जीवन्नरंजीवी सन्प्रमुक्तः सर्वैः प्रतिबन्धैर्विरहितः पितृमन्मध्ये भक्षय ।

कल्पः—" तस्येष्टकाभिः पाशमभ्युपदधाति यस्यास्ते अस्याः क्रूर आसन्जुहोमीत्येताभिस्तिसृभिः पराचीरसंस्पृष्टा दक्षिणापवर्गं तयाँ (यथा) देवतं करोति " इति । तस्य शिक्यस्य पाशमभिलक्ष्य कृष्णाभिरिष्टकाभिरुपधानं संपादयेदित्यर्थः । तिसृषु प्रथमामाह—

यस्यास्त इति । हे निर्ऋते यस्यास्ते तवास्याः क्रूर आसन्नमरूप आस्ये जुहोमि आहुतिवदिष्टकामुपदधामि । किमर्थम्, एषां बन्धानामवसर्जनाय यजमानस्य परलोकप्राप्तिप्रतिबन्धकानामेषां पाप्मनां विनाशाय । यस्यास्ते तव मुखे प्रदररूप हरिणरूपे वाऽहमिष्टकामुपदधामि त्वा तादृशीं त्वां जना जन्तुमात्ररूपाः शास्त्रसंस्काररहिता भूमिरिति विदुर्न तु निर्ऋतिर्देवीति । अहं तु शास्त्राभिज्ञतया त्वां विश्वतः सर्वतः सर्वथा निर्ऋतिर्देवीत्येव परिवेद सम्यग्जानामि । तत्र वन्निर्ऋतिरित्येतद्देवतानामधेयम् । अवयवार्थश्चैवं व्युत्पादनीयः—सर्वदेवसाधारणाद्देवयजनान्निष्क्रुष्य स्वकृते प्रदरादावृतिः प्राप्तिर्यस्याः सा निर्ऋतिः । तदिदं प्रकारद्वयमभिप्रेत्य विश्वत इत्युक्तम् । अथ द्वितीयामाह—

असुन्वन्तमिति । हे निर्ऋते यः सोमयागं न करोति यश्च हविर्यज्ञं न करोति तादृशमसुन्वन्तमयजमानं च ग्रहीतुमिच्छ । किंच यः स्तेनः प्रच्छन्नचोरो यश्च तस्करः प्रकटचोरस्तयोरित्यां गतिमन्वेषि अनुगच्छ । गत्वा तावपि गृहाणेत्यर्थः । सर्वथाऽपि सोमं सुन्वद्भ्यो हविर्यज्ञैश्च यष्टृभ्योऽस्मदन्यमिच्छ

१ ख. च. °दीयं ग्री° । २ क. घ. ङ. °गं न त° । ३ ख. °या दैव° । ४ ख. घ. ङ. च. °दुर्निर्ऋ° । ५ क. घ. ङ. सर्वदा । ६ ख. स्वतन्त्रेण । घ. ङ स्वतन्त्रे ।

(आहवनीयचयनार्थं भूकर्षणाभिधानम्)

नास्मानिच्छ। सा दुष्टशिक्षा तवेत्या गतिश्चर्या। हे निर्ऋते देवि तुभ्यं नमोऽस्तु। अथ तृतीयामाह—

देवीमहामिति। देवीं निर्ऋतिं वन्दमानोऽहं वचोभिः स्तुभिरूपैवाक्यैर्दंसय उपक्षीणां स्वाधीनां करोमि। तत्र दृष्टान्तः—यथा लोके पिता पुत्रं दुःशीलं बालं हे तात हे वत्सेत्यादिभिरुपलालनवचनैः स्वाधीनं करोति तद्वत्। या सूरी विदुषी निर्ऋतिर्जायमानस्य विश्वस्य सर्वस्य स्तेनतस्करादेः शिरःशिरः प्रति हस्तेनैकैकं शिरः प्रतिगृह्य वेद स्वदीयमपराधं जानातीति विचष्टे विशेषेण कथयति तादृशीं निर्ऋतिं देवीं वन्दमान इति पूर्ववान्वयः।

एतैर्मन्त्रैः साध्वभिष्टकोपधानं विधत्ते—

" स्वकृत इरिण उप दधाति प्रदरे वैतद्वै निर्ऋत्या आयतनꣳ स्व एवाऽऽयतने निर्ऋतिं निरवदयते " [सं० का० ५ प्र० २ अ० ४] इति।

स्वकृतं स्वयमेव निष्पन्नं न तु देशान्तरादानीय चयनस्थान इव प्रक्षिप्तं, तादृश इरिण ऊषरे वा प्रदरे भूच्छिद्रे वा कृष्णास्तिस्र इष्टका उपदध्यात्। एतदुभयमेव निर्ऋत्या आयतनं स्थानमतिस्पष्टमिति[1] यद्यत्रेष्टकोपधानं क्रियते तदा स्वीय एव स्थाने तां निर्ऋतिं निरवदयते देवयजनान्निष्कृष्येमामेव स्थापयति।

शिक्योपरि जालमूलभागं परित्यज्य पाशरूपमग्रभागमभिलक्ष्यावस्थितो यो देशस्तं देशमिष्टकोपधानस्य विधत्ते—

" शिक्यमभ्युप दधाति नैर्ऋतो वै पाशः साक्षादेवैनं निर्ऋतिपाशान्मुञ्चति " [सं० का० ५ प्र० २ अ० ४] इति।

शिक्यमभिलक्ष्य तत्पाशभागमभिलक्ष्यावस्थितो यो देशस्तत्रोपदध्यादित्यर्थः। साक्षाद्विलम्बमन्तरेण। एनं यजमानम्।

इष्टकानां संख्यां विधत्ते—

" तिस्र उप दधाति त्रेधाविहितो वै पुरुषो यावानेव पुरुषस्तस्मान्निर्ऋतिमव यजते " [सं० का० ५ प्र० २ अ० ४] इति।

शरीरस्योर्ध्वाधोमध्यभागैः पुरुषस्त्रेधाविहितस्तादृशात्पुरुषादादाय त्रिसंख्या निर्ऋतिमवयजते विनाशयति।

---

१ ख. च. °ति तांडिकाः। २ ख. च. °नं यावद् क्रि°। ३ ख. च. स्व।

यदुक्तं सूत्रकारेण " पराचीरसंस्पृष्टा दक्षिणापवर्गम् " इति । तदिदं विधत्ते—

" पराचीरुप दधाति पराचीमेवास्मान्निर्ऋतिं प्र णुदते " [सं० का० ५ प्र० २ अ० ४] इति ।

दक्षिणामुखः पुरुष एकामुपधाय ततो दक्षिणतो द्वितीयां ततोऽपि दक्षिणतस्तृतीयामुपदध्यात्तदिदं पराक्त्वम् । एवं सत्यस्मादेवयजनाद्यजमानाद्वा पराङ्मुखीं कृत्वा निर्ऋतिं निःसारयति ।

उपधानादूर्ध्वं देवयजनं प्रत्यागमनं विधत्ते—

" अप्रतीक्षमा यन्ति निर्ऋत्या अन्तर्हित्यै " [सं० का० ५ प्र० २ अ० ४] इति ।

अप्रतीक्षं पृष्ठतो दृष्टिमकृत्वेत्यर्थः । तच्च निर्ऋत्या अन्तर्धानाय दर्शनाभावाय भवति ।

कल्पः—" निवेशनः संगमनो वसूनामित्याहवनीयं गार्हपत्यं वोपतिष्ठन्ते " इति । पाठस्तु—

निवेशन इति । अयमग्निर्निवेशनो यजमानानां स्वस्वगृहे निवेशयिता वसूनां संगमनः प्रजापशुरूपाणां द्रव्याणां प्रापकः सञ्शचीभिः स्वकीयाभिः शक्तिभिर्विश्वा रूपा सर्वाणि रूपाण्यभि चष्टेऽभितः ख्यापयति। तत्र दृष्टान्तः-सवितेव देव इव । यथा सूर्यः सर्वाणि रूपाणि प्रकाशयति तद्वत् । कीदृशोऽग्निः, सत्यधर्मा सत्योऽवश्यंभाविफलोपेतो धर्मोऽग्निहोत्रादिलक्षणो यस्यासौ सत्यधर्मा। इन्द्रः परमैश्वर्यवान् । अत एव पथीनां समरे ३ तस्थौ परिपन्थिनां शत्रूणां समागमे पुरतः स्वयमागत्य न तिष्ठति । किंतु स्वकीयनामग्रहणमात्रेण ते पलायन्त इत्यर्थः । अनेन मन्त्रेण साध्यमुपस्थानं विधत्ते—

"मार्जयित्वोप तिष्ठन्ते मेध्यत्वाय" [सं० का० ५ प्र० २ अ० ४] इति ।

शं नो देवीरिति मन्त्रेण मार्जनं कृत्वा पश्चान्निवेशन इति मन्त्रेणोपतिष्ठन्ते । अनेनोपस्थानेन यजमानो मेध्यो भवति । उपस्थेयं विधत्ते—

" गार्हपत्यमुप तिष्ठन्ते निर्ऋतिलोक एव चरित्वा पूता देवलोकमुपावर्तन्ते " [सं० का० ५ प्र० २ अ० ४] इति ।

---

१ क च. °त्यं चोप° । २ ख. च. °तू । ताद्° ।

(आहवनीयचयनार्थं भूकर्षणाभिधानम्)

दक्षिणपश्चिमावान्तरदिग्रूपे निर्ऋतिस्थाने एनं(व) चयनार्थं चरित्वा ततो मार्जनेन पूताः सन्तो गार्हपत्यसमीपरूपं देवलोकमागच्छन्ति ।

मन्त्रगतामेकत्वसंख्यां प्रशंसति—

" एकयोप तिष्ठन्त एकधैव यजमाने वीर्यं दधति " [सं० का० ५ प्र० २ अ० ४] इति । एकधा युगपदित्यर्थः ।

मन्त्रगतस्य वसुशब्दस्यार्थं दर्शयति—

" निवेशनः संगमनो वसूनामित्याह प्रजा वै पशवो वसु प्रजयैवैनं पशुभिः समर्धयन्ति " [सं० का० ५ प्र० २ अ० ४] इति ।

अथाग्निचयनभूमेः परिमाणं विधत्ते—

" पुरुषमात्रेण वि मिमीते यज्ञेन वै पुरुषः संमितो यज्ञपुरुषवैवैनं वि मिमीते" [सं० का० ५ प्र० २ अ० ५] इति ।

पुरुषः प्रमाणं यस्य दण्डस्य सोऽयं पुरुषमात्रस्तेन दण्डेन भूमेः प्रमाणं कुर्यात् । यज्ञाभिमानिदेवेन समानप्रमाणो लौकिकः पुरुषः । पुरुषमात्रेण विमी(मि)ते सति यज्ञस्य पुरुषा पर्वणा प्रमाणेनैवैनमग्निं विमी(मि)तवान्भवति ।

पुरुषो हि द्विविधोऽवाग्बाहुरूर्ध्वबाहुश्चेति, अतो विशेषं विधत्ते—

" यावान्पुरुष ऊर्ध्वबाहुस्तावान्भवत्येतावद्वै पुरुषे वीर्यं वीर्यणैवैनं वि मिमीते " [सं० का० ५ प्र० २ अ० ५] इति ।

पुरुषोऽप्यूर्ध्वं प्रसारितस्य बाहोरुपरि स्थितं वस्तु स्पष्टुं न शक्नोति । अतः पुरुषवीर्यस्य तावन्मात्रत्वाद्वीर्यणैव मानसिद्धयर्थमूर्ध्वपुरुषप्रमाणं कुर्यात् ।

वामदक्षिणपार्श्वयोः पक्षस्थानं विधत्ते—

"पक्षी भवति न ह्यपक्षः पतितुमर्हति" [सं०का०५ प्र०२ अ०५] इति ।

पक्षभङ्गे सत्यपक्षिण उत्पतितुमशक्यत्वात्पक्ष्याकारस्याग्नेरुत्पतनः पक्षयुक्तत्वं कुर्यात् ।

यदुक्तं सूत्रकारेण—" चतुर आत्मनि पुरुषान्विमिमीते पुरुषं दक्षिणे पक्षे पुरुषं पुच्छे पुरुषमुत्तरेऽरत्निना दक्षिणतो दक्षिणं पक्षं प्रवर्धयत्येवमुत्तरत उत्तरम् " इति । तयोः परिमाणाधिक्यं विधत्ते—

" अरत्निना पक्षौ द्राघीयांसौ भवतस्तस्मात्पक्षप्रवयाꣳसि वयाꣳसि " [सं० का० ५ प्र० २ अ० ५] इति ।

१ ख. च. °स्थाने ङ°।

(आहवनीयचयनार्थं भूकर्षणाभिधानम्)

चतुर्विंशतिरङ्गुलयोऽरत्निस्तेनारत्निना पक्षौ पुरुषाद्दीर्घतरौ कुर्यात् । यस्मादेवं तस्माल्लोके पक्षिणोऽपि पक्षयोरभिवृद्धियुक्ता दृश्यन्ते ।

पक्षयोराधिक्यांशं विधाय स्वरूपपरिमाणं विधत्ते—

" व्याममात्रौ पक्षौ च पुच्छं च भवत्येतावद्वै पुरुषे वीर्यं वीर्यसंमितः " [सं० का० ५ प्र० २ अ० ५] इति ।

बाह्वोः प्रसारणं व्यामस्तत्प्रक्षयोः पुच्छस्य च परिमाणं, पुरुषव्यवहारसामर्थ्यस्य च तावत्त्वादयमग्निर्वीर्येण संमितो भवति । मानसाधनं विधत्ते—

" वेणुना वि मिमीत आग्नेयो वै वेणुः स्योनित्वाय " [सं० का० ५ प्र० २ अ० ५] इति ।

अग्निना प्रविष्टत्वाद्वेणुराग्नेयः । तथा ह्याम्नातम्—" अग्नेर्देवेभ्यो निलायत स वेणुं प्राविशत् " इति । अतोऽग्नेः स्वकीयस्थानसहितत्वाय वेणुना विमानं कुर्यात् । कल्पः—" सं वरत्रा दधातनेति संप्रेष्यति " इति । पाठस्तु—

सं वरत्रेति । हे कर्षकाः पुरुषा वरत्रा च(श्च)र्ममयी रज्जुः(ज्जूः) संदधातन सम्यक्स्थापयत । तत्राऽऽहावान्बलीवर्दानामुदकपानार्थं द्रोणीविशेषान्निष्कृणोतन निष्पादयत । अवटमुदकोद्धारणाय संपादितं कूपमुद्दिणं बहलोदकयुक्तं यथा भवति तथा सिञ्चामहै, भूतलगतपङ्कोद्धारणेन सेकयुक्तं प्रस्रवणोपेतमवटं कुर्मः । कीदृशमवटम्, विश्वाऽहा सर्वेष्वप्यहःस्वदस्तं कूलपातराहित्येनाहिंसितम् । अक्षितं वर्षकालेऽपि शोषाभावलक्षणम् ।

कल्पः—"निष्कृताहावमवटमित्यवटादुदकमाहावेषूत्तिष्ठति" इति । पाठस्तु—

निष्कृताहावमिति । काष्ठपाषाणनिर्मितानां द्रोणीनामन्तस्थितावकाशरूपो योऽयमवटस्तमवटमहं सिञ्चे तत्रोदकं क्षारयामि । कीदृशमवटं, निष्कृताहावं पार्श्वेषु सच्छिद्रत्वेन निष्कृता निष्पादिता आहावा द्रोण्यो यस्यावटस्य सोऽयं निष्कृताहावस्तं, सुवरत्रं कूपादु कमुद्धर्तुं शोभना दृढा वरत्रा[1]श्चर्ममयरज्जवो यस्यासौ सुवरत्रस्तम् । सुषेचनं सुष्ठु सेकुं योग्यान्युदकोद्धरणसाधनानि पात्राणि यस्यासौ सुषेचनस्तम् । उद्दिणमुदकवन्तम् । अक्षितमुदकस्यागलितत्वेनापक्षयरहितम् । कल्पः—" सीरा युञ्जन्तीति द्वाभ्यां सीरं युनक्ति " इति ।

१ क. ज. ञ. °चाऽऽहा° । २ क. च. °कोद्धर° । ३ क. घ. ङ. च. °द्धोद्धर° ।

(आहवनीयचयनार्थं भूकर्षणाभिधानम्)

तत्र प्रथमामाह—

सीरा युञ्जन्तीति। कवयः कृषिकर्माभिज्ञाः सीरा सीरं लाङ्गलं युञ्जन्ति सज्जी कुर्वन्तु। तथा युगा युगानि त्रिषु षट्सु वा कक्ष्याविशेषेष्वपेक्षितानि पृथग्वितन्वत एकैकं विस्तारयन्तु। कीदृशाः कवयः, धीरा धैर्ययुक्ता अनलसा इत्यर्थः। देवेषु देवनाविशेषविषयेषु सुम्नया सुम्नं सुखमिच्छन्तीति सुम्नया।

अथ द्वितीयामाह—

युनक्त सीरेति। हे कर्षकाः सीरा युनक्त लाङ्गलं योजयत। युगा वितनोत युगानि विस्तारयत। कृते कर्षणेन योग्य इह योनावस्मिन्स्थाने बीजं वपत। किंच, तद्बीजं गिरांऽऽशीर्वादरूपेण मङ्गलवाक्येन युक्तमिति शेषः। शुष्टिस्तत्र निष्पन्नः स्तम्बो नोऽस्मदर्थं सभरा असत्फलभारयुक्तोऽस्तु। पक्वं फलं नो नेदीय इदन्तिकतममेवाल्पकालनिष्पाद्यमेवास्तु। सृण्या लवनसाधनेन दात्रेण लूनं सन्न आयदस्मत्समीपमागच्छतु।

कल्पः—" लाङ्गलं पवीरवमिति द्वाभ्यां रूपति " इति। पाठस्तु—

लाङ्गलं पवीरवमिति। इदं लाङ्गलमुदित्रूपत्युद्धतानि पांसूनोष्टानि यथा भवन्ति तथैव रूपतु। कीदृशं लाङ्गलं, पवीरवं वज्रवदतितीक्ष्णम्। सुशेवं कर्षकैः सुष्ठु सेवितुं शक्यम्। अतितीक्ष्णत्वेन सहसा भूमिभेदात्कर्षकाणां नास्ति प्रयास इत्यर्थः। सुमतित्सरु कर्षकैः शोभनमिदमिति मन्यमानः सुमतिः(तिः) त्सरुर्भूमौ निम्नोन्नतत्वेन विच्छिद्यगमनविशेषो यस्य तत्सुमतित्सरु। अनेन कर्षणेन फलाधिक्ये सति गवादिकं यजमानः प्राप्नोतीति शेषः। तत्र गौरविरित्युभयं प्रसिद्धम्। प्रफर्व्या प्रथमवयस्का कन्या, पीवरी पुष्टा गौः, प्रस्थावत्प्रयाणसमर्थं रथवाहनं रथं वोढुं योग्यमश्वादिकम्। यदा हि कृषिः समृद्धा भवति तदानीमेतत्सर्वं यजमानस्य सुलभम्*। अथ द्वितीयामाह—

शुनं नः फाला इति। नोऽस्माकं शुनं सुखं यथा भवति तथा फाला लाङ्गलमुखानि भूमिं वितुदन्तु विशेषेण रूपन्तु। कीनाशाः कर्षका बाहान्बलिर्दाञ्शुनं यथा भवति तथाऽभियन्तु, अभितः प्रेरयन्तो गच्छन्तु। पर्जन्यो

* एतदनन्तरं क. पुस्तके " ईदृशलाङ्गलेन कर्षणे सति कृषिसमृद्धिद्वारा प्रफर्व्यं प्रथमवयस्कां पीवरीं पुष्टां गामविं प्रस्थावत्प्रयाणसमर्थं रथवाहनमश्वादिकं यजमानः प्राप्नोतीति शेष इति पाठान्तरम् " इति वर्तते।

१ क. कुर्वन्ति। २ घ. ङ. °ताविषये°। ३ क. ष. ङ. निमग्नत्वे°।

(आहवनीयचयनार्थं भूकर्षणाभिधानम्)

मेघः शुनं यथा भवति तथा मधुना मधुररसेन युक्तैः पयोभिरुदकैर्वृष्टिमतिसृजत्विति शेषः । शुनासीरा वाय्वादित्यौ युवां शुनं सुखमस्मासु धत्तम् ।

सीरा युञ्जन्तीति मन्त्रद्वयेन साध्यं लाङ्गलयोगं लाङ्गलं पवीरवमिति मन्त्रद्वयेन साध्यं कर्षणं च क्रमेण विधत्ते--

" यजुषा युनक्ति यजुषा कृषति व्यावृत्यै" [सं० का० ५ प्र० २ अ० ५] इति ।

यजुषा मन्त्रेण । लौकिकं तु कर्षणममन्त्रकमिति व्यावृत्तिः ।

बलीवर्दसंख्यां विधत्ते--

" षड्गवेन कृषति षड्वा ऋतव ऋतुभिरेवैनं कृषति " [सं० का० ५ प्र० २ अ० ५] इति ।

कक्ष्यात्रयरूपेणावस्थितेषु त्रिषु युगेषु बध्यमानाः षट्संख्याका गावो बलीवर्दा यस्य लाङ्गलस्य तत्षड्गवम् । पक्षान्तरं विधत्ते--

" यद्द्वादशगवेन संवत्सरेणैव " [सं० का० ५ प्र० २ अ० ५] इति ।

कक्ष्याषट्कगतेषु बध्यमाना द्वादशसंख्याका गावो यस्य लाङ्गलस्य तद्द्वादशगवं, तेन यदि कृषेत्तदानीं द्वादशमासात्मकेन संवत्सरेणैव कर्षणं कृतं भवति ।

चयनस्थानस्य साकल्येन कर्षणप्राप्तौ तद्वारयितुं विधत्ते--

" इयं वा अग्नेरतिदाहादबिभेत्सैतद्द्विगुणमपश्यत्कृष्टं चाकृष्टं च ततो वा इमां नात्यदहद्यत्कृष्टं चाकृष्टं च भवत्यस्या अनतिदाहाय " [सं० का० ५ प्र० २ अ० ५] इति ।

साकल्येन कृष्टे स्थाने चीयमानोऽग्निर्भूमिमत्यन्तं दहति । तस्मादतिदाहादबिभेदिति सा भूमिस्तमतिदाहं परिहर्तुमुपायं विचार्य कस्मिंचित्प्रदेशे कृष्टं कस्मिंश्चिदकृष्टमित्येवमेतद्द्विगुणमुभयविधस्थानमुपायत्वेनाश्रयत् । लोकेऽपि प्रहारेण च्छिन्नेऽवयवेऽग्निसामीप्येन यावान्संतापो न तावानितरस्मिन्नवयवे दृश्यते । तस्मात्कृष्टाकृष्टभेदेन द्वैगुण्ये सत्यग्निश्रितो भूमिं नात्यन्तं दहति । तस्माद्भूमेरनतिदाहाय किंचित्कृष्टं किंचिदकृष्टमित्येवं द्विगुणं कुर्यात् ।

तदेतद्द्वैगुण्यं प्रकान्तरेण प्रशंसति--

" द्विगुणं त्वा अग्निमुद्यन्तुमर्हतीत्याहुर्यत्कृष्टं चाकृष्टं च भवत्यग्नेरुद्यत्यै " [सं० का० ५ प्र० २ अ० ५] इति ।

(आहवनीयच्यनार्थं भृकर्षणाभिधानम्)

गार्हपत्यादुत्तरवेदिं प्रत्यग्निप्रणयनकाले सिकताभिरेकं पात्रमापूर्य तस्योपरि पात्रान्तरेऽग्निं प्रक्षिप्य द्विगुणेन पात्रेणाग्नेरुद्यमनं दृष्टं तद्वदत्रापि कृष्टाकृष्टभेदेन द्विगुणं स्थानमग्नेरुद्यमनयोग्यमित्यभिज्ञा आहुः। तस्मादुद्यमनाय द्विगुणं कर्तव्यम्।

अथ कर्षणसमाप्तेरूर्ध्वं यदा बलीवर्दानुत्सृजति तदानीमुत्सर्जनाय दिग्विशेषं विधत्ते—

" एतावन्तो वै पशवो द्विपादश्च चतुष्पादश्च तान्यत्प्राच उत्सृजेदुदायापि दृष्याद्यद्दक्षिणा पितृभ्यो नि धुवेद्यत्प्रतीचो रक्षाꣳसि हन्युरुदीच उत्सृजत्येषा वै देवमनुष्याणाꣳ शान्ता दिक्तामेवैनाननूत्सृजत्यथो खल्विमां दिशमुत्सृजत्यसौ वा आदित्यः प्राणः प्राणमेवैनाननूत्सृजति " [सं० का० ५ प्र० २ अ० ५] इति।

बलीवर्दप्रेरकाः कर्षका द्विपादो बलीवर्दाश्चतुष्पादस्तानुदङ्मुखत्वेन निःसारयेत्। रुद्रः स्वदिक्सामीप्यात्प्राच्यां दिश्यागत्य निर्गच्छतो बलीवर्दान्ग्रहीष्यामीत्यवतिष्ठते। अतस्तत्र निर्गमने रुद्राय दत्ता भवन्ति। दक्षिणस्यां दिशि पितरः स्वत एव तिष्ठन्ति, तत्र निर्गमने तेभ्यो निधुवेन्नितरामर्पयति। प्रतीच्यां वरुणप्रेरितानि रक्षांस्यवतिष्ठन्ते, तानि च पशून्हन्युः। उदीची तु बाधकरहितत्वाद्देवानां मनुष्याणां च शान्ता। अतस्तामेवानु एनान्बलीवर्दानुत्सृजेत्। अथो खल्वपि च येयमुदीची तामिमां दिशं प्रति यदोत्सृजति तदानीं प्राणरूपमादित्यमनूत्सर्जनं कृतं भवति। आदित्यस्य प्राणरूपत्वं प्राणस्वामित्वादवगन्तव्यम्। अत एवारण्यकाण्डे समाम्नायते—" योऽसौ तपन्नुदेति। स सर्वेषां भूतानां प्राणानादायोदेति " इति। आथर्वणिकाश्चाऽऽमनन्ति—" आदित्यो ह वै बाह्यः प्राण उदयत्येष ह्येनं चाक्षुषं प्राणमनुगृह्णानः " इति। तस्य चाऽऽदित्यस्योत्तरदिग्वर्तित्वं पुरुषविशेषापेक्षया द्रष्टव्यम्। मेरोः परितस्तत्तल्लोकेषु तत्तत्प्राणिनो वर्तन्ते। तथा सति मेरुं प्रदक्षिणीकुर्वन्नादित्योऽस्मदपेक्षया योदीची तस्यामप्यागच्छति। तदानीं कस्मिंश्चिन्मेरुपार्श्वेऽवस्थितैरादित्यो विलोक्यते। सोऽयं तेषां प्रत्युदयः। एतत्सर्वमभिप्रेत्य तस्योत्तरदिगुदयमङ्गीकृत्य सा दिक्प्रशस्यते।

---

१ क. थ. ङ. प्राणिस्वा°।

(आहवनीयचयनार्थं भूकर्षणाभिधानम्)

कर्षणादूर्ध्वमुत्सर्जनप्रकार उक्तः । अथ कर्षणकाले कश्चिद्विशेष उच्यते ।

कल्पः—" पुच्छाच्छिरोऽधि कृषति कामं कामदुघे धुक्ष्वेति प्रदक्षिणमावर्तयंस्तिस्रस्तिस्रः सीताः संहिताः कृषति मध्ये संभिन्ना भवन्ति दक्षिणात्पक्षादुत्तरस्माद्दक्षिणायै श्रोणेरुत्तरमंसमुत्तरायै दक्षिणम् " इति । पाठस्तु—

कामं कामेति । काम्यन्त इति कामा भोगास्तान्दोग्धि संपादयतीति कामदुघा लाङ्गलपद्धतिः । हे कामदुघे मित्रादीनां काममपेक्षितं भोगं धुक्ष्व संपादय ।

कर्षणकाले प्रादक्षिण्येनाऽऽवृत्तिं विधत्ते—

" दक्षिणा पर्यावर्तन्ते स्वमेव वीर्यमनु पर्यावर्तन्ते तस्माद्दक्षिणोऽर्ध आत्मनो वीर्यावत्तरोऽथो आदित्यस्यैवाऽऽवृतमनु पर्यावर्तन्ते तस्मात्पराञ्चः पशवो विष्ठिष्ठन्ते प्रत्यञ्च आवर्तन्ते " [सं० का० ५ प्र० २ अ० ५] इति ।

दक्षिणा प्रादक्षिण्येन दक्षिणभागमवस्थाप्य वामभागस्य परिभ्रामणं प्रादक्षिण्यं, पुरुषस्य दक्षिणभागे सामर्थ्यसद्भावात्तदेवानुसृत्य पर्यावृत्तिः कृता भवति । यस्माद्दक्षिणभागे वीर्यं श्रुत्यभिप्रेतं तस्माल्लोके सर्वव्यापारे दक्षिणहस्तस्यैव वीर्यातिशय उपलभ्यते । किंचाऽऽदित्यो मेरुं प्रदक्षिणी कुरुते तदप्यत्रानुसृतं भवति । यस्मादत्राऽऽवृत्तिः कृता तस्माल्लोकेऽपि प्रातःकाले पशवः पराञ्चोऽरण्ये गत्वा विविधं संचरन्ति, पुनः सायंकाले गृहं प्रत्यभिमुखा आवर्तन्ते । कर्षणे प्रकारविशेषं विधत्ते—

" तिस्रस्तिस्रः सीताः कृषति त्रिवृतमेव यज्ञमुखे वि यातयति " [सं० का० ५ प्र० २ अ० ५] इति ।

लाङ्गलपद्धतिः सीता । पुच्छादारभ्य शिरःपर्यन्तं तिस्रः सीताः कृषेत् । तथा दक्षिणात्पक्षादारभ्योत्तरपक्षपर्यन्तं तिस्रः सीताः कृषेत् । तथा दक्षिणस्याः श्रोणेरारभ्योत्तरांसपर्यन्तं तिस्रः सीताः कृषेत् । तथोत्तरस्याः श्रोणेरारभ्य दक्षिणांसपर्यन्तं तिस्रः सीताः कृषेत् । एवं द्वादश सीताः संपद्यन्ते । एवमावृत्तया त्रिंसंख्यया त्रिवृत्स्तोममेव यज्ञप्रारम्भे प्रसारयति ।

कल्पः—"घृतेन सीतेति सीतान्तरालान्यभिमृशति " इति । पाठस्तु—

घृतेन सीतेति । इयं सीता मधुना मधुरेण घृतेन समक्ता सम्यगार्द्रीकृता । अत एव विश्वैर्देवैर्मरुद्भिः समीचीनेयमित्यङ्गीकृता । सा पुनरूर्जस्वती पयसा

---

१ घ. ङ. संमिता । २ क. घ. ङ. °दुत्तरमुत्त° । ३ क. घ. ङ. °क्षिणं दक्षिणा° । ४ ख. च. °रिभ्रम° । ५ ख. च. °म्भे विस्तार° ।

(आहवनीयचयनार्थं भूकर्षणाभिधानम्)

पिन्वमाना जलेनाऽऽप्यायिता वर्तसे(ते)। हे सीते जलेनाप्यायिता त्वमस्मान्प्रत्यभ्याववृत्स्वाभित आवृत्ता भव। अत्र विनियोगसंग्रहः—

सं गार्हपत्य उरुष्याग्निं चतुर्भिर्नि(र्वे)पेदमुम्।
माता शिक्याद्दुग्धां मुञ्चेद्यदं(दा) शिक्यपरिग्रहः॥
नमो नैर्ऋतदेशे तच्छिक्यं त्यक्त्वा यदित्यतः।
शिक्यजालेन याः कृष्णा इष्टकाः स्थापयेदमूः॥
यस्यास्त्रिभिस्तिस्र एताः कृष्णा उपदधाति हि।
निवेऽग्निमुपतिष्ठेत सं व संपेष्यतीतरान्॥
निष्कृताहाऽऽवटे सिञ्चेत्सीराद्याभ्यां हलार्पणम्।
लाङ्गलाभ्यां कृषेत्कामममावर्तेत प्रदक्षिणम्॥
घृतेऽन्तराले संस्पर्श इति मन्त्रास्तु विंशतिः॥

अत्र मीमांसा।

तृतीयाध्यायस्य द्वितीयपादे चिन्तितम्—

ऐन्द्र्या निवेशनेत्यग्निं गार्हपत्यं भजेदिति।
प्रकाश्यो मुख्य इन्द्रो वा गौणो मुख्यस्तु पूर्ववत्॥
एकस्य गौणताधेय्ये मन्त्रस्यैवानुवादतः।
गौणताऽनाऽऽयुपस्थाने मन्त्रः श्रुत्या नियुज्यते॥

अग्निचयने निवेशनः संगमन इत्यादिका काचिदैन्द्री समाम्नाता। तस्या उत्तरार्धं इन्द्रो न तस्थाविति विद्यमानत्वात्। तन्मन्त्रविषयं ब्राह्मणं चैवमाम्नायते—"निवेशनः संगमनो वसूनामित्यैन्द्र्या गार्हपत्यमुपतिष्ठते" इति। एतेन ब्राह्मणेन गार्हपत्ये विनियुज्यमानो मन्त्रोऽयं प्रकाशमन्मुख्यमिन्द्रं प्रकाशयति। मुख्यश्चेन्द्रः स्वर्गाधिपतिः सहस्राक्षस्तत्रैवेन्द्रशब्दस्य रूढत्वात्। गौणस्त्विन्द्रो गार्हपत्यस्तस्यैश्वर्यगुणयोगेन यज्ञसाधनत्वेन मुख्येन्द्रसदृशत्वात्। तत्र पूर्वन्यायेन क्षीप्रप्रतीत्या मुख्येन्द्रे मन्त्रेण प्रकाशिते सति मन्त्रब्राह्मणयोर्विसंवादं वारयितुं गार्हपत्यशब्देन मुख्येन्द्रो गार्हपत्यसमीपदेशो वा लक्षणीय इति प्राप्ते ब्रूमः—इन्द्रगार्हपत्ययोरन्यतरस्य गौणत्वेऽवश्यंभाविनि सति ब्राह्मणवाक्यस्य विधायकत्वादप्राप्तार्थत्वेन विधौ लक्षणाया अन्याय्यत्वात्प्राप्तार्थत्वेनानुवादको मन्त्र

१ क. च. त्वाऽनमन्त्र इन्द्रविषयः। ब्रा°।

(आहवनीयचयनार्थौषधिवापाभिधानम्)

एव स्वघटकेन्द्रशब्देन वह्निं लक्षयति । ततो गार्हपत्यप्रकाशने समर्थं मन्त्रमै-न्द्येति तृतीयाश्रुतिर्वह्न्युपस्थाने विनियुङ्क्ते ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वे-दीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे द्वितीयप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ चतुर्थाष्टके द्वितीयप्रपाठके षष्ठोऽनुवाकः) ।

या जाता ओषधयो देवेभ्यस्त्रियुगं पुरा।
मन्दामि ब्रह्मणामहꣳ शतं धामानि सप्त च ।
शतं वो अम्ब धामानि सहस्रमुत वो रुहः ।
अधा शतक्रत्वो यूयमिमं मे अगदं कृत ।
पुष्पावतीः प्रसूवतीः फलिनीरफला उत ।
अश्वा इव सजित्वरीर्वीरुधः पारयिष्णवः ।
ओषधीरिति मातरस्तद्वो देवीरुप ब्रुवे । रपाꣳसि विध्नतीरितः रपः (१) चातयमानाः ।
अश्वत्थे वो निषदनं पर्णे वो वसतिः कृता ।
गोभाज इत्किलासथ यत्सनवथ पूरुषम् । यदेनं बाजयन्निमा ओषधीर्हस्त आदधे । आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा । यदोषधयः संगच्छन्ते राजानः समितावि व । विप्रः स उच्यते भिषग्रक्षोहाऽमीवचातनः । निष्कृतिर्नाम वो माताऽथा यूयꣳ स्थ संकृतीः ।
सरा: पतत्रिणीः (२) स्थन यदामयति निष्कृ-

(आहवनीयचयनार्थौषधिवापाभिधानम्)

त । अन्या वो अन्यामवत्वन्याऽन्यस्या उपावत । ताः सर्वा ओषधयः संविदाना इदं मे प्रावंता वचः । उच्छुष्मा ओषधीनां गावो गोष्ठादिवेरते । धनꣳ सनिष्यन्तीनामात्मानं तव पूरुष । अति विश्वाः परिष्ठाः स्तेन इव व्रजमक्रमुः । ओषधयः प्राचुच्यवुर्यत्किं च तन्वा३ररपः । याः (३) त आतस्थुरात्मानं वा आविविशुः परुःपरुः । तास्ते यक्ष्मं वि बाधन्नामुग्रो मध्यमशीरिव । साकं यक्ष्म प्र पत चाषेणेव किकिदीविना । साकं वातस्य ध्राज्या साकं नश्य निहाकया । अश्वावतीꣳ सोमवतीमूर्जयन्तीमुदोजसम् । आ विꣳशतु वो ओषधीरस्मा अरिष्टतातये । याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः । बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वꣳहसः । याः (४) ओषधयः सोमराज्ञीः प्रविष्टाः पृथिवीमनु । तासां त्वमस्युत्तमा प्र णो जीवातवे सुव । अवपतन्तीरवदन्दिव ओषधयः परि । यं जीवमश्नवामहै न स रिष्याति पूरुषः । याश्चेदमुपशृण्वन्ति याश्च दूरं परागताः । सर्वा संगत्य वीरुधो मघं दत्त भेषजम् । मा वो रिषत्खनिता यस्मै चाहं खनामि वः । द्विपच्चतुष्पदस्माकꣳ सर्वमस्त्वनातुरम् । ओषधयः

(आहवनीयचयनार्थौषधिवापाभिधानम्)

सं वदन्ते सोमेन सह राज्ञा । यस्मै करोति ब्राह्मणस्तꣳ राजन्पारयामसि (५) ॥

(रपः पतत्रिणीर्या अरꣳहसो याः खनामि वोऽष्टादश च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके द्वितीयप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ चतुर्थकाण्डे द्वितीयप्रपाठके षष्ठोऽनुवाकः) ।

पञ्चमेऽनुवाकेऽग्निक्षेत्रकर्षणमुक्तम् । अथ षष्ठ ओषधिवापो विधीयते । कल्पः—" या जाता ओषधय इति चतुर्दशभिरोषधीर्वपति " इति ।

तत्र प्रथमामाह—

या जाता इति । युगशब्दः कालवाची । त्रियुगं वर्षाः शरद्धेमन्त इति कालत्रयमुद्दिश्य पुरा सृष्ट्यादौ देवेभ्यः सकाशाद्या ओषधय उत्पन्ना बभ्रूणां प्राणिभरणसमर्थानां परिपाकेन(ण) पिङ्गलवर्णानां वा तासामोषधीनां शतं धामानि शतसंख्याकाञ्जातिभेदान्सह च विशेषाकारेण ग्राम्यानारण्यांश्च सप्त धान्यभेदानवेक्ष्य मन्दामि हृष्यामि । अथ द्वितीयामाह—

शतं वो अम्बेति । हेऽम्ब मातृस्थानीया ओषधयो वो युष्माकं धामानि जातिभेदाः क्षेत्राणि वा शतं सन्ति । उतापि च वो युष्माकं रुहः प्ररोहा अङ्कुराश्च सहस्रं सन्ति । शतं सहस्रमित्याद्यामप्रपरिमितत्वमुपलक्ष्यते । अथैवं बहुभेदोपेतत्वे सति शतसंख्याकाः क्रतवो याभिर्युष्माभिर्निष्पाद्यन्ते तादृशः शतक्रतवो यूयं मे मदर्थमिमं यजमानमगदं कृत क्षुत्पिपासादिरोगरहितं कुरुत । अथ तृतीयामाह—

पुष्पावतीरिति । अत्रौषधयो नानाविधैर्विशेषणैः प्रशस्यन्ते । पुष्पावतीः काश्चिदोषधयः पुष्पमात्रपर्यवसायिन्यो न तु फलन्ति । प्रसूवतीरन्या ओषधयः पुष्पपूर्वकफलोत्पत्तिस्थायिन्यः । फलिनीरपराः काश्चिदोषधयः पुष्पं विना केवलेन फलेन युक्ताः । उतापि चाफला अन्याः काश्चिदोषधयः फलेन तद्वे-

---

१ स. च. °धीर्निषप° । २ स. च. °हुषिधेपं° ।

(आहवनीयचयनार्थौषधिवापाभिधानम्)

तुपुष्टेण च विरहिताः। तदेतत्सर्वं लोकसिद्धमनुसारेणोदाहरणीयम्। वीरुधः काश्चिदोषधयो लतारूपाः, पारयिष्णवः फलपाकान्तत्वं परित्यज्य पारं बहुसंवत्सरावसानं प्राप्तुं शीलं यासां तास्तथाविधाः। तद्यथा—नागबलीप्रभृतय एताः सर्वा ओषधयोऽश्वा इव रंहित्वरीः। यथाऽश्वा युद्धे बहवः सह शीघ्रं गत्वा जयशीला भवन्ति, एवमोषधयोऽपि बहव्यः सहोत्पन्नाः फलपर्यन्तलक्षणजयशीला भवन्ति। अथ चतुर्थीमाह—

ओषधीरितीति। हे मातरो मातृसमाना देवीर्देव्यः। इतिशब्दोऽत्र हेत्वर्थे वर्तते। यस्मादोषधीर्यूयमोषधयस्तत्तस्माद्वो युष्मानुपह्वये प्रार्थये। ओषो दाहः फलपाको धीयते स्थाप्यते यासु ता ओषधयः। अतो युष्मान्प्रति प्रार्थनमुचितमित्यर्थः। कथं प्रार्थनमिति तदुच्यते—रपांसि विन्वतीः पापानि विनाशयन्त्यो रपश्चातयमानाः पापफलं दुःखमपि विनाशयन्त्य इत प्राप्नुत। अथ पञ्चमीमाह—

अश्वत्थे व इति। हे ओषधिदेवता वो युष्माकमश्वत्थे निषदनं पर्णे पलाशवृक्षे वो युष्माकं वसतिः कृता निवासकारणं गृहं कृतम्। देवताधिष्ठितत्वादेव लोकेऽत्यवृक्षः प्रदक्षिणनमस्कारादिभिः पूज्यते। पलाशवृक्षश्चेध्मादिरूपेण कर्मसाधनं संपन्नः। ईदृशोऽपि यूयं गोभाज इव्वदीयस्थावररूपेण भूमिभाज एव भूत्वाऽत्थ किल स्थिता इत्येतल्लोके प्रसिद्धम्। तत्किमर्थमिति तदुच्यते—यद्यस्मात्कारणात्पुरुषं मनुष्यं सनवथान्नदानेन पोषयथ तस्मादेवं स्थावररूपावस्थानमित्यर्थः। अथ षष्ठीमाह—

यदहं वाजयन्निति। यद्यदाऽहं वाजयन्नन्नमिच्छन्निमा ओषधीर्हस्त आदधामि तदानीमेव यक्ष्मस्य क्षुधादिरोगस्याऽऽत्मा स्वरूपं पुरा नश्यति भोजनात्प्रागेव नष्टसदृशो भवति। तत्र दृष्टान्तः—यथा लोके जीवगृभो धीवरैर्जीवस्य शशादेर्ग्रहणात्पुरा भीतः शशः कर्णाभ्यां नेत्रे पिधाय भूमिसंश्लिष्टो मृत इव तिष्ठति तद्वत्। अथ सप्तमीमाह—

यदोषधय इति। यद्यदोषधयः सर्वाः संगच्छन्ते फलदानाय क्षेत्रसंगता भवन्ति, तत्र दृष्टान्तः—राजानः समितावित्र, यथा युद्धे प्रतिपक्षिणः सेनां जेतुं परस्परमनुकूला राजानः संगच्छन्ते तद्वत्। तदानीं संगतास्वोषधीषु विप्रो

१ ख. च. °सिद्धानु। २ च. °क्षिणान°।

(आहवनीयस्तवनार्थौषधिवीपाभिधानम्)

भैषावी रसवीर्यभावनाभिज्ञो यः पुरुषः स भिषगुच्यते क्षुधादिरोगचिकित्सक इत्यभिधीयते । कथं भिषक्त्वमिति तदुच्यते—रक्षोघ्ना एकाभिरेताभिः पुरोडाशं रक्षोघ्नं कृत्वा रक्षसां हन्ता तदुपद्रवरूपं रोगं विनाशयति । अमीवचातन ओषधिजन्यपथ्यादिभिरमीवान्रोगांश्चातयति विनाशयतीत्यमीवचातनः ।

अथाष्टमीमाह—

निष्कृतिर्नामेति । हे ओषधयो वो युष्माकं निष्कृतिर्नाम क्षुधादिविनाशसमर्थं मातेव मातृवदुपलिनिमित्तं क्षुदादिकं निवारयितुमर्वं हि भवतीनामुत्पत्तिः । अथैवं सति यूयं संकृतीः स्थ सम्यक्स्वकार्ये क्षमा भवत । सराः क्षुदादीनामपवारयित्र्यः पतत्रिणीः पतत्रं पत्रं तस्मात्पत्र्यागमैनं तेनाऽऽगमनेनोपेताः स्थन भवत । यत्क्षुदादिकमामयति रोगवदाधत्ते तन्निष्कृत विनाशयत । अथ नवमीमाह—

अन्या व इति । हे ओषधयो वो युष्माकं मध्येऽन्या काचिदोषधिरन्यामितरामोषधिमन्यस्मिन्कर्मणि रक्षतु । तथा रक्षिता साऽन्याऽप्यन्यस्या रक्षिकाया उपावत समीपमागत्य तामप्यवतु । संभूयकारित्वात्परस्परं रक्षकत्वमुचितम् । तथाभिधाः सर्वा हे ओषधयः संविदानाः परस्परमेकमत्यं गता इदं मे मदीयं वचो वाक्यं प्रार्थनारूपं शृणुत प्रकर्षेण रक्षत । अथ दशमीमाह—

उच्छुष्मा इति । ओषधीनां शुष्मास्तदुपभोगजन्या बलविशेषा उदीरत उद्गच्छन्ति । तत्र दृष्टान्तः—गावो गोष्ठादिव, यथा गावो निवासस्थानाद्गृहादरण्यदेशं प्रत्युद्गच्छन्ति तद्वत । कीदृशीनामोषधीनां, पुरुष तवाऽऽत्मानं धनं सनिष्यन्तीनां ह यजमान त्वदीयं शरीरं धनमिव दातुमिच्छन्तीनां, यथा धनं दास्यन्ति एवमोषधयोऽपि त्वदीयशरीराकारेण परिणताः शरीरं दास्यन्तीत्यर्थः ।

अथैकादशीमाह—

अति विश्वा इति । परिष्ठाः शरीरस्योपरि स्थिता उदरमध्ये प्रविष्टा विश्वाः सर्वा ओषधयोऽन्यजीर्णादिदोषमतिलङ्घ्याक्रमुः क्रान्ता देहे व्याप्ता इत्यर्थः । तत्र दृष्टान्तः—स्तेन इव व्रजं, यथा रात्रौ गुप्तचोरो गोष्ठं प्रविश्य गोपहर्तुं सावधानो गोशालायां(लां) सर्वतो व्याप्नोति तद्वत । तनूवां शरीराणां

---

१ ख. घ. ङ. च. °मं निवारय° । २ ख. च. °व °° । ३ ख. च. क्षुधादिविनाशयि° । ४ ख. च. °मनं ।

(आहवनीयचयनार्थौषधिवापाभिधानम्)

संबन्धि यत्किंच रपो व्यरशिरोव्याधिगुल्मातिसारादिरूपं पापफलं यत्किंचिद्दुरितं तत्सर्वमोषधयः प्राचुच्यवुर्विनाशितवत्यः। अथ द्वादशीमाह——

यास्त इति। हे यजमान ते तवाऽऽत्मानं शरीरं या ओषधय अतस्थुराक्रम्य तिष्ठन्ति, या ओषधयः परुःपरुराविविशुः रसरूपेण तत्तत्पर्वं प्रविष्टवत्यस्ताः सर्वास्ते तव यक्ष्मं रोगं विबाधन्तां विशेषेण नाशयन्तु। तत्र दृष्टान्तः—पश्यमशीरिव, मध्यमेन स्वकीयपरकीयपक्षपातरहितेन शास्त्रीयमार्गेण शेते वर्तत इति पश्यमशीः। तादृशो राजा दृष्टान्तत्वेनो भूत्वा यथा विनाशयति तद्वत्। अथ त्रयोदशीमाह——

साकं यक्ष्मेति। श्लेष्मावरुद्धकण्ठजन्यध्वनेरनुकरणार्थोऽयं किकिशब्दस्तेन किकिना ध्वनिविशेषेण दीव्यति व्यवहरतीति रोगविशेषः किकिदीविः। स च श्लेष्मजन्यः श्येनवत्तीव्रतरत्वात्पित्तजन्यो रोगः श्येनः। हे यक्ष्म राजयक्ष्मादिरोग त्वं पित्तजन्येन श्लेष्मजन्येन च रोगेण साकं प्रपत प्रकर्षेण नष्टो भव। तथा वातस्य धाज्या वातरोगस्य गत्या व्याप्त्या साकं नश्य नष्टो भव। यथा यया पीडया निहतोऽस्मि हा कष्टमिति शब्दं करोमि सा निहाका तया सह नष्टो भव। अथ चतुर्दशीमाह—

अश्वावतीमिति। काचिदोषधिजातिरश्ववती, अश्वा अस्यां सन्तीत्यश्ववती, ओषधिसमृद्धौ सत्यां धनद्वारेणाश्वा लभ्यन्त इत्यर्थः। अन्या काचिदोषधिजातिः सोमवती सोमयागोऽस्यामस्तीति सोमवती, धान्यसमृद्धौ सत्यां सोमयागः कर्तुं शक्यत इत्यर्थः। अपरोर्जयन्ती, ऊर्जं बलं प्राणचेष्टां वा करोतीत्यर्थः। अन्या जातिरुदोजाः, उत्कृष्टमोजोऽष्टमधातुरूपं यस्याः सोदोजाः, अन्नद्वारेण शरीरधातूनपोषयतीत्यर्थः। ताः सर्वा ओषधीरहमाविदिति लब्धवानस्मि। किमर्थम्। अस्मा अरिष्टतातये अरिष्टस्य तातिररिष्टतातिः। अस्य यजमानस्य हिंसाराहित्यायेत्यर्थः।

तदेवमोषधिवापार्था ऋचश्चतुर्दशाऽऽम्नाताः। अथातैव विकल्पिताः पञ्च आम्नायन्ते। तत्र प्रथमामाह——

याः फलिनीरिति। या ओषधयः फलयुक्ता याः फलरहिता याश्च पुष्परहिता याश्च पुष्पयुक्तास्ताः सर्वा बृहस्पतिप्रसूताः सत्यो नोऽस्मानंहसः पापान्मोचयन्तु। अथ द्वितीयामाह—

या ओषधय इति । सोमो राजा यासां ताः सोमराज्ञ्यस्तादृश्यो या ओषधयः पृथिवीमनु प्रविष्टास्तासां मध्य इदानीमुप्यमाने हे ओषधे त्वमुत्तमाऽसि । अतो नोऽस्माञ्जीवातवे जीवनौषधाय प्रसुव प्रकर्षेण प्रेरय । अथ तृतीयामाह--

अवपतन्तीरिति । द्युलोकात्पतन्त्यो वृष्टिबिन्दव ओषधिरूपेणोत्पद्यन्ते । तथा चाग्निहोत्रब्राह्मणे समाम्नायते-" यावन्तः स्तोका अवापद्यन्त । तावतीरोषधयोऽजायन्त " इति । अत्रापि दिवः परि स्वर्गस्योपरितनप्रदेशादवपतन्तीरधस्ताद्भूमौ पतन्त्य ओषधयोऽवदन्नेतद्वचनमुक्तवत्यः । कीदृशं वचनमिति चेदुच्यते-यं जीवमश्रवामहै व्याप्नुमः स पुरुषो न रिष्याति नैव विनश्यति ।

अथ चतुर्थीमाह--

याश्चेदामिति । याश्चौषधिदेवता इदं मदीयं प्रार्थनमुपशृण्वन्ति, याश्चान्या ओषधिदेवता दूरं यथा भवति तथा परागताः सत्य ईषच्छृण्वन्ति ताः सर्वा ओषधिदेवता इह कर्मणि संगता भूत्वाऽस्मै यजमानाय भेषजं संदत्त क्षुदादिरोगचिकित्सां सम्यक्कुरुत । अथ पञ्चमीमाह--

मा वो रिषदिति । हे ओषधयो वो युष्माकं खनिता चिकित्साये युष्मदीयं मूलं ग्रहीतुं खननस्य कर्ता मा रिषन्मा विनश्यतु । अहं च यस्मै रुग्णाय चिकित्सार्थं खनामि युष्मन्मूलं ग्रहीतुं खननं करोमि, सोऽपि मा विनश्यतु । किं बहुनाऽस्माकं संबन्धि यद्द्विपच्चतुष्पद्वा प्राणिजातं युष्मदुपजीवति तत्सर्वमनातुरं रोगरहितमस्तु । अथ षष्ठीमाह-

ओषधय इति । ओषधय ओषधिदेवताः स्वकीयेन स्वामिना सोमेन राज्ञा सह संवादं कुर्वन्ति । कथं संवाद इति तदुच्यते--यस्मै रुग्णाय चिकित्सामस्मदीयमूलादिना ब्राह्मणः करोति, हे राजंस्तमातुरं वयं पारयामसि व्याधेरुत्तारयामः । एतैर्मन्त्रैः साध्यमोषधिवापं विधत्ते--

" ओषधीर्वपति ब्रह्मणाऽन्नमव रुन्धेऽर्कैऽर्कश्रीयते " [तै० का० ५ प्र० २ अ० ५] इति ।

ब्रह्मणौषधिवापहेतुभूतमन्त्रसामर्थ्येनान्नं व्याप्नोति । किंचैवं सत्यर्कैऽर्चनीये स्थानेऽर्कोऽर्चनीयोऽग्निश्रितो भवति । मन्त्रसंख्यां विधत्ते--

---

१ स. च. °राज्ञीस्ता° ।

(आहवनीयचयनार्थौषधिवापाभिधानम्)

" चतुर्दशभिर्वपति सप्त ग्राम्या ओषधयः सप्ताऽऽरण्या उभयीषामवरुद्ध्या अन्नस्यान्नस्य वपत्यन्नस्यान्नस्यावरुद्ध्यै " [सं० का० ५ प्र० २ अ० ५] इति।

तिलमाषव्रीहियवाः प्रियङ्गवणवो गोधूमाश्चेति सप्त ग्राम्या ओषधयः। वेणुश्यामाकनीवारजार्तिला गवीधुका मर्कटका गार्मुताश्चेति सप्ताऽऽरण्या ओषधयः। नानाविधस्यान्नस्य बीजवापेन नानाविधमन्नमाप्नोति।

यदुक्तं सूत्रकारेण—" सप्त ग्राम्याः कृष्टे सप्ताऽऽरण्या अकृष्टे " इति। तत्र ग्राम्याणां देशविशेषं विधत्ते—

" कृष्टे वपति कृष्टे ह्योषधयः प्रतितिष्ठन्ति " [सं० का० ५ प्र० २ अ० ५] इति। कृष्टे देशे वपति ग्राम्या इति शेषः। मूलानां सर्वतः प्रस्तरणे दृढावस्थानं प्रतिष्ठा।

एकैकस्यां सीतायां मूलमारभ्याग्रपर्यन्तमनुगतं वपनं विधत्ते—

" अनुसीतं वपति प्रजात्यै " [सं० का० ५ प्र० २ अ० ५] इति। प्रभूतत्वेनोत्पत्तिः प्रजातिः। सर्वासु सीतासु बीजावापं विधत्ते—

" द्वादशसु सीतासु वपति द्वादश मासाः संवत्सरः संवत्सरेणैवास्मा अन्नं पचति " [सं० का० ५ प्र० २ अ० ५] इति।

यदुक्तं सूत्रकारेण—" यामोषधिं नाधिगच्छेत्तस्याः स्थाने यवान्मधुमिश्रान्वपेदुप मेऽसीति वा मनसा ध्यायेदधिगतायां यः प्रथम इध्म आगच्छेत्तस्मिन्नेनामुपसंनह्येद्ये वनस्पतीनां फलग्रहयस्तानिध्म उपसंनह्य प्रोक्षेत् " इति, तदिदं वनस्पतिप्रोक्षणं विधत्ते—

" यदग्निचिदनवरुद्धस्याग्नीयादवरुद्धेन व्युध्येत ये वनस्पतीनां फलग्रहयस्तानिध्मेऽपि प्रोक्षेदनवरुद्धस्यावरुद्ध्यै" [सं० का०५प्र०२अ०५] इति।

यद्यप्यग्निचित्पुरुषोऽनवरुद्धस्य सीतास्वनुप्तस्य द्रव्यस्यान्नमश्नीयात्तदानीमवरुद्धेन सीतानुप्तेन धान्येनापि वियुक्तो भवेत्। अतोऽनानुप्तस्याप्युप्तत्वसिद्धये वनस्पतीनां मध्ये ये पुष्पमन्तरेण फलं गृह्णन्त्युदुम्बरादयस्तानप्यादायेध्मेन सह संनह्य प्रोक्षणं कुर्यात्। ततः सर्वमपि भक्ष्यजातमस्यावरुद्धमेव भवति। अत्र विनियोगसंग्रहः—

(आहवनीयचयनार्थलोष्टक्षेपार्थाभिधानम्)

" या जा ग्राम्यास्तथाऽऽरण्याः कृष्टाकृष्टभुवोवपेत् ।
चतुर्दशभिरन्यास्तु षड्भिरेव विकल्पिताः ॥

अत्र मीमांसा ।

दर्शनाभ्यायस्य पञ्चमपादे चिन्तितम्--

धूनने वपने चाग्नौ तत्र चोक्ताश्चतुर्दश ।
किमाद्यारम्भनियमः किंवाऽऽरम्भो निजेच्छया ॥
क्रमवत्क्रमः प्राप्तः केचित्प्रकरणोदिताः ।
व्यर्थाः स्युस्तेन मन्त्राणामारम्भोऽत्र विकल्पितः ॥

अग्निचयने मन्त्रा आधूननार्था आवपनार्थाश्च बहवः पठिताः । प्रयोगे तु तदेकदेशसंख्याऽभिहिता--" सप्तभिराधूनोति, चतुर्दशभिरावपति " इति । तत्र प्रथमाधिकरणोक्तक्रमसामिधेनीन्यायेन प्रथमपठितस्यैव मन्त्रस्योपक्रमः प्राप्नोति । तदयुक्तम् । कुतः । यथोक्तसंख्यातिरिक्तानां प्रकरणपठितानां मन्त्राणां वैयर्थ्यप्रसङ्गात् । तस्मात्प्रकरणेन क्रमं बाधित्वा निजेच्छयैव प्रथममन्यं वोपक्रम्य विहितसंख्या पूरणीया ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे द्वितीयप्रपाठके
षष्ठोऽनुवाकः ॥ ६ ॥

(अथ चतुर्थाष्टके द्वितीयप्रपाठके सप्तमोऽनुवाकः) ।

मा नो हिꣳसीज्जनिता यः पृथिव्या यो वा दिवꣳ सत्यधर्मा जजान । यश्चापश्चन्द्रा बृहतीर्जजान कस्मै देवाय हविषा विधेम । अभ्यावर्तस्व पृथिवि यज्ञेन पयसा सह । वपां ते अग्निरिषितोऽवं सर्पतु । अग्ने यत्ते शुक्रं यच्चन्द्रं यत्पूतं यद्यज्ञियम् । तद्देवेभ्यो भरामसि । इषमूर्जमहमित आ (१) दद ऋतस्य धाम्नो अमृतस्य योनेः । आ नो गोषु

---

१ ख. "मतो ब्रध्नमतोऽस्तां वो" ।

(आहवनीयचयनार्थलोष्टक्षेपाद्यभिधानम्)

विशत्वोषधीषु जहामि सेदिमनिराममीवाम् । अग्ने तव श्रवो वयो महि भ्राजन्यर्चयो विभावसो । बृहद्भानो शवसा वाजमुक्थ्यं दधासि दाशुषे कवे । इरज्यन्नग्ने प्रथयस्व जन्तुभिरस्मे रायो अमर्त्य । स दर्शतस्य वपुषो वि राजसि पृणक्षि सानसिꣳ रयिम् । ऊर्जो नपाज्जातवेदः सुशस्तिभिर्मन्दस्व (२) धीतिभिर्हितः । त्वे इषः सं दधुर्भूरिरेतसश्चित्रोतयो वामजाताः । पावकवर्चाः शुक्रवर्चा अनूनवर्चा उदियर्षि भानुना । पुत्रः पितरा विचरन्नपावस्युभे पृणक्षि रोदसी । ऋतावानं महिषं विश्वचर्षणिमग्निꣳ सुम्नाय दधिरे पुरो जनाः । श्रुत्कर्णꣳ सप्रथस्तमं त्वा गिरा दैव्यं मानुषा युगा । निष्कर्तारमध्वरस्य प्रचेतसं क्षयन्तꣳ राधसे महे । रातिं भृगूणामुशिजं कविक्रतुं पृणक्षि सानसिम् (३) रयिम् । चितः स्थ परिचित ऊर्ध्वचितः श्रयध्वं तया देवतयाऽङ्गिरस्वद्ध्रुवाः सीदत । आ प्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् । भवा वाजस्य संगथे । सं ते पयाꣳसि समु यन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः । आप्यायमानो अमृताय सोम दिवि श्रवाꣳस्युत्तमानि धिष्व (४) ॥

(आहवनीयचयनार्थलोष्टक्षेपाद्यभिधानम्)

(आ मन्दस्व सानसिमेकान्नचत्वारिंशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके द्वितीयप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ चतुर्थकाण्डे द्वितीयप्रपाठके सप्तमोऽनुवाकः)।

षष्ठेऽनुवाक ओषधिवापोऽभिहितः । अथ सप्तमे लोष्टक्षेपादिकमभिधीयते कल्पः—"मा नो हिंसीज्जनिता यः पृथिव्या इति चतसृभिर्दिग्भ्यो लोष्टं न्यस्यति येऽन्तर्विधाद्बहिर्विधमापन्ना भवन्ति" इति ।

कर्षणे ये लोष्टाः परिमितक्षेत्राद्बहिः पतन्ति तान्पुनरन्तः पातयेदित्यर्थः ।

तत्र प्रथमामाह—

मा नो हिंसीदिति । यः प्रजापतिः पृथिव्या जनितोत्पादको यो वः प्रजापतिः सत्यधर्माऽवितथधारणशक्तिः सन्दिवं जजानोत्पादयामास । पुनरपि यः प्रजापतिश्चन्द्रा आह्लादकारिणीर्बृहतीर्बहुला अपो जजानोत्पादयामास, तादृशः प्रजापतिर्नोऽस्मान्मा हिंसीत् । तादृशाय कस्मै प्रजापतये हविषा विधेम परिचरेम । अथ द्वितीयामाह—

अभ्यावर्तस्वेति । हे पृथिवि यज्ञेनानुष्ठातव्येन पयसा च तत्फलभूतेन सहाभ्यावर्तस्वास्मदाभिमुख्येनाऽऽगच्छ । इषित इच्छावानग्निस्ते वपां त्वदीयवपासदृशमिमं प्रदेशमवसर्पतु प्राप्नोतु । अथ तृतीयामाह—

अग्ने यत्ते इति । हेऽग्ने ते त्वदीयं यदङ्गं शुक्रं दीप्तिमत् यच्चान्यदङ्गं चन्द्रमाह्लादकरं, यदप्यन्यदङ्गं पूतं शुद्धं, यदप्यन्यदङ्गं यज्ञियं यज्ञार्हं, तत्सर्वं लोष्टरूपं देवेभ्यो देवानामर्थे भरामसि संपादयामः ।

अथ चतुर्थीमाह—

इषमूर्जमिति । ऋतस्य यज्ञस्य धात्रः स्थानभूतादमृतस्य योनेः कारणभूतादितो देशादिषमन्नरूपमूर्जं रसरूपं लोष्टमाददे स्वीकरोमि । स लोष्टोऽस्मदीयेषु गोष्वाविक्षु[1] त्वागत्य प्रविशतु । तथौषधीष्वाविशतु । सीदन्त्यत्रेति सदिर्भूमिः[1] स्ता]मनिरोमन्नरहितामपीवां रोगयुक्तां जहामि परित्यजामि एतैर्मन्त्रैः सर्वं लोष्टानां क्षेत्रमध्ये स्थापनं विधत्ते—

---

१ ख. च. 'निरा संस्पर्'।

(आहवनीयचयनार्थलोष्टक्षेपाद्याभिधानम्)

"दिग्भ्यो लोष्टान्त्समस्यति दिशामेव वीर्यमवरुध्य दिशां वीर्येऽग्निं चिनुते" [सं० का० ५ प्र० २ अ० ५] इति ।

कर्षणावसरे ये लोष्टा वेणुना विमितादग्निक्षेत्राद्बहिर्दिक्षु पतितास्तान्यो दिग्भ्यस्तांल्लोष्टानानयि क्षेत्रे संयोजयेत् । तथा सति दिशां सामर्थ्यमग्निक्षेत्रेऽवरुध्य तस्मिन्सामर्थ्येऽग्निं चितवान्भवति ।

चतुर्थमन्त्रे कंचिद्विशेषं विधत्ते——

"यं द्विष्याद्यत्र स स्यात्तस्यै दिशो लोष्टमा हरेदिषमूर्जमहमित आ ददइतीषमेवोर्जं तस्यै दिशोऽव रुन्धे क्षोधुको भवति यस्तस्यां दिशि भवति" [सं० का० ५ प्र० २ अ० ५] इति ।

अयमग्निचिद्यं पुरुषं द्विष्यात्स पुरुषो यस्यां दिश्यवतिष्ठेत तस्या दिशो लोष्टमिषमूर्जमिति मन्त्रेणाऽऽहरेत् । तथा सति तदीयमन्नं रसं च स्वी करोति । स्वीकृते सति तस्यां दिशि यो द्वेष्यो भवति वर्तते स द्वेष्यः क्षोधुकः क्षुधां प्राप्तोऽन्नरहितो भवति ।

यदुक्तं सूत्रकारेण——"उत्तरवेदिमुपवपति यावानग्निर्व्यायच्छते[1]तां कृत्वा" इति, तदेतद्विधत्ते——

"उत्तरवेदिमुप वपत्युत्तरवेद्याः[2] स्याग्निश्चीयतेऽथो पशवो वा उत्तरवेदिः पशूनेवाव रुन्धेऽथो यज्ञपरुषोऽनन्तरित्यै" [सं० का० ५ प्र० २ अ० ५] इति ।

प्राकृतेन प्रकारेणोत्तरवेदिं कुर्यात् । तस्यामुत्तरवेद्यां पश्चादग्निश्चीयते । अपि चोत्तरवेद्याः समीपगतेषु यूपेषु पशुबन्धात्पशव एवोत्तरवेदिः[3] पशूनां प्राप्तये भवति । अपि च प्रकृतावुत्तरवेदिरूपं यज्ञस्य परुः पर्व तस्यान्तरायो मा भूदित्युत्तरवेदिः कर्तव्या ।

कल्पः—"अग्ने तव श्रवो वय इति षड्भिः सिकता न्युप्य" इति ।

तत्र प्रथममाह——

अग्ने तवेति । वीयते प्राणिभिरश्नत इति वयोऽन्नम् । हेऽग्ने तव श्रवः स्वकीयत्वेन श्रूयमाणं वयोऽन्नं महि महदस्ति । विभा दीप्तिरेव वसु धनं यस्यासौ विभावसुः । हे विभावसोऽर्चयस्तव दीप्तयो भ्राजन्ति दीप्यन्ते ।

---

१ ख. ङ. च. °णान्तां कृ° । २ ख. घ °दिः । उत्तरवेदिः प° । ३ ख. घ. अथो अपि ।

बृहन्तो भानवो यस्यासौ बृहद्भानुः । कविर्विद्वान्यजमानाभिप्रायाभिज्ञः । तादृश हेऽग्ने दाशुषे हविर्दत्तवते यजमानायोक्थ्यं शस्त्राद्युपेतयज्ञयोग्यं वाजमन्नं शवसा स्वदीयेन बलेन दधासि । अथ द्वितीयामाह—इरज्यन्निति ।

हेऽमर्त्य मरणरहिताग्ने जन्तुभिः पुरोडाशादिहविःपदैः प्राणिभिरिरज्यन्दीप्यमानः तन्नस्मे अस्मासु रायो धनानि प्रथयस्व विस्तारय । स दर्शतस्य दर्शनीयस्य चित्याग्निरूपस्य शरीरस्य मध्ये विराजसि विशेषेण दीप्यसे । वामं वहुविधदानार्हं रयिं धनं पृणक्षि अस्मदर्थं पूरय । अथ तृतीयामाह—

ऊर्जो नपादिति । ऊर्जोऽन्नस्य नपादविनाशयिता, तादृश भो जातवेदो धीतिभिर्हितो दीप्तिभिर्युक्तः सन्सुशस्तिभिर्मन्दस्व शोभनस्तुतिभिर्हृष्यस्व । भूरिरेतसः प्रभूतसारा इषोऽन्नरूपा आहुतीस्त्वे त्वयि संदधुर्यजमाना संपादितवन्तः । कीदृशा यजमानाः, चित्रोतयो विचित्रास्त्वया कृता ऊतयो रक्षा यषां ते चित्रोतयो वामजाता +वननीये संभजनीये देशे कुले चोत्पन्नाः । अथ चतुर्थीमाह—

पावकवर्चा इति । पावकवर्चाः शोधकदीप्तिः । शुक्रवर्चा निर्मलदीप्तिः । अनूनवर्चाः संपूर्णदीप्तिः । ईदृशस्त्वं भानुना भासोदियर्षि उत्कर्षं गच्छसि । उभे रोदसी द्यावापृथिव्यौ विचरन्नुपावसि समीपमागत्य रक्षसि, पृणक्षि च तयोः संपूर्तिमपि करोषि । परिचरणे दृष्टान्तः—पुत्रः पितरा, यथा लोके शास्त्रीयमार्गेणानुशिष्टः पुत्रः पितरौ परिचरति तद्वत् । अथ पञ्चमीमाह—

ऋतावानमिति । मानुषा जना मनुष्यजातियुक्ता जन्तव ऋत्विग्यजमानाः पुरः पूर्वस्मिन्काले युगा गिरा योग्यया स्तुतिरूपया वाचा सुम्नाय सुखार्थमग्निमेव दधिरे स्थापितवन्तः । कीदृशमग्निम् । ऋतावानं सत्यवन्तं, महिषं महान्तं, विश्व(श्वे) चर्षणयो मनुष्याः परिचारकत्वेन यस्य सन्ति सोऽयं विश्वचर्षणिः [तं], श्रुत्कर्णं शृण्वत्कर्णं, यद्विज्ञाप्यते तत्सद्य एव कर्णेन श्रुत्वा संपादयतीत्यर्थः । सप्रथस्तममतिशयेन प्रथासहितं कीर्तिमन्तम् । तादृशं त्वामग्निं दैव्यं देवेभ्यो हितं दधिर इत्यन्वयः । अथ षष्ठीमाह—

निष्कर्तारमिति । हेऽग्ने त्वं यजमानं रयिं पृणक्षि संपृक्तं कर्णोषि प्रापयसीत्यर्थः । कीदृशं यजमानम् । अध्वरस्य निष्कर्तारं यज्ञस्य निष्पादकम् ।

+ ख पुस्तके ' वमनीये ' इति पाठो ' वितुं युक्त इति टिप्पणी ।

१ क. घ. ङ. च. पुरा । २ क. घ. ङ. °मनु द° । ३ ख. ङ. च. करोषि ।

(आहवनीयचयनार्थलोष्टक्षेपाद्यभिधानम्)

प्रचेतसं प्रकृष्टचित्तयुक्तं श्रद्धालुमित्यर्थः। महे राधसे महते हविर्लक्षणायान्नाय क्षयन्तं हविर्दातुमिह निवसन्तमित्यर्थः। रातिं दातारं, भृगूणां महर्षीणां तपस्विनां मध्य उशिजं कमनीयमत्यन्तं तपोयुक्तमित्यर्थः। कविक्रतुं कवीनां विदुषामिव क्रतुः कर्मानुष्ठानं यस्यासौ कविक्रतुस्तं, सर्वमपि कर्तव्यं सम्यग्ज्ञात्ववानुतिष्ठती-(न्तमि)त्यर्थः। सानसिशब्दो यजमानविशेषणं धनविशेषणं वा। यजमानपक्षे दानशीलमित्यर्थः। धनपक्षे संभजनीयमित्यर्थः। एतान्मन्त्रान्विनियुङ्क्ते—

" अग्ने तव श्रवो वय इति सिकता नि वपत्येतद्वा अग्नेर्वैश्वानरस्य सूक्तꣳ सूक्तेनैव वैश्वानरमव रुन्धे " [सं० का० ५ प्र० २ अ० ६] इति।

एतत्सूक्तात्मकं वैश्वानरस्य सवमनुष्यप्रियस्याग्नेः संबन्धि सूक्तम्। अत एतेन सिकतानिवापे सति वैश्वानररूपमाग्निं प्राप्नोति। सूक्तगतमन्त्रसंख्यां विधत्ते—

" षड्भिर्नि वपति षड्वा ऋतवः संवत्सरः संवत्सरोऽग्निर्वैश्वानरः साक्षादेव वैश्वानरमव रुन्धे " [सं० का० ५ प्र० २ अ० ६] इति।

संवत्सरमुख्यं भूत्वेत्यादौ संवत्सरधारणसंबन्धादग्नेः संवत्सररूपत्वम्। ऋतु-संवत्सराख्यवधानेन वैश्वानरं साक्षादेव सर्वथैव प्राप्नोति।

सूक्तगतास्वृक्षु परस्परविलक्षणं यच्छन्दस्तत्प्रशंसति—

" समुद्रं वै नामैतच्छन्दः स समुद्रमनु प्रजाः प्र जायन्ते यदेतेन सिकता नि वपति प्रजानां प्रजननाय " [सं० का० ५ प्र० २ अ० ६] इति।

यथा समुद्रो बहुल एवमत्रत्यच्छन्दोऽपि बहुविधत्वात्समुद्रमित्युच्यते। तथा हि—प्रथमा विष्टारपङ्क्तिर्मध्यमयोः पादयोरेकादशाक्षरत्वात्। द्वितीया पदपङ्क्ति-रयुक्पादयोर्द्वादशाक्षरत्वात्। यथा द्वितीया तथा तृतीया। यथा प्रथमा तथा चतुर्थी। उपरिष्टाज्ज्योतिः पञ्चमी। चतुर्थपादस्याष्टाक्षरत्वात्। तथा षष्ठी। *

* अत्र ख पुस्तके 'एष च संदर्भो न पिङ्गलसूत्रतद्वृत्त्योः संवादी। तत्र हि तृतीया-ध्याये 'विस्तारपङ्क्तिरन्तः। ४२'। 'पञ्चपादुः पञ्च। ४६'। 'उपरिष्टाज्ज्योतिरन्तेन। ५४'। इति सूत्रत्रयेण, 'यदा जागतौ (१२ अ०) पादौ मध्ये भवतः, आद्यन्तयोश्च गायत्रौ (८ अ०) तदा विस्तारपङ्क्तिर्नाम। पञ्चका इत्यनुवर्तते, यदा पञ्चाक्षरा पञ्च पादा भवन्ति, तदा पदपङ्क्तिर्नाम छन्दः। यदा चत्वारो गायत्राः पादा भवन्ति, अन्ते च त्रैष्टुभः (११ अ०) तदोपरिष्टाज्ज्योतिर्नाम त्रिष्टुब्भवति। तथा जगतीत्यनुवर्तनीयं, तेन, अन्तेन जागतेन शेषैश्च गायत्रैश्चतुर्भिरुपरिष्टाज्ज्योतिर्नाम जगती भवति। इति तद्वृत्त्या चान्यथैव लक्षणानि प्रदर्शितानि। एवं द्वितीयातृतीययोः प्रथमाचतुर्थ्योः पञ्चमीषष्ठ्योश्च परस्परं विलक्षणाक्षरसंख्याकतया तुल्यताभिधानमपि न सम्यगिव प्रतिभातीत्यवधेयम्'। इति टिप्पणिका।

१ ख. °क्तिरायोत्तमपाद°।

(आहवनीयचयनार्थलोष्टक्षेपाद्याभिधानम्)

एवं बहुविधत्वाच्छन्दसः समुद्रत्वम् । लोके हि समुद्रमनुसृत्य प्रजा उत्पद्यन्ते । समुद्रो बहुलस्तथा प्रजा अपि बहुविधाः । तथा सति समुद्रसदृशेन छन्दसा सिकतानिवापः प्रजानामुत्पत्त्यै संपद्यते ।

कल्पः—" चितः स्थ परिचित इत्यपरिमिताभिः शर्कराभिराहवनीयचितेरायतनं परिश्रयति " इति । पाठस्तु—

चितः स्थेति । चीयन्ते भूमौ प्रक्षिप्यन्त इति चितः शर्कराः । हे शर्करा यूयं चितः स्थ भूमौ प्रक्षिप्ताः स्थ, परिचितः परितः प्रक्षिप्ताः स्थ, ऊर्ध्वंचित ऊपरि प्रक्षिप्ताः स्थ । तादृश्यो यूयं श्रयध्वमिमां चितिं सेवध्वम् । युष्माकं मध्ये यस्याः शर्करायाः या देवता तया सार्धं यूयं ध्रुवाः स्थिराः सत्यः सीदतेह तिष्ठत । तत्र दृष्टान्तः—अङ्गिरस्वत्, यथाऽङ्गिरसां चयने ध्रुवाः सीदन्ति बहवः । अनेन मन्त्रेण साध्यं शर्करास्थापनं विधत्ते—

" इन्द्रो वृत्राय वज्रं प्राहरत्स त्रेधा व्यभवत्स्यस्तृतीयꣳ रथस्तृतीयं यूपस्तृतीयं येऽन्तःशरा अशीर्यन्त ताः शर्करा अभवन्तच्छर्कराणाꣳ शर्करत्वं वज्रो वै शर्कराः पशुराग्नेयश्छर्कराभिराग्निं परिमिनोति वज्रेणैवास्मै पशून्परि गृह्णाति तस्माद्वज्रेण पशवः परिगृहीतास्तस्मात्स्थेयानस्थेयसो नोप हरते " [सं० का० ५ प्र० २ अ० ६] इति ।

इन्द्रेण प्रहितो वज्रोऽत्यन्तकठिनं वृत्रशरीरं प्राप्य त्रिधा भग्नोऽभवत् । तेषु त्रिषु भागेषु रथस्य एको भागो रथोऽपरो भागो यूपोऽन्यः । तदा वज्रस्यान्तः शीर्णा अवयवा भूमौ पतिताः । ता भूमिगताः शर्करा अत्यन्तं दृढाः क्षुद्रपाषाणा अभवन् । शरैः क्रियन्ते निष्पाद्यन्त इति व्युत्पत्त्या शर्करा इति नाम संपन्नम् । अतो वज्र एव शर्कराः । अग्निस्तु पशुसाधनत्वात्पशुस्वरूपः । अतोऽग्निप्रदेशे शर्कराभिः परिश्रयेत् । तथा सति वज्रेणैव सोधनेन यजमानार्थं पशून्परिगृह्णाति । यस्मादेवं तस्माल्लोकेऽपि वज्रसमानेन करेण पाशादिना वा पशवः परिगृहीता भवन्ति । यस्मादत्राग्नेर्दार्ढ्यायैव शर्करापेक्षा न तु शर्कराजातस्यपेक्षा तस्माल्लोकेऽपि स्थेयान्स्थिरतरोऽतिप्रबलः पुरुषः कश्चिदपि, अस्थेस्तोऽत्यन्तमस्थिरान्दुर्बलान्पुरुषान्नोपहरते नैवोपाश्रयति ।

(आहवनीयचयनार्थलोष्टक्षेपाद्यभिधानम्)

शर्करासु काम्यां संख्यां विधत्ते—

" त्रिसप्तामिः पशुकामस्य परि मिनुयात्तल्ल वै श्रीर्षण्याः प्राणाः प्राणाः पशवः प्राणैरेवास्मै पशूनव रुन्धे " [सं०का० ५ प्र० २ अ० ६] इति ।

त्रीणि सप्तकानि यासां शर्कराणां तास्त्रिसप्ताः, ताभिरेकविंशतिसंख्याकाभिरित्यर्थः । परिमिनुयात्परिमित्य स्थापयेत् । सप्तसंख्यया परिच्छिन्नाः शिरोवस्थिताश्छि(तश्छि)द्रगताः प्राणाः स्मर्यन्ते । तैश्च प्राणैस्तद्यु(र्यु)क्ताः प्राणाः पशवः । तथा सति सप्तसंख्यया प्राणैरेव युक्तान्पशून्प्राप्नोति ।

अथान्यां काम्यां संख्यां विधत्ते—

" त्रिणवाभिर्भ्रातृव्यवतस्त्रिवृतमेव वज्रꣳ संभृत्य भ्रातृव्याय प्र हरति स्तृत्यै " [सं० का० ५ प्र० २ अ० ६] इति ।

त्रीणि नवकानि यासां तास्त्रिणवाः सप्तविंशतिसंख्याका इत्यर्थः । त्रिणवसंख्योपेतस्त्रिवृत्स्तोमः स्मर्यते । तमेव त्रिवृत्स्तोमं वज्रत्वेन संपाद्य भ्रातृव्यस्य हिंसायै प्रहरति । पक्षान्तरं विधत्ते—

" अपरिमिताभिः परि मिनुयादपरिमितस्यावरुद्ध्यै " [सं०का०५प्र०२ अ० ६] इति ।

अथान्वयव्यतिरेकाभ्यां परिश्रयणं दृढी करोति—

"यं कामयेतापशुः स्यादित्यपरिमित्य तस्य शर्कराः सिकता व्यूहेत्परिगूहेत्येवास्य विषूचीनꣳ रेतः परा सिञ्चत्यपशुरेव भवति यं कामयेत पशुमान्स्यादिति परिमित्य तस्य शर्कराः सिकता व्यूहत्परिगूहेत्येवास्मै समीचीनꣳ रेतः सिञ्चति पशुमानेव भवति " [सं० का० ५ प्र० २ अ० ६] इति ।

पूर्वन्युप्तायाः सिकताया व्यूहनं विधास्यति । यजमानस्य पशुराहित्यं कामयमानोऽध्वर्युः परितः शर्करास्थापनमकृत्वैव सिकताप्रसारणं कुर्यात् । तथा सति परिश्रयणाभावादपरिगूहित एव स्थाने यजमानस्य रेतो विविधं यथा गच्छति तथा विनाशयति । ततोऽयमपशुरेव भवति । सोऽयं व्यतिरेकः । एतस्माद्विपरीतोऽन्वयः । तत्पशुलाभाय शर्करापरिश्रयणपूर्वकमेव सिकताव्यूहनं कर्तव्यमिति तात्पर्यार्थः ।

कल्पः—"आ प्यायस्व समेतु ते इति सिकता व्यूहत्युत्तरया त्रिष्टुभा राजन्यस्य " इति । तत्र प्रथममन्त्रमाह—

---

१ स. च. °र्यांशं वि° । २ स. च. °स्तिं स्था° ।

आ प्यायस्वेति । हे सोम त्वमाप्यायस्व सर्वतो वर्धयस्व । ते तव वृष्णियं रेतो विश्वतः सर्वस्माद्वृष्णियादाहारात्समेतु संप्राप्नोतु । वाजस्यान्नस्य संगथे संगमने त्वं निमित्तं भव । अथोत्तरां त्रिष्टुभमाह-

सं ते पयाꣳसीति । हे सोम ते तव पयांसि पातव्यानि क्षीरादीनि समु-(सं)यन्तु संप्राप्नुवन्तु । तथा वाजा अन्नान्यपि संयन्तु । वृष्णियानि रेतांस्यपि संयन्तु । कीदृशस्य तव । अभिमातिषाहः, अभिमातिं पाप्मानं सहते तिरस्करोतीत्यभिमातिषाट् तस्य । क्षीरादिसंपत्तौ सत्यां त्वमाप्यायमानो वर्धयमानोऽमृताय यजमानस्यामृतत्वाय देवताभावाय दिवि द्युलोके श्रवांसि श्रोतुं प्रियाण्युत्तमानि विचित्राण्यन्नानि धिष्व धारय संपादयेत्यर्थः ।

तदेतद्वयं सामान्याकारेण विनियुङ्क्ते-

" सौम्या व्यूहति सोमो वै रेतोधा रेत एव तद्दधाति " [सं० का० ५ प्र० २ अ० ६] इति ।

सोमो देवता यस्यामृचि प्रतीयते सेयमृक्सौम्या । विश्वतः सोमेत्याद्यायामृग्यसौ प्रतीयते । अमृताय सोमेत्युत्तरस्यामृचि प्रतीयते । तथा सौम्या पूर्वं न्युप्ताः सिकता विविधं प्रसारयेत् । तथा सति सोमस्य रेतोधारकत्वात्तन्मन्त्रनिष्पाद्यव्यूहनेन यजमानो रेतो धारयति ।

मन्त्रद्वयस्य पुरुषभेदेन व्यवस्थां विधत्ते-

" गायत्रिया ब्राह्मणस्य गायत्रो हि ब्राह्मणस्त्रिष्टुभा राजन्यस्य त्रैष्टुभो हि राजन्यः " [सं० का० ५ प्र० २ अ० ६] इति ।

आ प्यायस्वेति गायत्री । **सं त इति** त्रिष्टुप् । अत्र विनियोगसंग्रहः-

मार्चतुर्भिः क्षिपेल्लोष्टानग्नेषट्केन वालुकाः ।
चित आहवनीयस्य परीक्षिपति शर्कराः ॥
आ प्या विप्रस्य सिकता व्यूहेत्सं ते पयांस्यथ ।
क्षत्रियस्य भवेद्व्यूह ६. मन्त्राश्चयोदश ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे द्वितीयप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

---

१ स. च. °र्धमा° । २ स. च. दर्शयति । ३ स. च. °रिभवति ।

(आहवनीयचयनार्थकर्मानुष्ठानाभिधानम्)

(अथ चतुर्थाष्टके द्वितीयप्रपाठकेऽष्टमोऽनुवाकः) ।

अभ्यस्थाद्विश्वाः पृतना अरातीस्तदग्नि-
राह तदु सोम आह । बृहस्पतिः सविता
तन्म आह पूषा माऽधात्सुकृतस्य लोके । यद-
क्रन्दः प्रथमं जायमान उद्यन्त्समुद्रादुत वा
पुरीषात् । श्येनस्य पक्षा हरिणस्य बाहू उप-
स्तुतं जनिम तत्ते अर्वन् । अपां पृष्ठमसि यो-
निरग्नेः समुद्रमभितः पिन्वमानम् । वर्धमानं
महः (१) आ च पुष्करं दिवो मात्रया
वरिणा प्रथस्व । ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि
सीमतः सुरुचो वेन आवः । स बुध्निया उपमा
अस्य विष्ठाः सतश्च योनिमसतश्च विवः ।
हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक
आसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै
देवाय हविषा विधेम । द्रप्सश्चस्कन्द पृथिवी-
मनु (२) द्यामिमं च योनिमनु यश्च पूर्वः ।
तृतीयं योनिमनु संचरन्तं द्रप्सं जुहोम्यनु
सप्त होत्राः । नमो अस्तु सर्पेभ्यो ये के च
पृथिवीमनु । ये अन्तरिक्षे ये दिवि तेभ्यः
सर्पेभ्यो नमः । येऽदो रोचने दिवो ये वा
सूर्यस्य रश्मिषु । येषामप्सु सदः कृतं तेभ्यः
सर्पेभ्यो नमः । या इषवो यातुधानानां ये वा
वनस्पतीरनु । ये वाऽवटेषु शेरते तेभ्यः
सर्पेभ्यो नमः (३) ॥

(आहवनीयचयनार्थेष्टकमानुपधानाभिधानम्)

(महोऽनु यातुधानानामेकादश च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके द्वितीयप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ चतुर्थकाण्डे द्वितीयप्रपाठकेऽष्टमोऽनुवाकः) ।

सप्तमे लोष्टसमसनादिकमुक्तम् । अथाष्टमे रुक्माद्युपधानं वक्तव्यम् । तत्राऽऽदौ तावदभ्याक्रमणमुच्यते ।

कल्पः—" प्राञ्चमश्वमभ्यस्थाद्दिक्षा इति दक्षिणेन पदा दर्भस्तम्बमाक्रमयत्य " इति । पाठस्तु—

अभ्यस्थाद्दिक्षा इति । अयमग्नौ विक्षाः सर्वाः प्रतनाः प्रतिपक्षसेना अरातीर्दातव्यस्यादातॄरूपा अभ्यस्थात्पादेनाभिक्रम्य तिष्ठतु । तदभिक्रमणमग्निराहानुमोदताम् । सोमोऽपि तदाह तदनुमोदताम् । बृहस्पतिर्मे मेदर्धं तदाह तदनुमन्यताम् । तथा सवितोऽपि तदनुमन्यताम् । पूषा सुकृतस्य लोके फलभूते स्वर्गे माऽधान्मां स्थापयतु ।

कल्पः—" प्रदक्षिणमावर्तयित्वा(त्य) यदक्रन्द इति पुनरेवाऽऽक्रमयति " इति । पाठस्तु—

यदक्रन्दः प्रथममिति । हे अर्वन्यद्यस्मात्कारणाज्जायमान उत्पद्यमान एव प्रथममादावक्रन्दः क्रन्दितवानसि, अहो अग्न्यादीनामहं साधनमिति महान्तं क्रन्दमकरोस्तत्तस्मात्कारणाज्जनिमोपस्तुतं ते तव जन्म सभीचीनमिति सर्वैरपि स्तुतमासीत् । जायमानत्वमेव विशदी क्रियते—समुद्रादुद्यन्समुद्रोपलक्षितादुदकात्पुरुषमुत्पद्यमानः, "अप्सु योनिर्वा अश्वः" इति श्रुतेः । उत वा पुरीषात्पुरुषार्पुरुषशक्तिसंपन्नान्महतोऽश्वादुत्पाद्यमानः । जन्मन उपस्तुतत्वे दृष्टान्तोऽयमुच्यते-श्येनस्य पक्षा हरिणस्य बाहू । उपस्तुतशब्दोऽभ्याहर्तव्यः । यथा श्येनाख्यस्य पक्षिणः पक्षौ शीघ्रोत्पतनहेतुत्वात्सौष्ठवेनोपस्तुतौ, यथा वा हरिणस्य मृगस्य बाहू पादौ शीघ्रगमनहेतुत्वादुपस्तुतौ तद्वदित्यर्थः ।

उक्तमन्त्रसाध्यमश्वाक्रमणं विधत्ते—

" शंयुं बार्हस्पत्यं मेधो नोपानमत्सोऽग्निं प्राविशत्सोऽग्नेः कृष्णो रूपं

१ स. का. इत्यश्वस्य त° । २ स. च. मम । ३ स. च. °ज्ञात्पं° ।

(आहवनीयचयनार्थरुक्माद्युपधानाभिधानम्)

कृत्वोदायत सोऽश्वं प्राविशत्सोऽश्वस्यावान्तरशफोऽभवद्यदश्वमाक्रमयति य एव मेधोऽश्वं प्राविशत्तमेवाव रुन्धे " [सं० का० ५ प्र० २ अ० ६] इति ।

पुरा कदाचिच्छंयुनामानं बृहस्पतिपुत्रं केनापि निमित्तेन मेधो यज्ञपुरुषो न प्राप्तवान् । स पुनः शंयुनाऽन्विष्यमाणोऽन्तर्धानादग्निं प्राविशत् । तत्राप्यन्वेषणाय शंयावागते सति स यज्ञः कृष्णमृगो भूत्वा तृतीयं रूपं साकल्येन कृत्वाऽग्नेः सकाशादुदायतोदगच्छत् । उद्गत्य च सोऽश्वं प्राविशत् । प्रविश्य चाश्वसंबन्धिनः पौष्णशकस्य मध्ये योऽयमवान्तरशफस्तद्रूपोऽभवत् । अतोऽश्वमाक्रमयेत् । तथा सति यो यज्ञोऽश्वं प्राविशत्तमेव प्राप्नोति ।

प्रकारान्तरेणाऽऽक्रमणं प्रशंसति—

" प्रजापतिनाऽग्निश्चेतव्य इत्याहुः प्राजापत्योऽश्वो यदश्वमाक्रमयति प्रजापतिमेवाग्निं चिनुते " [सं० का० ५ प्र० २ अ० ६] इति ।

अश्वमग्निः प्रजापतिना चेतुं योग्य इत्यभिज्ञा आहुः । अश्वस्य प्राजापत्यत्वाच्चाऽऽक्रमणे सति प्रजापतिनैव चितो भवति ।

कल्पः—"अपां पृष्ठमसीत्यश्वस्य पदे पुष्करपर्णमुत्तानमुपधाय" इति । पाठस्तु—

अपां पृष्ठमसीति । हे पुष्करपर्ण त्वमपां पृष्ठमसि पृष्ठवदुपरिभागवर्त्यसि । यथाऽग्नेर्योनिरसि । " त्वामग्ने पुष्करादध्यथर्वा निरमन्थत " इति मन्त्रवर्णात् । तथा समुद्रमभितः पिन्वमानं समुद्रसमानस्य तटाकजलस्य प्रीतिकरं, वर्धमानमप्सूत्पद्य दिने दिने वृद्धियुक्तं, महो निर्लेपत्वाद्युक्तस्या पूजनीयं, पुष्करमग्निनिष्पादनद्वारा पुष्टिकरम् । तादृशं त्वं मात्रया परिमाणेन दिवो वरिणाऽऽकाशादप्याधिक्येनाऽऽसमन्तात्पथस्व विस्तृतं भव ।

अनेन मन्त्रेण साध्यं पद्मपत्रोपधानं विधत्ते—

"पुष्करपर्णमुप दधाति योनिर्वा अग्नेः पुष्करपर्णꣳ सयोनिमेवाग्निं चिनुते " [सं० का० ५ प्र० २ अ० ६] इति । तत्र मन्त्रं विनियुङ्क्ते—

" अपां पृष्ठमसीत्युप दधात्यपां वा एतत्पृष्ठं यत्पुष्करपर्णꣳ रूपेणैवैनदुप दधाति " [सं० का० ५ प्र० २ अ० ६] इति ।

रूपेणैव विद्यमानार्थवाचित्वादनुरूपेणैव मन्त्रेणैनत्पुष्करपर्णमुपहितवान्भवति ।

कल्पः—"ब्रह्म जज्ञानमिति पुष्करपर्णं उपरिष्टान्निर्वांधं कृत्वमुपधाय" इति । पाठस्तु—

---

१ स. च. °र्धानमग्निं । २ स. च. °त् । ततोऽ° । ३ स. च. °पदधाति" इ° ।

ब्रह्म जज्ञानमिति । प्रथमं जज्ञानमादावुत्पन्नमिदं रुक्मस्वरूपं ब्रह्म परिवृढमत्यन्तं महदित्यर्थः । तस्य रुक्मस्य दृष्टान्तत्वेन सूर्यः प्रपञ्च्यते—पुरस्तात्पूर्वस्यां दिश्यवस्थितो वेनः कमनीयः सूर्यः सीमतः सर्वस्यां सीम्नि सुरुचः शोभनरश्मीन्विशेषेणाऽऽवरावृणोत् । अस्य रुक्मस्योपमानभूता विष्ठा विशेषेणावस्थिता बुध्निया बुध्ने मूले पृथिवीरूपे भवाः पदार्थाः । तानपि स वेनो विवर्विवृतवान्प्रकाशितवानित्यर्थः । ततश्च विद्यमानस्य घटपटादेर्योनिं कारणं मृदादिरूपमसतश्चाविद्यमानस्य नरविषाणादेः कारणं मनुष्यमूर्धादिकमपि विवृतवान् । तथाविधेन सूर्येण तद्दृशोऽयं रुक्मः प्रकाशत इति तात्पर्यार्थः । तमिमं मन्त्रं विनियुङ्क्ते—

" ब्रह्म जज्ञानमिति रुक्ममुप दधाति ब्रह्ममुखा वै प्रजापतिः प्रजा असृजत ब्रह्ममुखा एव तत्प्रजा यजमानः सृजते " [सं०का०५ प्र०२ अ० ७] इति ।

ब्रह्म ब्राह्मणजातिर्मुखमुपक्रमो यासां प्रजानां ता ब्रह्ममुखाः ।

अस्मिन्मन्त्रे ब्रह्मपदाभिधेयस्य प्रथमोत्पत्तिवर्णने तात्पर्यं दर्शयति—

" ब्रह्म जज्ञानमित्याह तस्माद्ब्राह्मणो मुख्यः " [सं० का० ५ प्र० २ अ० ७] इति ।

यस्मात्क्षत्रियादेर्जन्मप्राथम्यमनुपन्यस्य ब्रह्मशब्दार्थस्यैव प्रथमजन्मोपन्यस्यते तस्माल्लोकेऽपि ब्रह्मशब्दार्थो ब्राह्मण एव मुख्यः । एतद्वेदनं प्रशंसति—

"मुख्यो भवति य एवं वेद" [सं० का० ५ प्र० २ अ० ७] इति ।

रुक्मोपधानं प्रशंसति—

" ब्रह्मवादिनो वदन्ति न पृथिव्यां नान्तरिक्षे न दिव्यग्निश्चेतव्य इति यत्पृथिव्यां चिन्वीत पृथिवीꣳ शुचार्पयेन्नौषधयो न वनस्पतयः प्र जायेरन्यदन्तरिक्षे चिन्वीतान्तरिक्षꣳ शुचार्पयेन्न वयाꣳसि प्र जायेरन्यद्दिवि चिन्वीत दिवꣳ शुचार्पयेन्न पर्जन्यो वर्षदुक्ममुप दधात्यमृतं वै हिरण्यममृत एवाग्निं चिनुते प्रजात्यै " [सं० का० ५ प्र० २ अ० ७] इति ।

शुचार्पयेत्संतापेन योजयेत् । तस्मिन्संतापे सति लोकत्रये दोषास्तद्व्यावृत्तये वह्नेराधारत्वेन रुक्ममुपदध्यात् । हिरण्यस्याग्निसंपर्केऽपि विनाशाभावात्तस्मिन्-

---

१ ख. च. °राद्मिविशे° ।

(आहवनीयचयनार्थरुक्माद्युपधानाभिधानम्)

मृते हिरण्येऽग्निं चितवान्भवति। अयमेव रुक्मोपधानोविधिरिति यदि स्त्री क्रियेत तदानीमेतदनुवादेन पूर्वो मन्त्रमात्रविधिः। यदि तु स एव विशिष्टविधिस्तदानीमर्थवादसंबन्धाय स एवानूद्यत इति द्रष्टव्यम्।

कल्पः—" हिरण्यगर्भः समवर्तताग्र इति तस्मिन्हिरण्मयं पुरुषं प्राचीनमुत्तानं दक्षिणेनाऽऽतृण्णं प्राङ्मुखं उपधाय " इति। पाठस्तु—

हिरण्यगर्भ इति। हिरण्ये ब्रह्माण्डरूपे गर्भरूपेणावस्थितः प्रजापतिर्हिरण्यगर्भः। स च भूतस्य प्राणिजातस्याग्रे समवर्तत प्राणिजातोत्पत्तेः पूर्वं स्वयं शरीरधारी बभूव। स च जातः उत्पन्नमात्र एक एवोत्पत्स्यमानस्य सर्वस्य जगतः पतिरासीत्। अत एव पृथिवीं द्यां विस्तीर्णां दिवं दाधार धृतवान्। उतापि चेमां भूमिं दाधार। तादृगाय कस्मै प्रजापतिदेवाय हविषा विधेम परिचरेम।

एतन्मन्त्रलभ्यं हिरण्मयपुरुषोपधानं विधत्ते—

" हिरण्मयं पुरुषमुप दधाति यजमानलोकस्य विधृत्यै " [सं० का० ५ प्र० २ अ० ७] इति। यजमानलोकस्य, लोकः स्थानं तस्य धारणमनेनोपधानेन भवति। देशविशेषं विधत्ते—

"यदिष्टकाया आतृण्णमनूपदध्यात्पशूनां च यजमानस्य च प्राणमपि दध्यादक्षिणतः प्राञ्चमुप दधाति दाधार यजमानलोकं न पशूनां च यजमानस्य च प्राणमपि दधात्यथो खल्विष्टकाया आतृण्णमनूप दधाति प्राणानामुत्सृष्ट्यै " [सं० का० ५ प्र० २ अ० ७] इति।

इष्टका रुक्मरूपा तस्या आतृण्णं गलबन्धनसूत्रार्थं छिद्रं, यदि तच्छिद्रमनूपदध्यात्, अस्य च्छिद्रस्य पिधानेन पशूनां यजमानस्य च प्राणः पिहितो भवेत्, प्राणसंचारच्छिद्रस्य पिहितत्वेन श्वासो न निर्गच्छेदित्यर्थः। तस्मात्सदोषपरिहाराय पश्चिमदिग्भागे[1] तच्छिद्रमुपेक्ष्य रुक्मरूपाया इष्टकाया दक्षिणस्यां दिशि प्राक्शिरसं पुरुषमवस्थापयेत्। एवं च सत्याहवनीयस्य दक्षिणदेशरूपो यो यजमानस्य लोकः स विधृतो भवति। तच्छिद्रस्यानावृतत्वाद्यजमानस्य पशूनां च प्राणोऽप्यनावृतो भवति। अथो खल्वितिं पक्षान्तरोपन्यासः। रुक्मरूपाया इष्टकायाश्छिद्रमनूपलक्ष्यैव पुरुषमुपदध्यात्। सति हि च्छिद्रे प्राणानामुत्सर्गः संचारो[2] भवति।

---

१ ख. घ. °धानं विदधातीति। २ क. घ. ङ. °खमुप°। ३ क. घ. ङ. °गे दक्षिणोदग्वा त°। ४ क. घ. ङ. °द्रसामीप्यमु°। ५ ख. घ. ङ. च. °मनुप°। ६ क. घ. ङ. °रोऽपि भ°।

कल्पः—" द्रप्सश्चस्कन्देति पुरुषमभिमृश्य " इति । पाठस्तु—

द्रप्सश्चस्कन्देति । द्रव्यान्तरसंघट्टनेन स्फुटितो हिरण्मयपुरुषस्यावयवविशेषो द्रप्सः । स च पृथिवीमनु चस्कन्द पृथिव्यां पतित इत्यर्थः । स च द्रप्सो हुतः सन्स्थानत्रयेऽनुसंचरति द्युलोकेऽन्तरिक्षलोके भूलोके च । तदेतदभिप्रेत्य स्मर्यते—

अग्नौ प्रास्ताऽऽहुतिः सम्यगादित्यमुपतिष्ठति (ते) ।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥ इति ।

तोऽयमर्थो द्यामित्यादिनाऽभिधीयते । द्यामिमं च योनिमनु अन्तरिक्षरूपमिमं स्थानमनुसंचरति । यश्च पूर्वो यो हि पृथिवीमनु चस्कन्देति पूर्वोक्तः स्थानविशेषस्तमप्यनुसंचरति । तृतीयं योनिं द्युलोकरूपमादित्यस्थानमनुसंचरति, अमिमं त्रिषु स्थानेष्वनुसंचरन्तं द्रप्सं जुहोमि मनसा हुतमिव भावयामि । कुत्र होम इति तदुच्यते—सप्त होत्रा इति । यस्यां दिशि द्रप्सः पतितस्तद्व्यतिरिक्ता होमयोग्या याः सप्त दिशः सन्ति तासामनुक्रमेण जुहोमि । यथाऽयं द्रप्सो हुत आदित्यादिस्थानत्रयेषु संचरन्नुपकरोति तथा भावयामीत्यर्थः ।

तमिमं मन्त्रं विनियुङ्क्ते—

" द्रप्सश्चस्कन्देत्यमि मृशति होत्रास्वेवैनं प्रति ष्ठापयति " [सं० का० ५ प्र० २ अ० ७] इति ।

होत्रासु होतृमैत्रावरुणादिषु सप्तसु, अथवा द्रप्सस्कन्दनदिग्व्यतिरिक्तासु होमयोग्यासु सप्तसु दिक्षु ।

कल्पः—"नमो अस्तु सर्पेभ्य इति तिसृभिरभिमन्त्र्य" इति । तत्र प्रथमामाह—

नमो अस्तु सर्पेभ्य इति । ये केचित्सर्पाः पृथिवीमनुगतास्तेभ्यः सर्पेभ्यो नमोऽस्तु । अन्तरिक्षे यक्षगन्धर्वादिलोके वर्तमाना ये सर्पा ये च दिवि द्युलोके वर्तमाना राहुप्रभृतयस्तेभ्यः सर्पेभ्यो नमोऽस्तु । अथ द्वितीयामाह—

येऽदो रोचन इति । दिवोऽन्तरिक्षस्य रोचने भासकेऽदोऽमुष्मिन्सूर्यस्य मण्डले ये सर्पा वसन्ति, ये चान्ये सूर्यस्य रश्मिष्वस्माभिरदृश्यमाना वर्तन्ते, येषामप्येषां सर्पाणामप्सु जलमध्ये सदः स्थानं कृतं, तेभ्यः सर्पेभ्यः कृत्स्नेभ्यो नमोऽस्तु । अथ तृतीयामाह—

या इषव इति । याः सर्पजातयो यातुधानानां रक्षसामिषवो बाणरूपा

(आहवनीयचयनार्थरुक्मादुपधानाभिधानम्)

वर्तन्ते, ये चान्ये वनस्पतीँश्चन्दनादिवृक्षाननुवेष्टयावस्थिताः, ये चान्येऽवटेषु बिलेषु शेरते, तेभ्यः सर्वेभ्यो नमोऽस्तु। एते मन्त्राः स्पष्टार्थत्वेन ब्राह्मण उपेक्षिताः। यथा पुष्करपर्णरुक्महिरण्मयपुरुषोखाना(णा)मृन्मयेष्टकानामुपधानं विहितं तथैव स्रुवोरमृन्मयेष्टकयोरुपधानं विधत्ते—

" स्रुचावुप दधाति " [सं० का० ५ प्र० २ अ० ७] इति।

तयोः स्रुचोर्विशेषणं दर्शयति—

" आज्यस्य पूर्णां काष्मर्यमयीं दध्नः पूर्णामौदुम्बरीम् " [सं० का० ५ प्र० २ अ० ७] इति।

श्रीपर्णाख्यो वृक्षविशेषः काष्मर्यस्तेन निर्मिता काचित्स्रुक्काष्मर्यमयी, सा चाऽऽज्येन पूर्णा। उदुम्बरेण निर्मिता काचित्, सा च दध्ना पूर्णा। एतद्विशिष्टयोः स्रुचोरुपधानस्य विधानान्न वाक्यभेदः शङ्कनीयः।

ते च विशिष्टे स्रुचौ लोकद्वयरूपेण प्रशंसति—

" इयं वै काष्मर्यमय्यसावौदुम्बरीमे एवोप धत्ते " [सं० का० ५ प्र० २ अ० ७] इति।

इष्टकान्तरोपधानवत्समन्त्रत्वस्य शङ्कां लौकिकवाक्यं वा निवारयितुं विधत्ते—

" तूष्णीमुप दधाति न ह्येमे यजुषाऽऽप्तुमर्हन्ति " [सं० का० ५ प्र० २ अ० ७] इति।

यस्मादाम्नातो मन्त्रो नास्ति तस्माद्यजुषा मन्त्रेणैते उपधातुं नार्हंति।

तयोर्दिग्विशेषं विधत्ते—

" दक्षिणां काष्मर्यमयीमुत्तरामौदुम्बरीं तस्मादस्या असावुत्तरा " [सं० का० ५ प्र० २ अ० ७] इति।

यस्माद्द्युलोकरूपौदुम्बरी स्रुगुत्तरस्यां दिश्युपहिता तस्माल्लोकेऽप्यसौ द्यौरस्याः पृथिव्या उत्तरोर्ध्वभाविनी। स च दिग्विशेषः सूत्रकारेण स्पष्टमभिहितः—" आज्यस्य पूर्णां काष्मर्यमयीं दक्षिणेन पुरुषम् " इति, " दध्नः पूर्णामौदुम्बरीमुत्तरेण पुरुषम् " इति च।

प्रकारान्तरेण स्रुग्विशेषं प्रशंसति—

" आज्यस्य पूर्णां काष्मर्यमयीं वज्रो वा आज्यं वज्रः काष्मर्यो वज्रेणैव

---

१ ख. °मप्यदधाति क°। २ ख. °ति। प्र°।

यज्ञस्य दक्षिणतो रक्षाꣳस्यप हन्ति दृꣳहनः पूर्णामौदुम्बरीं पशवो वै दृꣳहणं पूर्णमौदुम्बरः पशुष्वेवोर्जं दधाति" [सं० का० ५ प्र० २ अ० ७] इति ।

आज्यस्य वज्रत्वं तानूनप्त्रब्राह्मणे समाम्नातं-"घृतं खलु वै देवा वज्रं कृत्वा सोममघ्नन्" इति । कार्ष्मर्यस्य रक्षोपघातहेतुत्वाद्वज्रत्वम् । तदप्याति'-ष्यब्राह्मणे सामाम्नातं-"ते कार्ष्मर्यमयान्परिधीनकुर्वत तैर्वै ते रक्षाꣳस्यपाघ्नत" इति । स्रुचोर्दृꣳहणाज्यपूर्णत्वं प्रशंसति--

"पूर्णे उप दधाति पूर्णे एवैनममुष्मिँल्लोक उप तिष्ठते" [सं० का० ५ प्र० २ अ० ७] इति । स्रुगुपधानं प्रशंसति--

"विराज्यग्निश्चेतव्य इत्याहुः स्रुग्वै विराडद्यत्स्रुचावुप दधाति विराज्येवाग्निं चिनुते" [सं० का० ५ प्र० २ अ० ७] इति ।

विविधे राजमाने प्रदेशे चेतव्योऽग्निरित्यभिज्ञा आहुः । स्रुक्चाऽऽज्यादिपूर्णत्वाद्विशेषेण राजते, तस्मात्तत्र चयनाय स्रुचावुपदध्यात् ।

पाशुकोत्तरवेदिवदुक्मस्योपरि व्याघारणं विधत्ते-

"यज्ञमुखेयज्ञमुखे वै क्रियमाणे यज्ञꣳ रक्षाꣳसि जिघाꣳसन्ति यज्ञमुखꣳ रुक्मो यदुक्मं व्याघारयति यज्ञमुखादेव रक्षाꣳस्यप हन्ति" [सं० का० ५ प्र० २ अ० ७] इति ।

यज्ञसंबन्धिन एकैकस्याङ्गस्यानुष्ठानं यज्ञमुखम् । अतो रुक्मोपधानस्यापि यज्ञमुखत्वात्तत्र प्राप्तानां रक्षसामुपघाताय व्याघारयेत् ।

कृणुष्व पाज इति पञ्चभिरिति ये मन्त्राः सूत्रकारेणोदाहृतास्तानत्र विनियुङ्क्ते-

"पञ्चभिर्व्याघारयति पाङ्क्तो यज्ञो यावानेव यज्ञस्तस्मादक्षाꣳस्यप हन्ति" [सं० का० ५ प्र० २ अ० ७] इति ।

धानादिहविर्भिः पञ्चभिर्यज्ञस्य पाङ्क्तत्वम् ।

सूत्रकारेण 'दक्षिणमꣳसमुत्तराꣳ श्रोणिं दक्षिणाꣳ श्रोणिमुत्तरमꣳसं मध्यमिति' इति पाशुकोत्तरवेदिव्याघारणे देयं वक्तीतिरुक्त्वा तामत्र विधत्ते--

"अक्षण्या व्याघारयति तस्मादक्षण्या पशवोऽङ्गानि प्र हरन्ति प्रतिष्ठित्यै" [सं० का० ५ प्र० २ अ० ७] इति ।

---

१ ब. तिरुक्त्वा° ।

(स्वयमातृण्णादीष्टकोपधानाभिधानम्)

अक्षण्या वक्रीत्या । अत एवाऽऽधारस्य विविक्तत्वाद्व्याधारणामित्युच्यते । यस्मादाधारणे वक्रक्रमस्तस्मात्पशवो गमनकाले स्वकीयाङ्गानि वक्रीत्या प्रहरन्ति प्रवर्तयन्ति, पुरोवर्तिनं दक्षिणं पादं पुरतः प्रक्षिप्य पाश्चात्यं वामपादं पुरतः प्रवर्तयन्ति । तस्मात्प्रतिष्ठायै तदिदं वक्रत्वं संपद्यते ।

अत्र विनियोगसंग्रहः—

अभ्यर्धं क्रमयेद्धर्मं यदावृत्तिः प्रदक्षिणम् ।
अश्मां दध्यात्पञ्चपत्रं ब्रह्म रुक्मोपधानकम् ॥
हिरं स्वर्णमयं दध्याद्दृष्टस्तस्याभिमर्शनम् ।
नमस्त्रिभिर्मन्त्रयेत मन्त्रा अत्र नवेरिताः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे द्वितीयप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ चतुर्थकाण्डके द्वितीयप्रपाठके नवमोऽनुवाकः) ।

ध्रुवाऽसि धरुणाऽस्तृता विश्वकर्मणा सुक्षे-
त्रा । मा त्वा समुद्र उद्वधीन्मा सुपर्णो व्यथ-
माना पृथिवीं दृꣳह । प्रजापतिस्त्वा सादयतु
पृथिव्याः पृष्ठे व्यचस्वतीं प्रथस्वतीं प्रथोऽसि
पृथिव्यसि भूरसि भूमिरस्यदितिरसि विश्वधाया
विश्वस्य भुवनस्य धर्त्री पृथिवीं यच्छ पृथिवीं
दृꣳह पृथिवीं मा हिꣳसीर्विश्वस्मै प्राणायापानाय
व्यानायोदानाय प्रतिष्ठाये (१) चरित्राया-
ग्निस्त्वाऽभि पातु मह्या स्वस्त्या छर्दिषा शंत-
मेन तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद । का-
ण्डात्काण्डात्प्ररोहन्ती परुषःपरुषः परि । एवा

नो दूर्वे प्र तनु सहस्रेण शतेन च । या शतेन प्रतनोषि सहस्रेण विरोहसि । तस्यास्ते देवीष्टके विधेम हविषा वयम् । अषाढाऽसि सहमाना सहस्वारातीः सहस्वारातीयतः सहस्व पृतना सहस्व पृतन्यतः । सहस्रवीर्या(२) असि सा मा जिन्व । मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः । मधु नक्तमुतोषसि मधुमत्पार्थिवꣳ रजः । मधु द्यौरस्तु नः पिता । मधुमान्नो वनस्पतिर्मधुमाꣳ अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः । मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम् । पिपृतां नो भरीमभिः । तद्विष्णोः परमम्(३) पदꣳ सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् । ध्रुवाऽसि पृथिवि सहस्व पृतन्यतः । स्योता देवेभिरमृतेनाऽगाः । यास्ते अग्ने सूर्ये रुचः उद्यतो दिवमातन्वन्ति रश्मिभिः । ताभिः सर्वाभी रुचे जनाय नस्कृधि । या वो देवाः सूर्ये रुचो गोष्वश्वेषु या रुचः । इन्द्राग्नी ताभिः सर्वाभी रुचं नो धत्त बृहस्पते । विराट(४) ज्योतिरधारयत्सम्राड्ज्योतिरधारयत्स्वराड्ज्योतिरधारयत् । अग्ने युक्ष्वा हि ये तवाश्वासो देव साधवः । अरं वहन्त्याशवः । युक्ष्वा हि देवहूतमाꣳ अश्वाꣳ अग्ने रथीरिव । नि होता

(स्वयमातृण्णादीष्टकोपधानाभिधानम्)

पुण्यः सदः। द्रप्सश्चस्कन्द पृथिवीमनु द्यामिमं च योनिमनु यश्च पूर्वः। तृतीयं योनिमनु संचरन्तं द्रप्सं जुहोम्यनु सप्त (५) होत्राः। अभूदिदं विश्वस्य भुवनस्य वाजिनमग्नेर्वैश्वानरस्य च। अग्निर्ज्योतिषा ज्योतिष्मान्रुक्मो वर्चसा वर्चस्वान्। ऋचे त्वा रुचे त्वा समित्स्रवन्ति सरितो न धेनाः। अन्तर्हृदा मनसा पूयमानाः। घृतस्य धारा अभि चाकशीमि। हिरण्ययो वेतसो मध्य आसाम्। तस्मिन्त्सुपर्णो मधुकृत्कुलायी भजन्नास्ते मधु देवताभ्यः। तस्याऽऽसते हरयः सप्त तीरे स्वधां दुहाना अमृतस्य धाराम् ॥ ६ ॥

(प्रतिष्ठायै सहस्रवीर्या परमं विराट्सप्त तीरे चत्वारिं च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके द्वितीयप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ चतुर्थकाण्डे द्वितीयप्रपाठके नवमोऽनुवाकः)।

अष्टमेऽनुवाके पुष्करपर्णाद्यमृन्मयेष्टकोपधानमुक्तम्। अथ नवमे स्वयमातृण्णादीष्टकोपधानमुच्यते।

कल्पः—" ध्रुवाऽसि धरुणाऽस्तृतेति स्वयमातृण्णामभिमृश्याधेनोपधाप्य च प्रजापतिस्त्वा सादयतु पृथिव्याः पृष्ठ इत्यविदुषा ब्राह्मणेन सह मध्येऽग्नेरुपदधाति " इति। तत्राभिमर्शनमन्त्रपाठस्तु—

ध्रुवाऽसि धरुणेति। हे स्वयमातृण्णे त्वं ध्रुवा स्थिराऽसि। कीदृशी, धरुणा भूमिरूपेण विश्वस्य धारयित्री, अत एवास्तृता केनाप्यहिंसिता। विश्व-

(स्वयमातृण्णादीष्टकोपधानाभिधानम्)

कर्मणा जगत्कर्त्रा सुकृता सुष्ठु निर्मिता। समुद्रस्त्वां मोद्वधीत्स्वोदरमध्ये निमज्जनलक्षणं वधं मा कार्षीत्। सुपर्णः पक्षिराजोऽपि सर्पोद्धरणवेलायां त्वामादाय मोद्वधीद्दूरे परित्यागलक्षणं वधं मा कार्षीत्। एवं सत्यव्यथमाना भयरहिता त्वं पृथिवीमिमां दृंह दृढीं कुरु। उपधानमन्त्रपाठस्तु—

प्रजापतिस्त्वेति। हे स्वयमातृण्णे प्रजापतिस्त्वामस्मिन्प्रदेशे पृथिव्या उपरि सादयतु। कीदृशीं त्वां, व्यचस्वतीं विस्तारयुक्तां प्रथस्वतीं पृथुलाम्। किंच प्रथोऽसि अस्याश्चितेः प्रथनं विस्ताररूपमसि। त्वया हि चितिर्विस्तारो भवति। पृथिव्यामुत्पन्नत्वात्पृथिव्यसि, भूरसि सुखानां भावयित्र्यसि, भूमिरसि मृन्मयपृथिव्यभिमानिभूमिदेवताऽसि, अदितिरसि अखण्डनीयाऽसि। विश्वधाया विश्वस्य पोषयित्र्यसि। तथा विश्वस्य भुवनस्य सर्वस्य लोकस्य धर्त्री धारयित्र्यसि। तादृशी त्वं पृथिवीं यच्छ नियतां कुरु। पृथिवीं दृंह दृढीं कुरु। पृथिवीं मा हिंसीः पृथिव्या हिंसां मा कुरु। विश्वस्मै सर्वस्मै प्राणापानव्यानोदानाख्यवायुवृत्तिलाभाय, प्रतिष्ठायै स्वगृहस्थितिलाभाय, चरित्राय शास्त्रीयाचरणलाभाय। प्राणिनामेतस्य सर्वस्य क्षिद्र्यर्थमयमग्निस्त्वामभितः पातु। केन रक्षणमिति तदुच्यते—मह्या स्वस्त्या महत्या योगक्षेमसंपत्त्या शंतमेन सुखतमेनाऽत्यन्तसुखकारिणा दीप्तिविशेषेण। तव स्वामिभूता या देवता तयाऽनुगृहीता त्वं ध्रुवा स्थिरा सती सीदेहोपविश। अङ्गिरस्वत्, अङ्गिरसां चयनानुष्ठाने यथा त्वं ध्रुवा स्थिरा तद्वत्। एतन्मन्त्रसाध्यमुपधानं विधत्ते—

" स्वयमातृण्णामुप दधातीयं वै स्वयमातृण्णेमामेवोप धत्ते " [तं० का० ५ प्र० २ अ० ८] इति।

शर्करारूपाणां(णां) क्षुद्रपाषाणानां मध्ये पुरुषप्रयत्नमन्तरेण या स्वत एव च्छिद्रयुक्ता सेयं शर्करा स्वयमातृण्णा, तामत्रोपदध्यात्। सा च स्वयमातृण्णा पृथिवीजन्यत्वात्पृथिव्येव। अतः पृथिवीमेवोपधत्ते।

अस्याः स्वयमातृण्णाया अश्वोपधापणं विधत्ते—

" अश्वमुप धापयति प्राणमेवास्यां दधात्यथो प्राजापत्यो वा अश्वः प्रजापतिनैवाग्निं चिनुते " [तं० का० ५ प्र० २ अ० ८] इति।

---

१ ख. च. चितेर्विस्ता°।

(स्वयमातृण्णादीष्टकोपधानाभिधानम्)

अन्तरस्या इष्टकायाः स्वतः सिद्धं छिद्रं प्रशंसति—

" प्रथमेष्टकोपधीयमाना पशूनां च यजमानस्य च प्राणमपि दधाति स्वयमातृण्णा भवति प्राणानामुत्सृष्ट्या अथो सुवर्गस्य लोकस्यानुख्यात्यै " [सं० का० ५ प्र० २ अ० ८] इति ।

पुष्करपर्णादिषूपधेयत्वसाम्येनेष्टकात्वमुपचरितम् । स्वयमातृण्णा तु यद्यपि पुरुषैरनिर्मिता तथाऽपि तस्या इष्टकात्वं मुख्यमित्यभिप्रेत्य मुख्यास्विष्टकास्वस्याः प्राथम्यमुच्यते । प्रथमेष्टकोपधीयमाना सती पशूनां यजमानस्य च श्वासं निरुध्या (न्ध्या)त् । अतः श्वासस्य निर्गमनाय स्वतःसिद्धच्छिद्रयुक्ता कार्या । अथो अपि च सच्छिद्रत्वे सत्यावरणाभावात्स्वर्गलोकोऽपि प्रकाशितो भवति ।

यदुक्तं सूत्रकारेण—" अविदुषा ब्राह्मणेन सह मध्येऽग्नेरुपदधाति " इति । तदेतद्विधत्ते—

" अग्नावग्निश्चेतव्य इत्याहुरेष वा अग्निर्वैश्वानरो यद्ब्राह्मणस्तस्मै प्रथमामिष्टकां मनुष्कृतां प्र यच्छेत्तां ब्राह्मणश्चोप दध्यादग्नावेव तदग्निं चिनुते " [सं० का० ५ प्र० २ अ० ८] इति ।

अग्निमेवाऽऽधारं कृत्वा तस्मिन्नग्नावेवायमग्निश्चेतव्य इत्यभिज्ञा आहुः । तस्य कं उपाय इति तदुच्यते—योऽयं ब्राह्मणः स एवाऽऽधारभूतो वैश्वानरनामकोऽग्निः । अग्नेर्ब्राह्मणाभिमानिदेवत्वाद्ब्राह्मणस्याग्नित्वम् । अतोऽग्निरूपस्य ब्राह्मणस्य हस्ते मन्त्रसंस्कृतां स्वयमातृण्णां दद्यात् । ततः स ब्राह्मणोऽध्वर्युश्च मिलित्वा तामुपदध्यातां, तावतोऽग्नावेवाग्निश्चितो भवति[1] ।

अथ यदुक्तं सूत्रकारेण " अविद्वान्ब्राह्मणो वरं दद्यात्येकं द्वौ त्रीन्वा " इति । तदेतद्विधत्ते—

" ईश्वरो वा एष आर्तिमार्तोर्योऽविद्वानिष्टकामुपदधाति त्रीन्वरान्दद्यात्रयो वै प्राणाः प्राणानाꣳ स्पृत्यै द्वावेव देयौ द्वौ हि प्राणावेक एव देय एको हि प्राणः" [सं० का० ५ प्र० २ अ० ८] इति ।

यः स्वयमविद्वान्सन्निष्टकामुपदधाति स्वयमातृण्णां स एष आर्तिमाप्तुं समर्थो भवति । अतस्तत्परिहारायाध्वर्यवे वरदानं कुर्यात् । वरशब्देन श्रेष्ठत्वाद्वौरुच्यते । त्रीन्द्वावेक इति पक्षा विकल्पिताः । प्राणोऽपानो व्यान इति त्रित्वं, व्यानमन्तर्भाव्य प्राणापानाविति द्वित्वम्, अपानमन्तर्भाव्य प्राण इत्येकत्वम् ।

---

१ ख. च. °ताऽग्नि° । २ ख. च. °ति । य° ।

(स्वयमातृण्णाव्रष्टिकापेधानाभिधानम्)

कल्पः—"काण्डात्काण्डात्प्ररोहन्तीतिद्वाभ्यां दूर्वेष्टकाम् " इति । उपदध्यादित्यनुवर्तते । तत्र प्रथमामाह——

काण्डादिति । काण्डशब्दः स्तम्बवाची । परुःशब्दः पर्ववाची । यावन्तः काण्डाः स्तम्बाः सन्ति तत्रैकैकस्मात्स्तम्बात्प्रकर्षेण दूर्वोत्पद्यते । एकस्मिन्नपि स्तम्बे यावन्ति परूंषि पर्वाणि सन्ति तेष्वेकैकस्य पर्वणः परितः प्रकर्षेण दूर्वोत्पद्यते । हे दूर्वे त्वं तत्तत्काण्डोत्थत्वात्तत्तत्पर्वाणि प्रकर्षेणोत्पद्यमाना वर्तसे । एवा, एवमनेन प्रकारेण नोऽस्मदर्थं शतसंख्याकेन सहस्रसंख्याकेन च त्वदीयभेदेन त्वत्स्वरूपं प्रतनु प्रकर्षेण विस्तृतं कुरु । अथ द्वितीयामाह——

या शतेनेति । हे दूर्वे या त्वं शतसंख्याकेन स्वरूपेण प्रतनोषि अत्यन्तं विस्तारयसि । तथा सहस्रसंख्याकेनाऽऽकारेण विरोहसि विविधमुत्पद्यसे । हे इष्टके देवि तस्यास्ते वयं हविषा विधेम परिचरेम ।

एतन्मन्त्रद्वयसाध्यमुपधानं विधत्ते——

" पशुर्वा एष यदग्निर्न खलु वै पशव आयवसे रमन्ते दूर्वेष्टकामुप दधाति पशूनां धृत्यै " [सं० का० ५ प्र० २ अ० ८] इति ।

पशुप्राप्तिहेतुत्वादग्नेः पशुत्वम् । ईषदर्थवाच्याङ् । यवसशब्दो घासवाची । अल्पघासे प्रदेशे पशवो नैव रमन्ते । अतः पशूनां धारणाय घासरूपां दूर्वेष्टकामुपदध्यात् । तस्याश्च स्वरूपं सूत्रकारेणोक्तं—" सलोष्टं हरितं दूर्वास्तम्बमप्रच्छिन्नाग्रम् " इति । मन्त्रद्वयं प्रशंसति——

" द्वाभ्यां प्रतिष्ठित्यै " [सं० का० ५ प्र० २ अ० ८] इति ।

प्रथममन्त्रस्य प्रथमपादार्थः प्रसिद्ध इति दर्शयति——

" काण्डात्काण्डात्प्ररोहन्तीत्याह काण्डेनकाण्डेन खेवा प्रतितिष्ठति " [सं० का० ५ प्र० २ अ० ८] इति ।

द्वितीयेऽर्धे सहस्रशब्दतात्पर्यं दर्शयति——

" एवा नो दूर्वे प्र तनु सहस्रेण शतेन चेत्याह साहस्रः प्रजापतिः प्रजापतेराप्त्यै " [सं० का० ५ प्र० २ अ० ८ इति ।

सहस्रसंख्याकपाण्युत्पादकत्वात्प्रजापतेः साहस्रत्वम् ।

कल्पः——" अषाढाऽसीति द्वाभ्यामषाढामुपरिष्टाल्लक्षणम् " इति । उपदध्यादिति शेषः । तत्र प्रथमामाह——

(स्वयमातृण्णादीष्टकोपधानाभिधानम्)

अषाढाऽसीति । उखानिर्माणकाल एव येयमिष्टका निर्मिता सेयमषाढा । तथा च सूत्रकारेणोक्तम्—" य उखां करोति सोऽषाढामेतस्या एव मृदस्तूष्णीं चतुरस्रां व्यालिखितामिष्टकाम् " इति । हे इष्टके त्वमषाढा केनाप्यपरिभूता सहमाना विरोधिनः परिभवन्त्यसि । येऽस्मभ्यं दातव्यं न प्रयच्छन्ति तथाविधानरातीञ्शत्रून्सहस्व परिभव । ये तु पूर्वमरातयो न भवन्तीतः परमरातित्वमिच्छन्ति तानप्यरातीञ्शत्रून्सहस्व परिभव । अथ द्वितीयामाह—

सहस्व पृतना इति । हे इष्टके पृतना वैरिसेनाः सहस्व परिभव । ये तु पूर्वं सेनारहिता अपि वैरिण इतः परं सेनामिच्छन्ति तानपि पृतन्यतो वैरिणः सहस्व परिभव । सहस्रसंख्याकं वीर्यं सामर्थ्यं यस्याः सा सहस्रवीर्याऽसि । सा तादृशी त्वं मा मां जिन्व प्रीणय ।

अन्वयव्यतिरेकाभ्यामषाढायाः स्थापनप्रकारविशेषं विधत्ते—

" देवलक्ष्मं वै व्यालिखिता तामुत्तरलक्ष्माणं देवा उपादधताधरलक्ष्माणमसुरा यं कामयेत वसीयान्त्स्यादित्युत्तरलक्ष्माणं तस्योप दध्याद्वसीयानेव भवति यं कामयेत पापीयान्त्स्यादित्यधरलक्ष्माणं तस्योप दध्यादसुरयोनिमेवैनमनु परा भावयति पापीयान्भवति " [सं० का० ५ प्र० २ अ० ८] इति ।

यस्यामार्द्रायामिष्टकायां त्रिपुण्ड्रवद्रेखात्रयं क्रियते सेयं व्यालिखिता । तत्व्यालिखितत्वं देवानां चिह्नम् । ततो देवास्तामषाढामूर्ध्वदेशवर्तीचिह्नयुक्तामुपादधत । असुरास्त्वधोदेशवर्तीचिह्नयुक्तामुपादधत । तस्मादेववद्धनसमृद्ध्यर्थमूर्ध्वभाविचिह्नयुक्तामेवोपदध्यात् । सोऽयमन्वयः । असुरवदधोमुखचिह्नयुक्तत्वे सत्येनं यजमानमसुरजात्यनुसारिणं कृत्वा पराभूतं करोति ।

अथ देवचिह्नं विधत्ते—

" व्यालिखिता भवतीमे वै लोकाव्यालिखितेभ्य एव लोकेभ्यो भ्रातव्यमन्तरेति " [सं० का० ५ प्र० २ अ० ८] इति ।

तिसृभिरङ्गुलिभिरालिखिता व्यालिखिता, व्याविधां कुर्यात् । तथा सति त्रित्वसामान्याल्लोकत्रयरूपा भवति । तेन लोकत्रयाद्भ्रातृव्यो निःसारितो भवति ।

कल्पः—" मधु वाता ऋतायत इति तिसृभिर्दध्ना मधुमिश्रेण कूर्ममभ्यज्य " इति । तत्र प्रथमामाह—

---

१ ख. च. °साम्याल्लो° ।

(स्वयमातृण्णादीष्टकोपधानाभिधानम्)

मधु वाता इति। ऋतं यज्ञमात्मन इच्छतीत्यृतायन्, तस्मै यजमानाय वाता वायवो मधु क्षरन्ति मधुरं रसं स्रावयन्ति। सिन्धवः समुद्राश्च मधुरं रसं स्रावयन्ति। ओषधीरोषधयोऽपि नोऽस्मदर्थं माध्वीर्मधुररसोपेताः सन्तु।

अथ द्वितीयामाह-

मधु नक्तमुतेति। नक्तं रात्रौ मध्वस्माकमस्तु। उतापि चोषसि प्रभाते मध्वस्तु। तथा यत्पार्थिवं रजस्तत्सर्वं मधुमन्माधुर्यरसोपेतमस्तु। नोऽस्माकं पिता पितृस्थानीया द्यौर्मध्वस्तु मधुररसोपेताऽस्तु। अथ तृतीयामाह-

मधुमान्न इति। वनस्पतिरश्वत्थादिर्नोऽस्मदर्थं मधुमानस्तु माधुर्यरसोपेतोऽस्तु। सूर्योऽपि मधुमान्संतापराहित्यलक्षणमाधुर्यरसोपेतोऽस्तु। तथा गावो नोऽस्मदर्थं माध्वीर्मधुरक्षीरोपेता भवन्तु।

कल्पः-" महीद्यौः पृथिवी च न इति पुरस्तात्स्वयमातृण्णायाः प्रत्यञ्चं जीवन्तं कूर्मं प्राङ्मुखं उपदधाति " इति। पाठस्तु-

महीद्यौरिति। मही द्यौर्येयं महती द्यौः पृथिवी च द्यावापृथिवी ते उभे नोऽस्मदीयमिमं यज्ञं मिमिक्षितां फलवृष्ट्या सेक्तुमिच्छताम्। भरीमभिर्भरणशक्तिभिर्नोऽस्मान्पिपृतां पूरयेताम्। एतन्मन्त्रसाध्यमुपधानं विधत्ते-

" आङ्गिरसः सुवर्गं लोकं यतः पुरोडाशः कूर्मो भूत्वाऽनु प्रासर्पद्यत्कूर्ममुपदधाति यथा क्षेत्रविदञ्जसा नयत्येवमेवैनं कूर्मः सुवर्गं लोकमञ्जसा नयति " [सं० का० ५ प्र० २ अ० ८] इति।

आङ्गिरसो महर्षयो यदा स्वर्गं लोकं गतास्तदा ताननु कूर्मोऽप्यन्वगच्छत्। अतः स्वर्गमार्गाभिज्ञः कूर्मः क्षेत्रज्ञ इव सम्यग्नेतुं शक्त इति तमत्रोपदध्यात्। प्रकारान्तरेण कूर्मोपधानं प्रशंसति-

" मेधो वा एष पशूनां यत्कूर्मो यत्कूर्ममुपदधाति स्वमेव मेधं पशवः पश्यन्तः पशव उप तिष्ठन्ते " [सं० का० ५ प्र० २ अ० ८] इति।

योऽयं कूर्मः स एष पशूनां मेधो यज्ञवत्प्राप्तिहेतुः। अतः कूर्मोपधानेन तं कूर्मं पशवः स्वहेतुभूतयज्ञत्वेन पश्यन्तो यजमानगृहे प्राप्ता भवन्ति।

उपधेयस्य कूर्मस्य जीवनापेतत्वगुणं विधत्ते-

" श्मशानं वा एतत्क्रियते यन्मृदानां पशूनां शीर्षाण्युपधीयन्ते यज्जीवन्तं

१ क. घ. ङ. °स्तुप। २ स. च. °ज्ञादि से।

(स्वयमातृण्णादीष्टकोपधानाभिधानम्)

कूर्ममुपदधाति तेनाश्मशानचिद्वास्तव्यो वा एष यत्कूर्मः " [सं० का० ५ प्र० २ अ० ८] इति ।

मृतानां पशूनामश्ववृषभवृष्णिबस्तानां शिरांस्युपधेयानीत्युपरिष्टाद्वक्ष्यति । तदेतत्स्थानं श्मशानमेव कृतं भवति । जीवकूर्मोपधानेनायं यजमानोऽश्मशानचिद्भवति । किंच यः कूर्मोऽस्ति स एष वास्तव्यो निवासयोग्यः कूर्मपृष्ठे भूमेरवस्थितत्वात् । ततोऽपि कूर्मोपधानमित्यर्थः ।

उपधानात्पूर्वमभ्यञ्जनं विधत्ते—

" मधु वाता ऋतायत इति दध्ना मधुमिश्रेणाभ्यनक्ति स्वदयत्येवैनम् " [सं० का० ५ प्र० २ अ० ८] इति । अभ्यञ्जनेननं कूर्मं स्वादु करोति । अभ्यञ्जनसाधनद्रव्यद्वयं प्रशंसति—

" ग्राम्यं वा एतदन्नं यद्दध्यारण्यं मधु यद्दध्ना मधुमिश्रेणाभ्यनक्त्युभयस्यावरुद्ध्यै " [सं० का० ५ प्र० २ अ० ८] इति ।

उभयस्य ग्राम्यस्याऽऽरण्यस्य च भोग्यजातस्य ।

कूर्मोपधानमन्त्रे द्यौः पृथिवी चेतिशब्दद्वयस्य तात्पर्यं दर्शयति—

" मही द्यौः पृथिवी च न इत्याहाऽऽभ्यामेवैनमुभयतः परि गृह्णाति " [सं० का० ५ प्र० २ अ० ८] इति ।

स्वयमातृण्णायाः पूर्वदेशे कूर्मस्य विधत्ते—

" प्राञ्चमुप दधाति सुवर्गस्य लोकस्य समष्ट्यै " [सं० का० ५ प्र० २ अ० ८] इति । प्राञ्चं प्राग्देशवर्तिनम् । स्वर्गलोकोऽपि प्राग्देशवर्ती ।

तस्मिन्प्राग्देशे कूर्मस्य प्रत्यङ्मुखत्वं विधत्ते—

" पुरस्तात्प्रत्यञ्चमुप दधाति तस्मात्पुरस्तात्प्रत्यञ्चः पशवो मेधमुप तिष्ठन्ते " [सं० का० ५ प्र० २ अ० ८] इति ।

स्वयमातृण्णायाः पुरस्तादुपधेयः कूर्मस्तं कूर्मं प्रत्यङ्मुखमुपदध्यात् । यस्मादेवं तस्मादाहवनीयस्य पुरस्ताद्यूपे बद्धाः पशवः प्रत्यङ्मुखा यज्ञं सेवन्ते ।

यदुक्तं सूत्रकारेण—" प्रादेशमात्रं चतुःस्रक्त्यौदुम्बरमुलूखलमुत्तरेऽक्षे प्रयुनक्ति सवौषधस्य पूरयित्वाऽवहत्य शतपूर्वेद्युर्विष्णुर्वि चक्रम इति मध्येऽग्नेरुपदधाति " इति । तदिदं विधत्ते—

---

१ ख. च. °श्वर्षभ° । २ ख. च. तत एत° । ३ ख. च.° मानः श्म° । ४ ख. च. °चिच्च भ्रव° । ५ क. ख. ङ. °धमं द्र° ।

(स्वयमातृण्णादीष्टकोपधानाभिधानम्)

" यो वा अपनाभिमाग्निं चिनुते यजमानस्य नाभिमनु प्र विशति स एनमीश्वरो हिंसितोरुलूखलमुप दधात्येषा वा अग्नेर्नाभिः सनाभिमेवाग्निं चिनुतेऽहिंसायै " [सं० का० ५ प्र० २ अ० ८] इति ।

नाभिराहितत्वेन चीयमानोऽग्निर्यजमानस्य नाभिं प्रविश्य हिंसितुं प्रभवति । अतो नाभिस्थानीयमुलूखलमुपदध्यात् । तथा सति सनाभित्वेनास्य हिंसा न भवति । उलूखलस्य प्रकृतिद्रव्यं विधत्ते—

" औदुम्बरं भवत्यूर्वा उदुम्बर ऊर्जमेवाव रुन्धे " " [सं० का० ५ प्र० २ अ० ८] इति । देशविशेषं विधत्ते—

" मध्यत उप दधाति मध्यत एवास्मा ऊर्जं दधाति तस्मान्मध्यत ऊर्जा भुञ्जते " [सं० का० ५ प्र० २ अ० ८] इति ।

हस्तेनाभिनीयोलूखलस्य प्रादेशपरिमाणं विधत्ते—

" इयद्भवति प्रजापतिना यज्ञमुखेन संमितम् " [सं० का० ५ प्र० २ अ० ८] इति । उपधानात्पूर्वभाविनं सर्वौषधावघातं विधत्ते—

" अव हन्त्यन्नमेवाकः " [सं० का० ५ प्र० २ अ० ८] इति ।

अन्यत्राऽऽम्नातमिदं विष्णुरिति मन्त्रमुलूखलोपधाने विनियुङ्क्ते—

" वैष्णव्यर्चोप दधाति विष्णुर्वै यज्ञो वैष्णवा वनस्पतयो यज्ञ एव यज्ञं प्रति ष्ठापयति " [सं० का० ५ प्र० २ अ० ८] इति ।

कल्पः—" तद्विष्णोः परमं पदमिति मुसलम् " इति । पाठस्तु—

तद्विष्णोः परममिति । सूरयो विद्वांसो वेदान्तपारं गता विष्णोस्तत्परमं पदं सदा पश्यन्ति । कीदृशं, दिव्याकाशे विस्तरणे चक्षुरिवाऽऽततं व्याप्तम् । तादृशस्य विष्णोरनुग्रहात् । वैष्णवत्वनस्पतित्वाभ्यां मुसलमुपदधातीत्यर्थः । एतन्मन्त्रसाध्यमुसलोपधानविधित्वेनापि पूर्वोदाहृतं वैष्णव्यर्चेत्यादिब्राह्मणं योजनीयम् ।

कल्पः—" ध्रुवाऽसि पृथिवीति मध्येऽग्नेरुपदधाति " इति । अत्र प्रकृतत्वादुलूखलमित्यनुवर्तते । पाठस्तु—

ध्रुवाऽसि पृथिवीति । हे पृथिवि पृथिवीत्वार्थितया तत्स्वरूपे हे उखे त्वं ध्रुवाऽसि पृतन्यतः संग्रामं कर्तुमिच्छतः शत्रून्सहस्वाभिभव । देवेभिर्देवैरमृतेन स्यूताऽमृतसमानेन घृतेन पूरिता सत्यागा ओगच्छः । एतन्मन्त्रसाध्यमुखोपधानं विधत्ते—

---

१ ख. च. आगच्छ ।

(स्वयमातृण्णादीष्टकोपधानाभिधानम्)

" एषां वा एतल्लोकानां ज्योतिः संभृतं यदुखा यदुखामुपदधात्येभ्य एव लोकेभ्यो ज्योतिरव रुन्धे " [सं० का० ५ प्र० २ अ० ९] इति ।

उखारूपं यद्द्रव्यमस्ति तदिदमेषां पृथिव्यादीनां लोकानां संबन्धि ज्योतिर्भवति । अतस्तत्संपादनायोखामुपदधात् । देशविशेषं विधत्ते—

" मध्यत उप दधाति मध्यत एवास्मै ज्योतिर्दधाति तस्मान्मध्यतो ज्योतिरुपास्महे " [सं० का० ५ प्र० २ अ० ९] इति ।

मध्यत उदरमध्ये जठराग्निरूपं ज्योतिरुपास्महे प्रतिदिनमनुभवामः ।

उत्पेयाया उखायाः सिकतापूरणं विधत्ते—

" सिकताभिः पूरयत्येतद्वा अग्नेर्वैश्वानरस्य रूपꣳ रूपेणैव वैश्वानरमव रुन्धे " [सं० का० ५ प्र० २ अ० ९] इति ।

अन्वयव्यतिरेकाभ्यां पूरणं प्रशंसति—

" यं कामयेत क्षोधुकः स्यादित्यूनां तस्योप दध्यात्क्षोधुक एव भवति यं कामयेतानुपदस्यदन्नमद्यादिति पूर्णां तस्योप दध्यादनुपदस्यदेवान्नमत्ति " [सं० का० ५ प्र० २ अ० ९] इति ।

सिकताभिः पूरितायां ईषन्न्यूनायां उखायां उपधाने सति क्षोधुकोऽन्नरहितः बुभुक्षाशीलो भवति । सोऽयं व्यतिरेकः । सिकतापूर्णायां उपधाने त्वनुपदस्यदेवाक्षीयमाणमेवान्नमत्ति । सोऽयमन्वयः ।

कल्पः—" प्रवाहणिष्टकायां हिरण्यशकलावधृ(धु)ष्य यास्ते अग्ने सूर्ये रुच इति द्वाभ्यां वामभृतम् " इति । तत्र प्रथममाह—

यास्ते अग्न इति । हेऽग्ने सूर्ये सूर्यमण्डल उद्यत उदयं गच्छतस्ते तव रुचो दीप्तयो रश्मिभी रश्मिस्वरूपेण दिवमाकाशं तन्वन्ति सर्वतो व्याप्नुवन्ति । रात्रौ या अग्नेर्दीप्तयस्ता एव सूर्योदयकाले सूर्यरश्मयो भवन्ति । एतच्चाग्निहोत्रब्राह्मणे समाम्नातम्—"उद्यन्तं वावाऽऽदित्यमग्निरनुसमारोहति" इति । ताभिः सर्वाभिर्दीप्तिभिर्नोऽस्मदीयाय जनाय यजमानाय प्रकाशं कुरु । अथ द्वितीयामाह—

या वो देवा इति । हे देवा वो युष्माकं संबन्धिन्यः सूर्यमण्डले वर्तमाना या रुचो दीप्तयः सन्ति । तथा गोऽश्वेषु च या दीप्तयः सन्ति । हे इद्राग्नी हे बृहस्पते त्रयोऽपि यूयं [ताभिः सर्वाभिः] नोऽस्मदर्थं रुचं धत्त प्रकाशं संपा-

१ ख. च. °ग्ने या वो देवाः सु° ।

दयत । एतन्मन्त्रसाध्यं वामभृदाख्यायां इष्टकायां उपधानमौपानुवाक्यकाण्डे द्रष्टव्यम् । कल्पः—" विराड्ज्योतिरिति तिस्रो रेतःसिचः " इति । पाठस्तु—

विराड्ज्योतिरिति । विशेषेण राजत इति विराट् , एवंविधा रेतःसिगाख्या प्रथमेष्टकाऽस्मदनुग्रहार्थं ज्योतिरधारयत् । सम्यग्राजत इति सम्राट्, तादृशी द्वितीया रेतःसिगिष्टका । स्वयमेव राजत इति स्वराट् , तादृशी तृतीया रेतःसिगिष्टका ।

कल्पः—" अग्ने युक्ष्वा हि ये तव युक्ष्वा हि देवहूतमानिति द्वाभ्यामुखायाꣳ हुत्वा " इति । तत्र प्रथमामाह—

अग्ने युक्ष्वेति । हेऽग्ने देव तव संबन्धिनो येऽश्वास्तो ये केचिदश्वाः साधवो दान्ताः सन्त आशवः शीघ्रगामिनो(णो) भूत्वाऽरमलं वहन्ति सुष्ठु वहन्तीत्यर्थः । तानश्वान्युक्ष्व योजय । अथ द्वितीयामाह—

युक्ष्वा हीति । हेऽग्ने त्वं देवहूतमान्देवानामतिशयेनाऽऽह्वातॄन्युक्ष्व योजय । हिशब्दः प्रसिद्धार्थवाची । प्रसिद्धेऽस्मिकर्मणीत्यर्थः । योजने दृष्टान्तः—रथीरश्वानिवेति । रथस्वामी यथाऽश्वान्योजति तद्वत् । किंच त्वं पूर्व्यः पुरातनो होता होमोत्पादको भूत्वा निषदोऽस्मिन्यागस्थाने निषीद । वामभृन्मन्त्रयोरिव रेतःसिङ्मन्त्राणां होममन्त्रयोश्च ब्राह्मणमौपानुवाक्यकाण्डे द्रष्टव्यम् ।

कल्पः—" पुरुषशिरसि हिरण्यशल्कान्प्रत्यस्यति द्रप्सश्चस्कन्देत्यास्येऽभूदिदं विश्वस्य भुवनस्येति वर्चे त्वेति दक्षिणेऽक्षिगोलके रुचे त्वेति सव्ये द्युते त्वेति कर्णयोर्भासे त्वेति दक्षिणस्यां नासिकायां ज्योतिषे त्वेत्युत्तरस्याम् " इति ।

उदाहृतेषु मन्त्रेषु प्रथममृचमाह—

द्रप्सश्चस्कन्देति । द्रव्यान्तरसंघट्टनेन स्फुटितो हिरण्यशल्को द्रप्सः । पृथिवीमनु चस्कन्द पृथिव्यां पतित इत्यर्थः । स च द्रप्सो हुतः सन्स्थानत्रयेऽनुसंचरति द्युलोकेऽन्तरिक्षलोके भूलोके च । तदेतदभिप्रेत्य स्मर्यते—

" अग्नौ प्रास्ताऽऽहुतिः सम्यगादित्यमुपतिष्ठते ।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः " ॥ इति ।

सोऽयमर्थो द्यामित्यादिनाऽभिधीयते । द्यामिमं च योनिमनु अन्तरिक्षरूपमिदं स्थानमनु संचरति । यश्च पूर्वः, योऽपि पृथिवीमनु चस्कन्देति पूर्वोक्तस्थानविशेषस्तमप्यनु संचरति । तृतीयं योनिं द्युलोकरूपमादित्यस्थानमनु संचरति ।

---

१ ख. च. °शकलान्प्र° । २ ख. च. °शकलो द्र° । ३ ख. पूरित । च. परित ।

(स्वयमातृण्णादीष्टकोपधानाभिधानम्)

तमिमं त्रिषु स्थानेष्वनुसंचरन्तं द्रप्सं जुहोमि मनसा हुतमिव भावयामि। कुत्र होम इति तदुच्यते—अनु सप्त होत्रा इति। यस्यां दिशि द्रप्सः पतितस्तद्व्यतिरिक्ता होमयोग्याः सप्त दिशो याः सन्ति तासु अनुक्रमेण जुहोमि। यथाऽयं द्रप्सो हुत आदित्यादिस्थानत्रयेषु संचरन्नुपकरोति तथा भावयामीत्यर्थः। अथ विकल्पितां द्वितीयामृचमाह—

अभूदिदमिति। इदं हिरण्यं विश्वस्य भुवनस्य भूतजातस्य वाजिनमन्नमभूत्। तथा वैश्वानरस्य च विश्वेषां नराणां स्वामिनोऽग्नेश्चान्नमभूत्। अयमग्निर्हिरण्येन ज्योतिषा स्वयं ज्योतिष्मानभूत्। तथा रुक्मो रोचमानोऽग्निर्वर्चसा हिरण्यकान्त्या वर्चस्वान्स्वयमपि कान्तिमानभूत्[1]। अत्र बाह्यप्रभा ज्योतिः। शरीरगतकान्तिर्वर्च इति।

ऋचे त्वेति। ऋचे त्वा रुचे त्वेति यजुर्द्वयम्। हे हिरण्यशकल येयमृक्स्तोत्ररूपा तदर्थं त्वां दक्षिणाक्षिगोलके प्रत्यस्यामि। तथा हे हिरण्यशकल याऽसौ रुग्दीप्तिस्तदर्थं त्वां वामाक्षिगोलके प्रत्यस्यामि।

एतैर्मन्त्रैर्यस्यावयवेषु हिरण्यशकलानि प्रत्यस्यन्ते तस्य पुरुषशीर्षस्योपधानं विधत्ते—

" सहस्रं वै प्रति पुरुषः पशूनां यच्छति सहस्रमन्ये पशवो मध्ये पुरुषशीर्षमुप दधाति सवीर्यत्वाय " [सं० का० ५ प्र० २ अ० ९] इति।

अत्र हि पुरुषशीर्षाश्वर्षभवृष्णिबस्तानां शिरांस्युपधेयानि। तेषां मध्ये यः पुरुषः स एक एव पशूनां सहस्रं यजमानाय प्रयच्छति। अन्ये त्वश्वर्षभवृष्णिबस्ताश्चत्वारः पशवो मिलित्वा पशूनां सहस्रं प्रयच्छन्ति। तथा सत्यश्वादिभ्यः पुरुषस्यातिप्रशस्तत्वात्तदीयं शिरो मध्य उपदध्यात्। तच्चोपधानं वीर्यसाहित्याय संपद्यते। तस्य पुरुषशीर्षस्योखासमीपदेशं विधत्ते—

" उखायामपि दधाति प्रतिष्ठामेवैनद्गमयति " [सं० का० ५ प्र० २ अ० ९] इति। उखायामुखासमीपे।

तस्य पुरुषशीर्षस्याऽऽस्यादिच्छिद्रेषु हिरण्यशकलप्रक्षेपं विधत्ते—

" व्यृद्धं वा एतत्प्राणैरमेध्यं यत्पुरुषशीर्षममृतं खलु वै प्राणा अमृतꣳ हिरण्यं प्राणेषु हिरण्यशल्कान्प्रत्यस्यति प्रतिष्ठामेवैनद्गमयित्वा प्राणैः समर्धयति " [सं० का० ५ प्र० २ अ० ९] इति।

---

१ ख. च. °त्। बाहुगतप्र°।

(स्वयमातृण्णादीष्टकोपधानाभिधानम्)

तदेतत्पुरुषस्य शिरः प्राणैर्वियुक्तत्वाद्यज्ञानर्हं, प्राणास्तु मरणहीनत्वादमृतमित्युच्यन्ते । लोके हि प्राणवियोगे सति शरीरस्यैव मरणं न तु प्राणानाम् । हिरण्यं चाग्निसंयोगे सति विनाशाभावादमृतम् । अतः प्राणसंचारस्थानेष्वास्यादिषु हिरण्यशकलान्प्रक्षिपेत् । तथा सत्युखायां प्रतिष्ठापितं शिरः प्राणैः समृद्धं भवति ।

कल्पः—" समित्स्रवन्तीति शृतातङ्क्येन दध्ना मधुमिश्रेण पुरुषशिरः पूरयति " इति । पाठस्तु—

समित्स्रवन्तीति । धेनाः पानयोग्या दधिमध्वयवयवाः समित्स्रवन्ति सम्यक्प्रवहन्त्येव । तत्र दृष्टान्तः—सरितो न सरित इव, यथा नद्यः प्रवहन्ति तद्वत् । ते चान्तः शरीरस्याभ्यन्तरे हृदा मनसा हृदयपुण्डरीकवर्तिनाऽन्तःकरणेन पूयमानाः शोध्यमाना दधिमध्वयवयवा घृतस्य धाराः संपद्यन्ते । ताश्च धारा अभिचाकशीमि अभितः प्रकाशयामि । अनुभवामीत्यर्थः । आसां घृतधारणां मध्ये हिरण्मयः सुवर्णमय इव तेजोरूपः पुरुषस्य मूर्धा वेतसो जलप्रवाहमध्यगतवेतसवृक्ष इवावभासते । एतन्मन्त्रसाध्यं पूरणं विधत्ते—

" दध्ना मधुमिश्रेण पूरयति मधव्योऽसानीति " [सं० का० ५ प्र० २ अ० ९] इति ।

अहं मधव्योऽसानि मधुररसभोगयोग्यो भवानीत्यनेनाभिप्रायेणैतत्पुरुषशिरो मधुयुक्तेन दध्ना पूरयेत् । तस्य दध्नो गुणविशेषं विधत्ते—

" शृतातङ्क्येन मेध्यत्वाय " [सं० का० ५ प्र० २ अ० ९] इति ।

द्विविधं दधि, तत्रैकं रजतप्रक्षेपादिना स्वयमेव घनी भवति, अन्यत्तु पक्वक्षीरादातञ्चनेन निष्पद्यते । तत्र क्षीरातञ्चनाभ्यां निष्पन्नं यागयोग्यम् । तस्मात्तादृशेनैव पूरयेत् । तदिदं दधिमधुद्वयं प्रशंसति—

" ग्राम्यं वा एतदन्नं यद्दध्यारण्यं मधु यद्दध्ना मधुमिश्रेण पूरयत्युभयस्यावरुध्यै " [सं० का० ५ प्र० २ अ० ९] इति ।

कल्पः—"तस्मिन्सुपर्णो मधुकृत्कुलायीति पुरुषशिर आदाय" इति । पाठस्तु—

---

१ क. घ. ङ. °रभी° । २ क. घ. ङ. पक्वं सदा° । ३ ख. °रायात° । ४ क. घ. ङ. तत्र शृतक्षी° ।

(स्वयमातृण्णादीष्टकोपधानाभिधानम्)

तस्मिन्त्सुपर्ण इति । तस्मिन्नेतत्स्थानीये पुरुषशिरसि मधुकृत्कश्चिन्मधुकर आस्ते। कीदृशः, सुपर्णः शोभनपक्षोपेतः। कुलायी कुलायो मधुकराणां निवासस्थानं सोऽस्यास्तीति कुलायी। किं कुर्वन्, देवताभ्यो देवतार्थं मधु भजन्संपादयन्। तस्य पुरुषशिरसस्तीरे समीपे हरयो मधुहरणशीलाः सप्तच्छिद्रवर्तित्वेन सप्तसंख्याका मधुकरा आसते। किं कुर्वन्तः, स्वधां स्वधाकारोपलक्षितभोग्यवस्तुरूपाममृतस्य मधुनो धारां दुहानाः शावयन्तस्ते। पुरुषशिरसि प्राणसमृद्धिसंपादनाय हिरण्यशकलप्रक्षेपः पूर्वमभिहितः। प्राणेषु समृद्धेषु सत्सु चेतनं जीवात्मानमासाद्य मधुकररूपत्वं संपाद्य तेन पुरुषशिरः प्रशस्यते। यथा लोके मधुकरः कस्मिंश्चिद्वृक्षे स्वनिवासाय कुलायं कृत्वा मधु संदापयति, तत्र मध्वर्थं यदेषां (प)रं कुलायं कृतं तस्य च्छिद्ररूपासु नाडीषु क्षुद्रा मधुकराः स्वस्वशक्त्यनुसारेण मधु संपादयन्तो वर्तन्ते तद्वत्। तदेतत्सर्वमत्र रूपकैकल्पनया संपादितम्। इत्थं प्रशस्तमिदं पुरुषशिरोऽनेन मन्त्रेण स्वीकुर्यात्। यत्पूर्वं विहितं पुरुषशीर्षमुपदधातीति तदेतदुपधानं कर्तुमिदं पुरुषशीर्षादानं द्रष्टव्यम्। अत्र विनियोगसंग्रहः—

ध्रुवेति स्वयमातृण्णां स्पृशेत्प्रेति दधाति ताम्।
काण्डाद्दूर्वष्टकां द्वाभ्यामषाढां मधु वा त्रिभिः॥
अनक्ति मधुमिश्रेण दध्ना कूर्मं महीत्यतः।
कूर्मं दधाति तद्विष्णोर्मुसलं हि ध्रुवेत्युखाम्॥
यास्ते वामभृतं द्वाभ्यां विराड्वेतःसिचस्त्रिभिः।
अग्ने द्वाभ्यामुखाधो दृप्तः पुरुषशीर्षके॥
आस्ये स्वर्णं क्षिपेत्तत्र मन्त्राभ्यां वा भवेत्।
ऋचे रुचेद्वयाक्षगोः सुवर्णशकलं क्षिपेत्॥
समिद्धना च मधुना पूरयेन्नरकीकसम्।
तस्मिंस्तच्छिर आदत्ते पञ्चविंशोत्तरीरिताः॥

अत्र मीमांसा।

तृतीयाध्यायस्याष्टमे पादे द्वितीयाधिकरणे। निरूपितम्—

---

१ ख. °दपूर्वं कु°। घ. ङ. °दपूर्वं त°। २ घ. ङ. रूपं कल्प°। ३ ख. च. °कल्प°। ४ ख. च. °भृताभ्यिभिः। ५ ख. घ. °हीति च। कु। ६ ख. ङ. °क्ष्योरक्ष्णोः।

(पशुशीर्षोपधानाभिधानम्)

इष्टकावरदानं किं स्वामिनः स्यादुतर्त्विजः ।
स्वामिनः पूर्ववन्नैवमध्वर्योर्वचनादिदम् ॥

" य एतामिष्टकामुपदध्यात्स त्रीन्वरान्दद्यात् " इत्यत्राध्वर्योर्गोत्रयदानं वाचनिकम् । नह्यस्ति वचनस्यातिभारः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे द्वितीयप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ चतुर्थाष्टके द्वितीयप्रपाठके दशमोऽनुवाकः) ।

आदित्यं गर्भं पयसा समञ्जन्त्सहस्रस्य प्रतिमां विश्वरूपम् । परिवृङ्ग्धि हरसा माऽभि मृक्षः शतायुषं कृणुहि चायमानः । इमं मा हिꣳसीर्द्विपादं पशूनाꣳ सहस्राक्ष मेध आ चीयमानः । मयुमारण्यमनु ते दिशामि तेन चिन्वानस्तनुवो नि षीद । वातस्य ध्राजिं वरुणस्य नाभिमश्वं जज्ञानꣳ सरिरस्य मध्ये । शिशुं नदीनाꣳ हरिमद्रिबुद्धमग्ने मा हिꣳसीः (१) परमे व्योमन् । इमं मा हिꣳसीरेकशफं पशूनां कनिक्रदं वाजिनं वाजिनेषु । गौरमारण्यमनु ते दिशामि तेन चिन्वानस्तनुवो नि षीद । अजस्रमिन्दुमरुषं भुरण्युमग्निमीडे पूर्वचित्तो नमोभिः । स पर्वभिर्ऋतुशः कल्पमानो गा मा हिꣳसीरदितिं विराजम् । इमꣳ समुद्रꣳ शतधारमुत्सं व्यच्यमानं भुवनस्य मध्ये । घृतं दुहानामदितिं जनायाग्ने मा

(पशुशीर्षोपधानाभिधानम्)

(२) हिꣳसीः परमे व्योमन् । गवयमार-
ण्यमनु ते दिशामि तेन चिन्वानस्तनुवो नि
षीद । वरूत्रिं त्वष्टुर्वरुणस्य नाभिमविं जज्ञा-
नाꣳ रजसः परस्मात् । महीꣳ सांहस्रीमसुरस्य
मायामग्ने मा हिꣳसीः परमे व्योमन् । इमामू-
र्णायुं वरुणस्य मायां त्वचं पशूनां द्विपदां
चतुष्पदाम् । त्वष्टुः प्रजानां प्रथमं जानित्रमग्ने
मा हिꣳसीः परमे व्योमन् । उष्ट्रमारण्यमनु
(३) ते दिशामि तेन चिन्वानस्तनुवो नि
षीद । यो अग्निरग्नेस्तपसोऽधि जातः शोचा-
त्पृथिव्या उत वा दिवस्परि । येन प्रजा
विश्वकर्मा व्यानट्तमग्ने हेडः परि ते वृणक्तु ।
अजा ह्यग्नेरजनिष्ट गर्भात्सा वा अपश्यज्जनि-
तारमग्रे । तया रोहमायमुप मेध्यासस्तया देवा
देवतामग्र आयन् । शरभमारण्यमनु ते दिशामि
तेन चिन्वानस्तनुवो नि षीद (४) ।

(अग्ने मा हिꣳसीरग्ने मोष्ट्रमारण्यमनु शरभं नव च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
द्वितीयप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ चतुर्थाष्टके द्वितीयप्रपाठके दशमोऽनुवाकः) ।

[illegible]नुवाके स्वयमातृण्णाद्युपधानमुक्तम् । दशमे पशुशीर्षोपधाने वक्तव्ये । [illegible]स्य:— " आदित्यं गर्भमित्युत्तायां पुरस्ताच्चु(च्चि)बुकं प्राचीमनुक्षानं प्राङ्मुख [illegible]पय[illegible] " इति . पुरुषशिर इत्यनुवर्तते । पाठस्तु—

(पशुशीर्षोपधानाभिधानम्)

आदित्यं गर्भमिति । हेऽग्ने त्वं चीयमानः सन्नादित्यं गर्भमदितिदेवतायाः संबन्धि तत्कार्यरूपं गर्भसदृशमिदं पुरुषशीर्षं परिवृङ्ग्धि परितो वर्जितं कुरु । हरसा तेजसा त्वदीयज्वालारूपेण माऽभिवृक्षोऽभिमर्शनं स्पर्शं मा कुरु । ज्वालया सर्वं दहन्नप्येतत्पुरुषशीर्षं मा दहेत्यर्थः । अनेन दाहाभावेन तं गर्भं यजमानं वा शतायुषं कृणुहि कुरु । कीदृशं गर्भं, सहस्रस्य प्रतिमां पशुसहस्रेण तुल्यं सदृशम् । अत एव ब्राह्मणेऽभिहितम्—" सहस्रं वै प्रति पुरुषः पशूनां यच्छति सहस्रमन्ये पशवो मध्ये पुरुषशीर्षमुप दधाति सवीर्यत्वाय " इति ।

कल्पः—" पशुशीर्षाण्युपदधाति यं कामयेतापशुः स्यादिति विषूचीनानि तस्येत्युक्तं बास्तस्य प्राजिमिति पुरस्तात्प्रतीचीनमश्वस्याजस्रमिन्द्रमिति पश्चात्प्राचीनमृषभस्य बरूत्रिं त्वष्टुरिति दक्षिणत उदीचीनं वृष्णेर्यो अग्निरग्नेरित्युत्तरतो दक्षिणं बस्तस्य तान्यव्यवायेनोत्सर्गैरुपतिष्ठत इमं मा हिꣳसीर्द्विपादमिति पुरुषस्येमं मा हिꣳसीरेकशफमित्यश्वस्येमꣳ समुद्रमित्यृषभस्येमामूर्णायुमिति वृष्णेरजा ह्यग्नेरिति बस्तस्य " इति ।

तत्तन्मूर्धोपधानमन्त्रेभ्योऽनन्तरमेवाऽऽम्नातास्तत्तदुपस्थानमन्त्रा अनु ते दिशामीत्युत्सर्गलिङ्गत्वादुत्सर्गा इत्युच्यन्ते । तैस्तैर्मन्त्रैस्तत्तच्छिरस उपस्थानं कुर्यात् । तत्र पुरुषशीर्षस्योपस्थानमन्त्रमाह—

इमं मा हिꣳसीरिति । हे सहस्राक्ष सहस्रसंख्याकज्वालारूपचक्षुर्युक्त (* हे मेध यज्ञनिष्पादक,) आचीयमानः सर्वतः पशुमूर्धभिरुपचयं प्राप्नुवानः पशूनां ग्राम्याणामारण्यानां च मध्य इमं पुरुषमूर्धरूपं द्विपादं ग्राम्यपशुं मा हिंसीर्दाहरूपां हिंसां मा कार्षीः । यदि तव भक्षणापेक्षा तर्हि ते तव भक्षणायेममारण्यं मयुं कृष्णमृगमनुदिशामि पुरुषशीर्षस्थाने त्वद्भक्ष्यत्वेनोद्दिशामि । तेन मयुभक्षणेन ज्वालारूपास्तनुवस्त्वदीयतनूश्चिन्वानः पोषयन्निह निषीद ।

अथाश्वशिरस उपधानमन्त्रमाह—

वातस्य ध्राजिमिति । हेऽग्नेऽश्वं मा हिंसीर्ज्वालया मा दह । विविधरोगेभ्यो रक्षणमदाहः । सहस्रमश्वस्य रोगाः सन्ति तेभ्यः सर्वेभ्यः पालनमित्यर्थः ।

---

* धनुश्चिह्नान्तर्गतमन्यस्थस्थाने ' मेधे यज्ञ ' इति भवितुं युक्तम् ।

---

१ क. ख. ङ. °क्षिणा व° । २ क. ख. °मान्तु । ३ क. ख. °शिर्षा° ।

(पशुशीर्षोपधानाभिधानम्)

तच्च परममुत्कृष्टं, रक्षितस्याध्वर्यु पुनरुपद्रवकथा यथा न जायते तथा रक्षणं रक्षणस्य परमत्वं, तादृशे परमे व्योमन्नेनमधं स्थापयेति शेषः। कीदृशमधं, वातस्य ध्राजिं वायोर्गतिस्वरूपं वायुवच्छीघ्रगतिमित्यर्थः। वरुणस्य नाभिम्, अपामधिपतेर्वरुणस्य नाभिस्थानीयं, यथा स्वोदरमध्यवर्तिनी नाभिर्वस्त्रावरणादिना पाल्यते तद्वदत्यन्तप्रियत्वाद्वरुणेन पालनीयमित्यर्थः। अत एव प्रियत्वमभिप्रेत्य " प्रजापतिर्वरुणायाश्वमनयत् " इत्याम्नायते। अश्वमेधकाण्डेऽपि " वारुणो वा अश्वः " इत्याम्नातम्। सरिरस्य मध्ये जज्ञानं, समुद्रजलस्य मध्ये वडवारूपेणोत्पन्नम्। अत एवाप्सुयोनिर्वा अश्व इत्यन्यत्र श्रुतम्। नदीनां शिशुम्। यदा नदीनां पतिः समुद्रः पूर्वोक्तन्यायेन पिता तदा नदीनां मातृत्वादश्वं तच्छिशुः। हरिमुपर्यारूढस्य पुरुषस्य हर्तारं नेतारम्। अद्रिबुध्नं मार्गमध्ये पुरैर्पूर्णीकृता येऽद्रयः क्षुद्रपाषाणास्तैर्बुध्नं, तादृशान्पाषाणान्दृष्ट्वा मार्गेऽस्मिन्नश्वो गत इति बोद्धुं शक्यते। अथाश्वशिरस उपस्थानमन्त्रमाह—

इमं मा हिꣳसीरिति। पशूनां चतुष्पदां मध्य एकशफमिममश्वं मा हिंसीः। कीदृशमश्वं, कनिक्रदं हेषाशब्दरूपेणात्यन्तक्रन्दनेनोपेतं, वाजिनेषु वाजिनं शीघ्रगतियुक्तेषु प्राणिष्वत्यन्तशीघ्रगतियुक्तम्। गौरः सिंहः। शेषं पूर्ववत्।

अथ ऋषभशिरस उपधानमन्त्रमाह—

अजस्रमिन्दुमिति। पूर्वेषां महर्षीणां चित्तिर्बुद्धिस्तत्र पूज्यत्वेन वर्तमानमिति शेषः। तैर्ध्येयमेतमग्निं नमोभिर्नमस्कारैर्युक्तोऽहमीडे स्तौमि। कीदृशमग्निम्। अजस्रमिन्दुं निरन्तरं परमैश्वर्योपेतम्। अरुःशब्दो मर्मवाची। अरुषं मर्मसंघातं भुरण्युं भरन्तं पालयन्तम्। यथा यजमानस्य मर्माणि वैरिणो नोद्घाटयन्ति तथा कुर्वन्तमित्यर्थः। सोऽग्निरादित्यरूपेण स्थित्वा पर्वभिरमावास्यादिभिस्तिथिभिर्ऋतुशस्तस्मिंस्तस्मिन्नृतौ कल्पमानः कर्माणि संपादयन्वर्तते। तादृशं हेऽग्ने गामृषभमूर्णानमेतं मा हिंसीः। कीदृशं गाम्, अदितिमखण्डनीयं विराजं विशेषेण राजमानम्। अथर्षभशिरस उपस्थानमन्त्रमाह—

इमꣳ समुद्रमिति। हेऽग्ने जनाय यजमानार्थमिमं गामृषभमूर्णानं मा हिंसीः, किंतु परमे व्योमन्नुत्तमे विविधरक्षणे स्थितं कुरु। कीदृशम्, इमं समुद्रं

---

१ ब. ङ. °द्रवः कदा न। २ ख. °र्थः। तथा व°। ३ ख. यथा। ४ ख. तथा। ५ ब. ङ. °त्र व°। ६ ब. ङ. °र्मणा°। ७ ख. च. °न्तं पोषय°।

सम्यग्गुप्तं, शतधारं स्वजातीयधेनुद्वारा शतसंख्याकक्षीरोपेतम् । अत एवोत्सं जलप्रवाहसदृशं, भुवनस्य मध्ये व्यच्यमानं विद्यमानं सेव्यमानं वा, घृतं दुहानां स्वजातीयधेनुक्षीरादिद्वारा घृतदोहनयुक्तम्, अदितिमखण्डनीयम् । गवयो गोसदृश आरण्यो मृगविशेषः । शेषं पूर्ववत् ।

अथ वृष्णिशिरस उपधानमन्त्रमाह—

वरूत्रिं त्वष्टुरिति । हेऽग्नेऽविं वृष्णिशिरो मा हिंसीः । कीदृशीमविं, त्वष्टुर्वरूत्रिं रूपाणां निर्माता यस्त्वष्टा तस्यानुग्रहाद्वरणीयरूपयुक्तां, वरुणस्य नाभिमनिष्टनिवारकस्याग्नेर्नाभिस्थानीयां, परस्माद्रजसो जज्ञानामुत्कृष्टाज्जगद्रक्षनात्प्रजापत्युरस उत्पन्नाम् । सप्तमकाण्ड उरसो बाहुभ्यामित्यादिवाक्येऽविः पशूनामिति श्रुतम् । महीं महतीं साहस्रीं सहस्रमूल्यामसुरस्य मायां सुवर्भानोरसुरस्य संबन्धित्वेन निर्मिताम् । अत एव द्वितीयकाण्डे सुवर्भानुरित्यादिवाक्येनाभिहिता । वृष्णिशिरस उपस्थानमन्त्रमाह—

इमामूर्णायुमिति । हेऽग्न इमामूर्णायुमविं वृष्णिशिरोरूपां मा हिंसीः । कीदृशीं, वरुणस्य मायामनिष्टनिवारकस्याग्नेः संबन्धित्वेन निर्मितां, द्विपदां मनुष्याणां चतुष्पदां गवादीनां च त्वचं त्वक्सदृशीम् । यथा त्वचा शरीरमावृतं तथा द्विपादो मनुष्याः शीतनिवारणायाविजन्येन कम्बलेनाऽऽच्छादिता भवन्ति । चतुष्पादोऽप्यश्वा बलीवर्दाश्च भारवाहने मार्दवाय पृष्ठे कम्बलेनाऽऽच्छादिता भवन्ति । तथा त्वष्टुः प्रजापतेः सकाशादुत्पद्यमानानां प्रजानां मध्ये प्रथमं जनित्रं प्रधानत्वेनोत्पन्नम् । प्राधान्यं च वीर्यवत्त्वात् । वीर्यवत्त्वं च बाहुजन्यानां सर्वेषामाम्नातं—" तस्मात्ते वीर्यावन्तो वीर्याद्धयसृज्यन्त" इति । त्वष्टुः प्रतिरूपः । अथ वस्तशिरस उपधानमन्त्रमाह—

यो अग्निरग्नेरिति । अत्र पञ्चम्यन्तोऽग्निशब्दोऽग्रणीत्वयोगेन प्रजापतिवाची । तस्य च सृष्टिसंकल्परूपं यत्तपस्तस्मात्तपसो योऽयमग्निर्व्यवहारहेतुर्जातः । तपोयुक्तादग्निर्जात इत्येतद्द्योतनब्राह्मणे समाम्नातम्—" तद्ध्योऽतप्यत । तस्मात्तेपानादग्निरजायत " इति । प्रजापतेस्तपसोऽधि जातो योऽग्निः पृथिव्याः परि भूमेरुपरि शोचाच्छोचति तपतीत्यर्थः । उत वा दिवस्परि अपि च स्वर्गस्योपरि

---

१ ख. च. °युक्ताम् । २ ख. च. °नीयाम् । ३ ख. च. °मरिष्टं° । ४ क. घ. ङ. °द्यात्वबोजकत्वाज्ज° । ५ घ. ङ. °क्ये साऽग्नि°

(पशुशीर्षोपधानाभिधानम्)

शोचति । किंच येन वस्तरूपेण विश्वकर्मा जगत्स्रष्टा प्रजापतिर्व्यानड्विविधाः प्रजाः पशून्व्याप्तवान् । वस्तस्य प्रजापशुसृष्टिसाधनत्वं काम्यपशुकाण्डे समाम्नातम्—"ततोऽजस्तूपरः समभवत्तꣳ स्वायै देवतायै आलभत ततो वै स प्रजाः पशूनसृजत " इति । हेऽग्ने तपसो योऽधिजातस्तथाविध तव हेडः कोपो येन वस्तेन विश्वकर्मा ससर्ज तं वस्तं परिवृणक्तु परिवर्जितं करोतु मा विनाशयत्वित्यर्थः । तस्यैव वस्तशिरस उपस्थानमन्त्रमाह—

अजा ह्यग्नेरिति । हि यस्मादियमजाऽग्नेर्गर्भादुदराद्जनिष्ट । अत एवाऽऽम्नातम्—" स आत्मनो वपामुदक्खिदत्तामग्नौ प्रागृह्णात्ततोऽजस्तूपरः समभवत् " इति । सैवाग्नेः प्रजापतेश्चोत्पन्ना जनितारं स्वोत्पादकं प्रजापतिमपश्यदुत्पत्त्यनन्तरमेव दृष्टवती । यस्मादेवमजा प्रशस्ता तस्मात्तयाऽजया मेध्यास्तो यागयोग्या यजमानारोहं स्वर्गमुपायन्सामर्थ्येनैव प्राप्ता विलम्बमन्तरेणैव प्राप्ता इत्यर्थः । किंचेदानीं वर्तमाना देवा अग्रे पूर्वस्मिञ्जन्मनि तयैवाजया कर्माण्यनुष्ठाय देवतामायन्देवत्वं प्राप्ताः। ईदृश(शोऽ)स्य वस्तशिरसो महिमेति तात्पर्यार्थः। शरभः सिंहधाती क्रूरमृगः । उक्तैर्मन्त्रैः साध्यं शीर्षोपधानं विधत्ते—

" पशुशीर्षाण्युप दधाति पशवो वै पशुशीर्षाणि पशूनेवाव रुन्धे " [सं० का० ५ प्र० २ अ० ९] इति ।

अन्वयव्यतिरेकाभ्यां पशुशीर्षाणां पुरुषशीर्षाभिमुख्यं विधत्ते—

" यं कामयेतांपशुः स्यादिति विषूचीनानि तस्योप दध्याद्विषूच एवास्मात्पशून्दधात्यपशुरेव भवति यं कामयेत पशुमान्स्यादिति समीचीनानि तस्योप दध्यात्समीच एवास्मै पशून्दधाति पशुमानेव भवति " [सं० का० ५ प्र० २ अ० ९] इति ।

विषूचीनानि बहुमुखानि पुरुषशिरः प्रति विमुखानीत्यर्थः । सोऽयं व्यतिरेकः । समीचीनानि पुरुषशिरः प्रत्यभिमुखानीत्यर्थः । सोऽयमन्वयः ।

सामान्येन विहितं पुनर्विशेषाकारेण विधत्ते—

" पुरस्तात्प्रतीचीनमश्वस्योप दधाति पश्चात्प्राचीनमृषभस्यापशवो वा अन्ये गोअश्वेभ्यः पशवो गोअश्वानेवास्मै समीचो दधाति " [सं० का० ५ प्र० २ अ० ९] इति ।

(पशुशीर्षोपधानाभिधानम्)

अश्वशिरः पूर्वस्यां दिशि प्रत्यङ्मुख उपदध्यात् । ऋषभशिरः प्रतीच्यां दिशि प्राङ्मुख उपदध्यात् । गोभ्योऽश्वेभ्यश्च येऽन्ये पशवस्ते जातितः पशुत्वेऽप्यप्रशस्तत्वादपशव एव । तस्मात्प्रशस्तयोर्गवाश्वशिरसोराभिमुख्योपधानेन यजमानार्थं सर्वान्पशूनभिमुखानेव करोति ।

अथोपस्थानमन्त्रेष्वारण्यानामनुदेशनस्य तात्पर्यं दर्शयति—

"एतावन्तो वै पशवो द्विपादश्च चतुष्पादश्च तान्वा एतदग्नौ प्र दधाति यत्पशुशीर्षाण्युपदधात्यमुमारण्यमनु ते दिशामीत्याह ग्राम्येभ्य एव पशुभ्य आरण्यान्पशून्छुचमनूत्सृजति तस्मात्समावत्पशूनां प्रजायमानानामारण्याः पशवः कनीयाꣳसः शुचा सृताः" [सं० का० ५ प्र० २ अ० ९] इति ।

ये द्विपादो मनुष्यादयो येऽपि गवादयश्चतुष्पादा एतावन्त एव लोके विद्यमानाः पशवः । एवं सति पुरुषशीर्षस्य पशुशीर्षाणां चोपधानेन तान्सर्वानग्नौ प्रक्षिपति । अतस्तत्परिहारायाऽऽरण्यपशूनामनुदेशनम् । तेन चानुदेशनेन ग्राम्येभ्यः पशुभ्योऽपहृत्याऽऽरण्यान्पशून्प्रति शुचं वह्नितापं प्रेरयति । हि यस्माच्छुचा वह्नितापेनाऽऽरण्याः पशव ऋताः प्राप्तास्तस्माद्ग्राम्यैः पशुभिरुत्पत्तिसाम्येऽपि ते कनीयांसो मूल्यानर्हाः ।

यदुक्तं सूत्रकारेण—" नमो अस्तु सर्पेभ्य इति दक्षिणेऽꣳसे सर्पशिर उप दध्याद्विषूचीनं पशुशीर्षैरपि वा यजुरेव वदेन्नोपदध्यात् " इति । तत्रोपधानं विधत्ते—" सर्पशीर्षमुप दधाति यैव सर्पे त्विषिस्तामेवाव रुन्धे" [सं० का० ५ प्र० २ अ० ९] इति । त्विषिर्दीप्तिः । मन्त्रपाठमात्रं विधत्ते—

" यत्समीचीनं पशुशीर्षैरुपदध्याद्ग्राम्यान्पशून्दृश्युकाः स्युर्यद्विषूचीनमारण्यान्यजुरेव वदेदेव तां त्विषिꣳ रुन्धे या सर्पे न ग्राम्यान्पशून्हिनस्ति नाऽऽरण्यान् " [सं० का० ५ प्र० २ अ० ९] इति ।

सर्पशीर्षस्य संमुखत्वे विमुखत्वे च भावसद्भावात्प्रकारान्तरासंभवाच्च तदुपधानं परित्यज्य मन्त्रमेव पठेत् । तदा मन्त्रपाठेन सर्पत्विषिरपि प्राप्यते । संमुखविमुखत्वयोरभावाद्दोषद्वयमपि नास्ति ।

तमिमं केवलमन्त्रपक्षमुपेक्ष्योपधानपक्षस्यैव प्राप्तिप्रतिप्रसवं विधत्ते—

" अथो खल्वुपधेयमेव यदुपदधाति तेन तां त्विषिमेव रुन्धे या सर्पे यद्यजुर्वदति तेन शान्तम् " [सं० का० ५ प्र० २ अ० ९] इति ।

---

१ ख. घ. °न्तरसं° ।

(पशुशीर्षोपधानाभिधानम्)

सर्प या त्विषिस्तामुपधानेन लभते। मन्त्रपाठेन सर्पशिरसः शान्तत्वाद्दंशनमपि न भवति। अत्र विनियोगसंग्रहः—

आघ्न्यायां शिरो धत्त इमामित्युपतिष्ठते।
वाताश्वस्य शिरः प्राच्यां दध्यादिमं जपेत्तथा॥
अर्जुषभशिरः पश्चादिमामित्येनुमन्त्रणम्।
वरू दक्षिणतो वृष्णिशिरस्तन्मन्त्रणं त्विमाम्॥
य उदीच्यां बस्तशिरस्तन्मन्त्रणमजेत्यतः।
दशमे त्वनुवाकेऽस्मिन्दश मन्त्रा उदीरिताः॥

अत्र मीमांसा।

प्रथमाध्यायस्य चतुर्थपादे षोडशाधिकरणे चिन्तितम्—

पशवोऽन्ये गवाश्वेभ्योऽपशवो वा इति श्रुतम्।
अजादिष्वपशुत्वं यद्गुणवादोऽथवा स्तुतिः॥
स्तुत्यभावाद्गुणस्तेषु पशुकार्यनिषेधनम्।
अशक्यत्वान्निषेधस्य घटाद्यर्थाभिधायिना॥
पशवोऽपशुशब्देन प्राशस्त्याभावसाम्यतः।
लक्ष्यास्तत्र निमित्तं तु प्रशंसैव गवाश्वयोः॥

इदमाम्नायते—"अपशवो वा अन्ये गोअश्वेभ्यः पशवः" इति। अत्राजादिषु श्रूयमाणं यदपशुत्वं तस्यार्थवादत्वं न संभवति। पशुत्वमात्रनिषेधेन स्तुतेरप्रतीयमानात्। ततः पशुकार्यनिषेधरूपो गुणोऽभिधीयत इति चेत्। मैवम्। अजादिषु विधिवैयर्थ्यप्रसङ्गेन निषेद्धुमशक्यत्वात्। अपशुशब्दः पशुव्यतिरिक्तं घटादिपदार्थमभिदधाति। तस्मिन्घटादौ गवाश्ववत्प्राशस्त्यं नास्ति। सोऽयं प्राशस्त्याभावोऽजादिषु पशुष्वस्तीत्यनादिप्रायेण प्रवाहेण एव सन्तोऽप्यजादयो घटादिसाम्यादपशुशब्देन लक्ष्यन्ते। पूर्वत्र यजमानार्थसिद्धिरग्नेये मुखजत्वमादित्यवत्तेजस्वित्वं च यजमानादिशब्दानां प्रस्तरार्थेषु प्रवृत्तिनिमित्तम्। तत्प्रवृत्तिफलं प्रस्तरादिप्रशंसा। इह त्वपशुशब्दस्याजादिषु प्रवृत्तौ गवाश्वयोः प्रशंसैव निमित्तं फलं च। द्विप्रकारा हि प्रशंसा—वस्तुनि विद्यमानगुणोत्कर्ष एकः प्रकारः, स्तावकेन शब्देन संपादितो गुणोत्कर्षोऽपरः प्रकारः। गवाश्वयोरजा-

१ ख. घ. "त्वामिम"।

दिभ्य उत्कर्षो लोकसिद्धो यः सोऽत्र निमित्तम् । अजादयः स्वभावतः पशवो ऽपि तन्तो गवाश्वौ प्रत्यपशवः संपन्नाः । ईदृशो गवाश्वयोर्महिमेति स्तुतिः फलम् । तस्मात् " अपशवो वा अन्ये " इत्ययमर्थवादः । अयमेव न्याय उदाहरणान्तरे योजनीयः । "अयज्ञो वा एष योऽसामा" इत्येकमुदाहरणम् । " अस्रत्रं वा एतद्यद्च्छन्दोमम् " इत्यपरमुदाहरणम् । अग्निहोत्रदर्शपूर्णमासा-दिर्यज्ञोऽपि सामहीनत्वादयज्ञो भवति । ईदृशः साम्नो महिमा । छन्दोमशब्देन चतुर्विंशश्चतुश्चत्वारिंशोऽष्टाचत्वारिंश इत्येते त्रयः स्तोमा उच्यन्ते । अक्षरसं-ख्यासाम्येन गायत्रीत्रिष्टुब्जगतीछन्दोभिर्मीयमानत्वात् । तेषां च विष्टुतिः सामन्नासणे द्रष्टव्या । अतः सत्रमपि चतुर्दशरात्रादिकं छन्दोमरहितत्वादसत्रं भवति । ईदृशश्छन्दोमानां महिमेत्येवं स्तावकत्वादर्थवादत्वम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे द्वितीयप्रपाठके
दशमोऽनुवाकः ॥ १० ॥

(अथ चतुर्थाष्टके द्वितीयप्रपाठक एकादशोऽनुवाकः) ।

इन्द्राग्नी रोचना दिवः परि वाजेषु भूषथः ।
तद्वां चेति प्र वीर्यम् । अर्थदृत्रमुत सनोति
वाजमिन्द्रा यो अग्नी सहुरी सपर्यात् । इर-
ज्यन्ता वसव्यस्य भूरेः सहस्तमा सहसा वाज-
यन्ता । प्र चर्षणिभ्यः पृतना हवेषु प्र
पृथिव्या रिरिचाथे दिवश्च । प्र सिन्धुभ्यः प्र
गिरिभ्यो महित्वा प्रेन्द्राग्नी विश्वा भुवनाऽ-
त्यन्या मरुतो यस्य हि (१) क्षये पाथा
दिवो विमहसः । स सुगोपातमो जनः ।
यस्येमा यज्ञवाहसो विप्रस्य वा मतीनाम् ।

१ क. ख. ग. घ. वा ।

(याज्यानुवाक्याभिधानम्)

मरुतः शृणुता हवम् । श्रियसे कं भानुभिः सं मिमिक्षिरे ते रश्मिभिस्त ऋक्वभिः सुखादयः। ते वाशीमन्त इष्मिणो अभीरवो विद्रे प्रियस्य मारुतस्य धाम्नः । अवं ते हेड उदुत्तमम् । कया नश्चित्र आ भुवदूती सदावृधः सखा । कया शचिष्ठया वृता (२)। को अद्य युङ्क्ते धुरि गा ऋतस्य शिमीवतो भामिनो दुर्हणायून् । आसन्निषून्हृत्स्वसो मयोभून्य एषां भृत्यामृणधत्स जीवातू । अग्ने नयाऽऽ देवानाꣳ शं नो भवन्तु वाजेवाजे। अप्स्वग्ने सधिष्टव सौषधीरनु रुध्यसे । गर्भे सञ्जायसे पुनः । वृषा सोम द्युमाꣳ असि वृषा देव वृषव्रतः । वृषा धर्माणि दधिषे । इमं मे वरुण तत्त्वा यामि त्वं नो अग्ने स त्वं नो अग्ने (३) ॥

(हि वृता म एकादश च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके द्वितीयप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

विष्णोर्दिवस्पर्यन्नपेतेऽपेतं सर्मितं मा माता मा नोऽभ्यस्थाद्भुवाऽऽतिं धरुणाऽऽदित्यं गर्भमिन्द्राग्नी रोचनैकादश ॥ ११ ॥

विष्णोरस्मिन्हव्येति त्वाऽहं धीतिभिर्होत्रा अष्टाचत्वारिꣳशत् ॥ ४८ ॥

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके द्वितीयः प्रपाठकः ॥ २ ॥

(अथ चतुर्थकाण्डे द्वितीयप्रपाठक एकादशोऽनुवाकः)।

दशमेऽनुवाके पशुशिरसामुपधानमुक्तम् । अथैकादशे याज्यानुवाक्या उच्यन्ते ।

चातुर्मास्येषु वरुणप्रघासाख्यं यद्द्वितीयं पर्व तस्मिन्हवींषि चत्वार्याम्नातानि- " ऐन्द्राग्नमेकादशकपालं मारुतीमामिक्षां वारुणीमामिक्षां कायमेककपालम् " इति । तत्रैन्द्राग्नस्य पुरोनुवाक्यामाह--

इन्द्राग्नी रोचनेति । दिवो द्युलोकस्य रोचना भासकौ हे इन्द्राग्नी वाजेषु हविर्लक्षणेष्वन्नेषु परिभूषथः परितः प्राप्नुतो भागमिति शेषः । तत्तस्मात्कारणाद्वां युवयोर्वीर्यं सामर्थ्यं प्रचेति प्रकर्षेणाज्ञायि लोके सर्वैर्ज्ञातमित्यर्थः ।

तत्रैव याज्यामाह-

अथद्वृत्रमुतेति । यो यजमान इन्द्राग्नी सपर्यात्परिचरति । कीदृशाविन्द्राग्नी, सहुरी समानाह्वानौ । स यजमानो वृत्रं वैरिणं अथद्विनाशयति । उतापि च वाजमन्नं ततोति सर्वेभ्यः प्रयच्छति । पुनरपि भूरेर्बहुलस्य वसव्यस्येश्वर्यस्येशन्ता, ईश्वरत्वं प्राप्नुवन्तौ, सहसा स्वकीयेन बलेन राहस्तमाऽतिशयेन सोढारौ परबलस्याभिभवितारावित्यर्थः । वाजयन्ता वाजमन्नमात्मन इच्छन्तौ ।

तत्रैव विकल्पितां याज्यामाह-

प्र चर्षणिभ्य इति । हे इन्द्राग्नी पृतना संग्रामेषु हवेषु हविःस्वीकारार्थेष्वाह्वानेषु च चर्षणिभ्यो मनुष्येभ्यः प्ररिरिचाथे प्ररिक्तावतिरिक्तौ भवथः । सर्वानपि मनुष्यानतिरिच्य वर्तेथे इत्यर्थः । तथा पृथिव्या दिवश्च प्ररिरिचाथे तदुभयमतिरिच्य वर्तेथे । तथा सिन्धुभ्यः प्ररिरिचाथे । तथा गिरिभ्यः पर्वतेभ्यः प्ररिरिचाथे । किं बहुना, अत्यन्याऽत्यन्तमितराणि विश्वा भुवना सर्वाणि भुवनानि महित्वा स्वकीयेन माहिम्ना युवां प्ररिरिचाथे अतिरिच्य वर्तेथे ।

अथ मारुत्या आमिक्षायाः पुरोनुवाक्यामाह--

मरुतो यस्य हीति । हे मरुतो दिवो द्युलोकादागता यूयं यस्य यजमानस्य क्षये गृहे पाथ रक्षां कुरुथ । कीदृशा मरुतः, विपहसो विशिष्टं महस्तेजो येषां ते विमहसः । स जनस्तादृशो यजमानः सुगोपातमोऽतिशयेन रक्षको भवतु । तत्रैव विकल्पितामन्यां पुरोनुवाक्यामाह-

---

१ क. ख. ङ. च. भवति । २ क. च. °नुवा° ।

(याज्यानुवाक्याभिधानम्)

यज्ञैर्वा यज्ञेति । यज्ञवाहसो यज्ञस्य वोढारो हे मरुतो यज्ञैर्वा निमित्तभूतैरिदं मदीयमाह्वानं शृणुत । अथवा विप्रस्य यजमानस्य मतीनां चित्तवृत्तीनामनुग्रहाय मदीयमाह्वानं शृणुत । तत्रैव याज्यामाह—

श्रियसे कं भानुभिरिति । हे (ते) मरुतः पुरोवातरूपाः सन्तः कं श्रियसे श्रयितुं भानुभिर्भासकैः रश्मिभिः सूर्यरश्मिभिः सहिताः संमिश्रिते मेघवृष्ट्या भूमिं सम्यक्सेक्तुमिच्छन्ति । ते मरुत ऋक्वभिर्याज्यापुरोनुवाक्यारूपाभिर्ऋग्भिः स्तुताः सन्तः सुखादयः शोभनं हविः खादितवन्तः । ततस्ते मरुतो वाजीमन्त उत्साहजनितघोषरूपबहुविधशब्दवन्तः, इष्पिणः स्वगृहान्प्रति गमनवन्तः, अभीरवः स्वकार्यस्य निष्पन्नत्वेन विघ्नकारिभ्योऽसुरेभ्यो भयरहिताः, प्रियस्य मारुतस्य धाम्नो मरुतां संबन्धि यत्प्रियं स्थानं तद्दिवे लब्धवन्तः ।

अथ वारुणीमामिक्षामित्येतस्य याज्यानुवाक्ययोः प्रतीके दर्शयति—

अव ते हेड इति । अव ते हेड इति पुरोनुवाक्या । उदुत्तममिति याज्या । एतच्चोभयं वैश्वानरो न ऊत्येत्यस्मिन्ननुवाके व्याख्यातम् ।

अथ कायमेककपालमित्यस्य पुरोनुवाक्यामाह—

कया नश्चित्र इति । कस्य प्रजापतेः संबन्धिनीत्यस्मिन्नर्थे स्त्रीलिङ्गः केतिशब्दो वर्तते । ऊतिशब्दो रक्षणवाची । कयोत्या प्रजापतिसंबन्धिना रक्षणेन चित्र आभुवद्विचित्रोऽयं यज्ञो नोऽस्मान्प्रत्यागतः । कीदृशो यज्ञः, सदावृधः सर्वदा वर्धमानः, सखा सखिवत्प्रियतमः । स च यज्ञः कया प्रजापतिसंबन्धिन्या शचिष्ठयाऽतिशयितया शक्त्या वृता युक्त इत्यर्थः । तत्रैव याज्यामाह—

को अद्य युङ्क्त इति । कः प्रजापतिरद्यास्मिन्दिने क्रतस्य धुरि यज्ञस्याग्रभागे यज्ञप्रवृत्तिवेलायामित्यर्थः । गा वाग्विशेषानस्मदीयस्तुतिरूपान्युङ्क्ते स्वचित्ते योजयति । कीदृशान्वाग्विशेषान्, शिमीवतः[1] कर्मयुक्तानेतत्कर्मयोग्यानित्यर्थः । भामिनः स्वार्थावभासकान् । दुर्हणायून्दुःखहरणशीलान् । आसन्निषूनस्मदीयमास्यं मुखमिष्यन्ति गच्छन्तीत्यासन्निषवस्तान् । हरस्वसो हरसु स्तुत्यानां हृदयेषु सन्ति तिष्ठन्तीति हरस्वसस्तान्हृदयंगमानतिप्रियानित्यर्थः । मयोभून्सुखस्य भावयितॄन् । यो यजमान एषां वाग्विशेषाणां भृत्यां भरणक्रियामृणधद्धर्षयति पुनः पुनः स्तौतीत्यर्थः । स यजमानो जीवाच्चिरं जीवति ।

अथ स्विष्टकृतो याज्यानुवाक्ययोः प्रतीके दर्शयति—

---

१ ख. च. °हप्रयुक्तघो°. २ ख. च. °गामित°। ३ ख. घ. ङ. च. °ज्ञस्य भारे य°। ४ ख. घ. ङ. च. °तः शर्म। ५ क. घ. ङ. °कृतः संयाज्ययोः।

(आज्यानुवाक्याभिधानम्)

अग्ने नयेति। अग्ने नय सुपथेति पुरोनुवाक्या। आ देवानामपि पन्थामिति याज्या। तच्चोभयमुभा वामिन्द्राग्नी इत्यनुवाके व्याख्यातम्।

अथाऽऽमिक्षानिष्पादिनो वाजिनहविषो याज्यानुवाक्ययोः प्रतीके दर्शयति—

शं नो भवन्त्विति। शं नो भवन्तु वाजिनो हवेष्विति पुरोनुवाक्या। वाजेवाजेऽवत वाजिन इति याज्या। एतच्चोभयं देवस्याहꣳ सवितुरित्यनुवाके व्याख्यातम्। अथावभृथे प्रथमाज्यभागस्य पुरोनुवाक्यामाह—

अप्स्वग्ने सधिष्टवेति। हेऽग्ने ते तव साधिः सहो बलमप्सु वर्तते। स त्वमोषधीरनुरुध्यसे व्रीहियवाद्योषधीरनुसरसि। जाठराग्निरूपेण तत्स्वीकारात्। अरण्योर्गर्भे स्थितः सन्पुनः पुनर्जायसे। अथ द्वितीयाज्यभागस्य पुरोनुवाक्यामाह—

वृषा सोम द्युमामिति। हे सोम त्वं वृषा कामानां वर्षयितासि। द्युमान्दीप्तिमांश्चासि। हे देव यस्मात्त्वं वृषा वर्षयिता तस्मात्त्वं वृषव्रतो वर्षणनिमित्तं व्रतं कर्म यस्य स वृषव्रतः। किंच यस्मात्त्वं वृषा वर्षयिता तस्माद्वर्माणि पुण्यानि दधिषे। हे सोम त्वं वृषा धारयितासि।

अथ वारुणस्य याज्यानुवाक्ययोः प्रतीके दर्शयति—

इमं मे वरुणेति। इमं मे वरुण श्रुधीति पुरोनुवाक्या। तत्त्वा यामि ब्रह्मणा वन्दमान इति याज्या। एतच्चोभयमिन्द्रं वो विश्वतस्परीन्द्रं नर इत्यनुवाके व्याख्यातम्। अथाग्निवारुणास्विष्टकृतः संयाज्ययोः प्रतीके दर्शयति—

त्वं नो अग्न इति। त्वं नो अग्ने वरुणस्येति पुरोनुवाक्या। स त्वं नो अग्नेऽवमो भवोतीति याज्या। एतच्चोभयमायुष्ट आयुर्दा अग्न इत्यस्मिन्ननुवाके व्याख्यातम्। अत्र विनियोगसंग्रहः—

वारुणाख्यप्रघासेषु याज्या अन्त्यानुवाकगाः।
इन्द्राग्नी तिस्र ऐन्द्राग्ने मारुते तु मरुत्वतीयम्॥
अबोदु वारुणे यागे कया को कायनागके।
अग्न आ देव(वा)संयाज्ये शं नो वाजे तु वाजिने॥
अप्सुद्वयं चावभृथेऽनुवाक्ये आज्यभागयोः।

---

१ ब. ङ. °ता चुं।

(प्रथमचितिगतापस्याभिधानेष्टकाभिधानम्)

इमं तस्था प्रधानस्य प्रोक्ते त्वं स त्वमित्यमू ॥
तंयाज्ये इति मन्त्रास्तु विंशतिः समुदीरिताः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे द्वितीयप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवीरबुक्कमहाराजस्याऽऽज्ञापरिपालकेन माधवाचार्येण विरचिते वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे द्वितीयः प्रपाठकः ॥ २ ॥

अथ चतुर्थाष्टके तृतीयः प्रपाठकः ।

(तत्र प्रथमोऽनुवाकः) ।

हरिः ॐ ।

अपां त्वेमन्त्सादयाम्यपां त्वोर्मन्त्सादयाम्यपां त्वा भस्मन्त्सादयाम्यपां त्वा ज्योतिषि सादयाम्यपां त्वाऽयने सादयाम्यर्णवे सदने सीद समुद्रे सदने सीद सलिले सदने सीदापां क्षये सीदापाꣳ सधिषि सीदापां त्वा सदने सादयाम्यपां त्वा सधस्थे सादयाम्यपां त्वा पुरीषे सादयाम्यपां त्वा योनौ सादयाम्यपा त्वा पाथसि सादयामि गायत्री छन्दस्त्रिष्टुप्छन्दो जगती छन्दोऽनुष्टुप्छन्दः पङ्क्तिश्छन्दः (१) ॥

(योनौ पञ्चदश च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थकाण्डके तृतीय-
प्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

अथ चतुर्थकाण्डे तृतीयः प्रपाठकः ।

(तत्र प्रथमोऽनुवाकः) ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
प्रपाठके द्वितीये हि चितिक्षेत्रं निरूपितम् ।
भाष्यास्तृतीयके पञ्च चितयोऽत्र त्रयोदश ॥
अनुवाकास्त्रिभिर्ह्राभ्यां तथा द्वाभ्यां चतुष्टयम् ।
एकेन चितयो याज्या इत्यर्था अनुवाकगाः ॥

तत्र प्रथमेऽनुवाके प्रथमचितिगता अपस्याभिधाना इष्टका उच्यन्ते ।

कल्पः—"अपस्या उपदधात्यपां त्वेमन्त्सादयामीति पञ्च पुरस्तात्पती-चीरर्णवे सदने सीदेति पञ्च दक्षिणत उदीचीरपां त्वा सदने सादयामीति पञ्च पश्चात्पार्वीर्गायत्री छन्द इति पञ्चोत्तरतो दक्षिणा" इति ।

तत्र प्रथमपञ्चकमन्त्रानाह—

अपां त्वेमन्निति । हे इष्टके त्वा त्वामपामेमज्जलसंबन्धिनि प्रवाहादिगमन-प्रकारे सादयामि स्थापयामि । एवमुत्तरत्रापि योज्यम् । ओम्नवीचीतरङ्गादि-रूप उन्दने भस्मन्भासके शुक्लरूपे ज्योतिषि प्रकाशनैर्मल्य इत्यर्थः । अदने नदीकूपाद्याधारे । अथ द्वितीयेष्टकापञ्चकमन्त्रानाह—

अर्णवे सदने सीदेति । अर्णवशब्देन सादृश्यात्पौढतटाकाद्युपलक्ष्यते । तत्रापां सदनं, तस्मिन्स्थाने हे इष्टके सीदोपविश । समुद्रः प्रसिद्धः । सलिल-शब्देनानिर्धारितविशेषो जलमात्राधार उपलक्षितः । क्षीयन्ते शुष्यन्त्यापोऽत्रेति शुष्कतटाकादिः क्षयः । जलेन सह मेघे धीयते स्थाप्यत इति सधीर्वर्षोपलादिः । अथ तृतीयपञ्चकमन्त्रानाह—

---

१ ख. च. °न्धिप्र° । २ ख. च. उदके ।

(प्रथमचितिगतापस्याभिधानेष्टकाभिधानम्)

अपां त्वा सदन इति। हे इष्टके त्वामपां सदने नद्यादौ सादयामि। अद्भिः सह विद्युदिवो यत्र मेघे तिष्ठन्ति सोऽयं मेघः सधस्थः। पुरीषशब्देन नद्यादिगताः सिकता उच्यन्ते। योनिशब्देन जलकारणभूतोऽग्निरुच्यते। "अग्नेरापः" इति श्रुतेः। पीयते जलं जीमूतैरत्रेति पाथः समुद्रः। अथ चतुर्थपञ्चकमन्त्रानाह—

गायत्री छन्द इति। हे इष्टके त्वं गायत्र्याख्यच्छन्दोरूपाऽसि। एवमितरत्रापि। एतैर्मन्त्रैः साध्यमुपधानं विधत्ते—

"पशुर्वा एष यदग्नियोनिः खलु वा एषा पशोर्विक्रियते यत्प्राचीनमिष्टकाभ्यूजः क्रियते रेतोऽपस्या अपस्या उप दधाति योनावेव रेतो दधाति" [सं० का० ५ प्र० २ अ० १०] इति।

योऽयमग्निः स एष पशुप्राप्तिहेतुत्वात्पशुरेव। इष्टकोपधानात्पूर्वं यदङ्गजातमनुष्ठीयते तेन पशोरेषा योनिरेवं विकृता भवति। यथा लोके क्रतुकाले विकृता योनौ रेतोधारणमपेक्षते तद्वदित्यर्थः। अभिलक्ष्यतैर्मन्त्रैरुपधेया इष्टका अपस्याः। ताश्च रेतःस्थानीयाः। अनस्ता उपदध्यात्। तदुपधानेन योनावेव रेतो धारितं भवति। सामान्येन विहितं विशेषाकारेण पुनर्विधत्ते—

"पञ्चोप दधाति पाङ्क्ताः पशवः पशूनेवास्मै प्र जनयति" [सं० का० ५ प्र० २ अ० १०] इति।

अथ पुरस्तादित्यध्याहर्तव्यम्। पूर्वस्यां दिशि पञ्चेष्टका उपदध्यात्। सपुच्छैः पादैः पञ्चभिर्योगात्पशवः पाङ्क्ताः।

अथ द्वितीयपञ्चकस्य देशं विधत्ते—

"पञ्च दक्षिणतो वज्रो वा अपस्या वज्रेणैव यजमानस्य दक्षिणतो रक्षाꣳस्यप हन्ति" [सं० का० ५ प्र० २ अ० १०] इति।

वज्रवद्वैरिनिवारणसमर्थत्वादपस्यानां वज्रत्वम्।

अथ तृतीयपञ्चकस्य देशं विधत्ते—

"पञ्च पश्चात्प्राचीरुप दधाति पश्चाद्वै प्राचीनꣳरेतो धीयते पश्चादेवास्मै प्राचीनꣳरेतो दधाति" [सं० का० ५ प्र० २ अ० १०] इति।

प्राचीः प्राङ्मुखाः। लोके हि पश्चिमायां दिश्यवस्थितेन प्राङ्मुखेन पुरुषेण रेतः प्राचीनं संमुखमेव गर्भाशये स्थाप्यते। अतो यजमानार्थमपि तथा कृतं भवति। पूर्वपश्चिमयोरिष्टकाः सह प्रशंसति—

---

१ क. ग. ङ. रेवाधिं।

" पञ्च पुरस्तात्प्रतीचीरुप दधाति पञ्च पश्चात्प्राचीस्तस्मात्प्राचीनꣳ रेतो धीयते प्रतीचीः प्रजा जायन्ते " [सं० का० ५ प्र० २ अ० १०] इति ।

प्रतीचीः प्रत्यगपवर्गाः । प्राच्यां प्रथममाधाय ततः पश्चिमायां द्वितीयां ततोऽपि पश्चिमायां तृतीयेत्येषा रीतिः । प्राचीरित्यत्र तद्विपरीता रीतिः । लोकेऽपि पुरो योन्यभिमुखत्वेन रेतःस्थापनं, तद्विपर्ययेण प्रजननम् ।

चतुर्थपञ्चकस्य देशं विधत्ते--

" पञ्चोत्तरतश्छन्दस्याः पशवो वै छन्दस्याः पशूनेव प्रजातान्त्स्वमायतनमभि पर्यूहते " [सं० का० ५ प्र० २ अ० १०] इति ।

पूर्वोपधानेन प्रजातान्पशूननेनोपधानेन स्वस्थानं प्रापयति ।

देशविशेषान्विधाय समुदायाकारेण प्रशंसति--

" इयं वा अग्नेरतिदाहादबिभेत्सैता अपस्या अपश्यत्ता उपाधत्त ततो वा इमां नात्यदहद्यदपस्या उपदधात्यस्या अनतिदाहाय " [सं का० ५ प्र० २ अ० १०] इति । अपां शान्तत्वादपस्याभिरतिदाहस्य परिहारः ।

पुनः प्रकारान्तरेण प्रशंसति--

" उवाच हेयमददित्स ब्रह्मणाऽन्नं यस्यैता उपधीयास्यै य उ चैना एवं वेद " [सं० का० ५ प्र० २ अ० १०] इति ।

यस्य यजमानस्यैता अपस्या उपधीयन्ते, योऽपि विद्वानेता(ना) अपस्या उक्तप्रकारेण जानाति, स यजमानः स च वेदिता ब्रह्मणा मुख्यया वृत्त्याऽन्नमदादिदन्नमत्त्येवमिदं वाक्यमियं पृथिव्युवाच ह । तस्मादपस्याः प्रशस्ता इति तात्पर्यार्थः । अत्र विनियोगसंग्रहः--

अपामपस्या दिक्ष्वेता उपधेयास्तु विंशतिः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे तृतीयप्रपाठके
प्रथमोऽनुवाकः ॥ १ ॥

(अथ चतुर्थाष्टके तृतीयप्रपाठके द्वितीयोऽनुवाकः)।

अयं पुरो भुवस्तस्य प्राणो भौवायनो वसन्तः
प्रौवायनो गायत्री वासन्ती गायत्रियै गायत्रं

(प्राणभृदिष्टकाभिधानम्)

गायत्रादुपाꣳशुरुपाꣳशोस्त्रिवृत्त्रिवृतो रथंतरꣳ रथंतराद्वसिष्ठ ऋषिः प्रजापतिगृहीतया त्वया प्राणं गृह्णामि प्रजाभ्योऽयं दक्षिणा विश्वकर्मा तस्य मनो वैश्वकर्मणं ग्रीष्मो मानस-स्त्रिष्टुग्ग्रैष्मी त्रिष्टुभ ऐडमैडादन्तर्यामोऽन्तर्यामात्पञ्चदशः पञ्चदशाद्बृहद्बृहतो भरद्वाज ऋषिः प्रजापतिगृहीतया त्वया मनः (१) गृह्णामि प्रजाभ्योऽयं पश्चाद्विश्वव्यचास्तस्य चक्षुर्वैश्वव्यचसं वर्षाणि चाक्षुषाणि जगती वार्षी जगत्या ऋक्षममृक्षमाच्छुक्रः शुक्रात्सप्तदशः सप्तदशाद्वैरूपं वैरूपाद्विश्वामित्र ऋषिः प्रजापतिगृहीतया त्वया चक्षुर्गृह्णामि प्रजाभ्य इदमुत्तरात्सुवस्तस्य श्रोत्रꣳ सौवꣳ शरच्छौ-क्यनुष्टुप्छारद्यनुष्टुभः स्वारꣳ स्वाराम्ग्रन्थी मन्थिन एकविꣳश एकविꣳशाद्वैराजं वैराजा-ज्जमदग्निर्ऋषिः प्रजापतिगृहीतया (२) त्वया श्रोत्रं गृह्णामि प्रजाभ्य इयमुपरि मति-स्तस्यै वाङ्मासो हैमन्तो बार्ह्यायनः पङ्क्ति-र्हैमन्ती पङ्क्त्यै निधनवन्निधनवत आग्रयण आग्रयणात्रिणवत्रयस्त्रिꣳशौ त्रिणवत्रयस्त्रिꣳशा-भ्याꣳ शाक्ररैवते शाक्ररैवताभ्यां विश्वक-र्मर्षिः प्रजापतिगृहीतया त्वया वाचं गृह्णामि प्रजाभ्यः (३) ॥

(त्वया मनो जमदग्निर्ऋषिः प्रजापतिगृहीतया त्रिःशच्चं)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके तृतीयप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ चतुर्थकाण्डे तृतीयप्रपाठके द्वितीयोऽनुवाकः)।

प्रथमेऽनुवाकेऽपस्या उक्ताः। अथ द्वितीये प्राणभृत उच्यन्ते।

कल्पः—" अयं पुरो भुव इति पञ्चागतं प्राणभृतो दशदश प्रतिदिशमक्षणया दश मध्येऽन्तरा[मन्तरा]मुपधाय " इति।

तत्र पूर्वस्यां दिश्युपधेयानां दशेष्टकानां मन्त्रमाह—

अयं पुरो भुव इति। भवत्यस्माज्जगदिति भुवः। भुवःशब्दः प्रजापतिमाचष्टे। पुरः पूर्वस्यां दिशि अयं भुवो वर्तत इति शेषः। हे इष्टके तद्रूपाऽसीत्यभिप्रायः। एवमुत्तरेष्वपि वाक्येषु योज्यम्। तस्य भुवःशब्दाभिधेयस्य प्रजापतेः संबन्धी प्राणः। अत एवापत्यत्वमुपचर्य भौवायन इत्युच्यते। तस्य च प्राणस्य श्वासवृत्तिरूपस्यापत्यत्वेनोपचरितः प्राणायनो वसन्त ऋतुः। तस्य च वसन्तस्य संबन्धिनी वासन्ती गायत्री। तस्याश्छन्दोरूपाया गायत्र्याः संबन्धि गायत्रं साम। तस्माच्च गायत्रसाम्न उत्पन्न इवोपांशुग्रहः। तस्माच्चोपांशुग्रहादुत्पन्न इव त्रिवृत्स्तोमः। तस्माच्च त्रिवृत्स्तोमादुत्पन्नमिव रथंतरं साम। तस्माद्रथंतरसाम्न उत्पन्न इव वसिष्ठाख्य ऋषिः। हे इष्टके यथोक्तप्रकारेण प्रजापतिप्राणवसन्तादिरूपोपचारेण प्रजापतिगृहीतया त्वया प्रजाभ्यः सर्वासां प्रजानां प्राणं गृह्णामि प्रजानां प्राणसिद्धये त्वामुपदधामीत्यर्थः। यद्यप्ययमेकवाक्यत्वादेक एव मन्त्रस्तथाऽपि प्रतीष्टकमावृत्त्या दश मन्त्राः संपद्यन्ते।

अथ दक्षिणस्यां दिश्युपधेयानामिष्टकानां मन्त्रमाह—

अयं दक्षिणेति। विश्वानि कर्माणि जगद्व्यापाररूपाणि यस्यासौ विश्वकर्मा प्रजापतिः। दक्षिणा दक्षिणस्यां दिशि योऽयं विश्वकर्मा हे इष्टके तद्रूपा त्वमसि। प्राणवसन्तादिपरम्परेव मनोग्रीष्मादिपरम्परा व्याख्येया। ऐडमिति सामविशेषः।

अथ पश्चिमायां दिश्युपधेयानामिष्टकानां मन्त्रमाह—

अयं पश्चाद्विश्वेति। विश्वं सर्वं जगद्व्यचति व्याप्नोतीति विश्वव्यचाः प्रजापतिः। शेषं पूर्ववद्योजनीयम्। वर्षाणि वर्षर्तुः। कक्षमिति सामविशेषः।

(प्राणभृदिष्टकाभिधानम्)

अथोत्तरस्यां दिश्युपधेयानामिष्टकानां मन्त्रमाह—

इदमुत्तरादिति। सौति सर्वं जगत्प्रेरयतीति सुवःशब्दः प्रजापतिवाची। उत्तरस्यां दिशि यदिदं सुवः प्रजापतिशरीरं हे इष्टके त्वं तद्रूपाऽसीति योज्यम्। स्थारमिति सामविशेषः। शेषं पूर्ववद्योज्यम्।

अथ मध्यदेश उपधेयानामिष्टकानां मन्त्रमाह—

इयमुपरि मतिरिति। मन्यते कृत्स्नं जगज्जानातीति मतिः प्रजापतिः। ऊर्ध्वायां दिशि येयं मतिः प्रजापतितनुर्हे इष्टके तद्रूपा त्वमसि। मतिनाम्नः प्रजापतेरुपपत्यरूपा येयं वाक्सा मातीं। वाचोऽपत्यं वाच्यायनः। निधनवदिति सामविशेषः। तत्रैकैकस्मिन्मन्त्रे प्रजापतिरिन्द्रियमनुश्छन्दः सामविशेषो ग्रहः स्तोमः पृष्ठस्तोत्रं सामर्षिरिति नवानामेतेषां पदार्थानां यद्यपि लोकप्रसिद्धो जन्यजनकभावो नास्ति, तथाऽपि मन्त्रार्थत्वेन मनसा भावयितुमिदमुक्तमित्यविरोधः। एतैर्मन्त्रैः साध्यमुपधानं विधत्ते—

" प्राणभृत उप दधाति रेतस्येव प्राणान्दधाति तस्माद्वदन्प्राणन्पश्यञ्शृण्वन्पशुर्जायते " [सं० का० ५ प्र० २ अ० १०] इति।

पूर्वं रेतोरूपा अपस्या उपहिताः। तत ऊर्ध्वं प्राणभृतामुपधानेन रेतसि प्राणान्स्थापयति। यस्मादेवं गर्भाशये सिक्ते रेतसि प्राणाः स्थाप्यन्ते तस्मादेतःकार्यः पशुर्वदनादिभिर्वागादिव्यापारैर्युक्तो जायते।

सामान्येन विहितं पुनर्विशेषाकारेण विधत्ते—

" अयं पुरो भुव इति पुरस्तादुप दधाति प्राणमेवैताभिर्दाधारायं दक्षिणा विश्वकर्मेति दक्षिणतो मन एवैताभिर्दाधारायं पश्चाद्विश्वव्यचा इति पश्चाच्चक्षुरेवैताभिर्दाधारेदमुत्तरात्सुवरित्युत्तरतः श्रोत्रमेवैताभिर्दाधारेयमुपरि मतिरित्युपरिष्टाद्वाचमेवैताभिर्दाधार " [सं० का० ५ प्र० २ अ० १०] इति।

तत्तदिष्टकोपधानेन चित्त्यस्याग्नेर्यजमानस्य वा प्राणादयो धृता भवन्ति।

एकैकस्यां दिश्युपधेयानामिष्टकानां संख्यां विधत्ते—

" दशदशोप दधाति सवीर्यत्वाय " [सं० का० ५ प्र० २ अ० १०] इति। एकैकं मन्त्रं दशकृत्व आवर्त्य दशेष्टका उपदध्यात्। तथा सति चितेः सवीर्यत्वदार्ढ्यं भवति। अत्रोपधाने वक्रत्वं विधत्ते—

---

१ ख. घ. °ति। तत्रो°।

(प्राणभृदिष्टकाभिधानम्)

" अक्ष्णयोप दधाति तस्मादक्ष्णया पशवोऽङ्गानि प्र हरन्ति प्रतिष्ठित्यै " [तै० का० ५ प्र० २ अ० १०] इति ।

प्रतीच्यामुपक्रम्य प्राच्यामवसाने सत्याजवं भवति । नैर्ऋत्यामुपक्रम्यैशान्यां समापनं वक्तव्यम् । एवमितरत्रापि । तदिदमक्ष्णयेत्यनेनोच्यते । पशवोऽपि दक्षिणं पुरोवर्तिनं पादं प्रचाल्य पाश्चात्यं वामाङ्गवर्तिपादं प्रचालयन्ति । एवं पशूनां पादप्रचालनेन वक्तव्यम् ।

तत्तद्दिग्विशिष्टा इष्टकास्तत्तन्मन्त्रगतान्वासिष्ठादीनृषींश्च प्रशंसति—

" याः प्राचीस्ताभिर्वसिष्ठ आर्ध्नोद्या दक्षिणास्ताभिर्भरद्वाजो याः प्रतीचीस्ताभिर्विश्वामित्रो या उदीचीस्ताभिर्जमदग्निर्या ऊर्ध्वास्ताभिर्विश्वकर्मा " [तै० का० ५ प्र० २ अ० १०] इति । स्पष्टम् । एतद्वेदनं प्रशंसति—

"य एवमेतासामृद्धिं वेदर्ध्नोत्येव य आसामेवं बन्धुतां वेद बन्धुमान्भवति य आसामेवं कल्पिं वेद कल्पतेऽस्मै य आसामेवमायतनं वेदाऽऽयतनवान्भवति य आसामेवं प्रतिष्ठां वेद प्रत्येव तिष्ठति " [तै०का०५ प्र०२ अ० १०] इति ।

ऋद्धिः समृद्धिहेतुत्वं, बन्धूनां समूहो बन्धुता। दृशानां समूहाकार इत्यर्थः। कल्पिर्वक[त्व]कल्पना । आयतनं प्रागादिदेशविशेषः । प्रतिष्ठा तत्र स्थापनम् ।

अत्र विनियोगसंग्रहः—

अयं प्राणभृतो दध्यात्पञ्चाशत्पञ्चमन्त्रकैः(तं तु पञ्चभिः) ।

अत्र मीमांसा ।

प्रथमाध्यायस्य चतुर्थपादेऽष्टादशाधिकरणे चिन्तितम्—

सृष्टिवत्प्राणभृत्तत्र सादृश्यं लिङ्गभूमतः ।
अत्रैकमन्त्रगो लिङ्गसमवायो विशिष्यते ॥

" प्राणभृत उपदधाति " इत्यत्रापि सृष्टिन्यायेन मन्त्रविधिरिति पूर्वः पक्षः । लिङ्गप्रकरणप्राप्तमन्त्रानुवादेनेष्टकोपधाने विधिः । " रेतस्येव प्राणान्दधाति" इत्यस्य वक्ष्यमाणार्थवादस्योपपत्तये प्राणभृच्छब्देन मन्त्रानुवादः । पूर्वत्र द्वितीयादिमन्त्रेषु सृष्टिलिङ्गानां बाहुल्यम्। इह तु प्रथममन्त्र एव प्राणभृल्लिङ्गमाम्नायते—" अयं पुरो भुवस्तस्य प्राणो भौवायनः " इति । एकस्यैव मन्त्रस्य प्राणभृत्त्वेऽपि च्छात्रिणो गच्छन्तीतिवत्तत्सहचरिताः सर्वे मन्त्राः प्राणभृच्छब्देन लक्ष्यन्ते ।

क. घ. ङ. °शत्समम°।

(अपानभृदिष्टकाभिधानम्)

इति श्रीत्रायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे तृतीयप्रपाठके
द्वितीयोऽनुवाकः ॥ २ ॥

(अथ चतुर्थाष्टके तृतीयप्रपाठके तृतीयोऽनुवाकः)।

प्राचीं दिशां वसन्त ऋतूनामग्निर्देवता ब्रह्म द्रविणं त्रिवृत्स्तोमः स उ पञ्चदशवर्तनिरुयविर्वयः कृतमयानां पुरोवातो वातः सानग ऋषिर्दक्षिणा दिशां ग्रीष्म ऋतूनामिन्द्रो देवता क्षत्त्रं द्रविणं पञ्चदशः स्तोमः स उ सप्तदशवर्तनिर्दित्यवाड्वयस्त्रेताऽयानां दक्षिणाद्वातो वातः सनातन ऋषिः प्रतीचीं दिशां वर्षा ऋतूनां विश्वे देवा देवता विट् (१) द्रविणꣳ सप्तदशः स्तोमः स उवेकविꣳशवर्तनिस्त्रिवत्सो वयो द्वापरोऽयानां पश्चाद्वातो वातोऽहभून ऋषिरुदीची दिशाꣳ शरदृतूनां मित्रावरुणौ देवता पुष्टं द्रविणमेकविꣳशः स्तोमः स उ त्रिणवर्वर्तनिस्तुर्यवाड्वयं आस्कन्दोऽयानामुत्तराद्वातो वातः प्रत्न ऋषिरूर्ध्वा दिशाꣳ हेमन्तशिशिरावृतूनां बृहस्पतिर्देवता वर्चो द्रविणं त्रिणवः स्तोमः स उ त्रयस्त्रिꣳशवर्तनिः पष्ठवाड्वयोऽभिभूरयानां विष्वग्वातो वातः सुपर्ण ऋषिः पितरः पितामहाः परेऽवरे ते नः पान्तु ते नोऽवन्त्वस्मिन्ब्रह्मन्नस्मिन्क्षत्त्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्याम् (२)॥

(विट्पृष्ठवाड्वयोऽष्टाविंशतिश्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके तृतीयप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ चतुर्थकाण्डे तृतीयप्रपाठके तृतीयोऽनुवाकः)।

द्वितीयेऽनुवाके प्राणभृत इष्टका उक्ताः। अथ तृतीयेऽपानभृत उच्यन्ते। कल्पः—"बाह्यां बाह्यां प्राची दिशामिति पञ्चाशतमपानभृतो यथा प्राणभृतः" इति। तत्र प्राच्यां दिश्युपधेयानामिष्टकानां मन्त्रमाह—

प्राची दिशामिति। हे इष्टके दिशां मध्ये या प्राची सा त्वमसि। ऋतूनां मध्ये यो वसन्तस्तद्रूपाऽसि। देवतानां मध्ये योऽग्निस्तद्रूपाऽसि। स्वकीयत्वेन संपादनीयानां द्रविणानां मध्ये विशिष्टब्राह्मण्यरूपं यद्धनं तद्रूपा त्वमसि। स्तोमानां मध्ये त्रिवृन्नामको यः स्तोमस्तद्रूपा त्वमसि। स उ सोऽपि त्रिवृत्स्तोमः पञ्चदशवर्तनिः पञ्चदशस्तोमस्य प्रवर्तकः। बहिष्पवमानस्तोत्रे त्रिवृत्स्तोमप्रवृत्तौ सत्यां तत ऊर्ध्वभाविष्वाज्यस्तोत्रेषु पञ्चदश स्तोमाः प्रवर्तन्ते, तत्प्रवर्तनशक्तिरूपा त्वमसि। वयसां मध्ये सार्धसंवत्सररूपं यद्वयस्तद्रूपा त्वमसि। त्र्यविशब्दः सार्धसंवत्सरमुपलक्षयति। तथा हि—अविजातौ प्रायेण गर्भधारणमारभ्य षष्ठे मास्येव शिशुर्जायते। त्रिसंख्याका अविजन्मकाला यस्य वयसस्तद्वयस्त्र्यविशब्देनोच्यते। अयानां युगानां मध्ये यत्कृतयुगं तद्रूपा त्वमसि। वायूनां मध्ये पुरोवाताख्यो यो वायुस्तद्रूपा त्वमसि। ऋषीणां मध्ये यः सानगाख्य ऋषिस्तद्रूपा त्वमसि। अथ दक्षिणस्यां दिश्युपधेयानां मन्त्रमाह—

दक्षिणा दिशामिति। माध्यंदिनसवने पञ्चदशस्तोममनुष्ठाय तत ऊर्ध्वभाविषु पृष्ठस्तोत्रेषु सप्तदशः स्तोमोऽनुष्ठातव्यः। तथा च स एव पञ्चदशः स्तोमः सप्तदशस्तोमं प्रवर्तयति, तत्र या प्रवर्तनशक्तिः सा त्वमसि। वयसां मध्ये द्विसंवत्सरवयोरूपाऽसि। दित्यवाट्शब्देन संवत्सरद्वयमुपलक्ष्यते। तथा हि—दित्यं पुरुषं बालं वहतीति दित्यवाडजादिभेदेषु यः कश्चिद्वान्तरजातिरेडकः। स च संवत्सरद्वयेन पुंबालं वहतीति दित्यवाट्शब्दः संवत्सरद्वयोपलक्षकः। दितिः खण्डनं भाण्डभङ्गादिचापलं तदर्हतीति दित्यः पुंबाल इत्यर्थः। दक्षिणादित्य-

---

१ ख. च. °ह्यां प्रा°। २ ख. च. °तनश°। ३ घ. ङ. °करू°। ४ क. ख. ङ. °नपवमाने।

(अपानभृदिष्टकाभिधानम्)

व्ययं तु दक्षिणस्यां दिशीत्यमुमर्थं ब्रूते । यो वायुर्दक्षिणस्यां वाति स दक्षिणाद्वातः । तेन वातविशेषणेन विशेष्यो यो वायुस्तद्रूपा त्वमसि । शेषं पूर्ववत् ।

प्रतीच्यां दिश्युपधेयानामिष्टकानां मन्त्रमाह—

प्रतीची दिशामिति । त्रयो वत्सा वत्सरा यस्यासौ त्रिवत्सो वर्षत्रयं तत्परिमितं यद्वयस्तद्रूपा त्वमसि । अयन्ति गच्छन्ति तत्तत्कालानुसारेण वर्तन्ते प्राणिनोऽत्यर्थं युगरूपाः कालविशेषाः, तेषां मध्ये यो द्वापरस्तद्रूपा त्वमसि। पश्चिमायां दिशि यो वायुर्वाति तस्य पश्चाद्वात इति संज्ञा । एतत्संज्ञको यो वातविशेषस्तद्रूपा त्वमसि । अहभून इति कस्यचिद्दृषेर्नामधेयम् ।

उदीच्यां दिश्युपधेयानामिष्टकानां मन्त्रमाह—

उदीची दिशामिति । पुष्टशब्दः परिचर्यया वर्णत्रयपोषकत्वाच्छूद्रजातिमाचष्टे । अत एव बाजसनेयिनः समामनन्ति—"स शौद्रं वर्णमसृजत्पूषणम्" इति । तुर्यं चतुर्थं चतुर्थसंवत्सरोपक्रमं वहतीति तुर्यवाट्, सार्धत्रिसंवत्सररूपं यद्वयस्तद्रूपा त्वमसि । आ समन्तात्स्कन्दनं धर्मस्य शोषणं यस्मिन्कलौ सोऽयमास्कन्दः । प्रत्न इति कस्यचिद्दृषेर्नाम ।

मध्यदेश उपधेयानामिष्टकानां मन्त्रमाह—

ऊर्ध्वा दिशामिति । वर्चो वर्चस्वान्, चतुर्ष्वपि वर्णेषु यो बलवांस्तद्रूपं धनं त्वमसि । पष्ठे पृष्ठे भारं वहतीति पष्ठवाट्, स एव दकारान्तशब्देनोच्यते । चतुर्थे वर्षे संपूर्णे सति प्रायेण बलीवर्दो भारं वहति । अतो वर्षचतुष्टयरूपं यद्वयस्तद्रूपा त्वमसि । क्रूरं धर्ममभिभवतीत्यभिभूः कलियुगावसानकालस्तद्रूपा त्वमसि । नानादिक्षु सांकर्येण संचरन्वायुर्विष्वग्वातसंज्ञकः, तथाविधो यो वायुस्तद्रूपा त्वमसि । सुपर्ण इति कस्यचिद्दृषेर्नामधेयम् ।

सर्वेष्वेतेषु पञ्चसु मन्त्रेष्वनुषञ्जनीयं शेषमाह—

पितरः पितामहा इति । हे पितरो हे पितामहा हे परे प्रपितामहादयो हेऽवरे भ्रातृपुत्रादय ईदृशा ये भवन्तः सन्ति ते भवन्तो नोऽस्मान्कर्मानुष्ठानाय पान्तु पालयन्तु । किंच ते भवन्तो नोऽस्मान्पालनसिद्धयर्थमवन्तु । अस्मिन्ब्रह्मजन्यस्यां ब्राह्मणजातौ, अस्मिन्क्षत्रजन्यस्यां क्षत्रियजातौ, अस्यामाशिष्येतस्यां कामनायाम्, अस्यां पुरोधायामेतस्यां राजपौरोहित्यवृत्तौ, अस्मिन्कर्मन्नस्मिंश्चयनरूपे कर्मणि, अस्यां देवहूत्यामेतस्यां देवताह्वानरूपायां क्रियायां च निमिभूतायां सत्यां हे इष्टके त्वामुपदधामीति शेषः । एतैर्मन्त्रैः साध्यमुपधानं विधत्ते—

(अपानभृदिष्टकाभिधानम्)

" प्राणभृत उपधाय संयत उप दधाति प्राणानेवास्मिन्धित्वा संयद्भिः संयच्छति तत्संयतां संयत्त्वमथो प्राण एवापानं दधाति तस्मात्प्राणापानौ संचरतः " [सं० का० ५ प्र० २ अ० १०] इति ।

अन्तर्देशे प्राणभृदाख्याः पूर्वोक्ता इष्टका उपधाय बहिर्देशे संयदाख्या इमा अपानभृत इष्टका उपदध्यात् । तथा सत्यग्नौ प्राणान्स्थापयित्वा संयदाख्याभिरिष्टकाभिः संयच्छति दृढी करोति । अतः संयच्छत्येताभिरिति व्युत्पत्त्या संयदाम संपन्नम् । अपि च बहिःसंचाररूपे प्राणे पुनरन्तःसंचाररूपमपानं स्थापयति । तस्माल्लोकेऽपि प्राणापानौ संभूय संचरतः । प्राणभृद्भ्यो विपरीतप्रकारं विधत्ते—

" विषूचीरुप दधाति तस्माद्विष्वञ्चौ प्राणापानौ " [सं० का० ५ प्र० २ अ० १०] इति ।

यस्मात्प्राणभृतामपानभृतां चान्योन्यविपर्ययक्रमस्तस्माल्लोकेऽपि प्राणापानावन्योन्यविपरीतस्वरूपौ । बहिर्गतिः प्राणोऽन्तर्गतिरपानः ।

संयतामासामुपधानं प्रशंसति—

"यद्वा अग्नेरसंयतमसुवर्ग्यमस्य तत्सुवर्ग्योऽग्नेर्यत्संयत उपदधाति समेवैनं यच्छति सुवर्ग्यमेवाकः" [सं० का० ५ प्र० २ अ० १०] इति ।

अग्नेः संबन्धि यदङ्गं सम्यङ्न नियमितं तदङ्गं स्वर्गहितं न भवति, अग्निस्तु स्वर्गहितोऽस्माकमपेक्षितः, तस्मादग्निं स्वर्ग्यं कर्तुं संयत उपदध्यात् ।

प्रथममन्त्रे कस्यचिदंशस्य तात्पर्यमाह—

" व्यविर्वयः कृतमयानामित्याह वयोभिरेवायानव रुन्धेऽयैर्वयाꣳसि" [सं० का० ५ प्र० २ अ० १०] इति ।

सार्धसंवत्सरादिरूपैर्वयोविशेषैरयाभिधेयानि कृतादियुगानि प्राप्नोति । तैश्च युगैस्तान्वयोविशेषान्प्राप्नोति । नहि वयोविशेषमन्तरेण जन्महीनस्य कृतादियुगैः संबन्धोऽस्ति, नापि कृतादियुगरूपस्य कालस्याभावे काश्चिद्वयोविशेषः संभवति । महाप्रलये युगरहित्येन जन्मरहितानां वयोविशेषाद्यदर्शनात् । तस्मादन्योन्यसापेक्षयोर्वयोयुगयोरुभयोरप्यत्रोपादानम् ।

पञ्चस्वपि मन्त्रेषु पुरोवातो दक्षिणाद्वात इत्यादीन्वायुविशेषान्प्रशंसति—

" सर्वतो वायुमतीर्भवन्ति तस्मादयꣳ सर्वतः पवते " [सं० का० ५ प्र० २ अ० १०] इति ।

---

१ ख. च. °पान इति पर्यायः । सं० । २ क. °तामु° ।

(द्वितीयचितावाश्विन्याख्येष्टकाभिधानम्)

यस्मादेता इष्टकाः सर्वा अपि वायुशब्दोपेतैर्मन्त्रैरुपधेयास्तस्मादयं लोकेऽपि वायुः सर्वासु दिक्षु संचरति। अत्र विनियोगसंग्रहः—

प्राचीत्यपानभृत्संयादीतिनामद्वयान्विताः।
पञ्चाशत्पूर्ववद्दिक्षु मध्ये चोदपदधाति ताः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे तृतीयप्रपाठके तृतीयोऽनुवाकः॥ ३॥

(अथ चतुर्थाष्टके तृतीयप्रपाठके चतुर्थोऽनुवाकः)।

ध्रुवाक्षितिर्ध्रुवयोनिर्ध्रुवाऽसि ध्रुवां योनिमा सीद साध्या। उरुव्यस्य केतुं प्रथमं पुरस्ताद-श्विनाऽध्वर्यू सादयतामिह त्वा। स्वे दक्षे दक्ष-पितेह सीद देवत्रा पृथिवी बृहती रराणा। स्वासस्था तनुवा सं विशस्व पितेवैधि सूनव आ सुशेवाऽश्विनाऽध्वर्यू सादयतामिह त्वा। कुलायिनी वसुमती वयोधा रयिं नो धेहि बहुलꣳ सुवीरम् (१)। अपामतिं दुर्मतिं बाधमाना रायस्पोषे यज्ञपतिमाभजन्ती सुवर्धेहि यजमानाय पोषमश्विनाऽध्वर्यू सादयता-मिह त्वा। अग्नेः पुरीषमसि देवयानी तां त्वा विश्वे अभि गृणन्तु देवाः। स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे द्रविणाऽऽयजस्वा-श्विनाऽध्वर्यू सादयतामिह त्वा। दिवो मूर्धाऽसि पृथिव्या नाभिर्विष्टम्भनी दिशामधिपत्नी भुव-

नानाम् (२)। ऊर्मिर्द्रप्सो अपामसि विश्वकर्मा
त ऋषिरश्विनाऽध्वर्यू सादयतामिह त्वा ।
सजूर्ऋतुभिः सजूर्विधाभिः सजूर्वसुभिः सजू
रुद्रैः सजूरादित्यैः सजूर्विश्वेदेवैः सजूर्देवैः सजू-
र्देवैर्वयोनाधैरग्नये त्वा वैश्वानरायाश्विनाऽध्वर्यू
सादयतामिह त्वा। प्राणं मे पाह्यपानं मे पाहि
व्यानं मे पाहि चक्षुर्म ऊर्व्या वि भाहि श्रोत्रं
मे श्लोकयापस्पिन्वौषधीर्जिन्व द्विपात्पाहि
चतुष्पादव दिवो वृष्टिमेरय (३) ॥
(सुवीरं भुवनानामूर्व्या सप्तदश च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
तृतीयप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ चतुर्थकाण्डे तृतीयप्रपाठके चतुर्थोऽनुवाकः)।

तृतीयेऽनुवाकेऽपानभृदाख्या इष्टका उक्ताः। तावता प्रथमा चितिः समाप्ता। अथ चतुर्थानुवाके द्वितीयस्यां चितावाश्विन्याख्या इष्टका अभिधीयन्ते।

कल्पः—"श्वोभूते पोर्वाह्णिकीभ्यां प्रचर्य द्वितीयां चितिं चिनोति ध्रुवक्षितिरिति पञ्चाऽऽश्विनीरुपदधाति" इति। तत्र प्रथमामाह—

ध्रुवक्षितिरिति। ध्रुवा स्थिरा क्षितिर्निवासभूमिर्यस्या इष्टकायाः सा ध्रुवक्षितिः। यस्यां भूमाविष्टका निवसन्ति तस्या भूमेश्चाञ्चल्याभावात्स्थैर्यं द्रष्टव्यम्। ध्रुवा विनाशरहिता योनिरुत्पत्तिहेतुर्मृद्रूपा यस्या इष्टकायाः सा ध्रुवयोनिः। हे इष्टके तादृशी त्वं स्वरूपतोऽपि ध्रुवाऽसि। अर्मकपालादिभिः संयोज्य निर्मितत्वाद्ध्रुवत्वम्। साध्याऽस्माभिः साधनीयोपधातव्या त्वं ध्रुवां योनिं स्थिरमग्निक्षेत्ररूपं स्थानमासीदाऽऽगत्योपविश्य। तदेव स्थानं विशिष्यते—उरुण्यस्योखायां स्थितस्याग्नेः केतुं ज्ञापकं प्रथममिष्टकोपधानात्पूर्वमेव निष्पन्नम्। अतो हे इष्टक इहाऽस्मिन्नग्निक्षेत्रे पुरस्तात्पूर्वस्यां दिशि देवानामध्वर्यू उभावश्विनौ त्वां सादयतां स्थापयताम्। अथ द्वितीयामाह—

(द्वितीयचितावाश्विन्याख्येष्टकाभिधानम्)

स्वे दक्षे दक्षपितेति। हे इष्टके स्वस्थाने निषीद। तत्र दृष्टान्तः—दक्षपितेति लुप्तोपमा। यथा दक्षपिता दक्षाणां व्यवहारकुलानां पुत्राणां गृहे पिता निषीदति तद्वत्। देवत्रा देवेषु मध्ये तनुवा स्वकीयेन शरीरेण संविशस्व सम्यगवस्थिता भव। कीदृशी, पृथिवी मृत्कार्यत्वेन भूमिस्वरूपा बृहती पौढा रराणा निरुपद्रवत्वाद्रममाणा स्वास्तस्था सुखकरेऽस्मिन्स्थाने स्थिता। हे इष्टक आसुशेवा सर्वतः सुखेन सेवितुं शक्यैधि भव। क इव, सूनवे पितेव। यथा पुत्रार्थं पिता सुखेन सेव्यो भवति तद्वत्। अश्विनेत्यादि पूर्ववत्।

अथ तृतीयामाह—

कुलायिनीति। हे इष्टके त्वं कुलायिनी निवासस्थानवती वसुमती धनवती धनप्रदेत्यर्थः। वयोधा दीर्घायुष्यस्य संपादिका सती नोऽस्मदर्थं बहुलं रयिं प्रभूतं धनं सुवीरं शोभनं पुत्रं च वर्धं संपादय। अमतिं प्रज्ञामान्द्यं दुर्मतिं पापबुद्धिं चापबाधमाना निःशेषेण विनाशयन्ती रायस्पोषे धनपुष्टौ यज्ञपतिमाभजन्ती सर्वतः प्रापयन्ती सुवः स्वर्गलोके यजमानाय यजमानार्थं पोषं पुष्टिं धेहि संपादय। अश्विनेत्यादि पूर्ववत्। अथ चतुर्थीमाह—

अग्नेः पुरीषमसीति। हे इष्टके देवयानी देवान्प्राप्नुवती त्वमग्नेः पुरीषमसि चित्यस्याग्नेः पूरकं वस्त्वसि। तां तादृशीं त्वां विश्वे देवाः सर्वेऽपि देवा अभिगृणन्तु सर्वतः कीर्तयन्तु। स्तोमपृष्ठा सर्वस्तोमैर्युक्तानि पृष्ठस्तोत्राणि यस्याः सा स्तोमपृष्ठा। पृष्ठैरुपतिष्ठत इति वक्ष्यति। घृतवती होष्यमाणघृतसंयुक्ता सतीहास्मिन्सधस्थे सीद तिष्ठ। अस्मे अस्मभ्यं प्रजावत्पुत्रपौत्रादियुक्तं द्रविणा धनमायजस्व सर्वतो देहि। अश्विनेत्यादि पूर्ववत्। अथ पञ्चमीमाह—

दिवो मूर्धाऽसीति। हे इष्टके त्वं सर्वात्मिकाऽसि। कथमिति तदुच्यते—दिवो मूर्धाऽसि द्युलोकस्य शिरःस्थानीय आदित्योऽसि। पृथिव्या नाभिर्भूमेर्नाभिस्थानीयो मेर्वादिरसि। दिशां विष्टम्भनी प्राच्यादीनां दिशां विविधसांकर्येण स्तम्भयन्ती व्यवस्थापयन्ती। तथा भुवनानां सर्वेषामधिपत्न्याधिक्येन पालयित्री। तथाऽपां य ऊर्मिर्द्रप्सश्च तदुभयरूपाऽसि। विश्वकर्मा प्रजापतिरेव ते तव ऋषिर्द्रष्टा। अश्विनेत्यादि पूर्ववत्।

एतैर्मन्त्रैः साध्यमुपधानं विधत्ते—

"उत्सन्नयज्ञो वा एष यदग्निः किं वाऽहैतस्य क्रियते किं वा न यद्वै यज्ञस्य क्रियमाणस्यान्तर्यन्ति पूयति वा अस्य तदाश्विनीरुप दधात्यश्विनौ वै देवानां भिषजौ ताभ्यामेवास्मै भेषजं करोति" [सं० का०५ प्र० ३ अ० १] इति ।

योऽयं चीयमानोऽग्निः स एष उत्सन्नयज्ञ एव । अस्मिन्नग्नावनुष्ठेयानामति-बहुत्वात्तत्तथाऽपि प्रमादादिना क्वचित् किंचिदङ्गमुत्सन्नं भवत्येव । एतस्याग्नेः संबन्धि किं नामाङ्गमनुष्ठितं किं नानुष्ठितमिति को ज्ञातुं शक्नोति । अहशब्दो निषेधार्थः। सर्वथा ज्ञातुं न शक्नोत्येव । तथा सत्यनुष्ठीयमानस्य यज्ञस्य यदङ्गमन्तर्यन्त्यन्तरितं कुर्वन्ति, अस्य यज्ञस्यैतदङ्गं पूयत्येव नश्यत्येव । तत्तस्माद-न्तरायदोषपरिहारार्थमाश्विनीरिष्टका उपदध्यात् । अश्विदेवयुक्तैर्मन्त्रैरुपधेया इष्टका आश्विन्यः । तदुपधानेन देवाभिषग्भ्यामस्मै यज्ञायौषधं करोति । संख्यां विधत्ते—

" पञ्चोप दधाति पाङ्क्तो यज्ञो यावानेव यज्ञस्तस्मै भेषजं करोति " [सं० का० ५ प्र० ३ अ० १] इति ।

कल्पः—" तनूर्ऋतुभिरिति पञ्चर्तव्या आश्विनीरनूपधाय " इति । पाठस्तु—

तनूर्ऋतुभिरिति । हे इष्टके त्वमृतुभिर्वसन्तादिभिः तनूः तमानप्रीतिरसि, वसन्तादीनां यादृशी प्रीतिस्तादृशी तवेत्यर्थः। एवमुत्तरत्रापि तनूःशब्दो योज्यः। विविधं जगद्दधति पोषयन्तीति ब्रह्मादयो विधास्तैर्विधाभिः । वसवो रुद्रा आ-दित्या विश्वे देवा देवाश्च प्रसिद्धास्तैरेतैः पञ्चविधैः पञ्चधा मन्त्रभेदः । पूर्वोत्तर-भागौ सर्वत्रानुषज्येते । विधाभिरित्यन्तः पूर्वो भागः। तनूर्देवैर्वयोनाधैरित्याद्युत्तरो भागः । एतस्मिन्भागे पूर्वोक्ताः सर्वेऽपि समानदेवशब्दाभिधेयाः । ते च सर्वे देवा वयोनाधा आयुष्पदा इत्यर्थः । तादृशैर्देवैः समानप्रीतिस्त्वं वैश्वानरायाग्नये सर्व-पुरुषाणां हितकारिबहन्यर्थं त्वामुपदधामीति शेषः । मयोपाहितां त्वां देवाना-मध्वर्यू अभिनाविह क्षेत्रे स्थापयताम् । एतैर्मन्त्रैः साध्यमुपधानं विधत्ते—

"ऋतव्या उप दधात्यृतूनां कल्प्त्यै" [सं०का०५प्र०३अ०१] इति ।

वसन्तादीनामृतूनां स्वस्वव्यापारसामर्थ्यायैतदुपधानम् । इष्टकासंख्यां विधत्ते-

" पञ्चोप दधाति पञ्च वा ऋतवो य.वन्त एवर्तवस्तान्कल्पयति " [सं० का० ५ प्र० ३ अ० १] इति ।

(द्वितीयचितावाग्निन्यारूयेष्टकाभिधानम्)

हेमन्तशिशिरयोः समासेनर्तूनां पञ्चत्वम्। कल्पयति स्वस्वोचितव्यवहारक्षमान्करोति। मन्त्राणामाद्यन्तानुषङ्गौ विधत्ते—

" समानप्रभृतयो भवन्ति समानोदर्कास्तस्मात्समाना ऋतवः " [सं० का० ५ प्र० ३ अ० १] इति।

सजूर्ऋतुभिः सजूर्विधाभिरित्ययमुपक्रमो भागः प्रभृतिः। समानप्रभृतयः समानोपक्रमाः सर्वे मन्त्रा इत्यर्थः। सजूर्देवैर्वयोनाधैरित्याद्यवसानमुदर्कः। सोऽपि सर्वेषां मन्त्राणां समानः। यस्मान्मन्त्राः समानास्तस्माल्लोकेऽपि मासद्वयात्मकत्वेन सर्वेऽप्यृतवः समानाः।

मन्त्रेषु समानमंशमुक्त्वा भेदकमंशं दर्शयति—

" एकेन पदेन व्यावर्तन्ते तस्मादृतवो व्यावर्तन्ते " [सं० का० ५ प्र० ३ अ० १] इति।

वसुभिरित्येकं पदं, तेनेतरेभ्यो मन्त्रेभ्य आद्यमन्त्रो व्यावर्तते। एवं रुद्रादित्यादिभिर्व्यावृत्तिर्योजनीया। यस्मादुपक्रमावसानसाम्ये पदमात्रेण व्यावृत्तिस्तस्माल्लोके मासद्वयात्मकत्वसाम्येऽपि वसन्तग्रीष्मादिपदभेदेनर्तूनां परस्परं व्यावृत्तिः।

कल्पः—"प्राणं मे पाहीति पञ्च प्राणभृत ऋतव्या अनूपधाय" इति। पाठस्तु—

प्राणं मे पाहीति। हे इष्टके मे मदीयं प्राणं पाहि पालय। एवमुत्तरत्रापि। उर्व्या विशाळया दृशा विभाहि विशेषेण प्रकाशय दर्शनसमर्थं कुर्वित्यर्थः। श्रोकय शब्दसंघाते शक्तं कुरु बहुविधवेदशास्त्रश्रवणसमर्थं कुर्वित्यर्थः। एतैर्मन्त्रैः ताभ्यमुपधानं विधत्ते—

" प्राणभृत उप दधात्युतुष्वेव प्राणान्दधाति तस्मात्समानाः सन्त ऋतवो न जीर्यन्त्यथो प्र जनयत्येवैनान् " [सं० का० ५ प्र० ३ अ० १] इति।

ऋतव्योपधानादूर्ध्वं प्राणभृत उपधाने सत्युतुष्वेव प्राणान्स्थापयति। यस्मादेषु स्थापिताः प्राणास्तस्मात्पुनः पुनरावृत्तावप्युतवः समाना एव दृश्यन्ते न तु जीर्णा भवन्ति। अपि च प्राणस्थापनादेता(ना)नूतून्पुनः पुनरुत्पादयत्येव।

ऋतव्याभ्य उत्तरभाविनीः प्राणभृतः प्रकारान्तरेण प्रशंसति—

---

१ क. °यङ्गं वि°। २ ब. ङ. पञ्च। ३ ब. ङ. °द्विव्याद्रृ°। ४ क. घ. ङ. °न व्या°।

"एष वै वायुर्यत्प्राणो यद्दृतव्या उपधाय प्राणभृत उपदधाति तस्मात्सर्वानृतून् नु वायुरा वरीवर्ति" [सं० का० ५ प्र० ३ अ० १] इति ।

योऽयं प्राणः स एष वायुरेव । तथा सत्यृतव्यानामूर्ध्वं प्राणभृतामुपधानेन सर्वानप्यृतूननुसृत्य वायुः पुनः पुनरावर्तते ।

कल्पः—" अपस्पिन्वेति पञ्चापस्या अनुपरिहारम् " इति । पाठस्तु—

अपस्पिन्वेति । हे इष्टके त्वमपो जलानि पिन्व प्रणिय । ओषधीश्च जिन्व प्रणिय । द्विपान्मनुष्यशरीरं पाहि पालय । चतुष्पात्पशुशरीरमव रक्ष । दिवः सकाशाद्वृष्टिमेरयाऽऽसमन्तात्प्रवर्तय । एतैर्मन्त्रैः साध्यमुपधानं विधत्ते—

"वृष्टिसनीरुप दधाति वृष्टिमेवाव रुन्धे" [सं०का०५प्र०३अ०१] इति ।

वृष्टिसनीर्वृष्टिप्रदानेनैतन्नामिका इष्टकाः । तत्र प्रकारविशेषं विधत्ते—

" यदेकधोपदध्यादेकमृतुं वर्षेदनुपरिहारꣳ सादयति तस्मात्सर्वानृतून्वर्षति " [सं० का० ५ प्र० ३ अ० १] इति ।

पञ्चानामेकप्रयत्नोपधाने सत्येकस्मिन्नेवर्तौ वृष्टिर्भवेन्नेतरेष्वप्यृतुषु । अतस्तत्परिहारायानुक्रमेण परितो हृत्वा स्थापयेत् । प्राचीमुपधाय प्रदक्षिणमिष्टकामावर्त्य दक्षिणामुपदध्यात् ।

पुनरपीष्टकाहस्तः प्रदक्षिणीकृत्य पश्चिमामुपदध्यादित्येवं योजनीयम् । तथा सति सर्वानप्यृतून्प्रति वृष्टिर्भवति ।

प्राणभृतां वृष्टिसनीनां च पूर्वोत्तरभावं प्रशंसति—

" यत्प्राणभृत उपधाय वृष्टिसनीरुपदधाति तस्माद्वायुप्रच्युता दिवो वृष्टिरीर्ते " [सं० का० ५ प्र० ३ अ० १] इति ।

यस्मात्प्राणभृतः पूर्वभाविन्यो वृष्टिसनयः पश्चाद्भाविन्यस्तस्मात्लोकेऽपि दिवः सकाशात्पूर्वं वायुना प्रेरिता वृष्टिः पश्चात्प्रवर्तते ।

अत्र विनियोगसंग्रहः—

द्वितीयस्यां चितौ पञ्च ध्रुवेत्याद्याश्विनीस्तथा ।
पञ्चर्तव्याः सजूर्मन्त्रैराद्यन्तावनुषङ्गकौ ॥

---

१ ख. च. ° धीरपि जि° ।

(वयस्याख्येष्टकाभिधानम्)

वसुरुद्रादित्यविश्वैर्देवैर्मन्त्राभिदा भवेत्।
प्राणं प्राणभृतः पञ्च ह्यपोऽप्यश्च पञ्च हि ॥
ता एव वृष्टिसन्याख्याः प्रोक्ता मन्त्रास्तु विंशतिः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे तृतीयप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ चतुर्थाष्टके तृतीयप्रपाठके पञ्चमोऽनुवाकः)।

त्र्यविर्वयस्त्रिष्टुप्छन्दो दित्यवाड्वयो विराट्छन्दः पञ्चाविर्वयो गायत्री छन्दस्त्रिवत्सो वयऽउष्णिहा छन्दस्तुर्यवाड्वयोऽनुष्टुप्छन्दः पष्ठवाड्वयो बृहती छन्दऽउक्षा वयः सतोबृहती छन्दऽऋषभो वयः ककुच्छन्दो धेनुर्वयो जगती छन्दोऽनड्वान्वयः पङ्क्तिश्छन्दो बस्तो वयो विवलं छन्दो वृष्णिर्वयो विशालं छन्दः पुरुषो वयस्तन्द्रं छन्दो व्याघ्रो वयोऽनाधृष्टं छन्दः सिꣳहो वयश्छदिश्छन्दो विष्टम्भो वयोऽधिपतिश्छन्दः क्षत्रं वयो मयन्दं छन्दो विश्वकर्मा वयः परमेष्ठी छन्दो मूर्धा वयः प्रजापतिश्छन्दः (१) ॥

(पुरुषो वयः षड्विꣳशतिश्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके तृतीयप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(वयस्याख्येष्टकाभिधानम्)

(अथ चतुर्थकाण्डे तृतीयप्रपाठके पञ्चमोऽनुवाकः)।

चतुर्थानुवाक आश्विन्यादीष्टका उक्ताः। अथ पञ्चमे वयस्याख्या इष्टका उच्यन्ते।

कल्पः—" श्यविर्वय इति पञ्च दक्षिणस्यां श्रोण्यां पष्ठवाद्वय इति पञ्चोत्तरस्यां वस्तो वय इति दक्षिणेऽंसे वृष्णिर्वय इत्युत्तरे व्याघ्रो वय इति दक्षिणे पक्षे सिंहो वय इत्युत्तर एतद्वा विपरीतं पुरुषो वय इति मध्ये विष्टम्भो वय इति चतस्रो वयस्याः पुरस्तात्प्रतीचीः " इति। पाठस्तु—

श्यविर्वय इति। अविशब्दः पूर्वोक्तरीत्या मासषट्कमुपलक्षयति। ततः सार्धसंवत्सरपरिमितः कालरूपविरित्युच्यते। हे इष्टके तथाविधं यद्वयस्तद्वूपाऽसि। त्रिष्टुप्चतुश्चत्वारिंशदक्षरा, तादृशं छन्दस्त्वमसि। एवं सर्वत्र योज्यम्। द्वित्यवाड्द्विवत्सरपरिमितम्। पञ्चाविः सार्धद्विवत्सरपरिमितम्। त्रिवत्सो वत्सरत्रयपरिमितम्। तुर्यवाट्सार्धसंवत्सरत्रयपरिमितम्। षष्ठवात्संवत्सरचतुष्टयपरिमितम्। उक्षा सार्धसंवत्सरचतुष्टयपरिमितम्। तावति हि काले गौः सेक्ता भवति। एवमृषभादिशब्दास्तत्तत्प्रसिद्ध्यर्थद्वारेण तत्तदर्थसंबन्धिवयोविशेषार्थत्वेनोन्नेयाः। विवलविशालादिशब्दा लोकप्रसिद्धच्छन्दांस्यनभिदधाना अपि शतपथब्राह्मणादिप्रसिद्धच्छन्दोविशेषवाचिन इति द्रष्टव्यम्। विश्वकर्मशब्दः प्रजापतिवाची। तत्संनिध्याद्विष्टम्भक्षत्रमूर्धशब्दाश्च तदीयमेकदेशविशेषमाचक्षते। तत्र विश्वकर्मशब्देन प्रजापत्यायुःपरिमितः काल उपलक्ष्यते। विष्टम्भशब्देन जगद्धारणवाचिनैकस्याः सृष्टेः स्थितिकाल उपलक्ष्यते। क्षत्रशब्दो बलवाची[1]। ततो यावता कालेनोत्पन्नं ब्राह्मण्यं प्रबलं भवति तावान्कालः क्षत्रशब्देनोपलक्ष्यते। मूर्धशब्दो द्युलोकरूपं विराजो मूर्धानमाचष्टे। तेन द्युलोकस्य यावान्कालस्तावान्कालो लक्ष्यते। नानाविधवयोरूपा नानाविधच्छन्दोरूपा च त्वमसीति तात्पर्यार्थः।

एतैर्मन्त्रैरुपधेया वयस्याख्या इष्टकास्तासां पूर्वानुवाकावसाने पठितामिरप्यग्निभिः सह पौर्वापर्यं निश्चेतुं प्रस्तौति—

" पशवो वै वयस्या नानामनसः खलु वै पशवो नानाप्रतास्तेऽप एवानि समनसः " [सं० का० ५ प्र० ३ अ० १] इति।

वयस्यानां पशुप्राप्तिहेतुत्वात्तद्रूपत्वम्। पशवश्च नानाविधरुचियुक्ताः। य(एक)स्मै पशवे यादृशं तृणादिकं रोचते तादृशमेवान्यस्मा अपि रोचत

---

१ क. ब. ङ. °ची। या°।

(वयस्याख्येष्टकाभिधानम्)

इति नास्ति नियमः। एकेनाऽऽघ्राय परित्यक्तस्यापि तृणस्यान्येन भक्षणदर्शनात्। अतो नानामनस्कत्वम्। ततो नानात्वता भिन्नकर्माणः। एकः पशुर्लाङ्गलं वहतेऽपरः शकटमन्यस्तु पृष्ठभारम्। एवं विविधरुचयो विविधव्यापारा अपि पशवोऽपोऽभिलक्ष्य सर्वेऽपि समानमनस्का एव। मध्याह्नकाले युगपदुदकपानदर्शनात्। तत्रान्वयव्यतिरेकाभ्यां वयस्यानामुत्तरभावित्वं विधत्ते—

" यं काममेतापशुः स्यादिति वयस्यास्तस्योपधायापस्या उप दध्यादसंज्ञानमेवास्मै पशुभिः करोत्यपशुरेव भवति यं काममेत पशुमान्स्यादित्यपस्यास्तस्योपधाय वयस्या उप दध्यात्संज्ञानमेवास्मै पशुभिः करोति पशुमानेव भवति " [सं० का० ५ प्र० ३ अ० १] इति।

वयःशब्दोपेतैरूषाविर्वयाखिदुपुच्छन्द इत्यादिभिर्मन्त्रैरुपधेया इष्टका वयस्याः। अप्शब्दोपेतैरपास्मिन्वेत्यादिभिर्मन्त्रैरुपधेया इष्टका अपस्याः। तत्रापस्यानामुत्तरभावित्वे ताभिरितरासां पशुरूपाणामभिभूतत्वादस्य यजमानस्य पशुभिरसंज्ञानं करोति, पशुनिमित्तकं संज्ञानमकृतं भवति। अतः पशूनामवज्ञातत्वात्पशुरहितो भवति। पशुरूपाणां वयस्यानामुत्तरभावित्वे पुनरनभिभूतत्वादस्य यजमानस्य पशुभिः संज्ञानं करोति, पशुनिमित्तकं संज्ञानं कृतं भवति। अवज्ञाविपरीत आदरः संज्ञानम्। तेनायं पशुमान्भवत्येव। तस्मादपस्याः पूर्वभाविन्यो वयस्या उत्तरभाविन्य इत्यर्थः।

विष्टम्भो वय इत्यादिभिर्मन्त्रैरुपधेयानां प्राग्देशं विधत्ते—

" चतस्रः पुरस्तादुप दधाति तस्माच्चत्वारि चक्षुषो रूपाणि द्वे शुक्ले द्वे कृष्णे " [सं० का० ५ प्र० ३ अ० १] इति।

चक्षुरिन्द्रियसंबन्धिनोर्द्वयोर्गोलकयोर्मध्ये पौढे द्वे शुक्लमण्डले, तयोर्मध्ये द्वे कृष्णमण्डले इत्येवं रूपचतुष्टयम्।

तेषु चतुर्षु मन्त्रेष्वन्तिममन्त्रे यो मूर्धशब्दस्तं प्रशंसति—

" मूर्धन्वतीर्भवन्ति तस्मात्पुरस्तान्मूर्धा" [सं०का०५प्र०३अ०१] इति।

मूर्धन्शब्दोपेतैर्मन्त्रैरुपधेया इष्टका मूर्धन्वत्यः। यस्मात्पूर्वस्यां दिश्युपधेया मूर्धन्शब्दोपेतमन्त्रसाध्यास्तस्मात्पक्ष्याकारेण चीयमानस्याग्नेरपि मूर्धा पूर्वस्यां दिशि भवति।

---

१ ख. च. °हति अव°। २ ख. च. प्रदेशं। ३ घ. ङ. °मन्त्रार्थसा°। ४ ख. च. °[illegible]स्याकार°

(वयस्याख्येष्टकाभिधानम्)

व्यविवय इत्यादिमन्त्रपञ्चकेन षष्ठवाद्वय इत्यादिमन्त्रपञ्चकेन चोपधेयानामिष्टकानां देशविशेषं विधत्ते—

" पञ्च दक्षिणायाः श्रोण्यामुपदधाति पञ्चोत्तरस्यां तस्मात्पश्चाद्वर्षीयान्पुरस्तात्प्रवणः पशुः " [सं० का० ५ प्र० ३ अ० १] इति ।

यस्मादत्र श्रोण्योर्बहव इष्टकास्तस्मात्पशोरपि श्रोणितः पूर्वभागो निम्नः ।

अथ मन्त्रद्वयेनोपधेययोर्विशेषौ विधत्ते—

" बस्तो वय इति दक्षिणेऽंस उप दधाति वृष्णिर्वय इत्युत्तरेऽंसावेव प्रति दधाति " [सं० का० ५ प्र० ३ अ० १] इति ।

उत्तरे, अंस उपदधातीत्यनुवर्तते । तेनोपधानद्वयेनाग्नेरंसावेव संवादयति । अन्येन मन्त्रद्वयेनोपधेययोर्देशविशेषौ विधत्ते—

" व्याघ्रो वय इति दक्षिणे पक्ष उप दधाति सिंहो वय इत्युत्तरे पक्षयोरेव वीर्यं दधाति " [सं० का० ५ प्र० ३ अ० १] इति ।

उत्तरे, पक्ष उपदधातीत्यनुवर्तते । व्याघ्रसिंहयोरधिकवीर्योपेतत्वादनेनोपधानद्वयेन पक्षयोर्वीर्यं स्थापयत्येव ।

अन्येन मन्त्रेणोपधेयाया इष्टकायाः स्थानं विधत्ते—

" पुरुषो वय इति मध्ये तस्मात्पुरुषः पशूनामधिपतिः " [सं० का० ५ प्र० ३ अ० १] इति ।

यस्मान्मध्यदेश उपधानमन्त्रे पुरुषशब्दोऽस्ति तस्माल्लोके पुरुषः पशूनां स्वामी भवति । इतरास्तु वयस्याः पशव इत्युक्तम् ।

अत्र विनियोगसंग्रहः—

त्रियविस्तु (व्यावैवयो)वयस्याख्या दध्यादेकोनविंशतिः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे तृतीयप्रपाठके
पञ्चमोऽनुवाकः ॥ ५ ॥

(तृतीयचित्तौ स्वयमातृण्णादीष्टकाभिधानम्)

(अथ चतुर्थाष्टके तृतीयप्रपाठके षष्ठोऽनुवाकः)।

इन्द्राग्नी अव्यथमानामिष्टकां दृꣳहतं युवम्।
पृष्ठेन द्यावापृथिवी अन्तरिक्षं च वि बाधताम्। विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे व्यचस्वतीं प्रथस्वतीं भास्वतीꣳ सूरिमतीमा या द्यां भास्या पृथिवीमोर्वन्तरिक्षमन्तरिक्षं यच्छान्तरिक्षं दृꣳहान्तरिक्षं मा हिꣳसीर्विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय वायुस्त्वाऽभि पातु मह्या स्वस्त्या छर्दिषा (१) शंतमेन तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद। राड्यसि प्राची दिग्विराडसि दक्षिणा दिक्सम्राडसि प्रतीची दिक्स्वराडस्युदीची दिगाधिपत्न्यसि बृहती दिगाधिपत्न्यसि पाहि प्राणं मे पाह्यपानं मे पाहि व्यानं मे पाहि चक्षुर्मे पाहि श्रोत्रं मे पाहि मनो मे जिन्व वाचं मे पिन्वाऽऽत्मानं मे पाहि ज्योतिर्मे यच्छ (२) ॥

(छर्दिषा पिन्व षट् च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके तृतीयप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ चतुर्थकाण्डे तृतीयप्रपाठके षष्ठोऽनुवाकः)

पञ्चमेऽनुवाके वयस्याख्या इष्टका उक्ताः। तावता द्वितीयचितिः समाप्ता। अथ षष्ठे तृतीयस्यां चित्तौ स्वयमातृण्णाद्या उच्यन्ते।

कल्पः—"श्वोभूते पौर्वाह्णिकीभ्यां प्रचर्य तृतीयां चितिं चिनोतीन्द्राग्नी अव्यथमानामिति स्वयमातृण्णामभिमृश्याभेनोपधाप्य" इति। पाठस्तु—

इन्द्राग्नी इति। हे इन्द्राग्नी युवं युवामन्यथमानां भङ्गरहितां स्वयमातृण्णाख्यामिष्टकां दृंहतं दृढां कुरुतम्। इयं चेष्टका स्वकीयेनोपरिभागेन(ण) लोकत्रयं विबाधतां बाधमानेव व्याप्नोत्वित्यर्थः।

कल्पः—" विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठ इत्यविदुषा ब्राह्मणेन सह मध्येऽग्नेरुपदधाति " इति। पाठस्तु—

विश्वकर्मा त्वेति। विश्वानि कर्माणि यस्यासौ विश्वकर्मा प्रजापतिः। हे स्वयमातृण्णे प्रजापतिस्त्वामन्तरिक्षस्य पृष्ठ उपरि सादयतु। कीदृशीं, व्यचस्वतीं व्यक्तियुक्तां प्रथस्वतीं विस्तारयुक्तां भास्वतीं भायुक्तां सूरिमतीं विद्वद्भिर्ऋत्विग्भिर्युक्तां, तां यया स्वयमातृण्णा त्वं द्युलोकमाभासि सर्वतः प्रकाशयसि। तथा पृथिवीमाभासि। उरु विस्तीर्णमन्तरिक्षं चाऽऽभासि। तादृशी त्वमन्तरिक्षमिदं यच्छ गन्धर्वाप्सरोगणादिधारकतया नियमय। तथाऽन्तरिक्षं दृंह परोपद्रवराहित्येन दृढं कुरु। त्वमपि तदन्तरिक्षं मा हिंसीः। विश्वस्मै सर्वस्मै प्राणापानव्यानोदानाख्यवायुवृत्तिलाभाय, प्रतिष्ठायै स्वगृहे प्रतिष्ठालाभाय, चरित्राय शास्त्रीयाचरणाय, प्राणिनामेतस्य सर्वस्य सिद्ध्यर्थमयं वायुस्त्वामभितः पातु। केन रक्षणमिति तदुच्यते—मह्या स्वस्त्या महत्या योगक्षेमसंपत्त्या शंतमेन च्छर्दिषा सुखकारिणा दीप्तिविशेषेण। तव स्वामिभूता या देवता तयाऽनुगृहीता ध्रुवा स्थिरा सती सीदेहोपविश। अङ्गिरस्वदङ्गिरसां चयनानुष्ठाने यथा ध्रुवा स्थिरा तद्वत्। एतन्मन्त्रद्वयसाध्यमभिमर्शनपूर्वकमुपधानं विधत्ते—

" इन्द्राग्नी अव्यथमानामिति स्वयमातृण्णामुप दधातीन्द्राग्निभ्यां वा इमौ लोकौ विधृतावनयोर्लोकयोर्विधृत्यै " [सं० का० ५ प्र० ३ अ० २] इति।

यस्मादिन्द्राग्निभ्यां लोकद्वयं विधृतं तस्मादत्रापि लोकद्वयधारणायेन्द्राग्नी इति मन्त्रः प्रयुज्यते। प्रकारन्तरेणेन्द्राग्नी मन्त्रगतौ प्रशंसति—

" अधृतेव वा एषा यन्मध्यमा चितिरन्तरिक्षमिव वा एषेन्द्राग्नी इत्याहेन्द्राग्नी वै देवानामोजोभृतामोजसैवैनामन्तरिक्षे चिनुते धृत्यै " [सं० का० ५ प्र० ३ अ० २] इति।

अधस्ताच्चितिद्वयं पूर्वमुक्तमुपरितनं तु चितिद्वयं वक्ष्यते। तस्मादियं तृतीया चितिर्मध्यमा सा च भूमिस्पर्शाभावात्केनाप्यधृता वर्तते। अतोऽन्तरिक्षस-

(तृतीयचितौ स्वयमातृण्णादीष्टकाभिधानम्)

दृशी। अतस्तस्याश्चेतधृतिसिद्ध्यर्थमिन्द्राग्नी इति मन्त्रं पठेत्। देवानां मध्ये ताविन्द्राग्नी बलधारिणौ। तद्बलेनैवैनामन्तरिक्षे भूमिस्पर्शमन्तरेण चिनुते। भूमिस्पर्शाभावेऽपि तद्बलेन चितत्वाद्दृता भवति।

पूर्वं विहितां स्वयमातृण्णामनूद्य प्रशंसति—

" स्वयमातृण्णामुप दधात्यन्तरिक्षं वै स्वयमातृण्णाऽन्तरिक्षमेवोप धत्ते " [सं० का० ५ प्र० ३ अ० २] इति।

भूमिस्पर्शाभावादन्तरिक्षसादृश्यम्। यदा त्वयमुपधानविधिस्तदानीमेतदनुवादेन पूर्वोक्तो मन्त्रविनियोगो द्रष्टव्यः।

उपधानात्प्राचीनमश्वोपधापणं विधत्ते—

" अश्वमुप धापयति प्राणमेवास्यां दधात्यथो प्राजापत्यो वा अश्वः प्रजापतिनैवाग्निं चिनुते " [सं० का० ५ प्र० ३ अ० २] इति।

इष्टकागतं छिद्रं प्रशंसति—

" स्वयमातृण्णा भवति प्राणानामुत्सृष्ट्या अथो सुवर्गस्य लोकस्यानुख्यात्यै" [सं० का० ५ प्र० ३ अ० २] इति।

सति हि च्छिद्रे श्वासोऽनुपरुद्धः सन्निर्गच्छति। आवरणाभावात्स्वर्गोऽपि द्रष्टुं शक्यते। कल्पः—" राज्ञ्यसि प्राची दिगिति पञ्च दिशाः प्रतिदिशमेकां मध्ये " इति। पाठस्तु—

राज्ञ्यसि प्राचीति। हे इष्टके त्वं राज्ञी राजमाना दीप्यमाना सती प्राची दिगसि पूर्वदिग्रूपाऽसि। विराड्विविधं राजमाना दक्षिणा दिगसि। सम्राट् सम्यग्राजमाना प्रतीची दिगसि। स्वराट्स्वयमेव राजमानोदीची दिगसि। अधिकं पातीत्याधिपत्नी, तादृशी त्वं बृहती प्रौढोर्ध्वा दिगसि।

एतैर्मन्त्रैः साध्यमुपधानं विधत्ते—

" देवानां वै सुवर्गं लोकं यतां दिशः समव्लयिन्त त एता दिशा अपश्यन्ता उपादधत ताभिर्वै ते दिशोऽदृंहन्यद्दिशा उपदधाति दिशां विधृत्यै " [सं० का० ५ प्र० ३ अ० २] इति।

देवाः पुरा भूमौ स्थिताः कदाचित्स्वर्गं लोकं गताः। तत्र गच्छतां देवानां संबन्धिन्यो या भूमिष्ठा दिशस्ताः समव्लीयन्त रक्षकाभावात्सम्यग्विशीर्णाः। दिग्वर्तिनां प्राणिनामस्वास्थ्यमेव दिशां विशरणम्। ते देवा विचार्य दिशां धारण-

१ ख. च. °मेव त°।

(तृतीयचितौ स्वयमातृण्णादीष्टकाभिधानम्)

समर्था एता दिश्या नामेष्टका अपश्यन् । दिक्शब्दोपेतैर्मन्त्रैरुपधेया इष्टका दिश्याः । तदुपधानाद्देवानामिव यजमानस्यापि दिशो दृढा भवन्ति ।

कल्पः—" आयुर्मे पाहीति दश प्राणभृतः पुरस्तादुपधाय " इति । पाठस्तु—

आयुर्मे पाहीति । हे इष्टके मे मदीयमायुः पाहि रक्ष । एवमुत्तत्रापि योज्यम् । जिन्व प्रीणय । आत्मानं जीवस्वरूपम् । ज्योतिर्यच्छ देहि ।

एतैर्मन्त्रैः साध्यमुपधानं विधत्ते—

" दश प्राणभृतः पुरस्मादुप दधाति नव वै पुरुषे प्राणा नाभिर्दशमी प्राणानेव पुरस्ताद्धत्ते तस्मात्पुरस्तात्प्राणाः" [सं० का० ५ प्र० ३ अ० २] इति । प्राणशब्दोपेतान्मन्त्रानुपधानकाले बिभ्रतीति प्राणभृतः। शिरसि सप्त च्छिद्राणि । अधस्तादुभे। तेषु च्छिद्रेषु संचरन्तः प्राणा नवसंख्याकाः। नाभिर्दशमी छिद्ररूपा। अतस्तत्रत्यप्राणेन सह दश प्राणान्पूर्वस्यां दिश्युपधत्ते । यस्मादेते पूर्वस्यां दिश्युपहितास्तस्माल्लोकेऽपि प्राङ्मुखस्य पुरुषस्य श्वासदृष्टिप्रसारादयः पूर्वस्यामेव दिशि भवन्ति । चरममन्त्रे ज्योतिःशब्दं प्रशंसति—

" ज्योतिष्मतीमुत्तमामुप दधाति तस्मात्प्राणानां वाग्ज्योतिरुत्तमा " [सं० का० ५ प्र० ३ अ० २] इति ।

ज्योतिःशब्दयुक्तेन मन्त्रेणोपधातव्येष्टका ज्योतिष्मती । यस्मात्सा चरमा तस्माल्लोकेऽपि स्वार्थप्रकाशकत्वेन ज्योतीरूपा वाक्तत्रैषामिन्द्रियाणामुत्तमा भवति । संख्यां प्रशंसति—

" दशोप दधाति दशाक्षरा विराड्विराट्छन्दसां ज्योतिर्ज्योतिरेव पुरस्ताद्धत्ते तस्मात्पुरस्ताज्ज्योतिरुपास्महे " [सं० का० ५ प्र० ३ अ० २] इति ।

दीप्तिवाचिना राजतिधातुजन्येन निर्दिश्यमानत्वादियं विराट्छन्दसां मध्ये ज्योतिः । तथा सति तादृग्दशानां पूर्वदिश्युपधानेन ज्योतिरेव तत्र धारितं भवति । यस्मात्पूर्वस्यां दिशि ज्योतिर्धृतं तस्माद्वयं प्रातःसंध्याकाले पूर्वस्यां दिशि ज्योतिर्मण्डलमुपास्महे । अत्र विनियोगसंग्रहः—

तृतीयस्यां चितावेन्द्रा स्वयमातृण्णकां स्पृशेत् ।
विश्वेत्युपधात्येनां राज्ञी दिश्यास्तु पञ्चभिः ।
आयुर्दश प्राणभृतो मन्त्राः सप्तदशेरिताः ॥

---

१ घ. ङ. °ति दशा°।

(बृहत्यारूप्येष्टकाभिधानम्)

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे तृतीयप्रपाठके
षष्ठोऽनुवाकः ॥ ६ ॥

(अथ चतुर्थाष्टके तृतीयप्रपाठके सप्तमोऽनुवाकः)।

मा छन्दः प्रमा छन्दः प्रतिमा छन्दोऽसीविश्छन्दः पङ्क्तिश्छन्द उष्णिहा छन्दो बृहती छन्दोऽनुष्टुप्छन्दो विराट्छन्दो गायत्री छन्दस्त्रिष्टुप् छन्दो जगती छन्दः पृथिवी छन्दोऽन्तरिक्षं छन्दो द्यौश्छन्दः समाश्छन्दो नक्षत्राणि छन्दो मनश्छन्दो वाक्छन्दः कृषिश्छन्दो हिरण्यं छन्दो गौश्छन्दोऽजा छन्दोऽश्वश्छन्दः। अग्निर्देवता (१) वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता, रुद्रा देवतादित्या देवता विश्वे देवा देवता मरुतो देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता मूर्धासि राड्ध्रुवासि धरुणा यन्त्र्यसि यमित्रीषे त्वोर्जे त्वा कृष्यै त्वा क्षेमाय त्वा यन्त्री राड्ध्रुवासि धरणी धर्त्र्यसि धारित्र्यायुषे त्वा वर्चसे त्वौजसे त्वा बलाय त्वा (२) ॥

(देवताऽऽयुषे त्वा षट् च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
तृतीयप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ चतुर्थकाण्डे तृतीयप्रपाठके सप्तमोऽनुवाकः) ।

षष्ठेऽनुवाके स्वयमातृण्णाद्या इष्टका उक्ताः । अथ सप्तमे बृहत्याख्या इष्टका उच्यन्ते ।

कल्पः—" षट्त्रिंशतं बृहतीर्मा छन्द इति द्वादश दक्षिणतः पृथिवी छन्द इति द्वादश पश्चादग्निर्देवतेति द्वादशोत्तरतः " इति । पाठस्तु—

मा छन्दः प्रमेति । अत्र मापप्रमाप्रतिमास्वि(व्यादि)शब्दाभिधेयाश्छन्दोविशेषाः । केचिदेते प्रसिद्धाः केचिल्लोकेष्वपि प्रसिद्धाः । हे इष्टके त्वं मानामकच्छन्दोरूपाऽसि । प्रमानामकच्छन्दोरूपाऽसि । एवं सर्वत्र योज्यम् । अग्न्यादीनां तु देवतात्वं प्रसिद्धम् । हे इष्टके त्वमग्निदेवतारूपाऽसि । एवमुत्तरत्रापि योज्यम् । एतैर्मन्त्रैरिष्टकोपधानं विधातुं प्रस्तौति—

" छन्दाꣳसि पशुष्वाजिमयुस्तान्बृहत्युदजयत्तस्माद्बार्हताः पशव उच्यन्ते " [सं० का० ५ प्र० ३ अ० २] इति ।

पुरा कदाचिद्गायत्र्यादिच्छन्दोदेवताः परस्परं मात्सर्येण कांचिदाजिं मर्यादां प्राप्ताः । अहमेवाऽऽदौ पशून्स्वी करिष्यामीति प्रतिज्ञा मर्यादा । तत्रानीं बृहत्याख्या छन्दोदेवता देवतान्तराण्युल्लङ्घ्य स्वयमेवाजयत् । अतस्तदीयनाम्ना पशवो बार्हता इत्येवं प्रसिद्धिं गताः । यथा बृहती छन्दसां मध्ये प्रशस्ता, एवं बृहत्याख्या इष्टका अपि प्रशस्ता इति तात्पर्यार्थः ।

ता एता इष्टका दिग्विशेषेषु विधत्ते—

"मा छन्द इति दक्षिणत उप दधाति तस्माद्दक्षिणावृतो मासाः पृथिवी छन्द इति पश्चात्प्रतिष्ठित्या अग्निर्देवतेत्युत्तरत ओजो वा अग्निरोज एवोत्तरतो धत्ते तस्मादुत्तरतोभिप्रयायी जयति" [सं० का० ५ प्र० ३ अ० २] इति ।

माशब्देन मासा उच्यन्ते । दक्षिणदिग्विधानेन दाक्षिणादिवृत्तिः, सूर्यस्य गोलकप्रदक्षिणावृत्त्या निष्पाद्यमानत्वाच्चैत्रादिमासा दक्षिणावृतः । पश्चिमादिष्वुपधेयानामिष्टकानां मन्त्रेष्वादौ पृथिवीशब्दः पठितः । पृथिवी च सर्वस्य जगतः प्रतिष्ठा । तस्मात्तदुपधानं प्रतिष्ठित्यै भवति । उदीच्यां दिश्युपधेयानामिष्टकानां मन्त्रादावग्निशब्दः पठितः । अग्निश्च दाहकशक्तियुक्तत्वादोज इत्युच्यते । तस्मादोज एवोदीच्यामुपहितं भवति । यस्मादुदीच्यामग्न्यादिदेवता-

---

१ स. च. °ज्यादयश्छ° । २ क. थ. ङ. °णादेः सू° । ३ क. ज. °त्पद्य° ।

(बृहत्याख्येष्टकाभिधानम्)

शक्तिरूपमोजस्तिष्ठति तस्मादुत्तराभिमुखत्वेन प्रयाणं कुर्वंस्तीर्थयात्रादिजन्यपुण्योपेतत्वात्परलोकं जयति ।

मन्त्रपाठप्राप्तामिष्टकासंख्यां प्रशंसति—

" षट्त्रिꣳशत्सं पद्यन्ते षट्त्रिꣳशदक्षरा बृहती बार्हताः पशवो बृहत्यैवास्मै पशूनव रुन्धे बृहती छन्दसाꣳ स्वाराज्यं परीयाय यस्यैता उपधीयन्ते गच्छति स्वाराज्यम् " [सं० का० ५ प्र० ३ अ० २] इति ।

बृहत्या जितत्वात्पशूनां बार्हतत्वं, जेतृत्वादेव बृहत्याः स्वाराज्यमपि ।

कल्पः—" मूर्धाऽसि राडिति सप्त बालखिल्याः पुरस्तात्प्रतीचीर्यन्ती राडिति सप्त पश्चात्प्राचीः " इति । पाठस्तु—मूर्धाऽसीति ।

हे इष्टके त्वं मूर्धा मूर्धवदुत्तमा राड्राजमाना चासि । हे इष्टके त्वं ध्रुवा स्थिरा धरुणा धारणहेतुश्चासि । हे इष्टके त्वं यन्त्री स्वयमपि नियता यमित्री सर्वेषां नियमनकारिणी चासि । हे इष्टक दर्षेऽन्नाय त्वा त्वाम्, उपदधामीति शेषः । ऊर्जे बलाय त्वामुपदधामि । कृष्यै सस्यनिष्पत्तये त्वामुपदधामि । क्षेमाय संपादितस्य धनस्य रक्षणाय त्वामुपदधामि । एतैः सप्तभिर्मन्त्रैः पुरस्तादुपधेयाः । हे इष्टके त्वं यन्त्री नियमोपेता राड्राजमाना चासि । तथा ध्रुवा स्थिरा धरणी धारणहेतुश्चासि । धर्त्री धारणं कुर्वती धरित्री भूमिरूपा चासि । आयुष आयुर्वृद्ध्यर्थं त्वामुपदधामि । वर्चसे कान्त्यर्थं त्वामुपदधामि । ओजसेऽष्टमधातुवृद्ध्यर्थं त्वामुपदधामि । बलाय तेजःकार्यार्थं त्वामुपदधामि । एतैः सप्तभिर्मन्त्रैः पश्चिमायां दिश्युपधानम् ।

तैरेतैरुभयविधमन्त्रैः साम्यमुपधानं विधत्ते—

" सप्त बालखिल्याः पुरस्तादुप दधाति सप्त पश्चात्सप्त वै शीर्षण्याः प्राणा द्वावधस्ताद्वौ प्राणानाꣳ सवीर्यत्वाय " [सं० का० ५ प्र० ३ अ० २] इति ।

बालखिल्यनामकैर्मुनिभिरादौ दृष्टत्वादिष्टका अपि बालखिल्याख्याः । इष्टकागतया सप्तसंख्यया शीर्षण्यच्छिद्रसाम्यं, पुरस्तादेकं सप्तकं पश्चादेकं सप्तकमिति सप्तकयोर्द्वैरूप्यादधोदेशवर्तिच्छिद्रद्वयसाम्यम् । अतः सर्वेषां प्राणानां सवीर्यत्वायेदमुपधानम् । सप्तकद्वये मन्त्रविभागं विधत्ते—

" मूर्धाऽसि राडिति पुरस्तादुप दधाति यन्त्री राडिति पश्चात्प्राणानेवास्मै समीचो दधाति " [सं० का० ५ प्र० ३ अ० २] इति ।

(चतुर्थचितावक्षणयास्तोमीयाख्येष्टकासु कासांचिदभिधानम्)

सप्तकद्वयस्य परस्पराभिमुख्येन प्राणानां सम्यक्त्वं संपद्यते । सम्यक्त्वं नाम स्वस्वव्यापारक्षमत्वम् । अत्र विनियोगसंग्रहः-

मा दक्षिणस्यां बृहतीः पृथि पश्चादथोत्तरे ।
अग्निरित्यादिकाः सर्वा द्वादश द्वादशोदिताः ॥
मूर्धा यन्त्री वालखिल्याः पुरः पश्चाच्च सप्तभिः ।
सप्तमे त्वनुवाकेऽस्मिन्मन्त्राः पञ्चाशदीरिताः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे तृतीयमपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ चतुर्थाष्टके तृतीयप्रपाठकेऽष्टमोऽनुवाकः) ।

आशुस्त्रिवृद्भ्रान्तः पञ्चदशो व्योम सप्तदशः प्रतूर्तिरष्टादशस्तपो नवदशोऽभिवर्तः सविꣳशो धरुणं एकविꣳशो वर्चो द्वाविꣳशः संभरणस्त्र-योविꣳशो योनिश्चतुर्विꣳशो गर्भाः पञ्चविꣳश ओजस्त्रिणवः क्रतुरेकत्रिꣳशः प्रतिष्ठा त्रय-स्त्रिꣳशो ब्रध्नस्य विष्टपं चतुस्त्रिꣳशो नाकः षट्त्रिꣳशो विवर्तोऽष्टाचत्वारिꣳशो धर्त्रश्चतु-ष्टोमः (१) ॥

(आशुः सप्तविꣳशत्) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके तृतीयप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ चतुर्थकाण्डे तृतीयप्रपाठकेऽष्टमोऽनुवाकः) ।

सप्तमेऽनुवाके बृहत्याद्या इष्टका अभिहिताः । तावता तृतीया चितिः समाप्ता । अथाष्टमे चतुर्थी चितावक्षणयास्तोमीयाख्यासिष्टकासु कासुचि-

(चतुर्थचितावक्षण्यास्तोभीयाख्येष्टकासु कासांचिदभिधानम्)

क्रियन्ते । कल्पः—" भोभूते पौर्वाह्णिकीभ्यां प्रचर्य चतुर्थीं चितिं चिनोत्याशु-शिवृदग्नेर्भागोऽसीत्येताभ्यामनुवाकाभ्यां यथाब्राह्मणमुपधाय " इति ।

तत्राऽऽद्यानुवाकपाठस्तु—

आशुशिवृद्धान्त इति । अत्र त्रिवृत्पञ्चदशसप्तदशाष्टादशनवदशादि-शब्दाः स्तोमविशेषवाचिनः । स्तोमाश्च तृचनिष्ठस्य साम्न आवृत्तिभेदाच्चिष्य-न्ते । आवृत्तिप्रकारस्तु त्रिवृत्पञ्चदशसप्तदशानां समिधमा तिष्ठेत्यस्मिन्ननुवाके सामब्राह्मणोदाहरणेनास्माभिर्व्याख्यातः । एकविंशत्रिणवत्रयस्त्रिंशाख्या अपि स्तोमाः सामब्राह्मणे निरूपिताः। अष्टादशनवदशादयस्तु न्यायेनोन्नेया उपस्तोमाः। ते तु ब्राह्मण आम्नाताः। तदुन्नयनार्थस्त्वावृत्तिप्रकारः सामसूत्रादवगन्तव्यः। अत्र त्रिवृदादयश्चतुष्टोमान्ता अष्टादशसंख्याकाः स्तोमविशेषा आम्नाताः। आशुर्मान्त इत्यादीनि स्तोमविशेषणानि। तत्र कानिचिद्गुणवाचीनि कानिचि-द्द्रव्यवाचीनि । तथा सति गुणसंबन्धं द्रव्यतादात्म्यं वा स्तोमेषूपचर्य तत्तत्स्तो-मरूपत्वं तत्तदिष्टकायाः प्रशंसार्थमुपन्यस्यते । तत्रैवमक्षरयोजना—आशुः शैघ्र्यगुणोपेतो यश्शिवृत्स्तोमो हे इष्टके तद्रूपा त्वमसि । एवमुत्तरत्रापि योज्यम् । भान्तो भासमानः। व्योम प्रसिद्धं द्रव्यम् । प्रकृष्टा तूर्तिस्त्वरा यस्यासौ प्रतूर्तिः। शीघ्रकारिणीत्यर्थः । तपः प्रसिद्धम् । अभिवर्तः सामविशेषः । सह विंशत्या संख्यया वर्तत इति सविंशः स्तोमविशेषः । धरुणो धारकः । वर्चो बलहेतुः । संभरणः सम्यक्पोषकः । योनिः प्रजोत्पादकः । गर्भाः प्रसिद्धाः । ओजोऽ-ष्टमधातुः । क्रतुर्ज्योतिष्टोमादिः । प्रतिष्ठा स्थितिहेतुः । ब्रध्नस्याऽऽदित्यस्य विष्टपं निवासस्थानम् । ' असौ वा आदित्यो ब्रध्नः ' इतिश्रुत्यन्त-रात् । नाकः स्वर्गाख्यभोगभूमिः । विपरीतत्वेन वर्तनं यस्यासौ विवर्तः । त्रिवृत्पञ्चदशसप्तदशैकविंशत्रिणवत्रयस्त्रिंशा अनेनैवाऽऽम्नातक्रमेण क्वचिदनु-ष्ठीयन्ते, क्वचित्तु विपरीतक्रमेण । अत एव सूत्रकारेण क्वचिदुक्तम्—" त्रय-स्त्रिंशारम्भणाश्शिवृदुत्तमाः " इति । धर्त्रो धारकः । चतुष्टोमस्त्रिवृत्पञ्च-दशसप्तदशैकविंशानां समूहः । एतैः स्तोमवाचिभिरष्टादशभिर्मन्त्रैः स्तोम-रूपत्वमापादिता अष्टादशेष्टका उपदध्यात् ।

एतैर्मन्त्रैः साध्यमुपधानं विधत्ते—

" देवा वै यज्ञेऽकुर्वत तदसुरा अकुर्वत ते देवा एता अक्षण्यास्तोमीया [अपश्यन्ता अन्यथाऽनुष्ठान्यथोपादधत तदसुरा नान्ववायन्ततो देवा अभव-

(चतुर्थचितावक्षणयास्तोमीयाख्येष्टकासु कासांचिद्भिधानम्)

ष्पराऽसुरा यदक्षणयास्तोमीया अन्यथाऽनूच्यान्यथोपदधाति भ्रातृव्याभिभूत्यै भवत्यात्मना पराऽस्य भ्रातृव्यो भवति " [सं०का०५प्र०३अ०३] इति ।

पुरा कदाचिद्देवसाम्यं प्राप्तुमसुरा देवसमीपे गूढचारिणं पुरुषमवस्थाप्य तन्मुखेनावगत्य देवा यज्ञे यद्यदङ्गमकुर्वंस्तत्सर्वं स्वयमपि तथैवानुष्ठितवन्तः । ततस्तान्वञ्चयितुं देवा अक्षणयास्तोमीयाख्या एता इष्टका अपश्यन् । स्तोमवाचिशब्दोपेतैर्मन्त्रैरुपधेयत्वात्स्तोमीयाः । तत्रापि मन्त्रपाठक्रममुल्लङ्घ्य वक्रत्वेनानुष्ठेयत्वादक्षणयास्तोमीयाः । कथं वक्रत्वमिति तदुच्यते—अन्यथा मन्त्रानुवचनमन्यथेष्टकोपधानमिति वक्रत्वम् । भान्तः पञ्चदश इत्ययमनुवचने द्वितीयो मन्त्रः, उपधाने तुरीयः । व्योम सप्तदश इत्ययनुवचने तृतीयो मन्त्रः, उपधाने तु द्वितीयः । एवं सर्वत्र वक्रत्वं द्रष्टव्यम् । तदानीं गूढचारी विभ्रान्तः । तन्मुखादनवगतशब्दा असुरा देवाननुगन्तुं नाशक्नुवन् । ततोऽसुराणां पराभवो देवानां जयश्चाऽऽसीत् । तस्माद्यजमानोऽपि तथैवोपदध्यात् । तदुपधानं भ्रातृव्याभिभूत्यै स्वस्य जयाय च संपद्यते ।

तदेवं सामान्याकारेण विधाय विशेषाकारेण प्रथमं मन्त्रं विनियुङ्क्ते—

" आशुस्त्रिवृदिति पुरस्तादुप दधाति यज्ञमुखं वै त्रिवृद्यज्ञमुखमेव पुरस्ताद्धि यातयति " [सं० का० ५ प्र० ३ अ० ३] इति ।

स्तोमानां मध्ये प्रथमभावित्वाच्चिवृतो यज्ञमुखत्वम् । तन्मन्त्रेणोपधानेन पूर्वस्यां दिशि यज्ञमुखं प्रसारयति । अथानुवचने तृतीयं मन्त्रं विनियुङ्क्ते—

" व्योम सप्तदश इति दक्षिणतोऽन्नं वै व्योमान्नꣳ सप्तदशोऽन्नमेव दक्षिणतो धत्ते तस्माद्दक्षिणेनान्नमद्यते" [सं० का० ५ प्र० ३ अ० ३] इति ।

व्योमवदाकाशबहुले क्षेत्रे बहुधान्यनिष्पत्तेर्व्योम्नोऽन्नत्वम् । सप्तदशस्तोमस्यान्नसंपादकैर्वैश्यैः सह प्रजापतेर्मध्यदेशादुत्पन्नत्वादन्नत्वम् । यस्मादीदृशेन मन्त्रेण दक्षिणस्यां दिश्युपधानं तद्दिश्यन्नोपधानतुल्यं तस्माल्लोकेऽपि हि दक्षिणहस्तेनान्नं भुज्यते । अथ सप्तममन्त्रं विनियुङ्क्ते—

" धरुण एकविꣳश इति पश्चात्प्रतिष्ठा वा एकविꣳशः प्रतिष्ठित्यै " [सं० का० ५ प्र० ३ अ० ३] इति ।

सामिधेनीप्रकरण एकविंशस्तोमानां प्रतिष्ठेत्यान्नातत्वादस्य प्रतिष्ठात्वम् ।

अथ द्वितीयं मन्त्रं विनियुङ्क्ते—

(चतुर्थचितावक्ष्णयास्तोमीयाख्येष्टकासु कासांचिदभिधानम्)

" भान्तः पञ्चदश इत्युत्तरत ओजो वै भान्त ओजः पञ्चदश ओज एवो त्तरतो धत्ते तस्मादुत्तरतोभिप्रयायी जयति" [सं० का० ५ प्र० ३ अ० ३] इति

भासंनस्यौजःकार्यत्वादोजस्त्वम्। अन्यत्र पञ्चदशो वज्र इत्याम्नातत्वादो जोबद्बलहेतुत्वाच्चौजस्त्वम्। अथ चतुर्थं मन्त्रं विनियुङ्क्ते—

" प्रतूर्तिरष्टादश इति पुरस्तादुप दधाति द्वौ त्रिवृतावभिपूर्वं यज्ञमुखे वि य तयति " [सं० का० ५ प्र० ३ अ० ३] इति।

अष्टादशस्तोमस्य पूर्वोत्तरभागयोर्नवसंख्योपेतत्वाद्द्वौ त्रिवृतौ संपद्येते। ते चाभिपूर्वमनुक्रमेण यज्ञमुखे प्रसारयति। अथ षष्ठं मन्त्रं विनियुङ्क्ते—

" अभिवर्तः सविꣳश इति दक्षिणतोऽन्नं वा अभिवर्तोऽन्नꣳ सविꣳशो न्नमेव दक्षिणतो धत्ते तस्माद्दक्षिणेनान्नमद्यते " [सं० का० ५ प्र० ३ अ ३] इति।

अभिवर्तसाम्नोऽन्नसाधनत्वादन्नत्वम्। विंशस्तोमस्य दशसंख्याकद्वयोपेतत्व विराड्द्वाराऽन्नत्वम्। अथाष्टमं मन्त्रं विनियुङ्क्ते—

" वर्चो द्वाविꣳश इति पश्चाद्यद्विꣳशतिर्द्वे तेन विराजौ यद्द्वे प्रतिष्ठा ते विराजोरेवाभिपूर्वमन्नाद्ये प्रति तिष्ठति " [सं० का० ५ प्र० ३ अ० ३ इति। द्वाविंशतिसंख्यामध्ये येयं विंशतिस्तेन विंशतिसंख्याविशेषेण दशसंख्यं पेते द्वे विराजौ संपद्येते। विंशतेरुपरि ये द्वे तेन द्विसंख्याविशेषेण पादयोः प्रतिष्ठाहेतुत्वम्। तथा सति विराजोः संबन्धिन्येवान्नाद्ये क्रमेण प्रतिष्ठितो भवति अथ पञ्चममन्त्रं विनियुङ्क्ते—

" तपो नवदश इत्युत्तरतस्तस्मात्सव्यो हस्तयोस्तपस्वितरः " [सं० का ५ प्र० ३ अ० ३] इति।

यस्मादुदीच्यां दिशि तप इति मन्त्रः प्रवर्तते तस्मादुत्तरदिग्वर्ती वामहस्त द्वयोर्हस्तयोर्मध्येऽतिशयेन तपस्वी। दक्षिणहस्तवद्भोजनशक्त्यभावादशन तपोरूपत्वात्। अथ दशमं मन्त्रं विनियुङ्क्ते—

" योनिश्चतुर्विꣳश इति पुरस्तादुप दधाति चतुर्विꣳशत्यक्षरा गायत्री गाय यज्ञमुखं यज्ञमुखमेव पुरस्ताद्वि यातयति " [सं० का० ५ प्र० ३ अ ३] इति। प्रातःसवने प्रवृत्तत्वाद्गायत्र्या यज्ञमुखत्वम्।

---

१ घ. ङ. °समान°। २ ख. घ. ङ. च. °त्वादोज°। ३ क. घ. ङ. °ख्याङ्क ४ क. ख. च. °तत्वात्प्रतिष्ठा। तादृशद्विसंख्याविशेषण त°।

(चतुर्थचितावक्षणयास्तोमीयास्येष्टकासु कासांचिदभिधानम्)

अथैकादशं मन्त्रं विनियुङ्क्ते—

" गर्भाः पञ्चविꣳश इति दक्षिणतोऽग्निं वै गर्भा अग्निं पञ्चविꣳशोऽग्निमेव दक्षिणतो धत्ते तस्माद्दक्षिणेनान्नमद्यते" [सं० का०५ प्र० ३ अ०३] इति ।

गर्भाणामन्नकार्यत्वादन्नत्वं, पञ्चविंशस्याग्निहेतुत्वादग्नित्वम् ।

अथ द्वादशं मन्त्रं विनियुङ्क्ते—

" ओजाक्षिणव इति पश्चादिमे वै लोकाक्षिणव एष्वेव लोकेषु प्रति तिष्ठति " [सं० का० ५ प्र० ३ अ० ३] इति ।

क्षिणवे क्षिसंख्याया विद्यमानत्वाल्लोकत्रयरूपत्वम् ।

अथ नवमं मन्त्रं विनियुङ्क्ते—

" संभरणस्त्रयोविꣳश इत्युत्तरतस्तस्मात्सव्यो हस्तयोः संभार्यतरः " [सं० का० ५ प्र० ३ अ० ३] इति ।

सव्यग्भरणीयं भिक्षापात्रादिकं येन वामहस्तेन सोऽयं संभार्यतरः । यतः सोऽतिशयेन हस्तयोरुभयोर्मध्ये धार्यं धारयति ।

अथ त्रयोदशं मन्त्रं विनियुङ्क्ते—

" क्रतुरेकाग्निꣳश इति पुरस्तादुप दधाति वाग्वै क्रतुर्यज्ञमुखं वाग्यज्ञमुखमेव पुरस्ताद्धि यातयति " [सं० का० ५ प्र० ३ अ० ३] इति ।

मन्त्रनिष्पाद्यत्वात्क्रतोर्वाङ्मयत्वम् । सा च वाग्यज्ञस्य मुखम् । प्रथमं मन्त्रमुच्चार्य पश्चादनुष्ठेयत्वात् । अथ पञ्चदशं मन्त्रं विनियुङ्क्ते—

" ब्रध्नस्य विष्टपं चतुस्त्रिꣳश इति दक्षिणतोऽसौ वा आदित्यो ब्रध्नस्य विष्टपं ब्रह्मवर्चसमेव दक्षिणतो धत्ते तस्माद्दक्षिणोऽर्धो ब्रह्मवर्चसितरः " [सं० का० ५ प्र० ३ अ० ३] इति ।

यद्यप्यादित्य एव ब्रध्नो विष्टपं तु तस्य निवासस्थानं तथाऽप्यत्राभेद उपचर्यते । दक्षिणस्यां दिश्यादित्यसंबन्धिमन्त्रेणोपधानाद्दक्षिणहस्तो ब्रह्मवर्चसाधिकैः। दक्षिणहस्ते ब्रह्मवर्चसशब्दाभिधेयं यद्दैदिकहोमपूजादिकं धारयति तस्माद्दक्षिणभाग एवातिशयेन ब्रह्मवर्चसयुक्तैः। अत एवाऽऽशीर्वादादौ स एवेहस्तः प्रसरति । अथ चतुर्दशं मन्त्रं विनियुङ्क्ते—

"प्रतिष्ठा त्रयस्त्रिꣳश इति पश्चात्प्रतिष्ठित्यै" [सं०का०५प्र०३अ०३] इति ।

---

१ घ. ङ. °भार्यः । स चाति° । २ ख. च. °रः । स चात° । ३ ख. च. °कः । षड्वे° । ४ घ. ङ. °त्रः । आशी° । ५ ख. च. °व प्रसृतः । अ° ।

(अवशिष्टाश्वमेधास्तोमीयास्येष्टकाभिधानम्)

मन्त्रगतेनैव प्रतिष्ठाशब्देन प्रतिष्ठा सूचिता। अथ षोडशं मन्त्रं विनियुङ्क्ते—

" नाकः षदृत्रिꣳश इत्युत्तरतः सुवर्गो वै लोको नाकः सुवर्गस्य लोकस्य समष्ट्यै " [तं० का० ५ प्र० ३ अ० ३] इति। नाकशब्दार्थः प्रतिष्ठ एव। अत्र विनियोगसंग्रहः—

आशुरष्टादशाऽऽदध्यादक्षण्यास्तोमसंयुताः ॥ इति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे तृतीयप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ चतुर्थाष्टके तृतीयप्रपाठके नवमोऽनुवाकः)।

अग्नेर्भागोऽसि दीक्षाया आधिपत्यं ब्रह्म स्पृतं त्रिवृत्स्तोम इन्द्रस्य भागोऽसि विष्णोराधिपत्यं क्षत्रꣳ स्पृतं पञ्चदशः स्तोमो नृचक्षसां भागोऽसि धातुराधिपत्यं जनित्रꣳ स्पृतꣳ सप्तदशः स्तोमो मित्रस्य भागोऽसि वरुणस्याऽऽधिपत्यं दिवो वृष्टिर्वाताः स्पृता एकविꣳशः स्तोमोऽदित्यै भागोऽसि पूष्ण आधिपत्यमोजः स्पृतं त्रिणवः स्तोमो वसूनां भागोऽसि (१) रुद्राणामाधिपत्यं चतुष्पात्स्पृतं चतुर्विꣳशः स्तोम आदित्यानां भागोऽसि मरुतामाधिपत्यं गर्माः स्पृताः पञ्चविꣳशः स्तोमो देवस्य सवितुर्भागोऽसि बृहस्पतेराधिपत्यꣳ समीचीर्दिशः स्पृताश्चतुष्टोमः स्तोमो यावानां भागोऽस्ययावानामाधिपत्यं प्रजाः स्पृताश्चतुश्चत्वारिꣳशः स्तोम ऋभूणां भागोऽसि विश्वेषां देवानामाधिपत्यं भूतं विशान्तꣳ स्पृतं त्रयस्त्रिꣳशः स्तोमः (२) ॥

(अवशिष्टाक्षण्यास्तोमीयाख्येष्टकाभिधानम्)

(वसूनां भागोऽसि षट्चत्वारिंशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके तृतीयप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ चतुर्थकाण्डे तृतीयप्रपाठके नवमोऽनुवाकः) ।

अष्टमेऽनुवाके काश्चिदक्षण्यास्तोमीयारूपा इष्टका उक्ताः । अथ नवमेऽवशिष्टास्ता उच्यन्ते । तासामवशिष्टानामिष्टकानां मन्त्रेषु प्रथमं मन्त्रमाह—

अग्नेर्भागोऽसीति । हे इष्टके योऽयमग्नेर्भागो हविर्लक्षणः, यच्च दीक्षादेवताया आधिपत्यं स्वामित्वं स्पृतं ब्रह्म देवानां प्रीतिकरं मन्त्रजातं ब्राह्मणजातिर्वा, योऽपि त्रिवृदाख्यः स्तोमविशेषस्तत्सर्वं त्वमसि । अथ द्वितीयं मन्त्रमाह—

इन्द्रस्य भागोऽसीति । हे इष्टके योऽयमिन्द्रस्य भागो हविर्विशेषः, यच्च विष्णोः परमेश्वरस्याऽऽधिपत्यं, यदपि स्पृतं प्रीतिहेतुः क्षत्रं बलं क्षत्रियजातिर्वा, योऽपि पञ्चदशाख्यः स्तोमस्तत्सर्वं त्वमसि । अथ तृतीयं मन्त्रमाह—

नृचक्षसामिति । ये मनुष्याः सन्तश्चक्षते वेदं व्यक्तमुच्चारयन्ति ते नृचक्षस ऋत्विगादयस्तेषां भागो दक्षिणारूपो गवादिः । धातुः प्रजापतेर्यदाधिपत्यं, यच्च स्पृतं प्रीतिकरं जनित्रं जननशीलमन्नं, यो हि(ऽपि) सप्तदशाख्यः स्तोमविशेषस्तत्सर्वं त्वमसि । अथ चतुर्थं मन्त्रमाह—

मित्रस्य भागोऽसीति । स्पृताः प्रीतिहेतवो वाता वायवो दिवः सकाशादागता वृष्टिश्च । अथ पञ्चमं मन्त्रमाह—

अदित्यै भागोऽसीति । ओजो बलमष्टमधातुर्वा । अथ षष्ठं मन्त्रमाह—

वसूनां भागोऽसीति । चतुष्पाद्गवाश्वादिः । अथ सप्तमं मन्त्रमाह—

आदित्यानां भागोऽसीति । गर्भा द्विपदां चतुष्पदां चोदरगताः । अथाष्टमं मन्त्रमाह—

देवस्य सवितुरिति । यासु दिक्ष्ववस्थिताः प्राणिनोऽनुकूलास्ता दिशः समीच्यस्ता एव स्पृताः । अथ नवमं मन्त्रमाह—

यावानां भागोऽसीति । युतो मिश्री भवतः शुक्लकृष्णपक्षावत्रेति यावा मासाः । अतथाविधत्वादयावा अर्धमासाः । अथ दशमं मन्त्रमाह—

ऋभूणां भागोऽसीति । ऋभुशब्दो देवसामान्यवाची । गणविशेषो विश्वे देवाः । भूतं निष्पन्नं, निशान्तं गृहम् । एतैर्मन्त्रैरुपधेयास्वक्षण्यास्तोमीयास्विष्ट-

१ ख. च.° क्षाया ।

(अवशिष्टाक्षण्यास्तोमीयाख्येष्टकाभिधानम्)

कासु मन्त्रविशेषेषु देशविशेषेषु च सहोपधानं विधीयते । तत्र प्रथमं मन्त्रं विनियुङ्क्ते—

" अग्नेर्भागोऽसीति पुरस्तादुप दधाति यज्ञमुखं वा अग्निर्यज्ञमुखं दीक्षा यज्ञमुखं अह्न यज्ञमुखं त्रिवृद्यज्ञमुखमेव पुरस्ताद्धि यातयति " [सं० का० ५ प्र० ३ अ० ४] इति ।

प्रथममाहितेऽग्नौ पश्चाद्यज्ञस्य प्रवृत्तेरग्निर्यज्ञमुखम् । सोमयागस्य दीक्षोपक्रमत्वाद्दीक्षा वा यज्ञमुखत्वम् । यज्ञस्य ऋत्विग्वरणपूर्वकत्वादार्त्विज्यस्य च ब्राह्मणधर्मत्वाद्ब्राह्मणजातिर्यज्ञमुखम् । स्तोत्राणां मध्ये प्रथमस्तोत्रस्य बर्हिष्पवमानस्य त्रिवृत्स्तोमेन निष्पाद्यमानत्वात्त्रिवृतो यज्ञमुखत्वम् । अनेन मन्त्रेणोपधाने तत्सर्वं यज्ञमुखं पुरस्तात्प्रसारयति । अथ तृतीयं मन्त्रं विनियुङ्क्ते—

" नृचक्षसां भागोऽसीति दक्षिणतः शुश्रुवांसो वै नृचक्षसोऽन्नं धाता जायैवास्मा अन्नमपि दधाति तस्माज्जातोऽन्नमत्ति जनित्रꣳ स्तुतꣳ सप्तदशः स्तोम इत्याहान्नं वै जनित्रमन्नꣳ सप्तदशोऽन्नमेव दक्षिणतो धत्ते तस्माद्दक्षिणेनान्नमद्यते " [सं० का० ५ प्र० ३ अ० ४] इति ।

वेदशास्त्रपारं गताः शुश्रुवांसः । त एव नृचक्षःशब्देनाभिधीयन्ते । चक्षते व्यक्तं ब्रुवत इति चक्षसः । नरश्च ते चक्षस इति नृचक्षसः । यद्वा नृषु मनुष्येषु मध्ये चक्षसो व्यक्तं वकारः । धातुरन्नोत्पादकत्वादन्नत्वम् । अतो मन्त्रे धातृशब्दपाठोऽन्नाय यजमानायान्नं संपादयति । तस्मिन्मन्त्रे जनित्रमित्याद्युत्तरभागमपि ब्रूयात् । जायत इति व्युत्पत्त्या जनित्रशब्दोऽन्नवाची । सप्तदशस्तोमस्यान्नकारणत्वादन्नत्वम् । एवं सति कृत्स्नमप्यन्नं दक्षिणस्यां दिशि संपादयति । यस्माद्दक्षिणादिशोऽन्नभागित्वं तस्माद्दक्षिणहस्तेनान्नं भुङ्क्ते ।

अथ चतुर्थं मन्त्रं विनियुङ्क्ते—

" मित्रस्य भागोऽसीति पश्चात्प्राणो वै मित्रोऽपानो वरुणः प्राणापानावेवास्मिन्दधाति दिवो वृष्टिर्वाताः स्तृता एकविꣳशः स्तोम इत्याह प्रतिष्ठा वा एकविꣳशः प्रतिष्ठित्यै " [सं० का० ५ प्र० ३ अ० ४] इति ।

मित्रावरुणयोः प्राणापानाभिमानित्वात्तद्रूपत्वम् । तस्य मन्त्रस्योत्तरभागे सर्वस्तोमधारिप्राणरूपस्यैकविंशस्याभिधानं प्रतिष्ठित्यै संपद्यते ।

---

१ ब. ङ. °पदधातस्तत्स° ।

द्वितीयं मन्त्रं विनियुङ्क्ते—

" इन्द्रस्य भागोऽसीत्युत्तरत ओजो वा इन्द्र ओजो विष्णुरोजः क्षत्रमोजः पञ्चदश ओज एवोत्तरतो धत्ते तस्मादुत्तरतोभिप्रयायी जयति " [सं० का० ५ प्र० ३ अ० ४] इति ।

इन्द्रादीनां बलवत्त्वादोजोरूपत्वम् । ततः रुद्रेष्वोज उदीच्यां दिशि स्थापितं भवति । ओजोयुक्तत्वादेवोत्तरदिग्गामी तीर्थयात्रादिपुण्येन स्वर्गं जयति । अथ षष्ठं मन्त्रं विनियुङ्क्ते—

" वसूनां भागोऽसीति पुरस्तादुप दधाति यज्ञमुखं वै वसवो यज्ञमुखꣳ रुद्रा यज्ञमुखं चतुर्विꣳशो यज्ञमुखमेव पुरस्ताद्धि यातयति " [सं० का० ५ प्र० ३ अ० ४] इति ।

वसूनां प्रातःसवनाभिमानित्वाद्यज्ञमुखत्वम् । प्रातःसवनाभिमानित्वं च छन्दोगा आमनन्ति—"ब्रह्मवादिनो वदन्ति यद्वसूनां प्रातःसवनम् " इति । रुतं शब्दं मन्त्ररूपं द्रावयन्ति प्रवर्तयन्तीति रुद्राः । तथा सति रुद्रप्रवर्तितमन्त्रपूर्वकत्वाद्यज्ञस्य रुद्राणां यज्ञमुखत्वोपचारः । चतुर्विंशचतुश्चत्वारिंशाष्टाचत्वारिंशल्लक्षणेषु छन्दोमेषु प्रथमत्वाच्चतुर्विंशस्य यज्ञमुखत्वम् ।

अथ सप्तमं मन्त्रं विनियुङ्क्ते—

" आदित्यानां भागोऽसीति दक्षिणतोऽन्नं वा आदित्या अन्नं मरुतोऽन्नं गर्भा अन्नं पञ्चविꣳशोऽन्नमेव दक्षिणतो धत्ते तस्माद्दक्षिणेनान्नमद्यते " [सं० का० ५ प्र० ३ अ० ४] इति ।

' आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ' इत्यन्नहेतुत्वादादित्यानामन्नत्वम् । मरुतां वैश्यरूपत्वेनान्नसंपादकत्वादन्नत्वम् । गर्भाणामन्नकार्यत्वादन्नत्वम् । पञ्चविंशस्तोमस्य शास्त्रसिद्धान्नहेतुत्वादन्नत्वम् ।

अथ पञ्चमं मन्त्रं विनियुङ्क्ते—

" अदित्यै भागोऽसीति पश्चात्प्रतिष्ठा वा अदितिः प्रतिष्ठा पूषा प्रतिष्ठा त्रिणवः प्रतिष्ठित्यै " [सं० का० ५ प्र० ३ अ० ४] इति ।

अदितिर्भूमिः । सा च निवासहेतुत्वात्प्रतिष्ठा । पूष्णः पोषकत्वेन प्रतिष्ठात्वम् । त्रिणवस्तोमस्य शास्त्रसिद्धं प्रतिष्ठात्वम् । अथाष्टमं मन्त्रं विनियुङ्क्ते—

---

१ ख. च. स्तोमेषु ।

(अवशिष्टाङ्गयास्तोमीयाख्येष्टकाभिधानम्)

" देवस्य त्वा सवितुर्प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां ब्रह्म वै देवः सविता ब्रह्म बृहस्पतिर्ब्रह्म चतुष्टोमो ब्रह्मवर्चसमेवोत्तरतो धत्ते तस्मादुत्तरोऽर्धो ब्रह्मवर्चसितरः सावित्रवती भवति प्रसूत्यै तस्माद्ब्राह्मणानामुदीची सनिः प्रसूता " [सं० का० ५ प्र० ३ अ० ४] इति ।

प्रातःसंध्यादौ ब्राह्मणैरुपास्यमानत्वात्सवितुर्ब्रह्मत्वम् । बृहस्पतेर्ब्राह्मणजात्वभिमानित्वाद्ब्रह्मत्वम् । तच्च " ब्रह्म वै देवानां बृहस्पतिः " इति श्रुत्यन्तरादवगम्यते । चतुष्टोमस्य शास्त्रसिद्धं ब्रह्मत्वम् । सवितृप्रतिपादको मन्त्रः सावित्रस्तेन मन्त्रेणोपहितेष्टका सावित्रवती । अतः सा प्रसवाय संपद्यते । यस्माद्ब्रह्मरूपसवितृप्रतिपादकमन्त्रताभ्येष्टकोत्तरस्यां दिश्युपहिता तस्माद्ब्राह्मणानामुदीची सनिः प्रसूतोत्तरस्यां दिशि यज्ञाभिक्षादिरूपा याच्ञा शास्त्रेणाभ्यनुज्ञाता । विन्ध्यस्योत्तरभागे हि पुण्यभूमौ श्रुत्वा ब्राह्मणा वर्तन्ते, तस्मात्तत्र प्रतिग्रहः प्रशस्तः ।

पूर्वानुवाकान्तातो सप्तदशाष्टादशमन्त्रावितः पूर्वं न विनियुक्तौ । तत्र द्वादशं मन्त्रमिदानीं विनियुङ्क्ते—

" धर्त्रश्चतुष्टोम इति पुरस्तादुप दधाति यज्ञमुखं वै धर्त्रो यज्ञमुखं चतुष्टोमो यज्ञमुखमेव पुरस्ताद्धत्ते यातयति " [सं० का० ५ प्र० ३ अ० ४] इति ।

धर्त्रो धारयिताऽग्निष्टोमः । स च सोमयागानां प्रथमभावित्वाद्यज्ञमुखम् । चतुष्टोमः (+ षष्टिस्तोमस्तृतीयः) । तस्य यज्ञमुखभूतत्रिवृदात्मकत्वाद्यज्ञमुखत्वम् । अथ प्रकृतानुवाकगतं नवमं मन्त्रं विनियुङ्क्ते—

" यावानां भागोऽसीति दक्षिणतो मासा वै यावा अर्धमासा अयावास्तस्माद्दक्षिणावृतो मासा अन्नं वै यावा अन्नं प्रजा अन्नमेव दक्षिणतो धत्ते तस्माद्दक्षिणेनान्नाद्यते " [सं० का० ५ प्र० ३ अ० ४] इति ।

गोलकस्य दाक्षिण्येन संचरतोऽऽदित्येन निष्पाद्यत्वान्मासानां दक्षिणावृत्त्वम् । यावशब्दवाच्यानां मासानां कालरूपाणामन्नपाकहेतुत्वादन्नत्वम् । प्रजानामन्नभोक्तृत्वादन्नत्वम् । अथ दशमं मन्त्रं विनियुङ्क्ते—

" ऋभूणां भागोऽसीति पश्चात्प्रतिष्ठित्यै " [सं० का० ५ प्र० ३ अ० ४] इति ।

+ धनुश्चिह्नान्तर्गतस्थाने भट्टभास्करभाष्यानुसारी " समष्टिस्तोत्रीयः स्तोमः " इति पाठो भवितुं युक्तः ।

---

१ ख. च. °स्यत्वा° । २ ख. °भः, त° । ३ ख. च. °द्वात्म° ।

देवानामनुग्राहकत्वेन प्रतिष्ठाहेतुत्वम् ।

अथ पूर्वानुवाकगतं सप्तदशं मन्त्रं विनियुङ्क्ते—

" वितर्तोऽष्टाचत्वारिंश इत्युत्तरतोऽनयोर्लोकयोः सवीर्यत्वाय तस्मादिमौ लोकौ समावद्वीर्यौ " [सं० का० ५ प्र० ३ अ० ४] इति ।

स्तोमानां मध्येऽष्टाचत्वारिंशः स्तोमः सर्वोत्तमः । तदोऽप्यधिकस्य स्तोमस्याभावात् । मनुष्यलोके दिशां मध्ये विन्ध्यादुत्तरा दिगुत्तमा । अत उत्तमद्वयमेलनेन मनुष्यलोको वीर्यवान्संपन्नः । स्वर्गलोकस्य देवाधिष्ठितत्वाद्वीर्यवत्त्वं प्रसिद्धम् । एवं च सत्युभयोर्लोकयोः समानवीर्यत्वं भवति । यस्मादेवं मनुष्यलोकस्य वीर्यवत्त्वं संपादितं तस्मादिमौ लोकौ समावद्वीर्यौ । मनुष्यलोकः पुण्यानुष्ठाननिष्पादनेन वीर्यवान्स्वर्गलोकः पुण्यफलनिष्पादनेन वीर्यवानिति समत्वम् । अनुवाकद्वयेन वक्तव्येनोपहितानामिष्टकानां मध्य एकैकस्यां दिशि या उपहितास्ताः सर्वा दिग्विशेषोपाधिना संगृह्य प्रशंसति—

" यस्य मुख्यवतीः पुरस्तादुपधीयन्ते मुख्य एव भवत्याऽस्य मुख्यो जायते यस्यान्नवतीर्दक्षिणतोऽत्यन्नमाऽस्यान्नादो जायते यस्य प्रतिष्ठावतीः पश्चात्पत्येव तिष्ठति यस्यौजस्वतीरुत्तरत ओजस्व्येव भवत्याऽस्यौजस्वी जायते " [सं० का० ५ प्र० ३ अ० ४] इति ।

मुख्यत्वेन पूर्वोक्तेष्वर्थवादेषु स्तुता इष्टका मुख्यवत्यः । तासां पूर्वस्यां दिश्युपधानेन स्वयं मुख्यो भवति, स्वपुत्रश्च मुख्यो जायते । अन्नत्वेन स्तुता इष्टका अन्नवत्यः । तासां दक्षिणदिश्युपधानेन स्वयं पुत्रश्चान्नवन्तौ संपद्येते । प्रतिष्ठात्वेन स्तुता इष्टकाः प्रतिष्ठावत्यः । तासां पश्चिमदिश्युपधानेन प्रतिष्ठितो भवति । ओजस्त्वेन स्तुता इष्टका ओजस्वत्यः । तासामुत्तरदिश्युपधानेन स्वयं पुत्रश्चौजस्विनौ भवतः । वक्तव्येन योऽयमुपधानप्रकारोऽभिहितस्तमेतं स्तोत्रशस्त्ररूपत्वेन प्रशंसति—

" अर्को वा एष यदग्निस्तस्यैतदेव स्तोत्रमेतच्छस्त्रं यदेषा विधा विधीयतेऽर्क एव तदन्नमनु विधीयते " [सं० का० ५ प्र० ३ अ० ४] इति ।

योऽग्निरस्ति स एषोऽर्कोऽर्चनीयः । तस्यार्चनाङ्गत्वेन स्तोत्रशस्त्रे अपेक्षिते । तथा सति योऽयं वक्तव्येनोपधानप्रकारोऽभिहितस्तत्रैकेनानुवाकेनोक्तं स्तोत्रमितरेणानुवाकेनोक्तं शस्त्रम् । एवं सत्यर्चनीये वह्नावेवार्चनयोग्यमनुष्ठानं क्रमेण संपादितं भवति । तदनुष्ठानं तद्वेदनं च प्रशंसति—

---

१ ख. मुख्यत्वे° ।

(सृष्टिशब्दाभिधेयेष्टकाभिधानम्)

" अत्यन्नमाऽस्यान्नादो जायते यस्यैषा विधा विधीयते य उ चैनामेवं वेद " [सं० का० ५ प्र० ३ अ० ४] इति ।

एनां विधाम् । अत्र विनियोगसंग्रहः——

अग्नेः शिष्टा दशाऽऽद्यैष्टकाया दक्षणतस्तोमसंज्ञकाः ॥ इति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे तृतीयप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ चतुर्थाष्टके तृतीयप्रपाठके दशमोऽनुवाकः) ।

एकयाऽस्तुवत प्रजा असृज्यन्त प्रजापतिरधिपतिरासीत्तिसृभिरस्तुवत ब्रह्मासृज्यत ब्रह्मणस्पतिरधिपतिरासीत्पञ्चभिरस्तुवत भूतान्यसृज्यन्त भूतानां पतिरधिपतिरासीत्सप्तभिरस्तुवत सप्तर्षयोऽसृज्यन्त धाताऽधिपतिरासीन्नवभिरस्तुवत पितरोऽसृज्यन्तादितिरधिपत्न्यासीदेकादशभिरस्तुवतर्तवोऽसृज्यन्ताऽऽर्तवोऽधिपतिरासीत्त्रयोदशभिरस्तुवत मासा असृज्यन्त संवत्सरोऽधिपतिः (१) आसीत्पञ्चदशभिरस्तुवत क्षत्रमसृज्यतेन्द्रोऽधिपतिरासीत्सप्तदशभिरस्तुवत पशवोऽसृज्यन्त बृहस्पतिरधिपतिरासन्नवदशभिरस्तुवत शूद्रार्यावसृज्येतामहोरात्रे अधिपत्नी आस्तामेकविꣳशत्याऽस्तुवतैकशफाः पशवोऽसृज्यन्त वरुणोऽधिपतिरासीत्त्रयोविꣳशत्याऽस्तुवत क्षुद्राः पशवोऽसृज्यन्त पूषाऽधिपतिरासीत्पञ्चविꣳशत्याऽस्तुवताऽऽर-

ण्याः पशवोऽसृज्यन्त वायुरधिपतिरासीत्सप्त-
विꣳशत्याऽस्तुवत द्यावापृथिवी वि (२) ऐतां
वसवो रुद्रा आदित्या अनु व्यायन्तेषामाधि-
पत्यमासीन्नवविꣳशत्याऽस्तुवत वनस्पतयोऽ-
सृज्यन्त सोमोऽधिपतिरासीदेकत्रिꣳशताऽस्तुवत
प्रजा असृज्यन्त यावानां चायावानां चाऽऽ-
धिपत्यमासीदयस्त्रिꣳशताऽस्तुवत भूतान्यशा-
म्यन्प्रजापतिः परमेष्ठ्यधिपतिरासीत् (३) ॥
(संवत्सरोऽधिपतिर्वि पञ्चत्रिꣳशत्) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
तृतीयप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ चतुर्थकाण्डे तृतीयप्रपाठके दशमोऽनुवाकः) ।

नवमेऽनुवाकेऽवशिष्टा अङ्गिरसस्तोमीया उक्ताः। अथ दशमे सृष्टिशब्दाभिधेया इष्टका उच्यन्ते। कल्पः—"एकयाऽस्तुवतेति सप्तदश सृष्टीः" इति। भाष्यम्—

एकयाऽस्तुवतेति । पूर्वे महर्षयः कदाचिद्यागकाले एकया स्तोत्रियया स्तुतिमकुर्वन् । तत्तत्सामर्थ्यात्प्रजा अधीयन्त तैर्महर्षिभिरुदपाद्यन्त । तदानीं प्रजापतिस्तासां प्रजानामधिपतिरासीत् । अथ कदाचित्तिसृभिः स्तोत्रियाभिरस्तुवत । तत्सामर्थ्यादग्नेर ब्राह्मणजातिस्तैरसृज्यत । ब्रह्मणस्पतिरिति प्रसिद्धो यो देवः सोऽयं ब्राह्मणजातेरधिपतिरासीत् । एवं सर्वत्र योज्यम् । भूतानां पतिः कश्चिद्देवविशेषः । अत एवान्यत्राऽऽम्नातम्—" भूतानां पतये स्वाहा " इति । सोऽयमत्र भूतानां पतिरधिपतिः स्वाम्यासीत् । धाता जगत्स्रष्टा । अदितिर्भूमिः। आर्तव ऋतुपालकः कश्चिद्देवविशेषः । क्षत्रं क्षत्रियजातिः । शूद्रार्यौ शूद्रो वैश्य-श्चेति जातिद्वयम् । अहर्देवता रात्रिदेवता चेत्येते जातिद्वयस्याधिपत्नी स्वामिरूपे आस्ताम् । सप्तविंशतिस्तोत्रसामर्थ्यात्पूर्वमेकीभूते द्यावापृथिव्यौ परस्परं वियुक्ते अताम्भू । तयोर्वियोगमनु वस्वादयस्त्रयो गणाः परस्परं वियुक्ता अभवन् ।

(सृष्टिशब्दाभिधेयेष्टकाभिधानम्)

तेषां वस्वादीनां द्यावापृथिव्यौ प्रत्याधिपत्यमासीत् । यावा मासदेवता अथावा अर्धमासदेवताः । उभयविधदेवतानां प्रजाः प्रति आधिपत्यमासीत् । भूतान्यशाम्यन्, प्राणिनः शान्तानुपद्रवरहितानकुर्वत। परमे तत्वलोके तिष्ठतीति परमेष्ठी । तादृशः प्रजापतिः स्वाम्यभूत् ।

एतैर्यन्त्रैः साध्यमुपधानं विधत्ते—

"सृष्टीरुप दधाति यथासृष्टमेवाव रुन्धे" [तै० का० ५ प्र० ३ अ० ४] इति ।

सृजतिधातुयुक्तैर्मन्त्रैरुपधेया इष्टकाः सृष्टयः । तासामुपधाने सति यद्वस्तु यथा सृष्टं तत्तथैव प्राप्नोति । अत्र विनियोगसंग्रहः—

एक सप्तदशाऽऽदृष्ट्यादिष्टकाः सृष्टिसंज्ञिताः ॥

अत्र मीमांसा ।

प्रथमाध्यायस्य चतुर्थपादे चिन्तितम्—

सृष्टीरुपदधातीति ये मन्त्राः सृष्टिलिङ्गकाः ।
विधेयास्ते गुणत्वेन वादो वाऽत्र गुणे विधिः ॥
आख्यातेनाभिसंबन्धादविध्यन्तरयोगतः ।
लिङ्गप्रकरणप्राप्तेर्मन्त्राणां विध्यसंभवात् ॥
तानग्नेष्टकाधानं विदध्यात्स्तोष्यते यतः ।
यथासृष्टेत्यनेनातः सृष्टीरित्यर्थवादगीः ॥
एकयाऽस्तुवतेत्यादौ मन्त्रसंघे क्वचिन्महि ।
सृष्टिशब्दस्तथाऽप्युक्तिः सृष्टिशब्देन भूयतः ॥

अग्निचयने श्रूयते—" सृष्टीरुपदधाति " इति । सृष्टिशब्दोपेता मन्त्रा यासामिष्टकानामुपधाने विधन्ते ता इष्टकाः सृष्टय इत्युच्यन्ते । सृष्टिमानासामुपदधानो मन्त्र इति विगृह्य " तद्वानासामुपधानः " इत्यादिव्याकरणसूत्रसिद्धप्रक्रियया तद्धिताद्दनात् । सृष्टिशब्दोपेताश्चोपधानमन्त्रा एकयाऽस्तुवतेत्यस्मिन्ननुवाके समाम्नाताः । ब्रह्मासृज्यत भूतान्यसृज्यन्तेत्यादिना सृजतिधातोस्तेषु मन्त्रेषु प्रयुक्तत्वात् । ते च मन्त्रा अत्र सृष्टिशब्देनोपधाने गुणत्वेन विधीयन्ते । कुतः । उपदधातीत्यनेनाऽऽख्यातेनाभिसंबन्धात् । न चार्थवादत्वमस्य संभवति । विध्यन्तरेण सहैकवाक्यत्वाभावादिति प्राप्ते ब्रूमः—अग्निच-

१ ख. च. गुणो ।

यनप्रकरणे पठितत्वात्तेषां मन्त्राणां सामान्यतश्चयनसंबन्धोऽवगम्यते । विशेषसंबन्धस्तु सृजतिलिङ्गादवगन्तव्यः। तथा सति प्राप्तत्वाच्च ते मन्त्रा अत्र विधीयन्ते, किंतु तान्मन्त्राननूद्येष्टकोपधानं विधीयते । सृष्टिशब्देनानुवादस्तु वक्ष्यमाणार्थवादोपपत्त्यर्थः । " यथासृष्टमेवावरुन्धे " इति हि वक्ष्यमाणोऽर्थवादः । यदि विधिवाक्ये मन्त्राणामनुवादकः सृष्टिशब्दो न स्यात्, तदानीमर्थवादे सृष्टिशब्दप्रयोगाद्विध्यर्थवादयोर्वैयधिकरण्यभ्रमः स्यात् । तस्मान्मन्त्रानुवादी सृष्टिशब्दो न गुणविधायकः, किंत्वर्थवादः । ननु प्रथममन्त्रे सृजतिधातुर्न प्रयुक्तः । " एकयाऽस्तुवत प्रजा अर्धीयन्त " इति पाठात् । बाढं, तथाऽपि द्वितीयतृतीयादिषु बहुषु मन्त्रेषु सृजतिधातुप्रयोगाद्भूमरूपं सादृश्यमस्ति । यत्र सर्वाणि वाक्यानि सृष्टिशब्दोपेतानि तत्र यथा सृष्टिभूमा तथाऽत्रापि भूमगुणयोगेन सृष्ट्यसृष्टिसंघे सृष्टिशब्दप्रयोगः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे तृतीयप्रपाठके
दशमोऽनुवाकः ॥ १० ॥

(अथ चतुर्थाष्टके तृतीयप्रपाठक एकादशोऽनुवाकः) ।

इयमेव सा या प्रथमा व्यौच्छदन्तरस्यां चरति प्रविष्टा । बधूर्जजान नवगज्जनित्री अग्र एनां महिमानः सचन्ते । छन्दस्वती उषसा पेपिशाने समानं योनिमनु संचरन्ती । सूर्यपत्नी वि चरतः प्रजानती केतुं कृण्वाने अजरे भूरिरेतसा । ऋतस्य पन्थामनु तिस्र आऽगुस्त्रयो घर्मासो अनु ज्योतिषाऽगुः । प्रजामेका रक्षत्यूर्जमेका (१) व्रतमेका रक्षति देवयूनाम् । चतुष्टोमो अभवद्या बुरीया यज्ञस्य पक्षावृषयो भवन्ती । गायत्रीं त्रिष्टुभं जगती-

(व्युष्टिनामकेष्टकाभिधानम्)

मनुष्टभं वृहदर्कं युंजानाः सुवराऽभरन्निदम्। पञ्चभिर्धाता वि दधादिदं यत्तासाꣳ स्वसृरजनयत्पञ्चपञ्च। तासांम् यन्ति प्रयवेण पञ्च नाना रूपाणि क्रतवो वसानाः। त्रिꣳशत्स्वसार उप यन्ति निष्कृतꣳ संमानं केतुं प्रतिमुञ्चमानाः (२)। ऋतूꣳस्तन्वते कवयः प्रजानतीर्मध्ये छन्दसः परि यन्ति भास्वतीः। ज्योतिष्मती प्रति मुञ्चते नभो रात्री देवी सूर्यस्य व्रतानि। वि पश्यन्ति पशवो जायमाना नानारूपा मातुरस्या उपस्थे। एकाष्टका तपसा तप्यमाना जजान गर्भं महिमानमिन्द्रियम्। तेन देवास्युन्ध्यसहन्त देवा हन्ताऽसुराणाममवच्छचीभिः। अनानुजामनुजां मामकर्त सत्यं वदन्त्यन्विच्छ एतत्। भूयासम् (३) अस्य सुमतौ यथा युयमन्या वो अन्यामति मा प्र युक्त। अभून्मम सुमतौ विश्ववेदा आद्यं प्रतिष्ठामविदद्धि गाधम्। भूयासमस्य सुमतौ यथा युयमन्या वो अन्यामति मा प्र युक्त। पञ्च व्युष्टीरनु पञ्च दोहा गां पञ्चनाम्नीमुतवोऽनु पञ्च। पञ्च दिशः पञ्चदशेन कल्पन्ताः संमानमूर्ध्वीरिमं लोकमेकम् (४)। ऋतस्य गर्भः प्रथमा व्युष्टिष्वमेका महिमानं बिभर्ति। सूर्यस्यैका चरति निष्कृतेषु धर्मस्यैका सवि-

तैकां नि यच्छति । या प्रथमा व्यौच्छत्सा
धेनुरभवद्यमे । सा नः पयस्वती दुक्ष्वोत्तरामु-
त्तरा३ समाम् । शुक्रर्षभा नभसा ज्योतिषाऽ-
गाद्विश्वरूपा शबलीरामिकेतुः । समानमर्थं३
स्वपस्यमाना बिभ्रती जरामजर उष आऽगाः॥
ऋतूनां पत्नी प्रथमेयमाऽगादह्नां नेत्री जनित्री
प्रजानाम् । एका सती बहुधोषो व्युच्छस्य-
जीर्णा त्वं जरयसि सर्वमन्यत् (५) ॥
(ऊर्जमेका प्रतिमुञ्चमाना भूयासमेकं पत्न्येकान्नविंशतिश्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
तृतीयप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

(अथ चतुर्थकाण्डे तृतीयप्रपाठक एकादशोऽनुवाकः) ।

दशमेऽनुवाके सृष्टिनामिका इष्टका उक्ताः। अथैकादशे व्युष्टिनामिका उच्यन्ते। क्रमः—" इयमेव सा या प्रथमा व्यौच्छदिति षोडश व्युष्टीः " इति । तत्र प्रथमामाह—

इयमेव सेति । अत्रोपधीयमाना येष्टकाऽस्ति, इयमेव सा तथाविधव्युष्टि-रूपा, तच्छब्देन परामृश्यमाना पुनर्विविच्यते । सेयं व्युष्टिरूपा कालानां प्रथम-भूता सती व्यौच्छद्विशेषेण प्रकाशरूपाऽभूत् । आदिसृष्टिकाले प्रथमो यः प्रभातकालस्तद्रूपेयमिष्टकेत्यर्थः । सा सृष्टिकालीना प्रथमा व्युष्टिरादित्येनानु-प्रविष्टा सती, अस्यां पृथिव्यां दैनंदिनप्रभातरूपेण चरति । तत्र दृष्टान्तः— वधूर्जजान नवगज्जनित्री । नवं वरं गच्छतीति नवगन्नूतनविवाहवती वधूर्जनित्री, उत्तरोत्तरप्रजोत्पादिका यथा जजान जाता तद्वदियमपि व्युष्टिरुत्तरोत्तरप्रभात-निष्पादिकेत्यर्थः । त्रयस्त्रिंशद्रूपाका महिमानो महिमोपेता अग्निसूर्यचन्द्ररूपा देवा एनां व्युष्टिं सचन्ते समवयन्ति । देवतात्रयप्रकाशकानुग्रहादस्याः प्रभातरू-पत्वमित्यर्थः। एवंविधव्युष्टिरूपामिष्टकामुपदधातीत्याभिप्रायः। अथ द्वितीयामाह—

(व्युष्टिनामकेष्टकाभिधानम्)

छन्दस्वतीति। द्वे उषसावेका सृष्टिकालीना प्रथमेति पूर्वमन्त्रोक्ता। अपरा प्रतिदिनसंचारिणी। साऽप्यस्यां चरति प्रविष्टेति पूर्वमन्त्रोक्ता। एवं सत्युषसा विचरतो द्वे अप्युषसौ विविधं चरतः। रात्रावित्र प्रलयकाले तिरोहितजगत आविर्भावलक्षणसृष्टिरूपा सती दिवसतादृश्यमापादयति। तदिदमेकस्या व्युष्टचाश्चरणं, शार्वरतमोनिवर्तकत्वमपरस्याश्चरणम्। कीदृश्यावुषसौ, छन्दस्वती छन्दोयुक्तैर्मन्त्रैः स्तूयमानतया छन्दस्वत्यौ, पेपिशाने भृशं प्रकाशयन्त्यौ, समानं योनिमनु संचरन्ती, उभयोः कालविशेषत्वात्कालसामान्यमेव तयोर्योनिर्हेतुः। स चोभयोः समानः, महाप्रभातं सृष्टिरूपमल्पप्रभातं दैनंदिनं चेत्युभौ कालविशेषौ, तौ च स्वकीयं कालसामान्यमनुसृत्य वर्तेते इत्यनुसंचरन्त्यावुषसौ। ते च सूर्यपत्नी सूर्यस्य जाये, प्रजानती स्वयं देवतारूपत्वेन प्रज्ञानवत्यौ, केतुं लृण्वाने ज्ञानं कुर्वत्यौ प्रकाशप्रदानेन हि प्राणिनां रूपज्ञानं जनयन्त्यौ, अजरे कदाचिदपि जरारहिते, भूरिरेतसा प्रभूतरेतस्के बहुत्वापरकारणभूते इत्यर्थः। अथ तृतीयामाह—

ऋतस्य पन्थामिति। तिस्र उषस ऋतस्य यज्ञस्य पन्थां मार्गमन्वागुरनुप्राप्ता यज्ञरक्षकत्वेन व्यक्ता व्यवस्थिता इत्यर्थः। त्रयो घर्मास्तो दीप्तिरूपा अग्निचन्द्रादित्या ज्योतिषा प्रकाशप्रदानेन यज्ञमार्गमन्वागुरनुप्राप्ताः। तिसृणामुषसां देवीनां मध्ये यजमानस्य प्रजामेका रक्षति। यजमानस्योर्जं बलमेका रक्षति। देवयूनां देवानात्मन इच्छतां यजमानानां व्रतं कर्मानुष्ठानमेका रक्षति। अथ चतुर्थीमाह—

चतुष्टोमो अभवदिति। यद्यप्येकैवोषा तथाऽपि जगद्रक्षणाय योगैश्वर्याद्यनेकशरीरस्वीकारे सति बहव उषसो भवन्ति। या तत्र तुरीया चतुर्थी सा चोषाश्चतुष्टोमस्त्रिवृदादिस्तोमचतुष्टययुक्ताग्निष्टोमरूपाऽभवत्। कीदृशी, यज्ञस्य पक्षौ प्राच्यपतीच्याङ्गरूपौ पक्षसदृशौ द्वावयवौ भवन्ती भावयन्ती जनयन्तीत्यर्थः। तथर्षय ऋचीन्यज्ञानिष्पादकानृत्विजो जनयन्ती। तथा बृहदर्कं प्रौढमर्चनरूपं स्तोत्रं युञ्जानाः संपादयन्ती। गायत्र्यादिदेवताश्चतस्रः सुवः फलभूतं स्वर्गमिदं कर्म चाऽऽभरन्सर्वतो भरन्ती पोषयन्तीत्यर्थः। अथ पञ्चमीमाह—

पञ्चभिर्धाता वि दधाविति। यदिदं जगदस्ति तत्सर्वं धाता स्रष्टा प्रजापतिः पञ्चभिरुषोभिर्देवीभिर्विदधौ निर्मितवान्। तासां पञ्चानामुषसां प्रत्येकं

---

१ ख. च. °न्ती संभवन्ती°।

पञ्च पञ्च स्वसारजनवत् । एवं च सति पञ्चतंख्याका ज्येष्ठा उषसस्तासां स्वसारः पञ्चविंशतितंख्याका इत्येकस्मिन्मासि प्रतिपदादितिथिरूपाश्चिंशदुषसः संपद्यन्ते । तासामु तासामप्युषसां मयवेन प्रकृष्टरूपेण मिश्रणेन पञ्च मुख्या उषसः क्रतवः क्रतुनिष्पादिका वसाना आच्छादयन्त्यः क्रत्वङ्गानि सर्वाणि व्याप्नुवत्यो नाना रूपाणि बहुविधस्वरूपाणि यन्ति प्राप्नुवन्ति । तत्रैका दैनंदिनमग्निहोत्रं निष्पादयति । ततोऽन्ये दर्शपूर्णमासौ निष्पादयतः । आपवस्तवदिनकृत्यमेका निष्पादयति । सुत्यादिनकृत्यमेकेत्येवं पञ्चानामुषसामुत्कृष्टमिश्रणानां प्रकृष्टोपकारित्वं, क्रत्वन्तरभेदनिष्पादकत्वेन नानारूपत्वम् ।

अथ षष्ठीमाह—

त्रिंशद्वास्त्वसार इति । त्रिंशन्मासगततिथिरूपेण त्रिंशत्संख्याकाः स्वसारो भगिन्य उषसो देव्यो निष्कृतमनसं कृतमग्निहोत्रादिकर्मोपयन्ति प्राप्नुवन्ति । कीदृश्यः, समानं केतुं सदृशं चिह्नं प्रकाशरूपं प्रतिमुञ्चमानाः कञ्चुकवत्कारयन्त्यः। ताश्च कवयो विद्वत्पुरुषतमानाः प्रजानतीस्तत्तद्दिनसंपादनीयं प्रजानन्त्य ऋतूंस्तन्वते स्वयमेव पुनः पुनरावर्तनेन वसन्तादीनृतून्संपादयन्ति । छन्दसां वेदानां मध्ये तिष्ठतीति मध्येछन्दाः सूर्यः । तथा चान्यत्राप्याम्नायते—" ऋग्भिः पूर्वाह्ण दिवि देव ईयते । यजुर्वेदे तिष्ठति मध्ये अह्नः । सामवेदेनास्तमये महीयते । वेदैरशून्यस्त्रिभिरेति सूर्यः " इति । तस्य मध्येछन्दसः सूर्यस्य परि पार्श्वेषु भास्वतीर्भास्वत्यः प्रकाशमाना यन्ति गच्छन्ति । वर्तन्त इत्यर्थः । अथ सप्तमीमाह—

ज्योतिष्मतीति । द्वयमुषा ज्योतिष्मती । ज्योतीरूपेणर्क्षत्रेर्युक्तत्वात् । रात्री चेयं सूर्योदयात्पूर्वभावित्वादेवी दीप्यमाना । तादृगुषा नभो नभस्थस्य सूर्यस्य व्रतानि सूर्यसंबन्धित्वेन व्रतवन्नियतानि रश्मिजालानि प्रतिमुञ्चते कञ्चुकमिव स्वी करोति । तस्यामुषसि नानारूपा गोमहिषादिजातिभेदभिन्नाः पशवो जायमाना जन्मसदृशं निद्रायाः प्रबोधं प्राप्नुवन्तो मातुर्मातृसमानाया अस्या भूम्या उपस्थ उत्सङ्गे विपश्यन्ति विविधमरण्यगमनादिव्यवहारमवलोकयन्ति ।

अथाष्टमीमाह—

एकाष्टका तपसेति । एकाष्टकेति माघकृष्णाष्टमी कथ्यते । तथा चाऽऽपस्तम्बः—" या माघ्याः पौर्णमास्या उपरिष्टाद्द्व्यष्टका तस्यामष्टमी

---

१ स. च. °मस्य । २ स. °ष्टाव्यष्ट° ।

(व्युष्टिनामकेष्टकाभिधानम्)

ज्येष्ठया संपद्यते तामेकाष्टकेत्याचक्षते " इति । सेयमेकाष्टका तपसा तप्यमाना पुत्रार्थं तपश्चरन्ती महिमानं महिमोपेतं गर्भं स्वोदरवर्तिनमिन्द्रं जनानोत्पादयामास । तेनेन्द्रेण देवाः सर्वे दस्युंस्तस्कररूपान्राक्षसान्व्यसहन्त विशेषेणाभिभूतवन्तः । स चेन्द्रः शचीभिः स्वकीयशक्तिभिस्तुराणां हन्ताऽभवत् ।

अथ नवमीमाह—

अनानुजामिति । हे एकाष्टका देव्यो मां यजमानं पूर्वमनानुजां तस्मिन्दानीमनुजामकर्तं कृतवत्यः । आ तमन्तात्कर्मानुष्ठानस्यानुकूलत्वेन जायत इत्यनुजास्तद्विपरीतास्वमनुजाः । अनुष्ठानरहितं मामनुष्ठानोपेतं कृतवत्य इत्यर्थः। कीदृश्य एकाष्टकाः, सत्यं वदन्त्यावितथं धर्मं वदन्त्यो हे यजमानैवमेतं धर्ममनुतिष्ठेत्येवं बोधयन्त्य इत्यर्थः । अतस्त्वंप्रतादात्तन्मार्गवृत्तिरहमेतदन्विच्छे वक्ष्यमाणमपेक्षितं प्रार्थये । किं तदपेक्षितमिति तदुच्यते—हे एकाष्टका यूयमस्य युष्मत्पुत्रस्येन्द्रस्य सुमतौ कल्याणबुद्धौ यथा स्थिता एवमहमप्यस्येन्द्रस्य तव्वगनुग्रहचित्ते भूयासम् । वो युष्माकं मध्येऽन्या काचिदन्यापितरामातिलङ्घ्य वा प्रयुक्त प्रयोगं व्यवहारं न करोति, किंतु परस्परानुकूल्येनैव व्यवहरति, तद्वदहमप्युत्विजामनुकूलव्यवहारयुक्तो भूयासम् । अथ दशमीमाह—

अभून्ममेति । मम यजमानस्य सुमतौ भक्तियुक्तायां बुद्धौ विश्ववेदाः सर्वजगदभिज्ञेयमुषा अभूत्स्थितवती । सा च प्रतिष्ठामाहास्मदनुग्रहे स्थैर्यं व्याप्तवती । हि यस्मादियमुषा गाधं प्रतिष्ठानिमित्तभूतं यजमानमविदल्लब्धवती तस्मान्मदनुग्रहे स्थैर्यवतीत्यर्थः । भूयासमित्यादि पूर्ववत् । अथैकादशीमाह—

पञ्च व्युष्टीरिति । अग्निहोत्रदर्शपूर्णमासौपवसथ्यसुत्यारूयकर्मनिष्पादिकाः पञ्च मुख्या उषसो याः पूर्वमुक्तास्ताः पञ्च व्युष्टीरनु पञ्चात्मकं सर्वमिदमुत्पन्नम् । किमुत्पन्नमिति तदुच्यते—पञ्च दोहा उत्पन्नाः । तमिस्रा व्योत्सा तेभ्यादयमहरित्येते पञ्च दोहाः । ते च होतुर्ब्राह्मणे 'इदं वा अग्रे नैव किंचनाऽऽसीत्' इत्यनुवाके 'याऽस्य सा तनूरासीत् । तामपाहत । सा तमिस्राऽभवत्' इत्यादिना समाम्नाताः । तत्रैव 'तेभ्यो मृन्मये पात्रेऽन्नमवृहत्' इत्यादिना दोहा आम्नाताः । आम्नाय चान्ते तदुपसंहृतम्—' एते वै प्रजापतेर्दोहाः' इति । त एते पञ्च दोहाः पञ्च व्युष्टीरनूत्पन्नाः । येयं गौः पृथिवी [सा] पञ्चनाम्नी पञ्चविधनाम्नोपेतापि पञ्च व्युष्टीरनूत्पन्ना विद्यात् । वसन्तर्तौ पुष्पवतीति नाम । ग्रीष्मर्तौ तापवतीति नाम ।

१ ख. च. °स्य सुमतावनु° ।

(द्युष्टिनामकेष्टकाभिधानम्)

वर्षर्तौ वृष्टिमतीति नाम । शरदि जलप्रसादवतीति नाम । हेमन्तशिशिरयोः शैत्यवतीति नाम । सैषा पञ्चनाम्नी पृथिवी द्युष्टीरनूत्पन्ना । तथा हेमन्तशिशिरयो-रैक्येन पञ्चर्तवो द्युष्टीरनूत्पन्नाः । तथा प्राच्यादयः सहोर्ध्वया पञ्च दिशो द्युष्टी-रनूत्पन्नाः । पञ्चदशाख्यस्तोमेन कल्पिताः संपादिताः पञ्चविधवीर्युपेताः स्तोत्रियाः पञ्च द्युष्टीरनूत्पन्नाः । तस्य स्तोमस्य निरूपके ब्राह्मणे 'पञ्चभ्यो हिं करोति' इत्येवं त्रिवारमाम्नातम् । एताः पञ्च द्युष्टयः । एकं लोकमभि समानमूर्ध्वंलोक आलोकः प्रकाशस्तमेकं प्रति समानस्वभावाः । मूर्धशब्द उत्तमाङ्गवाची सन्मु-ख्यं स्वभावमुपलक्षयति । मुख्यस्वभावश्च द्युष्टीनां प्रकाशकत्वम् । एवंविधद्यु-ष्टिरूपेयमिष्टकेति स्तूयते । अथ द्वादशीमाह—

ऋतस्य गर्भ इति । या एताः पूर्वोक्ताः पञ्चोषसो मुख्यास्तासां मध्ये प्रथमा या द्युषी द्युष्टिरुषःकालरूपाऽस्ति सर्तस्य सत्यस्य गर्भो गर्भसदृशी तेनाऽऽदित्येन सहैव वर्तते । एका काचिदुषा रश्मिसहकारिण्यपां महिमानं बिभर्ति । वर्षाकाले रश्मिद्वारा जलमानीय मेघोदरे गर्भरूपं महत्त्वं पोषयति । एका काचिद-न्योषाः सूर्यस्य संबन्धिषु मिष्कृतेषु संस्कृतेषु प्रदेशेषु चरति प्रकाशं कुर्वती वर्तते । एका काचिदन्योषा घर्मस्य दीप्यमानस्याग्नेः संबन्धिषु चरति प्रकाशं करोति । एकां काचिदन्यामुषसं सविता नियच्छति दैनंदिनप्रकाशकारित्वेन नियतां करोति । अथ त्रयोदशीमाह—

या प्रथमा व्यौच्छदिति । मुख्यासु पञ्चसूषःसु या प्रथमोषा व्यौच्छ-त्तमो व्यवासयत्प्रकाशोत्पादनेन तमो निराकरोदित्यर्थः । सा तादृगुषा यमे धेनु-रभवद्यमस्वामिके लोके प्रकाशप्रदानेन धेनुवत्प्रीतिहेतुरभवत् । तथाविधे हे उषः सा त्वं पयस्वती वृष्ट्युदकयुक्ता सती नोऽस्मदर्थमुत्तरामुत्तरां समामुत्तरोत्तरेषु सर्वेष्वपि संवत्सरेषु निरन्तरं धुक्ष्व दोहनं कुरु । यथा धेनुः क्षीरं प्रयच्छति तथा त्वं द्युष्टिं प्रकाशं च प्रयच्छेत्यर्थः । अथ चतुर्दशीमाह—

शुक्रर्षभा नभसेति । येयमुषाः शुक्रर्षभा शुक्रेषु प्रकाशरूपेषु नक्षत्रादिषु मध्ये श्रेष्ठा सेयमुषा नभसा द्योतिषाऽऽकाशवर्तिप्रकाशेन युक्ता सत्यागादिह समागता । कीदृशी, विश्वरूपा सर्वाणि रूपाणि प्रकाशमानानि यस्याः सा विश्वरूपा, शबलीः सूर्योदयात्पूर्वमन्धकारलेशानुवृत्तेर्मिश्रवर्णा, अग्निकेतुरग्निहोत्रिभिरुषः-

१ ख. च. °शत्वं° । २ ख. च. °रूपत्वं म° । ३ ख. °ती द्युष्टयु° ।

(व्युष्टिनामकेष्टकाभिधानम्)

काले विहृत्य प्रज्वालिता येऽग्नयस्त एव केतवो ध्वजस्थानीया यस्याः साऽग्निकेतुः, समानमर्थं बिभ्रती सूर्यस्य यत्प्रयोजनमन्धकारनिवारणरूपं तदेवोषसोऽपि प्रयोजनमतः सूर्येण सह समानप्रयोजना, स्वपस्यमाना शोभनान्यन्यांसि कर्माणि तान्यात्मन इच्छतीति स्वपस्यमाना। हेऽजर उषस्त्वं जरामागा वलीपलितादिरूपजरारहिताऽपि सृष्ट्यादिमारभ्य प्रवृत्तत्वाच्चिरकालावस्थानलक्षणां जरां प्राप्ताऽसि। तादृगुषारूपेयमिष्टकेत्यर्थः। अथ पञ्चदशीमाह—

ऋतूनां पत्नीति। इयं प्रथमोषा आगादिह कर्मण्यायाता। कीदृशी, ऋतूनां वसन्तादीनां पत्नी पालयित्री, उषःकालस्यासङ्ख्यावृत्त्या ऋतवः संपद्यन्ते। अह्नां नेत्री नयनस्य हेतुः प्रकाशप्रदानेन निष्पादिकेत्यर्थः। प्रजानां जनित्र्युत्पादयित्री। उषःकालावृत्त्या नवमासगर्भधारणादिना प्रजोत्पद्यते। हे उषस्त्वं स्वरूपेणैका सती बहुधा दिनभेदेन बहुप्रकारा भूत्वा व्युच्छसि तमो विवासयसि निष्कासयसीत्यर्थः। ईदृशी त्वमजीर्णा वलीपलितादिजरारहिता सर्वमन्यन्मनुष्यशरीरादिकं जरयसि जीर्णं करोषि। इत्थं पञ्चदशाऽऽम्नाताः। षोडशी त्वन्यत्र द्रष्टव्या। एतैर्मन्त्रैः साध्यमुपधानं विधत्ते—

"न वा इदं दिवा न नक्तमासीदव्यावृत्तं ते देवा एता व्युष्टीरपश्यन्ता उपादधत ततो वा इदं व्यौच्छद्यस्यैता उपधीयन्ते व्येवास्मा उच्छत्यथो तम एवापहते" [सं० का० ५ प्र० ३ अ० ४] इति।

इदं कालस्वरूपं दिवारात्र्योर्व्यावर्तिकयोषसा रहितत्वादव्यावृत्तमासीत्। तथा सति दिवाऽपि नाऽऽसीन्नक्तमपि नाऽऽसीत्। व्यावृत्तस्वरूपस्य निश्चेतुमशक्यत्वात्। तदानीं देवा व्यावृत्तिकारिणीर्व्युष्टिसंज्ञका एता इष्टका अपश्यन्। विशेषेणोच्छति तमो विनाशयतीति व्युष्टिरूपःकालस्तद्वाचकशब्देनोपेतैर्मन्त्रैरुपधेया इष्टका व्युष्टयः। ता दृष्ट्वोपादधत। तत ऊर्ध्वमिदं कालस्वरूपं व्यौच्छद्व्यावर्तिकया व्युष्ट्या दिवानक्तभेदेन व्यावृत्तमासीत्। तस्माद्व्युष्टिरुपदध्यात्। तदुपधाने हि यजमानार्थं व्युच्छत्येव परलोकापरलोकप्रकाशं करोत्येव। अपि च बुद्धिगतभ्रान्तिरूपं तमो विनाशयति। अत्र विनियोगसंग्रहः—

इयं व्युष्टिरुपादध्यान्मन्त्राः पञ्चदशेरिताः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे तृतीयप्रपाठके एकादशोऽनुवाकः॥ ११॥

(पञ्चम्यां चितावसपत्नादीष्टकाभिधानम्)

(अथ चतुर्थाष्टके तृतीयप्रपाठके द्वादशोऽनुवाकः)।

अग्ने जातान्प्र णुदा नः सपत्नान्प्रत्यजाता-
ञ्जातवेदो नुदस्व । अस्मे दीदिहि सुमना
अहेडन्तर्व स्याꣳ शर्मन्त्रिवरूथ उद्भित् । सहसा
जातान्प्र णुदा नः सपत्नान्प्रत्यजाताञ्जातवेदो
नुदस्व । अधि नो ब्रूहि सुमनस्यमानो वयꣳ
स्याम प्र णुदा नः सपत्नान् । चतुश्चत्वारिꣳशः
स्तोमो वर्चो द्रविणꣳ षोडशः स्तोम ओजो
द्रविणं पृथिव्याः पुरीषमसि (१) अप्सो
नाम । एवश्छन्दो वरिवश्छन्दः शम्भूश्छन्दः
परिभूश्छन्द आच्छच्छन्दो मनश्छन्दो व्यच-
श्छन्दः सिन्धुश्छन्दः समुद्रः छन्दः सलिलं छन्दः
संयच्छन्दो वियच्छन्दो बृहच्छन्दो रथंतरं
छन्दो निकायश्छन्दो विषमश्छन्दो गिरश्छन्दो
भ्रजश्छन्दः सङ्कुपच्छन्दोऽनुकूपच्छन्दः ककुच्छन्द-
स्त्रिककुच्छन्दः काव्यं छन्दोऽकुपं छन्दः (२)
पदपङ्क्तिश्छन्दोऽक्षरपङ्क्तिश्छन्दो विष्टारपङ्-
क्तिश्छन्दः क्षुरो भृज्वान्छन्दः प्रच्छच्छन्दः पक्ष-
श्छन्द एवश्छन्दो वरिवश्छन्दो वयश्छन्दो वय-
स्कृच्छन्दो विशालं छन्दो विष्पर्धाश्छन्दश्छ-
दिश्छन्दो दूरोहणं छन्दस्तन्द्रं छन्दोऽक्काक्कं
छन्दः (३)।

(अल्पक्कुपं छन्दस्त्रयस्त्रिꣳशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
तृतीयप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

(पञ्चम्यां चितावसपत्नादीष्टकाभिधानम्)

(अथ चतुर्थकाण्डे तृतीयप्रपाठके द्वादशोऽनुवाकः) ।

एकादशेऽनुवाके व्युष्टयारूया इष्टका उक्ताः। तावता चतुर्थचितिः समाप्ता। अथ द्वादशे पञ्चम्यां चितावसपत्नाद्या इष्टका उच्यन्ते।

कल्पः—" श्वोभूते पौर्वाह्णिकीभ्यां प्रचर्य पञ्चमीं चितिं चिनोत्यग्ने जातान्प्र णुदा नः सपत्नानिति पुरस्तादुपदधाति " इति। पाठस्तु—

अग्ने जातान्प्रेति। हेऽग्ने नोऽस्माकं जातान्सपत्नान्ये पूर्वमुत्पन्नाः शत्रवस्तान्प्रणुद प्रकर्षेण नाशय। हे जातवेदो ये पूर्वमनुत्पन्ना इतःपरमुत्पत्तिमन्तस्तानिषुकास्तानजातानछत्रून्मति नुदस्वोत्पत्तिप्रतिबन्धेन निराकुरु। सुमनाः सानुग्रहचित्तस्त्वमेहेष्टकाकृष्यस्मिन्वरूथः प्राग्वंशसदोहविर्धानरूपगृहत्रयोपेत उद्भिदनुष्ठेयकर्मोत्पादकः सन्नस्मे दीदिहि अस्मान्प्रकाशय। तव प्रसादाच्छर्मन्स्यां सुखबाम्भवेयम्। एतन्मन्त्रसाध्यमुपधानं विधत्ते—

" अग्ने जातान्प्र णुदा नः सपत्नानिति पुरस्तादुप दधाति जातानेव भ्रातृव्यान्प्र णुदते " [सं० का० ५ प्र० ३ अ० ५] इति।

कल्पः—" सहसा जातानिति पश्चात् " इति। पाठस्तु—

सहसा जातान्प्रेति। सहसा बलेन जातानिति पूर्ववत्। सुमनस्यमानः सौमनस्यं प्राप्तः सन्नोऽस्मानभिमुहि। वयमपि त्वदनुग्रहादधिकाः स्याम। नोऽस्मदीयान्सपत्नाञ्छत्रून्प्रणुद। एतन्मन्त्रसाध्यमुपधानं विधत्ते—

" सहसा जातानिति पश्चाज्जनिष्यमाणानेव प्रति नुदते " [सं० का० ५ प्र० ३ अ० ५] इति।

" पश्चादुपदधातीत्यनुवर्तते। पूर्वमन्त्र उत्पन्नविनाशनप्राधान्यमिह तूत्पत्स्यमानप्रतिबन्धप्राधान्यम्। अनेनाभिप्रायेणोभयत्रैवकारप्रयोगः।

कल्पः—" चतुश्चत्वारिंशः स्तोम इति दक्षिणतः " इति। पाठस्तु—

चतुश्चत्वारिंश इति। योऽयं स्तोमश्चतुश्चत्वारिंशदावृत्त्या संपन्नो यश्च वर्चो बलरूपं धनं हे इष्टके तदुभयरूपा त्वमसि। इमं मन्त्रं विनियुङ्क्ते—

" चतुश्चत्वारिंशः स्तोम इति दक्षिणतो ब्रह्मवर्चसं वै चतुश्चत्वारिंशो ब्रह्मवर्चसमेव दक्षिणतो धत्ते तस्माद्दक्षिणोऽर्धो ब्रह्मवर्चसितरः " [सं० का० ५ प्र० ३ अ० ५] इति।

ब्राह्मणानामेवाऽऽर्षेण्याच्चैर्नेष्याद्यस्य स्तोमस्य ब्रह्मवर्चसरूपत्वम्।

कल्पः—" षोडशः स्तोम उत्तरतः " इति। पाठस्तु—

षोडश इति । षोडशभिरावृत्तिभिर्निष्पाद्यः षोडशः । यस्तादृशः स्तोमो यच्चाष्टमधातुरूपं धनं हे इष्टके तदुभयरूपा त्वमसि । एतं मन्त्रं विनियुङ्क्ते—

" षोडशः स्तोम इत्युत्तरत ओजो वै षोडश ओज एवोत्तरतो धत्ते तस्मादुत्तरतोभिप्रयायी जयति " [सं० का० ५ प्र० ३ अ० ५] इति ।

षोडशस्तोमस्यौजोवृद्धिहेतुत्वादोजस्त्वम् । अथेष्टकाद्वयं सह प्रशंसति—

" वज्रो वै चतुश्चत्वारिंशो वज्रः षोडशो यदेते इष्टके उपदधाति जातांश्चैव जनिष्यमाणांश्च भ्रातृव्यान्नुद्य वज्रमनु प्र हरति स्तृत्यै " [सं० का० ५ प्र० ३ अ० ५] इति ।

स्तोमयोरनिष्टनिवारकत्वेन वज्रत्वं, प्रणोदनमस्मात्स्थानान्निःसारणं ततो वज्रस्यानुप्रहारः स्तृत्यै हिंसायै संपद्यते ।

कल्पः—" इष्टकायां पुरीषमध्यू(ध्यु)स्य पृथिव्याः पुरीषमसीति मध्येऽग्नेः पुरीषवतीम् " इति । पाठस्तु—

पृथिव्याः पुरीषमिति । हे इष्टकास्वरूप त्वं पृथिव्याश्चितिरूपायाः पुरीषं पूरकमसि । प्सातिं भक्षयति विनाशयतीति प्सः । न प्सातीत्यप्सः । हे[2] इष्टके त्वमप्सो नामासि । एतन्मन्त्रसाध्यमुपधानं विधत्ते—

" पुरीषवतीं मध्य उप दधाति पुरीषं वै मध्यमात्मनः सात्मानमेवाग्निं चिनुते " [सं० का० ५ प्र० ३ अ० ५] इति ।

पुरीषमध्यू(ध्यु)स्य तस्योपर्युपधीयमानत्वात्पुरीषवती । पुरीषं वा आत्मनो गवादिशरीरस्य मध्यमुदरमध्ये वर्तमानत्वात् । अतः पुरीषवत्त्वेन सात्मानं शरीरसहितमेवाग्निं चिनुते । एतद्भेदनं प्रशंसति—

"सात्माऽमुष्मिँल्लोके भवति य एवं वेद" [सं० का० ५प्र० ३अ० ५] इति ।

नामकरणपूर्वकमुक्तमिष्टकापञ्चकं प्रशंसति—

" एता वा असपत्ना नामेष्टका यस्यैता उपधीयन्ते नास्य सपत्नो भवति " [सं० का० ५ प्र० ३ अ० ५] इति ।

सपत्नानां शत्रूणां विनाशकत्वादसपत्ना इत्येतासामिष्टकानां नामधेयम् ।

कल्पः—" एवश्छन्दो वरिवश्छन्द इति चत्वारिंशतं विराजो दशदश प्रतिदिशमक्षण्वा " इति । पाठस्तु—

---

१ क. घ. ङ. °वृत्तिर्हे° । २ क. घ. ङ. °मध्यस्य पु° । ३ घ. ङ. हेऽग्ने त्व° । ४ घ. ङ. °मध्यस्य त° ।

(पञ्चम्यां चितावसपत्नादीष्टकाभिधानम्)

एवश्छन्दो वरिव इति। ऐवो वरिव इत्याद्याः शब्दाः स्वर्गलोकवर्तिनां छन्दोविशेषाणां नामधेयानि। हे इष्टके त्वमेवंश्छन्दो यत्तद्रूपाऽसि। एवं सर्वत्रोहनीयम्। एतन्मन्त्रसाध्यमुपधानं विधत्ते—

" पशुर्वा एष यदग्निर्विराज उत्तमायां चित्यामुप दधाति विराजमेवोत्तमां पशुषु दधाति तस्मात्पशुमानुत्तमां वाचं वदति " [सं० का० ५ प्र० ३ अ० ५] इति।

पशुमात्रिहेतुत्वादग्नेः पशुत्वम्। अतः पशूत्तमां विराजं क्षीरदध्यादिरूपमन्नं स्थापयितुमस्मिन्पशुरूपेऽग्नावुत्तमायां पञ्चम्यां चितौ विराडाख्या इष्टका उपदध्यात्। विराड्रूपत्वं तु वक्ष्यमाणदशसंख्यया संपद्यते। यस्मात्पशुरूपेऽग्नौ वक्ष्यमाणं विराजमुपदधाति तस्माल्लोकेऽपि बहुपशुयुक्तः पुरुषः समागतानतिथीम्पत्युत्तमां वाचं वदति—श्रान्ता यूयं मद्गृहं समागच्छत भुज्यतामिति। सेयमुत्तमा वाक्। एकैकस्यां दिशीष्टकासंख्यां विधत्ते—

" दशदशोप दधाति सवीर्यत्वाय " [सं० का०५ प्र० ३ अ० ५] इति। सवीर्यत्वं दार्ढ्योपेतत्वं, तच्च बहुभिरिष्टकाभिः संपद्यते।

सम्यक्पङ्क्तिरूपत्वं वारयितुं वक्रत्वं विधत्ते—

" अक्ष्णयोप दधाति तस्मादक्ष्णया पशवोऽङ्गानि प्र हरन्ति प्रतिष्ठित्यै " [सं० का० ५ प्र० ३ अ० ५] इति। उक्ता विराजः प्रशंसति—

" यानि वै छन्दाꣳसि सुवर्ग्याण्यासन्तैर्देवाः सुवर्गं लोकमायन्तेनर्षयोऽश्राम्यन्ते तपोऽतप्यन्त तानि तपसाऽपश्यन्तेभ्य एता इष्टका निरमिमतैवश्छन्दो वरिवश्छन्द इति ता उपादधत ताभिर्वै ते सुवर्गं लोकमायन्यदेता इष्टका उपदधाति यान्येव छन्दाꣳसि सुवर्ग्याणि तैरेव यजमानः सुवर्गं लोकमेति " [सं० का० ५ प्र० ३ अ० ५] इति।

स्वर्गमर्हन्तीति सुवर्ग्याणि। तादृशानि यान्याम्नातानि च्छन्दांसि स्वर्गलोके स्थितानि तैश्छन्दोभिर्देवाः स्वर्गं प्राप्ताः। तत्पाठस्तेषां स्वर्गप्राप्तिसाधनम्। ऋषयश्च तेन स्वर्गप्राप्तिनिमित्तेनाश्राम्यन्नुपायमन्विष्यालभमानाः खिन्ना आसन्। ते पुनर्विचार्य स्वर्गप्राप्त्यर्थं तपः कृतवन्तः। ततोऽनुष्ठितेन तपसा तानि च्छन्दांसि स्वर्गसाधनान्यपश्यन्। तेभ्यश्छन्दोभ्य एता विराडाख्या इष्टका निर्मितवन्तः। निर्माय चैवश्छन्दो वरिवश्छन्द इति मन्त्रैस्ता विराज उपादधत। ततस्ताभि-

रिष्टकाभिस्त ऋषयः स्वर्गं प्राप्ताः । अतो यजमानोऽपि तदुपधानेन सुवर्गैः-स्तैरछन्दोभिः स्वर्गं प्रामोत्येव । अत्र विनियोगसंग्रहः—

पञ्चम्यां तु चितावग्ने ह्यतपत्नास्तु पञ्च च ।
एवमत्वारिंशदुक्ता विराजो दिक्षु वक्रगाः ॥ इति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे तृतीयप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

(अथ चतुर्थाष्टके तृतीयप्रपाठके त्रयोदशोऽनुवाकः) ।

अग्निर्घृत्राणि जङ्घनद्द्रविणस्युर्विपन्यया । समिद्धः शुक्र आहुतः । त्वꣳ सोमासि सत्पतिस्त्वꣳ राजोत वृत्रहा । त्वं भद्रो असि क्रतुः । भद्रा ते अग्ने स्वनीक संदृग्घोरस्य सतो विषुणस्य चारुः । न यत्ते शोचिस्तमसा वरन्त न ध्वस्मानस्तनुवि रेप आ धुः । भद्रं ते अग्ने सहसिन्ननीकमुपाक आ रोचते सूर्यस्य (१) । रुशद्दृशे ददृशे नक्तया चिदरूक्षितं दृश आ रूपे अन्नम् । सैनाऽनीकेन सुविदत्रो अस्मे यष्टा देवाꣳ आयजिष्ठः स्वस्ति । अदब्धो गोपा उत नः परस्पा अग्ने द्युमदुत रेवदीदिहि । स्वस्ति नो दिवो अग्ने पृथिव्या विश्वायुर्धेहि यजथाय देव । यस्मीमहि दिविजात प्रशस्तं तदस्मासु द्रविणं धेहि चित्रम् । यथा होतर्मनुषः (२) देवतातां यज्ञेभिः सूनो

---

१ क. घ. ङ. °भु ता: स्थिताः ॥ इ° ।

(याज्यानुवाक्याभिधानम्)

सहसो यजासि । एवा नो अद्य समना समानानुशन्नग्न उशतो यक्षि देवान् । अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारꣳ रत्नधातमम् । वृषा सोम द्युमाꣳ असि वृषा देव वृषव्रतः । वृषा धर्माणि दधिषे । सांतपना इदꣳ हविर्मरुतस्तज्जुजुष्टन । युष्माकोती रिशादसः । यो नो मर्तो वसवो दुर्हणायुस्तिरः सत्यानि मरुतः (३) जिघाꣳसात् । द्रुहः पाशं प्रति स मुचीष्ट तपिष्ठेन तपसा हन्तना तम् । संवत्सरीणा मरुतः स्वर्का उरुक्षयाः सगणा मानुषेषु । तेऽस्मत्पाशान्प्र मुञ्चन्त्वꣳहसः सांतपना मादिरा मादयिष्णवः । पिप्रीहि देवाꣳ उशतो यविष्ठ विद्वाꣳ ऋतूꣳ ऋतुपते यजेह । ये दैव्या ऋत्विजस्तेभिरग्ने त्वꣳ होतृणामस्यायजिष्ठः । अग्ने यद्य विशो अध्वरस्य होतः पावक (४) शोचे वेष्वꣳ हि यज्वा । ऋता यजासि महिना वि यद्भूर्हव्या वह यविष्ठ या ते अद्य । अग्निना रयिमश्नवत्पोषमेव दिवेदिवे । यशसं वीरवत्तमम् । गयस्फानो अमीवहा वसुवित्पुष्टिवर्धनः । सुमित्रः सोम नो भव । गृहमेधास आ गत मरुतो माऽप भूतन । प्रमुञ्चन्तो नो अꣳहसः । पूर्वीभिर्हि ददाशिम शरद्भिर्मरुतो

वयम् । महोभिः (५) चर्षणीनाम् । प्र बुध्निया ईरते वो महाꣳसि प्र नामानि प्रयज्यवस्तिरध्वम् । सहस्रियं दम्यं भागमेतं गृहमेधीयं मरुतो जुषध्वम् । उप यमेति युवतिः सुदक्षं दोषा वस्तोर्हविष्मती घृताची । उप स्वैनमरमतिर्वमूयुः । इमो अग्ने वीततमानि हव्याऽजस्रो वक्षि देवतातिमच्छ । प्रति न ईꣳ सुरभीणि वियन्तु । क्रीडं वः शर्धो मारुतमनर्वाणꣳ रथेशुभम् (६)। कण्वा अभि प्र गायत । अत्यासो न ये मरुतः स्वञ्चो यक्षदृशो न शुभयन्त मर्याः । ते ह्मर्येष्ठाः शिशवो न शुभ्रा वत्सासो न प्रक्रीडिनः पयोधाः । प्रैषामज्मेषु विथुरेव रेजते भूमिर्यामेषु यद्ध युञ्जते शुभे । ते क्रीडयो धुनयो भ्राजदृष्टयः स्वयं महित्वं पनयन्त धृतयः । उपह्वरेषु यदचिध्वं यियिं वयं इव मरुतः केन (७) चित्पथा । श्रोतन्ति कोशा उप वो रथेष्वा घृतमुक्षता मधुवर्णमर्चते । अग्निमग्निꣳ हवीमभिः सदा हवन्त विश्पतिम् । हव्यवाहं पुरुप्रियम् । तꣳ हि शश्वन्त ईडते स्रुचा देवं घृतश्चुता । अग्निꣳ हव्याय वोळ्हवे । इन्द्राग्नी रोचना दिवः शर्धद्व्रजमिन्द्रं वो विश्वतस्परीन्द्रं नरो विश्वक-

(याज्यानुवाक्याभिधानम्)

मन्हविषा वावृधानो विश्वकर्मन्हविषा वर्धनेन ॥ ८ ॥

(सूर्यस्य मनुषो मरुतः पावक महोभि। रथेशुभं केन षट्चत्वारिंशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके तृतीयप्रपाठके त्रयोदशोऽनुवाकः ॥ १३ ॥

अपां त्वेमन्नयं पुरः प्राचीर्रुर्वाक्षितिरूर्वविरिन्द्राग्नी मा छन्दं आशुश्चिद्रुग्नेमांगोऽस्येकेयमेव सा याऽग्नेर्जातानग्निर्वृत्राणि जङ्घनत्रयोदश ॥ १३ ॥

अपां त्वेन्द्राग्नी इयमेव सा देवतांता षट्त्रिंशत् ॥ ३६ ॥

हरिः ॐ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके तृतीयः प्रपाठकः ॥ ३ ॥

(अथ चतुर्थकाण्डे तृतीयप्रपाठके त्रयोदशोऽनुवाकः)।

द्वादशेऽनुवाकेऽसपत्ना विराजश्चोक्ताः। अथ त्रयोदशस्यान्त्यानुवाकत्वाच्च याज्यानुवाक्या उच्यन्ते।

चातुर्मास्येषु साकमेधाख्ये तृतीये पर्वण्यग्नयेऽनीकवते पुरोडाशमष्टाकपालं निर्वपति साकं सूर्येणोद्यतेत्यादिहवींष्यान्नातानि। तत्र प्रथमस्याऽऽज्यभागस्य पुरोनुवाक्यामाह——

अग्निर्वृत्राणीति। अयमग्निरस्माननुगृह्णात्विति शेषः। कीदृशोऽग्निः, वृत्राणि जङ्घनत्कर्मानुष्ठानानिवारकाणि पापान्यतिशयेन हतवान्, विपन्यया विशिष्टयाऽस्मत्कृतया स्तुत्या द्रविणस्युरस्मदर्थं द्रविणेच्छुः, समिद्धः सम्यक्प्रज्वालितः, शुक्रः शोचमानः, आहुत आ समन्तादस्माभिराकारितोऽनेनाऽऽज्येनाऽऽहुतो वा। अथ द्वितीयस्याऽऽज्यभागस्य पुरोनुवाक्यामाह—

---

१ ख. च. °स्ये सा°।

स्व॰ सोमासीति । हे सोम त्वं सतां सम्यगनुष्ठितानां कर्मणां पतिरसि । किंच त्वं राजा दीप्तिमान् । अपि च त्वं वृत्रहा पापघाती । किंच त्वं भद्रः फलप्रदत्वेन मङ्गलः क्रतुरसि । तस्य क्रतोर्निष्पादकत्वात् । यद्यप्येतन्मन्त्रद्वयं चोदकप्राप्तं तथाऽप्यमावास्यायिरुक्तित्वप्रयुक्तां बुधन्वत्योः प्राप्तिं वारयितुं पुनः पाठः । अथ प्रधानस्याग्नेरनीकवतो हविषः पुरोनुवाक्यामाह--

भद्रा ते अग्न इति । शोभनमनीकं सैन्यं यस्यासौ स्वनीकः, तादृश हेऽग्ने ते त्वदीयानि चरित्राणि भद्रा भद्राणि मङ्गलानि । कथं भद्रत्वमिति तदुच्यते--त्वं संदृक्सम्यग्यजमानादीन्पश्यसि, यजमानादिभिर्वा सम्यग्दृश्यसे । तथा त्वं घोरस्योग्रस्य सतः सर्वदा विद्यमानस्य विषूचस्य बहुलज्वालारूपेण विष्वग्व्याप्तस्य चारुश्चरणहेतुः, अस्मदनिष्टनिवारकस्य निरन्तरस्य ज्वालासमूहस्य प्रवर्तक इत्यर्थः । यत्ते तव शोचिः प्रकाशनं कदाचिदपि तमसा न वरन्त नाऽऽवियते । ध्वसानो ध्वंसहेतवो राक्षसास्तनुवि शरीरे त्वदीये रेपः प्रहाररूपं पापं नाऽऽधुनैव संपादितवन्तः । अथ तवैव याज्यामाह--

भद्रं ते अग्न इति । सहो बलमस्यास्तीति सहसी, तादृश हेऽग्ने सूर्यस्य ते सूर्यसदृशस्य तव भद्रं कल्याणमनीकं ज्वालारूपं सैन्यमुपाक उपान्तिके समीप आरोचते सर्वतो दीप्यते । तादृशं ज्वालारूपं त्वदीयमनीकं नक्तयाचिन्नक्तमपि गाढान्धकारावृतायां रात्रावपि दृदृशे विस्पष्टं दृश्यते प्राणिभिः । किमर्थं रात्रौ तज्ज्वालादर्शनमिति तदुच्यते--रुशद्दिसकं सर्पादिकं दृशे मार्गे द्रष्टुं, तथा रात्रौ भोजनवेलायां रूपे पुरतो निरूपिते पात्रेऽलक्षितं रूक्षोपलक्षितमक्षिकाद्युपद्रवरहितमन्नमादृशे सर्वतो द्रष्टुम् । अथ तवैव विकल्पितां याज्यामाह--

सैनाऽनीकेनेति । हेऽग्ने स त्वं द्युमद्दीप्यमानमुतापि च रेवद्धनयुक्तं गृहक्षेत्रादिकं दीदिहि प्रकाशय । कीदृशस्त्वम् । एनाऽनीकेन सुविदत्र एनेन ज्वालासमूहेन सुष्ठु वोदिता, अस्मे देवान्यष्टाऽस्मदर्थं देवानुद्दिश्य यागनिष्पादकः, स्वस्ति विघ्नराहित्यं यथा भवति तथाऽऽयजिष्ठोऽतिशयेन क्रत्वायागसमाप्तिकारी, अदब्धः केनाप्यहिंसितो गोपा यज्ञस्य गोप्ता, उतापि च नोऽस्माकं परस्पा अतिशयेन पालयिता । अथ स्विष्टकृतः पुरोनुवाक्यामाह--

स्वस्ति नो दिव इति । हेऽग्ने नोऽस्मभ्यं स्वस्ति निर्विघ्नं विधायुः संपूर्ण-

(याज्यानुवाक्याभिधानम्)

मायुर्धेहि संपादय। किमर्थं, यजथाय यागानुष्ठानार्थम्। कुव, दिवो द्युलोके पृथिव्या भूलोके। हे देव यदा द्युलोके भूलोके वा तिष्ठामस्तदा सर्वदा संपूर्णमायुः प्रयच्छेत्यर्थः। हे दिविजात स्वर्गसमुत्पन्नाग्ने यद्द्रविणं सीमहि वयं सेवेष तद्द्रविणमस्मासु धेहि संपादय। कीदृशं द्रविणं, प्रशस्तं विद्यमानश्रेष्ठयं चित्रं मणिमुक्तादिनानाजात्युपेतम्। तत्रैव याज्यामाह—

यथा होतरिति। सहसो मन्थनरूपस्य बलस्य सूनुः पुत्रोऽग्निः। स च देवानामाह्वाता। हे सहसः सूनो होतरग्ने यथा मनुषो मनुष्यानुग्रहेण पालयासि, देवत्राता देवानपि यज्ञैर्यजासि पूजयसि। त्रातिप्रत्ययस्य स्वार्थे विहितत्वादेवा एव देवतातयः। देवताता देवतातीन्। इतरयजमानपालनं तदीयदेवयजनं च दृष्टान्तः। दार्ष्टान्तिकं तु स्वकीयदेवयजनमुच्यते। एवा एवमेव हेऽग्ने नोऽस्माकमद्यास्मिन्कर्मणि देवान्याक्षि त्वं यज। कीदृशस्त्वं, समना तैर्देवैः सह समानमनस्कः। यद्वा समानस्तैर्देवैस्तुल्य इत्यर्थः। उशन्कामयमान आस्थायुक्त इत्यर्थः। कीदृशान्देवान्, समानांस्त्वया तुल्यानुशतः कामयमानांस्त्वयि प्रीतियुक्तानित्यर्थः।

अथ मरुद्भ्यः सांतपनेभ्यो मध्यंदिने चरुमित्यत्र प्रथमाज्यभागस्यानुवाक्यामाह—

अग्निमीड इति। इममग्निमहमीडे स्तौमि। कीदृशं, पुरोहितं पुरोदेशे आहवनीये स्थापितं, यज्ञस्यानुष्ठीयमानस्य कर्मण ऋत्विजमृत्विक्त्वनिष्पादकं, देवं द्योतमानं, होतारं देवानामाह्वातारं, रत्नधातमं अतिशयेन रत्नानां मणिमुक्तादिप्रभृतीनां संपादकम्। अथ द्वितीयाज्यभागस्य पुरोनुवाक्यामाह—

वृषा सोमेति। हे सोम त्वं वृषा कामानां वर्षयिता द्युमान्दीप्तिमांश्चासि। हे देव यस्मात्त्वं वृषा वर्षयिता तस्मात्त्वं वृषव्रतो वर्षनिमित्तं कर्म यस्यासौ वृषव्रतः। किंच यस्मात्त्वं वृषा वर्षयिता तस्मात्त्वमणि पुण्यानि दधिषे धारयसि।

अथ प्रधानस्य हविषः पुरोनुवाक्यामाह—

सांतपना इति। सम्यक्तप्यन्ते शत्रव एभिरिति सांतपनाः। तादृशो हे मरुतोऽस्माभिर्दीयमानं यदिदं हविरस्ति तज्जुजुष्टन सेवध्वम्। किमर्थं, युष्माकोती युष्माकमूतये क्षुद्व्याधातो रक्षणाय। कीदृशा मरुतः, रिशादसो रिशन्ति हिंसन्तीति रिशास्तानदन्ति भक्षयन्ति विनाशयन्तीति रिशादसः। अथ तत्रैव याज्यामाह—

---

१ क. च. यथा। च. ङ. यदि। २ स. च. °स्तथा स°।

यो नो मर्त इति। वसवो वासहेतवो हे मरुतो यो मर्तो मनुष्यो दुर्हणायुर्दुष्टक्रोधोऽत्यन्तं पापबुद्धिः सन्सत्यानि तिरोऽस्मान्प्रति कृतान्सर्वथा नानिष्टं करिष्यामीत्येवंरूपाञ्शपथांस्तिरस्कृत्य नोऽस्माञ्जिघांसाद्धन्तुमिच्छेत्स द्रुहो द्रोहो पाशं भवदीयं बन्धनरज्जुं प्रतिमुचीष्ट प्रतिमुञ्चतु। स्वगले बध्नात्वित्यर्थः। तं द्रोहिणं तपिष्ठेन तपसाऽत्यधिकेन संतापेन हन्तन मारयत। तत्रैव विकल्पितां याज्यामाह—

संवत्सरीणा इति। हे मरुतः, सन्ति ते पाशास्त्वकीयबन्धमरज्जूरस्मदस्मत्तोऽपनीय मानुषेषु विरोधिजनेषु प्रमुञ्चन्तु गले बध्नन्तु। कीदृशान्पाशान्, अंहसः पापिष्ठानत्यन्तनिर्बन्धहेतूनित्यर्थः। कीदृशा मरुतः, संवत्सरीणाः सकृद्यागेनाऽऽराधिताः संवत्सरपर्यन्तं रक्षकाः, स्वर्काः सुष्ठूच्चर्चनीयाः, उरुक्षया विस्तीर्णगृहाः, सगणाः सप्तभिर्गणैः सहिताः। 'सप्तगणा वै मरुतः' इति श्रुत्यन्तरात्। सांतपनाः सम्यक्शत्रूणां तापकारिणः, मदिराः स्वयं हृष्टाः, मादयिष्णवोऽस्मानपि हर्षयन्तः। अथ तत्रैव स्विष्टकृतः पुरोनुवाक्यामाह—

पिप्रीहि देवानिति। हे यविष्ठ युवतमाग्ने उशतः कामयमानान्देवान्विभक्तिशयेन प्रीणय। हे क्रतुपते सूर्यात्मना कालपरिपालक त्वमृतून्कालविशेषान्विद्वाञ्जानन्वर्तसे। तस्मादिहोचिते काले यज। देवेषु भवा ये दैव्या ऋत्विजः सन्ति "अग्निर्होता। अश्विनाऽध्वर्यू। त्वष्टाऽग्नीत्" इत्यादिनाऽऽम्नातास्तैर्देवैः सह त्वमस्य यजमानस्य संबन्धिनां होतृणामृत्विजां मध्य आयजिष्ठः सर्वतो यष्टृतमोऽसि। तत्रैव याज्यामाह—

अग्ने यदद्येति। हे स्विष्टकृदग्ने विशः प्रविष्टस्यानुष्ठितस्याध्वरस्य संबन्धि यद्धविरस्ति तदद्य वेरशान भक्षय। होतर्होमकर्तः पावक शोधक शोचे दीप्यमान, तान्येतान्यग्निविशेषणानि। हि यस्मात्त्वं यज्वा यागस्य कर्ता तस्मादृता ऋतेऽस्मदीययज्ञे महिना महिम्ना यजासि देवान्प्रीणयसि। यद्यस्मात्कारणाद्विभूर्विशिष्टो भवसि तत्तस्मात्कारणाद्धे यविष्ठ युवतमाद्य ते तव या हव्या यानि हव्यानि अस्माभिर्दीयन्ते तानि [वह] स्वीकुरु। यद्यप्येतन्मन्त्रद्वयं दार्शिकहौत्रकाण्डे समाम्नातत्वाच्चोदकादेव प्राप्तं तथाऽपि वि पृष्टार्थं पुनर्वचनमिति द्रष्टव्यम्। अथ "मरुद्भ्यो गृहमेधिभ्यः सर्वेषां दुर्वे सायं चरुम्" इत्यत्र प्रथमस्याऽऽज्यभागस्य पुरोनुवाक्यामाह—

(याज्यानुवाक्याभिधानम्)

अग्निना रयिमिति। अनेनाग्निना रयिं धनमश्नवत्सर्वो जनः प्राप्नोति। न केवलं धनस्य स्वरूपमात्रं, किंतु दिने दिने तस्य धनस्य पुष्टिमेव प्राप्नोति न तु ह्रासम्। कीदृशं पोषं, यशसं कीर्तिकरं, वीरवत्तमं वीरा अस्मदीयाः पुत्रा अन्येति वीरवानतिशयेन तथाविधम्। अथ द्वितीयस्याऽऽज्यभागस्य पुरोनुवाक्यामाह—

गयस्फान इति। हे सोम नोऽस्मान्प्रत्युच्यमानविशेषणविशिष्टो भव। कानि तानि विशेषणानीति तान्युच्यन्ते—गयस्फानो गृहाणां वर्धयिता। अमीवहा रोगाणां हन्ता। वसुविदनस्य लम्भयिता। पुष्टिवर्धनो गवादिषु पुष्टेर्वर्धयिता। सुमित्रः शोभनं यजमानरूपं मित्रं यस्यासौ सुमित्रः। अथ प्रधानस्य पुरोनुवाक्यामाह—

गृहमेधास इति। गृहे क्रियमाणो मेधो यज्ञो येषां ते गृहमेधासः। तादृशा हे मरुत आगतेह कर्मण्यागच्छत। माऽपभूतन कदाचिदपि माऽपगच्छत। किं कुर्वन्तः, अंहसः पापान्नोऽस्मान्प्रमुञ्चन्तः प्रकर्षेण वियोजयन्तः। तत्रैव याज्यामाह—

पूर्वीभिर्हीति। हे मरुतो वयं यजमानाः पूर्वीभिरनादिकालप्रवृत्ताभिर्महीभिर्ऋषिभिर्दीर्घपूर्णतया महनीयाभिः शरद्भिः संवत्सरैश्चर्षणीनां मनुष्याणामूतिभिर्मध्ये स्थित्वा हि यस्माद्दाशिम हविर्दत्तवन्तस्तस्माद्यूयमिहाऽऽगच्छत।

तत्रैव विकल्पितामन्यां याज्यामाह—

प्र बुध्नियेति। हे मरुतो बुध्निया बुध्ने मूले भवानि बुध्नियानि। अनादिकालप्रवृत्तानीत्यर्थः। वो महांसि युष्माकं तेजांसि प्रेरते प्रकर्षेण गच्छन्ति प्रवृत्तानीत्यर्थः। प्रयज्यवः प्रकृष्टयागयुक्ता यूयं नामानि गृहमेधिनो मरुतो वयमित्यादीनि भवदीयनामधेयानि प्रतिरध्वं प्रकर्षेण लोके ख्यापयत। सहस्रियं सहस्रसमार्हं गृहमेधीयं गृहमेधिनो युष्मानुद्दिश्य दीयमानमेतं भागं पुरोडाशरूपं जुषध्वं सेवध्वम्। अथ तत्रैव स्विष्टकृतः पुरोनुवाक्यामाह—

उप यमेतीति। युवतिमन्त्रेण मिश्रीभूता हविष्मती संपूर्णहविर्युक्ता घृताची घृतपुष्टेयमाहुतिर्दोषा रात्रौ वस्तोर्दिवसे च सुदक्षं कुशलं यं स्विष्टकृतमग्निमुपैति प्राप्नोति। एनं स्विष्टकृतमग्निमरमतिः कदाचिदप्युपरतिरहितो वसूयुर्धनमिच्छन्य-

१ ख. च. °ण मावय°। २ ख. च. °ध्ये स्थायिभिर्यस्मा°। ३ ख. च. °र्दत्तम तस्मा°। ४ ख. °रमति°।

(याज्यानुवाक्याभिधानम्)

जमानः स्वा स्वकीयेन हविषोपैति प्राप्नोति सेवत इत्यर्थः । अथ तत्रैव याज्यामाह—

इमो अग्न इति । हेऽग्न इमो इमानि वीततमान्यतिशयेन कान्तानि हव्या हवींषि देवातिमच्छ देवानभिप्राप्तुमजस्रोऽनुपरतो वक्षि वह। नोऽस्मत्संबन्धीनि तुरभीणि त्वगन्धीनि हवींषि प्रती प्रत्येकमेव वियन्तु देवा भक्षयतु ।

अथ " मरुद्भ्यः क्रीडिभ्यः पुरोडाशꣳ सप्तकपालं निर्वपति साकꣳ सूर्ये-णोद्यता " इत्यस्य हविषः पुरोनुवाक्यामाह—

क्रीडं वः शर्ध इति । हे कण्वाः कण्वप्रभृतयो वेदाचार्याः शर्धो बलमभि प्रगायताभितो वैदिकैः स्तोत्रैः प्रकर्षेण गानं कुरुत । कीदृशं बलं, वः क्रीडं युष्माकं क्रीडाकारणं, मारुतं मरुतां संबन्धि, अनर्वाणं भ्रातृव्यैरतिरस्कृतम् । भ्रातृव्यो वा अर्वेति श्रुत्यन्तरात् । रथेशुभं रथप्रेरणे समर्थम्। तत्रैव याज्यामाह—

अत्यासो न य इति । ये मरुतः शुभयन्त शोभयन्ते स्वरुचा स्वसंचारेण सर्वं जगदलं कुर्वन्तीत्यर्थः । तेऽस्माननुगृह्णन्त्विति शेषः । कीदृशा मरुतः, अत्यासो न सततगमनशीला अश्वादय इव, स्वञ्चः शोभनगतयः, यक्षदृशो न मर्या यागदर्शनार्थिनो मर्त्या इवौत्सुक्येनात्र समागता इति शेषः । हर्म्येष्ठाः शिशवो न शुभ्राः प्रासादमारूढा राजबालका इव पर्वतेषु शुभ्राः संचरन्तीति शेषः। वत्सासो न प्रक्रीडिनः । यथाऽत्यन्तबालवत्साः शीघ्रमितस्ततः पलाय-माना: प्रकर्षेण क्रीडन्ति तथा तत्र तत्र संचरन्तः क्रीडापराः, पयोधा मेघानु-त्पाद्य तेषु जलधारिणः । तत्रैव विकल्पितामन्यां पुरोनुवाक्यामाह—

प्रैषामज्मेषु विथुरिति । एषां मरुतामज्मेषु गमनेषु भूमिः प्ररेजते प्रकर्षेण रेजते कम्पते । भृशं भूकम्पजनकानि मरुतां गमनानीत्यर्थः। तत्र दृष्टान्तः—विधु-रेव यथा भर्तृरहिता योषित्पालकाभावादत्यन्तं कम्पते तद्वत् । यद्म ये हि मरुतो यामेषु जलस्य नियामकेषु मेघेषु युञ्जते जलं योजयन्ति ते मरुतो महित्वं स्वकीयमहिमानं स्वयं पनयन्त स्वयमेवं व्याहरन्ति स्तुवन्ति वा । कीदृशास्ते, क्रीडयः क्रीडापराः, धुनयः कम्पयुक्ताः सर्वदा चलन्त इत्यर्थः । भ्राजदृष्टयो भ्राजो दीप्तिर्विद्युद्रूपा दृष्टिर्येषां ते भ्राजदृष्टयः । धूतयः शत्रूणां कम्पहेतवः । तत्रैव विकल्पितां याज्यामाह—

---

१ क. ख. च. ° व व्यवह° ।

(याज्यानुवाक्याभिधानम्)

उपहूवरेषु यदिति। हे मरुतो यद्यदा वयं इव पक्षिण इव यूयं केनचित्पथा केनापि मार्गेणोपह्वरेषूपेत्य हर्तव्येषु ताडनीयेषु मेघेषु वर्षमचिध्वं गतिं संपादितवन्तः। यदा जलपूर्णमेघमास्कालयन्ति भवन्त इत्यर्थः। तदानीं कोशा धनपूर्णगृहसदृशा जलपूर्णा मेघा वो युष्माकं रथेषूप समीपमागतेषु तत्तु श्रोतन्ति जलं स्रावयन्ति। यूयमप्यर्चते यजमानाय मधुवर्णं मधुररसोपेतं घृतं घृतस्नानमुदकमा समन्तादुक्षत सिञ्चत। अथ तत्रैव स्विष्टकृतः पुरोनुवाक्यामाह—

अग्निमग्निमिति। अग्निमाग्निं तत्तद्यागगतास्विष्टकृतं हवीमाभिराह्वानपरैः सदा हवन्त सर्वदा यजमाना आह्वयन्ति। कीदृशमग्निं, विशपतिं प्रजानां पालकं हव्यवाहं देवान्प्रति हविषो वोढारं, पुरुप्रियं पुरूणां बहूनां यजमानानां प्रीतिहेतुम्। तत्रैव याज्यामाह—

तꣳ हि शश्वन्त इति। शश्वन्तो निरन्तरमनुतिष्ठन्त ऋत्विजो घृतच्युता घृतं क्षरता(न्त्या) स्रुचा युक्तास्तमग्निं देवमीडते स्तुवते। किमर्थं, हव्याय वोढवे हविर्वोढुम्।

अथ पान्यन्यानि त्रीणि हवींष्याम्नातानि—" ऐन्द्राग्नमेकादशकपालमैन्द्रं चरुं वैश्वकर्मणमेककपालम् " इति, तत्रैन्द्राग्नस्य याज्यापुरोनुवाक्ययोः प्रतीके दर्शयति—

इन्द्राग्नी रोचनेति। इन्द्राग्नी रोचना दिव इति पुरोनुवाक्या। अथदृग्भमिति याज्या। एतच्चोभयमिन्द्राग्नी रोचना दिव इत्यनुवाके व्याख्यातम्।

अथैन्द्रस्य याज्यानुवाक्ययोः प्रतीके दर्शयति—

इन्द्रं वो विश्वत इति। इन्द्रं वो विश्वतस्परीति पुरोनुवाक्या। इन्द्रं नर इति याज्या। एतच्चोभयमिन्द्रं वो विश्वतस्परि हवामह इत्यनुवाके व्याख्यातम्। अथ वैश्वकर्मणस्य याज्यानुवाक्ययोः प्रतीके दर्शयति—

विश्वकर्माजनिति। तत्र विश्वकर्मन्हविषा वावृधान इति पुरोनुवाक्या। विश्वकर्मन्हविषा वर्धनेनेति याज्या। एतच्चोभयं य इमा विश्वा भुवनानि जुह्वदित्यनुवाके व्याख्यास्यते। अत्र विनियोगसंग्रहः—

अथ याज्या साकमेधे सनीकवति यागके।
आज्यभागानुवाक्ये द्वे समिर्वृत्रेति वर्णिते॥

---

१ ख. घ. ङ. च. यथा। २ ख. च. °भयं पूर्वप्रपाठकस्यान्त्यानु°।

(याज्यानुवाक्याभिधानम्)

भद्रा तिस्रः प्रधाने स्युः स्वस्ति स्विष्टकृति द्वयम् ।
अग्निं सांतपनीयाज्यभागयोर्द्वे प्रधानके ॥
सांततिस्रः पिपीलमे द्वयं स्विष्टकृतीरितम् ।
अग्निना गृहमेधीये द्वे स्यातामाज्यभागयोः ॥
गृह प्रधाने तिस्रः स्युरुप स्विष्टकृति द्वयम् ।
क्रीडं चतुष्टयं क्रीडियागे स्याग्निमिति द्वयम् ॥
संभाज्ये स्तामथेन्द्राग्नी श्रथच्चैन्द्राग्नयागके ।
इन्द्रमिन्द्रं चैन्द्रयागे विश्वद्वे वैश्वकर्मणे ॥
त्रयस्त्रिंशदृचः प्रोक्ता अनुवाक इहान्तिमे ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे तृतीयप्रपाठके
त्रयोदशोऽनुवाकः ॥ १३ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य
श्रीवीरबुक्कमहाराजस्याऽऽज्ञापरिपालकेन माधवाचार्येण विरचिते
वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये
चतुर्थकाण्डे तृतीयः प्रपाठकः ॥ ३ ॥

(पञ्चमचितिशेषस्तोमभागाभिधानम्)

अथ चतुर्थाष्टके चतुर्थः प्रपाठकः।

(तत्र प्रथमोऽनुवाकः)।

हरि ॐ।

रश्मिरसि क्षयाय त्वा क्षयं जिन्व प्रेतिरसि धर्माय त्वा धर्मं जिन्वान्वितिरसि दिवे त्वा दिवं जिन्व संधिरस्यन्तरिक्षाय त्वाऽन्तरिक्षं जिन्व प्रतिधिरसि पृथिव्यै त्वा पृथिवीं जिन्व विष्टम्भोऽसि वृष्ट्यै त्वा वृष्टिं जिन्व प्रथाऽस्यह्ने त्वाऽहर्जिन्वानुवाऽसि रात्र्यै त्वा रात्रिं जिन्वोशिगसि (१) वसुभ्यस्त्वा वसूञ्जिन्व प्रकेतोऽसि रुद्रेभ्यस्त्वा रुद्राञ्जिन्व सुदीतिरस्यादित्येभ्यस्त्वाऽऽदित्याञ्जिन्वौजोऽसि पितृभ्यस्त्वा पितॄञ्जिन्व तन्तुरसि प्रजाभ्यस्त्वा प्रजा जिन्व पृतनाषाडसि पशुभ्यस्त्वा पशूञ्जिन्व रेवदस्योषधीभ्यस्त्वौषधीर्जिन्वाभिजिदसि युक्तग्रावेन्द्राय त्वेन्द्रं जिन्वाधिपतिरसि प्राणाय (२) त्वा प्राणं जिन्व यन्ताऽस्यपानाय त्वाऽपानं जिन्व स꣣ꣳसर्पोऽसि चक्षुषे त्वा चक्षुर्जिन्व वयोधा असि श्रोत्राय त्वा श्रोत्रं जिन्व त्रिवृदसि प्रवृदसि संवृदसि विवृदसि स꣣रोहोऽसि नीरोहोऽसि प्ररोहोऽस्यनुरोहोऽसि वसुकोऽसि वर्षिष्ठरसि वर्ष्यष्टिरसि (३)।

(अजिरासि प्राणाय त्वा व्यानाय त्वा)।

(पञ्चमचितिशेषस्तोमभागाभिधानम्)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
चतुर्थप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

अथ चतुर्थकाण्डे चतुर्थः प्रपाठकः ।

(तत्र प्रथमोऽनुवाकः)।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
प्रपाठके तृतीयेऽस्मिन्नितयः पञ्च वर्णिताः ।
चतुर्थे पञ्चमचितेः शेषः सर्वो विधीयते ॥

तत्र प्रथमानुवाके स्तोमभागा उच्यन्ते ।

कल्पः—" राश्मिरसि क्षयाय त्वा क्षयं जिन्वेति स्तोमभागाः सप्त सप्त प्रतिदिशमवशिष्टा मध्ये " इति ।

तत्र पूर्वस्यां दिश्युपधेयानामिष्टकानां सप्त मन्त्रानाह—

राश्मिरसि क्षयायेति । हे इष्टके त्वमादित्यरश्मिरूपोऽस्यतः क्षयाय निवाससिद्ध्यर्थं त्वामुपदधामि । त्वं चास्माकं क्षयं निवासं जिन्व प्रीणय संपादयेत्यर्थः । एवं सर्वं योजनीयम् । प्रकृष्टा गतिर्यस्याः सा प्रेतिः । धर्मो विहितकर्मानुष्ठानम् । अनुकूला गतिर्यस्याः सानुमतिः । द्यौः स्वर्गः । द्यावापृथिव्योर्मध्यवर्ती देशः संधिः । अन्तरिक्षं गन्धर्वादिलोकभागोऽन्तरिक्षम् । पतिशब्देन भूलोकभाग उपलक्ष्यते । विशेषेण स्तभ्यते जलमत्र धार्यत इति विष्टम्भो मेघः । प्रथमं याति गच्छति प्रवर्तत इति प्रयोषःकालः । उषा हि सूर्योदयात्पूर्वं प्रवर्तते । अतोऽहःसिद्ध्यर्थं त्वामुपदधामि ।

अथ दक्षिणस्यां दिश्युपधेयानामिष्टकानां सप्त मन्त्रानाह—

अनुवाऽसि रात्रिया इति । अनु सूर्यास्तमयात्पश्चाद्वाति चरति प्रयातीत्यनुवा सायंसंध्या । उशिग्वसुभिः काम्यमानाऽसि । अतो वसुभ्यो वसूनां प्रीत्यर्थं त्वामुपदधामि । त्वं च वसूञ्जिन्व प्रीणय । एवमुत्तरत्र योज्यम् । प्रकृष्टः केतो यः [स] प्रकेतः । रुद्राणां यः प्रकेतस्तद्रूपा त्वमसि । शोभना दीति-

---

१ च. °तीये हि चित° । २ ख. च. सर्वत्र । ३ ख. च. °क्षश° । ४ ख. घ. ङ. च. इत्युषः° । ५ घ. ङ. °शिगसि का° । ६ क. °सि वसुभिर्वसु° । घ. ङ. °सि व° । ७ घ. °कुष्टो यः के° । ८ क. यस्य ।

(पञ्चमचितिशेषस्तोमभागाभिधानम्)

दीक्षितः सुदीक्षितः सा त्वमसि । ओजो बलं पितॄणां यद्बलमनुग्रहस्तमर्थं तद्रूपा त्वमसि । तन्तुः पुत्रपौत्रादिसंतत्यम् । स्वकीयान्गवादिपशूनपहर्तुमागता या परकीयसेना सा पृतना तां सहतेऽभिभवतीति पृतनाषाट् ।

अथ पश्चिमायां दिश्युपधेयानामिष्टकानां सप्त मन्त्रानाह—

रेवदस्योषधीभ्य इति । रा अस्यास्तीति रेवत् । ओषधिसाध्यं यद्धनं जीवनं तद्रूपा त्वमसि । अभितो जयसि शत्रूनभिभवसीत्यभिजित् । पाषाणतुल्यो बज्रो भावा, युक्तो हस्ते स्वीकृतो भावा यस्यासौ युक्तभावा । इन्द्रश्चक्षुरादीन्द्रियाण्यधिष्ठाय पालयिता । यः श्वासरूपो वायुः सोऽधिपतिस्तद्रूपा त्वमसि । बहिर्निर्गतस्य श्वासस्य पुनरभ्यन्तःप्रवेशाय नियामको यो वायुविशेषः स यन्ता, तद्रूपा त्वमसि । सम्यक्तर्पयति बलेन प्रवर्तयति मां चयनधनप्रस्वा-(स्वीक)रणाय संतर्पो हृष्टिः । वयः पक्षी तद्वद्भावतीति वयोधाः । पक्षी तत्र तत्र सत्वा स्वकार्यं साधयति तथा श्रोत्रेन्द्रियशक्तिस्तत्तच्छब्दं प्राप्य निश्चिनोति, तच्छक्तिरूपा त्वमसि । तिस्र आवृतोऽवयवविशेषा यस्य मिथुनीभावस्य सोऽयं त्रिवृत्पुमान्योषित्सङ्कल्पेत्यवयवत्रयं, तथाविधमिथुनीभावरूपा त्वमसि ।

अथोदीच्यां दिश्युपधेयानामिष्टकानां सप्त मन्त्रानाह—

प्रवृद्धसि संवृदिति । स्त्रीपुरुषयोः संसर्गानन्तरभाविनी या प्रवृत्तिः सा प्रवृत्तरूपा त्वमसि । प्रवृत्यनन्तरभावी यः सम्यग्व्यापारः सोऽयं संवृत्तरूपा त्वमसि । तद्व्यापारादूर्ध्वं या विवृत्तिः सा विवृत्तरूपा त्वमसि । संभोगादूर्ध्वं बीजस्य क्षेत्रे यः समारोपः सोऽयं प्ररोहस्तद्रूपा त्वमसि । क्षेत्रे प्रक्षिप्तस्य बीजस्य निःशेषेण गर्भाशयव्याप्तिर्नीरोहस्तद्रूपा त्वमसि । गर्भाशये व्याप्तस्य बीजस्य शरीराकारः परिणामः प्ररोहस्तद्रूपा त्वमसि । तस्य च परिणतस्य शरीरस्यानुकूलः पुत्रादिरूपेण प्रादुर्भावोऽङ्कुरोहस्तद्रूपा त्वमसि ।

अथ मध्यदेश उपधेयानामिष्टकानां भीमन्त्रानाह—

वसुकोऽसीति । वसु धनमस्यास्तीति वसुको धनी पुत्रस्तद्रूपा त्वमसि ।

---

१ क. °धीसां° । २ ख. घ. ङ. °नं तद्वज्जीवं° । च. °नं तं° । ३ ख. च. °तवतः श्वा° । ४ ख. च. °लेनति संसर्पोऽहि । धनहृष्टिसारणया धनमवति एवं मामवतु धने हृष्टिं प्रसारय । वयः । ५ क. ख. °द्वहधाती° । ६ क. घ. ङ. °न्तरं भा° । ७ ख. च. °सि । सङ्कल्पा° । ८ घ. ङ. तद्रूपाङ्कु° । ९ ख. च. क्षिप्तस्य ।

वेषो व्याप्तं धनं, वेषं श्रयते सेवत इति वेषाश्रीः । प्राप्तस्याभिवृद्धिकारीत्यर्थः । तद्रूपा त्वमसि । वसुनोऽभिवृद्धस्य धनस्याष्टिर्भोजनं यस्यासौ वस्यष्टिः । धनं संपाद्य तदभिवृद्धिं च कृत्वा तयाऽभिवृद्धया जीवतीत्यर्थः । तद्रूपा त्वमसि ।

एतैर्मन्त्रैः साध्यमुपधानं विधत्ते—

" यज्ञेन वै प्रजापतिः प्रजा असृजत ताः स्तोमभागैरेवासृजत यत्स्तोमभागा उपदधाति प्रजा एव तद्यजमानः सृजते " [सं० का०५प्र०३अ०५]इति ।

प्रजापतिर्यदा यज्ञेन प्रजा असृजत तदानीं यज्ञमभ्यवर्तिनः स्तोमभागमन्त्रा एवं सृष्टिहेतव आसन् । त्रिवृदादिस्तोमयुक्तानि यानि बर्हिष्पवमानादिस्तोत्राणि तानि भजन्त इति रश्मिरित्यादयो मन्त्राः स्तोमभागाः । ब्रह्मा तत्स्तोत्राण्यभ्यनुजानन्रश्मिरित्यादिकमेकैकं मन्त्रमुच्चार्याभ्यनुजानाति । एतच्चास्माभिः पूर्वमृषयो वा इन्द्रमित्यनुवाके स्पष्टमुक्तम् । अतो रश्मिरित्यादयः स्तोमभागाः । एतर्मन्त्रैरुपधेया इष्टका अपि स्तोमभागाः । तदुपधानेन यजमानः प्रजाः सृजत एव । ता एताः स्तोमभागरूपा इष्टका यज्ञेजस्त्वेन यज्ञप्रतिष्ठात्वेन च क्रमेण प्रशंसति—

" बृहस्पतिर्वा एतद्यज्ञस्य तेजः समभरद्यत्स्तोमभागा यत्स्तोमभागा उपदधाति सतेजसमेवाग्निं चिनुते बृहस्पतिर्वा एतां यज्ञस्य प्रतिष्ठामपश्यद्यत्स्तोमभागा यत्स्तोमभागा उपदधाति यज्ञस्य प्रतिष्ठित्यै " [सं० का० ५ प्र० ३ अ० ५] इति । सामान्येन विहितं पुनर्विशेषाकारेण विधत्ते—

" सप्तसप्तोप दधाति सवीर्यत्वाय तिस्रो मध्ये प्रतिष्ठित्यै" [सं० का०५ प्र० ३ अ० ५] इति ।

एकैकस्यां दिशि सप्तसप्तोपधानेन सवीर्यत्वं दार्ढ्यं भवति । मध्ये त्रिसृणामुपधानेन प्रतिष्ठा स्थैर्यं भवति ।

प्रजापतिः स्तोमभागैरेवासृजतेति सामान्यत उक्तं, तेषु कैः स्तोमभागैः किमसृजतेत्येकैकमिष्टकामन्त्रं विभजते—

"रश्मिरित्येवाऽऽदित्यमसृजत प्रेतिरिति धर्ममन्विति[1]रिति दिव[2]ꣳ संधिरित्यन्तरिक्षं

---

१ च. यज्ञात्प्रजा । २ ख. च. °व वृद्धिहे° । ३ ख. घ. ङ. च. °तवः । त्रिं° । ४ च °दयो मन्त्राः स्तो° । ५ ख. च. °गाः । तः । ६ ख. च. प्रशंसति । ७ क. °ष्येऽपि ति° । ८ ख. च. रेव प्रजा असृ° । ९ ख. च. तच्च ।

(पञ्चमचितिशेषस्तोमभागाभिधानम्)

प्रतिधिरिति पृथिवी विष्टम्भ इति वृष्टिं प्रवेत्यहरनुवेति रात्रिमुशिगिति वसून्पृक्ष इति रुद्रान्त्सुदीतिरित्यादित्यानोज इति पितॄंस्तन्तुरिति प्रजाः पृतनाषाडिति पशून्रेवदित्योषधीः " [तै० का० ५ प्र० ३ अ० ६] इति ।

तत्र रश्मिरित्यादयो मन्त्रास्तत्तृष्ण्यपदार्थसंबन्धित्वेन पूर्वं व्याख्याताः । अतस्तेन मन्त्रेण तत्तत्पदार्थमसृजतेत्युपपन्नम् । एवं पञ्चदशभिर्मन्त्रैः सृष्टिरभिहिता । अथ सृष्टस्य जगतो रक्षाहेतुभूतं षोडशं मन्त्रं दर्शयति—

"अभिजिदसि युक्ष्मावेन्द्राय त्वेन्द्रं जिन्वेत्येव दक्षिणतो वज्रं पर्यूहदभिजित्यै " [तै० का० ५ प्र० ३ अ० ६] इति ।

अस्मिन्मन्त्रे वज्र एव तंबोध्यते[1] । हे वज्र त्वमभिजिज्जयहेतुर्युक्ष्मावा स्थापितपाषाण इव दृढश्चास्यत इन्द्रप्रीत्यर्थं त्वां पर्यूहामि तेनेन्द्रं प्रीणयेति मन्त्रार्थः । प्रजापतिरेतं[2] मन्त्रमुच्चारयन्दक्षिणहस्तेन सृष्टस्य जगतो रक्षणाय वज्रं प्रेरितवांस्तेन बाधकविनाशे सति सृष्ट्या अभिजयोऽभूत् ।

याः सृष्टाः प्रजा वज्रेण रक्षितास्तासु शरीररूपासु प्रजासु मन्त्रचतुष्टयेनेन्द्रियस्थापनं दर्शयति—

" ताः प्रजा अपप्राणा असृजत तास्वधिपतिरसीत्येव प्राणमदधाद्यन्तेत्यपानꣳ सꣳ सर्प इति चक्षुर्वयोधा इति श्रोत्रम् " [तै० का० ५ प्र० ३ अ० ६] इति ।

एवमिन्द्रिययुक्तैः शरीरैर्व्यवहरन्तीषु प्रजासु मन्त्रचतुष्टयेन मिथुनीभावसंपत्तिं दर्शयति—"ताः प्रजाः प्राणतीरपानतीः पश्यन्तीः शृण्वतीर्नि मिथुनी अभवन्तासु त्रिवृदसीत्येव मिथुनमदधात् " [तै० का० ५ प्र० ३ अ० ६] इति ।

मिथुनीभूतासु प्रजासु मन्त्रचतुष्टयेन प्रजोत्पादनसामर्थ्यं दर्शयति—

"ताः प्रजा मिथुनी भवन्तीर्न प्राजायन्त ताः सꣳरोहोऽसि नीरोहोऽसीत्येव प्राजनयत् " [तै० का० ५ प्र० ३ अ० ६] इति ।

अपत्योपेतानां प्रजानां मन्त्रत्रयेण प्रतिष्ठा भवतीत्येतद्दर्शयति—

"ताः प्रजाः प्रजाता न प्रत्यतिष्ठन्ता वसुकोऽसि वेषश्रिरसि वस्यष्टिरसीत्येवैतु लोकेषु प्रत्यस्थापयद्यदाह वसुकोऽसि वेषश्रिरसि वस्यष्टिरसीति प्रजा एव

---

१ ख. च. अत्र । २ क. घ. ङ. °ते । व° । ३ घ. ङ. °श्चाऽऽसीत । ४ ख. घ. ङ. °रेतमन्त्र° । च. °रेनं म° । ५ ख. च. °त्रेणाभिर° । ६ ख. घ. ङ. च. °नां प्र° ।

प्रजावा एषु लोकेषु प्रति ष्ठापयति" [तै० का० ५ प्र० ३ अ० ६] इति। एतद्वेदनं प्रशंसति—

"आत्माऽन्तरिक्षꣳ रोहति सप्राणोऽमुष्मिँल्लोके प्रति तिष्ठत्यव्यर्धुकः प्राणापानाभ्यां भवति य एवं वेद" [तै० का० ५ प्र० ३ अ० ६] इति।

आत्मा सशरीरोऽन्तरिक्षꣳ गत्वा यक्षगन्धर्वादिलोकेषु भोगान्भुङ्क्ते, स्वर्गलोकेऽपि प्राणशरीरयुक्त एव प्रतितिष्ठति, प्राणापानाभ्यां कदाचिदपि न वियुक्तो भवति।

अत्र विनियोगसंग्रहः—

इष्टका रश्मिरित्येकत्रिंशत्तु स्तोमभागकाः॥ इति।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे चतुर्थप्रपाठके
प्रथमोऽनुवाकः॥ १॥

(अथ चतुर्थाष्टके चतुर्थप्रपाठके द्वितीयोऽनुवाकः)।

राड्यसि प्राची दिग्वसवस्ते देवा अधिपतयोऽग्निर्हेतीनां प्रतिधर्ता त्रिवृत्त्वा स्तोमः पृथिव्याꣳ श्रयत्वाज्यमुक्थमव्यथायस्तभ्नातु रथंतरꣳ साम प्रतिष्ठित्यै विराडसि दक्षिणा दिग्रुद्रास्ते देवा अधिपतय इन्द्रो हेतीनां प्रतिधर्ता पञ्चदशस्त्वा स्तोमः पृथिव्याꣳ श्रयतु प्रउगमुक्थमव्यथायस्तभ्नातु बृहत्साम प्रतिष्ठित्यै सम्राडसि प्रतीची दिक् (१) आदित्यास्ते देवा अधिपतयः सोमो हेतीनां प्रतिधर्ता सप्तदशस्त्वा स्तोमः पृथिव्याꣳ श्रयतु मरुत्वतीयमुक्थमव्यथायस्तभ्नातु वैरूपꣳ साम प्रतिष्ठित्यै

(नाकसदाख्येष्टकाभिधानम्)

स्वराडस्युदीची दिग्विश्वे ते देवा अधिपतयो वरुणो हेतीनां प्रतिधर्तैकविꣳशस्त्वा स्तोमः पृथिव्याꣳ श्रयतु निष्केवल्यमुक्थमव्यथयत्स्तभ्नातु वैराजꣳ साम प्रतिष्ठित्या अधिपत्न्यसि बृहती दिङ्मरुतस्ते देवा अधिपतयः (२) बृहस्पतिर्हेतीनां प्रतिधर्ता त्रिणवत्रयस्त्रिꣳशौ त्वा स्तोमौ पृथिव्याꣳ श्रयतां वैश्वदेवाग्निमारुते उक्थे अव्यथयन्ती स्तभ्नीताꣳ शाक्करैवते सामनी प्रतिष्ठित्या अन्तरिक्षायर्षयस्त्वा प्रथमजा देवेषु दिवो मात्रया वरिणा प्रथन्तु विधर्ता चायमधिपतिश्च ते त्वा सर्वे संविदाना नाकस्य पृष्ठे सुवर्गे लोके यजमानं च सादयन्तु (३)।

(प्रतीची दिङ्मरुतस्ते देवा अधिपतयश्चत्वारिꣳशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके चतुर्थप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ चतुर्थकाण्डे चतुर्थप्रपाठके द्वितीयोऽनुवाकः)।

प्रथमेऽनुवाके स्तोमभागाख्या इष्टका उक्ताः। अथ द्वितीये नाकसदाख्या इष्टका अभिधीयन्ते। कल्पः—"राड्यसि प्राची दिगिति पञ्च नाकसदः प्रतिदिशमेकां मध्ये" इति। तत्र प्रथमामाह—

राड्यसि प्राचीति। हे इष्टके त्वं राज्ञी राजमाना प्राची दिक्तद्रूपाऽसि। ते तव वसवोऽष्टसंख्याका अधिपत्योऽधिकं पालयितारः। अग्निस्त्वोपद्रवक-

---

१ ख. च. °ति पाठस्तु त°।

(नाकसद्नाम्येष्टकाभिधानम्)

णां हेतीनां परकीयायुधानां प्रतिधर्ता निराकर्ता । योऽयं त्रिवृदाख्यः स्तोमः स त्वां पृथिव्यां स्थापयतु । यदाज्यमुक्थमाज्यनामकं प्र वो देवायाग्नय इत्यादिकं शस्त्रमवस्थितं [तत्] त्वामव्यथयद्व्यथारहितां कुर्वत्स्तभ्नातु दृढां करोतु । यद्यंतरं साम तत्प्रतिष्ठित्यै तव चिरावस्थानाय भवतु । एवमुत्तरेष्वपि मन्त्रेषु योज्यम् । अथ द्वितीयं मन्त्रमाह—

विराडसीति । तत्तत्सामदेवतासंबन्धिनस्त्रिवृदादयः स्तोमास्ते च "समिधमा तिष्ठ" इत्यत्रैव व्याख्याताः । वायुरग्रेगा इत्यादिकं शस्त्रं प्रउगम् ।

अथ तृतीयं मन्त्रमाह—

सम्राडसीति । " आ त्वा रथं यथोतयः" इत्यादिकं मरुत्वतीयं शस्त्रम् ।

अथ चतुर्थं मन्त्रमाह—

स्वराडस्युदीचीति । " अभि त्वा शूर नोनुमः " इत्यादि निष्केवल्यम् ।

अथ पञ्चमं मन्त्रमाह—

अधिपत्न्यसीति । अधिकं पालयिष्यधिपत्नी । बृहती दिक्पौष्ण्यूर्ध्वा दिक् । "तत्सवितुर्वृणीमहे" इत्यादिकं शस्त्रं वैश्वदेवम् । "वैश्वानराय पृथुमतीराज्ञे" इत्यादिकं शस्त्रमाग्निमारुतम् । अथ सर्वेष्वपि मन्त्रेष्वनुषक्तानीयं शेषमाह—

अन्तरिक्षायेति । देवेषु मध्ये ये प्रथमजा ऋषयो नारदाद्याः । अत एव स्मर्यते—' देवर्षिर्नारदस्तथा ' इति । ते महर्षयस्त्वामिष्टकां दिवो मात्रयाऽऽकाशस्य यत्परिमाणं तेन परिमाणेन प्रथन्तु विस्तारयन्तु । किमर्थम्, अन्तरिक्षार्थमन्तरिक्षं व्याप्तुमित्यर्थः । कीदृशेन परिमाणेन, वरिणा वरणीयेन । न केवलमृषयः प्रथन्तु किंतु विधर्ता चायमधिपतिश्च योऽयमिष्टकानां निष्पादयिता यश्च पालकस्तावपि प्रथेताम् । तेन (च) महर्षयो विधर्ता चाधिपतिश्च सर्वे संविदानाः परस्परमैकमत्यं प्राप्ता नाकस्य पृष्ठे स्वर्गतदृशस्यास्य क्षेत्रस्योपरि त्वां सादयन्तु, यजमानं च स्वर्गे लोके सादयन्तु ।

अत्र यान्युदाहृतानि शस्त्राणि तान्याश्वलायनो दर्शयति—" प्र वो देवायेत्याज्यमुषसंतनुयादिति वायुरग्रेगा यज्ञमीरिति सप्तानां पुरोरुचां तस्यास्तस्या उपरिष्टादृचमृचं शंसेद्वायवायाहि दर्शतेति सप्तैकचां द्वितीयां प्रउगे त्रिरिति ।

---

१ क. घ. ङ. °तीयम° । २ ख. च. °त्तत्सं° । ३ क. °तीयम° । ४ क. °तुर्थम° । ५ ख. च. °दिकं नि° । ६ क. °ऋमम° । ७ क. घ. ° नं स्व° । ८ क. 'ष्टादृचं तृचं । ख. °ष्टात्तृच तृचं । ९ ख. च. °तृचा द्वि ।

(नाकसदास्येष्टकाभिधानम्)

मरुत्वतीयं शस्त्रं शंसेद्ध्वर्यो शोंतावोमिति माध्यंदिने शस्त्रादिष्वाहाव आ त्वा रथं यथोतय इदं वासो सुतमन्ध इति मरुत्वतीयस्य प्रतिपदनुचराविति । निष्केवल्यस्याभि त्वा शूर नोनुमोऽभि त्वा पूर्वपीतय इति प्रगाथौ स्तोत्रियानुरूपौ यदि रथंतरं पृष्ठमिति । तत्सवितुर्वृणीमहेऽद्या नो देव सवितरिति वैश्वदेवस्य प्रतिपदनुचराविति । स्वर्ण्यमग्निमारुहं तस्याऽऽद्यां पच्छ ऋगावानं पञ्चः शस्यो चेदर्धंचश इतरां संतानमुत्तमेन वचनेन वैश्वानराय पृथुपाजसे " इति । राज्यसत्त्यादिभिर्मन्त्रैः साप्यमुपधानं विधत्ते—

"नाकसद्भिर्वै देवाः सुवर्गं लोकमायन्तन्नाकसदां नाकसत्वं यन्नाकसद उपदधाति नाकसद्भिरेव तद्यजमानः सुवर्गं लोकमेति " [सं० का० ५ प्र० ३ अ० ७] इति । नाकः स्वर्गः सद्यते प्राप्यते यैर्मन्त्रैस्ते नाकसदः । तथा च मन्त्रलिङ्गम्—

"नाकस्य पृष्ठे सुवर्गे लोके यजमानं च सादयन्तु" इति । एतैर्मन्त्रैरुपधेया इष्टका अपि नाकसदः । यस्मात्ताभिर्देवाः स्वर्गं गतास्तस्मान्नाकसदिति नाम संपन्नम् । तदुपधानेन यजमानः स्वर्गं लोकं प्राप्नोति ।

दुःखनिवारकत्वेन तदुपधानं प्रशंसति—

"सुवर्गो वै लोको नाको यस्यैता उपधीयन्ते नास्मा अकं भवति " [सं० का० ५ प्र० ३ अ० ७] इति ।

कं सुखमकं दुःखं न विद्यते दुःखं यत्र सोऽयं नाकः, स्वर्गश्च तादृशः । ततो नाकसदुपधानेन यजमानस्यं दुःखं न भवति ।

पुनरपि स्थानसंपादकत्वेन प्रशंसति—

"यजमानायतनं वै नाकसदो यन्नाकसद उपदधात्यायतनमेव तद्यजमानः कुरुते " [सं० का० ५ प्र० ३ अ० ७] इति" ।

पृष्ठस्तोत्रसंबन्धितेजोरूपत्वेन पुनः प्रशंसति—

---

१ ख. °दिनं शं° । २ क. °भ्यग्र आग्नि° । ३ क. °रुते त° । ४ घ. ङ. °वासं प° । ५ ख. °स्याच्चेद° । ६ घ. ङ. संहायमु° । ७ घ. ङ. स्वर्ग्यते । च. संपद्यते । ८ क. ख. घ. ङ. °र्गस्ताह° । ९ ख. च. °सदामुप° । १० क. घ. ङ. °स्य न दुःखं भ° । ११ क. °ति । पुनरपि पृ° । घ. ङ. °ति पु° ।

" पृङ्क्तानां वा एतत्तेजः संभृतं यन्नाकसदो यन्नाकसद उपादधाति पृङ्क्तानामेव तेजोऽव रुन्धे " [सं० का० ५ प्र० ३ अ० ७] इति ।

अत्र विनियोगसंग्रहः—

राज्ञी नाकसदः पञ्च सर्वशेषोऽन्तरित्ययम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे चतुर्थप्रपाठके
द्वितीयोऽनुवाकः ॥ २ ॥

(अथ चतुर्थाष्टके चतुर्थप्रपाठके तृतीयोऽनुवाकः) ।

अयं पुरो हरिकेशः सूर्यरश्मिस्तस्य रथगृत्सश्च रथौजाश्च सेनानिग्रामण्यौ पुञ्जिकस्थला च कृतस्थला चाप्सरसौ यातुधाना हेती रक्षांसि प्रहेतिरयं दक्षिणा विश्वकर्मा तस्य रथस्वनश्च रथचित्रश्च सेनानिग्रामण्यौ मेनका च सहजन्या चाप्सरसौ दक्षिणवः पशवो हेतिः पौरुषेयो वधः प्रहेतिरयं पश्चाद्विश्वव्यचास्तस्य रथप्रोतश्चासमरथश्च सेनानिग्रामण्यौ प्रम्लोचन्ती च (१) अनुम्लोचन्ती चाप्सरसौ सर्पा हेतिर्व्याघ्राः प्रहेतिरयमुत्तरात्संयद्वसुस्तस्य सेनजिच्च सुषेणश्च सेनानिग्रामण्यौ विश्वाची च घृताची चाप्सरसावापो हेतिर्वातः प्रहेतिरयमुपर्यर्वाग्वसुस्तस्य तार्क्ष्यश्चारिष्टनेमिश्च सेनानिग्रामण्यावुर्वशी च पूर्वचित्तिश्चाप्सरसौ विद्युद्धेतिरवस्फूर्जन्प्रहेतिस्तेभ्यो नमस्ते नो मृडयन्तु ते यम् (२)

(चोडाख्येष्टकाभिधानम्)

द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधाम्या-
योस्त्वा सदने सादयाम्यवतश्छायायां नमः
समुद्राय नमः समुद्रस्य चक्षसे परमेष्ठी त्वा
सादयतु दिवः पृष्ठे व्यचस्वतीं प्रथस्वतीं विभू-
मतीं प्रभूमतीं परिभूमतीं दिवं यच्छ दिवं
दृꣳह दिवं मा हिꣳसीर्विश्वस्मै प्राणायापा-
नाय व्यानायोदानाय प्रतिष्ठायै चरित्राय
सूर्यस्त्वाऽभि पातु मह्या स्वस्त्या छर्दिषा
शंतमेन तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद।
प्रोथदश्वो न यवसे अविष्यन्यदा महः संवर-
णाद्व्यस्थात्। आदस्य वातो अनु वाति
शोचिरध स्म ते व्रजनं कृष्णमस्ति (३)॥

(प्रम्लोचन्ती च यꣳ स्वस्त्याऽष्टाविꣳशतिश्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
चतुर्थप्रपाठके तृतीयोऽनुवाकः॥ ३॥

(अथ चतुर्थकाण्डे चतुर्थप्रपाठके तृतीयोऽनुवाकः)।

द्वितीयेऽनुवाके नाकसदाख्या इष्टका उक्ताः। अथ तृतीये चोडाख्या इष्टका उच्यन्ते। कल्पः—"तासु पुरीषमध्यू(ध्यु)हायं पुरो हरिकेश इति पञ्च चोडा अभ्युपदधाति द्वेष्यं मनसा ध्यायन्पश्चात्पाचीमुत्तमाम्" इति।

तत्र प्रथमं मन्त्रमाह—

अयं पुरो हरिकेश इति। अयमग्निः पुरः पूर्वस्यां दिशि हरिकेशो हिरण्यवर्णकेशसमाना ज्वाला यस्यासौ हरिकेशः सूर्यसमानरश्मिस्तस्य तादृशस्याग्नेः परिचारकौ द्वौ सेनानिग्रामण्यौ। एकः सेनां परराज्येषु नयत्यपरः

---

१ ख. च. पुर इ°। २ क. घ. ङ. °थमामा°। ३ क. घ. ङ. °वर्णा के°।

(चोढाख्येष्टकाभिधानम्)

स्वराज्ये ग्रामं नयति । तत्र रथगृत्स इति सेनान्यो नामधेयम् । गृत्सो गर्धनवान् । यस्य रथे महती तृष्णा सोऽयं रथगृत्सः । रथौजा इति ग्रामण्यो नामधेयम् । ओजो बलम् । यस्य रथारोहणे बलाधिक्यं स रथौजाः । यथैतौ मुख्यौ परिचारकौ तथा द्वे अप्सरसौ परिचारिके । तत्र पुञ्जिकस्थलेत्येकस्या नामधेयं, क्रतस्थलेत्यपरस्या नामधेयम् । यातुधाना रक्षांसि चेत्यवान्तरजातिभेदोऽवगन्तव्यः । हेतिप्रहेती अप्यायुधविशेषौ । तत्र यातुधानाः क्रूरास्तीक्ष्णहेतिस्वरूपाः । रक्षांस्यतिक्रूराणि अतितीक्ष्णप्रहेतिरूपाणि । यस्याग्नेरिदं सर्वं हे इष्टके तदग्निस्वरूपाऽसीत्यभिप्रायः । एवं सर्वत्र योज्यम् । अथ द्वितीयमन्त्रमाह—

अयं दक्षिणेति । विश्वानि कर्माण्यग्निहोत्रादीनि यस्याग्नेः सोऽयं विश्वकर्मा दक्षिणस्यां दिशि स्थितः । तस्य रथस्वनः सेनानी रथेचित्रो ग्रामणीः । मेनकेति सहजन्येति चाप्सरसोर्नामधेयम् । दङ्क्षवो दंशनशीला व्याघ्रादयो हेतिः । संग्रामे पुरुषसंबन्धी यो वधः स प्रहेतिः । अथ तृतीयमन्त्रमाह—

अयं पश्चादिति । विश्वं व्यचति प्राप्नोतीति विश्वव्यचाः । सर्वमन्यत्पूर्ववद्व्याख्येयम् । अथ चतुर्थमन्त्रमाह—

अयमुत्तरादिति । संयत्प्राप्तं वसु धनं यस्याग्नेः सोऽयं संयद्वसुः । सोऽग्निरुत्तरादुत्तरस्यां दिशि वर्तते । शेषं पूर्ववत् । अथ पञ्चममन्त्रमाह—

अयमुपर्यर्वागिति । अर्वाग्वसुरधोमुखत्वेन वसुनो मेघाद्भूमौ पतनाद्वैद्युतोऽग्निस्तथोच्यते । स चोपर्यूर्ध्वायां दिशि प्रवर्तते । भयहेतुप्रकाशा विद्युत् । मारकोऽशनिरवस्फूर्जन् ।

एतेषु पञ्चस्वपि मन्त्रेष्वनुषञ्जनीयं शेषमाह—

तेभ्यो नमस्त इति । योऽयमग्नियौ च सेनानिग्रामण्यौ ये चाप्सरसौ यौ च हेतिप्रहेती तेभ्यः सर्वेभ्यो नमोऽस्तु । ते सर्वे नोऽस्मान्मृडयन्तु सुखयन्तु । यं वौरिणं ते वयं द्विष्मो यश्च वैरी नोऽस्मान्द्वेष्टि तं वैरिणं युष्माभिरनुगृहीतोऽहं वो युष्माकं जम्भे विदारितास्ये दधामि स्थापयामि । एतैर्मन्त्रैः साध्यमुपधानं विधत्ते—

---

१ ख. च. °धवा°। २ च. °णि ती°। ३ क. ख. च. °तिस्वरू°। ४ ख. च. तीयं म°। ५ ख. च. °यमा°। ६ ख. च. °तुर्थं म°। ७ क. ख. ङ. °ञ्चमं म°। ८ क ख. ङ. °पस्थानं।

(षोडाख्येष्टकाभिधानम्)

" पञ्चचोडा उप दधात्यप्सरस एवैनमेता भूता अमुष्मिँल्लोक उप शेरेऽथो तनूपानीरेवैता यजमानस्य " [सं० का० ५ प्र० ३ अ० ७] इति ।

चुड संवरण इत्यस्माद्धातोरुत्पन्नश्चोडाशब्दः । नाकसदामुपरि च्छिद्रावरणार्थत्वादेता इष्टकाश्चोडा इत्युच्यन्ते । पञ्चसंख्याकाश्चोडाः पञ्चचोडास्तासामुपधाने सत्येता इष्टका अप्सरस एव भूताः स्वर्गे लोके एनं यजमानमुपशेरते । अपि च, एता अप्सरसो यजमानस्य तनूपानीरेव शरीरपालनपरा एव ।

उपधानकाले ध्यानाविशेषं विधत्ते—

" यं द्विष्यात्तमुपदधद्ध्यायेदेताभ्य एवैनं देवताभ्य आ वृश्चति ताजगार्तिमार्छति " [सं० का० ५ प्र० ३ अ० ७] इति ।

यजमानो यं पुरुषं द्विष्यात्तं द्वेष्यमध्वर्युरुपधानं कुर्वन्ध्यायेत् । तेन ध्यानेनैताभ्य एवाग्निसेनान्यादिभ्यो देवताभ्य एनं द्वेष्यमावृश्चति सर्वतो विच्छिन्नं करोति । ताजगार्तिमार्छति तदानीमेव मरणं प्राप्नोति ।

नाकसदामुपरि पञ्चचोडोपधानं विधत्ते—

" उत्तरा नाकसद्भ्य उप दधाति यथा जायामानीय गृहेषु निषादयति तादृगेव तत् " [सं० का० ५ प्र० ३ अ० ७] इति ।

गृहस्थानीया नाकसदो जायास्थानीयाः पञ्चचोडाः ।

तत्रायं पश्चादिति तृतीयमन्त्रेणोपधेया येयमिष्टका तस्याश्चरमत्वं विधत्ते—

" पश्चात्प्राचीमुत्तरामुप दधाति तस्मात्पश्चात्प्राची पत्न्यन्वास्ते " [सं० का० ५ प्र० ३ अ० ७] इति ।

यस्मात्पाश्चिमायां दिशि प्राङ्मुखत्वेनोपधेया इ(मि)ष्टका(कां) चरमत्वेनोपधत्ते तस्मात्पश्चिमायां दिश्यवस्थाय प्राङ्मुखी पत्नी गार्हपत्यमुपविशति ।

कल्पः—" आयोस्त्वा सदने सादयामीति स्वयमातृण्णामभिमृश्याधेनोपब्राह्म्य परमेष्ठी त्वा सादयतु दिवः पृष्ठ इत्यविदुषा ब्राह्मणेन सह मध्येऽग्नेरुपदधाति " इति । अभिमर्शनमन्त्रपाठस्तु—

आयोस्त्वेति । एति निरन्तरं गच्छतीत्यायुरादित्यः । स च सर्वं जगद्वर्तते । तस्मादवर्ते आयोश्छायायां सत्यां संतापपरिहारेण शैत्ये कृते सतीत्यर्थः ।

---

१ ख. घ. ङ. च. °स्याच्चोडा । २ क. घ. ङ. प्राङ्मुखा । ३ क. °तश्छा° ।

सदनेऽस्मिन्स्थाने हे इष्टके त्वां सादयामि । समुद्राय समुद्रसदृशायाऽऽदित्याय नमोऽस्तु । समुद्रस्य चक्षसे प्रकाशकाय नमोऽस्तु । उपधानमन्त्रपाठस्तु—

परमेष्ठी त्वेति । परम उत्कृष्टे सत्यलोके तिष्ठतीति परमेष्ठी ब्रह्मा । स त्वा दिवः पृष्ठे[1] स्वर्गस्योपरि सादयतु । कीदृशीं त्वां, व्यचस्वतीमभिव्यक्तिमतीं, प्रथस्वतीं विस्तारवतीं, विभूमतीं विविधैर्नूतनोत्पादनशक्तिमतीं, प्रभूमतीं, प्रभुत्वशक्तिमतीं, परिभूमतीं परसैन्यपराभवशक्तिमतीम् । दिवं यच्छ स्वर्गभोगं यजमानाधीनतया नियतं कुरु । दिवं दृंह द्युलोके भोगं दृढी कुरु । दिवं मा हिंसीर्दिवं द्युलोकभोगं मा विनाशय । विश्वस्मै सर्वस्मै प्राणापानव्यानोदानरूपवायुवृत्तिलाभाय, प्रतिष्ठायै स्वगृहे स्थितिलाभाय, चरित्राय शास्त्रीयाचरणाय, प्राणिनामेतस्य सर्वस्य सिद्ध्यर्थमयं सूर्यस्त्वाभितः पातु रक्षतु । केन रक्षणमिति तदुच्यते—मह्या स्वस्त्या महत्या योगक्षेमसंपत्त्या, शंतमेन च्छर्दिषाऽत्यन्तसुखकारिणा दीप्तिविशेषेण । तव स्वामिभूतया देवतयाऽनुगृहीता स्थिरा सती सीदेहोपविश । अङ्गिरस्वदङ्गिरसां चयनानुष्ठाने यथा त्वं ध्रुवा स्थिता तद्वत् । कल्पः—" प्रोथदश्व इत्युत्तरेऽसे विकर्णीम् " इति । पाठस्तु—

प्रोथदश्वो नेति । अयमग्निरश्वो नाश्व इव प्रोथत्प्रोथति जाज्वल्यमानः शब्दं करोति । दृष्टान्तभूतोऽश्वः कथं शब्दं करोतीति तदुच्यते—यदा महो महतः संवरणाद्दृश्यशालारूपात्संवृतस्थानाद्द्रव्यस्थाद्विनिर्गच्छति तदानीमरण्ये यवसेऽविष्यन्घासार्थं गमिष्यञ्शब्दं करोति । आदतोऽनन्तरमस्य शब्दं कुर्वतोऽग्नेः शोचिरनु दीप्तिमनु वातो वाति वायुः प्रवर्तते । अग्निज्वालाशब्दसमनन्तरमेव वायोरवश्यं प्रवृत्तेरयमग्निर्वायुसख इति लोकेऽभिधीयते । अधशब्दो वर्गचतुर्थयुक्तोऽप्यानन्तर्यमेवाऽऽचष्टे । हेऽग्ने तव ज्वालाया वायुसंयोगानन्तरं व्रजनमरण्यगमनस्थानं कृष्णमस्ति दाहेन कृष्णवर्णमेवावभासते ।

आयोस्त्वेत्यादिमन्त्रसाध्यमुपधानं विधते—

"स्वयमातृण्णां च विकर्णीं चोत्तमे उप दधाति प्राणो वै स्वयमातृण्णाऽऽयुर्विकर्णी प्राणं चैवाऽऽयुश्च प्राणानामुत्तमौ धत्ते तस्मात्प्राणश्चाऽऽयुश्च प्राणानामुत्तमौ " [सं० का० ५ प्र० ३ अ० ७] इति ।

---

१ क. घ. ङ. °ष्ठे सर्वस्यो° । २ ख. च. °धवर्तनो° । ३ ख. च. मा हिंसीर्मा वि° ।

(चोदनाप्रकरणम्)

स्वयमातृण्णा स्रुवच्छिद्रेष्टका पूर्वमध्युप्ता । उत्तरेऽंसे संस्पृष्टा सती वामभागे विभक्तः कर्ण इवावभासमानत्वाद्दियमिष्टका विकर्णीत्युच्यते । या स्वयमातृण्णा या च विकर्णी ते उभे अत्युत्तमे उपदध्यात् । सर्वासामिष्टकानामवसाने तयोरुपधानमित्यर्थः । स्वयमातृण्णायाः प्राणरूपत्वाद्विकर्ण्याश्चाऽऽयुःस्वरूपत्वात्तयोरुत्तमत्वे सति चक्षुरादीनां प्राणानां मध्ये श्वासरूपमायुश्चोत्तमत्वेन धृतवान्भवति । तस्माल्लोकेऽपि श्वासायुषी सर्वेषां प्राणानामितरेषां मध्य उत्तमे । तयोः स्थितयोश्चक्षुरादीन्द्रियवैकल्यमपि सहन्ते ।

अन्यासामिष्टकानामुपरि यथैते इष्टके उपहिते तथा तयोरुपर्यन्येष्टकोपधानप्रसक्तिं वारयितुं निषेधति—

" नान्यामुत्तरामिष्टकामुप दध्याद्दध्यामुत्तरामिष्टकामुपदध्यात्पशूनां च यजमानस्य च प्राणं चाऽऽयुश्चापि दध्यात्तस्मान्नान्योत्तरेष्टकोपधेया " [सं० का० ५ प्र० ३ अ० ७] इति ।

एतयोरुपर्यन्येष्टकोपधाने श्वासायुषी छादिते भवतः । तस्मादन्यां नोपदध्यात् । प्रथमचितौ या स्वयमातृण्णा सा भूमित्वेन स्तुता, मध्यमचितावन्तरिक्षत्वेन । इदानीं पञ्चमचितौ द्युलोकत्वेन स्तौति—

" स्वयमातृण्णामुप दधात्यसौ वै स्वयमातृण्णाऽमूमेवोप धत्ते " [सं० का० ५ प्र० ३ अ० ७] इति । उपधानात्पागग्नेरुपधापणं विधत्ते—

" अधमुप धापयति प्राणमेवास्यां दधात्यथो प्राजापत्यो वा अधः प्रजापतिनैवाग्निं चिनुते " [सं० का० ५ प्र० ३ अ० ७] इति ।

इष्टकाछिद्रं प्रशंसति—

" स्वयमातृण्णा भवति प्राणानामुत्सृष्ट्या अथो सुवर्गस्य लोकस्यानुख्यात्यै " [सं० का० ५ प्र० ३ अ० ७] इति । विकर्णीं प्रशंसति—

" एषा वै देवानां विक्रान्तिर्यद्विकर्णी यद्विकर्णीमुपदधाति देवानामेव विक्रान्तिमनु वि क्रमते " [सं० का० ५ प्र० ३ अ० ७] इति ।

विकर्ण्या एव पराक्रमरूपत्वात्तदुपधानेन यजमानोऽपि देववत्पराक्रमवान्भवति । उत्तरांसरूपं देशं विधत्ते—

" उत्तरत उप दधाति तस्मादुत्तरत उपचारोऽग्निः " [सं० का० ५ प्र० ३ अ० ७] इति । येषूपचारेषु देशविशेषो न विहितस्ते सर्वेऽपि वह्नेरुत्तरतः स्थित्वा कर्तव्याः । तद्यथा—अग्नेरवरणान्वाधानजपादयः ।

(छन्दोभिधेष्टकाभिधानम्)

अथैतस्या उपधान आदस्य वातो अनु वाति शोचिरिति वायुवाचिशब्द-युक्तामृचं विनियुङ्क्ते-" वायुमती भवति समिद्धयै " [सं० का० ५ प्र० ३ अ० ७] इति । सति हि वायावग्निः समिध्यते । अत्र विनियोगसंग्रहः-

अयं पुरः पञ्चचोडास्तेभ्य इत्यनुषज्यते ।
आ स्पृशेत्स्वयमातृण्णां परमेष्ठीति सादयेत् ॥
प्रोथद्विकर्णीमादध्यान्मन्त्रा अष्टाविहेरिताः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे चतुर्थप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ चतुर्थाष्टके चतुर्थप्रपाठके चतुर्थोऽनुवाकः) ।

अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपाꣳ रेताꣳसि जिन्वति । त्वामग्ने पुष्करादध्यथर्वा निरमन्थत । मूर्ध्नो विश्वस्य वाघतः । अयमग्निः सहस्रिणो वाजस्य शातिनस्पतिः । मूर्धा कवी रयीणाम् । भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः । दिवि मूर्धानं दधिषे सुवर्षां जिह्वामग्ने चकृषे हव्यवाहम् । अबोध्यग्निः समिधा जनानाम् (१) प्रति धेनुमिवाऽऽयतीमुषासम् । यह्वा इव प्र वयामुज्जिहानाः प्र भानवः सिस्रते नाकमच्छ । अवोचाम कवये मेध्याय वचो वन्दारु वृषभाय वृष्णे । गविष्ठिरो नमसा स्तोममग्नौ दिवीव रुक्ममुर्व्यञ्चमश्रेत् । जनस्य गोपा अजनिष्ट जागृविरग्निः सुदक्षः सुविताय नव्यसे । घृतप्रतीको बृहता दिवि-

(छन्दोभिधेष्टकाभिधानम्)

स्पृशा द्युमद्वि भाति भरतेभ्यः शुचिः । त्वा-
मग्ने आङ्गिरसः (२) गुहा हितमन्वविन्दन्छि-
श्रियाणं वनेवने । न जायसे म्रियमानः सहो
महस्त्वमाहुः सहसस्पुत्रमङ्गिरः । यज्ञस्य केतुं
प्रथमं पुरोहितमग्निं नरस्त्रिषधस्थे समिन्धते ।
इन्द्रेण देवैः सरथꣳ स बर्हिषि सीदन्नि होता
यजथाय सुक्रतुः । त्वां चित्रश्रवस्तम हवन्ते
विक्षु जन्तवः । शोचिष्केशं पुरुप्रियाग्ने हव्याय
वोढवे । सखायः सं वः सम्यञ्चमिषम् (३)
स्तोमं चाग्नये । वर्षिष्ठाय क्षितीनामूर्जो नप्त्रे
सहस्वते । सꣳ समिद्युवसे वृषन्नग्ने विश्वान्यर्य
आ । इडस्पदे समिध्यसे स नो वसून्या भर ।
एना वो अग्निं नमसोर्जो नपातमा हुवे । प्रियं
चेतिष्ठमरतिꣳ स्वध्वरं विश्वस्य दूतममृतम् ।
स योजते अरुषो विश्वमोजसा स दुद्रवत्स्वा-
हुतः । सुब्रह्मा यज्ञः सुशमी (४) वसूनां
देवꣳ राधो जनानाम् । उदस्य शोचिरस्थादा-
जुह्वानस्य मीळुषः । उद्धूमासो अरुषासो
दिविस्पृशः समग्निमिन्धते नरः । अग्ने वाजस्य
गोमत ईशानः सहसो यहो । अस्मे धेहि
जातवेदो महि श्रवः । स इधानो वसुष्क-
विरग्निरीड्यो गिरा । रेवदस्मभ्यं पुर्व-
णीक दीदिहि । क्षपो राजन्नुत त्मनाऽग्ने-

वस्तोरुतोषसः । स त्रिंगमजम्भ (५)
रक्षसो दह प्रति । आ ते अग्न इधीमहि द्युम-
न्तं देवाजरम् । यद्ध स्या ते पनीयसी समि-
द्दीदयति द्यवीषꣳ स्तोतृभ्य आ भर । आ ते
अग्न ऋचा हविः शुक्रस्य ज्योतिषस्पते । सुश्च-
न्द्र दस्म विश्वते हव्यवाट्तुभ्यꣳ हूयत इषꣳ
स्तोतृभ्य आ भर । उभे सुश्चन्द्र सर्पिषो दर्वी
श्रीणीष आसनि । उतो न उत्पुपूर्याः (६)
उक्थेषु शवसस्पत इषꣳ स्तोतृभ्य आ भर ।
अग्ने तमद्याश्वं न स्तोमैः क्रतुं न भद्रꣳ हृदि
स्पृशम् । ऋध्यामा त ओहैः । अधा ह्यग्ने
क्रतोर्भद्रस्य दक्षस्य साधोः । रथीऋतस्य बृह-
तो बभूथ । आमिष्टे अद्य गीर्भिर्गृणन्तोऽग्ने
दाशेम । प्र ते दिवो न स्तनयन्ति शुष्माः ।
एभिर्नो अर्कैर्भवा नो अर्वाङ् (७) सुवर्ण
ज्योतिः । अग्ने विश्वेभिः सुमना अनीकैः ।
अग्निꣳ होतारं मन्ये दास्वन्तं वसोः सूनुꣳ स-
हसो जातवेदसम् । विप्रं न जातवेदसम् । य
ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा घृतस्य
विभ्राष्टिमनु शुक्रशोचिष आजुह्वानस्य सर्पि-
षः । अग्ने त्वं नो अन्तमः । उत त्राता शिवो
भव वरूथ्यः । तं त्वा शोचिष्ठ दीदिवः । सु-
म्नाय नूनमीमहे सखिभ्यः । वसुरग्निर्वसुश्रवाः ।
अच्छा नक्षि द्युमत्तमो रयिं दाः (८) ॥

(छन्दोभिधेष्टकाभिधानम्)

[जनानामङ्गिरस इषꣳ सुशर्मा तिग्मजम्भ पुपूर्या अर्वाङ्वसुश्रवाः पञ्च च]।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके चतुर्थप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ चतुर्थकाण्डे चतुर्थप्रपाठके चतुर्थोऽनुवाकः)।

तृतीयेऽनुवाके पञ्चचोदादय इष्टका उक्ताः। अथ चतुर्थेऽनुवाके छन्दोभिधा इष्टका उच्यन्ते।

कल्पः—" अग्निर्मूर्धेति तिस्रो गायत्रीः पुरस्तादुपदधात्येवमुत्तराणि त्रीणि त्रीणि त्रिष्टुभो दक्षिणतो जगतीः पश्चादनुष्टुभ उत्तरतो बृहतीरुष्णिहाः पङ्क्तीरक्षरपङ्क्तीरिति विषुरूपाणि छन्दाꣳसि यथावकाशमतिच्छन्दसं मध्ये द्विपदा अन्ततः " इति। तत्र तिसृषु गायत्रीषु प्रथमां गायत्रीमाह—

अग्निर्मूर्धेति। अयमग्निरादित्यरूपेण दिवो द्युलोकस्य ककुदुच्छ्रितो मूर्धा शिरःस्थानीयः, पृथिव्याः पतिर्दहपाकादिकारित्वेन पालकोऽप्ययम्। किंच, अपां रेतांस्युदककार्याणि स्थावरजङ्गमशरीराणि जाठराग्निरूपेण जिन्वति प्रीणयति। अथ द्वितीयामाह—

त्वामग्ने पुष्करादिति। हेऽग्नेऽथर्वाख्य ऋषिः पुष्करपर्णादधि पद्मपत्रस्योपरि त्वां निरमन्थत निःशेषेण मथितवान्। अत एव पञ्चमकाण्डे ब्राह्मणमाम्नातम्—" पुष्करपर्णे ह्येनमुपश्रितमविन्दत् " इति। कीदृशात्पुष्करपर्णात्, मूर्धानं उत्तमाङ्गवत्प्रशस्तात्। विश्वस्य वाघतः सर्वस्य जगतो वाहकात्। इदं हि पुष्करपर्णमग्निमन्थनयज्ञनिष्पादनाद्द्वारा सर्वं जगन्निर्वहति। अथ तृतीयामाह—

अयमग्निरिति। अयं समिध्यमानोऽग्निः सहस्रसंख्यावतः शतसंख्यावतश्चास्य पतिः। अत एव मूर्धा शिरोवदुत्तमः, कविर्विद्वान्, तादृशो रयीणां धनानां दाता भवतु। अथ तिसृषु त्रिष्टुप्सु प्रथमां त्रिष्टुभमाह—

मूर्धो यज्ञस्येति। अयमग्निर्भूलोकस्य तत्रानुष्ठेयस्य यज्ञस्य तस्मिन्यज्ञे प्रवर्तकस्य रजसो गुणस्य च नेता निर्वाहकः। तादृश हेऽग्ने यत्र यस्यां दिवि सूर्यरूपः सन्त्वा नियुद्भी रथे नितरां योज्यमानाभिः शिवाभिरुत्तमाभिरश्वजातिभिः

रुचसे समवैषि तस्यां दिवि मूर्धानं शिरोवदुन्नतस्थितिं दधिषे धारयसि । कीदृशं मूर्धानं, सुवर्णा सुवः स्वर्गे स्थिति सर्वदा तिष्ठतीति सुवर्णास्तम् । सोमपाशब्दवत्पुंलिङ्गोऽयम् । हेऽग्ने त्वमस्मिन्यज्ञे हव्यवाहं हविष्प्रापिकां जिह्वां ज्वालां चक्रुषे करोषि । अथ द्वितीयां त्रिष्टुभमाह—

अबोध्यग्निरिति । जनानामुत्विजां संबन्धिना(न्या) समिधाऽयमग्निरबोधि बोधितः प्रज्वालितोऽभूत् । तत्र दृष्टान्तः—आयतीमुषासं प्रति धेनुमुषःकाले समागते सति दोहनार्थं शयनाद्धेनुं यथोत्थापयति तद्वत् । बुध्यमानस्याग्नेर्भानवो रश्मयः प्रोज्जिहानाः प्रकर्षेणोद्गच्छन्तो नाकमच्छ स्वर्गमभिप्राप्तुं प्रसिस्रतेऽतिशयेन प्रसरन्ति । तत्र दृष्टान्तः—वयां यद्वा इव वयां वीनां पक्षिणां मध्ये यद्वा महान्तः पक्षिणो यथा प्रकर्षेणोत्पतन्ति तद्वत् । अथ तृतीयां त्रिष्टुभमाह—

अवोचाम कवय इति । वयं कवये विदुषे वह्नये वचो वाक्यमवोचाम । कीदृशाय कवये, मेध्याय यज्ञयोग्याय, वृषभाय श्रेष्ठाय, वृष्णे कामानां वर्षयित्रे, गविष्ठिरो गविष्ठिराय भूमौ स्थिरत्वेनावस्थिताय । कीदृशं वचः, अग्नौ नमसा स्तोममग्निविषये नमस्कारेण युक्तं स्तोत्ररूपमत एव वन्दारु वन्दनशीलम् । तत्र दृष्टान्तः—यथा दिवि द्युलोके रुक्मं रोचमानमुर्व्यञ्चं विस्तीर्णगतिमादित्यं संध्यावन्दनादिषु ब्राह्मणैः प्रयुक्तं वाक्यमश्रेदाश्रयति तद्वदस्मद्वचोऽपि वह्निमाश्रयतु । अथ तिसृषु जगतीषु प्रथमां जगतीमाह—

जनस्य गोपा इति । अयमग्निर्जनिष्टोत्पन्नः । किमर्थम्, सुविताय नव्यसे सुष्ठु दीप्ताय स्तुतियुक्ताय कर्मणे, एतत्कर्मास्तिद्ध्यर्थमित्यर्थः । कीदृशः, जनस्य गोपाः प्राणिनो रक्षकः । सुदक्षोऽत्यन्तकुशलः । जागृविः कर्मणि सावधानः । घृतं प्रतीके मुखे यस्यासौ घृतप्रतीकः । तादृशोऽयमग्निर्बृहता प्रौढेन दिविस्पृशा द्युलोकस्पर्शिना ज्वालासमूहेन द्युमद्दीप्यमानः शुचिः शुद्धः सन्भरतेभ्यो भरणकुशलयजमानाद्यर्थं विभाति विशेषेण भासते । अथ द्वितीयां जगतीमाह—

त्वामग्ने अङ्गिरस इति । हेऽग्ने त्वामङ्गिरसो महर्षयोऽन्वविन्दन्नन्विष्य लब्धवन्तः । कीदृशं त्वां, गुहा हितमरणीप्रभृतिषु गोप्यस्थानेष्ववस्थितम् । वने वने शिश्रियाणं तस्मिंस्तस्मिन्वने दावाग्निरूपेणाऽऽश्रितम् । स त्वं महत्सहः

(छन्दोभिधेष्टकाभिधानम्)

पौढं बलं विमध्यमानो जायसे । हेऽङ्गिरोऽङ्गःसाठवयुक्ताग्ने त्वां सहसस्पुत्रं बलस्य पुत्रमाहुः । महता बलेन मन्थने सति जायमानत्वात् । अथ तृतीयां जगतीमाह—

यज्ञस्य केतुमिति । सह स्थितानि स्थानानि सधस्थानि, त्रीणि सधस्थानि यस्मिन्देवयजने तत्त्रिषधस्थं, तस्मिन्वर ऋत्विजोऽग्निं समिन्धते दीपयन्ति । कीदृशं, यज्ञस्य केतुं ज्ञातारं, प्रथमं यागोपक्रम एव संपन्नं, पुरोहितं पुरोदेशवर्तिनम् । सुक्रतुः शोभनक्रतुनिष्पादकः सोऽग्निर्यज्ञाय यागसिद्ध्यर्थं होता देवानामाह्वाता सन्निन्द्रेण देवैश्च सह सरथं रथसहितो यथा भवति तथा बर्हिष्यस्मिन्यज्ञे निषीददुपविष्टवान् । अथ त्रिष्वनुष्टुप्सु प्रथमामाह—

त्वां चित्रश्रवेति । चित्रं श्रवो विचित्रा कीर्तिर्यस्यासौ चित्रश्रवा अतिशयेन चित्रश्रवाश्चित्रश्रवस्तमः । पुरूणां यजमानानां प्रिय, तथाविध हेऽग्ने विक्षु प्रजासु मध्ये जन्तवो जन्तव इव जनास्त्वां हवन्त आह्वयन्ति । किमर्थम्, हव्याय वोढवे हविर्वोढुम् । कीदृशं त्वां, शोचिष्केशं शोचींषि ज्वाला एव केशस्थानीया यस्यासौ शोचिष्केशस्तम् । अथ द्वितीयामनुष्टुभमाह—

सखायः समिति । हे सखायः परस्परसख्ययुक्ता ऋत्विग्यजमाना वो युष्माकं सम्यञ्चमिषं समीचीनमभीष्टान्नं संपादयतु । समित्यस्योपसर्गस्यापेक्षितः शेषोऽध्याहृतः । यूयं चाग्नये स्तोमं स्तोत्रं संपादयत । कीदृशायाग्नये, क्षितीनां मध्ये रक्षकाणां मध्ये वर्षिष्ठाय वृद्धतमाय, ऊर्जो नप्त्रे बलस्य न पातयित्रे विनाशमकुर्वते, [सहस्वते] स्वयमतिशयेन बलवते । अथ तृतीयामनुष्टुभमाह—

स॑समिद्युवस इति । हे वृषन्कामानां वर्षकाग्ने विश्वानि सर्वाणि फलानि संसमित्संपाद्य संपाद्यैव युवसे यजमाने संमिश्रयसि । अथ आ ईश्वरस्त्वमागत्येडस्पदे पृथिवीरूपाया वेद्याः स्थाने समिध्यसे सम्यग्ज्वाल्यसे । स तादृशो महानुभावस्त्वं नोऽस्मभ्यं वसूनि धनानि समाभर सम्यगाहृत्य प्रयच्छ । अथ तिसृषु बृहतीषु प्रथमामाह—

एना वो अग्निमिति । हे ऋत्विग्यजमाना वो युष्माकं संबन्धिनमग्निमेना नमसैतेन नमस्कारेण युक्तोऽहमाहुव आह्वयामि । कीदृशमग्निम् । ऊर्जोऽन्नस्य नपातमविनाशयितारं, प्रियं यजमानानां प्रीतिहेतुं, चेतिष्ठमतिशयेन चेतयितारं

---

१ क. च. °त्रैवं पु° ।

क्षातारमरातिं रती रुक्तद्रहितं सर्वदोद्युक्तमित्यर्थः । स्वध्वरं शोभनस्य क्रतोर्निष्पादकम् । विश्वस्य दूतं सर्वस्य जगतो दूतवत्कार्यकारिणं, सर्वस्य हि गृहे दाहपाकादिकार्यं करोति । अमृतं मरणरहितं, नहि मनुष्यवद्देवानां सहसा मरणमस्ति । अथ द्वितीयां बृहतीमाह–

म योजत इति। सोऽग्नियोजिते प्रस्तुतं कर्म योजयतीत्यर्थः। अरुषो रोषरहितो यजमाने स्निग्ध इत्यर्थः । विश्वभोजसा विश्वं जगद्भोजनीयं दाह्यत्वेन यस्यासौ विश्वभोजसा । सोऽग्नी राधोऽन्नं द्रुद्रवैत्संपादयत्वित्यर्थः । कीदृशं राधः, वसूनां जनानां निवासार्थिनां प्राणिनां [देवं] व्यवहारकारणम् । कीदृशः सोऽग्निः, स्वाहुत ऋत्विग्भिः सुष्ठु कर्मण्याहूतः । सुब्रह्मा शोभन ऋत्विग्मुखो ब्रह्मा यस्यासौ सुब्रह्मा शोभनमन्त्रो वा । यज्ञो यजनीयः । सुशमी पापं सुष्ठु शमयतीति सुशमी । अथ तृतीयां बृहतीमाह–

उदस्य शोचिरिति। अस्याग्नेः शोचिर्दीप्तिरुदस्थादुत्थितम् । कीदृशस्याग्नेः, आजुह्वानस्य सर्वतो होमनिष्पादकस्य, मीढुष आहुतिद्वारा वृष्टिसेचनसमर्थस्य । उद्धूमासो धूमाश्चोत्थिता अरुषासो रोषरहिताश्चक्षुराद्युपद्रवमकुर्वन्त इत्यर्थः । दिविस्पृश आकाशस्पर्शिनोऽत्युन्नता इत्यर्थः । यथैतत्सर्वं भवति तथा नर ऋत्विग्यजमाना अग्निमिन्धते दीपयन्ति । अथ तिसृष्णिक्षु प्रथमामुष्णिहमाह–

अग्न वाजस्येति । सहसो बलस्य यहो सूनो जातवेद उत्पन्नजगदभिज्ञाग्ने गोमतो गोभिर्युक्तस्य वाजस्यान्नस्येशानस्त्वमस्मे अस्मासु महि श्रवो महतीं कीर्तिं धेहि संपादय । अथ द्वितीयामुष्णिहमाह–

स इधान इति । पुरु बहु अनीकं सैन्यं यस्यासौ पुरुणीकः । तादृश हेऽग्ने स त्वमस्मभ्यं रेवद्धनयुक्तं गृहक्षेत्रादिकं दीदिहि प्रयच्छ । कीदृशस्त्वम् , इधानो दीप्यमानो वसुर्निवासहेतुः, कविर्विद्वानग्निरग्रणीः । प्रथमं यज्ञप्रवर्तक इत्यर्थः । गिरा मन्त्ररूपया वाचेडेन्यः स्तुत्यः । अथ तृतीयामुष्णिहमाह–

क्षपो राजन्निति । हेऽग्ने वस्तोरहानि क्षपः क्षपय । उतापि चोषस उषःकालानपि क्षपय । द्वितीयाया अत्यन्तसंयोगवाचित्वात्सर्वेष्वप्युषःकालेषु राक्षसान्विनाशयेत्यर्थः । हे राजन्दीप्यमानाग्ने न केवलं स्वकीयसेनामुखेन रक्षसां

---

१ ख. °जसः, सो° । क. घ. ङ. °जसोऽ° । २ ख. °वद्द्रवयतु संपा° ।

(छन्दोभिधेष्टकाभिधानम्)

क्षपणं त्वमनाऽपि स्वमपि क्षपयेति । मुखविदारणवाचिना जम्भशब्देन ज्वाला उपलक्ष्यन्ते । तिग्मास्तीक्ष्णा जम्भा यस्यासौ तिग्मजम्भः । हे तिग्मजम्भ स त्वं रक्षसो राक्षसान्[पति] दह भस्मी कुरु । अथ तिसृषु पङ्क्तिषु प्रथमामाह—

आ ते अग्न इति । हेऽग्ने देवाजरं जराराहितं ते त्वां द्युमन्तं दीप्तिमन्तमिधीमहि सर्वतः ज्वालयामः । यद्यस्मात्कारणात्पनीयस्यतिशयेन स्तुतियुक्ता सा(स्या) ह समिदचेतनरूपा सा समिदपि द्यवि प्रतिदिनं दीप्यति त्वां प्रकाशयति, तस्माच्चेतना वयं दीपयाम इति किमु वक्तव्यम् । त्वं चषमन्नं स्तोतृभ्य ऋत्विग्भ्य आभर संपादय । अथ द्वितीयां पङ्क्तिमाह—

आ ते अग्न ऋचेति । शुक्रस्य शुद्धस्य ज्योतिषः पते पालक, सुष्ठवाह्लादकारिन्सुश्चन्द्र, पापस्योपक्षपयितर्दस्म, प्रजानां पालक विश्पते, हविषो वोढा हव्यवाट्, तथाविध हेऽग्ने त ऋचा त्वत्संबन्धिना मन्त्रेण तुभ्यं हविरा समन्ताद्धूयते । इषमित्यादि गतम् । अथ तृतीयां पङ्क्तिमाह——

उभे सुश्चन्द्रेति । हे सुश्चन्द्र सुष्ठ्वाह्लादकराऽऽसनि त्वदीय आस्ये सर्पिषः संबन्धिन्या उभे दर्वी दर्विसदृशे हनू अणिषि, हनुपूरणपर्यन्तं सर्पिस्त्वया पीतमित्यर्थः । उतो अपि च हे शवसस्पते बलस्याधिपते उक्थेषु शस्त्रवत्सु यज्ञेषु नोऽस्मान्पु(नुत्पु)र्या उत्कर्षेण पूरय प्रापयेत्यर्थः । स्तोतृभ्यो यजमानेभ्य इषमन्नमाभर संपादय । अथाक्षरपङ्क्तिषु चतसृषु प्रथमामाह——

अग्ने तमद्याश्वमिति । हेऽग्ने हृदिस्पृशं हृद्यमन्तःप्रियं तं त्वामद्यास्मिन्कर्मणि ओहैः समूहरूपैः स्तोमैस्त्वदीयैः स्तोत्रैरर्कैश्च समृद्धं करवाम । तत्रैको दृष्टान्तः—अश्वं न यथाऽश्वं घासादिप्रदानेन समर्थं(र्धं) यन्ति तद्वत् । अपरो दृष्टान्तः—क्रतुं न भद्रं यथा समीचीनं ज्योतिष्टोमादिक्रतुं सर्वयागानुष्ठानेन समर्धयन्ति तद्वत् । भद्रं कल्याणमित्यग्निविशेषणं वा । अथ द्वितीयामक्षरपङ्क्तिमाह——

अधा ह्यग्न इति । हेऽग्नेऽधाऽस्मदीयस्तोत्रानन्तरं क्रतोरनुष्ठीयमानस्य कर्मणो रथीर्बभूथ हि, रथोऽस्यास्तीति रथीः सारथिः । यथा सारथिर्निर्वाहकस्तथा त्वं निर्वाहको बभूथ खलु । कीदृशस्य क्रतोः, भद्रस्य कल्याणरूपस्य, दक्षस्य

---

१ क. ख. घ. ङ. °मर्थय° ।

स्वफलप्रदानसमर्थस्य, साधो +रश्मिभिः साध्यस्य, ऋतस्य तत्यस्यामोघबलस्य, बृहतः प्रौढस्य । अथ तृतीयामक्षरपङ्क्तिमाह—

आभिष्टे अग्नेइति । हेऽग्नेऽद्यास्मिन्कर्मण्याभिर्गीर्भिर्मन्त्ररूपाभिर्गृणन्तः स्तुवन्तो वयं दाशेम हविर्दद्म:(द्दमः) । ते त्वदीयाः शुष्माः प्रबला ज्वालास्त्वां प्रकर्षेण स्तनयन्ति शब्दयन्ति । तत्र दृष्टान्तः—दिवो न द्युस्था मेघा इव । अथ चतुर्थीमक्षरपङ्क्तिमाह—

एभिर्नो अर्कैरिति । हेऽग्ने विश्वेभिरनीकैः सर्वसैन्यैः सहितः सुमनाः शोभनस्थं प्राप्त एभिरिदानीं क्रियमाणैर्नोऽस्मत्संबन्धिभिरर्कैरर्चनीयैर्नोऽस्मान्प्रत्यर्वाङ् भव समीपस्थो भव । समीपदेशमभिगच्छतीत्यर्वाङ् । तत्र दृष्टान्तः—सुवर्न स्वर्गलोकप्रकाशरूप आदित्यो यथा समीपवर्ती भवति तद्वत् । अथातिच्छन्दसमाह—

अग्निं होतारमिति । इममग्निं होतारं देवानामाह्वातारमहं मन्ये । कीदृशमग्निं, वसोर्दातारन्तं धनस्य दातारं, सहसः सूनुं बलस्य पुत्रं, जातवेदसमुत्पन्नजगदभिज्ञम् । तत्र दृष्टान्तः—विप्रं न जातवेदसम् । यथा ब्राह्मणकुलीनमुत्पन्नपुत्राद्यभिज्ञं मन्यन्ते तद्वत् । योऽग्निर्देव ऊर्ध्वयाऽप्युन्नतया देवाच्या देवान्प्रति गच्छन्त्या रुपया ज्वालया स्वध्वरः सुष्ठु यागनिष्पादको भवति, सोऽग्निर्घृतस्य विभ्राष्टिं विशेषेण दीप्तिमनुहाय दीप्यत इति शेषः । कीदृशस्य घृतस्य, शुक्रशोचिषः शुद्धदीप्तियुक्तस्याऽऽजुह्वानस्य सर्वतो हूयमानस्य सर्पिषः सर्पणशीलस्य ।

अथ तिसृषु द्विपदासु प्रथमामाह—

अग्ने त्वमिति । हेऽग्ने त्वं नोऽस्माकमन्तमोऽन्तिकतमो भव । वरूथ्यो वरूथे गृहे नित्यं संनिहितो भव । अथ द्वितीयां द्विपदामाह—

तं त्वा शोचिष्ठेति । हे शोचिष्ठ दीदिवः शुद्धतम दीप्यमान सखिभ्यः सखीनामस्माकं सुम्नाय सुखाय नूनं पूर्वोक्तगुणयुक्तं त्वामीमहे प्राप्नुमः । अथ तृतीयां द्विपदामाह—

वसुरग्निरिति । वसुर्वसुमानयमग्निर्वसुरुद्रादित्यदेवैरादरेण श्रूयत इति वसुश्रवाः । हे तादृशाग्नेऽच्छ स्वाभिमुखो नक्षि प्राप्नुहि । एतैरग्निर्मूर्धेत्यादिभिः साध्यमुपधानं विधत्ते—

+ ख. पुस्तके ' रायिभिः ' इति पाठान्तरम् ।

(छन्दोभिधेष्टकाभिधानम्)

" छन्दाꣳस्युप दधाति पशवो वै छन्दाꣳसि पशूनेवाव रुन्धे छन्दाꣳसि वै देवानां वामं पशवो वाममेव पशूनव रुन्ध एताꣳ ह वै यज्ञसेनश्चैत्रियायण-श्चितिं विदां चकार तया वै स पशूनवारुन्ध यदेतामुपदधाति पशूनेवाव रुन्धे " [सं० का० ५ प्र० ३ अ० ८] इति ।

गायत्र्यादिच्छन्दोयुक्तैर्मन्त्रैरुपधेया इष्टका अपि च्छन्दांसीत्युच्यन्ते । तदुपधाने सति च्छन्दसां पशुहेतुत्वाद्यजमानः पशून्प्राप्नोति । किंच च्छन्दांस्येव देवानां वननीयधनरूपाण्यतस्तादृशान्पशूनयं प्राप्नोति । किंच चित्रनामकस्य कस्याचित्पुरुषस्य वंशे समुत्पन्नो यज्ञसेननामकः कश्चित्पुरुष एताभिश्छन्दोभिधाभिरिष्टकाभिः संपादितां चितिं विदित्वा स्थितवान् । ततस्तयैव चित्या पशून्प्राप्नोत् । एवमन्योऽपि प्राप्नोति ।

सामान्येन विहितं पुनर्विशेषाकारेण विधत्ते—

" गायत्रीः पुरस्तादुप दधाति तेजो वै गायत्री तेज एव मुखतो धत्ते " [सं० का० ५ प्र० ३ अ० ८] इति ।

अग्निर्मूर्धेत्यादिभिर्गायत्रीछन्दोभिर्युक्तैर्मन्त्रैरुपधेया इष्टका अपि गायत्र्यः ।

मन्त्रेषु मूर्धशब्दस्य तात्पर्यमाह—

" मूर्धन्वतीर्भवन्ति मूर्धानमेवैनꣳ समानानां करोति " [सं० का० ५ प्र० ३ अ० ८] इति ।

मूर्धशब्दयुक्तैर्मन्त्रैरुपधेया इष्टका मूर्धन्वत्यः । समानानां मध्ये यजमानस्य मूर्धत्वं शिरोवदुत्कृष्टत्वम् ।

भुवो यज्ञस्येत्यादिभिस्त्रिष्टुप्छन्दोयुक्तैर्मन्त्रैरुपधेया इष्टका विधत्ते—

" त्रिष्टुभ उप दधातीन्द्रियं वै त्रिष्टुगिन्द्रियमेव मध्यतो धत्ते " [सं० का० ५ प्र० ३ अ० ८] इति ।

जनस्य गोपा इत्यादिभिर्जगतीछन्दोभिर्मन्त्रैरुपधेया इष्टका विधत्ते—

" जगतीरुप दधाति जागता वै पशवः पशूनेवाव रुन्धे " [सं० का० ५ प्र० ३ अ० ८] इति ।

त्वां चित्रश्रवस्तम हवन्त इत्यादिभिरनुष्टुप्छन्दोयुक्तैर्मन्त्रैरुपधेया इष्टका विधत्ते-

" अनुष्टुभ उप दधाति प्राणा वा अनुष्टुप्प्राणानामुत्सृष्टयै " [सं० का० ५ प्र० ३ अ० ८] इति ।

एना वो अग्निमित्यादिभिरग्न आजस्येत्यादिभिरा ते अग्न इधीमहीत्यादिभिरग्ने तमद्येत्यादिभिश्चोपधेया विधत्ते—

" बृहतीरुष्णिहाः पङ्क्तीरक्षरपङ्क्तीरिति विषुरूपाणि छन्दाꣳस्युप दधाति विषुरूपा वै पशवः पशवश्छन्दाꣳसि विषुरूपानेव पशूनव रुन्धे " [सं० का० ५ प्र० ३ अ० ८] इति ।

पूर्वोक्तेषु च्छन्दःसु समानाक्षराः सर्वे पादाः । बृहत्यादिषु विषमाक्षराः । अतो विषुरूपत्वम् । पशवोऽपि गोमहिषादयः परस्परविलक्षणत्वाद्विषुरूपाः । छन्दसां च पशुहेतुत्वात्पशुत्वम् । तथा सत्येतदुपधानेन बहुविधान्पशूनाप्नोति ।

अथोपधानं वेदनं च प्रशंसति—

" विषुरूपमस्य गृहे दृश्यते यस्यैता उपधीयन्ते य उ चैना एवं वेद " [सं० का० ५ प्र० ३ अ० ८] इति । विषुरूपं बहुविधं धनम् ।

अग्निꣳ होतारमिति मन्त्रेणोपधेयां विधत्ते—

" अतिच्छन्दसमुप दधात्यतिच्छन्दा वै सर्वाणि छन्दाꣳसि सर्वैरेवैनं छन्दोभिश्चिनुते वर्ष्म वा एषा छन्दसां यदतिच्छन्दा यदतिच्छन्दसमुपदधाति वर्ष्मैवैनꣳसमानानां करोति " [सं० का० ५ प्र० ३ अ० ८] इति ।

गायत्र्यादीनां सर्वच्छन्दसां येयमक्षरसंख्या तस्या अतिच्छन्दस्त्वाभा(स्यन्तर्भा)वात्सर्वच्छन्दोरूपत्वम् । किंच सर्वेषामन्तर्भावादेवैतदीयेष्टकाऽतिच्छन्दोभिधानादन्यासां छन्दोभिधानानामिष्टकानां शरीरम् । अत एतदुपधानेन यजमानं समानानां पुरुषाणां शरीरस्थानं करोति, सर्वऽप्येनमनु जीवन्तीत्यर्थः । अग्ने त्वं न इत्यादिभिरुपधेया इष्टका विधत्ते—

" द्विपदा उपदधाति द्विपाद्यजमानः प्रतिष्ठित्यै " [सं० का० ५ प्र० ३ अ० ८] इति । अत्र विनियोगसंग्रहः—

अग्निस्तिस्रस्तु गायत्र्यो भुवस्तु त्रिष्टुभां त्रयम् ।
जनतिस्रो जगत्यः स्युस्त्वं चित्रानुष्टुभां त्रयम् ॥
एनातिस्रो बृहत्यः स्युरग्न इत्युष्णिहां त्रयम् ।
आ ते पङ्क्तित्रयं ह्यग्नेऽक्षरपङ्क्तिचतुष्टयम् ॥
अग्निमेका ह्यतिच्छन्दा अग्ने त्वं द्विपदात्रयम् ।
एकोनत्रिंशदेतानि च्छन्दांस्युपदधाति हि ॥

---

१ ख. च. °नमुपजी° ।

(सयुजावीष्टकाभिधानम्)

इति श्रीमत्तायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे चतुर्थप्रपाठके चतुर्थोऽनुवाकः ॥४॥

(अथ चतुर्थाष्टके चतुर्थप्रपाठके पञ्चमोऽनुवाकः)।

इन्द्राग्निभ्यां त्वा सयुजा युजा युनज्म्या-धाराभ्यां तेजसा वर्चसोक्थेभिः स्तोमेभिश्छ-न्दोभी रय्यै पोषाय सजातानां मध्यमस्थेयाय मयां त्वा सयुजा युजा युनज्म्यम्बा दुला निंतत्निरभ्रयन्ती मेघयन्ती वर्षयन्ती चुपुणी-का नामासि प्रजापतिना त्वा विश्वाभिर्धी-भिरुप दधामि पृथिव्युदपुरमन्नेन विष्टा मनु-ष्यास्ते गोप्तारोऽग्निर्वियत्तोऽस्यां तामहं प्र पद्ये सा (१) मे शर्म च वर्म चास्त्वाधिंयोरन्त-रिक्षं ब्रह्मणा विष्टा मरुतस्ते गोप्तारो वायुर्वि-यत्तोऽस्यां तामहं प्र पद्ये सा मे शर्म च वर्म चास्तु द्यौरपराजिताऽमृतेन विष्टाऽऽदित्यास्ते गोप्तारः सूर्यो वियत्तोऽस्यां तामहं प्र पद्ये सा मे शर्म च वर्म चास्तु (२)।

(साष्टाचत्वारिंशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके चतुर्थप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(सयुजादीष्टकाभिधानम्)

(अथ चतुर्थकाण्डे चतुर्थप्रपाठके पञ्चमोऽनुवाकः) ।

चतुर्थेऽनुवाके छन्दोभिधा इष्टका उक्ताः । अथ पञ्चमे सयुजादय इष्टका उच्यन्ते । कल्पः—"इन्द्राग्निभ्यां त्वा सयुजा युजा युनज्मीत्यष्टौ सयुजः" इति ।

पाठस्तु—

इन्द्राग्निभ्यामिति । सह योजयतीति सयुक् । उत्तरेण युक्तशब्देन संबन्धोऽभिधीयते । हे इष्टक इन्द्राग्निभ्यां सह तव योजयिता यः संबन्धस्तेन संबन्धेनाहं त्वां युनज्मीह क्षेत्रे युक्तां करोमि । आघाराभ्यामित्यादिभिः सप्तमि(षड्भि)स्तृतीयान्तैः सह प्रत्येकं त्वा सयुजेत्यादिशेषस्यानुषङ्गे सति षण्मन्त्राः संपद्यन्ते । आघारावाहुती । तेजः कान्तिः । वर्चो धनम् । उक्थानि शस्त्राणि । स्तोमानि स्तोत्राणि । छन्दांसि गायत्र्यादीनि । रय्या इत्यादिरष्टमो मन्त्रः । रय्यै धनार्थं पोषाय पुष्ट्यर्थं सजातानां मध्यमस्थेयाय ज्ञातीनां मध्ये मुख्यत्वेनावस्थानार्थं हे इष्टके मया सह तव योजयिता यः संबन्धस्तेन संबन्धेन त्वामिह क्षेत्रे युक्तां करोमि । एतैर्मन्त्रैः साध्यमुपधानं विधत्ते—

" सर्वाभ्यो वै देवताभ्योऽग्निश्चीयते यत्सयुजो नोदृध्यादेवता अस्याग्निं युञ्जीरन्यत्सयुज उपदधात्यात्मनैवैनꣳ सयुजं चिनुते नाग्निना व्यृध्यतेऽथो यथा पुरुषः स्नावभिः संतत एवमेवैताभिरग्निः संततः " [सं० का० ५ प्र० ३ अ० ९] इति ।

योऽयं चीयमानोऽग्निः स सर्वदेवतार्थः । तथा सति सयुजाख्यानामिष्टकानामनुपधाने सत्यस्याग्निमिन्द्राग्न्याघारादिदेवताः परित्यजेयुः । देवताभिः सहाग्निं योजयन्तीति सयुजो मन्त्राः । तैर्मन्त्रैरुपधेया इष्टका अपि सयुजः । तासामुपधाने सति यजमानः स्वेन सह योजयित्वाऽग्निं चितवान्भवति । ततो नाग्निना वियुक्तो भवति । अपि च यथा लोके पुरुषः स्नावभिः शरीरे सर्वतो व्याप्तस्तद्वदेताभिरिष्टकाभिरग्निः सर्वतो व्याप्तो भवति । तस्मादेता उपदध्यात् ।

कल्पः—" अम्बा नामासीति सप्त कृत्तिकाः " इति । पाठस्तु—

अम्बा दुलेति । अम्बादिचुपूणीकान्तानि सप्त पदानि सप्तानां कृत्तिकादेवीनां नामानि । नामासीत्यादिशेषः सर्वेष्वपि पदेष्वनुषज्यते । ततः सप्तैते मन्त्राः । हे इष्टके या कृत्तिकाऽम्बानामा तद्रूपा त्वमसि । तादृशी त्वं(र्शी त्वां)प्रजापतिना देवेन

---

१ क. युगाद् । २ ख. च. °युगाख्या° ।

(मयूजादीष्टकाभिधानम्)

प्रेरिता या अस्मद्बुद्धयस्ताभिः सर्वाभिरुपदधामि, सावधानोऽहं बुद्धिवैचित्र्येण तत्त्वगुपदधामीत्यर्थः। एवं दुहा नामासीत्यादिकं योजनीयम्।

एतैर्मन्त्रैः साध्यमुपधानं विधत्ते—

" अग्निना वै देवाः सुवर्गं लोकमायन्ता अमूः कृत्तिका अभवन्यस्यैता उपधीयन्ते सुवर्गमेव लोकमेति गच्छति प्रकाशं चित्रमेव भवति " [सं० का० ५ प्र० ३ अ० ९] इति।

पूर्वमेताभिरिष्टकाभिश्चितेनाग्निना देवाः स्वर्गं प्राप्ताः। ताश्चेष्टकास्तैः सह गत्वा तत्रामूर्दृश्यमानाः कृत्तिका अभवन्। अतस्तदुपधानेन स्वर्गप्राप्तिर्भवति। किंच, अनेन स्वर्गे प्रकाशं प्राप्नोति। विचित्रमाभरणादिकं चास्य भवति। कल्पः—" पृथिव्युदपुरमग्नेनेति मण्डलेष्टकाम् " इति। पाठस्तु—

पृथिव्युदपुरमिति। अग्नेन विष्टाऽग्नेन संपूर्णा या पृथिवी हे इष्टके सा पृथिव्युदपुरमुदकसंपूर्णं [पुरम्]। मनुष्यास्ते तव गोप्तारो रक्षितारः। अस्यां पृथिव्यामग्निर्विद्यत्तो रक्षणाय विशेषेण प्रयत्नवान्। [तां] तादृशीं पृथिवी-रूपां त्वामिष्टकामहं प्रपद्ये प्राप्नोमि। सा तथाभूतेष्टका मे मम यजमानस्य शर्म शरणं गृहस्थानमस्तु। वर्म च रक्षणार्थं कवचस्थानीयमप्यस्तु।

कल्पः—" अधिद्यौरिति मण्डलेष्टकाम् " इति। पाठस्तु—

अधिद्यौरन्तरिक्षमिति। अग्नेना विष्टा प्रोक्षेण जनेन विष्टा पुरुषाऽधि-द्यौर्दिवोऽप्यधिका या पूः साऽन्तरिक्षमन्तरिक्षनामकं हे इष्टके तव पुरम्। मरुतो वायवस्तेष्वेको मुख्यो वायुः। शेषं पूर्ववत्। कल्पः—" द्यौरपराजितेति मण्ड-लेष्टकाम् " इति। पाठस्तु—

द्यौरपराजितेति। अमृतेन विष्टा पीयूषेण पूर्णा द्यौर्द्युलोकाख्या हे इष्टके तव पूः केनाप्यपराजिता। आदित्या द्वादशसंख्याकास्तेष्वेको मुख्यः सूर्यः। शेषं पूर्ववत्। एतैर्मन्त्रैः साध्यमुपधानं विधत्ते—

" मण्डलेष्टका उप दधातीमे वै लोका मण्डलेष्टका इमे खलु वै लोका देवपुरा देवपुरा एव प विशति नाऽऽर्तिमार्च्छत्यग्निं चिक्यानः " [सं० का० ५ प्र० ३ अ० ९] इति।

१ क. °ने स्व°। २ ख. घ. °ति। चि°। ३ ख. °पां तामि°। ४ ख. घ. ङ. च. °व पृस्तेना°।

(विश्वज्योतिरादीष्टकाभिधानम्)

मण्डलाख्या इष्टकास्तिस्रः प्रथममध्यमोत्तमचितिषूपदध्यात् । तासां चेष्टकानां लोकत्रयरूपत्वाल्लोकत्रयस्य देवपुरत्वादेवपुरा एवाग्निश्चित्पविशति । अग्निं चिन्वानो न नाशं प्रामोति । अत्र विनियोगसंग्रहः--

इन्द्रेति सयुजस्त्वष्टा आधारादिषदेष्वपि ।
अनुषङ्गस्त्वेति तथा रय्या इत्यष्टमे मतः ॥
अग्नेति कृत्तिकाः सप्त नामासीत्यनुषज्यते ।
पृथिव्यभिर्मण्डलाख्या मन्त्रा अष्टादशेरिताः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे चतुर्थप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ चतुर्थाष्टके चतुर्थप्रपाठके षष्ठोऽनुवाकः) ।

बृहस्पतिस्त्वा सादयतु पृथिव्याः पृष्ठे ज्योतिष्मतीं विश्वस्मै प्राणायापानाय विश्वं ज्योतिर्यच्छाग्निस्तेऽधिपतिर्विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे ज्योतिष्मतीं विश्वस्मै प्राणायापानाय विश्वं ज्योतिर्यच्छ वायुस्तेऽधिपतिः प्रजापतिस्त्वा सादयतु दिवः पृष्ठे ज्योतिष्मतीं विश्वस्मै प्राणायापानाय विश्वं ज्योतिर्यच्छ परमेष्ठी तेऽधिपतिः पुरोवातमनिरस्यभ्रसनिरसि विद्युत्सनिः (१) असि स्तनयित्नुसनिरसि वृष्टिसनिरस्यग्नेर्यान्यसि देवानामग्नेयान्यसि वायोर्यान्यसि देवानां वायोयान्यस्यन्तरिक्षस्य यान्यसि देवानामन्तरिक्षयान्यस्यन्तरिक्षमस्य-

(विश्वज्योतिरादीष्टकाभिधानम्)

न्तरिक्षाय त्वा सलिलाय त्वा सर्णीकाय त्वा सर्तीकाय त्वा केताय त्वा प्रचेतसे त्वा विवस्वते त्वा दिवस्त्वा ज्योतिष आदित्येभ्यस्त्वर्चे त्वा रुचे त्वा द्युते त्वा भासे त्वा ज्योतिषे त्वा यशोदां त्वा यशसि तेजोदां त्वा तेजसि पयोदां त्वा पयसि वर्चोदां त्वा वर्चसि द्रविणोदां त्वा द्रविणे सादयामि तेनर्षिणा तेन ब्रह्मणा तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद (२)॥

(विद्युत्सानिर्युते त्वैकान्नत्रिंशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके चतुर्थप्रपाठके षष्ठोऽनुवाकः॥ ६॥

(अथ चतुर्थकाण्डे चतुर्थप्रपाठके षष्ठोऽनुवाकः)।

पञ्चमेऽनुवाके सयुजाद्या इष्टका उक्ताः। अथ षष्ठे विश्वज्योतिराद्या इष्टका उच्यन्ते।

कल्पः—" बृहस्पतिस्त्वा सादयतु पृथिव्याः पृष्ठे ज्योतिष्मतीमिति विश्वज्योतिषम् " इति। पाठस्तु—

बृहस्पतिस्त्वेति। हे इष्टके त्वां बृहस्पतिः पृथिव्याः पृष्ठ उपरि स्थापयतु। कीदृशीं त्वां, ज्योतिष्मतीं प्रकाशवतीम्। किमर्थम्। विश्वस्मै प्राणायापानाय सर्वस्य प्राणिजातस्य प्राणापानवृत्तिलाभार्थम्। विश्वं कृत्स्नं(त्वं)स्वर्गप्रकाशकं ज्योतिर्यच्छ नियमय। वै तवाग्निरधिपतिः पालकोऽस्ति।

कल्पः—" विश्वकर्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे ज्योतिष्मतीमिति विश्वज्योतिषम् " इति। पाठस्तु—

विश्वकर्मा त्वेति। पूर्ववद्व्याख्येयम्। कल्पः—" प्रजापतिस्त्वा सादयतु दिवः पृष्ठे ज्योतिष्मतीमिति विश्वज्योतिषम् " इति। पाठस्तु—

प्रजापतिस्त्वेति। एतदपि पूर्ववद्व्याख्येयम्। एतैर्मन्त्रैः साध्यमुपधानं विधत्ते—

(विश्वज्योतिरादीष्टकागिधानम)

"विश्वज्योतिष उप दधातीमानेवैताभिर्लोकाञ्ज्योतिष्मतः कुरुतेऽथो प्राणानेवैता यजमानस्य दाधृत्येता वै देवताः सुवर्ग्यास्ता एवान्वारभ्य सुवर्गं लोकमेति" [तै० का० ५ प्र० ३ अ० ९] इति ।

विश्वशब्दोपेतैश्च मन्त्रैरुपधेया विश्वज्योतिषः । ताश्च तिस्रः प्रथममध्यमोत्तमचितिषूपदध्यात् । तदुपधानेन लोकान् प्रकाशवतः करोति । किंच, एता इष्टका यजमानस्य प्राणान्दृढं धारयन्ति । एतेषु मन्त्रेषु प्रतीयमाना बृहस्पत्यादय एता देवताः स्वर्गयोग्यास्ता एवानुसृत्येष्टका उपधाय स्वर्गं प्राप्नोति ।

कल्पः—" पुरोवातसनिरसीति पञ्च वृष्टिसनीरनुपरिहारम्" इति । पाठस्तु—

पुरोवातसनिरिति । पुरोवातं सनोति ददातीति पुरोवातसनिः । हे इष्टके तथाविधा त्वमसि । एवमग्न्यादिषु योज्यम् । एतन्मन्त्रसाध्यमुपधानं विधत्ते—

" वृष्टिसनीरुप दधाति वृष्टिमेवाव रुन्धे " [तै० का० ५ प्र० ३ अ० १० इति ।

वृष्टिसनिशब्दयुक्तैर्मन्त्रैरुपधेया इष्टका वृष्टिसनयः । तदुपधानेन वृष्टिं प्राप्नोति । एकप्रयत्नोपधानं वारयितुमनुक्रमेण परितो हत्वा हत्वा तदुपधानं विधत्ते—

" यदेकधोपदध्यादेकमृतुं वर्षदनुपरिहारꣳ सादयति तस्मात्सर्वानृतून्वर्षति " [तै० का० ५ प्र० ३ अ० १०] इति ।

एकामिष्टकां हस्ते धृत्वा चयनक्षेत्रं प्रदक्षिणीकृत्योपदध्यात् । एवमनुक्रमेणोपधाने सति सर्वेष्वप्यृतुषु वृष्टिर्भवति । मन्त्रेषु पुरोवातादिशब्दानां तात्पर्यं दर्शयति—

" पुरोवातसनिरसीत्याहैतद्वै वृष्ट्यै रूपꣳ रूपेणैव वृष्टिमव रुन्धे " [तै० का० ५ प्र० ३ अ० १०] इति ।

पुरोवाताभ्रविद्युत्स्तनयित्नुवर्षणानि मिलित्वा पञ्च वृष्टेः स्वरूपम् । अतो वृष्टिरूपवाचिना मन्त्रेणैव वृष्टिं प्राप्नोति ।

कल्पः—" अग्नेर्यान्यसीति द्वे संयान्यौ " इति । पाठस्तु—

अग्नेर्यान्यसीति । हे इष्टके त्वमग्नेश्चयिमानस्य वह्नेर्यानी प्रापिकासि । अनेन मन्त्रेण यजमानस्याग्निप्राप्तिरुक्ता । द्वितीयेन देवानामग्निप्राप्तिरुच्यते ।

---

१ क. °त्वा त° । २ ख. च. °ष्ट्वा° ।

(विश्वज्योतिरादीष्टकाभिधानम्)

इऽग्ने त्वं यानी प्रापकोऽसीत्येतादृगुच्चारणं यस्यामिष्टकायां सेयमग्नेयानी । हे इष्टके देवानां संबन्धिनी तथाविधा त्वमसि ।

कल्पः—" वायोर्यान्यसीति द्वे संयान्यौ " इति । पाठस्तु—

वायोर्यानीति । पूर्ववद्व्याख्येयम् । कल्पः—" अन्तरिक्षस्य यान्यसीति द्वे संयान्यौ " इति । पाठस्तु—

अन्तरिक्षस्येति । एतदपि पूर्ववद्व्याख्येयम् । कल्पः—" अन्तरिक्षमस्यन्तरिक्षाय त्वेति द्वे संयान्यौ " इति । पाठस्तु—

अन्तरिक्षमिति । हे इष्टके त्वमन्तरिक्षरूपोऽसि । हे द्वितीयेष्टकेऽन्तरिक्षमित्यर्थं त्वामुपदधामीति शेषः । एतैर्मन्त्रैः साध्यमुपधानं विधत्ते—

"संयानीभिर्वै देवा इमाल्लोकान्त्समयुस्तत्संयानीनाꣳ संयानित्वं यत्संयानीरुपदधाति यथाऽप्सु नावा संयात्येवमेवैताभिर्यजमान इमाल्लोकान्त्संयाति " [सं० का० ५ प्र० ३ अ० १०] इति ।

यानीशब्दोपेतैर्मन्त्रैरुपधेया इष्टकाः संयान्यः । ताभिर्देवा इमाल्लोकान्त्सम्यक्प्राप्ताः । ततः सम्यग्यान्ति लोकानाभिरिति संयानीशब्दो व्युत्पन्नः । तदुपधाने सति यथा लोके नद्यादिजलेषु नावा परतीरं सम्यग्याति एवमेताभिर्लोकान्त्सम्यक्प्राप्नोति ।

पूर्वं नौदृष्टान्तेन प्रशंसा कृताऽथ ध्रुवरूपत्वमारोप्य प्रशंसति—

"ध्रुवो वा एषोऽग्नेर्यत्संयानीर्यत्संयानीरुपदधाति ध्रुवमेवैतमग्नय उप दधाति" [सं० का० ५ प्र० ३ अ० १०] इति ।

चीयमानस्याग्नेस्तूष्णीं समूहोऽयं ध्रुवरूपः । अतस्तदुपधानेनाग्नेर्ध्रुवरूपमेवोपदधाति । प्रकारान्तरेण पुनः प्रशंसति—

" उत यस्यैतासूपाहितास्वापोऽग्निꣳ हरन्त्यहत एवास्याग्निः " [सं० का० ५ प्र० ३ अ० १०] इति ।

अपि च तदुपधानादूर्ध्वं यदि कथंचिद्बहुलवृष्टिसंपादितप्रवाहेण चीयमानो हतो भवेत्तथाऽप्यस्य यजमानस्याग्निरहत एव भवति ।

कल्पः—" सलिलाय त्वेत्यष्टावादित्येष्टकाः " इति । पाठस्तु—

सलिलाय त्वेति । सलिलसर्णीकसलीकशब्दा जलावान्तरविशेषवाचिनः ।

---

१ क. च. ति । संया° ।

(विश्वज्योतिरादीष्टकाभिधानम्)

यस्मिन्बहुले जले पतितं वस्तु लीनं भवति तद्बहुलजलं सलिलम्। हे इष्टके तथाविधजलसिद्ध्यर्थं त्वामुपदधामि। एवमुत्तरत्रापि योज्यम्। प्रवाहरूपेण तरणशीलं जलं सर्णीकम्। तत्रैवं सद्भावमापन्नं जलं सतीकम्, केतो ज्ञानमात्रम्। प्रचेतः प्रकृष्टज्ञानम्। विशेषेण वासहेतुः सूर्यप्रकाशो विवस्वान्। द्युलोकवर्तिनक्षत्रादिप्रकाशो दिवोज्योतिः। आदित्याः प्रसिद्धाः।

एतैर्मन्त्रैः साध्यमुपधानं विधत्ते—

" आदित्येष्टका उप दधात्यादित्या वा एतं भूत्यै प्रति नुदन्ते योऽर्कं भूत्यै सम्भूतिं न प्राप्नोत्यादित्या एवैनं भूतिं गमयन्त्यसौ वा एतस्याऽऽदित्यो रुचमा दत्ते योऽग्निं चित्वा न रोचते यदादित्येष्टका उपदधात्यसावेवास्मिन्नादित्यो रुचं दधाति यथाऽऽसौ देवानाꣳ रोचत एवमेवैष मनुष्याणाꣳ रोचते " [सं० का० ५ प्र० ३ अ० १०] इति।

आदित्यशब्दोपेतैर्मन्त्रैरुपधेया इष्टका आदित्येष्टकाः। यो राजामात्यादिपुत्रत्वेन भूत्यर्थं समर्थोऽपि भूतिं न प्राप्नोति एनमादित्या एव भूतेरपनयन्ति। अतस्तस्याऽऽदित्येष्टकोपधानेनाऽऽदित्या एव भूतेः प्रापयितारो भवन्ति। यो यजमान उक्तक्रमेणाग्निं चित्वाऽपि मनुष्येभ्यो न रोचतेऽयमग्निश्चित्वादित्येवं मनुष्या बहुमानं न कुर्वन्ति तदानीमस्याग्निचितो रुचं प्रीतिमादित्य उपादत्ते। तस्याऽऽदित्येष्टकोपधाने सत्यादित्य एव तस्मिन्स्थास्यति। ततः शास्त्रीयवचनेन यथा देवानां प्रिय एवमेव मनुष्याणां प्रियो भवति। ततः—

अग्निचित्कपिला सत्री राजा भिक्षुर्महोदधिः।
इष्टमात्राः पुनन्त्येते तस्मात्पश्येत नित्यशः॥

इत्यादिस्मृतिविषयत्वेनैनं मनुष्या गणयन्ति।

कल्पः—" ऋचे त्वा रुचे त्वेति पञ्च घृतेष्टकाः " इति। पाठस्तु—

ऋचे त्वेति। हे इष्टके पादबद्धमन्त्रसाध्यस्तुत्यर्थं त्वामुपदधामि। एवमुत्तरत्रापि योज्यम्। प्रकाशवाचिनो रुग्द्युद्भ्राज्योतिःशब्दा आदित्यचन्द्राग्निनक्षत्रदीप्तिविषयतया क्रमेण व्याख्येयाः। एतन्मन्त्रसाध्यमुपधानं विधत्ते—

" घृतेष्टका उप दधात्येतद्वा अग्नेः प्रियं धाम यद्घृतं प्रियेणैवैनं धाम्ना समर्धयत्यथो तेजसा " [सं० का० ५ प्र० ३ अ० १०] इति।

---

१ क. नीलं। २ क. घ. °द्युतं च। ३ घ. ङ. °व भूतिमाप्नुवन्ति।

(विश्वज्योतिरादीष्टकाभिधानम्)

घृतपिण्डा एव घृतेष्टकाः। अमृन्मयीष्विष्टकासु सूत्रकारेण परिगणितत्वात्। घृतस्याग्निप्रियद्रव्यत्वात्तेनाग्निः समृद्धो भवति। किंच तेजसाऽपि युक्तो भवति। तत्रापि पूर्ववदेकैकस्या इष्टकायाः प्रदक्षिणावृत्तिपूर्वकत्वं विधत्ते—

" अनुपरिहारꣳ सादयत्यपरिवर्गमेवास्मिन्तेजो दधाति " [तै० का० ५ प्र० ३ अ० १०] इति। परितः क्वापि वर्जनमकृत्वा सर्वतो यजमाने तेजः स्थापयति। कल्पः—" यशोदां त्वेति पञ्च यशोदाः " इति। पाठस्तु—

यशोदां त्वेति। यशः कीर्तिः। तेजः कान्तिः। पयः क्षीरम्। वर्चो बलम्। द्रविणं धनम्। हे इष्टके यशःप्रदां त्वां यशोनिमित्तं सादयामि। केन केन सह, यस्त्वदभिज्ञ ऋषिः, यच्च बलं त्वत्प्रतिपादकं मन्त्रवाक्यं, या च त्वदभिमानिनी देवता, तैः सर्वैः सह त्वामहं सादयामि। यथाऽङ्गिरसः सादयन्ति तद्वत्। एवं तेजादां त्वेत्यादिषु चतुर्षु मन्त्रेषु सादयामीत्यादिकं सर्वमनुषज्य व्याख्येयम्। एतैर्मन्त्रैः साध्यमुपधानं विधत्ते—

" प्रजापतिरग्निमचिनुत स यशसा व्यार्धत स एता यशोदा अपश्यत्ता उपाधत्त ताभिर्वै स यश आत्मन्नधत्त यद्यशोदा उपदधाति यश एव ताभिर्यजमान आत्मन्धत्ते " [तै० का० ५ प्र० ३ अ० १०] इति।

अग्निं चित्वाऽप्येतासामनुपधानात्प्रजापतिर्यशसा वियुक्त आसीत्। तत एता दृष्ट्वा ता उपधाय यशो लब्धवान्। एवं यजमानोऽपि तदुपधानेन यशो लभते। इष्टकासंख्यां विधत्ते—

" पञ्चोप दधाति पाङ्क्तः पुरुषो यावानेव पुरुषस्तस्मिन्यशो दधाति " [तै० का० ५ प्र० ३ अ० १०] इति। हस्तपादशिरोभिः पञ्चभिरवयवैः पुरुषस्य पाङ्क्तत्वम्। अत्र विनियोगसंग्रहः—

वृहद्विश्वजेत्येता विश्वज्योतिष ईरिताः।
पुरो वृष्टिसनीः पञ्च स्रग्भिः संयानिकाष्टकम्॥
सख्यादित्येष्टका अष्टावुचे पञ्च घृतेष्टकाः।
यशः पञ्च यशोदाः स्युः सादयाम्यनुषज्यते॥
षष्ठानुवाके संप्रोक्ताश्चतुस्त्रिंशत्तु मन्त्रकाः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे चतुर्थप्रपाठके षष्ठोऽनुवाकः॥ ६॥

(अथ चतुर्थाष्टके चतुर्थप्रपाठके सप्तमोऽनुवाकः)।

भूयस्कृदसि वरिवस्कृदसि प्राच्यस्यूर्ध्वाऽ-
स्वंन्तरिक्षसदस्यन्तरिक्षे सीदाप्सुषदसि श्येन-
सदसि गृध्रसदसि सुपर्णसदसि नाकसदसि
पृथिव्यास्त्वा द्रविणे सादयाम्यन्तरिक्षस्य त्वा
द्रविणे सादयामि दिवस्त्वा द्रविणे सादयामि
दिशां त्वा द्रविणे सादयामि द्रविणोदां त्वा
द्रविणे सादयामि प्राणं मे पाह्यपानं मे पाहि
व्यानं मे (१) पाह्यायुर्मे पाहि विश्वायुर्मे
पाहि सर्वायुर्मे पाह्यग्ने यत्ते पर२ हृन्नाम तावेहि
स२रंभावहै पाञ्चजन्येष्वप्येध्यग्ने यावा अयावा
एवा ऊमाः सब्दः सगरः सुमेकः (२) ॥

(व्यानं मे द्वात्रिंशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
चतुर्थप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ चतुर्थकाण्डे चतुर्थप्रपाठके सप्तमोऽनुवाकः)।

षष्ठेऽनुवाके विश्वज्योतिरादय इष्टका उक्ताः । अथ सप्तमे भूयस्कृदादय इष्टका उच्यन्ते । कल्पः—" भूयस्कृदसीति पञ्च भूयस्कृतः " इति । पाठस्तु—

भूयस्कृदसीति । हे इष्टके त्वं भूयो बाहुल्यं करोतीति भूयस्कृत् । तथाविधाऽसि । एवमुत्तरत्रापि योज्यम् । वरिवो भूमेः पूज्यत्वं करोतीति वरिवस्कृत् । स्पष्टमन्यत् । एतैर्मन्त्रैः साध्यमुपधानं विधत्ते—

" देवासुराः संयत्ता आसन्कनीयाꣳसो देवा आसन्भूयाꣳसोऽसुरास्ते देवा एता इष्टका अपश्यन्ता उपादधत भूयस्कृदसीत्येव भूयाꣳसोऽभवन्वनस्पतिभिरोषधीभिर्वरिवस्कृदसीतीमामजयन्प्राच्यसीति प्राचीं दिशमजयन्नूर्ध्वाऽसीत्यमूमजयन्-

(भूयस्कृदाद्यष्टकाभिधानम्)

अन्तरिक्षसदस्यन्तरिक्षे सीदेत्यन्तरिक्षमजयन्ततो देवा अभवन्पराऽसुरा यस्यैता उपधीयन्ते भूयानेव भवत्यभीमाल्लोकाञ्जयति भवत्यात्मना पराऽस्य भ्रातृव्यो भवति " [सं० का० ५ प्र० ३ अ० ११] इति ।

देवाश्चासुराश्च यदा युद्धायोद्युक्तास्तदा देवाः पुरुषसंख्यया द्रव्यसंपत्त्या चाल्पा भूत्वा तत्परिहारायैता इष्टका दृष्ट्वा ता उपधाय प्रथममन्त्रेण वनस्पत्योषधिद्रव्यसंपत्त्या तदुपलक्षितपुरुषसंपत्त्या चातिबहुला अभवन् । उपरितनैर्मन्त्रैर्भूम्यादिजयं प्राप्ताः । ततो देवा विजयिनोऽभवन्नसुराश्च पराभूताः । यजमानोऽप्येतासामुपधानेन तथा भवति ।

कल्पः—" अप्सुषदसीति पञ्चाग्निरूपाणि " इति । पाठस्तु—

अप्सुषदसीति । योऽग्निरप्सु सीदति हे इष्टके तद्रूपा त्वमसि । आरुणकेतुकचयने जानुदघ्नीमुत्तरवेदिमद्भिः पूरयित्वा तास्वग्निश्चीयते । श्येनगृध्रसुपर्णाः पक्षिविशेषाः । तत्तदाकारेण स्थितोऽग्निः श्येनसदादिशब्दैरुच्यते । नाके स्वर्गे वर्तमानोऽग्निर्नाकसत् । तदग्निरूपेष्टके त्वमसीति योज्यम् ।

मन्त्रेष्वप्सुषदादिपदानामग्न्याकारे[वाचि]त्वं दर्शयति—

" अप्सुषदसि श्येनसदसीत्याहैतद्वा अग्ने रूपꣳ रूपेणैवाग्निमव रुन्धे " [सं० का० ५ प्र० ३ अ० ११] इति ।

अग्न्याकारवाचिनां पदानां पाठेन योग्यरूपेण युक्तमग्निमेव प्राप्नोति । अग्निरूपवाचिभिर्मन्त्रैरुपधेयत्वादिष्टका अप्यग्निरूपाणीत्येवोच्यन्ते ।

कल्पः—" पृथिव्यास्त्वा द्रविणे सादयामीति पञ्च द्रविणोदाः " इति । पाठस्तु—

पृथिव्यास्त्वेति । पृथिव्याः संबन्धि यद्द्रविणं धनं तस्मिन्द्रविणे त्वां सादयामि । एवमुत्तरत्र योज्यम् । द्रविणपदं त्वामनुक्तविशेषेऽपि सर्वस्मिन्द्रविणे सादयामि । मन्त्राणां तात्पर्यं दर्शयति—

" पृथिव्यास्त्वा द्रविणे सादयामीत्याहेमानेवैताभिर्लोकान्द्रविणावतः कुरुते " [सं० का० ५ प्र० ३ अ० ११] इति ।

एताभिरेतन्मन्त्रसाध्याभिर्द्रविणोदाख्याभिः । द्रविणोदाशब्दयुक्तैर्मन्त्रैरुपधेयत्वाद्द्रविणोदा इत्यासां नाम ।

---

१ म. च. °रवत्त्वं द° ।

(भूयस्कृदादीष्टकाभिधानम्)

कल्पः—"प्राणं मे पाहीति षडायुष्याः" इति । पाठस्तु—

प्राणं मे पाहीति । हे इष्टके मदीयं प्राणवृत्तिं पालय । एवं सर्वत्र । स्वकीयायुषः साकल्यं विवक्षद्भिरुच्यते । स्वसंबन्धिपुत्राद्यायुष्यं सर्वशब्देनोच्यते ।

एतैर्मन्त्रैः साध्यमुपधानं विधत्ते—

"आयुष्या उप दधात्यायुरेवास्मिन्दधाति" [सं० का० ५ प्र० ३ अ० ११] इति । आयुःशब्दोपेतैर्मन्त्रैरुपधेयत्वादेता इष्टका आयुष्याः ।

कल्पः—"अग्ने यत्ते परः इत्यामेत्यग्नेर्हृदयम्" इति । पाठस्तु—

अग्ने यत्ते परमिति । हेऽग्ने हृदिति यत्ते परमुत्कृष्टं नामानिष्टं पापं हरतीति हृत्तेन नाम्ना युक्तस्त्वमेहि मत्समीपमागच्छ । तौ त्वं चाहं चेत्युभावावां संरभावहै संगतौ कुर्वः। पञ्चजनशब्दः संज्ञायां समस्तत्वादत्र चितिपञ्चकमाचष्टे। हेऽग्ने त्वं पाञ्चजन्येष्वपि पञ्चचितिसंबन्धिषु सर्वेष्वपि स्थानेष्वेष्यवस्थितो भव ।

मन्त्रस्य प्रथमपादे हृच्छब्दस्य तात्पर्यं दर्शयति—

" अग्ने यत्ते परः इत्यामेत्याहैतद्वा अग्नेः प्रियं धाम प्रियमेवास्य धामोपाऽऽप्नोति " [सं० का० ५ प्र० ३ अ० ११] इति ।

हृच्छब्दवाच्यं पापहारि स्वरूपं यत्तदेवाग्नेः प्रियं स्थानम् ।

मध्यभागे सꣳरभावहा इत्यस्य तात्पर्यं दर्शयति—

" तावेहि सꣳ रभावहा इत्याह व्येवैनेन परि धत्ते " [सं० का० ५ प्र० ३ अ० ११] इति ।

सहानुष्ठानपार्थने सꣳ(त्ये)नेनाग्निना स्वस्य परिधानं प्रावरणं विशेषेण कृतं भवति । तृतीयभागे पाञ्चजन्यशब्दार्थं दर्शयति—

"पाञ्चजन्येष्वप्येष्यग्न इत्याहैष वा अग्निः पाञ्चजन्यो यः पञ्चचितीकस्वमादेवमाह" [सं० का० ५ प्र० ३ अ० ११] इति ।

कल्पः—"यावा अयावा इति सप्तर्तव्याः" इति । पाठस्तु—

यावा अयावा इति । यावाद्याः षट् शब्दा वसन्तादृतुवाचिनः । सुमेकशब्दः संवत्सरवाची । हे इष्टके त्वं तद्रूपाऽसीति योज्यम् । एतन्मन्त्रसाध्यमुपधानं विधत्ते—

" ऋतव्या उप दधात्येतद्वा ऋतूनां प्रियं धाम यदृतव्या ऋतूनामेव प्रियं धामाव रुन्धे सुमेक इत्याह संवत्सरो वै सुमेकः संवत्सरस्यैव प्रियं धामोपाऽऽप्नोति " [सं० का० ५ प्र० ३ अ० ११] इति ।

(इन्द्रतन्वाख्येष्टकाभिधानम्)

एतद्यावादिशब्दानामृतुसंबन्धित्वात्तैरुपधेया इष्टका अप्युतव्या इत्युच्यन्ते।

अत्र विनियोगसंग्रहः—

भूयो भूयस्कृतः पञ्च पञ्चाप्स्वित्यग्निरूपकाः।
पृथि पञ्च द्विणोदाः प्राणमायुष्यकास्तु षट्॥
अग्नेऽग्नेर्हृदयं प्रोक्तं यावाः सप्त ऋतव्यकाः।
अनुवाके सप्तमेऽस्मिन्नेकोनत्रिंशदीरिताः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे चतुर्थप्रपाठके सप्तमोऽनुवाकः॥ ७॥

(अथ चतुर्थाष्टके चतुर्थप्रपाठकेऽष्टमोऽनुवाकः)।

अग्निना विश्वाषाट् सूर्येण स्वराट् कृत्वा शचीपतिर्ऋषभेण त्वष्टा यज्ञेन मघवान्दाक्षिणया सुवर्गो मन्युना वृत्रहा सौहार्येन तनूधा अन्नेन गयः पृथिव्याऽसनोदृग्भिरन्नादो वषट्कारेणर्धः साम्ना तनूपा विराजा ज्योतिष्मान् ब्रह्मणा सोमपा गोभिर्यज्ञं दाधार क्षत्रेण मनुष्यानश्वेन च रथेन च वज्र्यृतुभिः प्रभुः संवत्सरेण परिभूस्तपसाऽनाधृष्टः सूर्यः सन्तनूभिः (१)॥

(अग्निनैकान्नपञ्चाशत्)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके चतुर्थप्रपाठकेऽष्टमोऽनुवाकः॥ ८॥

(इन्द्रतन्वाख्येष्टकाभिधानम्)

(अथ चतुर्थकाण्डे चतुर्थंपपाठकेऽष्टमोऽनुवाकः)।

सप्तमेऽनुवाके भूयस्कदाद्या इष्टका उक्ताः। अथाष्टम इन्द्रतन्वाख्या इष्टका उच्यन्ते। कल्पः—"अग्निना विश्वाषाडिति द्वाविंशतिमिन्द्रतनूः" इति। पाठस्तु—

अग्निना विश्वाषाडिति। विश्वं सहते तत्पालनप्रयासमङ्गी करोतीति विश्वाषाट्। अग्निना सह विश्वाषाडय इन्द्रो हे इष्टके तद्रूपा त्वमसि। एवं सर्वत्र योज्यम्। सूर्येण सह स्वतो राजत इति स्वराडिन्द्रः। ऋत्वा ज्योतिष्टोमादिप्रौढकर्मणा सहितः शक्र्या देव्याः पतिरिन्द्रः। ऋषभेण वर्षित्रा धर्मेण सह त्वष्टा रूपकृदिन्द्रः। यज्ञेनाल्पेन पाकयज्ञेन सहितो मघवानन्नवानिन्द्रः। दक्षिणया गवादिरूपया सुवर्गः स्वर्गलोकात्मक इन्द्रः। मन्युना क्रोधेन सह वृत्रहा शत्रुघातीन्द्रः। सुहृदो भावः सौहार्द्यं स्नेहातिशयस्तेन सहितस्तनूवाः शरीरधारीन्द्रः। अन्नेन सहितो गयो गृहविशेषरूप इन्द्रः। पृथिव्या सहासनोद्वप्यादिदानं कृतवानिन्द्रः। क्रतुभिर्मन्त्रविशेषैः सहितोऽन्नादो हविर्लक्षणस्यान्नस्य भोक्तेन्द्रः। वषट्कारेण हविष्प्रदानेन हेतुना सह ऋद्धः समृद्ध इन्द्रः। साम्ना गीयमानेन मन्त्रेण सह तनूपाः शरीरपालक इन्द्रः। विराजा दशाक्षरच्छन्दसा सह ज्योतिष्मान्प्रकाशवानिन्द्रः। ब्रह्मणा मुख्येन क्रत्विजा मन्त्रेण वा सह सोमपाः सोमपानस्य कर्तेन्द्रः। गोभिर्दक्षिणारूपाभिः सह यज्ञं दाधार यज्ञधारक इन्द्रः। क्षत्रेण राज्ञा सह मनुष्यान्दाधारेत्यनुवर्तते। तथा च मनुष्यधारक इन्द्रः। योऽयमक्षो यश्च रथस्ताभ्यामुभाभ्यां सह वज्री वज्रयुक्त इन्द्रः। ऋतुभिर्वसन्तादिभिः सह प्रभुः फलदानसमर्थ इन्द्रः। संवत्सरेण कालरूपेण सह परिभूः परितो व्याप्तवानिन्द्रः। तपसाऽशनवर्जनधनदानादिरूपेणानाधृष्टः केनाप्यतिरस्कृत इन्द्रः। तनूभिर्द्वादशमूर्तिभिः सह सूर्यः सन्सूर्यरूपो भूत्वेन्द्रो वर्तते। हे इष्टके तद्रूपा त्वमसि। एतैर्मन्त्रैः साध्यमुपधानं विधत्ते—

"देवासुराः संयत्ता आसन्ते न व्यजयन्त स एता इन्द्रस्तनूरपश्यत्ता उपाधत्त ताभिर्वै स तनुवामिन्द्रियं वीर्यमात्मन्नधत्त ततो देवा अभवन्पराऽसुरा यदिन्द्रतनूरुपदधाति तनुवमेव ताभिरिन्द्रियं वीर्यं यजमान आत्मन्धत्तेऽथो स इन्द्रमेवाग्निश्चितनुं चिनुते भवत्यात्मना पराऽस्य भ्रातृव्यो भवति" [सं० का० ५ प्र० ४ अ० १] इति।

---

१ च. °था म°।

(यज्ञतन्वख्ययेष्टकाभिधानम्)

देवानामसुराणां च संग्रामे प्राप्ते दुर्बला देवा विजयं न प्राप्नुवन्। तदानीं विजयाय स इन्द्र एतास्तनूनामिका इष्टका दृष्ट्वा तदुपधानेन शरीरपुष्टिमिन्द्रियपाटवं शौर्यपाटवं च प्राप्तवान्। ततो देवानां जयोऽसुराणां पराभवश्चाऽऽसीत्। ततो यजमानोऽप्येन्द्रतनूनामुपधानेन तथाविधो भवति। विश्वाषाडित्यादिशब्दा इन्द्रतनूविशेषवाचकाः। तद्युक्तैर्मन्त्रैरुपधेया इष्टका इन्द्रतनवः।

अत्र विनियोगसंग्रहः—अग्नीन्द्रतनुनामानो[1] द्वाविंशतिरितीरिताः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे चतुर्थप्रपाठकेऽष्टमोऽनुवाकः॥ ८॥

(अथ चतुर्थाष्टके चतुर्थप्रपाठके नवमोऽनुवाकः)।

प्रजापतिर्मनसाऽन्धोऽच्छैतो धाता दीक्षायाꣳ सविता भृत्यां पूषा सोमक्रयण्यां वरुण उपनद्धोऽसुरः क्रीयमाणो मित्रः क्रीतः शिपिविष्ट आसादितो नराशꣳषः प्रोह्यमाणोऽधिपतिरागतः प्रजापतिः प्रणीयमानोऽग्निराग्नीध्रे बृहस्पतिराग्नीध्रात्प्रणीयमान इन्द्रो हविर्धाने दितिरासादितो विष्णुरुपावहियमाणोऽथर्वोपोत्तो यमोऽभिषुतोऽपूतपा आधूयमानो वायुः पूयमानो मित्रः क्षीरश्रीर्मन्थी संकुश्रीर्वैश्वदेव उन्नीतो रुद्र आहुतो वायुराधृत्तो नुचक्षाः प्रतिरुयातो भक्ष आगतः पितृणां नाराशꣳसोऽसुरान्तः सिन्धुरवभृथमवप्रयन्त्समुद्रोऽवगतः सालिलः प्रप्लुतः सुवरुदृचं गतः (१)॥

---

१ क. °नो मन्त्रा द्वाविंशती°।

(यज्ञतन्वाख्येष्टकाभिधानम्)

(रुद्र एकविंशतिश्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थकाण्डके चतुर्थ-प्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ चतुर्थकाण्डे चतुर्थप्रपाठके नवमोऽनुवाकः) ।

अष्टमेऽनुवाक इन्द्रतन्वाख्या इष्टका उक्ताः । अथ नवमे यज्ञतन्वाख्या इष्टका उच्यन्ते । कल्पः—"प्रजापतिर्मनसाऽन्वोऽच्छेत इति त्रयस्त्रिंशतं यज्ञतनूः" इति । पाठस्तु—

प्रजापतिरिति । अत्र संकल्पमारभ्य समाप्तिपर्यन्तं ये सोमयागास्ते यज्ञपुरुषस्य तनुविशेषाः । तद्रूपत्वादिष्टकानामुच्यते । यो यजमानोऽयमो मनसाऽन्वोऽन्यं तेन तच्छेतुर्यज्ञ उपलक्ष्यते । यज्ञमच्छेतः प्राप्तुं गतः । मनसा यज्ञं करिष्यामीति संकल्पितवानित्यर्थः । सोऽयं संकल्पदशामापन्नो यज्ञस्य विग्रहः प्रजापतिनामकः । हे इष्टके तद्रूपा त्वमसि । दीक्षायां यो विग्रहो यज्ञसंबन्धी स धाता धातृसदृशमूर्तिः । हे इष्टके तद्रूपा त्वमसि । एवं सर्वत्र योज्यम् । भूतिर्यज्ञभिक्षा तस्यां सवितृसमानमूर्तिर्यज्ञतनुः । सोमक्रयण्येकहायनी गौस्तस्यां पूषसमानो यज्ञविग्रहः । उपनद्धो वस्त्रेण बद्धो यः सोमः स वरुणसमानशरीरो यज्ञपुरुषः । क्रीयमाणो यः सोमः सोऽयमसुर इन्द्रसमानविग्रहः, शत्रूनस्यति क्षिपतीत्यसुरः, असून्प्राणान्राति ददातीति वाऽसुरः । यः क्रीतः सोमः सोऽयं मित्रसमानविग्रहो यज्ञः । आसादितो यजमानस्योरौ यः स्थापितः सोमः सोऽयं शिपिविष्टो विष्णुसमानविग्रहो यज्ञः । प्रोक्षमाणः शकटेन प्राग्वंशं प्रति नीयमानो यः सोमः सोऽयं नरांधिषोऽग्निरूपासविग्रहो यज्ञः, नरैर्यजमानैर्धीयत आधीयत इति नरांधिषोऽग्निः । आगतः प्राग्वंश आसन्दीं प्रति समागतो यः सोमः सोऽयमधिपतिराधिकं पालको य आहवनीयस्तत्समानविग्रहः । प्रणीयमानः प्राग्वंशादाग्नीध्रं प्रति नियमानो यः सोमः सोऽयं प्रजापतिसमानविग्रहः । आग्नीध्रेऽवस्थितो यः सोमः सोऽयमग्निसमानविग्रहः । आग्नीध्राद्धविर्धानं प्रति नीयमानो यः सोमः स बृहस्पतिसमानविग्रहः । हविर्धाने प्रविष्ट इन्द्रसमानविग्रहः । आसादित आसन्द्यां स्थापितः सोमोऽदितिसमानविग्रहः । उपावहियमाणः शकटादधिषवणफलकस्थग्रावस्ववरोप्यमाणः सोमो विष्णुसमानविग्रहः । उपोत्तो वसतीवरीभिरद्भिः क्षेदितः सोमोऽथर्वाऽथर्वकाण्डसमानविग्रहः । [अभिषुत्यूर्णिवृ-

(यज्ञतन्वारूप्येष्टकाभिधानम्)

सोमो यमसमानविग्रहः। आधयमानोऽग्न्याधेयग्रहे सोमांशुभिश्चाल्यमानोऽपूत मूत्रा-द्युपहतं देशं पाति शोषयति विशेषेण शुद्धं करोतीत्यपूतपा आदित्यः। पूयमानो दशापवित्रेण शोध्यमानः सोमो वायुर्वायुसमानविग्रहः। क्षीरश्रीर्मैत्रावरुणग्रहे पयसा मिश्रितः सोमो मित्रसमानविग्रहः। सक्तुश्रीर्मन्थिग्रहे सक्तुभिर्मिश्रितः सोमो मन्थी मन्थिग्रहदेवतारूपेन्द्रसमानविग्रहः। उन्नीतश्रमसेषु पूरितः सोमो वैश्वदेवो विश्वेदेवैः समानविग्रहः। आहुतो वह्नौ प्रक्षिप्तः सोमो रुद्रसमानविग्रहः। आवृत्तो भक्षार्थं सदस्थानेतुं प्रतिनिवृत्तः सोमो वायु-समानविग्रहः। प्रतिख्यातो भक्षार्थमपेक्षितः सोमो नृचक्षा मनुष्यदृष्टिसमान-विग्रहः। आगत आस्ये प्रवेशितः सोमो भक्षो वैश्वानरसमानविग्रहः। भक्ष-यतीति व्युत्पत्त्या भक्षशब्दस्तद्वाची। नाराशंसो भक्षितशेषः सन्पुनर्वसतीवरीभिराप्यायितः सोमः पितृसमानविग्रहः। आत्तोऽवभृथगमनार्थं स्वीकृतः सोमोऽग्निः प्राणदेवतासमानविग्रहः। अवभृथमवपयन्नवभृथकर्मार्थं मार्गे गच्छ-न्सोमः सिन्धुर्नदीदेवतासमानविग्रहः। अवगतोऽवभृथप्रदेशं प्राप्तः सोमः समुद्र-देवतासमानविग्रहः। प्लुतो जले प्रक्षिप्तः सोमो जलदेवतासमानविग्रहः। उद्-यमुत्तमामृतं समाप्तिरूपं गतः सोमः स्वर्गनिवासिदेवतासमानविग्रहः। एतैर्मन्त्रैः साध्यमुपधानं विधत्ते—

"यज्ञो देवेभ्योऽपाक्रामत्तमवरुधं नाशक्नुवन्त एता यज्ञतनूरपश्यन्ता उपादधत ताभिर्वै ते यज्ञमवारुन्धत यद्यज्ञतनूरुपदधाति यज्ञमेव ताभिर्यजमानोऽव रुन्धे" [सं० का० ५ प्र० ४ अ० १] इति।

केनापि निमित्तेन देवेभ्योऽपरक्तो यज्ञोऽन्यत्रागच्छत्। तं यज्ञं देवा अव-रोद्धुं नाशक्नुवन्। तदवरोधोपायत्वेन यज्ञतन्वाख्या इष्टका दृष्ट्वा ता उपधाय यज्ञमवारुन्धत। ततो यजमानोऽपि यज्ञतनूभिर्यज्ञं प्राप्नोति। यज्ञतनुप्रतिपाद-कशब्दघटकैर्मन्त्रैरुपधेया इष्टका यज्ञतनवः। इष्टकासंख्यां विधत्ते—

"त्रयस्त्रिꣳशत्त्रयस्त्रिꣳशद्वै देवता देवता एवाव रुन्धेऽथो आत्मानमेवाग्निꣳ सतनुं चिनुते" [सं० का० ५ प्र० ४ अ० १] इति।

इष्टिभाजां देवतानामियं संख्या त्रिꣳशत्त्रयश्चेति मन्त्रे समाम्नाता। अतः

---

१ ख. च. °थमपेक्षि°। ङ. °थमवे°।

संख्यया तावतीर्देवताः प्राप्नोति । अपि च तनूपधानेन सशरीरमेवाग्निं चितवान्भवति। एतद्वेदनं प्रशंसति—

" सात्माऽमुष्मिँल्लोके भवति य एवं वेद " [सं० का० ५ प्र० ४ अ० १] इति । यदुक्तं सूत्रकारेण—"ज्योतिष्मतीं त्वा सादयामीति द्वादश ज्योतिष्मतीः " इति । तदिदं विधत्ते—

" ज्योतिष्मतीरुप दधाति ज्योतिरेवास्मिन्दधात्येताभिर्वा अग्निश्चितो ज्वलति ताभिरेवनꣳ समिन्ध उभयोरस्मै लोकयोर्ज्योतिर्भवति " [सं० का० ५ प्र० ४ अ० १] इति ।

ज्योतिष्मतीशब्दयुक्तैर्मन्त्रैरुपधेया इष्टका ज्योतिष्मत्यः । ते च मन्त्रा अरण्यकाण्डे समाम्नाताः । तदुपधानेन ज्योतिः स्थापयति । किंचैताभिश्चितोऽग्निः प्रज्वलति । अतस्ताभिरेवैनमग्निं दीपितवान्भवति । ततोऽस्मै यजमानायोभयोर्लोकयोर्ज्योतिः संपद्यते । अत्र विनियोगसंग्रहः—

प्रजेति यज्ञतनवस्त्रयस्त्रिंशत्समीरिताः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे चतुर्थप्रपाठके
नवमोऽनुवाकः ॥ ९ ॥

(अथ चतुर्थाष्टके चतुर्थप्रपाठके दशमोऽनुवाकः) ।

कृत्तिका नक्षत्रमग्निर्देवताऽग्ने रुचः स्थ प्रजापतेर्धातुः सोमस्यर्चे त्वा रुचे त्वा द्युते त्वा भासे त्वा ज्योतिषे त्वा रोहिणी नक्षत्रं प्रजापतिर्देवता मृगशीर्षं नक्षत्रꣳ सोमो देवताऽऽर्द्रा नक्षत्रꣳ रुद्रो देवता पुनर्वसू नक्षत्रमदितिर्देवता तिष्यो नक्षत्रं बृहस्पतिर्देवताऽऽश्रेषा नक्षत्रꣳ सर्पा देवता मघा नक्षत्रं पितरो देवता फल्गुनी नक्षत्रम् (१) अर्यमा

(नक्षत्रेष्टकाभिधानम्)

देवता फल्गुनी नक्षत्रं भगो देवता हस्तो नक्षत्रꣳ सविता देवता चित्रा नक्षत्रमिन्द्रो देवता स्वाती नक्षत्रं वायुर्देवता विशाखे नक्षत्रमिन्द्राग्नी देवताऽनूराधा नक्षत्रं मित्रो देवता रोहिणी नक्षत्रमिन्द्रो देवता विचृतौ नक्षत्रं पितरो देवताऽषाढा नक्षत्रमापो देवताऽषाढा नक्षत्रं विश्वे देवा देवता श्रोणा नक्षत्रं विष्णुर्देवता श्रविष्ठा नक्षत्रं वसवः (२) देवता शतभिषङ्नक्षत्रमिन्द्रो देवता प्रोष्ठपदा नक्षत्रमज एकपाद्देवता प्रोष्ठपदा नक्षत्रमहिर्बुध्नियो देवता रेवती नक्षत्रं पुषा देवताऽश्वयुजौ नक्षत्रमश्विनौ देवताऽपभरणीर्नक्षत्रं यमो देवता पूर्णा पश्चाद्यत्ते देवा अदधुः (३) ॥

(फल्गुनी नक्षत्रं वसवस्त्रयस्त्रिꣳशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके चतुर्थप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ चतुर्थकाण्डे चतुर्थप्रपाठके दशमोऽनुवाकः) ।

नवमेऽनुवाके यज्ञतन्वाख्या इष्टका उक्ताः । अथ दशमे नक्षत्रेष्टका उच्यन्ते ।

कल्पः—" पूर्णा पश्चादिति पौर्णमासीं पुरस्तादुपधाय कृत्तिका नक्षत्रमिति नक्षत्रेष्टकाः पुरस्तात्प्रतीचीरसंस्पृष्टाः पूर्वां पूर्वामुपधायापरामपरामा विशाखाभ्यां दक्षिणेन स्वयमातृण्णां रीतिं प्रतिपादयति, यत्ते देवा अदधुरित्यमावास्यां पश्चादुपधायावशिष्टानां पूर्वां पूर्वामाऽपभरणीभ्य उत्तरेण स्वयमातृण्णां रीतिं प्रतिपादयति, पौर्णमासीमन्तत ऋचे त्वा रुचे त्वेति सर्वासु नक्षत्रेष्टकास्वनुषजति " इति ।

येयं स्वयमातृण्णेष्टका तस्याः पूर्वस्यां(र्वी) दिशमारभ्य प्रदक्षिणावृत्येष्टका उपदध्यात् । तत्र येष्टका पौर्णमास्याख्या पूर्वस्यां दिश्युपधेया तां सर्वासामन्तत उपदध्यात् । तत्र प्रथममन्त्रपाठस्तु—

कृत्तिका नक्षत्रमिति । अम्बा दुला नितत्निरित्यादिका ज्योतीरूपा या देवता दिव्या भासन्ते ताः कृत्तिकाः । तासां समुदायरूपमेकं नक्षत्रं, तस्य च नक्षत्रस्याग्निर्देवता स्वामित्वेन वर्तते । हे कृत्तिका यूयमग्नेः प्रजापेर्धातुः सोमस्य च संबन्धिन्यो रुचो दीप्तयः स्थ । प्रजापतेर्धातुश्च पालकत्वोत्पादकत्वाकारेण भेदः । उक्तदेवतारूपे हे इष्टके, ऋचे स्तुतिरूपमन्त्रसिद्ध्यर्थं त्वामुपदधामि । तथा रुचे शारीरकान्तिसिद्ध्यर्थं त्वामुपदधामि । द्युम्नाज्योतिःशब्दा अग्निसूर्यचन्द्राणां दीप्तिवाचकाः । तत्तत्सिद्ध्यर्थं त्वामुपदधामि । एवमुत्तरेष्वपि नक्षत्रमन्त्रेषु योजनीयम् । द्वितीयनक्षत्रमन्त्रमारभ्य षड्विंशतिनक्षत्रमन्त्राणां पाठस्तु—

रोहिणी नक्षत्रमिति । अथ रोहिण्यादयो नक्षत्रविशेषा ज्योतिःशास्त्राभिज्ञेषु तदीयव्यवहाराभिज्ञेषु च प्रसिद्धाः । तिष्यः पुष्यः । द्वितीया रोहिणी ज्येष्ठा । विचृतश(च्छ)ब्दो मूलवाची । ज्योतिर्मण्डलद्वितीयतायां द्विवचनम् । पितृशब्दोऽत्र निर्ऋतिवाची । आधानेन पालनात्पितृत्वम् । श्रोणाशब्दः श्रवणवाची । श्रविष्ठाशब्दो धनिष्ठावाची । शतभिषङ्नक्षत्रस्य वरुणो देवता । स च परमैश्वर्ययोगादिन्द्र इत्युच्यते । प्रोष्ठपदा भाद्रपदाः ।

अथ पौर्णमास्यमावास्याभिधेययोरिष्टकयोर्यौ मन्त्रौ तयोः प्रतीके दर्शयति—

पूर्णा पश्चादिति । एतच्चोभयं तृतीयकाण्डस्य पञ्चमप्रपाठकप्रथमे व्याख्यातम् । एतैर्मन्त्रैः साध्यमुपधानं विधत्ते—

"नक्षत्रेष्टका उप दधात्येतानि वै दिवो ज्योतीꣳषि यान्येवाव रुन्धे" [सं० का० ५ प्र० ४ अ० १] इति । नक्षत्रशब्दोपेतैर्मन्त्रैरुपधेया इष्टका नक्षत्रेष्टकाः । यानि कृत्तिकादीनि द्युलोकसंबन्धीनि ज्योतींषि अतस्तदु(नेनो)पधानेन तान्येव प्राप्नोति । प्रकारान्तरेण प्रशंसति—

" सुकृतां वा एतानि ज्योतीꣳषि यन्नक्षत्राणि तान्येवाऽऽप्नोत्यथो अनुकाशमेवैतानि ज्योतीꣳषि कुरुते सुवर्गस्य लोकस्यानुख्यात्यै " [सं० का० ५ प्र० ४ अ० १] इति । ये शोभनं शास्त्रविहितं पुण्यं कर्म कुर्वन्ति ते

१ ख. घ. ङ. च. °त उप°।

(नक्षत्रेष्टकाभिधानम्)

सुकृतिनः । येषामेतानि दिवि दैवेयमानानि नक्षत्ररूपाणि ज्योतींषि । ते हि पुण्यकृतः स्वर्गं गत्वा भासमानविग्रहास्तान्याप्नुवन्ति । अत एव तदुपधानेन तदीयानि ज्योतींषि प्राप्नुवन्ति । अपि चैतानि नक्षत्रज्योतींष्यनु तेनोपधानेन किंचित्प्रकाशं करोति । स च प्रकाशः स्वर्गलोकाविर्भावाय संपद्यते । अथोपधाने कांचाद्भुतां विधत्ते—

" यत्तऽस्पृष्टा उप दध्याद्वृष्ट्यै लोकमपि दध्यादवर्षुकः पर्जन्यः स्याद्यत्तऽस्पृष्टा उप दधाति वृष्ट्या एव लोकं करोति वर्षुकः पर्जन्यो भवति " [तै० का० ५ प्र० ४ अ० १] इति ।

इष्टकानां परस्परं स्पर्शे सति वृष्टेः स्थानस्याऽऽच्छादितत्वात्पर्जन्यो वृष्टिरहितो भवति । असंस्पर्शे तु तच्छिद्रस्य वृष्टिस्थानत्वान्मेघो वर्षणशीलो भवति ।

उपधाने विशेषान्तरं विधत्ते—

" पुरस्तादन्याः प्रतीचीरुप दधाति पश्चादन्याः प्राचीस्तस्मात्प्राचीनानि च प्रतीचीनानि च नक्षत्राण्या वर्तन्ते " [तै० का० ५ प्र० ४ अ० १] इति ।

स्वयमातृण्णाया दक्षिणभागे पूर्वां दिशमारभ्य प्रत्यगवसानाः कृत्तिकादिविशाखान्ता इष्टका उपदध्यात् । अनूराधाद्युपभरण्यन्ता इष्टकाः स्वयमातृण्णाया उत्तरभागे प्रतीचीं दिशमारभ्य प्रागवसाना उपदध्यात् । स्वयमातृण्णाया दक्षिणोत्तरभागस्थितयोः पक्षपुच्छयोर्मध्ये पश्चिमायां दिशि समरूपेणोपावास्याख्यामिष्टकामुपदध्यात् । स्वयमातृण्णाया दक्षिणोत्तरभागस्थितयोः पक्षपुच्छयोर्मध्ये पूर्वस्यां दिशि समरूपेण पौर्णमास्याख्यामिष्टकामुपदध्यात् । यस्मादेवं तस्माल्लोकेऽपि नक्षत्राणि मोलकस्थापि दक्षिणे भागे पश्चिमाभिमुखानि, उत्तरभागे तु प्राङ्मुखानीत्येवमावर्तन्ते । अत्र विनियोगसंग्रहः—

कृत्ति नक्षत्रेष्टकाः स्युः तत्रार्धशतिरीरिवाः ।
ऋचे त्वा सर्वशेषः स्यात्पूर्णा यत्त इति द्वयम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे चतुर्थप्रपाठके दशमोऽनुवाकः ॥ १० ॥

---

१ क. घ. ङ. °पेऽमा° । २ क. घ. ङ. °पे पौ° ।

(अथ चतुर्थाष्टके चतुर्थप्रपाठके एकादशोऽनुवाकः)।

मधुश्च माधवश्च वासन्तिकावृतू शुक्रश्च शुचिश्च ग्रैष्मावृतू नभश्च नभस्यश्च वार्षिकावृतू इषश्चोर्जश्च शारदावृतू सहश्च सहस्यश्च हैमन्तिकावृतू तपश्च तपस्यश्च शैशिरावृतू अग्नेरन्तश्लेषोऽसि कल्पेतां द्यावापृथिवी कल्पन्तामाप ओषधीः कल्पन्तामग्नयः पृथङ् मम ज्यैष्ठ्याय सव्रताः (१) येऽग्नयः समनसोऽन्तरा द्यावापृथिवी शैशिरावृतू अभि कल्पमाना इन्द्रमिव देवा अभि सं विशन्तु संयच्च प्रचेताश्चाग्नेः सोमस्य सूर्यस्योग्रा च भीमा च पितॄणां यमस्येन्द्रस्य ध्रुवा च पृथिवी च देवस्य सवितुर्मरुतां वरुणस्य धर्त्री च धरित्री च मित्रावरुणयोर्मित्रस्य धातुः प्राची च प्रतीची च वसूनाꣳ रुद्राणाम् (२) आदित्यानां ते तेऽधिपतयस्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि सहस्रस्य प्रमा असि सहस्रस्य प्रतिमा असि सहस्रस्य विमा असि सहस्रस्योन्मा असि साहस्रोऽसि सहस्राय त्वेमा मे अग्न इष्टका धेनवः सन्त्वेका च शतं च सहस्रं चायुतं च (३) नियुतं च प्रयुतं चार्बुदं च न्यर्बुदं च समुद्रश्च मध्यं चान्तश्च परार्धश्चेमा मे अग्न इष्टका धेनवः सन्तु षष्टिः

(ऋतव्याख्येष्टकाभिधानम्)

सहस्रमयुतमक्षीयमाणा ऋतस्थाः स्थर्तावृधो
घृतश्चुतो मधुश्चुत ऊर्जस्वतीः स्वधाविनीस्ता
मे अग्न इष्टका धेनवः सन्तु विराजो नाम
कामदुघा अमुत्रामुष्मिँल्लोके (४)॥

(सप्तता रुद्राणामयुतं च पञ्चचत्वारिंशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
चतुर्थप्रपाठक एकादशोऽनुवाकः॥ ११॥

(अथ चतुर्थकाण्डे चतुर्थप्रपाठक एकादशोऽनुवाकः)।

दशमेऽनुवाके नक्षत्रेष्टका उक्ताः। अथैकादश ऋतव्याख्या इष्टका उच्यन्ते। कल्पः—"मधुश्च माधवश्चेति द्वे ऋतव्ये समानतया द्वे देवते" इति। पाठस्तु—

मधुश्च माधवश्चेति। मधुश्चैत्रो मासः। माधवो वैशाखो मासः। तावुभौ वसन्तसंबन्धिनावृत्ववयवौ। यद्यप्येतौ द्वौ मन्त्रौ तथाऽपि सहपाठित्वात्तया देवतयेति शेषं सकृदेवोच्चार्य द्वे इष्टके तथाचितावुपदध्यात्। कल्पः—"शुक्रश्च शुचिश्चेति द्वे ऋतव्ये समानतया द्वे देवते" इति। पाठस्तु—

शुक्रश्च शुचिश्चेति। शुक्रो ज्येष्ठः। शुचिरषाढः। तावुभौ ग्रीष्मसंबन्धिनावृत्ववयवौ। एतेन मन्त्रेण द्वितीयस्यां चितौ द्वे उपदध्यात्। कल्पः—नभश्च नभस्यश्चेति चतस्र ऋतव्या द्वे द्वे समानतया देवते" इति। पाठस्तु—

नभश्च नभस्यश्चेति। नभः श्रावणः। नभस्यो भाद्रपदः। तावुभौ वर्षाणां संबन्धिनावृत्ववयवौ। इष आश्वयुजः। ऊर्जः कार्तिकः। तावुभौ शरत्संबन्धिनावृत्ववयवौ। एतन्मन्त्रसाध्याश्चतस्र इष्टका मध्यमचितावुपदध्यात्। कल्पः—"सहश्च सहस्यश्चेति द्वे ऋतव्ये समानतया [द्वे] देवते" इति। पाठस्तु—

सहश्च सहस्यश्चेति। सहो मार्गशीर्षः। सहस्यः पौषः। तावुभौ हेमन्तसंबन्धिनावृत्ववयवौ। एतन्मन्त्रसाध्ये द्वे इष्टके चतुर्थ्यां चितावुपदध्यात्। कल्पः—"तपश्च तपस्यश्चेति द्वे ऋतव्ये समानतया द्वे देवते" इति। पाठस्तु—

---

१ क. ख. च. °या दे°। २ क. ख. चे. °या दे°।

तपश्च तपस्यश्चेति । तपो माघः । तपस्यः फाल्गुनः । एतावुभौ शिशिरसंबन्धिनावृतुत्ववयवौ । एतन्मन्त्रसाध्ये हे इष्टके पक्षाभ्यां चितावुपदध्यात् ।

अथ सर्वेष्वप्यनुषङ्गतयं मन्त्रशेषमाह—

अग्नेरन्त इति । हे ऋतुविशेष त्वं चीयमानस्याग्नेरन्तःश्लेषोऽसि । यथा कुड्यस्यान्तर्दार्ढ्यार्थं काष्ठपाषाणादयः क्षिप्यन्ते तद्वन्ममाग्निं चिन्वतो यजमानस्य श्रैष्ठ्यायोत्कर्षार्थमिमे द्यावापृथिव्यौ कल्पेतां स्वोचितमुपकारं संपादयताम् । समानं व्रतं कर्म येषां ते समव्रता एकस्मिन्कर्मण्यवस्थिता आहवनीयाद्यग्नयोऽपि पृथक्कल्पन्तां स्वस्वोचितव्यापारं संपादयन्तु । किंच द्यावापृथिवी अन्तरा द्यावापृथिव्योर्मध्ये वर्तमानाः समनस एकमनस्का येऽग्नयस्ते सर्वेऽपि शिशिरसंबन्धिनावृत्ववयवावभिकल्पमानाः सर्वतः संपादयन्त एतत्कर्माभिसंविशन्त । इन्द्रमिव देवा यथाऽन्ये सर्वे देवा इन्द्रमभितः सेवन्ते तद्वत् । हे इष्टक द्वंद्वमृतुस्वरूपां त्वामुदधामीति तात्पर्यार्थः । यदा वसन्ताद्यृतुमन्त्र*शेषत्वेनायं पठ्यते तदानीं शैशिरावृतू शैशिरावानौ वासन्तिकावृतू इत्याद्यर्थो व्याख्येयः ।

एतन्मन्त्रसाध्यमुपधानं विधत्ते—

" ऋतव्या उप दधात्यृतूनां क्लृप्त्यै द्वंद्वमुप दधाति तस्माद्द्वंद्वमृतवः "[सं० का० ५ प्र० ४ अ० २] इति । यस्माद्दिष्टकयोर्द्वंद्वमुपधीयते तस्मान्मासवोद्वयमृतुस्वरूपं भवति । मध्यमचितौ चतुष्टयोपधानं विधत्ते—

" अमृतैव वा एषा यन्मध्यमा चितिरन्तरिक्षमिव वा एषा द्वंद्वमन्यासु चितीषूप दधाति यतस्तो मध्ये धृत्यै " [सं० का० ५ प्र० ४ अ० २] इति । यैषा मध्यमा चितिः सेयं भूमिं न स्पृशति, नापि दिवं, तस्मादियममृतेवाऽऽधाररहितेव तिष्ठति । अत एवान्तरिक्षसमाना । तस्मादन्यासु चितीषु द्वंद्वमात्मोपधानेऽप्यस्यां चितौ धारणार्थं चतस्र उपदध्यात् ।

अथ सर्वर्तव्याः सामान्येन प्रशंसति—

" अन्तःश्लेषणं वा एताश्चितीनां यदृतव्या यद्ऋतव्या उपदधाति चितीनां विधृत्यै " [सं० का० ५ प्र० ४ अ० २] इति ।

यथा कुड्यादेर्दृढधारणाय पाषाणादयन्तःश्लेषणं तथा चितीनां दृढधारणाय ऋतव्या उपदध्यात् । एवास्वृतव्यासूपरि गोवालस्योपधानं विधत्ते—

---

*आर्षेयपुस्तकेषु " मन्त्रविशेषत्वेन " इति पाठः । स प्रामादिकः ।

---

१ घ. ङ. °न्मा° । च. ° न्त्रविशे° ।

(ऋतव्याख्येष्टकाभिधानम्)

" अवकामनूप दधात्येषा वा अग्नेर्योनिः सयोनिमेवाग्निं चिनुते " [सं० का० ५ प्र० ४ अ० २] इति । उदकजन्यां शैवालापरपर्यायामवकामुपधुपदध्यात् । आपो ह्यग्नेः स्थानं, ' स निलायत सोऽपः प्राविशत् ' इति श्रुत्यन्तरात् । अवका च जलस्य कार्यत्वाज्जलवदग्नेर्योनिः । अतस्तदुपधानेन सयोनिमेवाग्निं चितवान्भवति ।

प्रकारान्तरेणावकासाहिता ऋतव्यास्तद्वेदनं च प्रशंसति—

" उवाच ह विश्वामित्रोऽददित्स ब्रह्मणाऽन्नं यस्यैता उपधीयान्तै य उ चैना एवं वेदादिति " [सं० का० ५ प्र० ४ अ० २] इति ।

यस्य यजमानस्यावकायुक्ता ऋतव्या उपधीयन्ते, योऽप्येता जानाति स उपधाता ज्ञाता च ब्रह्मणा मुख्यया ब्राह्मणवृत्त्याऽन्नमददित्सर्थाऽप्यन्नं भक्षयत्येवेति विश्वामित्रः स ह्यमुवाच । तत्माद्वेताः स्तुत्या इत्यर्थः ।

कल्पः—" अथ यो न प्रतितिष्ठेत्स ऋतुमारभमाण एकचित्तीकमेव चिन्वीत संयच्च प्रचेताश्चेति पञ्च नानामन्त्रा उत्तरवेद्यामुपदध्यात् " इति ।

तत्र प्रथमेष्टकामन्त्रमाह—

संयच्च प्रचेता इति । अग्निसोमसूर्याणां संयत्संयमनकारणं यदस्ति, प्रचेताः प्रकाशज्ञानहेतुश्च योऽस्ति, हे इष्टके तदुभयरूपा त्वमसि । अथ द्वितीयेष्टकामन्त्रमाह—

उग्रा च भीमेति । पित्रादीनां येयमुग्रा ताडनादिशक्तिर्या च भीमा भयंकरशक्तिस्तदुभयरूपा त्वमसि । अथ तृतीयेष्टकामन्त्रमाह—

ध्रुवा च पृथिवीति । सवित्रादीनां या ध्रुवा स्थिरा शक्तिर्या च पृथिवी विस्तीर्णा शक्तिस्तदुभयरूपा त्वमसि । अथ चतुर्थेष्टकामन्त्रमाह—

धर्त्री च धरित्रीति । मित्रावरुणादीनां या धारणशक्तिर्या च परप्रेरणारूपा धारयितृत्वशक्तिस्तदुभयरूपा त्वमसि । अथ पञ्चमेष्टकामन्त्रमाह—

प्राची च प्रतीचीति । वस्वादीनां प्राग्वर्तिनी या शक्तिर्या च प्रतीची-दि(त्यग्दि)ग्वर्तिनी तयोर्हि दिशोः सर्वे प्राणिन एतदाज्ञामनुसृत्यैव वर्तन्ते । हे इष्टके तथाविधशक्तिरूपा त्वमसि । अथ सर्वेष्वप्यनुषञ्जनीयं मन्त्रशेषमाह—

---

१ क. घ. ङ. °या उप° । २ क. घ. ङ. °त्यमा° ।

ते तेऽधिपतय इति । तेऽग्निसोमादयस्तत्तन्मन्त्रोक्ता देवा हे इष्टके ते तवाधिकं पालयितारः । तेऽस्मो नम इत्यादिकं तु पञ्चचोडामन्त्रवद्व्याख्येयम् ।

ता एता इष्टकाः षष्ठचितौ विधातुमादौ षष्ठीं चितिं विधत्ते—

" संवत्सरो वा एतं प्रतिष्ठायै नुदते योऽग्निं चित्वा न प्रतितिष्ठति पञ्च पूर्वाश्चितयो भवन्त्यथ षष्ठीं चितिं चिनुते षड्वा ऋतवः संवत्सर ऋतुष्वेव संवत्सरे प्रति तिष्ठति " [सं० का० ५ प्र० ४ अ० २] इति ।

यो यजमानः पूर्वोक्तप्रकारेण पञ्चचितीकमग्निं चित्वाऽप्युत्तरकर्त्वनुष्ठानाय द्रव्यादिसंपत्तिरूपां प्रतिष्ठां न प्राप्नोति, एतं यजमानं संवत्सराभिमानी देवः प्रतिष्ठाया अपनुदते । तथा सति याः पूर्वाः पञ्च चितय आसंस्ताभिः प्रतिष्ठाया अलाभात्तदपेक्षया येयं चितिः षष्ठी तां चिनुयात् । षट्संख्यया बुद्धिस्था ऋतवः । तद्द्वारा संवत्सरे प्रतितिष्ठति ।

षष्ठीं चितिं विधाय तत्र संयच्चेत्यादिमन्त्रसाध्यमुपधानं विधत्ते—

" एता वा अधिपत्नीर्नामेष्टका यन्मैता उपधीयन्तेऽधिपतिरेव समानानां भवति " [सं० का० ५ प्र० ४ अ० २] इति । अधिपतिशब्दयुक्तैर्मन्त्रैरुधेया इष्टका अधिपत्न्यः । तदुपधानेन स्वसमानानां पुरुषाणां स्वयमधिपतिर्भवति । उपधानकाले ध्यानविशेषं विधत्ते—

" यं द्विष्यात्तमुपदधच्चायेदेताभ्य एवैनं देवताभ्य आ वृश्चति ताजगार्तिमार्छति " [सं० का० ५ प्र० ४ अ० २] इति ।

एतद्वाक्यं पञ्चचोडाब्राह्मणवद्व्याख्येयम् ।

कल्पः—" सहस्रस्य प्रमा असीति सहस्रेण हिरण्यशल्कैरू+र्ध्वस्तिष्ठन्प्रतीक्षमाणं मोक्षति " इति । पाठस्तु—

सहस्रस्य प्रमेति । हे इष्टके प्राच्यां दिशीष्टकासहस्रस्य प्रमा तुल्याऽसि । त्वं दक्षिणस्यां दिशि सहस्रस्य प्रतिमा तुल्याऽसि । तथा पश्चिमायां दिशि सहस्रस्य विमा तुल्याऽसि । तथोत्तरस्यां दिशि सहस्रस्योन्मा तुल्याऽसि । हे देवयाग्ने त्वमूर्ध्वायां दिशि सहस्रसंबन्ध्यसि । अतः सहस्राय सहस्रसंख्याकफलसिद्ध्यर्थं त्वां प्रोक्षामि । एतन्मन्त्रसाध्यं प्रोक्षणं विधत्ते—

+ ख. पुस्तके ' ऊर्ध्वं तिष्ठन्निति पाठो भवितुं युक्त इति टिप्पणिका ।

१ त. घ. ङ. च. देति । र्ं । २ त. घ ङ. विधा° ।

(ऋतव्यारव्येष्टकाभिधानम्)

"अङ्गिरसः सुवर्गं लोकं यन्तो या यज्ञस्य निष्क्रतिरासीत्तामृषिभ्यः प्रत्यौ-हन्तद्धिरण्यमभवद्यद्धिरण्यशल्कैः प्रोक्षति यज्ञस्य निष्क्रत्या अथो भेषजमेवास्मै करोत्यथो रूपेणैवैनꣳ समर्धयत्यथो हिरण्यज्योतिषैव सुवर्गं लोकमेति" [तै० का० ५ प्र० ४ अ० २] इति।

अङ्गिरसो महर्षयः कर्मानुष्ठायिनो यदा स्वर्गं गतास्तदानीं यज्ञस्य यन्मूल्यं स्वाधीनत्वकारणसाधनद्रव्यं तदृष्टिभ्य ऋषिभ्यः प्रददुः। तच्च द्रव्यं हिरण्य-मभवत्। ततो हिरण्यशल्कैर्हस्तोद्धृतैः सह प्रोक्षणं यन्मूल्यदानेन यज्ञनि-ष्क्रयार्थं संपद्यते। अपि च वैकल्यपरिहाररूपं भेषजमन्यर्थं संपादयति। अपि च हिरण्यसंबन्धादेनमग्निं रूपसमृद्धं करोति। अत एवान्यत्राऽऽम्नातम्—— "यथा ह वै योषा सुवर्णꣳ हिरण्यं पेशलं बिभ्रति रूपाण्यास्ते" इति। अपि चायं यजमानो हिरण्यरूपेणैव ज्योतिषा मार्गं दृष्ट्वा स्वर्गं प्राप्नोति।

तस्मिन्प्रोक्षणे सहस्रस्य प्रमेत्यादिमन्त्रं विनियुङ्क्ते——

"साहस्रवता प्रोक्षति साहस्रः प्रजापतिः प्रजापतेराप्त्यै" [तै० का० ५ प्र० ४ अ० २ इति। साहस्रोऽसीत्येवं साहस्रशब्दो यस्मिन्प्रोक्षणमन्त्रसं-घेऽस्ति सोऽयं साहस्रवान्। प्रजापतिश्च सहस्रसंख्याकजगदुत्पादकत्वात्साहस्रः। अतोऽयं मन्त्रः प्रजापतिप्राप्तये भवति।

कल्पः——"इमा मे अग्न इष्टका धेनवः सन्त्विति[1]ष्टका धेनूर्यजमानः कुरुते" इति। पाठस्तु——

इमा मे अग्न इति। हेऽग्न इमा उपहिता इष्टका मे मम धेनवो धेनुवत्प्री-तिहेतवः सन्तु। शतादयः परार्धान्ता दशोत्तराः संख्याविशेषाः। एकशत-सहस्रादिसंख्यासंख्येयाः सत्यो मां प्रीणयन्तु। यदा ममैकया प्रीतिस्तदा शतं भूत्वेत्येवं सर्वत्र द्रष्टव्यम्। उत्तरवाक्यसंबन्धार्थमिमा मे अग्न इत्यादेः पुनर्व-चनम्। हे इष्टकाः षष्ट्यादिसंख्यासंख्येयाः सत्योऽक्षीयमाणाः क्षयरहिता ऋतस्था यज्ञवर्तिन्यः स्थ, ऋतावृधो यज्ञवर्धयित्र्यो भवत, घृतश्चुतो घृतक्षरण-शीला मधुश्चुतो मधुररसक्षरणशीला ऊर्जस्वतीर्बलवत्यः स्वधाविनीरन्नवत्यश्च स्थ भवथ। ता मे अग्न इत्यादि वक्ष्यमाणवाक्यसंबन्धार्थम्। विराजो विविधं

[1] ख. च. भवत।

(ज्ञातव्याख्येष्टकाभिधानम्)

राजमानाः । कामदुघाः कामानां दोग्ध्र्यः । अमुत्र सामान्येन स्वर्गमात्रेऽमुष्मिँल्लोके विशेषत इन्द्रादिलोके धेनवः सन्त्विति यन्वयः । मन्त्रस्य तात्पर्यं दर्शयति—

" इमा मे अग्न इष्टका धेनवः सन्त्वित्याह धेनुरेवैनाः कुरुते ता एनं कामदुघा अमुत्रामुष्मिँल्लोक उप तिष्ठन्ते " [सं० का० ५ प्र० ४ अ० २] इति ।

अत्र विनियोगसंग्रहः—

मनुश्च द्वादशतय्या अग्नेरित्यनुषज्यते ।
संयच्चोग्ना ध्रुवा धर्त्री प्राची पञ्चेष्टका इमाः ॥
षष्ठ्यां चितौ सर्वशेषस्ते त इत्यादिको मतः ।
तद्वत्पञ्चभिरन्वर्द्धि मध्ये च तां चितिम् ॥
सहस्रस्वर्णशकलैः प्रोक्ष्ये(क्षे)त्तत इमामि(इ)ति ।
स्वामी धेनुः करोत्येतास्त्रयोविंशतिमन्त्रकाः ॥

अत्र मीमांसा ।

चतुर्थाध्यायस्य चतुर्थपादे चिन्तितम्—

नित्या षष्ठी चितिर्नो वा पञ्चापूर्वं(पेक्ष)त्वतोऽग्निमः ।
अ॰वृ+त्तावप्रतिष्ठां निमित्तीकृत्य नोऽग्निमः ॥

अग्नौ श्रूयते " योऽग्निं चित्वा न प्रतितिष्ठति पञ्च पूर्वाश्चितयो भवन्त्यथ षष्ठीं चितिं चिनुते " इति । लाङ्गलेन कृष्टे[1] व्याममात्रे भूप्रदेशे नानाविधाभिरिष्टकाभिः पक्ष्याकारेण स्थण्डिलं निष्पाद्यते, सेयं चितिः । तादृश्यः पञ्च चितयः पूर्वाः क्रियन्ते । अथ षष्ठी चितिः । तत्र षण्णां पूरणी षष्ठीति व्युत्पत्तौ पूर्वाः पञ्च चितयोऽपेक्ष्यन्ते । अन्यथा षट्संख्यापूरकत्वासंभवात् । तस्मादेकप्रयोगनियमादितरा चितिवन्नित्येति चेन्नैवम् । अग्निं चित्वेति पूर्वाभिरेव पञ्चाभिश्चितिभिर्नित्यस्याग्निचयनस्य समाप्तौ सत्यां पञ्चाद्यो न प्रतितिष्ठति असौ षष्ठीं चितिं चिनुत इति कर्तृसमानाधिकृतेन यच्छब्देनाप्रतिष्ठां निमित्तीकृत्य विधानात्षष्ठी नैमित्तिकी । ततः पञ्चचितीको नित्योऽग्निर्नैमित्तिकस्त्वेकचितीक इति न प्रयोगैक्यं, पूरणप्रत्ययस्तु अभिधानापेक्षयोपपद्यते । पूर्वाः पञ्च चितयोऽभिहिता अभिधास्यमानां षष्ठीं चितिं चिनुत इति वचनव्यक्तिः ॥

+न्यायमालाविस्तरे तु 'अपवृक्तावप्रतिष्ठानिमित्तीकृतित्वोऽन्तिमः' इति पाठः ।

---

१ क. °ष्टे सप्तपुरुषमा' । २ घ. ङ. °ति प्र° ।

(याज्यानुवाक्याभिधानम्)

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे चतुर्थप्रपाठक
एकादशोऽनुवाकः ॥ ११ ॥

(अथ चतुर्थाष्टके चतुर्थप्रपाठके द्वादशोऽनुवाकः) ।

समिद्दिशामाशया नः सुवर्विन्मधोरतो माधवः पात्वस्मान् । अग्निर्देवो दुष्टरीतुरदाभ्य इदं क्षत्रꣳ रक्षतु पात्वस्मान् । रथंतरꣳ सामभिः पात्वस्मान्गायत्री छन्दसां विश्वरूपा । त्रिवृन्नो विष्ठया स्तोमो अह्नाꣳ सुमुद्रो वात इदमोजः पिपर्तु । उग्रा दिशामभिभूतिर्वयोधाः शुचिः शुक्रे अहन्योजसीना । इन्द्राधिपतिः पिपृतादतो नो महि (१) क्षत्रं विश्वतो धारयेदम् । बृहत्साम क्षत्रभृद्वृद्धवृष्णियं त्रिष्टुभौजः शुभितमुग्रवीरम् । इन्द्र स्तोमेन पञ्चदशेन मध्यमिदं वातेन सगरेण रक्ष । प्राचीं दिशाꣳ सहयशा यशस्वती विश्वे देवाः प्रावृषाऽह्नाꣳ सुवर्वती । इदं क्षत्रं दुष्टरमस्त्वोजोऽनाधृष्टꣳ सहस्रियꣳ सहस्वत् । वैरूपे साम-न्निह तच्छकेम जगत्यैनं विक्ष्वा वेशयामः । विश्वे देवाः सप्तदशेन (२) वर्च इदं क्षत्रꣳ सलिलवातमुग्रम् । ध्रुवी दिशां क्षत्रमिदं दाधारोपस्थाऽऽशानां मित्रवदस्त्वोजः । मित्रावरु-

(याज्यानुवाक्याभिधानम्)

रुणा शरदाऽह्नां चिकित्नू अस्मै राष्ट्राय महि शर्म यच्छतम् । वैराजे सामन्नधि मे मनीषाऽनुष्टुभा संभृतं वीर्यꣳ सहः । इदं क्षत्रं मित्रवदार्द्रदानू मित्रावरुणा रक्षतमाधिपत्यैः । सम्राडिदिशाꣳ सहसाम्नी सहस्वत्यृतुर्हेमन्तो विष्टया नः पिपर्तु । अवस्युवाताः (३) बृहतीर्नु शक्करीरिमं यज्ञमवन्तु नो घृताचीः । सुवर्वती सुदुघा नः पयस्वती दिशां देव्यवतु नो घृताची । त्वं गोपाः पुरएतोत पश्चादबृहस्पते याम्यां युङ्ग्धि वाचम् । ऊर्ध्वा दिशाꣳ रन्तिराशौषधीनाꣳ संवत्सरेण सविता नो अह्नाम् । रेवत्सामार्तिच्छन्दा उ छन्दोऽजातशत्रुः स्योना नो अस्तु । स्तोमंत्रयास्त्रिꣳशे भुवनस्य पत्नि विवस्वद्धाते अभि नः (४) गृणाहि । घृतवती सवितराधिपत्यैः पयस्वती रान्तिराशा नो अस्तु । ध्रुवा दिशां विष्णुपत्यघोराऽस्येशाना सहसो या मनोता । बृहस्पतिर्मातरिश्वोत वायुः सँधुवाना वाता अभि नो गृणन्तु । विष्टम्भो दिवो धरुणः पृथिव्या अस्येशाना जगतो विष्णुपत्नी । विश्वव्यचा इषयन्ती सुभूतिः शिवा नो अस्त्वदितिरुपस्थे । वैश्वानरो न ऊत्या पृष्टो दिव्यनु नोऽद्यानुमतिरन्विदनुमते त्वं कया नश्चित्र आ भुवत्को अद्य युङ्क्ते (५) ॥

(याज्यानुवाक्याभिधानम्)

(महिं सप्तदशेनावस्युवाता अभि नोऽनु नश्चतुर्दश च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके चतुर्थप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

रश्मी राज्यस्यय पुरो हरीकेशोऽग्निर्मूर्धन्द्राग्निभ्यां बृहस्पतिर्भूयस्छदस्यग्निना विधाषाट् प्रजापतिः कृत्तिका मधुः समिद्दिशां द्वादश ॥ १२ ॥

रश्मिरसि प्रतिधेनुरासे स्तनयित्नुसनिरस्यादित्यानाꣳ सप्तत्रिꣳशत् ॥ ३७ ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके चतुर्थः प्रपाठकः ॥ ४ ॥

(अथ चतुर्थकाण्डे चतुर्थप्रपाठके द्वादशोऽनुवाकः)।

एकादशानुवाक ऋतव्याद्या इष्टका उक्ताः। तावता चितयः समाप्ताः। अथान्तिमे द्वादशे याज्यानुवाक्या उच्यन्ते।

अश्वमेधप्रकरणे कल्पः पठ्यते—" अग्नये गायत्रायेति दशहविषं सर्वपृष्ठं निर्वपति समिद्दिशामिति यथालिङ्गं याज्यानुवाक्याः " इति।

तत्राग्नये गायत्राय त्रिवृते राथंतराय वासन्तायाष्टाकपाल इत्यस्य पुरोनुवाक्यामाह—

समिद्दिशामिति। दिशां मध्ये या दिक्समित्समिन्धनहेतुः। तदेव कथमिति तदुच्यते—सुवर्वित्स्वर्गस्थमादित्यं विन्दते लभत इति सुवर्वित्। आदित्योदयस्थानत्वात्माच्या दिशः समिन्धनहेतुत्वम्। तादृशी दिग्नोऽस्मानाशया पातु। अस्माकं धनादिविषया या काचिदाशा विद्यते तस्याः पूरणेनास्मान्रक्षत्वित्यर्थः। मधुश्चैत्रमासः। माधवो वैशाखः। तावुभावपि पूर्वदिग्वर्तमिन्धनहेतू। तयोर्मासयोरादित्यस्यातितीक्ष्णप्रकाशत्वात्। तत्राप्यतोऽस्मान्मधोश्चैत्रमासादधिकप्रकाशो यो माधवो वैशाखमासः सोऽस्मान्संतापभयात्पातु। दुःखेन स्तरीताऽऽच्छादयिता दुष्टरीता यो वैरी पावरणवस्त्रेणेव दुःखेनाऽऽच्छादयति तस्यापि दुःख-

१ ख. च. °र्षा स°।

कारिणो वैरिणोऽस्माभ्यो दम्भितुं हिंसितुमशक्यो योऽग्निर्देवः सोऽयमिदं क्षत्रमस्मदीयमिदं बलमस्मांश्च रक्षतु । तत्रैव याज्यामाह—

रथंतरꣳ सामेति । यद्रथंतरं साम तदन्यैः सामभिः सहास्मान्पातु । छन्दसां मध्ये गायत्री विश्वरूपा यवमध्यपिपीलिकामध्यादिभेदैर्बहुरूपा, सा नोऽस्मान्रक्षतु । त्रिवृदाख्यो यः स्तोमोऽङ्गामेकाहादीनां संबन्धिन्या विष्टया विविधया स्थित्या युक्तः, अहःसु विविधं प्रयुज्यत इत्यर्थः । तादृशोऽस्मान्पातु । समुद्राख्यो यो वातोऽस्ति " समुद्राय त्वा वाताय स्वाहा " " समुद्रोऽसि नभस्वान् " इत्यादावाम्नातस्तादृशो वायुरिदमोजोऽस्मदीयं बलं पिपर्तु पालयतु पूरयतु वा ।

अथेन्द्राय त्रैष्टुभाय पञ्चदशाय बार्हताय त्रैष्मायैकादशकपाल इत्यस्य पुरोनुवाक्यामाह—

उग्रा दिशामिति । दिशां मध्ये येयमुग्रा दक्षिणा दिक्, उग्रत्वे हेतु—अभिभूतिः, पशूनामभिभवहेतुत्वादुग्रत्वं, सा वयोधा वय आयुष्यं तस्मिन्सतीते सति मृतान्पुरुषान्यमलोके दधाति स्थापयतीति वयोधाः । वयसोऽन्ते दधातीति मध्यमपदलोपो द्रष्टव्यः । शुचिराषाढमासः शुक्रो ज्येष्ठस्तयोः संबन्धिनि दिवसे यदौष्ण्यमस्ति ततोऽपि शुचिरोजसीनाऽतिशयेनौष्ण्यरूपौजोयुक्तः । हे इन्द्र परमैश्वर्ययुक्त त्वमधिपतिस्तस्या उग्राया दिशस्तयोरत्युष्णयोश्च स्वामी । तादृशस्त्वमत उभयस्मान्नोऽस्मान्निपुतात्पालय । किंच विश्वतो महि सर्वस्मान्महदिदं क्षत्रं बलं धारय संपादय । तत्रैव याज्यामाह—

बृहत्सामेति । बृहदाख्यं यत्साम तत्त्रिष्टुभा छन्दसा सहेदं पिपर्त्वित्यनुवर्तते । अस्मान्पालयत्वित्यर्थः । कीदृशं साम, क्षत्रभृद्बलस्य धारयितृ, वृद्धवृष्णियमुत्थितपुंस्कम्, ओजो बलप्रदं, शुभितं शोभमानम्, उग्रवीरं तीव्रपुत्रप्रदम् । हे इन्द्र पञ्चदशाख्येन स्तोमेन सगराख्येन वातेन सहितः सन्निदं मध्यं रक्षातीतानागतयोर्मध्ये स्थितमिदमस्मदीयं शरीरं पालय ।

अथ विश्वेभ्यो देवेभ्यो जागतेभ्यः सप्तदशेभ्यो वैरूपेभ्यो वार्षिकेभ्यो द्वादशकपाल इत्यस्य पुरोनुवाक्यामाह—

प्राची दिशामिति । अत्र प्रशब्दः प्रतिशब्दार्थे वर्तते । तथा सति दिशां

---

१ क. °ह नः पि°।

(याज्यानुवाक्याभिधानम्)

मध्ये वा प्राची पश्चिमा दिगित्यर्थः। सा च सहयशा अस्मासु संपाद्यमानेन यशसा सहिता स्वयमपि यशस्वती। सा च सुवर्वती स्वर्गनिवासिनी सूर्येणास्तमयकालभाविना युक्ता। तथाविधा दिगस्मान्पातिति शेषः। तथा विश्वे देवाः मावृषा वर्षर्तुना तदीयानामह्नां समूहेन सहिताऽस्मान्पालयन्तिति शेषः। इदं क्षत्रमस्मत्परिपालकं राजशरीरं केनाप्यन्येन वैरिणा तरितुं लङ्घयितुमशक्यमस्तु। ओजो मदीयं बलमनाधृष्टं केनाप्यतिरस्कृतमस्तु। तथा सहोऽस्मदीयं सहस्तंस्यायोग्यं सहस्वत्सबलं धामास्तु। तत्रैव याज्यामाह—

वैरूपे सामन्निति। वैरूपाख्यं यत्सामास्ति तस्मिन्नाश्रिता वयमिह कर्मणि यत्फलमपेक्षितं तच्छक्ता संपादयितुं शक्ताः स्मः। तथा जगत्याख्यया छन्दोदेवतयाऽनुगृहीता वयमेनं यजमानं विक्षु प्रजास्वावेशयामः प्रजानां स्वामिनं कुर्म इत्यर्थः। हे विश्वे देवाः सप्तदशाख्येन स्तोमेन युष्माभिश्चानुगृहीतमिदं क्षत्रमस्मत्पालकं राजशरीरं वर्चस्तेजोयुक्तं सलिलाख्येन वायुविशेषेणानुगृहीतम्। स च वायुः "सलिलाय स्वा वातायं स्वाहा" इत्याम्नातः। उर्वं वैरितिरस्कारक्षममस्तु। अथ 'मित्रावरुणाभ्यामानुष्टुभाभ्यामेकविंशाभ्यां वैराजाभ्यां शारदाभ्यां पयस्या' इत्यस्य पुरोनुवाक्यामाह—

धर्त्री दिशामिति। दिशां मध्ये धर्त्र्यस्माकं धारयित्रीयमुदीची दिगिदं क्षत्रमस्मत्पालकं क्षत्रियशरीरं दाधार पोषयामास। कीदृशी, आशानामुपेस्थाँ, अस्माकं धनादिविषयाणामाशानां सिद्ध्यर्थं सेव्या। य(त)स्या दिशः प्रसादादस्मदीयमोजो बलं मित्रवदस्तु बहुभिर्मित्रैरुपेतमस्तु। हे मित्रावरुणा शरदा शरत्सामकेनर्तुना तदीयानामह्नां चिकितनू ज्ञातारौ युवामस्मा इदानीं वर्तमानाय राष्ट्राय महि शर्म यच्छतं महत्सुखं संपादयतम्। तत्रैव याज्यामाह—

वैराजे सामन्निति। वैराजाख्यं यत्सामास्ति तस्मिन्मे मदीया मनीषा बुद्धिराश्रितोऽस्त्विति शेषः। तथा वीर्यमस्मदीयं शरीरव्यवहारसामर्थ्यं सहो वैरितिरस्कारकं बलं चानुष्टुभा छन्दोदेवतया संभृतं संपादितमस्तु। मित्रावरुणा हे मित्रावरुणाविदं क्षत्रं राजशरीरं मित्रवन्मित्रैर्बहुभिरुपेतमार्द्रदानु आर्द्रस्य जलसंपूर्णस्य क्षेत्रादेर्दोतु यथा भवति तथा युवामाधिपत्ये रक्षतमाधिपत्यादिदिश्वा

१ ख. घ. ङ च. सलि°। २ ख. घ. ङ. च. °य स्वेति, उ°। ३ ख. च. °पस्थेयाऽस्मा°। ४ क. घ. ङ. °स्था, याऽस्मा°। ५ क. ख. घ. ङ. च. °ता तथाऽस्वि°। ६ ख. घ. ङ. च. °र्दोतु।

(दि दत्त्वा) पालयतम् । अथ बृहस्पतये पाङ्क्ताय त्रिणवाय शाक्कराय हैमन्तिकाय चरुः, इत्यस्य पुरोनुवाक्यामाह—

सम्राड्दिशामिति । दिशां मध्ये सम्यग्राजत इति सम्राड्ध्वा दिक्, सा च सहसाम्नी सामभिः साहिता सहस्वती बलवती नोऽस्मान्पिपर्तु पालयतु । तथा हेमन्ताख्य ऋतुर्विष्टया विशिष्टया स्थित्या नः पिपर्तु । अवस्युवाता अवस्यवो रक्षायितारो वाता वायवो यासां बृहतीनामृचां ता अवस्युवाता बृहतीर्बृहत्याख्यच्छन्दोयुक्ताः शाक्करीर्नु शाक्करसाम्नो योनिभूता ऋचोऽपि घृताचीर्घृताहुतियुक्ताः सत्यो नोऽस्मदीयमिमं यज्ञमवन्तु । तत्रैव याज्यामाह—

सुवर्वतीति । दिशां स्वामिभूता देवी सुवर्वती स्वर्गयुक्ता स्वर्गप्रदेत्यर्थः । नोऽस्मान्प्रति सुदुघा कामधेनुवत्सुष्ठु दोहनशीला । अत एव पयस्वती क्षीरादिरसद्रव्यपूर्णा विशेषतो घृताची घृतं प्राप्नुवती । हे बृहस्पते त्वं पुरएता पुरतो गन्ता सन्गोपा रक्षक उतापि च पश्चात्पृष्ठतोऽपि रक्षकस्तादृशस्त्वं याम्यां यममयीं वाचं युङ्ग्धि योजय, एवमेवं वर्तस्वेत्यादिशेत्यर्थः ।

अथ ' सवित्र अतिच्छन्दसाय त्रयस्त्रिंशाय रैवताय शैशिराय द्वादशकपालः ' इत्यस्य पुरोनुवाक्यामाह—

ऊर्ध्वा दिशामिति । दिशां मध्ये येयमूर्ध्वा दिक्सा रन्तिः प्रीतिहेतुः, सा ओषधीनां वृष्टिद्वारा संपादिकेति शेषः । तादृशी नोऽस्मान्प्रति स्योना सुखदास्तु । तथाऽह्नां समूहरूपेण संवत्सरेण सह सविता सुप्रसवदोऽस्तु । तथा रेवद्रैवताख्यं यत्सामातिच्छन्दा उ अतिच्छन्दोयुक्तर्गपि तथा तस्यामृचि वर्तमानं छन्दश्चेत्येष समूहोऽजातशत्रुरस्तु, अस्मदीयः शत्रुर्यथा नोत्पद्यते तथा करोत्वित्यर्थः । तत्रैव याज्यामाह—

स्तोमत्रयस्त्रिंश इति । हे स्तोमत्रयस्त्रिंश त्रयस्त्रिंशाख्यः स्तोमो यस्या ऊर्ध्वाया दिशः सा स्तोमत्रयस्त्रिंशा, तत्संबोधनमिदम् । भुवनस्य [1]तेन भूतजातस्य पत्नी पालयित्री [तत्संबोधनमिदम्] । हे विवस्वद्वाते [2]विवस्वन्नामको वातो वायुर्यस्याः सा विवस्वद्वाता तत्संबोधनमिदम् । विवस्वं [2]त्वा वाताय स्वाहेत्यन्यत्राऽऽम्नातम् । तथाविधा नोऽभिगृणाह्यस्मान्प्रति हिंस्यादिश । हे सवितरियमाशा दिङ्नोऽस्मान्प्रति घृतवती बहुलघृतसंपादिकाऽऽसीत्यैरधिकपालनशक्तिभिर्योजयित्री पयस्वती क्षीरसंपादिका रन्तिः प्रीतिहेतुरस्तु ।

---

१ स. °मेव व° । च. °मेवमेव व° । २ स. घ. ङ. च. °तस्त्वाऽऽदि° ।

(याज्यानुवाक्याभिधानम्)

अथादित्ये विष्णुपत्न्ये चरुरित्यस्य पुरोनुवाक्यामाह—

ध्रुवा दिशामिति । दिशां मध्ये या ध्रुवा स्थिरा सूर्यगतिसापेक्षपाठ्या-दिविभागरहिता समानरूपा दिग्यश्च बृहस्पतिर्योऽपि मातरिश्वाख्यो मुख्यवायुर्ये चान्ये संध्रुवानाः सम्यक्तत्र तत्र कम्पवन्तो वातास्ते सर्वेऽपि नोऽभिगृणन्त्वस्मान्प्रति हितमुपादिशन्तु । कीदृशी ध्रुवा, विष्णुपत्नी विष्णुः पतिः पालको यस्याः सा विष्णुपत्नी, अघोरा शान्तरूपा, अस्य सहसः सर्वस्य बलस्येशाना नियामिका, मनोता मनस्यूता पूजितेत्यर्थः । तत्रैव याज्यामाह—

विष्टम्भो दिव इति । अदितिरखण्डनीया दिक्सामान्यरूपा देवतोपस्थे स्वोत्सङ्गे स्थितान्नोऽस्मान्प्रति शिवाऽस्तु शान्ता सुखकरी भवतु । कीदृशीयदितिः, दिवो विष्टम्भो द्युलोकस्याऽऽधारभूता पृथिव्या धरुणो भूमेर्धारयित्री, अस्य जगत ईशाना सर्वस्य जगतः स्वामिभूता, विष्णुः पतिः पालको यस्याः सा विष्णुपत्नी, विश्वव्यचा जगद्व्यापिनी, इषयन्तीषमन्नं कुर्वती, सुभूतिः शोभनैश्वर्योपेता । अथाग्नये वैश्वानराय द्वादशकपाल इत्यस्य याज्यानुवाक्ययोः प्रतीके दर्शयति—

वैश्वानरो न इति । वैश्वानरो न ऊत्येति पुरोनुवाक्या । घृष्टो दिवीति याज्या । एतच्चोभयं प्रथमकाण्डस्य पञ्चमप्रपाठकस्यान्त्यानुवाके व्याख्यातम् । अथानुमत्यै चरुरित्यस्य याज्यानुवाक्ययोः प्रतीके दर्शयति—

अनु नोऽद्येति । अनु नोऽद्यानुमतिरिति पुरोनुवाक्या । अन्विदनुमते त्वमिति याज्या, एतच्चोभयमिदं वामास्ये हविरित्यनुवाके व्याख्यातम् ।

अथ काय एककपाल इत्यस्य याज्यानुवाक्ययोः प्रतीके दर्शयति—

कया नश्चित्र इति । कया नश्चित्र आ भुवदिति पुरोनुवाक्या । को अद्य युङ्क्त इति याज्या । एतच्चोभयमिन्द्राग्नी रोचनेत्यस्मिन्ननुवाके व्याख्यातम् ।

अत्र विनियोगसंग्रहः—

अथाश्वमेधे या त्विष्टिर्हविर्भिर्दर्शमिर्युता ।
विधीयतेऽग्नये गायेत्यनुवाकेन तत्र च ॥
द्वे द्वे याज्यानुवाक्ये स्तामित्युचो विंशतीस्त्विह ॥

---

१ क. घ. ङ. °ता नोऽस्मा° । २ क. घ. ङ. °न्नं सर्वस्य कु° ।

(चित्याग्निहोमोक्तिः)

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे चतुर्थप्रपाठके
द्वादशोऽनुवाकः ॥ १२ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य
श्रीवीरबुक्कमहाराजस्याऽऽज्ञापरिपालकेन माधवाचार्येण विर-
चिते वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये
चतुर्थकाण्डे चतुर्थः प्रपाठकः ॥ ४ ॥

(अथ चतुर्थाष्टके पञ्चमः प्रपाठकः) ।

(तत्र प्रथमोऽनुवाकः) ।

हरिः ॐ ।

नमस्ते रुद्र मन्यव उतो त इषवे नमः ।
नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः ।
या त इषुः शिवतमा शिवं बभूव ते धनुः ।
शिवा शरव्या या तव तया नो रुद्र मृडय ।
या ते रुद्र शिवा तनूरघोराऽपापकाशिनी ।
तया नस्तनुवा शंतमया गिरिशंताभि चा-
कशीहि । यामिषुं गिरिशंत हस्ते (१)
बिभर्ष्यस्तवे । शिवां गिरित्र तां कुरु मा
हिꣳसीः पुरुषं जगत् । शिवेन वचसा त्वा
गिरिशाच्छा वदामसि । यथा नः सर्वमिज्जग-
दयक्ष्मꣳ सुमना असत् । अध्यवोचदधिवक्ता

(नित्याग्निहोमोक्तिः)

प्रथमो दैव्यो भिषक्। अहीꣳश्च सर्वाञ्जम्भ-
यन्त्सर्वाश्च यातुधान्यः। असौ यस्ताम्रो अरुण
उत बभ्रुः सुमङ्गलः। ये चेमाꣳ रुद्रा अभितो
दिक्षुः (२) श्रिताः सहस्रशोऽवैषाꣳ हेड
ईमहे। असौ योऽवसर्पति नीलग्रीवो विलो-
हितः। उतैनं गोपा अदृश्रन्नदृश्रन्नुदहार्यः।
उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः।
नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे।
अथो ये अस्य सत्वानोऽहं तेभ्योऽकरं नमः।
प्र मुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम्। याश्च
ते हस्त इषवः (३) परा ता भगवो वप।
अवतत्य धनुस्त्वꣳ सहस्राक्ष शतेषुधे। निशीर्य
शल्यानां मुखा शिवो नः सुमना भव।
विज्यं धनुः कपर्दिनो विशल्यो बाणवाꣳ उत।
अनेशन्नस्येषव आभुरस्य निषङ्गथिः। या ते
हेतिर्मीढुष्टम हस्ते बभूव ते धनुः। तयाऽस्मा-
न्विश्वतस्त्वमयक्ष्मया परि भुज। नमस्ते
अस्त्वायुधायानाततायै धृष्णवे। उभाभ्यामुत
ते नमो बाहुभ्यां तव धन्वने। परि ते धन्वनो
हेतिरस्मान्वृणक्तु विश्वतः। अथो य इषुधि-
स्तवारे अस्मन्नि धेहि तम् (४)॥

(हस्ते दिक्षिवषव उभाभ्यां द्वाविꣳशतिश्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
पञ्चमप्रपाठके प्रथमोऽनुवाकः॥ १॥

(चित्यग्निहोमोक्तिः)

(अथ चतुर्थकाण्डे पञ्चमप्रपाठके प्रथमोऽनुवाकः) ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

इष्टकाचितयः सर्वाश्चतुर्थे हि समापिताः ।
रुद्राध्याये पञ्चमे तु चित्यग्नौ होम उच्यते ॥
कर्मप्रकरणे पाठात्कर्माङ्गत्वमपीष्यते ।
ज्ञानहेतुत्वमप्यस्य सर्वोपनिषदीरितम् ॥
किं जप्येनामृतत्वं नो ब्रूहीत्युक्तो मुनिर्जगौ ।
शतरुद्रीयकेणेति जाबाला आमनन्ति हि ॥
स्मृत्यागमपुराणेषु रुद्राध्यायप्रशंसनम् ।
यद्यस्ति तद्विस्तरेण रुद्रकल्पेऽभिधास्यते ॥
इह कर्माङ्गता यादृग्वर्णिता ब्राह्मणेन ताम् ।
बोद्धुं शब्दार्थमात्रस्य विवृतिः क्रियते स्फुटा ॥

कल्पः—" शतरुद्रीयं जुहोति जतिलयवाग्वा वा गवीधुकयवाग्वा वा जतिलगवीधुकसक्तुभिर्वा कुशयवसर्षिषाऽजाक्षीरेण मृगीक्षीरेण वाऽर्कपर्णेनोदङ्तिष्ठन्नुत्तरस्य पक्षस्य उत्तरापरस्यां स्रुक्त्यां विकर्ण्यां स्वयमातृण्णायामनुपरिचारं(कामं) वा नमस्ते रुद्र मन्यव इत्येताननुवाकांस्त्रेधा विभज्यापि वा प्रथमादुपक्रम्य नमस्तक्षभ्य इति जानुदघ्ने धारयमाणो रथकारेभ्य इत्युपक्रम्य नमः स्वायुधायेति नाभिदघ्ने शेषेण प्रागवसानेभ्य औत्स्यदघ्ने हुत्वा सहस्राणि सहस्रश इति दशावदानानि हुत्वाऽन्वारोहाञ्जुहोति नमो रुद्रेभ्यो ये पृथिव्यामिति जानुदघ्ने धारयमाणो नमो रुद्रेभ्यो येऽन्तरिक्ष इति नाभिदघ्ने नमो रुद्रेभ्यो ये दिवीत्यास्यदघ्ने हुत्वैतानेव यजमानं वाचयित्वैतानेव विपरीतान्प्रत्यवरोहान्हुत्वा संचरे पशूनामर्कपर्णमुदस्यति यं द्विष्यात्तस्य संचर इति " इति ।

तत्र प्रथमानुवाके प्रथमामृचमाह—

नमस्ते रुद्रेति । हे रुद्र ते त्वदीयो यो मन्युः कोपस्तस्मै नमोऽस्तु । स मन्युरस्मद्वैरिष्वेव प्रसरतु नत्वस्मासु । उतापि च ते तवेषवे नमः । त्वदीयाय

---

१ ख. °स्य तथोप° । २ ख. च. ° त्युक्ते मु° । ३ ख. च. तत् । ४ ख. च. वा जुहुयाज्जर्ति° । घ. ङ. वा. स° । ५ ख.च. °र्तिलैर्वी° । ६ क. पक्षस । ७ घ.ङ.आरभ्याऽऽस्य° ।

(चित्यग्निहोमोक्तिः)

बाणाय नमोऽस्तु। तथा ते धन्वने त्वदीयाय धनुषे नमोऽस्तु। उताषि च ते बाहुभ्यां त्वदीयाभ्यां धनुर्बाणोपेताभ्यां हस्ताभ्यां नमोऽस्तु। एतत्सर्वं वैरिष्वेव प्रवर्ततां न तु मयीत्यभिप्रायः। द्वितीयामृचमाह—

या त इषुरिति। हे रुद्र ते त्वदीया येयमिषुः शिवतमा शान्ततमा बभूव, तथा ते त्वदीयं यद्धनुः शिवं शान्तं बभूव, तथा या च तव शरव्या तवेषुधिस्तया शान्तयेष्वा तेन च शान्तेन धनुषा तया च शान्तया शरव्यया नोऽस्मान्मृडय सुखयेति। भक्तेषु प्रवृत्त्यभावात्तेषां शान्तत्वम्। अथ तृतीयामृचमाह—

या ते रुद्रेति। द्वे हि रुद्रस्य तनू। तथा चोपरिष्टादाम्नायते—रुद्रो वा एष यदग्निस्तस्यैते तनुवौ घोराऽन्या शिवाऽन्या" इति। हिंसिका घोराऽनुग्राहिका शिवा। हे रुद्र ते तव या तनूः शिवाऽस्मास्वनुग्रहकारिण्यत एवाघोरा हिंसिका न भवति। अघोरत्वमेव स्पष्टी क्रियते—अपापकाशिनी पापं हिंसारूपमनिष्टं काशयतीति पापकाशिनी, तादृशी न भवतीत्यपापकाशिनी। गिरौ कैलासे स्थित्वा नित्यं प्राणिभ्यो यः शं सुखं तनोति स गिरिशंतस्तस्य संबोधनं हे गिरिशंत। तथाविध हे रुद्र शंतमयाऽतिशयेन सुखकारिण्या तया तनुवाऽभिचाकशीहि मामभिलक्ष्य प्रकाशं कुरु। एतादृशीं त्वदीयां तनुं प्रकाश्य मां सुखिनं कुर्वित्यर्थः। अथ चतुर्थीमृचमाह—

यामिषुमिति। हे गिरिशंत यामिषुं बाणमस्त्वे वैरिषु प्रक्षेप्तुं हस्ते बिभर्षि। कैलासाख्यं गिरिं त्रायते पालयतीति गिरित्रस्तत्संबोधनं हे गिरित्र। तथाविध हे रुद्र तां हस्ते धृतामिषुं शिवामस्मासु शान्तां कुरु। पुरुषमस्मदीयं मनुष्यं जगन्मनुष्यव्यतिरिक्तमपि जङ्गमं गवादिकं मा हिंसीः। अथ पञ्चमीमाह—

शिवेन वचसेति। गिरौ कैलासे शेते तिष्ठतीति गिरिशः। हे गिरिश त्वामच्छ प्राप्तुं शिवेन मङ्गलेन स्तुतिरूपेण वचसा वदामसि वयं प्रार्थयामहे। यथा येन प्रकारेण नोऽस्मदीयं सर्वमिज्जगत्सर्वमपि मनुष्यपश्वादिकं जङ्गमजातमयक्ष्मं रोगरहितं सुमना अतस्तोमनस्योपेतं भवति तथा कुरु। अथ षष्ठीमाह—

अध्यवोचदिति। यो रुद्रोऽधिवक्ताऽधिकोऽयमित्येवं सर्वेषामग्रे मां प्रति वक्तुं क्षमस्तेनोक्ते सति मम सर्वाधिक्यं तदानीमेव सिध्यति। अतस्तादृशो रुद्रोऽध्यवोचन्मां सर्वाधिकं वदतु। कीदृशोऽधिवक्ता, प्रथमो देवानां मध्ये मुख्यो दैव्यः सर्वान्देवानर्हति स्वयं देवान्पालयितुं क्षम इत्यर्थः। भिषगेतस्य

---

१ स. क. °भावस्तेषां।

ध्यानमात्रेण सर्वरोगोपशमनादयं चिकित्सकः। किं कुर्वन्, अहींश्च सर्पान्सर्पव्याघ्रादीन्सर्वानपि सर्वांश्च यातुधान्यः सर्वा अपि राक्षसजातीर्जम्भयन्विनाशयन्।

अथ सप्तमीमाह—

असौ यस्ताम्र इति। यो रुद्रोऽसौ मण्डलस्थादित्यरूपः। स च तान्र उदयकालेऽत्यन्तरक्तोऽरुण उदयादूर्ध्वमीषद्रक्तः। उतापि च मध्यन्दिनतोऽप्यूर्ध्वं पिङ्गलः। एवमन्येऽपि वर्णास्तत्तत्कालगता ज्ञेयाः। सुमङ्गलो नानावर्णः सँस्तदा तदाऽन्धकारादिनिवर्तकत्वादत्यन्तं मङ्गलः। ये चान्ये रश्मिरूपा रुद्रा इमामभितोऽस्या भूमेः परितो दिक्षु श्रिताः प्राच्यादिदिक्ष्ववस्थिताः। ते च सहस्रशोऽनेकसहस्रसंख्याकाः। एषामादित्यतद्रश्मिरूपाणां सर्वेषां रुद्राणां हेडः क्रोधसदृशं तीक्ष्णत्वमवेमहे भक्तिनमस्कारादिना निवारयामः। अथाष्टमीमाह—

असौ योऽवेति। यो रुद्रो नीलग्रीवः कालकूटविषधारणेन नीलवर्णा ग्रीवा यस्यासौ नीलग्रीवः। स एव विलोहितो विशेषेण लोहितवर्णः तन्नसौ मण्डलवर्ती भूत्वाऽवसर्पत्युदयास्तमयौ संपादयितुं प्रवर्तते। तस्य च रुद्रस्य मण्डलवर्तिस्वरूपधारणे प्रयोजनमुच्यते—उतापि च गोपा वेदशास्त्रसंस्काररहिता गोपालका अप्येनं मण्डलवर्तिनमादित्यरूपिणं रुद्रमदृशन्पश्यन्ति। उदहार्य उदकानां हारिण्यो योषितोऽप्येनमदृशन्पश्यन्ति। उतापि चैनमादित्यरूपिणं रुद्रं विश्वा भूतानि गोमहिष्यादयः सर्वेऽपि प्राणिनः पश्यन्ति। सर्वेषां दर्शनार्थमेव हि रुद्रस्याऽऽदित्यमूर्तिधारणम्। कैलासादिवर्ती रुद्रस्य रूपं तु वेदशास्त्राभिज्ञैरेव दृश्यते नान्यैः। तादृशो रुद्रो दृष्टः सन्नोऽस्मान्मृडयाति सुखिनः करोत्वित्यर्थः। अथ नवमीमाह—

नमो अस्त्विति। यः पूर्वोक्तरीत्या नीलग्रीवः स एवेन्द्रमूर्तिधारणेन सहस्राक्षः। स पुनः पर्जन्यमूर्तिधारणेन मीढ्वान्सेचको वृष्टिकर्तेत्यर्थः। तादृशाय रुद्राय नमोऽस्तु। अथो अपि च ये केचिदस्य रुद्रस्य सत्त्वानो भृत्यरूपाः प्राणिनस्तेभ्यः सर्वेभ्योऽहं नमोऽकरं नमस्करोमि। अथ दशमीमाह—

प्र मुञ्चेति। हे भगवो भगवन्पूजावन्महदैश्वर्यसंपन्न रुद्र त्वं धन्वनस्त्वदीयस्य धनुष उभयोरार्त्नियोः कोट्योरवस्थितां ज्यां मौर्वीं प्रमुञ्चावरोपय। याश्च ते हस्त इषवो वर्तन्ते ता अपि परावप परित्यज। अथैकादशीमाह—

---

१ ब. क. °धन्वन् ।

(चित्याग्निहोमोक्तिः)

अवततेति । इन्द्ररूपेण सहस्रसंख्याकान्यक्षीणि यस्यासौ सहस्राक्षः । शतसंख्याका इषुधयो बाणस्थापनकोशा यस्यासौ शतेषुधिः । तादृश हे रुद्र धनुरवततत्यावरोपितज्याकं कृत्वा शल्यानां मुखा मुखानीषुगतलोहानामग्राणि निशीर्येषुधिषु न्यग्भावेन शीर्णानि कृत्वा नोऽस्मान्प्रति सुमना अनुग्रहयुक्तः सन्शिवः शान्तो भव । अथ द्वादशीमाह—

विज्यं धनुरिति । कपर्दो जटाजूटः सोऽस्यास्तीति कपर्दी रुद्रस्तस्य धनुर्विज्यं विगतज्याकमस्तु । उतापि च बाणा अस्मिंस्तिष्ठन्तीति बाणवानिषुधिः । स च विशल्योऽस्तु । इषुगतानां शल्यानां तदुदरे गोपितत्वेन बहिराविर्भूतशल्यरहितोऽस्तु । अस्य रुद्रस्येषवो बाणा इषुधौ प्रक्षिप्ता अनेशन्वेद्धुमसमर्था भवन्तु । अस्य रुद्रस्य निषङ्गधिर्बाणाधार आभुरस्त्वीषुमभुरस्तु । कुद्दचनिखातशङ्कावासञ्जितत्वेन बाणान्धारयितुमेव प्रभवतु, न तु बाणाकर्षणयोग्य इत्यर्थः। अथवा निषङ्गधिः खड्गकोशः । सोऽपि पूर्ववत्कचिदारोपितत्वेन खड्गं धारयितुमेव प्रभवतु न तु खड्गाकर्षणसमर्थः । अथ त्रयोदशीमाह—

या ते हेतिरिति । हे भीदृङ्मातिशयेन कामाभिवर्षक या ते हेतिस्तव संबन्धि खड्गादिरूपं यदायुधं, यदपि ते तव हस्ते धनुर्बभूव, अयक्ष्मयाऽनुपद्रवकारिण्या तया हेत्या तथाविधेन धनुषा च त्वमस्मान्विश्वतः परिष्मुज सर्वतः परिपालय । अथ चतुर्दशीमाह—

नमस्ते अस्त्विति । हे रुद्र ते त्वदीयायाऽऽयुधाय बाणरूपाय नमोऽस्तु । कीदृशायाऽऽयुधाय, अनाततायं धनुषि संधानाभावादप्रसारिताय, भृष्णवे स्वरूपेण प्रहर्तुं प्रगल्भाय । किंच ते त्वदीयाभ्यामुभाभ्यां बाहुभ्यां नमोऽस्तु । तथा तव त्वदीयाय धन्वने नमोऽस्तु । अथ पञ्चदशीमाह—

परि ते धन्वन इति । हे रुद्र ते त्वदीयस्य धन्वनो हेतिर्बाणशल्यरूपाऽस्मान्विश्वतः सर्वतः परिवृणक्तु वर्जितान्करोतु, मा बाधतामित्यर्थः । अथो अपि च यस्तवेषुधिस्तमस्मदारेऽस्मत्तो दूरे निधेहि स्थापय ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे पञ्चमप्रपाठके
प्रथमोऽनुवाकः ॥ १ ॥

(चित्याग्निहोमोक्तिः)

(अथ चतुर्थाष्टके पञ्चमप्रपाठके द्वितीयोऽनुवाकः) ।

नमो हिरण्यबाहवे सेनान्ये दिशां च
पतये नमो नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां
पतये नमो नमः सस्पिञ्जराय त्विषीमते पथीनां
पतये नमो नमो बभ्लुशाय विव्याधिनऽ-
आनां पतये नमो नमो हरिकेशायोपवीतिने
पुष्टानां पतये नमो नमो भवस्य हेत्यै जगतां
पतये नमो नमो रुद्रायाऽऽततायिने क्षेत्राणां
पतये नमो नमः सूतायाहन्त्याय वनानां
पतये नमो नमः (१) रोहिताय स्थपतये
वृक्षाणां पतये नमो नमो मन्त्रिणे वाणिजाय
कक्षाणां पतये नमो नमो भुवन्तये वारिव-
स्कृतायौषधीनां पतये नमो नम उच्चैर्घोषा-
याऽऽक्रन्दयते पत्तीनां पतये नमो नमः कृ-
त्स्नवीताय धावते सत्वनां पतये नमः (२) ॥

(वनानां पतये नमो नम एकान्नत्रिंशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
पञ्चमप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ चतुर्थकाण्डे पञ्चमप्रपाठके द्वितीयोऽनुवाकः) ।

प्रथमानुवाके भगवतो रुद्रस्य या प्रधानभूता तनूस्तां बहुधा प्रशस्य तस्य ये लीलाविग्रहा जगन्निर्वाहहेतवस्तेऽष्टभिरनुवाकैः प्रशस्यन्ते । तेष्वनुवाकेषु सर्वाण्यपि यजूंषि । तानि च द्विविधानि, उभयतोनमस्कारयुक्तानि एकान्यतरतोनमस्काराणि च । तत्र त्रिष्वनुवाकेषु नमस्कारादिकं नमस्कारान्तमेकं यजुः । इत-

(स्त्रियग्निहोमोक्तिः)

एषु पञ्चस्वनुवाकेषु नमस्कारादिकमेकैकं यजुः। तत्र द्वितीयेऽनुवाके नमोदश यजूंषि। तत्र प्रथमं यजुराह—

नमो हिरण्येति। हिरण्यनिर्मितान्याभरणानि बाह्वोर्यस्यासौ हिरण्यबाहुः। स च संग्रामेषु सेनां नयतीति सेनानीः। तादृशमूर्तिधरो यो रुद्रस्तस्मै नमोऽस्तु। यश्च दिशां पालको रुद्रस्तस्मै नमोऽस्तु। अथ द्वितीयं यजुराह—

नमो वृक्षेभ्य इति। हरितवर्णाः केशाः पर्णरूपा येषां वृक्षाणां ते हरिकेशास्तादृशेभ्यो वृक्षेभ्यो वृक्षाकाररुद्रमूर्तिभ्यो नमोऽस्तु। यो रुद्रः पशूनां पालकस्तस्मै नमोऽस्तु। अथ तृतीयं यजुराह—

नमः सस्पिञ्जरायेति। सस्पिंशब्दो बालतृणवाची। पीतरक्तसंकीर्णवर्णवाची पिञ्जरः। बालतृणवत्पिञ्जरः सस्पिञ्जरः। पृषोदरादित्वात्साधुः। स च त्विषीमान्दीप्तिमान्। तथाविधरुद्रमूर्तये नमोऽस्तु। पथीनां शास्त्रोक्तदक्षिणोत्तरतृतीयमार्गाणां पतिः पालको यो रुद्रस्तस्मै रुद्राय नमोऽस्तु। अथ चतुर्थं यजुराह—

नमो बभ्लुशायेति। बिभर्ति रुद्रमिति बभ्रुर्वृषभः। स एव बभ्लुः। रलयोर्भेदाभावः। तस्मिञ्शेते तिष्ठतीति बभ्लुशः। स च विद्वेषिणो विशेषेण विध्यतीति विव्याधी। तथाविधाय विव्याधिने नमोऽस्तु। यश्चान्नानां पालको रुद्रस्तस्मै नमोऽस्तु। अथ पञ्चमं यजुराह—

नमो हरिकेशायेति। नीलमूर्धजाय पलितरहितायोपवीतिने मङ्गल्यार्थं यज्ञोपवीतधारिणे रुद्राय नमोऽस्तु। पुष्टानां परिपूर्णगुणानां पुरुषाणां पतये स्वामिने नमोऽस्तु। अथ षष्ठं यजुराह—

नमो भवस्येति। भवः संसारस्तस्य हेतिरायुधं, संसारच्छेत्रे रुद्राय नमोऽस्तु। जगतां पालको यो रुद्रस्तस्मै नमोऽस्तु। अथ सप्तमं यजुराह—

नमो रुद्रायेति। आततेन विस्तारितेन धनुषाऽवति रक्षतीत्याततावी, तस्मै रुद्राय नमोऽस्तु। क्षेत्राणां पालको यो रुद्रस्तस्मै नमोऽस्तु। अथाष्टमं यजुराह—

नमः सूतायेति। सूतः सारथिः। अहन्त्यो वैरिभिर्हन्तुमशक्यः। तादृशाय रुद्राय नमोऽस्तु। यो वनानां पालकस्तस्मै रुद्राय नमोऽस्तु। अथ नवमं यजुराह—

(चित्यग्निहोमोक्तिः)

नमो रोहितायेति । रोहितो लोहितवर्णः । स्थपतिः प्रभुः । तस्मै रुद्राय नमोऽस्तु । वृक्षाणां यः पालकस्तस्मै नमोऽस्तु । अथ दशमं यजुराह—

नमो मन्त्रिण इति । राजसभायां मन्त्रालोचनकुशलो मन्त्री । स च वणिजां स्वामित्वेन वाणिजस्तस्मै नमोऽस्तु । वनगता गुल्मादयः कक्षास्तेषां पालकाय नमोऽस्तु । अथैकादशं यजुराह—

नमो भुवंतय इति । भुवं तनोतीति भुवंतिः । वरिवो धनं तस्य कर्ता वरिवस्कृत्स एव वारिवस्कृतस्तस्मै नमोऽस्तु । ओषधीनां ग्राम्यारण्यानां पालकस्तस्मै नमोऽस्तु । अथ द्वादशं यजुराह—

नम उच्चैर्घोषायेति । युद्धकाले उच्छ्रितो घोषो ध्वनिर्यस्यासावुच्चैर्घोषस्तस्मै । आक्रन्दयन्वैरिणो रोदयिता तस्मै रुद्राय नमोऽस्तु । पत्तीनां पादचारिणो योधाः पत्तिशब्दवाच्यास्तेषां पालकाय नमोऽस्तु । अथ त्रयोदशं यजुराह—

नमः कृत्स्नवीतायेति । कृत्स्नं सैन्यं वीतं वेष्टितं येनासौ कृत्स्नवीतस्तस्मै । धावते पलायमानानां परकीयसैन्यानां पृष्ठतो गच्छन्धावंस्तस्मै नमोऽस्तु । सत्त्वानः सात्त्विकाः शरणागतारक्षेषां पालकाय नमोऽस्तु ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे पञ्चमप्रपाठके
द्वितीयोऽनुवाकः ॥ २ ॥

(अथ चतुर्थकाण्डे पञ्चमप्रपाठके तृतीयोऽनुवाकः) ।

नमः सहमानाय निव्याधिन आव्याधिनीनां पतये नमो नमः ककुभाय निषङ्गिणे स्तेनानां पतये नमो नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमो नमो वञ्चते परिवञ्चते स्तायूनां पतये नमो नमो निचेरवे परिचरायारण्यानां पतये नमो नमः सृकाविभ्यो जिघांसद्भ्यो मुष्णतां पतये नमो नमोऽसिमद्भ्यो नक्तं चरद्भ्यः प्रकृन्तानां पतये

(चित्याग्निहोमोक्तिः)

नमो नम ऋष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमो नमः (१) इषुमद्भ्यो धन्वाविभ्यश्च वो नमो नम आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो नम आयच्छद्भ्यो विसृजद्भ्यश्च वो नमो नमोऽस्यद्भ्यो विध्यद्भ्यश्च वो नमो नम आसीनेभ्यः शयानेभ्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो नमः सभाभ्यः सभापतिभ्यश्च वो नमो नमो अश्वेभ्योऽश्वेपतिभ्यश्च वो नमः (२) ॥

(कुलुञ्चानां पतये नमो नमोऽश्वपतिभ्यस्त्रीणि च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके पञ्चमप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ चतुर्थकाण्डे पञ्चमप्रपाठके तृतीयोऽनुवाकः) ।

द्वितीयानुवाक उभयतोनमस्काराणि कानिचिद्यजूंष्युक्तानि । अथापराणि तथाविधान्येव तृतीयेऽस्पष्टार्थानि द्वादश यजूंष्युच्यन्ते । तत्र प्रथमं यजुराह—

नमः सहमानायेति । सहमानो विरोधिनोऽभिभवन् । नितरां विरोधिनो विध्यतीति निव्याधी, तादृशाय रुद्राय नमः । आ समन्ताद्विध्यन्तीत्याव्याधिन्यः शूराः सेनास्तासां पालकाय नमः । अथ द्वितीयं यजुराह—

नमः ककुभायेति । ककुभाय ककुभसदृशाय प्रधानभूतायेत्यर्थः । निषङ्गी खड्गहस्तस्तस्मै नमः । स्तेना गुप्तचोरास्तेषां पालकाय नमः । रुद्रो हि लीलया नट इव तत्तद्वेषं धत्ते । यद्वा तस्य सर्वजगदात्मकत्वाद्ये यत्र यथा वर्तन्ते तत्र

---

१ क. °ये द्वा° । च. °ये कानिचिदुच्य° । २ ख. °श स्पष्टार्थानि पञ्च कानिचिदुच्य° । ३ घ. ङ. °जूंष्याह—। ४ ख. च. °कुत्सहृ° ।

तथारूपेण रुद्रो वर्तत इति रुद्रस्य सार्वात्म्यमनुसंधातुं मन्त्रैरेवमुच्यते । स्तेनादिशरीरेषु रुद्रो द्वेधा वर्तते—जीवरूपेणेश्वररूपेण च । तत्र च यज्जीवरूपं तस्स्तेनादिशब्दानां वाच्योऽर्थः । स एव शास्त्रेषु निन्द्यः । यस्त्वीश्वररूपं तस्स्तेनादिशब्दैरुपलक्ष्यते । तदनुसंधानं तु पापक्षयहेतुत्वेन परमपुरुषार्थ इति लक्ष्यार्थविवक्षया मन्त्रेषु लौकिकाः शब्दाः प्रयुज्यन्त इति द्रष्टव्यम् । उपलक्षकवाच्यार्थद्वारेण लक्ष्यार्थो मूढैरपि सहसा सम्यग्बोद्धुं शक्यते । यथा शास्त्रेऽग्न्य इत्यत्र । तस्माल्लक्ष्यार्थस्यैव विवक्षायामपि सुखावबोधद्वारत्वेन मुख्यार्थवाचकाः शब्दाः प्रयोक्तव्याः । अथ तृतीयं यजुराह—

नमो निषङ्गिण इति । धनुषि संधातुं हस्ते धृतो बाणो निषङ्गः । पृष्ठे बद्धो बाणाधार इषुधिः । तदुभययुक्ताय नमः । तस्कराः प्रकटचोरास्तेषां पालकाय नमः । अथ चतुर्थं यजुराह—

नमो वञ्चत इति । स्वामिन आज्ञां मुक्त्वा तदीयक्रयविक्रयादिव्यवहारेषु यत्र क्वापि यत्किंचित्तद्द्रव्यापह्नवो वञ्चनम् । सर्वेष्वपि व्यवहारेष्वपह्नवः परिवञ्चनं, तदुभयरूपाय नमः । गूढचोरा द्विविधाः-दूरादागत्य रात्रावज्ञाताः सन्तः कर्षाटोद्घाटनेन ये द्रव्यापहर्तारस्ते स्तेनाः । स्वकीया एव भूत्वा रात्रावह्नि वाऽन्यैरज्ञाताः सन्तोऽपहर्तारो ये ते स्तायवः । तेषां स्तायूनां पालकाय नमः । अथ पञ्चमं यजुराह—

नमो निचेरव इति । स्वामिगृह एव कदाऽपहरिष्यामीत्यनया बुद्ध्या सावधानो निरन्तरं चरणशीलो निचेरुः, परित आपणवीथिप्रवाटिकादावपहारबुद्ध्या चरणशीलः परिचरस्तदुभयरूपाय नमः । मार्गे गन्तुर्द्रव्यापहरेण बाधितुं निरन्तरमरण्ये वर्तमानाश्चोरा अरण्यास्तेषां पालकाय नमः । अथ षष्ठं यजुराह—

नमः सूकाविभ्य इति । सूकशब्दो वज्रवाची । तेन स्वशरीरमवन्ति रक्षन्तीति सूकाविनः, प्राणिनो हन्तुमिच्छन्तश्चोरा जिघांसन्तस्तदुभयरूपाय नमः । कृषिकाः सन्तः स्वामिधान्यानामपहर्तारो मुष्णन्तस्तेषां पालकाय नमः । अथ सप्तमं यजुराह—

नमोऽसिमद्भ्य इति । असिमन्तः खड्गधारिणश्चोराः । ये रात्रौ चरन्तो वीथ्यां निर्गतान्प्राणिनो बाधमानाश्चोरास्ते नक्तं चरन्तः । तदुभयरूपाय नमः । हत्वैवापहरन्तः प्रकृन्तास्तेषां पालकाय नमः । अथाष्टमं यजुराह—

---

१ स. च. °पाटायुद्घा° । २ स. एवंभूता ग° । च. एवं । ३ स. च. गन्तृन्द्रव्या° ।

(चित्याग्निहोमोक्तिः)

नम उष्णीषिण इति। शिरोवेष्टनवानुष्णीषी। ग्राम्यजनवदुष्णीषेण शिरो वेष्टयित्वा तन्मध्ये प्रविश्य वर्तमानश्चोर उष्णीषी, गिरौ काष्ठादिसंपादकानां वस्त्रादिकमपहर्तुं चरतीति गिरिचरस्तदुभयरूपाय नमः। कुं भूमिं गृहक्षेत्रादिरूपां लुम्पन्त्यपहरन्तीति कुलुम्पास्तेषां पालकाय नमः। अथ नवमं यजुराह—

नम इषुमद्भ्य इति। भीषयितुं हस्ते बाणधारिण इषुमन्तः। तथा भीषयितुं हस्ते धनुर्धारिणो धन्वाविनः। तदुभयरूपा हे रुद्रा वो युष्मभ्यं नम इति विशेषणद्वयेन वाक्यं भेत्तुं द्विर्नमस्कारः। अथ दशमं यजुराह—

नम आतन्वानेभ्य इति। धनुषि ज्यामारोपयन्त आतन्वानास्तद्रूपेभ्यो युष्मभ्यं रुद्रेभ्यो नमः। धनुषि बाणं संदधानाः प्रतिदधानास्तद्रूपेभ्यो युष्मभ्यं नमः। अथैकादशं यजुराह—

नम आयच्छद्भ्य इति। ज्याकर्षणं कुर्वन्त आयच्छन्तो बाणं मुञ्चन्तो विसृजन्तः। शेषं पूर्ववद्व्याख्येयम्। अथ द्वादशं यजुराह—

नमोऽस्यद्भ्य इति। मुक्तस्य बाणस्य लक्ष्यपर्यन्तं गगनमसनं तस्य कर्तारोऽस्यन्तः। लक्ष्यसमीपं गतस्य बाणस्य लक्ष्ये प्रवेशो वेधस्तस्य कर्तारो विध्यन्तः। अथ त्रयोदशयजुरारभ्य सप्तदशयजुःपर्यन्तानि स्पष्टार्थानि यजूंष्याह—**नम आसीनेभ्य इति**॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे पञ्चमप्रपाठके
तृतीयोऽनुवाकः॥ ३॥

(अथ चतुर्थाष्टके पञ्चमप्रपाठके चतुर्थोऽनुवाकः)।

नम आव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो
नमो नम उगणाभ्यस्तृꣳहतीभ्यश्च वो नमो
नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो

---

१ क. घ. ङ. च. °पे सर्वत्र पुं।

नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो नमो महद्भ्यः क्षुल्लकेभ्यश्च वो नमो नमो रथिभ्योऽरथेभ्यश्च वो नमो नमो रथेभ्यः (१) रथपतिभ्यश्च वो नमो नमः सेनाभ्यः सेनानिभ्यश्च वो नमो नमः क्षत्तृभ्यः संग्रहीतृभ्यश्च वो नमो नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो नमः पुञ्जिष्टेभ्यो निषादेभ्यश्च वो नमो नम इषुकृद्भ्यो धन्वकृद्भ्यश्च वो नमो नमो मृगयुभ्यः श्वनिभ्यश्च वो नमो नमः श्वभ्यः श्वपतिभ्यश्च वो नमः (२)॥

(रथेभ्यः श्वपतिभ्यश्च द्वे च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके पञ्चमप्रपाठके चतुर्थोऽनुवाकः॥ ४॥

(अथ चतुर्थकाण्डे पञ्चमप्रपाठके चतुर्थोऽनुवाकः)।

तृतीयानुवाके यान्युभयतोनमस्काराणि यजूंष्युक्तानि तेभ्योऽन्यानि कानिचिदुभयतोनमस्काराणि यजूंषि चतुर्थेऽभिधीयन्ते। तत्र प्रथमं यजुराह—

नम आव्याधिनीभ्य इति। आ समन्ताद्वेद्धुं शक्ताः स्त्रीमूर्तय आव्याधिन्यो विशेषेण वेद्धुं शक्ता विविध्यन्त्यस्ताभ्यो नमः। अथ द्वितीयं यजुराह—

नम उगणाभ्य इति। उत्कृष्टगणरूपाः सप्तमातृकाद्याः स्त्रिय उगणाः, हिंसितुं समर्था दुर्गाद्या उग्रदेवतास्तृंहत्यस्ताभ्यो नमः। अथ तृतीयं यजुराह—

(चित्याग्निहोमोक्तिः)

नमो गृत्सेभ्य इति । गर्धनशीला गृत्सा विषयलम्पटा इत्यर्थः । तेषां पालका गृत्सपतयस्तेभ्यो नमः । अथ चतुर्थं यजुराह—

नमो व्रातेभ्य इति । नानाजातीयानां संघा व्रातास्तेषां पालका व्रातपतयस्तेभ्यो नमः । अथ पञ्चमं यजुराह—

नमो गणेभ्य इति । देवस्यानुचरा भूतविशेषा गणास्तेषां पालका गणपतयस्तेभ्यो नमः । अथ षष्ठं यजुराह—

नमो विरूपेभ्य इति । विरूपा विकृतरूपा नग्नमुण्डादयः । विश्वरूपास्तुरंगगजवक्त्रादिनानाविधरूपधारिणो भूत्यास्तेभ्यो नमः । अथ सप्तमं यजुराह—

नमो महद्भ्य इति । अणिमाद्यैश्वर्ययोगिता महान्तस्तद्वहिताः क्षुल्लकास्तेभ्यो नमः । अथाष्टमं यजुराह—

नमो रथिभ्य इति । रथमारूढा रथिनस्तद्वहिता अरथास्तेभ्यो नमः ।

अथ नवममारभ्य सप्तदशपर्यन्तानि स्पष्टार्थानि यजूंष्याह—

नमो रथेभ्य इति । पक्षिपुञ्जानां घातकाः पुञ्जिष्टाः । मत्स्यघातिनो निषादः । शुनां गलेषु बद्धानां पाशानां धारकाः श्वनयः । अत्र द्वितीयानुवाको लीलार्थदेवतामूर्तिप्राधान्येन स्तोतुं प्रवृत्तः । तृतीयानुवाकश्चोरमूर्तिप्राधान्येन स्तोतुं प्रवृत्तः । चतुर्थोऽनुवाको नानाजातिमूर्तिप्राधान्येनेति विभागो द्रष्टव्यः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे पञ्चमप्रपाठके
चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ चतुर्थाष्टके पञ्चमप्रपाठके पञ्चमोऽनुवाकः) ।

नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय च शतधन्वने च नमो गिरि-

(चित्याग्निहोमोक्तिः)

शाय च शिपिविष्टाय च नमो मीढुष्टमाय
चेषुमते च नमो ह्रस्वाय च वामनाय च नमो
बृहते च वर्षीयसे च नमो वृद्धाय च संवृध्व-
ने च (१) नमो अग्रियाय च प्रथमाय च नम
आशवे चाजिराय च नमः शीघ्रियाय च शी-
भ्याय च नम ऊर्म्याय चावस्वन्याय च नमः
स्रोतस्याय च द्वीप्याय च (२) ॥

(संवृध्वने च पञ्चविंशतिश्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
पञ्चमप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ चतुर्थकाण्डे पञ्चमप्रपाठके पञ्चमोऽनुवाकः)।

चतुर्थेऽनुवाक उभयतोनमस्काराणि यजूंषि समापितानि । अथ पञ्चममारभ्य नवमान्तेष्वनुवाकेषु नमस्कारोपक्रमाण्येव यजूंष्यामायन्ते ।

तत्र पञ्चमानुवाके प्रथमं यजुरारभ्य पञ्चदश यजूंष्याह—

नमो भवाय चेति । भवन्ति प्राणिनोऽस्मादिति भवः । रुद्रोदनहेतुभूतं दुःखं द्रावयतीति रुद्रः । शृणाति हिनस्ति पापमिति शर्वः । पशूनमानानज्ञानिनः पुरुषान्पालयतीति पशुपतिः । कालकूटधारणेन नीलवर्णो ग्रीवैकदेशो यस्यासौ नीलग्रीवः । शितिः श्वेतवर्णोऽवशिष्टः कण्ठप्रदेशो यस्यासौ शितिकण्ठः । कपर्दो जटाजूटो यस्यास्तीति कपर्दी । मुण्डितकेशो व्युप्तकेशः । पाशुपतादिवेषेण कपर्दित्वम् । मत्स्यादिवेषेण मुण्डितकेशत्वम् । इन्द्रवेषेण सहस्राक्षत्वम् । सहस्रभुजावतारित्वेन शतसंख्यकैर्बाहुभिरुपेतत्वम् । गिरौ कैलासे शेते तिष्ठतीति गिरिशः । विष्णुमूर्तिधारी शिपिविष्टः । " विष्णुः शिपिविष्टः " इति श्रुतेः । मेघरूपेणात्यन्तं वर्षयिता मीढुष्टमः । बाणधारक

---

१ ख. च. °दशान्तानि यं° ।

(चित्याग्निहोमोक्तिः)

हृषुमान्। शरीरेऽल्पप्रमाणत्वं ह्रस्वत्वम्। अङ्गुल्याद्यवयवसंकोचाद्वामनत्वम्। आकारेण प्रौढो बृहन्। गुणैः समृद्धो वर्षीयान्। वयसाऽधिको वृद्धः। सम्यक्स्तुतिभिर्वार्धितः संवृध्वा। जगदुत्पत्तेः पूर्वमवस्थितोऽग्रियः। सभायां मुख्यः प्रथमः। आशुर्व्यापी। अजिरो गमनकुशलः। शीघ्रियः शीघ्रगामी। शीभशब्द उदकप्रवाहवाची, तत्रावस्थितः शीभ्यः। ऊर्मौ तरङ्गे स्थित ऊर्म्यः। अवस्वने ध्वनिरहिते स्थिरजलेऽवस्थितोऽवस्वन्यः। स्रोतसि प्रवाहे स्थितः स्रोतस्यः। द्वीपे वारिमध्यवर्तिभूमौ स्थितो द्वीप्यः। अत्रैकैकस्मिन्यजुषि चतुर्थ्यन्ताभ्यां पदाभ्यां नमःशब्दं पृथगन्वेतुं समुच्चयार्थौ चकारौ पठितौ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसाहिताभाष्ये चतुर्थकाण्डे पञ्चमप्रपाठके पञ्चमोऽनुवाकः॥ ५॥

(अथ चतुर्थाष्टके पञ्चमप्रपाठके षष्ठोनुवाकः)।

नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च नमो मध्यमाय चापगल्भाय च नमो जघन्याय च बुध्नियाय च नमः सोभ्याय च प्रतिसर्याय च नमो याम्याय च क्षेम्याय च नम उर्वर्याय च खल्याय च नमः श्लोक्याय चावसान्याय च नमो वन्याय च कक्ष्याय च नमः श्रवाय च प्रतिश्रवाय च (१) नम आशुषेणाय चाऽऽशुरथाय च नमः शूराय चावभिन्दते च नमो वर्मिणे च वरूथिने च नमो बिल्मिने च कवचिने च नमः श्रुताय च श्रुतसेनाय च (२)॥

(प्रतिश्रवाय च पञ्चविंशतिश्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके पञ्चमप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ चतुर्थकाण्डे पञ्चमप्रपाठके षष्ठोऽनुवाकः) ।

पञ्चमेऽनुवाके कानिचिदन्यतरतोनमस्काराणि यजूंष्युक्तानि । अथ षष्ठे तथाविधान्येवान्यानि कानिचिद्यजूंष्युच्यन्ते ।

तत्र विद्यमानानि पञ्चदश यजूंष्याह—

नमो ज्येष्ठाय चेति । विद्यैश्वर्यादिभिरधिको ज्येष्ठः । तै रहितोऽल्पः कनिष्ठः । पूर्वं जगदादौ हिरण्यगर्भरूपेणोत्पन्नः पूर्वजः । अपरस्मिञ्जगदवसानकाले संहर्तुं कालाग्न्यादिरूपेणोत्पन्नोऽपरजः । मध्यकाले देवतिर्यगादिरूपेणोत्पन्नो मध्यमः । अपगल्भोऽपरूढेन्द्रियो बालः । जघने गवादीनां पश्चाद्भागे वत्सादिरूपेण भवो जघन्यः । बुध्ने वृक्षादीनां मूले शाखादिरूपेणोत्पन्नो बुध्नियः । उभाभ्यां पुण्यपापाभ्यां सह वर्तत इति सोभो मनुष्यलोकः । अत एवाऽऽथर्वणिका आमनन्ति—'पुण्येन पुण्यं लोकं जयति पापेन पापमुभाभ्यामेव मनुष्यलोकम्' इति । तत्र भवः सोभ्यः । प्रतिसरो विवाहादौ हस्ते धार्यमाणो रक्षाबन्धस्तमर्हतीति प्रतिसर्यः । यमलोके पापिशिक्षकरूपेणोत्पन्नो याम्यः । क्षेमो मोक्षस्तमर्हतीति क्षेम्यः । उर्वरा तत्सम्पाद्या भूमिस्तामर्हति धान्यविशेषरूपेणेत्युर्वर्यः । खलो धान्यविवेचनदेशस्तमर्हति मेढ्यादिरूपेणेति खल्यः । श्लोका वैदिकमन्त्रास्तत्प्रतिपाद्यत्वेन तत्र भवः श्लोक्यः । अवसानं वेदान्तस्तत्प्रतिपाद्यत्वेन तत्र भवोऽवसान्यः । वने वृक्षादिरूपेण भवो वन्यः । कक्षे लतादिरूपेण भवः कक्ष्यः । श्रूयत इति श्रवः शब्दः । प्रतिश्रवः प्रतिध्वनिः । आशुः शीघ्रगामिनी सेना यस्यासावाशुषेणः । आशुः शीघ्रगामी रथो यस्यासावाशुरथः । शूरो युद्धे धैर्यवान् । अवभिन्दन्वैरिणां प्रहर्ता । वर्मी कञ्चुकोपेतः। वरूथी गृहोपेतः । बिल्मं बिलोपेतं युद्धे शिरोरक्षकं तदस्यास्तीति बिल्मी । कवचः शरीररक्षकः सोऽस्यास्तीति कवची । श्रुतो वेदेषु प्रसिद्धः । श्रुता वेदेषु प्रसिद्धा सेना यस्यासौ श्रुतसेनः ॥

---

१ खं. च. °न्येव का° । २ ख. च. °ल्भोऽप्रौढे° । ३ ख. च. नयति ।

(चित्याग्निहोमोक्तिः)

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे पञ्चमप्रपाठके
षष्ठोऽनुवाकः ॥ ६ ॥

(अथ चतुर्थाष्टके पञ्चमप्रपाठके सप्तमोऽनुवाकः)।

नमो दुन्दुभ्याय चाऽऽहनन्याय च नमो धृष्णवे च प्रमृशाय च नमो दूताय च प्रहि-ताय च नमो निषङ्गिणे चेषुधिमते च नमः स्तीक्ष्णेषवे चाऽऽयुधिने च नमः स्वायुधाय च सुधन्वने च नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च नमः सूद्याय च सरस्याय च नमो नाद्याय च वैशन्ताय च (१) नमः कूप्याय चावट्याय च नमो वर्ष्याय चावर्ष्याय च नमो मेघ्याय च विद्युत्याय च नम ईध्रियाय चाऽऽतप्याय च नमो वात्याय च रेष्मियाय च नमो वास्त-व्याय च वास्तुपाय च (२) ॥

(वैशन्ताय च त्रिंशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
पञ्चमप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ चतुर्थकाण्डे पञ्चमप्रपाठके सप्तमोऽनुवाकः)।

षष्ठेऽनुवाके यान्यन्यतरतोनमस्काराणि यजूंष्युक्तानि तेभ्योऽन्यानि कानि-चिद्यजूंषि सप्तमेऽभिधीयन्ते । तत्र विद्यमानानि षोडश यजूंष्याह—

(चित्याग्निहोमोक्तिः)

नमो दुन्दुभ्यायेति । दुन्दुभौ भेर्यां भवः शब्दो दुन्दुभ्यः । आहन्यते ताड्यतेऽनेनेत्याहननं दुन्दुभ्याघातार्थो दण्डस्तत्र ताडनरूपेणोत्पन्न आहनन्यः । धृष्णुर्युद्धे पलायनरहितः । प्रमृशः परसैन्यवृत्तान्तपरामर्शकः । दूतस्तद्वृत्तान्तज्ञापनकुशलः । प्रहितः स्वामिना प्रेषितः पुरुषः । निषङ्गी खड्गयुक्तः । इषुधिमान्बाणाधारयुक्तः । तीक्ष्णा इषवो यस्यासौ तीक्ष्णेषुः । बहून्यायुधानि यस्य सन्तीत्यायुधी । शोभनमायुधं त्रिशूलरूपं यस्यासौ स्वायुधः । शोभनं धन्व पिनाकरूपं यस्यासौ सुधन्वा । सृतिः पादसंचारमात्रयोग्यः क्षुद्रमार्गस्तमर्हतीति सृत्यः । पन्था रथाद्यादिसंचारक्षमः प्रौढो मार्गस्तमर्हतीति पथ्यः । कुत्सितमटति जलमत्रेति काटोऽल्पप्रवाहयोग्यः कुल्याप्रदेशस्तत्र जलरूपेण भवः काट्यः । यस्मिन्प्रदेशे पर्वताग्राज्जलं न्यग्भावेन पतति स प्रदेशो नीपस्तत्र जलरूपेणावस्थितो नीप्यः । सूदः कर्दमप्रदेशस्तत्रत्यजलरूपः सूद्यः । सरः प्रसिद्धं, तत्रत्यजलरूपः सरस्यः । नदीगतजलरूपो नाद्यः । अल्पसरो वेशन्तस्तत्रत्यजलरूपो वैशन्तः । कूपस्थजलरूपः कूप्यः । अवटस्थजलरूपोऽवट्यः । वर्षजलरूपो वर्ष्यः । वर्षनिरपेक्षजलरूपोऽवर्ष्यः । मेघेषु स्थितो मेघ्यः । विद्युता सह चरतीति विद्युत्यः । ईध्रं निर्मलत्वेन दीप्यमानं शरदभ्रं तत्र भव ईध्रियः । आतपेन सह वृष्ट आतप्यः । वातेन सह वृष्टो वात्यः । रिष्यन्ति विनश्यन्ति भूतान्यत्रेति रेष्मः प्रलयकालस्तत्र भवः शर्करापाषाणादिसहितो वृष्टिजलविशेषो रेष्मियः । वस्तु धनं(न)गवाश्वादिपदार्थरूपं तत्र तत्कार्यरूपेणावस्थितो वास्तव्यः । गृहनिर्माणार्था भूमिर्वास्तु तत्पालको वास्तुपः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे पञ्चमप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ चतुर्थाष्टके पञ्चमप्रपाठकेऽष्टमोऽनुवाकः) ।

नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च नमः शङ्गाय च पशुपतये च

---

१ ख. च. खड्गहस्तः । २ ख. च. °ह चरितो वि° । ३ ख. च. °स्तुस्तत्पा° ।

(चित्याग्निहोमोक्तिः)

नमं उग्राय च भीमाय च नमो अग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय नमः शंभवे च मयोभवे च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च (१) नमस्तीर्थ्याय च कूल्याय च नमः पार्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च नमं आतार्याय चाऽऽलाद्याय च नमः शष्प्याय च फेन्याय च नमः सिकत्याय च प्रवाह्याय च (२) ॥

(शिवतराय च त्रिंशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके पञ्चमप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ चतुर्थकाण्डे पञ्चमप्रपाठकेऽष्टमोऽनुवाकः) ।

सप्तमेऽनुवाके यान्यन्यतरतोनमस्काराणि यजूंष्युक्तानि तेभ्योऽन्यानि कानिचिदन्यतरतोनमस्काराण्यष्टमेऽनुवाके कथ्यन्ते ।

तत्र विद्यमानानि सप्तदश यजूंष्याह—

नमः सोमाय चेति । उमया सह वर्तत इति सोमः । रुद्रोदनहेतुर्दुःखं तद्द्रावयति विनाशयतीति रुद्रः । आदित्यरूपेणोदयकालेऽत्यन्तं रक्तस्ताम्रः । उदयादूर्ध्वमीषद्रक्तोऽरुणः । शं सुखं गमयति प्रापयतीति शंगः । पशूनां पालयिता पशुपतिः । विरोधिनो नाशयितुं क्रोधयुक्त उग्रः । दर्शनमात्रेण विरोधिनां भयहेतुर्भीमः । अग्रे पुरतो वधोऽस्येत्यग्रेवधः । एवं दूरेवधः । पुरतो दूरे वा वर्तमानं विरोधिनमनायासेनैव हन्तीत्यर्थः । लोकेऽपि यो यत्र विरोधिनं हन्ति तत्र तद्रूपेणायमेव हन्ता । अत एवेश्वरेणार्जुनं प्रत्युक्तम्—

' मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन् ' इति ।

(चित्यग्निहोमोक्तिः)

संहारकालेऽतिशयेन च सर्वेषां हन्ता हनीयान् । हरितवर्णानि केशतद्-शानि पर्णानि येषां ते हरिकेशास्तथाविधा ये वृक्षाः कल्पतरुप्रभृतयस्तद्रूपोऽयं रुद्र इत्यर्थः । तारः प्रणवप्रतिपाद्यः । शं सुखं भावयत्युत्पादयतीति शंभुः । मयः सुखं भावयतीति मयोभूः । एकं विषयसुखमपरं मोक्षसुखमिति मयोर्विवेकः । पित्रादिरूपेण शं लौकिकसुखं करोतीति शंकरः । आचार्यशास्त्रादिरूपेण मोक्षसुखं करोतीति मयस्करः । साक्षात्सुखकारित्वमेताभ्यां पदाभ्यामुक्तमेतन्मुखेन कारयितृत्वं पूर्वाभ्यां पदाभ्यामिति विवेकः । शिवः कल्याणरूपः स्वयं निष्कल्मष इत्यर्थः । अतिशयेन शिवः शिवतरः स्वभक्तानपि निष्कल्मषान्करोतीत्यर्थः । तीर्थे प्रयागादौ स्नानेनाहितस्तीर्थ्यः । कूले नदीतीरे प्रविष्टापितल्लिङ्गरूपेणावतिष्ठत इति कूल्यः । पारे संसारसमुद्रस्य परतीरे मुमुक्षुभिर्ध्येयत्वेनावतिष्ठत इति पार्यः । अपारेऽर्वाक्तीरे संसारमध्ये काम्यफलप्रदत्वेनावतिष्ठत इत्यवार्यः । प्रकृष्टेन मन्त्रजपादिरूपेण पापतरणहेतुः प्रतरणः । तत्त्वज्ञानरूपेण कृत्स्नसंसारोत्तरणहेतुरुत्तरणः । संभवत्यपि संसारोत्तरणहेतौ तत्त्वज्ञाने तदुपेक्ष्य काम्यकर्मानुष्ठानेन संसारे पुनरागमनमातारस्तमर्हतीत्यातार्यः, काम्यफलप्रद इत्यर्थः । अलं संपूर्णं यथा भवति तथा कर्मफलमत्तीत्यलमदो जीवः । " तयोरन्यः पिप्पलं स्वाद्वत्ति " इति श्रुतेः । तस्य प्रेरकत्वेन तत्संबन्धित्व द्वालाद्यः । शष्पं बालतृणं गङ्गातीरादावुत्पन्नं कुशाङ्कुरादि तदर्हतीति शष्प्यः । नदीमध्यगतं फेनमर्हतीति फेन्यः । सिकतामर्हतीति सिकत्यः । प्रवाहमर्हतीति प्रवाह्यः । यः पुरुषः श्रद्धालुः सन्स्नानादितत्परो निरन्तरं गङ्गादितीरे वर्तते तद्रूप इति शष्प्यादिशब्दानां चतुर्णां तात्पर्यार्थः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-

तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे पञ्चमप्रपाठकेऽ-

ष्टमोऽनुवाकः ॥ ८ ॥

(अथ चतुर्थाष्टके पञ्चमप्रपाठके नवमोऽनुवाकः)।

नमः इरिण्याय च प्रपथ्याय च नमः किं-

शिलाय च क्षयणाय च नमः कपर्दिने च

(नित्याग्निहोमोक्तिः)

पुलस्तये च नमो गोष्ठ्याय च गृह्याय च नमस्तल्प्याय च गेह्याय च नमः काट्याय च गह्वरेष्ठाय च नमो हृदय्याय च निवेष्प्याय च नमः पांसव्याय च रजस्याय च नमः शुष्क्याय च हरित्याय च नमो लोप्याय चोलप्याय च (१) नम ऊर्व्याय च सूर्म्याय च नमः पर्ण्याय च पर्णशद्याय च नमोऽपगुरमाणाय चाभिघ्नते च नम आक्खिदते च प्रक्खिदते च नमो वः किरिकेभ्यो देवानाꣳ हृदयेभ्यो नमो विक्षीणकेभ्यो नमो विचिन्वत्केभ्यो नम आनिर्हतेभ्यो नम आमीवत्केभ्यः (२)।

(उलप्याय च त्रयस्त्रिꣳशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके पञ्चमप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

(अथ चतुर्थकाण्डे पञ्चमप्रपाठके नवमोऽनुवाकः)।

अष्टमानुवाके यान्यन्यतरतोनमस्काराणि यजूंष्युक्तानि तेभ्योऽन्यानि कानिचिन्नवमेऽनुवाक उच्यन्ते ।

तत्र विद्यमानान्येकोनविंशतिसंख्याकानि यजूंष्याह—

नम इरिण्याय चेति । इरिणमूषरं तत्र भव इरिण्यः । पथो बहुभिः सेवितो मार्गस्तत्र भवः पथ्यः । कुत्सिताः क्षुद्राः शिला यत्र प्रदेशे तादृशः शार्कंशिलः प्रदेशः किंशिलः । कपणो निवासयोग्यो देशः । कपर्दी जटाबन्धवान् । भक्तानां पुरतस्तिष्ठतीति पुलस्तिः। गवां स्थानं गोष्ठं तत्र भवो गोष्ठ्यः।

(नित्याग्निहोमोक्तिः)

गृहे भवो गृह्यः। तल्पे खट्वायां शयानस्तल्प्यः। गेहे प्रासादे भवो गेह्यः। कुत्सितमटति कण्टकलतादिपूर्णतया दुष्प्रवेशत्वं प्रामोतीति दुर्गमोऽरण्यविशेषः काटस्तत्र भवः काट्यः। गह्वरे विषमे गिरिगुहादौ तिष्ठतीति गह्वरेष्ठः। ह्रदेष्वगाधजलेषु भवो ह्रद्यः। निवेष्पं नीहारजलं तत्र भवो निवेष्यः। पांसुषु परमाणुष्ववस्थितः पांसव्यः। रजसि विस्पष्टायां धूल्यामवस्थितो रजस्यः। शुष्केषु काष्ठेषु भवः शुष्क्यः। हरितमार्द्रं तत्र भवो हरित्यः। लुप्यते तृणादिकमस्मिन्निति लोपः कठिणप्रदेशस्तत्र भवो लोप्यः। उलपा बल्वजतृणादयस्तत्र भव उलप्यः। उर्व्यां पृथिव्यां भव ऊर्व्यः। शोभना ऊर्मयो यस्यां नद्यां सेयं सूर्मिस्तत्र भवः सूर्म्यः। पर्णेषु पत्रेषु भवः पर्ण्यः। शुष्काणां पर्णानां संघातः पर्णशद्स्तत्र भवः पर्णशद्यः। अपगुरमाण उद्यतायुधः। अभिघ्नन्प्रहरन्। आक्षिखदन्नीषत्खेदयन्। प्रक्षिखदन्नत्यन्तं खेदयन्। किरन्ति भक्तेभ्यो धनानीति किरिका उदारा रुद्रावतारः। ते च देवानां हृदयभूताः सर्वदेवप्रियत्वात्तादृशेभ्यो वो युष्मभ्यं नमः। क्षीणकेभ्यो विपरीता विक्षीणकाः कदाचिदपि क्षयरहिता इत्यर्थः। विचिन्वत्स्वपेक्षितमर्थं संपादयन्तीति विचिन्वत्काः। आ समन्ताच्छेषेण हतं पापं यैस्त आनिर्हताः। आ समन्तान्मीवन्ति स्थूलीभावं प्राप्नुवन्तीत्यामीवत्काः। अत्र विक्षीणकविचिन्वत्कानिर्हतामीवत्केषु देवानाꣳ हृदयेभ्य इत्यनुषज्जते। पञ्चमानुवाकमारभ्य नवमान्तेष्वनुवाकेष्वन्यरतोनमस्काराणि बहूनि यजुंष्यभिहितानि। तैः सर्वैः परमेश्वरस्य सार्वात्म्यं प्रतिपादयितुमेकैकेन यजुषा स्थावरं जङ्गमं चैकैकं रूपमभिहितम्। अनुवाकभेदस्तु क्रतोर्बहिः प्रयोगे मन्त्रभेदाभिप्रायेण द्रष्टव्यः। एकैकोऽनुवाक एकैको मन्त्रः। तत्र तस्य पुरश्चरणादिप्रकारस्तु रुद्रकल्पेऽभिधास्यते॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे पञ्चमप्रपाठके
नवमोऽनुवाकः॥ ९॥

(अथ चतुर्थाष्टके पञ्चमप्रपाठके दशमोऽनुवाकः)।

द्रप्सो अन्धसस्पते दधिद्रप्सो नीलंलोहित। एषां

(चित्यग्निहोमोक्तिः)

पुरुषाणामेषां पशूनां मा भेर्माऽरो मो एषां किं चनाऽऽममत् । या ते रुद्र शिवा तनूः शिवा विश्वाहभेषजी । शिवा रुद्रस्य भेषजी तया नो मृड जीवसे । इमाꣳ रुद्राय तवसे कपर्दिने क्षयद्वीराय प्र भरामहे मतिम् । यथा नः शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन् (१) अनातुरम् । मृडा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते । यच्छं च योश्च मनुरायजे पिता तदश्याम तव रुद्र प्रणीतौ । मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् । मा नो वधीः पितरं मोत मातरं प्रिया मा नस्तनुवः (२) रुद्र रीरिषः । मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः । वीरान्मा नो रुद्र भामितो वधीर्हविष्मन्तो नमसा विधेम ते । आरात्ते गोघ्न उत पूरुषघ्ने क्षयद्वीराय सुम्नमस्मे ते अस्तु । रक्षा च नो अधि च देव ब्रूह्यधा च नः शर्म यच्छ द्विबर्हाः । स्तुहि (३) श्रुतं गर्तसदं युवानं मृगं न भीममुपहत्नुमुग्रम् । मृडा जरित्रे रुद्र स्तवानो अन्यं ते अस्मन्नि वपन्तु सेनाः । परि णो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः । अव स्थिरा मघवद्भ्यस्तनुष्व

(चित्याग्निहोमोक्तिः)

मीढ्वस्तोकाय तनयाय मृडय । मीढुष्टम
शिवतम शिवो नः सुमना भव । परमे वृक्ष
आयुधं निधाय कृत्तिं वसान आ चर पिना-
कम् (४) बिभ्रदा गहि । विकिरिद विलो-
हित नमस्ते अस्तु भगवः । यास्ते सहस्रꣳ
हेतयोऽन्यमस्मन्नि वपन्तु ताः । सहस्राणि सह-
स्रधा बाहुवोस्तव हेतयः । तासामीशानो भगवः
पराचीना मुखा कृधि (५) ।

(अस्मिꣳस्तनुवः स्तुहि पिनाकमेकान्नत्रिꣳशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
पञ्चमप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ चतुर्थकाण्डे पञ्चमप्रपाठके दशमोऽनुवाकः) ।

द्वितीयमारभ्य नवमान्तेष्वनुवाकेषु विविधानि यजूंष्युभयतोनमस्काराण्यन्त-रतोनमस्काराणि चोक्तानि । अथ दशमेऽनुवाक ऋमूपा मन्त्रा उच्यन्ते । तत्र प्रथमामृचमाह—

द्रापे अन्धसस्पत इति । द्रापयति कुत्सितां गतिं प्रापयतीति द्रापिः । पापिनो नरकप्रदानेन क्लेशयतीत्यर्थः । अन्धोऽन्नं तस्य पतिः पालकः, अन्ना-नामन्नं पालयतीत्यर्थः । दरिद्रदकिंचनः स्वयं विरक्तः केवल इत्यर्थः । "एक-मेवाद्वितीयं ब्रह्म नेह नानाऽस्ति किंचन" इति श्रुतेः । कण्ठे नीलोऽन्यत्र लोहित इति नीललोहितः । एतैः शब्दैः संबोध्यमान हे रुद्रैषामस्मदीयानां पुरुषाणां पुत्रपौत्रादीनामेषामस्मदीयानां पशूनां गोमहिष्यादीनां च समूहं मा मेर्मा भीषय । एषामुक्तानां सर्वेषां मध्ये किंचनैकमपि वस्तु माऽरो मा गच्छतु । मा विनश्यात्वित्यर्थः । मो अममन्मैव रुग्णममूत् । अथ द्वितीयामाह—

या ते रुद्रेति । हे रुद्र ते त्वदीया शिवा शान्ता तनूर्या विद्यते तया तन्वा नोऽस्माञ्जीवसे जीवयितुं मृड सुखय । कथं तन्वाः शिवत्वं, तदुच्यते—

(चित्याग्निहोमोक्तिः)

यस्मादेवं विश्वाहभेषजी सर्वेष्वहःसु रोगदारिद्र्यादेरौषधवद्विनाशहेतुस्तस्माच्छिवा। किंच, यस्माद्रुद्रस्य तादात्म्यप्राप्तये भेषज्यौषधरूपा ज्ञानप्रदानेन जन्ममरणादिदुःखं निवारयति तस्मादप्येषा शिवा। अथ तृतीयामाह—

इमाꣳ रुद्रायेति। यथा येन प्रकारेण नोऽस्मदीयाय द्विपदे पुत्रपौत्रादिरूपाय मनुष्याय चतुष्पदे गोमहिष्यादिरूपाय पशवे च शमस्तत्सुखं स्यात्। किंचास्मिन्ग्रामे विश्वं सर्वं प्राणिजातं पुष्टं सुखपूर्णमनातुरमपद्रवरहितं च यथा भवति तथा वयं रुद्राय रुद्रार्थं इमां मतिं पूजाध्यानादिविषयां बुद्धिं प्रमरामहे प्रकर्षेण पोषयामः। कीदृशाय रुद्राय, तवसे बलयुक्तायास्मदपेक्षितं कर्तुं समर्थायेत्यर्थः। कपर्दिने जटाबन्धयुक्ताय तापसवेषायेत्यर्थः। क्षयद्वीराय क्षीयमाणप्रतिपक्षपुरुषायान्यथाभानरूपपापविनाशहेतव इत्यर्थः। अथ चतुर्थीमाह—

मृडा नो रुद्रोतेति। हे रुद्र नोऽस्मान्मृडयेह लोके सुखय। उतापि च नोऽस्माकं परलोकेऽपि मयः सुखं कृधि कुरु। क्षयद्वीराय क्षपितास्मदीयपापाय ते तुभ्यं नमसा नमस्कारेण विधेम परिचरेम। पिता पालको मनुः प्रजापतिः यं च सुखं च योश्च दुःखपृथग्भावं च यदायजे यत्किंचित्संपादितवांस्तत्सर्वं वयं हे रुद्र तव प्रणीतौ प्रणये स्नेहातिशये सत्यश्याम प्राप्नुयाम। अथ पञ्चमीमाह—

मा नो महान्तामिति। हे रुद्र नोऽस्मदीयं महान्तं स्थविरं पुरुषं मा रीरिषो मा हिंसीः। उतापि च नोऽस्मदीयमर्भकं बालं मा रीरिषः। किंच नोऽस्मदीयमुक्षन्तं सेचनसमर्थं युवानं पुरुषं मा रीरिषः। उतापि च नोऽस्मदीयमुक्षितं गर्भस्थं पुरुषं मा रीरिषः। नोऽस्मदीयं पितरं मा वधीः। उतापि च मातरं मा वधीः। नोऽस्मदीयाः प्रियाश्च तनूः शरीराणि मा रीरिषः। अथ षष्ठीमाह—

मा नस्तोक इति। हे रुद्र नोऽस्मदीये तोकेऽपत्यमात्रे तनये विशेषतः पुत्रे मा रीरिषो हिंसां मा कुरु। नोऽस्मदीय आयुषि मा रीरिषः। नोऽस्मदीयेषु गोषु मा रीरिषः। नोऽस्मदीयेष्वश्वेषु मा रीरिषः। भामितः क्रुद्धः सन्नोऽस्मदीयान्वीरान्भृत्यान्मा वधीः। वयं हविष्मन्तो हविर्युक्तास्ते तुभ्यं नमसा नमस्कारेण विधेम परिचरेम। अथ सप्तमीमाह—

(चित्यग्निहोमोक्तिः)

आरात्ते गोघ्न इति। गोघ्ने गोघ्नस्य पुरुषघ्ने पुत्रपौत्रादिपुरुषघ्नस्य क्षयद्वीराय क्षपितभृत्यस्य ते तवोग्ररूपमारादस्तु दूरे तिष्ठतु । यत्तु सुम्नं त्वदीयं सुखकरं रूपं तदस्मे अस्मास्वस्तु । घोराऽघ्या शिवाऽन्येति यच्छरीरद्वयमुक्तं तयोर्द्वयोर्मध्ये यद्घोरं शरीरं तद्दूरे गच्छतु। शिवं शरीरमत्राऽऽगच्छत्वित्यर्थः। किंच नोऽस्मान्रक्ष सर्वतः पालय । किंच हे देवाधिब्रूह्यस्मानितरेभ्यो यजमानेभ्योऽधिकान्देवेषु ब्रूहि । अथ यापि च द्विपहा द्वयोर्लोकयोर्वर्धयिता त्वं शर्म यच्छ सुखं देहि । अथाष्टमीमाह—

स्तुहि श्रुतमिति। हे मदीयवचः श्रुतं प्रसिद्धं रुद्रं स्तुहि । कीदृशम्, गर्तसदं गर्तसदृशे हृदयपुण्डरीके सर्वदा तिष्ठन्तम् ।

'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति' इति स्मृतेः ।

युवानं नित्यतरुणम् । उपहत्नुमुग्रं प्रलयकाले सर्वं जगत्संहर्तुमुग्ररूपिणम् । तत्र दृष्टान्तः—भीमं मृगं न भयंकरं सिंहमिव । यथा गजविदारणायोग्रः सिंहो भवति तद्वत् । हे रुद्र स्तवानोऽस्मद्वचसा स्तूयमानो जरित्रे जरणशीले दिने दिने क्षीयमाणेऽस्मच्छरीरे मृड सुखं कुरु । ते त्वदीयाः सेना अस्मदन्यं वैरिणं निवपन्तु विनाशयन्तु । अथ नवमीमाह—

परि णो रुद्रस्येति। हन्यतेऽनयेति हेतिरायुधं, रुद्रस्य हेतिर्नोऽस्मान्परिवृणक्तु परितो वर्जितान्करोतु। कदाचिदपि मा विध्यत्वित्यर्थः। त्वेषस्य क्रोधोज्ज्वलितस्याघायोरघं पापं प्रहाररूपमिच्छतो रुद्रस्य या दुर्मतिरुग्रबुद्धिः साऽप्यस्मान्परिवृणक्तु । स्थिरा विरोधिनाशनाय या दृढा दुर्मतिरस्ति तां मघवद्भ्यो हविर्लक्षणान्वयुक्तेभ्यो यजमानेभ्यः सकाशादवतनुष्वाववतामपनीतां कुरु । हे मीढ्वः कामानामभिवर्षक तोकायास्मत्पुत्राय तनयाय तदीयपुत्राय च मृडय सुखं देहि । अथ दशमीमाह—

मीढुष्टमेति। हे मीढुष्टमातिशयेन सेचक कामानामभिवर्षक, हे शिवतमातिशयेन शान्तस्वरूप नोऽस्मान्प्रति शिवः शान्तः सुमनाः सौमनस्येन स्नेहेन युक्तश्च भव । आयुधं त्रिशूलादिकं परमेऽत्युच्चते वृक्षे वटाश्वत्थादिरूपे निधाय यथाऽस्माभिर्न दृश्यते तथाऽवस्थाप्य कृत्तिं वसानो व्याघ्रचर्ममात्रं परिदधान आचरास्मदाभिमुख्येनाऽऽगच्छ । आगच्छन्नपि पिनाकं बिभ्रद्भूषणार्थं धनुर्मात्रं हस्ते धारयन्बाणादिकं परित्यज्याऽऽगच्छागच्छ । अथैकादशीमाह—

(चित्याग्निहोमोक्तिः)

विकिरिदेति । कीर्यन्ते भक्तानां संनिधौ बहुधा प्रक्षिप्यन्त इति किरयो धनानि तानि ददातीति किरिदः । विशेषेण किरिदो विकिरिदः । विलोहितो लौहित्यरहितः श्वेत इत्यर्थः । अत एव मान्त्रिकाः पञ्चाक्षरध्याने स्मरन्ति—

' ध्येयो मुक्तापरामामृतरसकलितास्त्रिप्रभः ' इति ।

यद्वा विशेषेण लोहितो विलोहितः । अत एवाष्टाक्षरध्याने स्मरन्ति—

' काञ्चनाभो ध्येयः पद्मासनस्थः ' इति ।

भगवो भगवन्षड्गुणसंपन्न । भगशब्दस्य षड्गुणवाचित्वं स्मर्यते—

' ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ' इति ।

प्रकारान्तरेण भगवच्छब्दनिर्वचनं च—

' उत्पत्तिं च विनाशं च भूतानामागतिं गतिम् ।
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ' ॥ इति ।

यथोक्तविशेषणत्रयविशिष्ट हे रुद्र ते तुभ्यं नमोऽस्तु । ते तव सहस्रं सहस्रसंख्याका हेतयो यान्यायुधानि सन्ति ताः सर्वा अस्मदन्यं धिरोधिनं निषपन्तु विनाशयन्तु । अथ द्वादशीमाह—

सहस्राणीति । हे रुद्र तव बाहुभ्यामिषवोऽस्त्राणि सहस्रधा सहस्रप्रकाराः सहस्राणि सहस्रसंख्याका विद्यन्ते । धनुःखड्गशक्तिमुद्गरादित्येवं जातिभेदेन सहस्रप्रकारत्वम् । एकैकस्यां जातौ बहवः सहस्रसंख्याकाः । हे भगवः षड्गुणोपेत त्वमीशानः समर्थः संस्तासां हेतीनां मुखा मुखानि शल्यानि पराचीना कृध्यस्मत्तः पराङ्मुखानि कुरु ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे पञ्चमप्रपाठके
दशमोऽनुवाकः ॥ १० ॥

(अथ चतुर्थाष्टके पञ्चमप्रपाठक एकादशोऽनुवाकः) ।

सहस्राणि सहस्रशो ये रुद्रा अधिभूम्याम् ।
तेषा॑ सहस्रयोजनेऽव धन्वानि तन्मसि ।

(चित्याग्निहोमोक्तिः)

अस्मिन्महत्यर्णवेऽन्तरिक्षे भवा अधिं । नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः । नीलग्रीवाः शितिकण्ठा दिवꣳ रुद्रा उपश्रिताः । ये वृक्षेषु सस्पिञ्जरा नीलग्रीवा विलोहिताः । ये भूतानामधिपतयो विशिखासः कपर्दिनः । ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् । ये पथां पथिरक्षय ऐलबृदा यव्युधः । ये तीर्थानिं (१) प्रचरन्ति सृकावन्तो निषङ्गिणः । य एतावन्तश्च भूयाꣳसश्च दिशो रुद्रा विंतस्थिरे । तेषाꣳ सहस्रयोजनेऽव धन्वानि तन्मसि । नमो रुद्रेभ्यो ये पृथिव्यां येऽन्तरिक्षे ये दिवि येषामन्नं वातो वर्षमिषवस्तेभ्यो दश प्राचीर्दशं दक्षिणा दशं प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि (२)।

(तीर्थानि यश्च षट् च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके पञ्चमप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

नमस्ते नमो हिरण्यबाहवे नमः सेहमानाय नम आव्याधिनीभ्यो नमो भवाय च नमो ज्येष्ठाय च नमो दुन्दुभ्याय च नमः सोमाय च नम इरिण्याय च व्रीपे सहस्राण्येकादश ॥ ११ ॥

नमस्ते नमो भवाय च व्रीपे सप्तविꣳशतिः ॥ २७ ॥

(चित्याग्निहोमोक्तिः)

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
पञ्चमः प्रपाठकः ॥ ५ ॥

(अथ चतुर्थकाण्डे पञ्चमप्रपाठक एकादशोऽनुवाकः) ।

दशमेऽनुवाक ऋमूपाः केचिन्मन्त्रा उक्ताः । अथैकादशे शिष्टा ऋचः शिष्टानि यजूंषि चोच्यन्ते ।

तत्राऽऽदौ दशसंख्याका ऋचः । तासु प्रथमामाह—

सहस्राणीति । भूम्यामधि भूमेरुपरि ये रुद्राः सहस्रशः सहस्रप्रकाराः सहस्राणि सहस्रसंख्याकाः सन्ति । सहस्रश इति जात्युक्तिः । विनायकप्रथम-(मथ)शैलादयो जातिभेदाः, ते सर्वेऽपि रुद्रविशेषाः । तत्राप्येकस्यां जातौ बहुभिः सहस्रैः संख्याता मूर्तिविशेषाः । तेषां सर्वेषां धन्वानि धनूंषि सहस्रयोजनेऽस्मत्तः सहस्रयोजनव्यवहितदेशेऽवतन्मसि, अवततज्याकानि स्थापयामः ।

अथ द्वितीयामाह—

अधिक्षमीति । अस्मिन्दृश्यमाने महत्यर्णवे महासमुद्रसदृशे प्रौढेऽन्तरिक्षेऽधिश्रित्य वर्तमाना भवा रुद्रमूर्तिविशेषा ये सन्ति, तेषां सहस्रयोजन इत्याद्युक्तार्थमुत्तरार्धं द्वितीयादिषु नवमान्तमृक्षु, अनुषज्यते । तदनुषङ्गद्योतनायैव दशम्यामृचि पुनः पठितम् । अथ तृतीयामाह—

नीलग्रीवा इति । ग्रीवायामेकस्मिन्प्रदेशे नीलवर्णा नीलग्रीवाः । प्रदेशान्तरे श्वेतवर्णाः शितिकण्ठाः । तादृशाः शर्वा रुद्रमूर्तिविशेषाः । कीदृशाः, अधःक्षमाचरा भूमेरधस्तात्पातालेषु संचरन्ति । तेषामित्यादि पूर्ववत् । अथ चतुर्थीमाह—

नीलग्रीवा इति । दिवमुपाश्रिताः स्वर्गे वर्तमानाः । अथ पञ्चमीमाह—

ये वृक्षेष्विति । यथा लोकेष्ववस्थिता रुद्रास्तथा वृक्षेष्ववस्थिताः । तेषु केचित्सपिङ्गराः शष्पवद्बालतृणवत्पिङ्गरवर्णाः । नीलग्रीवा नीलवर्णग्रीवाः । केचिद्ग्रीवादेशे नीलवर्णोपेताः । अपरे पुनर्विलोहिता विशेषेण रक्तवर्णाः । ईदृशा ये सन्ति तेषामित्यादि । अथ षष्ठीमाह—

(नित्यग्निहोमोक्तिः)

ये भूतानामिति । भूतशब्देमान्तार्हितशरीराः सन्तो मनुष्योपद्रवकारिणो गणविशेषा उच्यन्ते । तेषामधिपतयो ये रुद्रास्तेषु केचिद्विशिखासो मुण्डितमूर्धानः । अपरे कपर्दिनो जटाचन्द्रोपेतास्तेषमित्यादि । अथ सप्तमीमाह—

ये अन्नेष्विति । ये रुद्रा अन्नेषु भुज्यमानेषु गूढत्वेनावस्थिताः सन्तो जनान्विविध्यन्ति विशेषेण धातुवैषम्यादिना बाधन्ते । तथा पात्रेषु पातव्येषु क्षीरोदकादिषु गूढत्वेनावस्थिताः पिबतो जनान्विविध्यन्ति, तेषामित्यादि ।

अथाष्टमीमाह—ये पथामिति ।

ये रुद्राः पथिरक्षयो लौकिकवैदिकमार्गाणां रक्षकाः । नात्र केषांचिदेव मार्गाणा किंतु सर्वेषां पथां ते च रक्षकाः । ऐलबृदा इराऽन्नं तस्य समूह ऐरम् । ऐरमैलं तद्बिभ्रतीत्यैलभृतः । ऐलभृत एवैलबृदा अन्नप्रदानेन पोषका इत्यर्थः । ते च यव्युधः, यौति मिश्री भवति विरोधं करोतीति युः शत्रुः । युभिः शत्रुभिः सह युध्यन्तीति यव्युधः । अस्मदनिष्टनिवारका इत्यर्थः । तेषामित्यादि । अथ नवमीमाह—

ये तीर्थानीति । ये रुद्रास्तीर्थानि काशीप्रयागादीनि रक्षितुं प्रचरन्ति । कीदृशा रुद्राः, सकावन्तः सकाश्छुरिका हस्ते धार्यमाणास्तत्क्रियामा आयुधविशेषास्तद्युक्ताः केचित् । अपरे निषङ्गिणः खड्गयुक्तास्तेषामित्यादि । अथ दशमीमाह—

य एतावन्तश्चेति । ये रुद्रा एतावन्तश्च सहस्राणि सहस्रश इत्याद्युक्तसंख्यावन्त उक्तास्तावन्तोऽपि भूयांसश्चेतोऽप्यधिका अन्ये बहवोऽपि दिशो वितस्थिरे सर्वा दिशः प्रविश्य स्थितास्तेषामित्यादि ।

इत्थं द्वादशसंख्याका ऋच उक्ताः । अथ त्रीणि यजूंष्युच्यन्ते—

नमो रुद्रेभ्य इति । अत्र पृथिव्यादिलोकभेदादिषुभेदाच्च यजुस्त्रयं द्रष्टव्यम् । तदेवं पाठः संपद्यते—नमो रुद्रेभ्य इत्युपक्रम्य ये पृथिव्यां येषामन्नमिषव इत्याद्यो मन्त्राः येऽन्तरिक्षे येषां वात इषव इति द्वितीयो मन्त्रः ये दिवि येषां वर्षमिषव इति तृतीयो मन्त्रः । तेभ्यो दश प्राचीरित्यादि सर्वत्र समानम् । ये रुद्राः पृथिव्यां वर्तन्ते तेष्वपि रुद्रेषु येषां रुद्रविशेषाणामन्नमेवेषवो बाणाः,

१ क. ख. घ. ङ. सकाः आरि° ।

(चित्याग्निहोमोक्तिः)

अपध्यान्नमक्षणे प्रवर्त्य वाऽन्यार्थं चौर्यं कारयित्वा वा यान्हिंसन्ति तान्प्रति हिंसकानां रुद्राणामन्नमेवैषवस्तेभ्यः पृथिव्यां स्थितेभ्योऽन्तरिक्षगतेभ्यश्च रुद्रेभ्यो नमोऽस्तु । तथा ये रुद्रा अन्तरिक्षे वर्तन्ते तेषामपि मध्ये येषां वात इषवस्तीक्ष्णेन वायुना रोगानुत्पाद्य हिंसन्ति तेभ्योऽन्तरिक्षवर्तिभ्यो वातेषुभ्यश्च रुद्रेभ्यो नमोऽस्तु । तथा ये रुद्रा दिवि वर्तन्ते तेष्वपि येषां रुद्रविशेषाणां वर्षमेवेषवोऽतिवृष्ट्यनावृष्टिभ्यां प्राणिनो हिंसन्ति तेभ्यो दिवि स्थितेभ्यो वर्षेषुभ्यो रुद्रेभ्यो नमोऽस्तु । कीदृशो नमस्कार इति स एव विशेष्यते—दश प्राचीः, प्राङ्मुखत्वेनाञ्जलिकरणे दशाङ्गुलयः प्रागग्रा भवन्ति । एवं दक्षिणादिषूर्ध्वान्तेषु योज्यम् । ईदृशैरञ्जलिविशेषैस्तेभ्यो रुद्रेभ्यो नमोऽस्तु । ते च रुद्रा नोऽस्मान्मृडयन्तु सुखयन्तु । ते च वयं नमस्कृतरुद्राः सन्तो यं वैरिणं तूष्णीमवस्थितमपि द्विष्मः, यश्च वैरी नोऽस्मांस्तूष्णीमवस्थितानपि द्वेष्टि तमुभयविधं वैरिणं हे रुद्रा वो युष्माकं जम्भे विदारितास्ये दधामि स्थापयामि ।

तमिममेकादशानुवाकात्मकं रुद्राध्यायं विनियुङ्क्ते—

" रुद्रो वा एष यदग्निः स एतर्हि जातो यर्हि सर्वश्चितः स यथा वत्सो जातः स्तनं प्रेप्सत्येवं वा एष एतर्हि भागधेयं प्रेप्सति तस्मै यदाहुतिं न जुहुयादध्वर्युं च यजमानं च ध्यायेच्छतरुद्रीयं जुहोति भागधेयेनैवैनꣳ शमयति नाऽऽर्तिमार्छत्यध्वर्युं यजमानः " [तै० का० ५ प्र० ४ अ० ३] इति ।

यस्मिन्काले चीयमानोऽग्निरशेषचितिनिष्पादनेन सर्वश्चितो भवति, एतस्मिन्काले ऽयमग्निरुत्पन्नो भवति । सोऽयमुत्पन्नोऽग्निरेव रुद्र इत्युच्यते । देवः स्वकीयवामवस्वदाने सति रोदनाद्वा प्राणिनां रोदनहेतुदुःखस्य द्रावणाद्वाऽग्निरेव रुद्रः । यथा लोके जातो वत्सस्तदानमिव स्तनं प्राप्तुमिच्छति, एवमेवैष एतस्मिंश्चितिसंपूर्तिकाले समुत्पन्नो रुद्रनामकोऽग्निः स्वकीयं भागमिच्छति । तस्मा अग्नये कस्याश्चिदाहुतेरहोमेऽध्वर्युं यजमानं च भक्षयितुं ध्यायेदग्निः । अतस्तत्परिहाराय शतरुद्रीयं जुहुयात् । शतमित्यपरिमितत्वं लक्ष्यते । अपरिमिता रुद्रा यस्मिन्नध्याये प्रतिपाद्यन्ते सोऽध्यायः शतरुद्रीयः । तेन होमे सति स्वकीयभागेन रुद्रस्य तुष्टत्वादध्वर्युयजमानौ न म्रियेते । अथ होमद्रव्यं विधत्ते—

" यद्ग्राम्याणां पशूनां पयसा जुहुयाद्ग्राम्यान्पशून्छुचार्पयेद्यदारण्याना-

मारण्याञ्जार्तिलयवाग्वा वा जुहुयाद्गवीधुकयवाग्वा वा न ग्राम्यान्पशून्हिनस्ति नाऽऽरण्यान् " [तं० का० ५ प्र० ४ अ० ३] इति ।

शुचार्पयेत्संतापेन रोगेण योजयेत् । जर्तिला आरण्यतिलाः । गवीधुका आरण्यगोधूमाः । पक्षान्तरं विधत्ते—

" अथो खल्वाहुरनाहुतिर्वै जर्तिलाश्च गवीधुकाश्चेत्यजक्षीरेण जुहोत्याग्नेयी वा एषा यदजाऽऽहुत्यैव जुहोति न ग्राम्यान्पशून्हिनस्ति नाऽऽरण्यान् " [तं० का० ५ प्र० ४ अ० ३] इति ।

अदनीयं यद्द्रव्यं तदेवाऽऽहुतियोग्यं, ' यदन्नः पुरुषो भवति तदन्नास्तस्य देवताः ' इति न्यायात् । जर्तिला गवीधुकाश्च मनुष्यैर्नाद्यन्ते, तस्मादाहुतियोग्या न भवन्तीत्याहुः पूर्वपक्षोपन्यासादूर्ध्वमाहुः । तस्मादुभयं परित्यज्याऽजाक्षीरेण जुहुयात् । अजाग्न्योरुभयोः प्रजापतिमुखजन्यत्वेन साजात्यादियमजाऽऽग्नेयी । अत आहुतियोग्यैव । अतस्तत्क्षीरद्रव्येण जुहोति । ग्राम्यारण्यपशूनां स्वीकारात्तेऽपि पशवो न हिंस्यन्ते ।

होमसाधनभूतां जुहूमपवदितुं साधनान्तरं विधत्ते—

"अङ्गिरसः सुवर्गं लोकं यन्तोऽजायां घर्मं प्रासिञ्चन्सा शोचन्ती पर्णं पराऽजिहीत सोऽर्कोऽभवत्तदर्कस्यार्कत्वमर्कपर्णेन जुहोति सयोनित्वाय " [तं० का० ५ प्र० ४ अ० ३] इति ।

प्रवर्ग्यकाले महावीरे संतप्तं घृतं क्षीरसहितं घर्मस्तं घर्मं प्रयाणव्यग्रा अङ्गिरसः प्रमादादजायां प्रकर्षेणासिञ्चन् । सा शोचन्ती साऽज्यजा तेनोष्णघृतेन तप्यमाना पर्णसदृशं स्वकीयं रोमसंघं भूमावपातयत् । स च रोमसंघातोऽर्कः प्रसिद्धार्करूपेण प्ररूढः । अर्चनीयेन पूज्येन प्रवर्ग्यघृतेन तथाविधेनाचारोमसंघातेन चोत्पन्नत्वादस्य स्थावरस्यार्कनाम संपन्नम् । तेनार्कपर्णेन होमे सति पर्णक्षीरयोरुभयोरप्यनन्यकार्यत्वात्तत्समानयोनित्वं संपद्यते । होमकाले कंचिद्विशेषं विधत्ते—

" उदङ्तिष्ठञ्जुहोत्येषा वै रुद्रस्य दिक्स्वायामेव दिशि रुद्रं निरवदयते चरमायामिष्टकायां जुहोत्यन्तत एव रुद्रं निरवदयते " [तं० का० ५ प्र० ४ अ० ३] इति ।

+ख. पुस्तकाटिप्पाणिकायाम् ' अजक्षीरेणेति पाठो भवितुं युक्तः ' इति वर्तते ।

(चित्याग्निहोमोक्तिः)

अन्यप्रदेशवर्तिनी चरमेष्टका । सा च सूत्रकारेण दर्शिता—"उत्तरस्य पक्षस्योत्तरापरस्याः स्रक्त्यां विकर्ण्यां स्वयमातृण्णायाम्" इति । अग्न्यदेशगतेन होमेन क्रूरमिमं रुद्रमन्तत एव निःसारयति ।

रुद्राध्याये होमसाधनं मन्त्रविभागं विधत्ते—

"त्रेधाविभक्तं जुहोति त्रय इमे लोका इमानेव लोकान्तमावद्धीयान्करोति" [तै० का० ५ प्र० ४ अ० ३] इति ।

तत्र त्रेधाविभाग एवं करणीयः—नमस्ते रुद्रेत्यारभ्य तत्पतिभ्यश्च वो नम इत्यन्तः प्रथमो भागः । नमो अभेभ्य इत्यारभ्यावार्याय चेत्यन्तो द्वितीयो भागः । नमः प्रतरणाय चेत्यारभ्य य एतावन्तश्चेत्यृचा सहितस्तृतीयो भागः ।

त्रिष्वव्याहृतिषु क्रमेण जानुदघ्नादिदेशेषु स्रुग्धारणं हस्ताभिनयेन विधत्ते—

"इयत्यग्रे जुहोत्यथेयत्यथैयति त्रय इमे लोका एभ्य एवैनं लोकेभ्यः शमयति" [तै० का० ५ प्र० ४ अ० ३] इति ।

नमो रुद्रेभ्यो ये पृथिव्यामित्यादियजुस्त्रयसाध्यं होमं विधत्ते—

तिस्र उत्तरा आहुतीर्जुहोति षट्संपद्यन्ते षड्वा ऋतव ऋतुभिरेवैनꣳ शमयति" [तै० का० ५ प्र० ४ अ० ३] इति ।

पूर्वोत्तरपक्षमङ्गीकृत्याऽनुपरिक्रम्य होमं विधत्ते—

"यदनुपरिक्रामं जुहुयादन्तरवचारिणꣳ रुद्रं कुर्यादथो खल्वाहुः कस्यां वाऽह दिशि रुद्रः कस्यां वेत्यनुपरिक्राममेव होतव्यमपरिवर्गमेवैनꣳ शमयति" [तै० का० ५ प्र० ४ अ० ३] इति ।

अनुपरिक्रामममुक्रमेण परितो भ्रमणं कृत्वा यदि जुहुयात्तदानीं तं रुद्रमन्तरवचारिणमग्निक्षेत्रस्य मध्ये प्रविश्य चरन्तं कुर्यात् । स च प्रविष्टः क्रूरत्वादुपद्रवं करोत्येव । तस्मात्परिभ्रमणं न कर्तव्यमिति पूर्वः पक्षः । अथोशब्दः सिद्धान्तोपक्रमार्थः । अभिज्ञास्त्वेवमाहुः—खलुअहशब्द उपन्यस्तपक्षनिराकरणद्योतनार्थः । यदुक्तं पूर्वपक्षिणा तन्न भवतीत्यर्थः । अयं रुद्रः सर्वत्र संचरन्कदा कस्यां दिशि वर्तते[1] कस्यां वा न वर्तत इति को ज्ञातुं समर्थः । अतो रुद्रमन्वेष्टुमनुक्रमेण परिभ्रमणं कृत्वैव होतव्यम् । तथा सति परितो यत्र क्वापि

---

१ क. °वर्तते । २ क. ग. ङ. °धनम° ।

(चित्याग्निहोमोक्तिः)

स्थितं रुद्रमवर्जयित्वैव शान्तं करोति । शान्तत्वादेवास्यः प्रविश्यायं रुद्रः स्वजन्तः स्वचरन्नोपद्रवं करोतीत्यर्थः ।

नमो रुद्रेभ्य इत्यादिमन्त्राणां यजमानवाचनं विधत्ते—

" एता वै देवताः सुवर्ग्या या उत्तमास्ता यजमानं वाचयति ताभिरेवैनꣳ सुवर्गं लोकं गमयति " [तं० का० ५ प्र० ४ अ० ३] इति ।

एतैर्मन्त्रैः प्रतिपाद्या या देवताः सन्ति ताः स्वर्गहेतवोऽत एवोत्तमा उत्कृष्टाः। चरममन्त्रप्रतिपाद्यत्वाद्वोत्तमत्वम्। ता अध्वर्युर्यजमानं वाचयेत्तत्प्रतिपादकानि मन्त्रानि पाठयेदित्यर्थः । तथा सति ताभिरेव देवताभिरेनं यजमानं स्वर्गं प्रापयति । अर्कपर्णस्य परित्यागदेशं विधत्ते—

" यं द्विष्यात्तस्य स्वचरे पशूनां न्यस्येद्यः प्रथमः पशुरभितिष्ठति स आर्तिमार्छति " [तं० का० ५ प्र० ४ अ० ३] इति ।

यं पुरुषं यजमानो द्विष्यात्तस्य पशूनां स्वचरप्रदेशे तदर्कपर्णं परित्यजेत् । तत्यक्तं पर्णं यः पशुः प्रथम इतरेभ्यः पशुभ्यः पूर्वः सन्नभिक्रम्य तिष्ठति स त्रिवेत । अत्र विनियोगसंग्रहः—

प्रश्ने तु पञ्चमे प्रोक्तः शतरुद्रीयहोमकः।
तमापतिभ्य इत्यन्त एको मन्त्रः प्रकीर्तितः ॥
अवार्याप्येत्यन्त एकस्तन्मसीत्यन्त उत्तरः।
नमो रुद्रेभ्य इत्येष पृथिव्यादिविभेदवः ।
भेषा भिन्नास्ततो होमे षण्मन्त्रा इह कीर्तिताः ॥

अत्र मीमांसा ।

दक्षिणाध्यायस्याष्टमपादे चिन्तितम्—

जर्तिलोक्तिश्चतुर्षा किं विकल्पोऽथ पयश्रु(स्तु)तिः।
विकल्पः पूर्ववन्मैवं वाक्यैक्यात्पयसा सह ॥

अत्रो श्रूयते—" जर्तिलयवाग्वा वा जुहुयाद्वधीकयवाग्वा वा न ग्राम्यान्पशून्हिनस्ति नाऽऽरण्यानथो खल्वाहुरनाहुतिर्वै जर्तिलाश्च गवीधुकाश्चेत्यजक्षीरेण जुहोत्याग्नेयी वा एषा यदजाऽऽहुत्यैव जुहोति" इति । जर्तिला आरण्यतिला गवीधुका आरण्यगोधूमास्तयोरुभयोर्विकल्पः श्रौत एव । अनाहुतिरिति पूर्वयोः पक्षयोर्दूषितत्वाद्धोमाभावस्तृतीयः पक्षः । न चात्र जर्तिलगवीधुकयोरनाहुतित्ववचनेन पर्युदासः सेत्स्यति । आहुतिपदान्वितस्य नञ्पदस्य

(परिषेचनाविकर्षणाद्यभिधानम्)

जर्तिलगवीधुकपदान्वयायोगात्। पयोविधिश्चतुर्थः पक्षः। एतेषां परस्परविरुद्धानां चतुर्णां गत्यन्तराभावेन वोढशीग्रहणवद्विकल्पे प्राप्ते भूयः—पयोविधिना तह जर्तिलादेरेकवाक्यत्वेनार्थवादत्वं युक्तम्। ग्राम्यारण्यपशुहिंसाराहित्येन प्रशस्तयोरपि जर्तिलगवीधुकयोरग्निहोत्रं प्रत्याहुतित्वं नास्ति। पयस्तु तदस्ति। इत्थं महाभागं पय इति। तस्मादर्थवादः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे पञ्चमप्रपाठक
एकादशोऽनुवाकः॥ ११॥

वेदार्थस्य प्रकाशेन तमो हार्दं निरस्यति।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवीरबुक्कमहाराजस्याऽऽज्ञापरिपालकेन माधवाचार्येण विरचिते वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे पञ्चमः प्रपाठकः॥ ५॥

(अथ चतुर्थाष्टके षष्ठः प्रपाठकः)।

(तत्र प्रथमोऽनुवाकः)।

हरिः ॐ।

अश्मन्मयी पवते शिश्रियाणा वातें पर्जन्ये वरुणस्य शुष्मे। अद्भ्य ओषधीभ्यो वनस्पतिभ्योऽधि संभृतां नो[1] दधन्मूर्जं धत्त मरुतः सꣳ ररा॒णाः। अश्म॑न्स्ते क्षुमुं ते क्षुगृच्छतु यं द्विष्मः। समुद्रस्य त्वाऽवाक्याऽभे परि व्ययामसि। पावको अस्मभ्यꣳ शिवो भव।

---

१ ख. घ. °कल्प इति पा°।

हिमस्य त्वा जरायुणाऽग्ने परि व्ययामसि ।
पावको अस्मभ्यꣳ शिवो भव । उप (१)
ज्मन्नुप वेतसेऽवतरं नदीष्वा । अग्ने पित्तमपामसि । मण्डूकि ताभिरा गहि सेमं नो यज्ञम् ।
पावकवर्णꣳ शिवं कृधि । पावक आ चितयन्त्या कृपा । क्षामन्रुरुच उषसो न भानुना ।
तूर्वन्न यामन्नेतशस्य नू रण आ यो घृणे ।
न तृषाणो अजरः । अग्ने पावक रोचिषा
मन्द्रया देव जिह्वया । आ देवान् (२) वक्षि
यक्षि च । स नः पावक दीदिवोऽग्ने देवाꣳ
इहाऽऽ वह । उप यज्ञꣳ हविश्च नः । अग्नाविदं न्ययमꣳ समुद्रस्य निवेशनम् । अन्यं ते
अस्मत्तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो
भव । नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे । अन्यं ते अस्मत्तपन्तु हेतयः पावको
अस्मभ्यꣳ शिवो भव । नृषदे वट् (३)
अप्सुषदे वड्वनसदे वड्वहिषदे वट्सुवर्विदे
वट् । ये देवा देवानां यज्ञिया यज्ञियानाꣳ
संवत्सरीणमुप भागमासते । अहुतादो हविषो
यज्ञे अस्मिन्त्स्वयं जुहुध्वं मधुनो घृतस्य । ये
देवा देवेष्वधि देवत्वमायन्ये ब्रह्मणः पुरएतारो
अस्य । येभ्यो नर्ते पवते धाम किं चन न द्यावो न पृथिव्या अधि स्नुषु । प्राणदाः (४)

(परिवेचनाविकर्षणाद्यभिधानम्)

अपानदा व्यानदाश्चक्षुर्दा वर्चोदा वरिवोदाः। अग्ने त्वं अस्मत्तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव। अग्निस्तिग्मेन शोचिषा यꣳसद्विश्वं न्यत्रिणम्। अग्निर्नो वꣳसते रयिम्। सैमाऽनीकेन सुविदत्रो अस्मे यष्टा देवाꣳ आयजिष्ठः स्वस्ति। अदब्धो गोपा उत नः परस्पा अग्ने युमदुत रेवाद्दिदीहि (५)

(उर्प देवान्वट्प्राणदाश्चतुश्चत्वारिꣳशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके षष्ठप्रपाठके प्रथमोऽनुवाकः॥ १॥

(अथ चतुर्थकाण्डे षष्ठः प्रपाठकः)।

(तत्र प्रथमोऽनुवाकः)।

यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्॥
प्रपाठके पञ्चमे हि चितिसंपूर्णनन्तरम्।
वर्णितो रुद्रहोमोऽथ षष्ठे वाच्याऽग्निसंस्कृतिः॥
परिवेचनमारभ्य संस्कारा ये चिकीर्षिताः।
ते पञ्चस्वनुवाकेषु प्रोक्तशेषोऽश्वमेधगः॥

तत्र प्रथमानुवाके परिवेचनविकर्षणाद्योऽभिधीयन्ते।

कल्पः—" उदक्कुम्भमादायाध्वर्युरश्मन्मूर्जमिति त्रिः प्रदक्षिणमग्निं परिषिञ्चत्यर्पयति " इति। पाठस्तु—

अश्मन्मूर्जामिति। हे मरुतः संरराणाः सम्यग्दानशीला यूयमग्न्यादिगतामूर्जं बलहेतुमिषमन्नं नोऽस्मभ्यं धत्त संपादयत। कीदृशामिषम्, अश्मन्पाषाणे पर्वते मेरुविन्ध्यहिमवदादौ वा। यद्वा अश्मन्वायौ पर्जन्ये वर्षणक्षमे मौढे मेघे वरुणस्य गुल्मे वरुणसंबन्धिनि बले च शिश्रियाणामाश्रितामूर्जं सारभूतां, तथाऽप्स्वप्सु जलेभ्य ओषधीभ्यो व्रीह्यादिभ्यो वनस्पतिभ्य उदुम्बरादिभ्यः

१ क. घ. क. °मेकिकः। तं।

सकाशादधिसंभृतामधिकत्वेन सम्यक्संपादिताम् । यदन्नमश्नादिष्वाश्रित्य सारत्वेनावातिष्ठते, यच्च जलादिभ्यः संपाद्यते, यदप्यस्माकं बलहेतुस्तथाविधमन्नं प्रयच्छ । तमेतं मन्त्रं विनियुङ्क्ते--

" अश्मन्नूर्जमिति परि षिञ्चति मार्जयत्येवैनमग्नौ तर्पयत्येव स एनं तृप्तोऽक्षुध्यन्नशोचन्नमुष्मिँल्लोक उप तिष्ठते " [सं०का० ५ प्र० ४ अ० ४]इति ।

एनमग्निं मार्जयति शुद्धं करोति । अपि च तर्पयति । स तृप्तोऽग्निः स्वर्गलोके क्षुत्पीडारहितः संतापरहितः सन्नेनं यजमानं सेवते । एवद्वेदनं प्रशंसति—

"तृप्यति प्रजया पशुभिर्य एवं वेद" [सं०का० ५ प्र० ४ अ० ४]इति ।

मन्त्रस्य चतुर्थपाद ऊर्जं मरुत इति पदद्वयस्य तात्पर्यं प्रदर्शयति—

" तां न इषमूर्जं धत्त मरुतः सꣳरराणा इत्याहान्नं वा ऊर्गन्नं मरुतोऽन्नमेवाव रुन्धे " [सं० का० ५ प्र० ४ अ० ४] इति ।

ऊर्जबलहेतुरन्नमेव, मरुतोऽप्यन्नसंपादकत्वादन्नम् । अत उभयोः पठनादन्नं प्राप्नोति । कल्पः—" अश्मन्नस्ते क्षुदमुं ते शुगृच्छत्विति त्रिरपरिषिञ्चन्नाति पर्येति " इति । पाठस्तु—

अश्मन्नस्ते क्षुदमुमिति । हेऽश्मन्निष्टकामिर्दृढं निष्पादितत्वात्पाषाणसदृशाग्ने यत्ते क्षुत्त्वदीया क्षुत्पीडा या च ते शुक्त्वदीयः संतापस्तदुभयमपि यं वैरिणं द्विष्मः, अमुं द्वेष्यमृच्छतु प्राप्नोतु । अस्य मन्त्रस्य तात्पर्यं दर्शयति—

" अश्मन्नस्ते क्षुदमुं ते शुगृच्छतु यं द्विष्म इत्याह यमेव द्वेष्टि तमस्य क्षुधा च शुचा चार्पयति " [सं० का० ५ प्र० ४ अ० ४] इति ।

परिषेचनकाले प्रदक्षिणावृत्तिं विधत्ते—

" त्रिः परिषिञ्चन्पर्येति त्रिवृद्वा अग्नेर्यावानेवाग्निस्तस्य शुचꣳ शमयति " [सं०का०५ प्र० ४ अ० ४] इति । अग्नेराहवनीयादिरूपेण त्रिगुणत्वम् ।

परिषेचनरहितां+प्रदक्षिणावृत्तिं विधत्ते—

" त्रिः पुनः पर्येति षट्सं पद्यन्ते षडवा ऋतव ऋतुभिरेवास्य शुचꣳ शमयति " [सं० का० ५ प्र० ४ अ० ४] इति ।

+ख. पुस्तकादिष्वधिकायां 'परिषेचनरहितां प्रदक्षिणावृत्तिमिति पाठो भवितुं युक्तः' इति ।

---

१ ख. च. छ. त्रिः पर्येति २ घ. ङ. °न्पर्येति ।

(परिवेचनविकर्षणाद्यभिधानम्)

पूर्वेण प्रदक्षिणत्रयेण सह षट्संख्यासंपत्तिः।

कल्पः—" अवकां वेतसशाखां मण्डूकं च दर्भिवंशे प्रवध्य समुद्रस्य त्वाऽवाकयेति तप्ताभिरष्टाभिर्वाऽग्निं विकर्षति " इति। तत्र प्रथमामाह—

समुद्रस्य त्वेति। अवका शैवालम्। हेऽग्ने त्वां समुद्रस्यावाकया समुद्रसंबन्धिना शैवालेन परिव्ययामसि परितः संवृणोमि। उपरिभागे सर्वत्र विकर्षामीत्यर्थः। त्वं चास्मभ्यमस्मदर्थं पावकः शोधकः शिवः शान्तश्च भव। अथ द्वितीयामाह—

हिमस्य त्वेति। हेऽग्ने त्वां हिमस्य शैत्यस्य जरायुणा जरायुवदुत्पत्तिस्थानीयेन शैवालेन। शेषं पूर्ववत्। अथ तृतीयामाह—

उप ज्मन्नुपेति। हेऽग्ने ज्मा पृथिवी तस्यामुपगतो वर्तसे। तथा वेतसे वञ्जुलक उपगतो वर्तसे। तथा नदीष्वा नदीजलेष्वपि अवस्तरमतिशयेन रक्षकत्वं यथा भवति तथोपागतो वर्तसे। तथा त्वमपां पित्तमसि तेजोऽसि।

अथ चतुर्थीमाह—

मण्डूकि ताभिरिति। हे मण्डूकि मण्डूकजातीये ताभिः समनशीरोकाभिरग्निभिः सहाऽऽगच्छागच्छ। सा त्वामिममनुष्ठीयमानं नोऽस्मदीयं यज्ञं पावकवर्णमग्निसमानतेजस्कं शिवं फलप्रदत्वेन शान्तं कृधि कुरु। अथ पञ्चमीमाह—

पावक आ इति। हे मण्डूकि पावकेऽस्मिन्नग्नौ विषयभूते सति चिन्तयित्न्वा चिन्वानया कृपा कृपया सामर्थ्येन युक्ता सत्या इहाऽऽगच्छ। स्वय्यागतायां सत्यामयमग्निः क्षामन्क्षाम्नि पृथिव्यां रुरुचे दीप्तिवान्। तत्र दृष्टान्तः—उषसो न भानुना। उषःकालसंबन्धिना प्रकाशेन यथा पदार्था दीप्यन्ते तद्वत्।

अथ षष्ठीमाह—

तूर्वन्न यामन्निति। योऽग्निरेतशस्य गमनकुशलस्याश्वस्य यामन्नियामके रणे युद्धे तूर्वन्न परबलानि हिंसन्निवाऽऽभुणे नु सर्वतो दीप्यते खलु सोऽग्निररुरो जरारहितस्तृष्णो न तृष्णायुक्तो न भवति। यथा लोके शीघ्रगमनस्वभावमश्वं वामहस्तगतेन खलीनेन दृढं नियम्य रणे प्रवर्तमानः पुरुषः परबलान्

---

१ ख. अवाका। २ ख. च. 'थोपसं'। ३ ख. च. दीप्तिमान्।

(परिवेचनविकर्षणाद्यभिधानम्)

हिंसीत्स्व स्वरत एवमयमग्निः प्रज्वलति न कदाचिज्जीर्यति, नाप्यस्मै वृष्ण्यायुक्तः किंतु तृप्त इत्यर्थः। अथ सप्तमीमाह—

अग्ने पावकेति । हे पावक शोधक देव द्योतनात्मकाग्ने रोचिषा दीप्तिमत्या मन्द्रया श्लक्ष्णया जिह्वया वाचा देवानावक्षि आवह यक्षि यज ।

अथाष्टमीमाह—

स नः पावकेति । हे पावक शोधक दीदिवो दीप्यमानाग्ने नोऽस्मदर्थं देवानिह कर्मण्यावह, अस्माकमिमं यज्ञं हविश्चोप देवतमीपे प्रापय । एतैरष्टभिर्मन्त्रैः साध्यं विकर्षणं विधत्ते—

"अपां वा एतत्पृष्ठं यद्वेतसोऽपाꣳ शरोऽवका वेतसशाखया चावकाभिश्च विकर्षत्यापो वै शान्ताः शान्ताभिरेवास्य शुचꣳ शमयति" [सं० का० ५ प्र० ४ अ० ४] इति ।

योऽयं वेतसः सोऽयमपां पृष्ठस्थानीयोऽप्सु जायमानत्वात् । या अवकाः शैवालाभिधास्ता अपां शरः सारं दग्धो मण्डूकमिव । तस्मादेताभ्यामग्निं विकर्षेत्, चितेरुपरि नानादिक्षु विविधमेतदुभयमाकर्षेदित्यर्थः । आपो दाहनिवारकत्वाच्छान्ताः । अप्संबन्धिना द्रव्यद्वयेन विकर्षणे सति शान्ताभिर्ज्वालाभिरेवास्याग्नेः शुचं शमयति ।

पूर्वोक्तद्रव्यद्वयेन सह मण्डूकस्यापि विकर्षणसाधनत्वं विधत्ते—

"यो वा अग्निं चितं प्रथमः पशुरधिक्रामतीश्वरो वै तꣳ शुचा प्रदहो मण्डूकेन विकर्षत्येव वै पशूनामनुपजीविनीयो न वा एष ग्राम्येषु पशुषु हितो नाऽऽरण्येषु तमेव शुचार्पयति" [सं०का० ५प्र०४ अ० ४] इति ।

गोमहिषाजादीनां मध्ये यः पशुरिमिष्टकाभिश्चितमग्निं प्रथममधिरुह्य पादेनाऽऽक्रामति तं पशुं संतापेन प्रदग्धुमयमग्निः प्रभुर्भवति । तस्मात्पश्चन्तरेण विकर्षणं न कुर्यात्किंतु मण्डूकेन कुर्यात् । मण्डूकश्च यागयोग्येषु ग्राम्येष्वारण्येषु च पशुष्वनन्तर्भावाल्लोकेऽपि गोमहिषादिवदुपयोगादर्शनाच्च केनाप्युपजीव्यो न भवति । अतस्तेन विकर्षणे तमेव मण्डूकं संतापेन योजयति ।

तस्मिन्विकर्षणे समुद्रस्य त्वेत्यादीन्मन्त्रान्विनियुङ्क्ते—

"अष्टाभिर्वि कर्षत्यष्टाक्षरा गायत्री गायत्रोऽग्नियावानेवाग्निस्तस्य शुचꣳ शमयति" [सं० का० ५ प्र० ४ अ० ४] इति ।

(परिषेचनाविकर्षणाद्याभिधानम्)

सामान्यतो विहितान्मन्त्रान्विशेषतो विधत्ते—

" पावकवतीभिरर्चं वै पावकोऽग्नेरेवास्य शुचः शमयति " [सं० का० ५ प्र० ४ अ० ४] इति । पावको अस्मभ्यशिवो भवेत्येवं पावकशब्दो वाग्वृक्षु वर्तते ताः पावकवत्य इत्यर्थः । ताभिर्विकर्षतीत्यनुवर्तते । पावकस्याग्नेरभिधानहेतुत्वादृक्त्वम् ।

कल्पः—" अपामिदं न्ययनं समुद्रस्य शोचिष इति द्वाभ्यामग्निमभिमृशेदिति " इति । तत्र प्रथमामाह—

अपामिदमिति । इदं खित्याग्निस्थानमपां न्ययनं नियमेन प्राप्तिस्थानं यागद्वाराऽऽप्यापः प्राप्यन्ते । अत एवापां बहुलत्वात्तन्मुखस्य निवेशनं गृहस्थानीयम् । तद्रूप हेऽग्ने ते स्वदीया हेतयोऽस्मत्तोऽन्यं विरोधिनं पुरुषं तपन्तु क्लेशयन्तु । अस्मभ्यमस्मदर्थं पावकः शुद्धः शिवः शान्तश्च भव । अथ द्वितीयामाह—

नमस्ते हरस इति । हेऽग्ने ते तव हरसे रसानां हन्त्रे शोचिषे शोषणहेतवे तेजसे नमोऽस्तु । किंच, ते तवार्चिषे पदार्थान्प्रकाशयित्रे तेजसे नमोऽस्तु । अन्यमित्यादि पूर्ववत् । एतन्मन्त्रसाध्यादधिरोहणात्पूर्वमुपानत्प्रतिमोचनं विधत्ते—

" मृत्युर्वा एष यदग्निर्ब्रह्मण एतद्रूपं यत्कृष्णाजिनं काष्णीं उपानहावुप मुञ्चते ब्रह्मणैव मृत्योरन्तर्धत्ते " [सं० का० ५ प्र० ४ अ० ४] इति ।

अग्नेर्दाहकत्वान्मृत्युत्वं प्रसिद्धं, कृष्णाजिनं तु ब्रह्मणो वेदस्य रूपम् । अत एव दीक्षापकरणे समाम्नायते—" अक्तसोम वै देवेभ्यो यज्ञायातिष्ठमाने कृष्णो रूपं कृत्वाऽपक्रम्यातिष्ठताम् " इति । कृष्णाजिननिर्मिते उपानहौ काष्णीं, तयोः प्रतिमोके सति वेदेनैव मृत्युरन्तर्हितो भवति ।

उपानद्द्वयस्य प्रतिमोकाप्रतिमोकयोर्दोषसद्भावादेकस्य एव प्रतिमोकं विधत्ते—" अन्तर्मृत्योर्धत्तेऽन्तरन्नाद्यादित्याहुरन्यामुपमुञ्चतेऽन्यां नान्तरेव मृत्योर्धत्तेऽन्नाद्यꣳ रुन्धे " [सं० का० ५ प्र० ४ अ० ४] इति ।

उभयोरप्यप्रतिमोकतया मृत्युबाधः । प्रतिमोकेन मृत्योरन्तर्धानं मृत्युरुपाप्नोति । अस्ति त्वन्यो दोषः—यथा मृत्योरन्तर्धानमेवमन्नाद्यादप्यन्तर्हितो भवतीत्येवमभिज्ञा आहुः । अतस्तत्परिहारायैकामुपानहमुपमुञ्चत इतरां नोपमुञ्चते ।

---

१ ब. क. °मुपमुञ्चेतेतरां ।

(परिषेचनविकर्षणाद्याभिधानम्)

अथा तस्युपमोक्तेन मृत्योरन्तर्धानं भवति । अनुपमोक्तेन चाद्यं प्राप्नोति । उपानदुपमोक्तदुर्ध्वं यज्ञियेरधिरोहणं तदङ्गभूते द्वितीयेऽस्मिन्मन्त्रे प्रथमार्धस्य तात्पर्यं दर्शयति—" नमस्ते हरसे शोचिष इत्याह नमस्कृत्य हि वसीयाःस्तनुवंवरन्ति " [तै० का० ५ प्र० ४ अ० ४] इति ।

लोके हि योऽतिशयेन वस्तुमान्भवति तं भृत्या आदौ नमस्कृत्य पश्चादुवंवरन्ति । ततोऽग्नेरप्यत्र नमस्कारो युक्तः । तृतीयपादस्य तात्पर्यं दर्शयति—

" अभ्यं ते अस्मत्तपन्तु हेतय इत्याह यमेव द्वेष्टि तमस्य ह्वयाऽर्पयति " [तै० का० ५ प्र० ४ अ० ४] इति ।

तं द्वेष्यमस्याग्नेः संतापेन योजयति । चतुर्थपादस्य तात्पर्यं दर्शयति—

" पावको अस्मभ्यं शिवो भवेत्याहात्मानं वै पावकोऽग्नमेवाव रुन्धे " [तै० का० ५ प्र० ४ अ० ४] इति ।

अपामिदं न्ययनमित्यादिमन्त्रसंख्याविशिष्टमधिरोहणं विधत्ते—

"द्वाभ्यामधि क्रामति प्रतिष्ठित्यै" [तै० का० ५ प्र० ४ अ० ४] इति ।

सामान्येन विनियुक्तो मन्त्रो पुनर्विशेषाङ्गारेण विनियुङ्क्ते—

" अपस्यवतीभ्यां शान्त्यै " [तै० का० ५ प्र० ४ अ० ४] इति ।

अपामिदमित्येवमप्शब्दो ययोर्ऋचोस्ते अपस्यवत्यौ । ताभ्यामधिरोहणे सत्यग्नितापस्य शान्तिर्भवति । कल्पः—" नृषदे वदिति पञ्चभिरुत्तरवेदिवदग्निं स्वयमातृण्णा वा व्याघार्य " इति । पाठस्तु—

नृषदे वदिति । नृषु मनुष्येषु जाठराग्निरूपेण सीदतीति नृषत्, तस्मै वडूढविदंत्तम् । वाडवरूपेणाप्सु सीदतीत्यप्सुषत् । दावाग्निरूपेण वने सीदतीति वनसत् । आहवनीयादिरूपेण बर्हिषि यज्ञे सीदतीति बर्हिषत् । आदित्यरूपेण स्वर्गे विन्दते लभत इति सुवर्विद् । एतान्मन्त्रान्विनियुङ्क्ते—

" नृषदे वदिति व्याघारयति पङ्क्त्याऽऽहुत्या यज्ञमुखमा रभते " [तै० का० ५ प्र० ४ अ० ५] इति ।

पञ्चसंख्योपेतयाऽऽहुत्या यज्ञे मुख्यमङ्गमुपक्रान्तवान्भवति ।

अथ दक्षिणमंसमुत्तरां श्रोणिमित्यादिकं वक्तव्यं विधत्ते—

" अक्षण्या व्याघारयति तस्मादक्षण्या पशवोऽङ्गानि प्र हरन्ति प्रतिष्ठित्यै" [तै० का० ५ प्र० ४ अ० ५] इति ।

(परिषेचनविकर्षणाद्यभिधानम्)

मन्त्रगतं वट्शब्दं प्रशंसति—

" यद्वषट्कुर्यादयातयामाऽस्य वषट्काः स्याद्यन्न वषट्कुर्याद्रक्षाꣳसि यज्ञꣳ हन्युर्वडित्याह परोक्षमेव वषट्करोति नास्य यातयामा वषट्कारो भवति न यज्ञꣳ रक्षाꣳसि घ्नन्ति " [सं० का० ५ प्र० ४ अ० ५] इति ।

एतच्च वाक्यं सं ते वायुर्मातरिश्वा दधात्वित्यस्मिन्मन्त्रे तस्मै च देवि वषडस्तु तुभ्यमित्यस्य पदस्य व्याख्यानरूपत्वं ब्राह्मणेनोदाहृत्य सम्यग्विवृतम् ।

कल्पः—" ये देवा देवानामिति द्वाभ्यामनुपरिचारं दध्ना मधुमिश्रेण दर्भग्रुष्टिनाऽग्निं व्यवोक्षति " इति । अत्र प्रथमामाह—

ये देवा देवानामिति । द्विविधा देवाः—हविर्भुज इन्द्रवरुणादयः। शरीरनिर्वाहकाः प्राणात्मकाः प्राणापानादयश्च । दीव्यन्तीति व्युत्पत्तिरुभयत्रापि संभवति। उभयेऽप्येते यज्ञियाः । तत्रेन्द्रादयो देवा यज्ञेन पूज्यत्वाद्यज्ञियाः । प्राणादयस्तु यज्ञेन पूजकत्वाद्यज्ञियाः । एवं सति यज्ञियानामिन्द्रादीनां देवानां संबन्धिनः प्राणरूपा ये यज्ञियानां(स्ते) संवत्सरेण संवत्सरे साध्यं चित्याग्निमानं भजनीयमुपासते सेवन्ते प्राणाद्या अहुतादः । हुतं स्वाहाकारेण समर्पितमदन्तीति हुतादिन्द्रादयस्तद्विपरीतत्वात्प्राणा अहुतादः । तथाविधा हे प्राणा अस्मिन्यज्ञे हविषोऽस्माभिर्हूयमानस्य मधुनो मधुरस्य [घृतस्य] भागं स्वयं जुहुध्वं मदीयेन स्वाहाकारसमर्पणेन विना स्वयमेव स्वीकुरुत । अथ द्वितीयामाह—

ये देवा देवेष्विति । ये प्राणा देवेष्विन्द्रादिष्वप्यधि अधिष्ठातृत्वेन देवत्वमायन्प्राप्ताः प्राणैरधिष्ठिता एवेन्द्रादिविग्रहं व्यवहरन्तीत्यर्थः । किंच ये प्राणा अस्य ब्रह्मणश्चीयमानस्याग्नेः परिवृढस्य पुरएसारः पुरतो गन्तारो निर्वाहका इत्यर्थः । न खलु प्राणैर्विना चीयमानोऽग्निर्वोढुं शक्नुयते । किंच येभ्य ऋते यान्विना किंचन धाम विशां न पवते न शुद्धं भवति, ते प्राणरूपा देवा दिवो न दिव्यपि न तिष्ठन्ति, पृथिव्यां न भूमावपि न तिष्ठन्ति, किं तर्हि स्नुषु पर्वतक्षानुसदृशेषु शरीरगतचक्षुरादिगोलकेष्वाश्रित्य वर्तन्ते ।

एतन्मन्त्रद्वयं विनियुङ्क्ते—

" हुतादो वा अन्ये देवा अहुतादोऽन्ये तानग्निर्देवोभयान्दीक्षाति ये देवा देवानामिति दध्ना मधुमिश्रेणाग्नावोक्षति हुतादश्चैव देवानहुतादश्च यज-

---

१ क. च. °स्य व्या°।

मानः प्रीणाति ते यजमानं प्रीणन्ति क्त्नैव हुतादः प्रीणाति मधुनाऽहुतादो ग्राम्यं वा एतदन्नं यद्दध्यारण्यं मधु यद्दध्ना मधुमिश्रेणावोक्षत्युभयस्याव रुद्ध्यै " [सं० का० ५ प्र० ४ अ० ५] इति ।

हुतादः इन्द्रादयोऽहुतादः प्राणाः । तानुभयानपि देवानयमग्निचित्प्रीणयितुमर्हति । अतो मधुमिश्रेण दध्नाऽवोक्षणं कुर्यात् । तेन चोभये प्रीताः सन्तो यजमानमपि प्रीणयन्ति । तत्रापीन्द्रादीनां दध्ना प्रीतिः, प्राणानां मधुना प्रीतिः । किंच, दध्नो ग्राम्यत्वान्मधुनश्चाऽऽरण्यत्वादुभाभ्यामवोक्षणे नोभयमपि संपादितं भवति । अवोक्षणसाधनं पौष्टदंमुष्टिं विधत्ते—

" मुष्टिनाऽवोक्षति प्राजापत्यो वै मुष्टिः सयोनित्वाय " [सं० का० ५ प्र० ४ अ० ५] इति ।

गुरुः स्थूलो दंमुष्टिर्मुष्टिः । तस्य प्रजापतिदैवत्यौष्टत्वात्प्राजापत्यत्वम् । अतस्तेनावोक्षणं सयोनित्वाय भवति । अग्निरपि प्रजापतिनोत्पादितत्वात्प्राजापत्यः । तेन समानयोनित्वम् । मन्त्रद्वित्वं प्रशंसति—

" द्वाभ्यां प्रतिष्ठित्यै " [सं० का० ५ प्र० ४ अ० ५] इति ।

अवोक्षणकाले परितो भ्रमणं विधत्ते—

" अनुपरिचारमवोक्षत्यपरिवर्गमेवैनान्प्रीणाति " [सं० का० ५ प्र० ४ अ० ५] इति ।

अनुपरिचारमनुक्रमेण परितश्चरित्वाऽपरिवर्गं निवाग्न्यवयवेषु कस्यापि वर्जनमकृत्वैवैनानग्न्यवयवान्प्रीणाति ।

कल्पः—" प्राणदा अपानदा इति प्रत्यवरोह्य " इति । पाठस्तु—

प्राणदा अपानदा इति । यजमानाय प्राणं ददातीति प्राणदाः । प्राणं सुस्थिरं करोतीत्यर्थः । एवमुत्तरत्रापि । वर्चो बलं, वरिवः प(पू)जा । अन्यमित्यादि पूर्ववत् ।

प्राणादिदानप्रसक्तिपूर्वकं मन्त्रं व्याचष्टे—

" वि वा एष प्राणैः प्रजया पशुभिर्ऋध्यते योऽग्निं चिन्वन्नधिक्रामति प्राणदा अपानदा इत्याह प्राणानेवाऽऽत्मन्धत्ते वर्चोदा वरिवोदा इत्याह प्रजा वै वर्चः पशवो वरिवः प्रजयैव पशूनात्मन्धत्ते " [सं० का० ५ प्र० ४ अ० ५] इति ।

यो यजमानोऽग्निचयनकाले अग्नेर्वेरूप्येण प्राणादिभिर्वियुज्यते । अतः प्राणादिदानं प्रार्थनीयमिति मन्त्रः प्रवर्तते । तत्र पूर्वभागेन(अ) प्राणादिरात्मनि

(परिषेचनविकर्षणाद्यभिधानम्)

सुस्थितान्करोति। उत्तरभागेन(ण) बलवाचिना वर्चःशब्देन पुत्रपौत्रादिरूपाः प्रजा उपलक्षिताः। तासु हि सतीषु व्यवहर्तुं प्रबलत्वात्। पूजावाचिना वरिवःशब्देन पशव उपलक्षिताः। तेषु सत्सु क्षीरादिसंपत्त्या पूज्यो भवति।

कल्पः—" अग्निस्तिग्मेनेति द्वाभ्यामग्नयेऽनीकवत एकामाहुतिं हुत्वा " इति। तत्र प्रथमामाह—

अग्निस्तिग्मेनेति। अयं चीयमानोऽग्निस्तिग्मेन शोचिषा तीक्ष्णया ज्वालयाऽस्मिंश्च राक्षसादिं विश्वं सर्वं विरोधिनं नियंसन्नियमयतु। विनाशयत्वित्यर्थः। अन्नमदनशीलं बाधकमनिष्टं तदस्यास्तीत्यन्नी तं विनाशयतु। किंचायमग्निर्नोऽस्मदर्थं रयिं धनं वंसते वसितुं संभाजयितुमिच्छतु। अथ द्वितीयामाह—

अनेनाऽनीकेनेति। हेऽग्ने स त्वं द्युमद्दीप्यमानमुतापि च रेवद्बहुधनयुक्तं गृहक्षेत्रादिकं दिदीहि प्रकाशय। कीदृशस्त्वम्, एनाऽनीकेन सुविदत्रोऽनेन ज्वालासमूहेन सुष्ठु वेदिता, अस्मे देवान्यष्टाऽस्मदर्थं देवानुद्दिश्य यागनिष्पादकः, स्वस्ति विघ्नरहित्यं यथा भवति तथाऽप्यजिष्ठोऽतिशयेन क्षत्रस्यनयागसमाप्तिकारी, अदब्धः केनाप्यहिंसितः, गोपा मन्त्रस्य गोप्ता, उतापि च नोऽस्माकं परस्पा अतिशयेन पालयिता। अत्र विनियोगसंग्रहः—

षष्ठे पञ्चानुवाकाः स्युरग्निशेषस्ततः परे।
चत्वारो ह्यश्वमेधार्था अश्मेति परिधिञ्चति॥
अश्मंस्ते प्रतिधर्मेति समुद्रेत्यग्निमष्टभिः।
विकर्षेदित्यपां द्वाभ्यामारोहति चितिं नृषत्॥
व्याघारः पञ्चभिर्मे दे द्वाभ्यामग्निमवोक्षति।
प्राणदा अवरुह्याग्निस्तिग्मेनेत्याहुतिद्वयम्॥
प्रथमे त्वनुवाकेऽस्मिन्मन्त्रा द्वाविंशतिरीरिति(तिः स्थि)ताः॥

अत्र मीमांसा।

नवमाध्यायस्य प्रथमपादे चिन्तितम्—

विकर्षप्रोक्षणे कार्ये प्रतीष्टकमुतैकधा।
आद्योऽवयव्यतस्त्वेन भेदं भूदेशतस्ततः॥

" इष्टकाभिरग्निं चिनुते " इति श्रूयते। तत्रेदमाम्नायते—" मण्डूकनाभिं विकर्षति। वेतसशाखया चाबकामिश्चाग्निं विकर्षति। हिरण्यशकलसहस्रेणाग्निं

प्रोक्षति " इति । शाखाग्रे मण्डूकं बद्ध्वा तेन विकर्षतीत्यर्थः । ते च विकर्षणप्रोक्षणे प्रतीष्टकं कर्तव्ये । कुतः । चिताभ्य इष्टकाभ्यः पृथगग्निशब्दार्थस्य कस्यचिदवयविद्रव्यस्याभावादिति चेन्नैवम् । उपहिताभिरिष्टकाभिः संयुक्तस्य प्रदेशस्यावयविद्रव्यत्वात् । तस्य चाग्न्याधारत्वेनाग्निशब्दार्थत्वम् । तस्मादग्नेरेकत्वात्तत्रैव विकर्षणप्रोक्षणे कुर्यात् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे षष्ठप्रपाठके
प्रथमोऽनुवाकः ॥ १ ॥

(अथ चतुर्थाष्टके षष्ठप्रपाठके द्वितीयोऽनुवाकः) ।

य इमा विश्वा भुवनानि जुह्वदृषिर्होता निषसादा पिता नः । स आशिषा द्रविणमिच्छमानः परमच्छदो वर आ विवेश । विश्वकर्मा मनसा यद्विहाया धाता विधाता परमोत संदृक् । तेषामिष्टानि समिषा मदन्ति यत्र सप्तर्षीन्पर एकमाहुः । यो नः पिता जनिता यो विधाता यो नः सतो अभ्या सज्जजान (१) । यो देवानां नामधा एक एव तꣳ संप्रश्नं भुवना यन्त्यन्या । त आऽयजन्त द्रविणꣳ समस्मा ऋषयः पूर्वे जरितारो न भूना । असूर्ता सूर्ता रजसो विमाने ये भूतानि समकृण्वन्महित्वा । न तं विदाथ य इदं जजानान्यद्युष्माकमन्तरं बभूव । नीहारेण प्रावृता जल्प्या चासुतृप उकथशासश्चरन्ति ।

(सूक्ताभ्यां होमाभिधानम्)

परो दिवा पर एना (२) पृथिव्या परो देवभिरसुरैर्गुहा यत् । कꣳ स्विद्गर्भं प्रथमं दध्र आपो यत्र देवाः समगच्छन्त विश्वे । तमिद्गर्भं प्रथमं दध्र आपो यत्र देवाः समगच्छन्त विश्वे । अजस्य नाभावध्येकमर्पितं यस्मिन्निदं विश्वं भुवनमधि श्रितम् । विश्वकर्मा ह्यजनिष्ट देव आदिद्गन्धर्वो अभवद्द्वितीयः । तृतीयः पिता जनितौषधीनाम् (३) अपां गर्भं व्यदधात्पुरुत्रा । चक्षुषः पिता मनसा हि धीरो घृतमेने अजनन्नम्नमाने । यदेदन्ता अदꣳहन्त पूर्व आदिद्द्यावापृथिवी अप्रथेताम् । विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतो हस्त उत विश्वतस्पात् । सं बाहुभ्यां नमति सं पतत्रैर्द्यावापृथिवी जनयन्देव एकः । किꣳ स्विदासीदधिष्ठानमारम्भणं कतमत्स्वित्कथासीत् । यदी भूमिं जनयन् (४) विश्वकर्मा वि द्यामौर्णोन्महिना विश्वचक्षाः । किꣳस्विद्वनं क उ स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षुः । मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद्भुवनानि धारयन् । या ते धामानि परमाणि याऽवमा या मध्यमा विश्वकर्मन्नुतेमा । शिक्षा सखिभ्यो हविषि स्वधावः स्वयं यजस्व तनुवं जषाणः । वाचस्पतिं विश्वकर्मा-

(सूक्ताभ्यां होमाभिधानम्)

णभूतयें (५) मनोयुजं वाजें अद्या हुवेम ।
स नो नेदिष्ठा हवमानि जोषते विश्वशंभूरवसे
साधुकर्मा । विश्वकर्मन्हविषा वावृधानः स्वयं
यजस्व तनुवं जुषाणः । मुह्यन्त्वन्ये अभितः
सपत्ना इहास्माकं मघवा सूरिरस्तु ।
विश्वकर्मन्हविषा वर्धनेन त्रातारमिन्द्रमकृणो-
रवध्यम् । तस्मै विशः समनमन्त पूर्वीरयमुग्रो
विहव्यो यथाऽसत् । समुद्राय वयुनाय सि-
न्धूनां पतये नमः । नदीनाꣳ सर्वासां पित्रे
जुहुता विश्वकर्मणे विश्वाऽहाऽमर्त्यꣳहविः(६)॥
(जजानेनौषधीनां भूमिं जनयन्नृतये नमो नवं च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
षष्ठप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ चतुर्थकाण्डे षष्ठप्रपाठके द्वितीयोऽनुवाकः) ।

प्रथमानुवाके परिषेचनादिकमुक्तम् । अथ द्वितीयानुवाके सूक्ताभ्यां होमा उच्यन्ते । कल्पः—" षोडशगृहीतेन स्रुचं पूरयित्वा वैश्वकर्मणानि जुहोति य इमा विश्वा भुवनानि जुह्वदृषिः पिता मनसा हि धीर इति नानासूक्ताभ्यां द्वे आहुती यं कामयेत चिरं पाप्मनो निर्मुच्येतेत्येकैकं तस्येत्युक्तम् " इति ।

तत्र प्रथमसूक्ते प्रथमामृचमाह—य इमा विश्वेति ।

यो विश्वकर्मा परमेश्वर इमा विश्वा भुवनानि जुह्वत्प्रलयकाले पृथिव्यादी-निमान्सर्वाँल्लोकान्स्वात्मन्याहुतिप्रक्षेपवत्संहरन्नधिरतीन्द्रियदृष्टा सर्वज्ञो होता संसारहोमैककर्ता नोऽस्माकं पिता जनको निरवसाद् स्वयं स्थितवान्, प्रलय-काले प्राप्ते सति सर्वाँल्लोकान्संहृत्यास्माकमपि संहर्ता पुनः स्रष्टा च तस्त-

---

१ क. ग. ङ. °रूपस्य हो° । २ क. ग. ङ. °मस्य क° ।

(सूक्ताम्यां होमाभिधानम्)

वैश्वोऽयं परमेश्वरः स्वयमेक एवाऽऽसीत् । अत एव सर्वा अप्युपनिषद एवमाहुः—" आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषत्सदेव सोम्येदमग्र आसीत् । एकमेवाद्वितीयम् " इत्याद्याः । स तादृशः परमेश्वर आशिषा बहु स्यां प्रजायेयेत्यवरूपया पुनःसिसृक्षया द्रविणमिच्छमानो धनोपलक्षितं जगद्भोगमपेक्षमाणः परमच्छदः परमं स्वकीयमेवाद्वितीयं परमार्थरूपमावृण्वन्स्वेन सृष्टे शरीरमध्यवर्तिनि पुण्डरीकस्थान आविवेश जीवरूपेण प्रविष्टः । एवञ्च सर्वमुपनिषद्याम्नातम्—" सोऽकामयत । बहु स्यां प्रजायेयेति । स तपोऽतप्यत । स तपस्तप्त्वा । इदं सर्वमसृजत । यादिदं किंच । तत्सृष्ट्वा । तदेवानुप्राविशत् " इति । एवमन्या अप्युपनिषद उदाहार्याः । अथ द्वितीयामृचमाह—

विश्वकर्मा मनसेति । विश्वविषयाणि कर्माणि सृष्टिस्थितिसंहाररूपाणि यस्यासौ विश्वकर्मा । तस्य च तेषु कर्मसु सत्यत्वादेव एव साधनं सत्यसंकल्पत्वात् । यद्यस्मादयं मनसा संकल्पमात्रेण विश्वकर्मा तस्माद्धाता विधाता विहाया इति चोच्यते । धातोत्पादकः। विधाता पोषकः। विशेषेण जहाति परित्यजतीति विहायाः । संहर्तेत्यर्थः । उतापि चात एव परमा परमः सर्वेभ्य उत्कृष्टः सम्यक्पश्यतीति संदृक्सर्वज्ञ इत्यर्थः । अत्र यस्मिन्परे परस्मिन्नीश्वरे सप्तर्षीनेकमाहुः, य एते मरीच्यत्रिप्रमुखाः सप्तर्षयो विविधा दृश्यन्ते ते सर्वे सृष्टेः प्राक्परस्मिन्नेकीभूता इति वेदान्तपारगा आहुः । स च परमेश्वरस्तेषां सप्तर्षिप्रभृतीनामिष्टान्यपेक्षितानि स्थानानीषा स्वेच्छामात्रेण संपादयतीति । तेन च ते महर्षयो हृष्यन्ति । अथ तृतीयामृचमाह—

यो नः पितेति । यो विश्वकर्मा नोऽस्माकं पिता पालयिता न केवलं पालक उत्पादकोऽपि । किमनेनास्माकमुत्पादक इति संकोचन, यो विधाता सर्वस्य जगत उत्पादको यो विश्वकर्मा नोऽस्माकमुत्पन्नानां सद्वर्तमानमिदं भोग्यजातं ततो जजान तदेव सोम्येतिश्रुत्युक्तात्स्वस्वरूपादुत्पादयामास । यश्च विश्वकर्मा देवानां नामधाः स्वयमेव सर्वदेवरूपेणाऽऽदित्यरुद्रवसुविश्वेदेवेन्द्राग्निमित्रादिदेवतानामानि धारयति । अत एवान्यत्राऽऽम्नातम्—" इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् । एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः " इति । अत एव बहूनां देवानां नामानि धारयन्नपि वस्तुतः स्वयमेक एव, तं विश्वकर्माणं

---

१ च. बहुः । २ ख. घ. ङ. च. °र्थ धार° ।

(सूक्ताभ्यां होमाभिधानम्)

परमेश्वरस्तस्मा भुवनो वस्माद्न्यानि तृष्टानि सर्वाणि भुवनानि संमश्नं यथा भवति यथा यान्ति प्रलयकाले एकत्वं प्राप्नुवन्ति । एकीभावयुक्ते प्रलये क ईश्वरः कानि भुवनानीत्येवं प्रश्नः संभवाभावे प्रवर्तते । विभागाभावेन मुख्यनामिर्देशानुपपत्तेश्च । अथ चतुर्थीमृचमाह—

त आऽयजन्तेति । पूर्वोक्तहेतुना विश्वकर्मणा प्रथममुत्पादिता ये ऋषय इमानि भूतानि सर्वाण्येतान्प्राणिनः समकल्पयन्सम्यगुत्पादितवन्तः, ते पूर्वे ऋषयोऽस्मै तृष्टाय जगते द्रविणं धनरूपं भोग्यजातं समायजन्त सम्यक्संपादितवन्तः । कीदृशास्ते, ऋक्षयोऽतीन्द्रियद्रष्टारः । सर्वज्ञा इत्यर्थः । भूना भारितारो न भूम्ना स्वकीयेन महत्त्वेन कदाचिदपि जीर्णा न भवन्ति । कीदृशानि भूतानि, असूर्तांऽसुभिः प्राणैरीरितानि प्राणयुक्तानीत्यर्थः । यथा रजसो विमाने सूर्ते रञ्जनात्मकस्य विशेषेण प्रमितौ स्वस्वकर्मभिः सुष्ठु प्रेरितानि । अथ पञ्चमीमृचमाह—

न तं विदाथेति । यो विश्वकर्मेदं जजानोत्पादितवांस्तं विश्वकर्माणं न विदाथ तेन सृष्टा हे जीवा यूयं न जानीथ । देवदत्तोऽहं यज्ञदत्तोऽहमित्येवं सर्वेऽपि वयमात्मानं विश्वकर्माणं जानीम इति यदुच्येत तदसत् । न ह्यहंप्रत्ययगम्यं जीवत्वं विश्वकर्मणः परमेश्वरत्वं, किंतु युष्माकमहंप्रत्ययगम्यादतिरिक्तं सर्ववेदान्तवेद्यमीश्वरतत्त्वं भवति विद्यते । तथापि जीवरूपवरकृतो न जानीम इति चेत् । नीहारेण प्रावृता भवन्तो नीहारसदृशेनाज्ञानेनाऽऽवृतत्वाच्च जानन्ति । यथा नीहारो नात्यन्तमसत् । दृष्टेरावरकत्वात् । नाप्यत्यन्तं सत् । काष्ठपाषाणादिरूपान्तरेण संबन्धुमयोग्यत्वात् । एवमज्ञानमपि नात्यन्तमसदीश्वरस्यावरकत्वात् । नापि सद्बाधमात्रनिवर्त्यत्वात् । ईदृशेनानिर्वचनीयेनाज्ञानेन भवन्तः सर्वे जीवाः प्रावृताः । न केवलं तत्त्वं [न जानन्तः] किंतु जल्पन्ति च देवोऽहं मनुष्योऽहं ममेदं क्षेत्रमित्याद्यनृतजल्पनपराश्च । किंचासुतृपः, असुषु तृप्यन्तीत्यसुतृपः, केनापि प्रकारेण प्राणान्पोषयित्वा तावतैव तृप्यन्ति भवन्तो न तु परमेश्वरतत्त्वं विचारयितुं प्रवर्तन्ते । न केवलमिह लोके भोगमात्रतृप्तिः किंतूक्थशासः परलोकेऽपि भोगं संपादयितुं नानाविधेषु यज्ञेषूक्थानि शस्त्राणि शंसन्तीत्युक्थशासः । तादृशा भूत्वा भवन्तश्चरन्ति, ऐहिकामुष्मिकभोगे सर्वदा प्रवर्तन्ते । तस्मादज्ञानमिथ्याज्ञानपराधीनानां भवतां नास्ति तत्त्वज्ञानमित्यर्थः ।

(सूक्ताभ्यां होमाभिधानम्)

अथ षष्ठीमृचमाह—

परो दिवेति। यदीश्वरतत्त्वं गुहा हृदयपुण्डरीके मूढं दिवा परो द्युलोकादपि दूरे तिष्ठति, एना पृथिव्या परोऽस्याः पृथिव्या अपि दूरे तिष्ठति, देवेभिरसुरैः परो देवेभ्योऽसुरेभ्यश्च दूरे तिष्ठति। तकारान्तः परःशब्दो दूरवाची। दूरत्वं नाम विलक्षणत्वम्। सर्वजगद्विलक्षणत्वाद्गुरुशास्त्रमुखेनाधिगम्य इत्यर्थः। किंच यत्र यस्मिन्गर्भे विश्वे सर्वेऽपि देवाः समगच्छन्त संगताः संभूय वर्तन्ते, तं कंस्विद्गर्भमापः प्रथमं दध्रे। अद्भिः पूर्वं भूते गर्भे देवमनुष्यादयः सर्वे प्राणिनो वर्तन्त इत्येवं शास्त्रप्रसिद्धिः। सोऽपि गर्भः क इति न ज्ञायते। यद्वा स्थूलोऽप्ययं जगदाधारो न ज्ञातस्तदाऽत्यन्तसूक्ष्मतत्त्वं न ज्ञायत इति किमु वक्तव्यमित्यभिप्रायः। अथ सप्तमीमृचमाह—

तमिद्गर्भं प्रथममिति। इदानीं गुरुशास्त्रानुशासनेपितेषु पुरुषेषु विद्यमानस्तुतिरनयाऽभिधीयते—यत्र यस्मिन्ब्रह्माण्डगर्भे विश्वे देवाः समगच्छन्त तमिच्चमेव गर्भमापः प्रथमं दध्रे धृतवत्यः। तद्धारणप्रकार एव स्पष्टी क्रियते—अजस्य जन्मरहितस्य परमेश्वरतत्त्वस्य नाभौ नाभिस्थानीये स्वरूपमध्य एकं किंचिद्वीजमध्यर्पितमधिकत्वेन स्थापितं यस्मिन्नीजे इदं विश्वं सर्वमपि भुवनमधिभितमधिकत्वेन स्थापितं तद्बीजमर्पितम्। तथा च स्मर्यते—

अप एव ससर्जादौ तासु वीर्यमवासृजत्।
तदण्डमभवद्धैमं कोटिसूर्यसमप्रभम्॥ इति।

अथाष्टमीमृचमाह—

विश्वकर्मेति। ब्रह्माण्डगतानामुत्पत्तिरुच्यते—अण्डमध्ये प्रथमं विश्वकर्मा देवतिर्यगादिविश्वभेदस्य कर्ता तत्यलोकनिवासी चतुर्मुखो देवोऽजानिष्टोत्पन्नः। आदिदनन्तरमेव तदपेक्षया द्वितीयो गन्धर्वोऽभवदुत्पन्नः। तत ऊर्ध्वमोषधीनां पिता पालको जनितो+त्पादकः सोमः पूर्वोक्तद्वयापेक्षया तृतीयोऽभवत्। तदेवमपां गर्भं ब्रह्माण्डं परमेश्वरः पुरुषा व्यदधाद्बहुधा व्यक्तं कृतवान्। इत्थमेकं सूक्तं समाप्तम्। अथ द्वितीयसूक्ते प्रथमामृचमाह—

चक्षुषः पितेति। चक्षुषश्चक्षुरादेः प्राणसमुदायस्य पितोत्पादको धीरो धैर्यवान्। मनसा स्वेच्छया घृतं घृतवत्पानाभिमुखभोगसाधनभूते एने आपापू-

+ अत्र सर्वपुस्तकेषु 'जनिता य उत्पादकः' इति पाठो वर्तते। स न युक्तः।

१ ब. च. °श बीजेन।

थिव्यौ परस्परानुकूल्येन नम्यमाने नमनोपेते अजनयत्। यद्येवं पूर्वं प्रथमा अन्ता अननयुक्ताश्चेष्टावन्तश्चक्षुरादिप्राणा अदंहन्त दृढा अभवन्। आदिदनन्तरमेव द्यावापृथिवी अप्रथेतां द्यावापृथिव्यौ विस्तृते अभूताम्। अथ द्वितीयामृचमाह—

विश्वतश्चक्षुरिति। चक्षुरादिप्राणानां द्यावापृथिव्योश्चोत्पत्तेरूर्ध्वं विश्वतश्चक्षुर्धरः परमेश्वर एवं भासते। कथमिति तदुच्यते—विश्वतः सर्वतश्चक्षूंषि यस्यासौ विश्वतश्चक्षुः। परमेश्वरस्य सर्वप्राण्यात्मकत्वाद्यस्य प्राणिनो ये चक्षुषी ते तदुपाधिकस्य परमेश्वरस्यैवेति सर्वत्रास्य चक्षूंषि संपद्यन्ते। एवं मुखहस्तपादेष्वपि योजनीयम्। स तादृश एको देवो द्यावापृथिवी जनयन्बाहुभ्यां बाहुस्थानीयाभ्यां धर्माधर्माभ्यां निमित्तकारणाभ्यां संनमति जगत्सर्वं सम्यङ्नमं स्वाधीनं करोति। तथा पतनैः पतनशीलैरनित्यैः पञ्चभूतैरुपादानकारणैः संनमति जगत्स्वाधीनं करोति। अथ तृतीयामृचमाह—

किꣳ स्विदासीदिति। लोके हि चिकीर्षुः कुलालो गृहादिकं किंचित्स्थानमधिष्ठाय मृद्द्रव्येण चक्रादिरूपैरुपकरणसाधनैर्घटं निष्पादयति। ईश्वरस्य निरपेक्षत्वात्सर्वमत्राऽऽक्षिप्यते—द्यावापृथिव्योरुत्पादनचेष्टायामधिरस्याधिष्ठानं निवासस्थानं किंस्विदासीत्किं नामामुन्न किंचिदित्यर्थः। तथाऽऽरम्भणं कतमत्स्विदित्किमासीत्। आरभ्यतेऽनेनेत्यारम्भणमुपादानकारणं, तदपि कतमद्भवेत्। नहि द्यावापृथिव्यौ जनयितुं समर्थं किंचिदुपादानं संभवति। तथा दण्डचक्रादिनिमित्तमपि किमासीन्न किंचित्संभवतीत्यर्थः। विश्वचक्षाः सर्वद्रष्टा विश्वकर्मा यदि यस्मिन्काले भूमिं भूलोकं जनयन्दर्शने तस्मिन्काले हि महिना महिन्नैव साधनान्तरं विनैव विशेषेण द्यामौर्णोत्तृष्टा द्यावापृथिव्यावाच्छादितवान्। अचिन्त्यशक्तिरयं परमेश्वरः। अथ चतुर्थीमृचमाह—

किꣳ स्विद्वनमिति। लोके हि मौढं मासादं निर्मिमाणः कस्मिंश्चित्प्रौढे वने कंचिन्महान्तं वृक्षं छित्त्वा तक्षणादिना काष्ठैः प्रासादमुचितैस्तरं संपादयति। इह तु परमेश्वरो जगत्सृष्टिं यतो यस्माद्वनाद्यं वृक्षमादाय द्यावापृथिवी निष्टतक्षुस्तक्षणेन द्यावापृथिव्यौ निष्पादितवांस्तद्वनं किंस्वित्किंनाम स्यान्न किंचिच्चादुं संभवति। तथा क उ स वृक्षस्तादृशः स मौढवृक्षोऽपि कः स्यान्न कश्चि-

१ क ख. घ. ङ. °द्विर्लिंग स च सा°।

(सूक्ताभ्यां होमाभिधानम्)

स्तंभवति । हे मनीषिणो विद्वांसो मनसा स्वकीयेन विचिन्त्य पृच्छतेदिदं सर्वं पृच्छतैव । किंचेश्वरो भुवनानि धारयन्यदध्यतिष्ठद्यत्स्थानमधिष्ठितवांस्तदपि सर्वथा पृच्छत । एतस्य प्रश्नस्य सर्वस्याप्युत्तरं ब्राह्मणग्रन्थे सूक्तपपाठके ब्रह्म वनं ब्रह्म स वृक्ष आसीदित्येतस्यामृच्याम्नातम् । स्वरूपव्यतिरिक्तवस्त्वादिनिरपेक्षत्वमेवास्योत्तरस्याभिप्रायः। अतोऽत्रापि किंस्विद्वनमित्याद्याक्षेपपरत्वेनैव योजितम् । पृच्छतेदित्यस्याप्ययमभिप्रायः—भवद्भिः पृष्टेऽपि निरपेक्षत्वमेवाभिज्ञा वदिष्यन्तीति । अथ पञ्चमीमृचमाह—

या ते धामानीति । हे विश्वकर्मंस्ते त्वदीयानि परमाणि यानि धामान्युत्कृष्टानि सन्ति, यानि मध्यमान्यवमानि च धामानि स्थानानि सन्ति, तानीमानि सर्वाणि स्थानानि साग्निभ्यः साग्निवत्प्रियेभ्यो हविषि हविष्प्रदाननिमित्तं शिक्षोपदिश । हे स्वधावः स्वधोपलक्षितहविर्लक्षणान्नवन्विश्वकर्मंस्तनुवं जुषाणो यजमानशरीरं सेवमानः स्वयं यजस्व त्वदनुग्रहमन्तरेण को वाऽन्यो यष्टुं शक्त इत्यर्थः । अथ षष्ठीमृचमाह—

वाचस्पतिमिति । विश्वकर्माणं परमेश्वरमद्यास्मिन्दिने वाजेऽन्ने निमित्तभूते सति ऊतये भक्षणाय हुवेमाऽऽह्वयाम । कीदृशं विश्वकर्माणम्, वाचस्पतिं मन्त्ररूपाया वाचः पालकं कर्मण्यस्मन्मनसो योजयितारम् । स विश्वकर्मा नोऽस्मदीयानि नेदिष्ठान्यत्यन्तसमीपवर्तीनि हवनानि हवींष्याह्वानानि वा जोषते सेवते । किमर्थम्, अवसेऽस्मान्नवितुं रक्षितुम् । कीदृशः सन्, विश्वशंभूः सर्वस्मिञ्जगति सुखस्य भावयिता साधुकर्माऽस्मदनुकूलव्यापारवान् ।

अथ सप्तमीमृचमाह—

विश्वकर्मन्निति । हे विश्वकर्मन्नस्मदीयेन हविषा वावृधानोऽतिशयेन वर्धमानस्त्वं जुषाणः शरीरं स्वीकुर्वाणः स्वयं यजस्व, अस्मत्तोऽन्ये सपत्ना इह कर्मणि मुह्यन्तु भ्रान्ता भवन्तु । अस्माकं तु मघवाऽन्नयुक्तः सूरिर्विद्वान्पुत्रोऽस्तु ।

अथाष्टमीमृचमाह—

विश्वकर्मन्हविषेति । हे विश्वकर्मन्नस्मदीयेन हविषा त्वं वर्धनेन युक्तमिमं यजमानं त्रातारमन्येषां रक्षकमिन्द्रं परमैश्वर्योपेतमवर्धय केनापि हिंसितुमशक्यमक्रमोः कुरु । तस्मै यजमानाय पूर्वीर्विशो बहुधा वितन्यमानाः प्रजाः समनमन्तु सम्यक्नता एतदधीना भवन्तु । अयं यजमान उग्रस्तीव्रशक्तिः सन्केनाप्यभिभूतो विहव्यो विविक्तान्नयोग्यो यथाऽऽसथा भवति तथा कुरु ।

कल्पः—" यद्येनमुदकेऽभिविन्देदुदकाञ्जलिमादाय समुद्राय वयुनायेत्यप्सु जुहुयादिति अयज्ञसंयुक्तः कल्पः " इति । पाठस्तु—

समुद्रायेति । यो विश्वकर्मा समुद्ररूपेणावस्थितस्तस्मै समुद्राय नमोऽस्तु । कीदृशाय, वयुनाय कान्ताय सिन्धूनां पतये स्यन्दमानानां भर्त्रे । समुद्राकारेण भर्ता विश्वकर्माकारेण सर्वासां नदीनां पितोत्पादकः । तादृशाय विश्वकर्मणे हे ऋत्विग्यजमाना विश्वाऽहा सर्वाण्यहानि निरन्तरमित्यर्थः । अमर्त्यमविनश्वरं हविर्जुहुत । अग्निस्तिग्मेनेति मन्त्रद्वयेन ' य इमा विश्वा ' इति सूक्तद्वयेन च साध्यं होमं विधातुं प्रस्तौति—

" इन्द्रो वृत्रमहन्तं वृत्रो हतः षोडशभिर्भोगैरासिनात्स एतमग्नेयऽनीकवत आहुतिमपश्यत्तामजुहोत्तस्याग्निरनीकवान्त्स्वेन भागधेयेन प्रीतः षोडशधा वृत्रस्य भोगानप्यदहद्वैश्वकर्मणेन पाप्मनो निरमुच्यत " [सं० का० ५ प्र० ४ अ० ५] इति ।

इन्द्रो यदा वृत्रं वज्रेण प्रहृतवांस्तदा वज्रप्रहतः स वृत्र आसुरमायया सहसा षोडश सर्पाकाराणि शरीराणि स्वी चकार । स्वीकृत्य च भोगशब्दाभिधेयैस्तैः सर्पाकारशरीरैस्तमिन्द्रं हस्तपादाद्यवयवेषु बहुधाऽसिनाद्भक्षयच्च, तदानीमिन्द्रः प्रतीकारं विचार्यानीकेन सैन्येन युक्तमाग्नेय एतामग्निस्तिग्मेनेति मन्त्रद्वयेन साध्यामाहुतिं दृष्ट्वा हुतवान् । ततः सोऽग्निरनीकवांस्तुष्टो वृत्रस्य षोडश सर्पाकाराणि शरीराण्यदहत् । तत ऊर्ध्वमिन्द्रो य इमा विश्वेति सूक्तद्वयसाध्येन वैश्वकर्मणहोमेन वृत्रवधजन्यात्पाप्मनो निर्मुक्तः । इदानीं तदुभयं विधत्ते—

" यदग्नेयऽनीकवत आहुतिं जुहोत्यग्निरेवास्यानीकवान्त्स्वेन भागधेयेन प्रीतः पाप्मानमपि दहति वैश्वकर्मणेन पाप्मनो निर्मुच्यते " [सं० का० ५ प्र० ४ अ० ५] इति ।

रोगादिरूपदृष्टबाधहेतोः पापस्यानीकवत आहुत्या दाहः । पारलौकिकाज्ञातकहेतोः पापाद्वैश्वकर्मणहोमेन निर्मोकः ।

तत्रेदं चिन्त्यते—किमयं वैश्वकर्मणहोमः प्रतिमन्त्रं पृथक्कार्यः, किंवा सूक्तद्वयं सहोच्चार्य सकृदनुष्ठेयः, आहोस्विदेकैकं सूक्तमुच्चार्यानुष्ठेय इति । तत्राऽऽद्यं पक्षद्वयं शास्त्रान्तरगतत्वेनाङ्गी करोति—

" यं कामयेत चिरं पाप्मनो निर्मुच्येतेत्येकैकं तस्य जुहुयाच्चिरमेव पाप्मनो

(अग्निप्रणयनाभिधानम्)

निर्मुच्यते यं कामयेत तमेकपाद्यनो निर्मुच्येतेति सर्वाणि तस्यानुहुत्य जुहुयात्तमेव पाप्मनो निर्मुच्यतेऽथो खलु नानैव सूक्ताभ्यां जुहोति नानैव सूक्तयोर्वीर्यं दधात्यथो प्रतिष्ठित्यै " [सं० क० ५ प्र० ४ अ० ५] इति ।

एकैकमन्त्रहोमेन शनैः शनैः पापानिर्मोको भवति । सर्वसूक्तहोमेन तु तदानीमेव पापनिर्मोकः । पृथक्सूक्तद्वयेऽपि सामर्थ्यं पृथक्संपादितं भवति । अपि च सूक्तद्वित्वं यजमानस्य प्रतिष्ठायै संपद्यते । तस्माद्द्वयमेव पक्षः मेधाभिरित्यर्थः । अत्र विनियोगसंग्रहः——

य इमा चक्षुषो द्वाभ्यां सूक्ताभ्यामाहुतिद्वयम् ।
तमुद्वेति जले होमो मन्त्राः सप्तदशेरिताः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे षष्ठप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ चतुर्थाष्टके षष्ठप्रपाठके तृतीयोऽनुवाकः) ।

उर्वन्तरिक्षमन्वेमि घृतेनाऽऽहुत । रायस्पोषेण सꣳसृज प्रजया च धनेन च । इन्द्रेमं प्रतरां कृधि सजातानामसद्वशी। समेनं वर्चसा सृज देवेभ्यो भागधा असत् । यस्य कुर्मो हविर्गृहे तमग्ने वर्धया त्वम् । तस्मै देवा अधि ब्रवन्नयं च ब्रह्मणस्पतिः । उदु त्वा विश्वे देवाः (१) अग्ने भरन्तु चित्तिभिः । स नो भव शिवतमः सुप्रतीका विभावसुः । पञ्च दिशो दैवीर्यज्ञमवन्तु देवीरपामतिं दुर्मतिं बाधमानाः । रायस्पोषे यज्ञपतिमाभजन्तीः ।

---

१ ख. च. °कैकं म° ।

राधस्पोषे अधि यज्ञो अस्थात्समिद्धे अग्ना-
वधि मामहानः। उक्थपत्र ईड्यो गृभीतस्तमं
धर्मं परिगृह्यायजन्त। ऊर्जा यद्यज्ञमशमन्त
देवा दैव्याय धर्त्रे जोष्ट्रे। देवश्रीः श्रीमणाः
शतपयाः (२) परिगृह्य देवा यज्ञमायन्।
सूर्यरश्मिर्हरिकेशः पुरस्तात्सविता ज्योतिरुद-
याꣳ अजस्रम्। तस्य पूषा प्रसवं याति देवः
संपश्यन्विश्वा भुवनानि गोपाः। देवा देवेभ्यो
अध्वर्यन्तो अस्थुर्वीतꣳ शमित्रे शमिता यज-
ध्यै। तुरीयो यज्ञो यत्र हव्यमेति ततः पावका
आशिषो नो जुषन्ताम्। विमान एष दिवो
मध्य आस्त आपाप्रिवान्रोदसी अन्तरिक्षम्।
स विश्वाचीरभि (३) चष्टे घृताचीरन्तरा
पूर्वमपरं च केतुम्। उक्षा समुद्रो अरुणः
सुपर्णः पूर्वस्य योनिं पितुरा विवेश। मध्ये
दिवो निहितः पृश्निरश्मा वि चक्रमे रजसः
पात्यन्तौ। इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं
गिरः। रथीतमꣳ रथीनां वाजानाꣳ सत्पतिं
पतिम्। सुम्नहूर्यज्ञो देवाꣳ आ च वक्षद्यक्षद-
ग्निर्देवो देवाꣳ आ च वक्षत्। वाजस्य मा
प्रसवेनोद्ग्राभेणोदग्रभीत्। अथा सपत्नाꣳ
इन्द्रो मे निग्राभेणाधराꣳ अकः। उद्ग्राभं च
निग्राभं च ब्रह्म देवा अवीवृधन्। अथा सप-
त्नानिन्द्राग्नी मे विषूचीनान्व्यस्यताम् (४)॥

(अग्निप्रणयनाभिधानम्)

(विश्वे देवाः शतपथा आग्नि वाजस्य षड्विंशतिश्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके षष्ठप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ चतुर्थकाण्डे षष्ठप्रपाठके तृतीयोऽनुवाकः)।

द्वितीयेऽनुवाके वैश्वकर्मणहोमोऽभिहितः । अथ तृतीयेऽग्निप्रणयनमुच्यते । कल्पः—" उदेनमुत्तरां नयेति तिसृभिरौदुम्बरीः समिधो घृतोपितास्तिस्र आधाय पशुबन्धवदाग्निं प्रणयति " इति । तत्र प्रथमामाह—

उदेनमुत्तरामिति । घृतेन द्रव्येणाऽऽहुत सर्वतो हूयमान हेऽग्न एनं यजमानमुत्तरामत्युत्कृष्टमैश्वर्यं प्रत्युन्नयोत्कर्षेण प्रापय । शीघ्रं प्रापयेत्यर्थः। उत्कृष्टमैश्वर्यमेव प्रपद्यते—रायस्पोषेण धनसमृद्ध्या संसृज संयोजय । तथा प्रजया पुत्रपौत्रादिरूपया धनेन च गवाश्वादिरूपेण संसृज । अथ द्वितीयामाह—

इन्द्रेमं प्रतरामिति । हे इन्द्र परमैश्वर्ययुक्ताग्न इमं यजमानं प्रतरां कृधि, अतिशयेन प्रकृष्टं कुरु । तदेव प्रकृष्टत्वं विशदी क्रियते—सजातानां सहोत्पन्नानां ज्ञातीनां वश्यसञ्जियमनसमर्थो भवतु । किंचैनं वर्चसा बलेन संसृज । अयं यजमानो देवेभ्यो भागधा असद्यज्ञेषु भागपदो भवतु । अथ तृतीयामाह—

यस्य कुर्मो हविरिति । वयमृत्विजो यस्य यजमानस्य गृहे हविः कुर्मः, हेऽग्ने त्वं तं यजमानं वर्धय । देवाश्च तस्मै यजमानायाधिब्रवन्नयं यजमानः सर्वेभ्योऽधिक इति ब्रुवन्तु । अयं च यजमानो ब्रह्मणस्पतिर्वैदिकस्य कर्मणः पालको भवतु । तानेतान्मन्त्रान्विनियुङ्क्ते—

" उदेनमुत्तरां नयेति समिध आ दधाति यथा जनं यतेऽवसं करोति तादृगेव तत् " [सं० का० ५ प्र० ४ अ० ६] इति ।

यथा लोके दूरदेशे ग्रामान्तरवर्तिनं प्रति यते गच्छते पुरुषायावसं मार्गरक्षाकरं पाथेयं संपादयति, तत्समिदाधानं प्रणेष्यमाणा[या]ग्नेय तादृगेव भवति ।

समित्संख्यां विधत्ते—" तिस्र आ दधाति त्रिवृद्वा अग्निर्यावानेवाग्निस्तस्मै भागधेयं करोति " [सं० का० ५ प्र० ४ अ० ६] इति ।

---

१ क. घ. ङ. °येत्यौदु° । २ क. घ. ङ. °तास्तिसृभिस्ति° ।

आहवनीयादिभेदेन त्रिगुणत्वम् । तमिद्ग्रन्थं विवृणोति—"औदुम्बरीमेवन्यूर्वा उदुम्बर ऊर्जमेवास्मा अपि दधाति" [तै० का० ५ प्र० ४ अ० ६] इति ।

कल्पः—"उदु त्वा विश्वे देवा इत्यग्निमुद्यम्य" इति । पाठस्तु—

उदु त्वा विश्व इति । हेऽग्ने विश्वे सर्वेऽपि देवाः प्राणरूपाग्निभिर्भ-क्षणसाधनकुशलाभिरिन्द्रियवृत्तिभिरुदु ऊर्ध्वमेव त्वां भरन्तु धारयन्तु । स त्वं नोऽस्माकं शिवतमः शान्ततमः सुपत्नीकः सुमुखो विभावसुः प्रभविता वासयिता च भव ।

अस्य मन्त्रस्य प्रथमपादे विश्वदेवशब्दार्थं दर्शयति—"उदु त्वा विश्वे देवा इत्याह प्राणा वै विश्वे देवाः प्राणैरेवैनमुद्यच्छते" [तै० का० ५ प्र० ४ अ० ६] इति । दीव्यन्ति स्वस्वकार्येषु व्यवहरन्तीति देवाः प्राणाः ।

द्वितीयपादेऽग्न्यादिशब्दान्परित्यज्य चित्तिशब्दस्य तात्पर्यं दर्शयति—

"अग्ने भरन्तु चित्तिभिरित्याह यस्मा एवैनं चित्तायोद्यच्छते तेनैवैनꣳ समर्धयति" [तै० का० ५ प्र० ४ अ० ६] इति ।

चित्तिशब्देन + चित्तिमानुगतेन चित्तमभिप्रेतकार्यं लक्ष्यते । तथा सति यस्मै कार्यायेदमुद्यमनं तेनैव कार्येणैनमग्निं समृद्धं करोति ।

कल्पः—"पञ्च दिशो दैवीरिति पञ्चभिर्हरण्याग्नीध्रात्" इति । तत्र प्रथममाह—

पञ्च दिशो दैवीरिति । इमाः प्राच्यादयः पञ्च दिशो दैवीरिन्द्रयमादीनां देवानां संबन्धिन्यो दैवीः स्वयमपि देवतारूपा अमतिमस्मदीयं प्रज्ञामान्द्यं दुर्मतिं दुष्टां पापविषयां बुद्धिं चापबाधमाना विनाशयन्त्यो रायस्पोषे धनसमृद्धौ यज्ञ-पतिं यजमानमा समन्तात्तेजमाना इमं यज्ञमवन्तु रक्षन्तु । अथ द्वितीयामाह—

रायस्पोषे अधीति । अयं यज्ञो रायस्पोषे धनसमृद्धावध्यस्थादधिकमव-स्थितः सन्तर्वदा धनपुष्टिं ददातीत्यर्थः । कीदृशो यज्ञः, तमिद्धे सम्यक्प्रज्व-लितेऽग्नावधि मामहानोऽधिकं पुनः पुनः पूज्यमानः, उक्थपत्र उक्थानि शस्त्राणि पत्रं वाहनं यस्यासावुक्थपत्रः, ईड्यः स्तुत्यः, गृभीत ऋत्विग्यजमानैः परि-गृहीतः । ते च तमं प्रज्वलितं घर्ममग्निं परिगृह्यायजन्तं सर्वदा यजन्ति । अथ तृतीयामाह—

+ स. पुस्तकटिप्पण्यां 'चित्तिमन्त्रगतेनेति पाठो भवितुं युक्तः' इति वर्तते ।

---

१ स. च. इत्युक्त्यमु° । २ स. घ. ङ. च. चित्तमा° । ३ स. च. °दात्वित्य° । ४ स. च. °न्त य° ।

(अग्निप्रणयनाभिधानम्)

ऊर्जा यद्यज्ञमिति। देवा दीव्यन्तो व्यवहरन्त ऋत्विग्यजमाना धर्मादिविशेषणैर्विशेषितायाग्नये यद्यस्मिन्काल ऊर्जा हविःस्वरूपेणान्नेन यज्ञपशमन्त शान्तं तुष्टिहेतुमकुर्वत। कीदृशायाग्नये, दैव्याय-देवानां हिताय, वर्षे यागद्वारा जगतो धारयित्रे, जोष्ट्रेऽस्माभिर्दीयमानस्य हविषः सेवित्रे। तस्मिन्काले ऽयमग्निरीदृशो भवति। कीदृश इति तदुच्यते—देवश्रीर्देवानेव श्रयति हविर्वहनेनेति देवश्रीः। श्रीमणाः श्रयते सेवत इति श्रीर्यजमानस्तस्मिन्नुग्रहरूपं मनो यस्यासौ श्रीमणाः। शतपयाः शतसंख्याकानि पयःप्रभृतीनि हवींषि यस्यासौ शतपयाः। तादृशमग्निं परिगृह्य देवा ऋत्विग्यजमानाय इमं यज्ञमाधन्माप्नुवन्त्यनुतिष्ठन्तीत्यर्थः। अथ चतुर्थीमाह—

सूर्यरश्मिरिति। दारिद्र्यं हरतीति हरिर्हिरण्यं, हिरण्यवर्णाः केशस्थानीयाः शिखा यस्यासौ हरिकेशोऽग्निः। स च सूर्यरश्मिर्भूत्वा सविता प्राणिनां तत्तद्व्यवहारेषु प्रेरको ज्योतिर्मण्डलरूपः सन्पूर्वस्यां दिश्यजस्रं प्रतिदिनमुदयानुदेति। यस्मिन्नुदये सति पूषा पोषकः स देवस्तस्य प्रसवं जगतः प्रेरणं याति प्राप्नोति। कीदृशो देवः, गोपा रक्षकः। किं कुर्वन्, विश्वा भुवनानि संपश्यन्सर्वाँल्लोकानवलोकयन्। अथ पञ्चमीमाह—

देवा देवेभ्य इति। पशुबन्धरूपो यज्ञश्चतुर्भागः। तत्रोपाकरणान्तः प्रथमः। उपाकृतस्य शमित्रदेशे स्थितिर्द्वितीयः। यागार्थं यत्संस्कारं करोति स तृतीयः। हविष्प्रदानान्तश्चतुर्थः। तदिदं भागचतुष्टयं क्रमेणाभिधीयते। देवा ऋत्विग्यजमाना देवेभ्यो हविःस्वीकर्तृभ्योऽध्वर्यवो यागं कर्तुमिच्छन्तोऽस्थुस्तिष्ठन्ति। उपाकरणान्तमनुतिष्ठन्तीत्यर्थः। तत ऊर्ध्वं शमित्रे नीतं शमित्रदेशे प्रापितं पशुरूपं हविर्भवति। तत ऊर्ध्वं शमिता वपाभ्ये यागार्थं संस्करोति स तृतीयः। उपरितनश्चतुर्थो यज्ञभागः। यत्र यस्मिन्भागचतुष्टयोपेते यज्ञे हव्यमेति देवता हविः प्राप्नोति ततस्तस्माद्भागचतुष्टयोपेतायज्ञात्सावका आहवनीयादयोऽग्नयो मोऽस्मदीया आशिषोऽपेक्षिताम्फलविशेषाञ्जुषन्तां संपादयन्त्वित्यर्थः।

एषु मन्त्रेषु प्रथममन्त्रे प्रथमपादस्य तात्पर्यं दर्शयति—"पञ्च दिशो दैवीर्यज्ञमवन्तु देवीरित्याह दिशो ह्येषोऽनु प्रच्यवते" [तै० ब्रा० ५ प० ४ अ० ६] इति। एष यजमानः प्राच्याद्याः पञ्च दिशोऽनुक्रमेण यज्ञरक्षार्थं

प्रेरयति । द्वितीयपादस्य तात्पर्यं दर्शयति—" अपामतिं दुर्मतिं बाधमाना इत्याह रक्षसामपहत्यै " [सं० का० ५ प्र० ४ अ० ६] इति ।

अमतेर्दुर्मतेश्च रक्षोभिः संपादितत्वात्तद्बाधेन रक्षांस्येवापहतानि भवन्ति ।

तृतीयपादे रायस्पोषशब्देन विवक्षितार्थं दर्शयति—

" रायस्पोषे यज्ञपतिमाजन्तीरित्याह पशवो वै रायस्पोषः पशूनेवाव रुन्धे " [सं० का० ५ प्र० ४ अ० ६] इति ।

उदु त्वा विश्वे देवा इत्येनेनोद्यमनमन्त्रेण सहितमुत्तरमन्त्रपञ्चकं विनियुङ्क्ते—

" षड्भिर्हरति षड्वा ऋतव ऋतुभिरेवैनꣳ हरति " [सं० का० ५ प्र० ४ अ० ६] इति ।

रायस्पोषे आधे यज्ञ ऊर्जा यद्यज्ञमिति मन्त्रद्वयं विशेषतः प्रशंसति—

" द्वे परिगृह्यवती भवतो रक्षसामपहत्यै" [सं०का०५प्र०४अ०६] इति ।

परिगृह्यायजन्त परिगृह्य देवा यज्ञमायन्नित्येवं परिगृह्यशब्दो ययोर्ऋचोस्ते परिगृह्यवत्यौ । परिग्रहः पृथक्स्वीकारस्तेन यज्ञं विनाशयितुमसमर्थानि रक्षांसि स्वयमेवापहन्यन्ते । षट्सु मन्त्रेषु पञ्चमन्त्रस्य तात्पर्यं दर्शयति—

" सूर्यरश्मिर्हरिकेशः पुरस्तादित्याह प्रसूत्यै " [सं० का० ५ प्र० ४ अ० ६] इति । पूषा प्रसवं यातीति तन्नामिधानादयं मन्त्रः प्रसूत्यै संपद्यते ।

षष्ठमन्त्रस्य चतुर्थपादे पावकशब्दस्य तात्पर्यं दर्शयति—

"ततः पावका आशिषो नो जुषन्तामित्याहाग्नं वै पावकोऽन्नमेवाव रुन्धे " [सं० का० ५ प्र० ४ अ० ६] इति । अग्निवाचकः पावकशब्दस्तेन पच्यमानमन्नमुपलक्ष्यते । कल्पः—" विमान एष दिवो मध्य आस्त इति द्वाभ्यामाग्नीध्रेऽश्मानं निधाय " इति । तत्र प्रथममाह—

विमान एष इति । एषोऽश्मा विमानो विविधं जगन्निर्मिमाणः सन्दिवो मध्य आस्त आग्नीध्रस्थानीयस्याऽऽकाशस्य मध्ये तिष्ठति । कीदृशोऽश्मा । रोदसी द्यावापृथिव्यावन्तरिक्षं चाऽऽपप्रिवान्सर्वतः पूरितवान् । यद्यप्येवमश्मा न किंचिन्निर्मिमीते नापि लोकत्रयमापूर्य तिष्ठति तथापि परमेश्वरगुणैरस्य स्तूयमानत्वान्न कोऽपि विरोधः । स तथा स्तूयमानो विश्वाचीर्विश्वव्यापिनीर्दीक्षोऽभिचष्टे सर्वतः प्रकाशयति । तथा घृताचीर्घृतमतिहेतुभूता धेनूश्चाभिचष्टे । तथाऽन्तरा

(अग्निप्रणयनाभिधानम्)

ब्रह्माण्डस्य पूर्वमपरं च केतुमुदयास्तमयाभ्यां पूर्वापरदिशोश्चिह्नभूतं सूर्यमभिचष्टे। अथ द्वितीयामाह—

उक्षा समुद्र इति। अयमश्वोक्षा मेघो यागद्वारेण फलाभिवर्षक इत्यर्थः। समुद्रो बहुफलप्रदत्वात्तमुद्रसदृशः। अरुणः पूर्वमन्त्रे सर्वप्रकाशकत्वेनोपचरितत्वात्सूर्यसदृशः। सुपर्णः स्वर्गं प्रत्युद्गमनहेतुत्वात्पक्षिसदृशः। तथाविधोऽश्वा पितुः पालकस्य पूर्वदिग्वर्तिन आहवनीयस्य योनिं कारणभूतमाग्नीध्रमाविवेश प्राविशत्। 'येषां दीक्षितानामाहवनीय उद्वायेदाग्नीध्रादुद्धरेत्' इत्याहवनीययोनित्वमाग्नीध्रस्याम्यत्राऽऽम्नातम्। अथं पृश्निः श्वेतवर्णोऽश्वा दिवो मध्ये निहितः स्थापितः सन्रजसो रञ्जनीयस्य जगतोऽन्तावुत्पत्तिप्रलयरूपं कोटिद्वयं पाति परमेश्वररूपेण पालयति। कल्पः—"इन्द्रं विश्वा अवीवृधन्निति चतसृभिरापृच्छाद्वत्वा" इति। तत्र प्रथमामाह—

इन्द्रं विश्वा अवीवृधन्निति। विश्वा गिरः सर्वाः स्तुतय इन्द्रं परमैश्वर्योपेतमग्निमवीवृधन्वर्धितवत्यः। कीदृशमिन्द्रं, समुद्रव्यचसं समुद्रवद्व्यापिनम्। रथीनां रथीतमं रथ एषामस्तीति व्युत्पत्त्या रथिशब्देन राजामात्यादय उच्यन्ते। तेषां मध्येऽतिशयेन रथी रथीतमस्तम्। वाजानां पतिमन्नानां पालकम्। तथा सत्पतिं सन्मार्गवर्तिनां यजमानानां पालकम्। अथ द्वितीयामाह—

सुप्रकेतं यज्ञ इति। सुप्रकेतः सुप्रकेतस्य प्रजापशुरूपस्य सुखस्याऽऽख्याता पादयिता यज्ञश्च देवानावक्षदावहतु। यक्षदग्निश्च पूर्वोक्ताग्निरपि देवानावक्षदाह्वयतु। अथ तृतीयामाह—

वाजस्य मेति। इन्द्रः परमैश्वर्ययुक्तोऽग्निर्वाजस्याऽन्नस्य प्रसूतिनिमित्तेनोद्ग्राभेणोद्ग्रहणसामर्थ्येन मां यजमानमुद्ग्रभीदुत्कर्षं प्रापितवान्। अथानन्तरमिन्द्रः परमैश्वर्ययुक्तोऽयमग्निर्निग्राभेण निग्रहसामर्थ्येन मे सपत्नान्मदीयान्वैरिणोऽरातीरकार्षीद्गृहीतान्करोतु। अथ चतुर्थीमाह—

उद्ग्राभं चेति। देवाः सर्वे ब्रह्म परिवृढमुद्ग्राभमस्मदीयमुत्कर्षं निग्राभं च वैरिणो निकर्षं चावीवृधन्वर्धितवन्तः। अथानन्तरमिन्द्राग्नी विषूचीनान्तर्वतः पलायमानान्मे सपत्नान्मदीयान्वैरिणो व्यस्यतां विनाशयताम्। अथ विनियोगसंग्रहः—

(अप्रतिरथसूक्ताभिधानम्)

उत्रिभिः समिधो दध्यादुदु त्वोद्यच्छतेऽमलम् ।
पञ्चेति पञ्चभिर्हुत्वा विद्वाभ्यामश्मनः स्थितिः ॥
इन्द्रं चतुर्भिरापृच्छाद्वच्छेत्पञ्चदशेरिताः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे षष्ठप्रपाठके तृतीयोऽनुवाकः ।' ३ ॥

(अथ चतुर्थाष्टके षष्ठप्रपाठके चतुर्थोऽनुवाकः) ।

आशुः शिशानो वृषभो न युध्मो घनाघनः क्षोभणश्चर्षणीनाम् । संक्रन्दनोऽनिमिष एकवीरः शतꣳ सेना अजयत्साकमिन्द्रः । संक्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना । तदिन्द्रेण जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा । स इषुहस्तैः स निषङ्गिभिर्वशी सꣳस्रष्टा स युध इन्द्रो गणेन । सꣳसृष्टजित्सोमपा बाहुशर्ध्युग्रधन्वा प्रतिहिताभिरस्ता । बृहस्पते परि दीय (१) रथेन रक्षोहाऽमित्राꣳ अपबाधमानः । प्रभञ्जन्त्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम् । गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा । इमꣳ सजाता अनु वीरयध्वमिन्द्रꣳ सखायोऽनु सꣳ रभध्वम् । बलविज्ञायः स्थविरः प्रवीरः सहस्वान्वाजी सहमान उग्रः । अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्र रथमा तिष्ठ गोवित् । अभि गोत्राणि

(अप्रतिरथसूक्ताभिधानम्)

सहसा गाहमानोऽदायः (२) वीरः शतमन्युरिन्द्रः। दुश्च्यवनः पृतनाषाडयुध्योऽस्माकꣳ सेना अवतु प्र युत्सु। इन्द्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः। देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रे। इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुतांꣳ शर्ध उग्रम्। महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात्। अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु(३)। अस्माकं वीरा उत्तरे भवन्त्वस्मान् देवा अवता हवेषु। उद्धर्षय मघवन्नायुधान्युत्सत्व(त्व)नां मामकानां महाꣳसि। उद्वृत्रहन्वाजिनां वाजिनान्युद्रथानां जयतामेतु घोषः। उप प्रेत जयता नरः स्थिरा वः सन्तु बाहवः। इन्द्रो वः शर्म यच्छत्वनाधृष्या यथाऽसथ। अवसृष्टा परा पत शरव्ये ब्रह्मसꣳशिता। गच्छामित्रान्प्र (४) विश मैषां कं चनोच्छिषः। मर्माणि ते वर्मणाच्छादयामि सोमस्त्वा राजाऽमृतेनाभि वस्ताम्। उरोर्वरीयो वरिवस्ते अस्तु जयन्तं त्वानु मदन्तु देवाः। यत्र बाणाः संपतन्ति कुमारा विशिखा इव। इन्द्रो नस्तत्र वृत्रहा विश्वाहा शर्म यच्छतु(५)॥

(दीयादायो जयन्त्वमित्रान्प्र चत्वारिꣳशच्च)।

(अप्रतिरथसूक्ताभिधानम्)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके षष्ठप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ चतुर्थकाण्डे षष्ठप्रपाठके चतुर्थोऽनुवाकः) ।

तृतीयेऽनुवाकेऽग्निप्रणयनमुक्तम् । अथाप्रतिरथसूक्तमुच्यते ।

कल्पः—" आशुः शिशान इति दक्षिणतो ब्रह्मा दशर्चेनान्वेति मैत्रावरुणः प्रतिप्रस्थाता वा " इति । तत्र प्रथमामाह—

आशुः शिशान इति । अयमिन्द्रः परमैश्वर्योपेतः शतं सेनाः शतसंख्याकाः परकीयसेनाः साकमेकप्रयत्नेनाजयत् । कीदृश इन्द्रः । आशुः शीघ्रकारी, शिशानस्तीक्ष्णोऽत्युग्र इत्यर्थः । तत्र दृष्टान्तः—वृषभो न युध्मः । यथा वृषभो वृषभान्तरेण योद्धुमुत्सुकस्तद्वदयमपि घनाघनोऽतिशयेन शत्रूणां हिंसको घातकः । चर्षणीनां परसेनागतमनुष्याणां क्षोभणः क्षोभहेतुः । संक्रन्दनः समीचीनं क्रन्दनं परभयहेतुर्ध्वनिविशेषो यस्यासौ संक्रन्दनः । अनिमिषः कदाचिदपि निमेषं न करोत्यत्यन्तसावधान इत्यर्थः । एकवीरः परानपेक्षेण(क्षः) स्वयमेक एव जेतुं समर्थः शूरः । अथ द्वितीयामाह—

संक्रन्दनेनेति । युधो युद्धार्थिनो हे नरो मनुष्या इन्द्रेणानुगृहीताः सन्तस्तत्परबलं जयत वशी कुरुत । वशीकृत्य च तत्सहध्वमभिभवत विनाशयतेत्यर्थः । कीदृशेनेन्द्रेण, संक्रन्दनेनानिमिषेण । पूर्ववद्व्याख्येयम् । जिष्णुना जयशीलेन, युत्कारेण युद्धकारिणा, दुश्च्यवनेन च्यावयितुं दुःशक्येन, धृष्णुना भीतिरहितेन, इषुहस्तेन बाणाद्यायुधोपेतेन, वृष्णा कामानां वर्षकेण ।

अथ तृतीयामाह—

स इषुहस्तैरिति । इषवो हस्तेषु येषां भटानां त इषुहस्तास्तैः साकं स इन्द्रो वशी परबलं स्ववशं करोति । निषङ्गिणः खड्गहस्तास्तैः साकं स इन्द्रो वशी स्वकीयैर्धानुष्कैः खड्गहस्तैश्चोपेतत्वात्परसैन्यं वशी करोतीत्यर्थः । यद्वा परसैन्यगतैर्धानुष्कैः खड्गहस्तैश्च सहितं तद्वशी करोति । स इन्द्रो युधो योद्धा सङ्गणेन परकीयभटसमूहेन संसृष्टा सहिता गत्वा सन्याङ्मिश्रितो भवति । मिश्रीभूय च ये स्वेन संसृष्टास्तान्सर्वाञ्जयतीति संसृष्टजित् । यजमानानां यागेषु

---

१ ख. च. °मुत्सहते वृ°।

(अप्रतिरथसूक्ताभिधानम्)

सोमं पिबतीति सोमपा अत एव बाहुशर्धी बाहुबलोपेत ऊर्ध्वधन्वा निरन्तरमुद्यतधनुष्कः प्रतिहिताभिस्तेन धनुषा प्रेरिताभिरिषुभिरस्ता क्षेप्ता विनाशयतीत्यर्थः। अथ चतुर्थीमाह—

बृहस्पते परीति। बृहद्वाक्यस्याः पालको बृहस्पतिरिन्द्रः। अत एव शास्त्रान्तरे समाम्नातम्—"वाग्वै बृहत्तस्या एष पतिस्तस्माद्बृहस्पतिरेवः" इति। व्याकरणकर्तृत्वमिन्द्रस्य वाक्पतित्वम्। तच्चान्यत्राऽऽम्नातम्—"ते देवा इन्द्रमब्रुवन्निमां नो वाचं व्याकुर्वीति" इति। तथाविध हे इन्द्र त्वं रथेन परिवीय सर्वतो गच्छ। कीदृश इन्द्रः, रक्षोहा राक्षसानां हन्ता, अमित्रान्शत्रून्नवधमानो यथाऽपयन्ति तथा बाधमानः, सेनाः परकीयाः प्रमृक्षन्प्रकर्षेण भग्नाः कुर्वन्, प्रमृणः प्रकर्षेण हिंसको युधा युद्धेन जयन्तंत्र विजयमानः। अस्माकमस्मदीयानां रथानामधिवोचि रक्षको भव। अथ पञ्चमीमाह—

गोत्रभिदमिति। हे सजाताः समानजन्मानोऽस्मदीया ज्ञातयो यूयमिमिन्द्रमनुवीरयध्वम्। अयमिन्द्रः पुरतो वीरः शूरोऽभवत्पश्चाद्यूयं शूरा भवत। हे सखाय इन्द्रमनुत्तरमध्वमिन्द्रः पुरतो युद्धं सम्यगारभतां पश्चाद्भवन्त आरभन्ताम्। कीदृशमिन्द्रं, गोत्रभिदं गोत्रान्पर्वतान्भिनत्ति तदीयपक्षांश्छिनत्तीति गोत्रभित्तं, गां भूमिं विन्दते लभत इति गोवित्तं गोविदं, वज्रो बाहौ यस्य स वज्रबाहुस्तम्, अस्म जयन्तं भूमिरात्मियं शत्रूणां यथा भवति तथा विजयमानम्, ओजसा बलेन प्रमृणन्तं प्रकर्षेण हिंसन्तम्। अथ षष्ठीमाह—

बलविज्ञाय इति। हे इन्द्र त्वं जैत्रं जयशीलं रथमातिष्ठाऽऽरोह। कीदृशस्त्वं, बलं परकीयसामर्थ्यं विजानातीति बलविज्ञायः। स्थविरः पुरातनः। प्रवीरः शूरेष्वप्यतिशूरः। सहस्वान्बलवान्। वाज्यजवान्। सहमानः परेषामभिभविता। उग्रो युद्धेषु क्रूरः। अभितो वीराः शूरभटा यस्यासावभिवीरः। अभितः सत्त्वानः परिचारकाः प्राणिनो यस्यासावभिसत्त्वा। सहसो बलाज्जातः सहोजा बलाधिक इत्यर्थः। गां भूमिं विन्दते लभत इति गोवित्। अथ सप्तमीमाह—

अभिगोत्राणीति। अयमिन्द्रः प्रयुत्सु प्रकृष्टेषु युद्धेषु अस्माकं सेना अवतु रक्षतु। कीदृश इन्द्रः, अभि सर्वतोऽवस्थितानि गोक्षाणि युद्धक्षेत्राणि

---

१ स. च. रक्षसां।

सहसा शीघ्रं गाहमानः प्रविशन् । अदायो दा(द)याराहितः । वीरः शूरः । शतमन्युर्बहुविधक्रोधयुक्तः । दुश्च्यवनश्च्यावयितुं दुःशक्यः । पृतनाषाट् परकीयसेनानामभिभविता । अयुध्यः केनापि योद्धुमशक्यः । अथाष्टमीमाह—

इन्द्र आसामिति । याः सेना अस्मदनुग्रहार्थं वैरिषु गच्छन्त्यासां सेनानामिन्द्रो नेता भवतु । यो बृहस्पतिर्यो च दक्षिणा देवी यश्च यज्ञो यश्च सोम एतेषामेकैकः पुरतो गच्छतु । याश्चैतत्संबन्धिन्यो देवसेनाः परबलमभिभूय-न्त्यो जयन्तीनां ता(न्त्यस्ता)सामग्रे मरुतो यन्तु गच्छन्तु । अथ नवमीमाह—

इन्द्रस्य वृष्ण इति । वृष्णः कामानामिवर्षिणः इन्द्रस्य राज्ञो राज्यं कुर्वतो वरुणस्य शर्धो बलमुग्रं युद्धेष्वतितीव्रमस्तु । महामनसां युद्धे स्थिरचित्तानां भुवनच्यवानां शत्रून्भुवनेभ्यश्च्यावयितुं समर्थानां जयतां विजयमानानां देवानां घोषो ध्वनिरुदस्थात्तवेत उत्थितोऽभूत् । अथ दशमीमाह—

अस्माकमिन्द्र इति । युद्धार्थं परसैन्यं गवेषु सम्यक्प्राप्तेषु सत्स्वस्माकमिन्द्रो रक्षिता भवतिवति शेषः । तदानीमस्माकं या इषवोऽस्मदीयैर्मुक्तास्ता जयन्तु परसैन्यानि विध्यन्तु । अस्माकं ये वीराः शूरा भटास्त उत्तरे भवन्तु परकीयभटेभ्य उत्कृष्टा भवन्तु । देवा इवेषु युद्धेषु अस्मानु अस्मानेवावतावन्तु रक्षन्तु ।

इत्थं दशर्चमप्रतिरथसूक्तं समाप्तम् । अथ तत्रैव विकल्पिताः पञ्चर्च उच्यन्ते—तत्र प्रथममाह—

उद्धर्षयेति । हे मघवन्निन्द्राऽऽयुधान्यस्मदीयान्युद्धर्षय परकीयेभ्य उत्कृष्टानि कृत्वाऽस्मान्हर्षय । मामकानां मदीयानां सत्व(त्त्व)नां प्राणिनां महांसि तेजांस्युत्कृष्टानि कृत्वा तान्हर्षय । हे वृत्रहन्वाजिनामस्मदीयानामश्वानां वाजिनानि शीघ्रगमनान्युत्कृष्टानि कृत्वा हर्षय । जयतां विजयं प्राप्नुवतां रथानामस्मदीयानां घोष उदेतु महाध्वनिरुद्गच्छतु । अथ द्वितीयामाह—

उप प्रेतेति । हे नरोऽस्मदीयाः पुरुषा उपेत परसैन्यस्य समीपे प्रकर्षेण गच्छत । ततो जयत विजयं प्राप्नुत । वो युष्माकं बाहवः स्वकीयायुधैः प्रहरणेषु स्थिराः सन्तु । यथा यूयमनाधृष्या अस्तथ केनाप्यतिरस्कार्या भवथ तथाऽयमिन्द्रो वो युष्माकं शर्म यच्छतु सुखं ददातु । अथ तृतीयामाह—

---

१ ख. घ. ङ. च. °व्रम् । म° । २ क. घ. ङ. °क्षितिते । ३ ख. च. अधिका । ४ क. घ. ङ. °यान्यायुधान्य° ।

(अप्रतिरथसूक्ताभिधानम्)

अवसृष्टेति। हिंसिका हेतिः शरव्या। हे शरव्ये ब्रह्मणा संशिता तीक्ष्णीकृता त्वमवसृष्टाऽस्माभिर्मुक्ता सती परापत सहसा परसैन्ये पतिवा भव। पतित्वा अधित्राञ्शत्रून्च्छ प्राप्नुहि। प्राप्य च प्रविशैषां शत्रूणां शरीरमध्ये प्रवेशं कुरु। प्रविश्य चैषां शत्रूणां मध्ये कंचन पुरुषं मोच्छिषोऽवशिष्टं मा कुरु। सर्वानपि जहीत्यर्थः। अथ चतुर्थीमाह—

ममाणि त इति। हे यजमान ते तव ममानि वर्मभिः कवचैश्छादयामि। सोमो राजा त्वाममुतेन मरणनिवारकेण केनापि कवचविशेषेणाभिवस्तामभित आच्छादयतु। ते तव वरिवो धनमूरोर्वरीयोऽस्तु, अन्यदीयादधिकादप्यत्यन्तमधिकमस्तु। जयन्तं विजयं प्राप्नुवन्तं त्वां देवा अनुमदन्त्वनुकूला भूत्वा हृष्यन्तु। अथ पञ्चमीमाह—

यत्र बाणा इति। यत्र यस्मिन्युद्धे बाणाः परैर्मुक्ताः संपतन्तीतश्चेतश्च संभूय पतन्ति। तत्र दृष्टान्तः—कुमारा विशिखा इव, [यथा] मुण्डितशिरस्का विशीर्णकेशा बाल्यात्यन्तं बालाश्चपलाः सन्त इतश्चेतश्च गच्छन्ति तद्वत्। तत्र युद्धेऽयमिन्द्रो विश्वाहा परकीयसर्वप्राणिघाती वृत्रहा विशेषतो वैरिघाती सन्नोऽस्मभ्यं शर्म यच्छतु सुखं ददातु। आशुः शिशान इत्येतत्सूक्तं विनियुङ्क्ते—

"देवासुराः संयत्ता आसन्ते देवा एतदप्रतिरथमपश्यन्तेन वै तेऽप्रत्यसुरानजयन्तदप्रतिरथस्याप्रतिरथत्वं यदप्रतिरथं द्वितीयो होताऽन्वाहाप्रत्येव तेन यजमानो भ्रातृव्यान्त्सपत्नानप्रत्यथो अनभिजितमेवाभि जयति" [सं० का० ५ प्र० ४ अ० ६] इति।

यदा देवाश्चासुराश्च युद्धायोद्यतास्तदानीं देवा विजयप्रदत्वेनाप्रतिरथाख्यमैन्द्रसूक्तमपश्यन्। + तेनैव यजमानः सर्वान्भ्रातृव्यान्प्रतिकूलराहित्यं यथा भवति तथैव जयति। अपि च पूर्वमनभिजितमपि धनं देशविशेषं वा सर्वथा विजयत्येव। सूक्तमन्त्रसंख्यां विधत्ते—

"दशर्चं भवति दशाक्षरा विराड्विराजौ लोकौ विधृतावनयोर्लोकयोर्विधृत्या अथो दशाक्षरा विराडन्नं विराड्विराज्येवान्नाद्ये प्रति तिष्ठति" [सं० का० ५ प्र० ४ अ० ६] इति।

+अत्र तेन वै तेऽप्रत्यसुरानित्यादिहोताऽन्वाहेत्यन्तसंहिताभाष्यस्य व्याख्यानं त्रुटितम्।

---

१ क. घ. ङ. विकीर्ण°। २ क. घ. ङ. °ोऽस्माकं श°। ३ क. °व देवाश्चार्य य°। ख. च. °व देवा निवार्य लौकिको य°। ४ क. घ. ङ. °पि च ध°। ५ क. घ. ङ°।

अस्मिन्ननुवाके समाम्नातानामृद्धर्षयेत्यादीनां पञ्चानां विकल्पार्थत्वात्सूक्तगता ऋचो दशैव संपद्यन्ते । विराट्छन्दसो दशाक्षरत्वात्तस्य च्छन्दसः सामर्थ्येनैव लोकयोर्विधृतत्वात्तयोर्विधृत्यर्थमिदं दशर्चं सूक्तं संपद्यते । अपि च दशाक्षरस्य विराट्छन्दसोऽन्यहेतुत्वेनाभ्यासादृशसंख्याद्वारा तस्मिन्नभ्यासे प्रतिविहिते । अथ पूर्वानुवाकोक्तविमान इत्यादिमन्त्रद्वयसाध्यमग्निधानं विधत्ते—

" असदिव वा अन्तरिक्षमन्तरिक्षमिवाऽऽग्नीध्रमाग्नीध्रेऽग्निधानं नि दधाति सत्त्वाय " [सं० का० ५ प्र० ४ अ० ६] इति ।

भूमिवन्मूर्तस्वरूपाभावादिदमन्तरिक्षमविद्यमानसदृशं भवति । अन्तरिक्षसदृशं चाऽऽग्नीध्रं, हविर्धानशकलग्रहसादनादीनामभावेन शून्यत्वप्रतिभासात् । अतः शून्यत्वनिवारणेन च सत्सद्भावाय तत्रापि कंचिदग्निधानं निदध्यात् ।

मन्त्रद्वित्वं प्रशंसति—

" द्वाभ्यां प्रतिष्ठित्यै " [सं० का० ५ प्र० ४ अ० ६] इति ।

प्रथममन्त्रे विमानशब्दस्य तात्पर्यं दर्शयति—

" विमान एष दिवो मध्य आस्त इत्याह व्येवैतया मिमीते " [सं० का० ५ प्र० ४ अ० ६] इति ।

एतयर्चा पूर्वं शून्यमाग्नीध्रं वस्तु विशिष्टं यथा भवति तथा मिमीत एव प्रमितं करोत्येव । द्वितीयमन्त्रे पृश्निशब्दतात्पर्यं दर्शयति—

" मध्ये दिवो निहितः पृश्निरश्मेत्याहान्नं वै पृश्न्यन्नमेवाव रुन्धे " [सं० का० ५ प्र० ४ अ० ६] इति ।

पक्वं शाल्यन्नं श्वेतं भवति । अतः श्वेतेनाश्मना तादृशमन्नं प्राप्नोति ।

इन्द्रं विश्वा अवीवृधन्नित्यादिमन्त्रचतुष्टयसाध्यं गमनं विधत्ते—

" चतसृभिरा पृच्छतीति चत्वारि छन्दांसि छन्दोभिरेव " [सं० का० ५ प्र० ४ अ० ६] इति ।

आग्नीध्रान्निर्गत्य पृच्छपर्यन्तमेतैर्मन्त्रैर्गच्छेत् । गायत्र्यादीनां मुख्यच्छन्दसां चतुष्ट्वान्मन्त्रसंख्यायाश्छन्दोभिरेव युक्तो गतवान्भवति ।

प्रथममन्त्रस्य प्रथमपादेऽवीवृधन्निति पदस्य तात्पर्यं दर्शयति—

" इन्द्रं विश्वा अवीवृधन्नित्याह वृद्धिमेवोपावर्तते " [सं० का० ५ प्र० ४ अ० ६] इति । तत्रैव चतुर्थपादे वाजशब्दतात्पर्यं दर्शयति—

---

१ ख. च. युक्तः सन्गतः ।

(अग्निस्थापनाभिधानम्)

" वाजानाꣳ सत्पतिं पतिमित्याहान्नं वै वाजोऽन्नमेवाव रुन्धे " [सं० का० ५ प्र० ४ अ० ६] इति । द्वितीयमन्त्रे तुम्नशब्दतात्पर्यं दर्शयति——

" तुम्नहूर्यज्ञो देवाꣳ आ च वक्षदित्याह प्रजा वै पशवः तुम्नं प्रजामेव पशूनात्मन्धत्ते " [सं० का० ५ प्र० ४ अ० ६] इति । अस्मिन्नेव मन्त्र उत्तरभागस्य तात्पर्यं दर्शयति—

" यक्षदग्निर्देवो देवाꣳ आ च वक्षदित्याह स्वमाक्षत्यै " [सं० का० ५ प्र० ४ अ० ६] इति।

देवाꣳ आ च वक्षदित्युक्त्या तान्देवान्स्वगतान्स्वाधीनान्करोति ।

तृतीयमन्त्रगतयोरुद्ग्राभनिग्राभशब्दयोस्तात्पर्यं दर्शयति——

" वाजस्य मा प्रसवेनोद्ग्राभेणोदग्रभीदित्याहासौ वा आदित्य उद्यन्नुद्ग्राभ एष निम्रोचन्निग्राभो ब्रह्मणैवाऽऽत्मानमुद्गृह्णाति ब्रह्मणा भ्रातृव्यं निगृह्णाति" [सं० का० ५ प्र० ४ अ० ६] इति ।

ऊर्ध्वग्रहणवाचिनोद्ग्राभशब्देनोद्गच्छन्निग्राभशब्देनाधो गच्छन्नसावादित्यो लक्ष्यते । अतस्तदुभयप्रतिपादकेन मन्त्रेणाऽऽत्मानमुद्गृह्णाति उत्कर्षं प्रापयति । स्वभ्रातृव्यं निगृह्णाति निम्नं प्रापयति । अत्र विनियोगसंग्रहः——

आशुरित्यप्रतिरथं होताऽन्वाह दशर्चकम् ।
उर्ध्वयेति विकल्पार्था मन्त्राः पञ्चदशेरिताः ॥ इति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे षष्ठप्रपाठके
चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ चतुर्थाष्टके षष्ठप्रपाठके पञ्चमोऽनुवाकः) ।

प्राचीमनु प्रदिशं प्रेहि विद्वानग्नेरग्ने पुरो-
अग्निर्भवेह । विश्वा आशा दीद्यानो वि भा-
ह्यूर्जं नो धेहि द्विपदे चतुष्पदे । क्रमध्वमग्निना
नाकमुख्यः हस्तेषु बिभ्रतः । दिवः पृष्ठꣳ
सुवर्गत्वा मिश्रा देवेभिराध्वम् । पृथिव्या

अहमुदन्तरिक्षमाऽरुहमन्तरिक्षान्नाकमाऽरुहम् ।
दिवो नाकस्य पृष्ठात्सुवर्ज्योतिरगाम् (१)
अहम् । सुवर्यन्तो नापेक्षन्त आ द्याꣳ रोहन्ति
रोदसी । यज्ञं ये विश्वतोधारꣳ सुविद्वाꣳसो
वितेनिरे । अग्ने प्रेहि प्रथमो देवयतां चक्षुर्देवा-
नामुत मर्त्यानाम् । इयक्षमाणा भृगुभिः
सजोषाः सुवर्यन्तु यजमानाः स्वस्ति । नक्तो-
षासा समनसा विरूपे धापयेते शिशुमेकꣳ
समीची । द्यावा क्षामा रुक्मो अन्तर्वि भाति
देवा अग्निं धारयन्द्रविणोदाः । अग्ने सहस्राक्ष
(२) शतमूर्धञ्छतं ते प्राणाः सहस्रमपानाः ।
त्वꣳ साहस्रस्य राय ईशिषे तस्मै ते विधेम
वाजाय स्वाहा । सुपर्णोऽसि गरुत्मान्पृथि-
व्याꣳ सीद पृथिव्याः सीद भासाऽन्तरि-
क्षमा पृण ज्योतिषा दिवमुत्तभान तेजसा दिश
उद्ꣳह । आजुह्वानः सुप्रतीकः पुरस्तादग्ने स्वां
योनिमा सीद साध्या । अस्मिन्त्सधस्थे अध्यु-
त्तरस्मिन्विश्वे देवाः (३) यजमानश्च सीदत ।
प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया सूर्म्या
यविष्ठ । त्वाꣳ शश्वन्त उपयन्ति वाजाः ।
विधेम ते परमे जन्मन्नग्ने विधेम स्तोमैरवरे
सधस्थे । यस्मात्योनेरुदारिथा यजे तꣳ ह त्वे
हवीꣳषि जुह्वरे समिद्धे । तां सवितुर्वरेण्यस्य

(अग्निप्रणयनादिमन्त्राः)

विष्णवे त्वा जुष्टं प्रोक्षामि वैष्णवम्। ग्रामस्य
कण्डूयो अदुहमर्मीणा२ सहस्रधारम् ( )
पयसा महीं गाम्। सन्न ते अग्ने (४)
समिधः सन्न
जिह्वाः सन्नर्चयः सन्न
धाम प्रियाणि। सन्न
होत्राः सन्नधा
त्वा यजन्ति सन्न योनीरा पृणस्वा
घृते। ईदृङ्घान्याद्दृङ्घेतादृङ्घ प्रतीदृङ्घ
मितश्च समितश्च सभराः। शुक्रज्योतिश्च चित्र-
ज्योतिश्च सत्यज्योतिश्च ज्योतिष्माँश्च सत्य-
श्चर्तपाश्चारयन्हाः (५)। ऋतजिच्च सत्यजिच्च
सेनजिच्च सुषेणश्चान्त्यमित्रश्च दूरेअमित्रश्च
गणः। ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च धर्ता
च विधर्ता च विधारयः। ईदृक्षास एता-
दृक्षास ऊ षु णः सदृक्षासः प्रतिसदृक्षास
एतन। मितासश्च समितासश्च न ऊतये सभ-
रसो मरुतो यज्ञे अस्मिन्निन्द्रं देवीर्विशो मरु-
तोऽनुवर्त्मानो यथेन्द्रं देवीर्विशो मरुतोऽनुव-
र्त्मान एवमिमं यजमानं देवीश्च विशो मानु-
षीश्चानुवर्त्मानो भवन्तु (६)।

(अगा२ सहस्राक्ष देवाः सहस्रधारामत्यन्हा अनुवर्त्मानः षोडश च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
षष्ठप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ चतुर्थकाण्डे षष्ठप्रपाठके पञ्चमोऽनुवाकः)।

चतुर्थेऽनुवाकेऽग्निप्रणयनमाहवनीयस्थसूक्तमुक्तम्। अथ पञ्चमेऽग्निस्थापनमु-
च्यते। कल्पः—"प्राचीमनु प्रदिशमिति पञ्चभिरग्निमधिरुह्य" इति। तत्र
प्रथमामाह—

(अग्निस्थापनाभिधानम्)

प्राचीमनु प्रदिशमिति । अथ इदानीमाग्नीत हे वह्ने प्राचीं [प्र] दिशं प्रागाख्यां पूर्वदिशं विद्वांस्त्वमनुप्रेहि, अनुक्रमेण प्रकर्षेण यथा भवति तथा गच्छ । त्वमग्नेरिष्टकानिष्पादितस्य चितिरूपस्य वह्नेरिहास्मिन्कर्मणि पुरो अग्निर्भव पूर्वभागवर्ती वह्निर्भव । यद्वा पुरोगन्ता मुख्योऽग्निर्भवेत्यर्थः। विश्वा आशाः सर्वा अपि दिशो दीद्यानः प्रकाशयन्विभाहि त्वमपि विशेषेण प्रकाशस्व । ततो नोऽस्मदीयाय द्विपदे चतुष्पदे च ओजसम् धेहि संपादय । अथ द्वितीयामाह—

क्रमध्वमग्निनेति । हे ऋत्विग्यजमाना नाकं स्वर्गसाधनमुख्यमुखायां पूर्वं संपादितमग्निं हस्तेषु बिभ्रतो धारयन्तस्तेनाग्निना सह क्रमध्वमग्नेरुपरि पादान्विक्षिपत । ततो दिवः पृष्ठमाकाशस्योपरि वर्तमानं सुवर्गत्वा स्वर्गलोकं प्राप्य देवैर्मिश्रा देवैरेकीभूताः सन्त आध्वमुपविशत । अथ तृतीयामाह—

पृथिव्या अहमिति । अहं यजमानः पृथिव्या उदत एतदन्तरिक्षमारुहमारूढोऽस्मि । तस्मादेवान्तरिक्षादुदतो दिवमारुहं द्युलोकमारूढोऽस्मि । दिवो द्युलोकसंबन्धी नाको दुःखरहितो यः प्रदेशस्तस्य पृष्ठादुपरिष्टात्स्वर्गलोकवर्तिज्योतिर्मण्डलमादित्यस्वरूपमहमगां प्राप्तोऽस्मि यद्वा प्राप्स्यामि । अथ चतुर्थीमाह—

सुवर्यन्तो नेति । ये यजमानाः सुविद्वांसः सुष्ठु कर्मानुष्ठानप्रकारं जानन्तो विश्वतोधारं सर्वस्य जगतो धारणहेतुं यमग्निं चितेनिरे विस्तरणानुतिष्ठन्ति ते यजमाना द्यामन्तरिक्षमारोहन्ति । तथा रोदसी द्यावापृथिव्यावारोहन्ति । ततः सुवर्यन्तः स्वर्गनिवासमादित्यमण्डलं प्राप्नुवन्तोऽन्यत्किमपि स्थानं नापेक्षन्ते । अथ पञ्चमीमाह—

अग्ने प्रेहीति । देवानात्मन इच्छन्तो देवयन्तो यजमानास्तेषामुपकाराय हेऽग्ने त्वं प्रथमः प्रेहि पुरतो गच्छ । यतस्त्वं देवानां मनुष्याणां च चक्षुःस्थानीयः । लोके हि गच्छतः पुरुषस्य दृष्टिः पुरतो याति । इयक्षमाणा यष्टुमिच्छन्तो यजमाना भृगुभिः सजोषा अनुष्ठानपरैर्भृगुनामकैर्मुनिभिः समानप्रियाः सन्तः स्वस्ति कर्मक्षमा यथा भवन्ति तथा सुवर्यन्तु । तत्र प्रथममन्त्रस्य तात्पर्यं दर्शयति—

" प्राचीमनु प्रदिशं प्रेहि विद्वानित्याह देवलोकमेवैतयोपावर्तते " [सं० का० ५ प्र० ४ अ० ७] इति । देवलोकमेवोद्दिश्यानयर्चा प्रवृत्तो भवति । द्वितीयमन्त्रस्य तात्पर्यं दर्शयति—

(अग्निस्थापनाभिधानम्)

" क्रमध्वमग्निना नाकमित्याहेमानेवैतया लोकान्क्रमते " [सं० का० ५ प्र० ४ अ० ७] इति । इमानेव लोकानुद्दिश्यानयर्चा पादविन्यासं करोति । तृतीयमन्त्रस्य तात्पर्यं दर्शयति—

" पृथिव्या अहमुदन्तरिक्षमाऽरुहमित्याहेमानेवैतया लोकान्त्समारोहति " [सं० का० ५ प्र० ४ अ० ७] इति । इमानेव लोकानुद्दिश्यानयर्चा सम्यगारोहति । चतुर्थमन्त्रस्य तात्पर्यं दर्शयति—

" सुवर्यन्तो नापेक्षन्त इत्याह सुवर्गमेवैतया लोकमेति " [सं० का० ५ प्र० ४ अ० ७] इति । स्वर्गप्राप्तिप्रतिपादकशब्दस्यात्र तच्छ्रवणात्तदर्था स्वर्गप्राप्तिः । पञ्चममन्त्रस्य तात्पर्यं दर्शयति—

" अग्ने प्रेहि प्रथमो देवयतामित्याहोभयेष्वेवैतया देवमनुष्येषु चक्षुर्दधाति " [सं० का० ५ प्र० ४ अ० ७] इति । उभयचक्षुःप्रतिपादकस्य शब्दस्यात्र सद्भावादेतयर्चोभयत्र चक्षुःस्थापनम् । मन्त्रान्विनियुङ्क्ते—

" पञ्चभिरधि क्रामति पाङ्क्तो यज्ञो यावानेव यज्ञस्तेन सह सुवर्गं लोकमेति " [सं० का० ५ प्र० ४ अ० ७] इति । कल्पः—" नक्तोषासाऽग्ने सहस्राक्षेति द्वाभ्यां संहिताभ्यां दध्नः पूर्णामौदुम्बरीं स्रुचमातृण्णायां जुहोति " इति । तत्र प्रथममाह—

नक्तोषासेति । नक्तं चोषाश्च नक्तोषासौ रात्रिदिवसावित्यर्थः । समनसा परस्परमेकमत्ययुक्ते विरूपे रात्रिः कृष्णा दिवसः शुक्ल इत्येवं विलक्षणरूपे समीची समीच्यावनुकूले सत्यावेकं शिशुमग्निरूपं धापयेते यजमानकर्तृकमग्निधारणं संपादयतः । द्यावा द्युलोके क्षामा(म)क्षिद्यवन्तस्तदुभयसम्बन्धवर्तिन्यन्तरिक्षे रुक्मो रोचमानोऽयमग्निर्विभाति विशेषेण प्रकाशते । दविध्वतो व्यक्षरन्तीति देवाः प्राणास्ते च द्रविणोदा यागद्वारेण धनरूपं फलं प्रयच्छन्ति तादृशा यजमानस्य प्राणा अग्निमेतं धारयन्त्वृतवन्तः । अथ द्वितीयामाह—

अग्ने सहस्राक्षेति । शतसहस्रशब्दा अपरिमिता(तत्वा)भिप्रायेण । विश्वतश्चक्षुरित्यादिमन्त्रोक्तमूर्तिरूपत्वेनाग्रमग्निरत्र स्तूयते । तस्मादक्षिभूर्धप्राणापाना हेऽग्ने तव बहवः । तथा त्वं साहस्रस्य बहुसहस्रसमूहपरिमितस्य रायो धनस्येशिषे प्रभुर्भवसि । तस्मै ते तादृशाय तुभ्यं वाजायान्नसिद्ध्यर्थं विधेम परिचरेम हविषा स्वाहेदं हविः स्वाहुतमस्तु । तत्र प्रथममन्त्रं विनियुङ्क्ते—

---

१ च. °भ्यां सहि°।

(अग्निस्थापनाभिधानम्)

" नक्तोषासेति पुरोनुवाक्यामन्वाह प्रत्यै " [सं० का० ५ प्र० ४ अ० ७] इति । पुरोभवाः(वा) प्रदानमन्त्राः पू(स्त्रात्पू)र्वमनुक्रमेणोच्यत इति पुरोनुवाक्या, प्रत्या उत्तरेण मन्त्रेण हविष्प्रदानायाऽऽह्वो तान्प्रू(तां प्रू)यात् । पुरोनुवाक्यामनूच्य याज्यया जुहोतीत्यन्यथाऽऽह्वातत्वात् ।

द्वितीयमन्त्रस्य वराजरूपप्रापकत्वं दर्शयति--

" अग्ने सहस्राक्षेत्याह साहस्रः प्रजापतिः प्रजापतेराप्त्यै " [सं० का० ५ प्र० ४ अ० ७] इति ।

सहस्रसंख्याकचक्षुरादिसंबन्धो विश्वरूपधरस्य विराण्मूर्तेः संभवति नान्यस्य । अतोऽयं मन्त्रः प्रजापतिप्राप्त्यै भवति । अस्य मन्त्रस्य चतुर्थपादे वाजशब्दस्य तात्पर्यं दर्शयति--

" तस्मै ते विधेम वाजायेत्याहान्नं वै वाजोऽन्नमेवाव रुन्धे " [सं० का० ५ प्र० ४ अ० ७] इति । एतन्मन्त्रसाध्यं होमं विधत्ते--

" वृष्णः पूर्णामौदुम्बरीꣳ स्रुचमातृण्णायां जुहोत्पूर्णं दर्भपूर्णमुदुम्बरोऽसौ स्रुचमातृण्णाऽमुष्यामेवोर्जं दधाति तस्मादमुतोऽवांचीमूर्जमुप जीवामः " [सं० का० ५ प्र० ४ अ० ७] इति ।

जुहूसदृशी काचित्स्रुगौदुम्बरी । दध्युदुम्बरयोरन्नरूपत्वात्स्रुचमातृण्णायाश्च स्वर्गरूपत्वात्तस्यां तद्धोमेन स्वर्ग एवान्नं स्थापयति । यस्मात्स्वर्गं ऊर्ध्वव्यवस्थिता तस्मादमुतो द्युलोकादवांचीं वृष्टिरूपेणाधः पतन्तीमूर्जमन्नं वयमुपजीवामः ।

कल्पः--" सुपर्णोऽसि गरुत्मानिति तिसृभिः स्रुचमातृण्णायामग्निं प्रतिष्ठाप्य " इति । तत्र प्रथमामाह--

सुपर्णोऽसीति । हेऽग्ने त्वं सुपर्णः पक्ष्याकारो गरुत्मान्गरुडसमानोऽसि । अतोऽस्यां चितिरूपायां पृथिव्यां सीदोपविश । तत्रापि पृथिव्याः पृष्ठ उपविश ।

अथ द्वितीयामाह--

भासाऽन्तरिक्षमिति । भासा स्वकीयेन प्रकाशेनान्तरिक्षमापृण तर्पयतः पूरय । ज्योतिषा स्वकीयेन सामर्थ्येन दिवं द्युलोकमुत्तमानोर्ध्वं स्तभ्नीत[3] कुरु । तथा तेजसा स्वकीयेन सामर्थ्येन दिशः प्राच्यादिका उद्दृंहोत्कर्षेण दृढी कुरु ।

अथ तृतीयामाह--

---

१ स. च. ° भवः प्र° । २ स. °मन्त्रः पू° । ३ स. स्तम्भितां ।

(अग्निस्थापनाभिधानम्)

आजुह्वानः सुप्रतीक इति । हेऽग्ने त्वमाजुह्वान आभिमुख्येन हूयमानः सुप्रतीकः सुमुखः सन्पुरस्तात्पूर्वस्यां दिशि साध्या साध्यैः सभीषीनां त्वां योनिं स्वकीयं स्थानमासीदाऽऽगत्य प्राप्नुहि । हे विशे देवा यूयं यजमानश्चास्मिन्पुरोवर्तिनि सधस्थेऽग्निना सह स्थातुं योग्येऽभ्युत्तरस्मिन्चाधिकमुत्कृष्टे स्थाने सीदतोपविशत । एतान्मन्त्रान्विनियुङ्क्ते—

"तिसृभिः सादयति त्रिवृद्वा अग्निर्यावानेवाग्निस्तं प्रतिष्ठां गमयति" [सं० का० ५ प्र० ४ अ० ७] इति ।

कल्पः—"प्रेद्धो अग्ने दीदिहि पुरो न इत्यौदुम्बरीं समिधमादधाति" इति । पाठस्तु—

प्रेद्धो अग्न इति । हेऽग्ने प्रेद्धः पूर्वमपि प्रकर्षेण दीप्तस्त्वं पुरो नोऽस्माकं पुरोदेशेऽजस्रया निरन्तरवर्तिन्या सूर्म्या सूर्मिसमानया ज्वालया दीदिहि पुनरपि दीप्यस्व । ज्वलन्ती लोहमयी स्थूणा सूर्मी । हे यविष्ठ युवतमाग्ने त्वां शश्वन्तो निरन्तरभाविनो वाजा अन्नान्युपयन्ति सामीप्येन प्राप्नुवन्ति । तमेतं मन्त्रं विनियुङ्क्ते—

"प्रेद्धो अग्ने दीदिहि पुरो न इत्यौदुम्बरीमादधात्येषा वै सूर्मी कर्णकावत्येतया ह स्म वै देवा असुराणाꣳ शतसहस्रꣳ हन्ति यदेतया समिधमादधाति वज्रो वैतच्छतघ्नी यजमानो भ्रातृव्याय प्र हरति स्तृत्या अछम्बट्कारम्" [सं० का० ५ प्र० ४ अ० ७] इति ।

ज्वलन्ती लोहमयी स्थूणा सूर्मी । सा च कर्णकावती छिद्रवत्यन्तरापि ज्वलन्तीत्यर्थः । तत्समानेयमृक् । एकेनैव प्रहारेण शतसंख्याकान्नारयन्तः शूराः शतसहस्रं असुराणां मध्ये तादृशानेतयर्चा देवा हिंसन्ति । अनया समिदाधाने शतघ्नीमेतामृचं वज्रं कृत्वा वैरिणं प्रहरति । अछम्बट्कारं स्वस्थाविनाशो यथा भवति तथेत्यर्थः ।

कल्पः—"विधेम ते परमे जन्मन्नग्न इति वैकङ्कतीम्" इति । समिधमादधातीत्यनुवर्तते । पाठस्तु—

विधेम त इति । हेऽग्ने ते तव परमे जन्मनि विधेम वयं ज्ञानेन परिचरेम । सधस्थेऽस्माभिः सह स्थातुं योग्येऽवरे निकृष्टे भूलोकवर्तिनि जन्मनि स्तोमैः स्तोत्रैर्विधेम परिचरेम । यस्मादयोनेस्त्वमसि तस्मात्स्थानादुदारिथ त्वमुत्कृष्टं

आविर्भूतोऽसि ते योनिं यजे पूजयामि । समिद्धे सम्यक्प्रज्वलिते त्वयि हवींषि प्रजुहुर ऋत्विजः प्रकर्षेण जुह्वति । एतं मन्त्रं विनियुङ्क्ते—

" विधेम ते परमे जन्मन्नग्न इति वैकङ्कतीभ्या दधाति भा एवाव रुन्धे " [सं० का० ५ प्र० ४ अ० ७] इति ।

अग्नेर्भासो विकङ्कते प्रविष्टत्वात्तदीयसमिधा भाः प्राप्यते ।

कल्पः—"तार् सावितुर्वरेण्यस्य चित्रामिति शमीमयीम् " इति । पाठस्तु—

तार् सवितुरिति । पुरा कदाचित्कण्वाख्यो महर्षिरस्याग्नेर्यां सुमतिमनुग्रहकारिणीं बुद्धिमदुहदुदगृह्णात् । तत्र दृष्टान्तः—प्रपीनां प्रभूतः पीनः स्तनसंघो यस्याः सा प्रपीना तां सहस्रसंख्याकाः क्षीरधारा यस्याः सा सहस्रधारा तां महीं पयसा क्षीरेण संपूर्णां गां धेनुं यथा लौकिका दुहन्ति तद्वत् । अयमग्नेः सुमतेरुपदर्शितबुद्धेः स्वामीष्टं फलं प्राप्तवान् । वरेण्यस्य सर्वैर्वरणीयस्य सवितुः प्रेरकस्याग्नेः संबन्धिनीं तां कण्वेन दुग्धां सुमतिमहमावृणे सर्वतः प्रार्थये । कीदृशीं सुमतिं, चित्रां स्वोपेक्षितबहुविधफलप्रदानसमर्थामित्यर्थः। विश्वं जन्यमुत्पाद्यं यस्याः सा विश्वजन्या तां जगदुत्पादनसमर्थामित्यर्थः । तमेतं मन्त्रं विनियुङ्क्ते—

" तार् सावितुर्वरेण्यस्य चित्रामिति शमीमयीꣳ शान्त्यै " [सं० का० ५ प्र० ४ अ० ७] इति । शम्याः शमनहेतुत्वाच्छान्त्यर्थत्वं युक्तम् ।

मध्यस्य पूर्वार्धे सवितुस्तां सुमतिमावृण इत्यस्य तात्पर्यं दर्शयति—

"अग्निर्वा ह वा अग्निचितं दुहेऽग्निचिद्वाऽग्निं दुहे तार् सवितुर्वरेण्यस्य चित्रामित्याहैष वा अग्नेर्दोहः " (सं० का० ५ प्र० ४ अ० ७) इति ।

द्विविधो मन्त्रदोहः संभवति । अग्निकर्तृको यजमानकर्मक एको दोहः । अग्निर्हि यजमाने संभावितं हविः स्तुत्यादिरूपं दोग्धि । तथा यजमानकर्तृकोऽग्निकर्मको द्वितीयो दोहः । यजमानो ह्यग्नौ संभावितं स्वोपेक्षितं फलं दोग्धि । अत्र सवितुः सुमतिमिति वचनेनाग्निकर्मको द्वितीयो दोहो विवक्षितः ।

द्वितीयार्थं कण्वोदाहरणस्य तात्पर्यं दर्शयति—" तस्य कण्व एव श्रायसोऽवेत्तेन ह स्मैनꣳ स दुहे " [सं० का० ५ प्र० ४ अ० ७] इति ।

अग्नेः संबन्धिनं तं फलस्वीकाररूपं दोहं कण्वाख्य एव महर्षिः पूर्वं ज्ञातवान् । स च कण्वः श्रयसोऽपत्यं श्रायसः । अतोऽस्मिन्नुत्तरार्धे पठिते सति तेन कण्वमुनिरिवैनमाग्निं स यजमानो दुग्धवान्भवति ।

---

१ ख. च. °गाऽहं वृ ।

(अग्निस्थापनाभिधानम्)

एतन्मन्त्रविशिष्टं समिदाधानं प्रशंसति—

" यदेतया समिधमादधात्यग्निमेवैतद्दीप्तं दुहे " [तै० का० ५ प्र० ४ अ० ७] इति । कल्पः—" द्वादशगृहीतेन स्रुचं पूरयित्वा सप्त ते अग्ने समिधः सप्त जिह्वा इति सप्तवत्या पूर्णाहुतिं जुहोति " इति । पाठस्तु—

सप्त ते अग्न इति । हेऽग्ने तव समिधः सप्तसंख्याका अश्वत्थोदुम्बरपलाशशमीविकङ्कतशानिहतवृक्षपुष्करपर्णरूपाः । अत एव सूत्रकार आधानप्रकरणे सप्त संभारान्समन्त्रकाननुक्रम्येति वानस्पत्या इत्युपसंजहार । ज्वालारूपा जिह्वाश्च सप्त । तथा चाऽऽथर्वणिका आमनन्ति—

" काली कराली च मनोजवा च सुलोहिता या च सुधूम्रवर्णा ।

स्फुलिङ्गिनी विश्वरुची च देवी लेलायमाना इति सप्त जिह्वाः " इति ।

ऋषयो मन्त्राः । ते च यथोक्तसमित्संपादनार्थाः सप्तसंख्याकाः " अग्नो रूपं कृत्वा यदश्वत्थेऽतिष्ठः " इत्यादयः समाम्नाताः । प्रियाणि धाम स्थानानि, आहवनीयगार्हपत्यदक्षिणाग्निसभ्यावसथ्यपाजहिताग्नीधीयाख्यानि सोमयागे वह्निधारकाणि सप्तसंख्याकानि । होता होतृप्रमुखा वषट्कर्तारो होता प्रशास्ता ब्राह्मणाच्छंसी पोता नेष्टाऽऽग्नीध्रोऽच्छावाकश्चेति सप्तसंख्याकाः । त्वां यजमानाः सप्तधा यजन्ति । अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडश्यतिरात्रोऽप्तोर्यामो वाजपेयश्चेति सप्त प्रकाराः । तादृशस्त्वं सप्त योनीराहवनीयादि(द्युतान्ति)-स्थानानि घृतेन सर्वतः पूरय ।

अस्य मन्त्रस्य तात्पर्यं दर्शयति—"सप्त ते अग्ने समिधः सप्त जिह्वा इत्याह सप्तैवास्मै साप्तानि प्रीणाति " [तै० का० ५ प्र० ४ अ० ७] इति ।

सप्तसंख्योपेतं द्रव्यस्वरूपं साप्तं, तानि च साप्तानि पुनः सप्तसंख्याकानि । समित्सप्तकमेकं जिह्वासप्तकं द्वितीयमृषिसप्तकं तृतीयं धामसप्तकं चतुर्थं होतृसप्तकं पञ्चमं यजनप्रकारभेदसप्तकं षष्ठं पूरणीययोनिसप्तकमेकम् । अग्नेः संबन्धीनि साप्तानि समिदादिसप्तकानि यानि सन्ति तानि साप्तानि प्रीणयत्येव । एतन्मन्त्रसाध्यं होमं विधत्ते—

' पूर्णया जुहोति पूर्ण इव हि प्रजापतिः प्रजापतेराप्त्यै न्यूनया जुहोति न्यूनो हि प्रजापतिः प्रजा असृजत प्रजानां सृष्ट्यै " [तै०का०५प्र०४ अ०

१ क. घ. ङ. सुरोहिं । २ ख. °वी लोला° ।

७] इति । द्वादशगृहीतेनाऽऽज्येन पूर्णां वा जुहुस्तया जुहुयात् । प्रजापतेः प्राप्तसर्वकामत्वात्पूर्णत्वम् । अतस्तत्पूर्तिः प्रजापतिप्राप्त्यै भवति । मुख्यकल्पत्वेन पूर्णत्वं विधायाप्रकल्पत्वेन न्यूनत्वमप्यङ्गी क्रियते । न्यूनादल्पाद्धीजात्प्रजापतिः पौढानि शरीराण्यसृजत । अतः प्रजासृष्टये न्यूनत्वमङ्गी क्रियते, किमु वक्तव्यं पूर्णत्वमित्यभिप्रायः । होमकाले ध्यानं विधत्ते—

" अग्निर्देवेभ्यो निलायत स दिशोऽनु प्राविशज्जुह्वन्मनसा दिशो ध्यायेद्दिग्भ्य एवैनमव रुन्धे " [सं० का० ५ प्र० ४ अ० ७] इति ।

एनं दिक्षु प्रविष्टमग्निम् ।

पूर्वमनुष्ठितां दध्याहुतिमिदानीमनुष्ठीयमानामाज्याहुतिं च मिलित्वा प्रशंसति—

" दध्ना पुरस्ताज्जुहोत्याज्येनोपरिष्टात्तेजश्चैवास्मा इन्द्रियं च समीची दधाति " [सं० का० ५ प्र० ४ अ० ७] इति ।

अग्निस्थापनात्पूर्वं दधिहोम उपरिष्टाच्चाऽऽज्यहोमः । तत्राऽऽज्यं तेजोरूपं दधि चेन्द्रियरूपम् । " तेजो वा आज्यम्" "इन्द्रियं वै दधि " इति श्रुत्यन्तरात् । अतो यजमानार्थमुभयमपि सम्यक्संपादितं भवति । कल्पः— " उपांशु मारुतान्सर्वहुताञ्जुहोतीदृङ्चान्यादृङ्चेति सप्तभिर्गणैरासीनो हस्तेन गणेन गणमनुद्रुत्य मारुताञ्जुहोति मध्येऽरण्येऽनुवाक्येन गणेन जुहोतीत्येके मारुतैः सर्वतो वैश्वानरं परिचिनोतीत्येके स्वतवांश्च प्रघासी च सांतपनश्च गृहमेधी च क्रीडी च साकं चोर्जाहुती चेत्येष षष्ठ आम्नातो मितासश्च संमितासश्च न इति सर्वत्रानुषजति " इति । पाठस्तु—

ईदृङ्चान्यादृङ्चेति । अत्र हि मरुतां गणाः पञ्चाऽऽम्नाताः । ईदृङ्चित्यादीनि सप्त नामानि तैरभिधेयानां मरुतामेको गणः । चकाराः परस्परं समुच्चयार्थाः । तथा शुक्रज्योतिरित्यादीनि सप्त नामानि तैरभिधेयानां मरुतां गणो द्वितीयः । ऋतजिदित्यादिगणस्तृतीयः । ऋतश्चेत्यादिश्चतुर्थः । ईदृक्षास इत्यादीनि चत्वारि नामधेयानि, सोऽयं पञ्चमो गणः । हे गणपञ्चकस्था मरुत एतेन समुच्चयेन वर्तन्ते(माना) यूयं सर्वे समुच्चित्य सुष्ठु नोऽस्मान्प्रत्यागच्छत । मितासश्च गणचतुष्टयेन सप्तसंख्यया प्रमिताः । संमितासश्च पञ्चमगणे चतुःसंख्यया संक्षिप्य प्रमिताः। ऊतये नोऽस्माकं रक्षणाय समरो भरेणाऽऽद-

१ क. च. °पतेः प्रा° । २ क. च. °श्चाग्र° ।

(अग्निस्थापनाभिधानम्)

रेण वर्तन्त इति सभरसः। तादृशा हे मरुतोऽस्मिन्यज्ञ एतनाऽऽगच्छत। दैवीर्विशो देवसंबन्धिन्यः प्रजारूपाः। एते मरुत इन्द्रमनुवर्तमान इन्द्रं स्वामिनमनुसृत्य तदनुसरिण यथा वर्तन्ते मरुत एवं दैव्यो मानुष्यश्च सर्वाः प्रजा इमं यजमानमनुसृत्य वर्तमाना भवन्तु। एतैर्मन्त्रैः साध्या मारुतहोमा उपरि विधास्यन्ते।

एतेभ्यो मारुतपुरोडाशेभ्यः पुरा निर्वपणीयं वैश्वानरमादौ विधत्ते—

"द्वादशकपालो वैश्वानरो भवति द्वादश मासाः संवत्सरः संवत्सरोऽग्निर्वैश्वानरः साक्षादेव वैश्वानरमव रुन्धे" [सं० का० ५ प्र० ४ अ० ७] इति।

उरुप्याग्नेः संवत्सरधारणेनाग्नेः संवत्सररूपत्वम्।

चोदकप्राप्तान्प्रयाजानूयाजानपवदति—"यत्प्रयाजानूयाजान्कुर्याद्विकस्तिः स्रुचा यज्ञस्य दर्विहोमं करोति यज्ञस्य प्रतिष्ठित्यै" [सं० का० ५ प्र० ४ अ० ७] इति।

विशेषेण कास्तिर्नाशो विकस्तिस्तत्परिहारायान्यत्र प्रयाजानूयाजानकृत्वा यथा दर्विहोमं कुर्वन्ति तद्वदत्रापि दर्विहोमं प्रयाजानूयाजरहितं कुर्यात्। ततो विकस्तेरभावाद्यज्ञ प्रतिष्ठितो भवति।

वैश्वानरपुरोडाशहोमसमनन्तरमेष मारुतपुरोडाशहोमं विधत्ते—

"राष्ट्रं वै वैश्वानरो विण्मरुतो वैश्वानरꣳ हुत्वा मारुताञ्जुहोति राष्ट्र एव विशमनु बध्नाति" [सं० का० ५ प्र० ४ अ० ७] इति।

राष्ट्रस्थानीयस्य वैश्वानरस्य पूर्वभावित्वात्पश्चाद्भावीयप्रजास्थानीयमारुतहोमेन राष्ट्रे प्रजां योजितवान्भवति। मारुतहोमे मन्द्रध्वनिं विधत्ते—

"उच्चैर्वैश्वानरस्याऽऽश्राव[य]त्युपांशु मारुताञ्जुहोति तस्माद्राष्ट्रं विशमति वदति" [सं० का० ५ प्र० ४ अ० ७] इति।

उच्चध्वनित्वमाश्रावणे चोदकप्राप्तम्। यस्माद्राष्ट्रस्थानीये वैश्वानर उच्चैर्ध्वनिः प्रजास्थानीये मरुत उपांशुत्वं तस्माल्लोकेऽपि प्रजामतिक्रम्य राष्ट्रमेवाधिकं सर्वो जनो वक्ति। सति हि राष्ट्रे प्रजानामन्वेषणम्।

अथ मारुतपुरोडाशान्प्रशंसति—

"मारुता भवन्ति मरुतो वै देवानां विशो देवविशमेवास्मै मनुष्यविशमव रुन्धे" [सं० का० ५ प्र० ४ अ० ७] इति। दैव्येन प्रजासमूहेन यजमानाय मानुषं प्रजासमूहं संपादयति। पुरोडाशानां संख्यां विधत्ते—

(अश्वमेधकर्तृ रथसज्जीकरणभाविकवचस्वीकारायङ्गाभिधानम्)

" सप्त भवन्ति सप्तगणा वै मरुतो गणश एव विशमव रुन्धे " [सं० का० ५ प्र० ४ अ० ७] इति । अत्रत्येषु मन्त्रेष्वाम्नाताः पञ्च गणाः । आरण्यकाण्डे आम्नातो धुनिश्च ध्वान्तश्चेत्यपरौ गणः । सूत्रोक्तः स्वतवानित्यादिरेकः । अतः सप्तसंख्याभिश्च बहुविधगणरूपां प्रजां प्राप्नोति । होमकाले मन्त्रोच्चारे कंचिद्विशेषं विधत्ते--

" गणेन गणमनुवृत्य जुहोति विशमेवास्मा अनुवर्त्मानं करोति " [सं० का० ५ प्र० ४ अ० ७] इति । यदा प्रथमगणेन हुत्वा द्वितीयगणेन जुहोति तदानीं प्रथमगणमुच्चार्य पश्चाद्द्वितीयगणेन जुहोति । तथा द्वितीयगणमुच्चार्य तृतीयगणेन जुहुयात् । एवं सति सर्वा प्रजास्मै यजमानायानुकूलत्वेन वर्तमानां करोति । अत्र विनियोगसंग्रहः--

प्राचीति पञ्चभिः साग्निरारोहेन्निर्मितां चितिम् ।
पूर्णामौदुम्बरीं दध्ना जुहोत्येते ऋचौ तदा ॥
याज्यानुवाक्ये नक्तेति सुपर्णोऽस्यादिभिस्त्रिभिः ।
स्वयमातृण्णकोयां[1] तमुरुप्राचीं स्थापयेत्ततः ॥
प्रेत औदुम्बरीं दध्नाद्विधे वैकङ्कतीं तथा ।
शमीमयीं तु तां सेति सप्ताऽऽज्यं हूयते स्रुचा ॥
मारुतेषु तु यागेषु प्रोक्ताः पञ्च मरुद्गणाः ।
ईदृङ्चेत्यादयः शेषो मितासश्चेत्युदीरितः ॥
अनुवाके पञ्चमेऽस्मिन्नुक्ता एकोनविंशतिः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे षष्ठप्रपाठके
पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ चतुर्थाष्टके षष्ठप्रपाठके षष्ठोऽनुवाकः) ।

जीमूतस्येव भवति प्रतीकं यद्वर्मी याति समदामुपस्थे । अनाविद्धया तनुवा जय त्वꣳ स त्वा वर्मणो महिमा पिपर्तु । धन्वना

---

१ ख. ° कायां तु मु° ।

(अश्वमेधकर्तृ रथसज्जीकरणमाभिकवचरवीकाराद्यङ्गाभिधानम्)

गा धन्वनाऽऽजिं जयेम धन्वना तीव्राः समदो जयेम । धनुः शत्रोरपकामं कृणोति धन्वना सर्वाः प्रदिशो जयेम । वक्ष्यन्तीवेदा गनीगन्ति कर्णं प्रियꣳ सखायं परिषस्वजाना । योषेव शिङ्क्ते वितताऽधि धन्वन् (१) ज्या इयꣳ समने पारयन्ती । ते आचरन्ती समनेव योषा मातेव पुत्रं बिभृतामुपस्थे । अप शत्रून्विध्यताꣳ संविदाने आर्त्नी इमे विष्फुरन्ती अमित्रान् । बह्वीनां पिता बहुरस्य पुत्राश्चिश्चा कृणोति समनाऽवगत्य । इषुधिः सङ्काः पृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्रसूतः । रथे तिष्ठन्नयति वाजिनः पुरो यत्रयत्र कामयते सुषारथिः । अभीशूनां महिमानम् (२) पनायत मनः पश्चादनु यच्छन्ति रश्मयः । तीव्रान्घोषान्कृण्वते वृषपाणयोऽश्वा रथेभिः सह वाजयन्तः । अवक्रामन्तः प्रपदै-रमित्रान्क्षिणन्ति शत्रूꣳ रनपव्ययन्तः । रथवाहनꣳ हविरस्य नाम यत्राऽऽयुधं निहितमस्य वर्म । तत्रा रथमुप शग्मꣳ सदेम विश्वाहा वयꣳ सुमनस्यमानाः । स्वादुषꣳसदः पितरो वयोधाः कृच्छ्रेश्रितः शक्तीवन्तो गभीराः । चित्रसेना इषुबला अमृधाः सतोवीरा उरवो व्रातसाहाः । ब्राह्मणासः (३) पितरः

सोम्यासः शिवे नो द्यावापृथिवी अनेहसा ।
पूषा नः पातु दुरितादृतावृधो रक्षा माकिर्नो
अघशꣳस ईशत । सुपर्णं वस्ते मृगो अस्या
दन्तो गोभिः संनद्धा पतति प्रसूता । यत्रा
नरः स च वि च द्रवन्ति तत्रास्मभ्यमिषवः
शर्म यꣳसन् । ऋजीते परि वृङ्ग्धि नोऽश्मा
भवतु नस्तनूः । सोमो अधि ब्रवीतु नोऽदितिः
(४) शर्म यच्छतु । आ जङ्घन्ति सान्वेषां
जघनाꣳ उप जिघ्नते । अश्वाजनि प्रचेतसोऽ-
श्वान्त्समत्सु चोदय । अहिरिव भोगैः पर्येति
बाहुं जायां हेतिं परिबाधमानः । हस्तघ्नो
विश्वा वयुनानि विद्वान्पुमान्पुमाꣳसं परि पातु
विश्वतः । वनस्पते वीड्वङ्गो हि भूया अस्म-
त्सखा प्रतरणः सुवीरः । गोभिः संनद्धो असि
वीडयस्वाऽऽस्थाता ते जयतु जेत्वानि । दिवः
पृथिव्या परि (५) ओज उद्भृतं वनस्पति-
भ्यः पर्याभृतꣳ सहः । अपामोज्मानं परि
गोभिरावृतमिन्द्रस्य वज्रꣳ हविषा रथं यज ।
इन्द्रस्य वज्रो मरुतामनीकं मित्रस्य गर्भो वरु-
णस्य नाभिः । सेमां नो हव्यदातिं जुषाणो
देव रथ प्रति हव्या गृभाय । उप श्वासय
पृथिवीमुत द्यां पुरुत्रा ते मनुतां विष्ठितं जग-
त् । स दुन्दुभे सजूरिन्द्रेण देवैर्दूरात् (६)
दवीयो अप सेध शत्रून् । आ क्रन्दय बलमो-

(अश्वमेधकर्तू रथसज्जीकरणभाविकवचस्वीकारायङ्गाभिधानम्)

जो न आ धा निष्टनिहि दुरिता बाधमानः।
अप प्रोथ दुन्दुभे दुच्छुनाः इत इन्द्रस्य मुष्टि-
रसि वीडयस्व। आऽमूरज प्रत्यावर्तयेमाः कै-
तुमद्दुन्दुभिर्वावदीति। समश्वपर्णाश्चरन्ति नो
नरोऽस्माकमिन्द्र रथिनो जयन्तु (७) ॥

(धन्वन्महिमानं ब्राह्मणासोऽदितिः पृथिव्याः परि दूरादेकचत्वारिंशच्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
षष्ठप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ चतुर्थकाण्डे षष्ठप्रपाठके षष्ठोऽनुवाकः)।

पञ्चमेऽनुवाके चित्यारोहणादयो मारुतहोमान्ता अङ्गविशेषा उक्ताः।

अथ षष्ठेऽश्वमेधकर्तू रथसज्जीकरणभावीनि कवचस्वीकारादीन्यङ्गान्युच्यन्ते। तस्य चाग्निप्रकरणे संबन्धाभावादित उत्कृष्याश्वमेधप्रकरणे संबन्धो द्रष्टव्यः। अध्ययनार्थमेव केवलमत्र मन्त्रपाठः।

कल्पः—" जीमूतस्येति कवचमभ्यूहते " इति। पाठस्तु—

जीमूतस्येवेति। यद्वा वर्मी कवचयुक्तो राजा समदां शत्रूणामुपस्थे समीपे याति, अनेन सह मात्सर्येण माद्यन्तीति समदः शत्रवः, तेषां जीमूतस्य मेघस्य प्रतीकं मुखमिव भवति। सैन्यक्षेपं युद्धार्थं यदा मिनोति तदानीं वर्षितुं यतस्तत आगताः प्रौढा मेघा यथाऽन्तरिक्षं सर्वमावृण्वन्त्येवं भूमिं सर्वां व्याप्तं भवतीत्यर्थः। तस्मिन्काले हे राजन्नविक्षया परकीयप्रहाररहितया तनुवा स्वशरीरेण युक्तो भूत्वा विजयं प्राप्नुहि। वर्मणः कवचस्य तादृशी महिमा त्वां पिपर्तु पालयतु। कल्पः—" धन्वना गा इति धनुः " इति। पाठस्तु—

धन्वना इति। वयं धन्वना धनुषा गा जयेम परकीयान्गवादीनाहरेम। तथा धन्वनाऽऽजिं युद्धं जयेम। तथा धनुषा तीव्राः शूरभटोपेताः समदो मद-सहिताः परकीयसेना जयेम। इदं धनुः अस्मदीयवैरिणोऽपकामं करोति

---

१ क. ख, ङ. मोषिणि। २ क. घ. ङ. मेठयति। ३ क. घ. ङ. व्याप्तो। ४ स. °हरेम।

कामेभ्योऽपनयोऽपकामस्तं कृणोतु करोतु । किंबहुना, सर्वा अपि प्रदिश उत्कृष्टान्सर्वदिग्वर्तिशत्रूञ्जयेम । कल्पः—" वक्ष्यन्तीवेति ज्यामभिमृशति " इति । पाठस्तु—

वक्ष्यन्तीवेदा इति । इयं ज्या धनुष्यारोपिता मौर्वी वक्ष्यन्तीव किंचिद्रहस्यं वाक्यं वदिष्यन्तीव कर्णं(र्णमा)गनीगन्ति कर्णसमीपमागच्छति । तत्र दृष्टान्तः—प्रियं सखायं परिषस्वजाना प्रीतियुक्तं सखिसमानं विश्रम्भव्यवहारयोग्यं भर्तारमालिङ्गन्ती योषेव शिङ्क्तेऽव्यक्तं शब्दं करोति । सा यथा स्वकीयं योगक्षेमं शनैः कथयति तद्वदियमपि ज्या शब्दयतीत्यर्थः । कीदृशी ज्या, अधिधन्वन्धनुष उपरि विततां विशेषेण प्रसारिता, समने युद्धे पारयन्ती युद्धसमाप्तिं गमयन्ती ।

कल्पः—" ते आचरन्ती इति धनोरात्नीं संमृशति " इति । पाठस्तु—

ते आचरन्तीति । ते धनुषः कोटयौ विस्फुरन्ती विस्फुरन्त्यौ पुनः पुनः प्रवर्तमाने सत्यौ संविदाने परस्परमैकमत्यं गते अमित्रानत्यन्तविरोधिनः शत्रूनपविध्यताम् । कीदृशे कोटयौ, समने युद्धे योषेवाऽऽचरन्ती तद्वन्मधुरशब्देन हितं बोधयन्त्यौ । पुनः कीदृशे, उपस्थे बिभृतां माता पुत्रमिव तद्वद्धितकारिण्यावित्यर्थः । कल्पः—" बह्वीनां पिता बहुरस्य पुत्र इति पृष्ठ इषुधिं निनह्यति " इति । पाठस्तु—

बह्वीनां पितेति । अयमिषुधिर्बाणाधारः समनाऽवगत्य समने युद्धे प्राप्य विश्वा कृणोति बाणाकर्षणवेलायामव्यक्तं ध्वनिं करोति । तस्य ध्वनेरनुकरणं विश्वेति । कीदृश इषुधिः, बह्वीनामिषूणां पालकः । अत एवास्य पितृस्थानीयस्य पुत्रस्थानीय इषुसंघो बहुविधः । सोऽयमिषुधिः पृष्ठे निनद्धः पृष्ठभागे पितरं बद्धः प्रसूतो धानुष्केण प्रेरितो बाणाकर्षणे सङ्गतः सम्यक्प्राप्ताः सर्वा अपि पृतना जयति । कल्पः—" रथे तिष्ठन्नयति वाजिन इति सारथिमभिमन्त्रयते " इति । पाठस्तु—

रथे तिष्ठन्निति । सुसारथिः सुशिक्षितोऽयं सारथिः स्वयं रथे तिष्ठन्यत्र यत्र कामयते गन्तुं तत्र तत्र पुरः पुरस्ताद्वाजिनोऽश्वान्नयति प्रेरयति । हे क्षत्रियं यजमाना अभीशूनामश्वधारणहेतूनां रश्मीनां महिमानं पनायत वाचा स्तुतिं कुरुत । अत एव स्तुतिमकार उच्यते—रश्मय एते पञ्चहाः सारथेर्मनोऽनुसृत्य

(अश्वमेधकर्तृ रथसज्जीकरणभाविकवचस्वीकाराद्यङ्गाभिधानम्)

पश्चाद्यच्छन्ति नियता भवन्ति, सारथेर्यथा मनोवृत्तिः पुरस्तात्प्रवर्तते तेनैव प्रकारेण पश्चादश्वानां नियमं कुर्वन्तीत्यर्थः। कल्पः—" तीव्रान्घोषान्कृण्वते वृषपाणय इत्यश्वान् " इति। पाठस्तु—

तीव्रान्घोषानिति। एतेऽश्वास्तीव्रानत्युच्चान्घोषान्हेषाशब्दान्कृण्वते कुर्वते। कीदृशा अश्वाः, वृषपाणयः, सेचनवाचिना वृषशब्देन शक्तिरुपलक्ष्यते। पाणिशब्दः पादलक्षकः। गन्तुं शक्ताः पादा येषां ते वृषपाणयः। रथेभिः सह वाजयन्तो रथैः सह शीघ्रं गच्छन्तः। प्रपदैः पादाग्रैः खुरैरभित्रान्वैरिणोऽवक्रामन्तः। तादृशा अश्वा अनपव्ययन्तः प्रत्यापत्तिमकुर्वन्तो भीतिरहिता इत्यर्थः। शमूक्षिणन्ति हिंसन्ति। कल्पः—" रथवाहनꣳ हविरस्य नामेति रथवाहनं रथमत्याधाय " इति। यद्यपीदमत्याधानं रथस्य प्रत्याधानादूर्ध्वभावि तथाऽप्यध्ययनसंप्रदायादयं मन्त्रोऽत्र पठितः। तत्पाठस्तु—

रथवाहनमिति। यत्र यस्मिन्स्थले शकटेऽस्य यजमानस्याऽऽयुधं धनुरादिकं वर्म कवचं चत्येवमादिकं निहितं स्थापितं, य(अ)स्य शकटस्य रथवाहनमिति नामधेयं, प्रत्यागत्य रथोऽस्मिन्शकटे स्थाप्यत इति तच्छकटं रथवाहनं, तस्य हविर्द्रव्योपकारकत्वाद्धविष्ट्वं, तत्र तस्मिन्रथवाहने शकटे विश्वाहा सर्वेष्वपि दिनेषु सुमनस्यमानाः सौमनस्यं प्राप्ता वयं शर्म सुखगमनहेतुं रथमुपसदेमोपेत्य स्थापयाम। कल्पः—" स्वादुषꣳसदः पितरो वयोधा इति तिसृभिः पितॄनुपतिष्ठते " इति। तत्र प्रथमामाह—

स्वादुषꣳसद इति। ये पितरोऽस्मदीयाः सन्ति त एतैर्विशेषणैर्विशिष्टाः। कानि विशेषणानीति तान्युच्यन्ते—स्वादुषंसदोऽस्माभिः समर्पिते स्वादुन्यन्ने सम्यक् सीदन्ति तेन तृप्ता इत्यर्थः। वयोधा अस्मदीयस्य वयस आयुषः स्थापयितार कृच्छ्रे व्यसने प्राप्ते सति रक्षार्थं श्रीयन्ते प्राणिभिः सेव्यन्त इति कृच्छ्रश्रियः। शक्तीवन्तः शक्तियुक्ताः। गभीरा अगाधबुद्धयः। चित्रा विविधा हस्त्यश्वरथरूपा सेना येषां ते चित्रसेनाः। इषुभिर्योद्धुमतिप्रबला इषुबलाः। अमृधाः शत्रुभिर्योद्धुमशक्याः। सन्विद्यमानो लोके प्रसिद्धो यः शूरस्तस्मादप्यतिशूराः सतोवीराः। उरवो विस्तीर्णा धनसेनादिसमृद्धाः। व्रातं परकीयभटानां संघातं सहन्ते पराभवन्तीति व्रातसाहाः। अथ द्वितीयामाह—

ब्रह्मचास इति। येऽस्मदीयाः पितरस्ते ब्राह्मणासो ब्रह्म वेदस्तदर्थपरा

ब्राह्मणाः । अत एवास्मासु सोम्यासः सोम्या अनुग्रहपरा इत्यर्थः । यथेते पितरस्तथा द्यावापृथिवी उभे अप्यनेहसाऽनेहसि सर्वस्मिन्नपि काले नोऽस्मान्प्रति शिवे शान्ते अनुग्रहपरे भवतामिति शेषः । तथर्तावृधो यज्ञस्य वर्धयिता पूषा पोषको देवो नोऽस्मान्दुरितात्पातु । हे पितृसमूह रक्षास्मान्पालय । नोऽस्माकमघशंसः पापशंसनपरा निन्दका माकिरीशत निन्दितुं समर्था मा भूवन् । अथ तृतीयामाह—

सुपर्णं वस्त इति । पितृसंबन्धिनी येयमिषुः प्रशस्यतेऽस्या इषोः सुपर्णं पृष्ठेऽवस्थितं शोभनं पतन्तं भागं वस्त आच्छादयति । अथास्या इषोर्दन्तः शल्यं मृगदन्तवत्तीक्ष्णं, सेयमिषुर्गोभिर्गोसंबन्धिभिः संनद्धा दृढं बद्धा । तादृशेयमिषुः प्रसूता पितृभिः प्रेरिता सती पतति सहसा गच्छति । कुत्रेति तदुच्यते—नरः पुरुषा यत्र यस्मिन्परसैन्ये संचरन्ति च प्रथममुत्सुकाः सन्तः प्राप्नुवन्ति पश्माद्भीताः सन्तः पलायन्ते च, तत्रेयमिषुः पततीति पूर्वेणान्वयः । तादृश्यः पितृणामिषवोऽस्मभ्यं शर्म यंसन्सुखं यच्छन्तु ।

कल्पः—"ऋजीते परि वृङ्ग्धि न इत्यात्मानं प्रत्यभिमृश्य" इति । पाठस्तु—

ऋजीते परीति । ऋजीतिशब्द इषुवाची । हे ऋजीतेऽस्मान्परिवृङ्ग्धि परितो वर्जयित्वाऽस्मान्कुरु । नोऽस्माकं तनूरप्या भवतु पाषाणवद्दृढा भवतु । सोमो नोऽस्मानधिब्रवीतु अधिकान् एते मान्या इति कथयतु । अदितिः शर्म यच्छतु सुखं यच्छतु । कल्पः—"आ जङ्घन्तीत्यश्वाजनिमादाय" इति । पाठस्तु—

आजङ्घन्तीति । कशाधारिणः सारथय एषामश्वानां सानु पर्वतसानुसदृशं पार्श्वमाजङ्घन्ति सर्वतस्ताडयन्ति । तथा पृष्ठभागानुपाजिघ्नत उपरि ताडयन्ति । तथाविधताडनेहेतुभूते हेऽश्वाजनि अश्वप्रेरके कशे पचेतस्तदीयेन प्रकृष्टगमने चित्तयुक्तान्समत्सु युद्धेषु चोदय प्रेरय । कल्पः—"अहिरिव भोगैरिति हस्तघनमभिमन्त्रयते" इति । पाठस्तु—

अहिरिवेति । धानुष्कैर्बाहुस्तः केनचिद्रूपेण चर्माविशेषेण वेष्ट्यते । तत्रायं दृष्टान्तः—अहिरिव भोगैः, यथा सर्पः स्वकीयशरीरवेष्टनैः पुरुषस्य हस्तं पादं वा वेष्टयति तथाऽयं चर्माविशेषः पुरुषस्यं बाहुं पर्येति परितो व्याप्नोति ।

(अश्वमेधकर्तृ रथसज्जीकरणभाविकवचस्वीकाराद्यङ्गाभिधानम्)

किं कुर्वन्, ज्याया आकर्णमाकृष्य सहसा मुक्ता या हेतिस्तां परिबाधमानः परितो निवारयन्। ज्यायाः प्रहारश्चर्मण्येव लगति न तु बाहोः। हस्ते स्थित्वा ज्याघातेन हन्यमानश्चर्मविशेषो हस्तघ्नः। सोऽस्मान्विश्वतः सर्वस्मादुपद्रवात्पातु। तत्र दृष्टान्तः—विश्वा वयुनानि विद्वान्सर्वान्मार्गानभिजानानः पुमान्पुमांसमन्यं पुरुषं यथा पालयति तद्वदिति शेषः। कल्पः—"वनस्पते वीड्वङ्ग इति पञ्चभी रथम्" इति। तत्र प्रथमामाह—

वनस्पते वीड्विति। हे वनस्पते वनस्पतिनिष्पन्न रथ वीड्वङ्गो हि दृढाङ्ग एव भूयाः। कीदृशस्त्वम्, अस्मत्सखाऽस्मासु सख्यवान्स्निग्धः। प्रतरणः प्रकृष्ट-गमनसाधनभूतः। सुवीरः शोभनैर्वीरैर्भटैरुपेतः। गोभिः सनद्धोऽसि गवादि-चर्मरज्जुभिः सन्यग्बद्धोऽसि। वीड्यस्त्वात्यन्तं दृढो भव। ते तवाऽऽस्थाना जेतव्यानि जेतव्यानि परसैन्यानि जयतु। अथ द्वितीयामाह—

दिवः पृथिव्या इति। हे यजमान त्वं रथमिमं हविषा बलिकर्मणा यज पूजय। कीदृशं रथम, दिवः पृथिव्याः पर्योजः उद्भूतं द्युलोकाद्भूलोकाच्च सर्वतो बलमानीय संपादितं, तथा वनस्पतिभ्योऽपि परितः सहो बलमानीयाऽऽभृतं संपादितम्। तथाऽपामोज्मानमप्संबद्धमोज आनीय निष्पादितं, गोभिर्गवादिविकारैः स्नायुभिश्चर्ममयरज्जुभिश्च परित आवृतमिन्द्रस्य वज्रमिव दृढीभूतम्। [अथ] तृतीयामाह-

इन्द्रस्य वज्र इति। यथेन्द्रस्य वज्रोऽत्यन्तं दृढः, यथा च मरुतामनीकं सैन्यं बहुभिर्भटैरुपेतं, यथा मित्रस्य गर्भोऽत्यन्तं सुरक्षितः, यथा वरुणस्य नाभिः केनापि तिरस्कर्तुमशक्यस्तथाविधैर्गुणैरुपेत हे देव रथ नोऽस्मदीयामिमां हव्यदातिं हविर्दानं जुषाणो हव्याऽस्मद्दत्तानि हव्यानि प्रति गृभाय प्रत्येकं गृहाण। [अथ] चतुर्थीमाह—

उप श्वासयेति। रथसमीपवर्तिदुन्दुभिरपि, एवंमहिमा किमुत रथ इति विवक्षया दुन्दुभिः प्रशस्यते। हे दुन्दुभे पृथिवीमुपश्वासय त्वदीयेन शब्देन पूरय। उतापि च द्यां द्युलोकमप्युपश्वासय। पुरुत्रा पुरुषु द्युलोकभूलोकादि-स्थानेषु विष्ठितं विशेषेण स्थितं सर्वं जगत्ते तव शब्दं मनुतां जानातु। स त्व-मिन्द्रेणान्यैर्देवैश्च सजूः समानप्रीतिः सऋभूनस्मदीयान्दूराद्दवीयो दूरादप्यत्यन्तं दूरदेशं प्रत्यपसेधापसारय। [अथ] पञ्चमीमाह—

---

१ ख. च. फलति।

(अश्वमेधकर्तृ रथसज्जीकरणभाविकवचस्वीकारावङ्गाभिधानम्)

आ क्रन्दयेति । हे दुन्दुभे बलं परकीयसैन्यं प्रत्याक्रन्दयाऽऽक्रोशं कुरु । अमुं जल्गुलं प्रहरेत्यत्यन्तभीतिहेतुं शब्दं कुरु । नोऽस्माकमोजो बलमाधा आधेहि सम्यक्संपादय । दुरिता बाधमानोऽस्मदीयानि दुरितानि विनाशयन्निहि गर्जनसमानपरस्मदुत्साहहेतुं शब्दं कुरु । दुच्छुनान्दुष्टचित्तान्पुरुषानितोऽस्मादपोथापसारय । त्वमिन्द्रस्य मुष्टिरसि वज्रधारकमुष्टिसमानोऽस्यतो वीडयस्व दृढी भव । ईदृशैर्दुन्दुभिध्वानैभिः सहितोऽयं रथः प्रवर्तत इति तात्पर्यार्थः ।

कल्पः—" आऽमूरजेति दुन्दुभिं संह्लादयन्ति " इति । पाठस्तु—

आऽमूरजेति । हे इन्द्रामूः परकीयसेनाः समन्तादज प्रेरय पलायिताः कुरु । इमा अस्मदीयाः सेनाः प्रत्यावर्तयाक्षताः सत्यो यथा प्रत्यावृत्ता भवन्ति तथा कुरु । अयं दुन्दुभिः केतुमज्ज्ञानवदस्मदीयो जयो यथा सर्वैर्ज्ञायते तथा वावदीति भृशं ध्वनिं करोति । अश्वपर्णा अश्वपत्रा अश्ववाहनयुक्ता इत्यर्थः । तादृशा नो नरोऽस्मदीयाः पुरुषाः संचरन्ति सम्यग्विश्रम्भेण चरन्तु । अस्माकं संबन्धिनो ये रथिनो मुख्यपुरुषास्ते जयन्तु । अत्र विनियोगसंग्रहः—

अथाश्वमेधे जीमूत कवचं प्रतिमुञ्चति ।
धन्वना धनुरादत्ते वक्ष्यन्ती ज्यामभिस्पृशेत् ॥
ते संमृशद्धनुष्कोट्यौ बद्धीतीषुधिबन्धनम् ।
रथेति सारथिं तीव्रानश्वानप्यभिमन्त्रयेत् ॥
रथ काले रथः स्थाप्यो भजेत्स्वादुत्रयाधिपतून् ।
ऋज्यात्मानमभिस्पृश्य ह्रा जङ्घेत्याहरेत्कशाम् ॥
हस्तं(स्तघ्नं) मन्त्रयतेऽहीति(येच्चाही) रथंतु वनपञ्चभिः ।
दुन्दुभिं वादयेदाऽमूरत्र मन्त्रास्तु विंशतिः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे लघ्वाश्वपजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे षष्ठप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(होमाभिधानम्)

(अथ चतुर्थाष्टके षष्ठप्रपाठके सप्तमोऽनुवाकः)।

यदक्रन्दः प्रथमं जायमान उद्यन्त्समुद्रादुत वा पुरीषात्। श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातं ते अर्वन्। यमेन दत्तं त्रित एनमायुनगिन्द्र एणं प्रथमो अध्यतिष्ठत्। गन्धर्वो अस्य रशनामगृभ्णात्सूरादश्वं वसवो निरतष्ट। आसिं यमो अस्यादित्यो अर्वन्नामिं त्रितो गुह्येन व्रतेन। अमि सोमेन समया विपृक्तः (१) आहुस्ते त्रीणि दिवि बन्धनानि। त्रीणि त आहुर्दिवि बन्धनानि त्रीण्यप्सु त्रीण्यन्तः समुद्रे। उतेव मे वरुणश्छन्त्स्यर्वन्यत्रा त आहुः परमं जनित्रम्। इमा ते वाजिन्नवमार्जनानीमा शफानां सनितुर्निधानां। अत्रा ते भद्रा रशना अपश्यमृतस्य या अभिरक्षन्ति गोपाः। आत्मानं ते मनसाऽऽरादजानामवो दिवा (२) पतयन्तं पतङ्गम्। शिरो अपश्यं पथिभिः सुगेभिररेणुभिर्जेहमानं पतत्रि। अत्रा ते रूपमुत्तममपश्यं जिगीषमाणमिष आ पदे गोः। यदा ते मर्तो अनु भोगमानडादिद्ग्रभिष्ठ ओषधीरजीगः। अनु त्वा रथो अनु मर्यो अर्वन्नु गावोऽनु भगः कनीनाम्। अनु व्रातासस्तव सख्यमीयुरनु देवा ममिरे वीर्यम् (३) ते। हिरण्यशृ-

(होमाभिधानम्)

क्रोऽयो अस्य पादा मनोजवा अवर इन्द्र आसीत् । देवा इदस्य हविरद्यमायन्यो अर्वन्तं प्रथमो अध्यतिष्ठत् । ईर्मान्तासः सिलिकमध्यमासः सꣳशूरणासो दिव्यासो अत्याः । हꣳसा इव श्रेणिशो यतन्ते यदाक्षिषुर्दिव्यमज्यमश्वाः । तव शरीरं पतयिष्ण्वर्वन्तव चित्तं वात इव ध्रजीमान् । तव शृङ्गाणि विष्ठिता पुरुत्राऽरण्येषु जर्भुराणा चरन्ति । उप (४) प्रागाच्छसनं वाज्यर्वा देवद्रीचा मनसा दीध्यानः । अजः पुरो नीयते नाभिरस्यानु पश्चात्कवयो यन्ति रेभाः । उप प्रागात्परमं यत्सधस्थमर्वाꣳ अच्छा पितरं मातरं च । अद्या देवाञ्जुष्टतमो हि गम्या अथाऽऽशास्ते दाशुषे वार्याणि (५)

(विपृक्तो दिवा वीर्यमुपैकाग्नचत्वारिꣳशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके षष्ठप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(अथ चतुर्थकाण्डे षष्ठप्रपाठके सप्तमोऽनुवाकः) ।

षष्ठेऽनुवाके कवचादिसंनाहोऽभिहितः । अथ सप्तमाद्यनुवाकत्रये होमोऽभिधीयते । कल्पः—" यदक्रन्दः प्रथमं जायमान इत्येतैस्तिसृभिरनुवाकैः षट्त्रिंशतमधस्तोमधियाज्जुहोति " इति । तत्र सप्तमानुवाके प्रथममृचमाह—

यदक्रन्द इति । हेऽर्वन्यद्यस्मात्कारणाज्जायमान उत्पद्यमान एव प्रथमतादावक्रन्दः क्रन्दितवानसि, अहो अग्न्यादीनामहं साधनमिति महान्तं शब्द-

(होमाभिधानम्)

मकरोस्तस्मात्कारणात्ते तव जातं महि महत्। अत एवोपस्तुत्यं समीचीनमिति सर्वैरपि स्तोतव्यमासीत्। जायमानमे(ए)व विशदी क्रियते—समुद्रादुद्यन्त्समुद्रोपलक्षितादुदकादुत्पद्यमानः। अप्सुयोनिर्वा अश्व इति श्रुतेः। उत वा पुरीषात्, अथवा लौकिकदृष्ट्या पुरीषात्पुंस्त्वशक्तिसंपन्नान्महतोऽश्वादुत्पद्यमानः। जन्मन उपस्तुत्यत्वे दृष्टान्तद्वयमुच्यते—श्येनस्य पक्षा हरिणस्य बाहू। इवशब्दोऽध्याहर्तव्यः। यथा श्येनाख्यस्य पक्षिणः पक्षौ शीघ्रोत्पतनहेतुत्वात्सर्वैरुपस्तुत्यौ, यथा वा हरिणस्य मृगस्य बाहू पादौ शीघ्रागमनहेतुत्वादुपस्तुत्यौ तद्वदित्यर्थः। अथ द्वितीयामृचमाह—

यमेन दत्तमिति। अत्र यमोऽग्निः। अग्निर्वाव यम इति श्रुत्यन्तरात्। त्रिषु लोकेषु त्रायते विस्तार्यत इति त्रितो वायुः। यमेनाग्निना दत्तमेनमश्वं त्रितो वायुरायुनग्रथे योजितवान्। तत इन्द्रः प्रथमः सर्वेषु देवेषु मध्ये प्रथमं प्रवृत्तः सन्नेनमश्वमध्यतिष्ठदधिष्ठितवान्योगक्षेमं संपादितुमभिमानं कृतवानित्यर्थः। गन्धर्वः कश्चिदस्याश्वस्य रशनां बन्धनहेतुं रज्जुमगृभ्णात्स्वीकृतवान्। हे वसवो यूयं सूरादादित्यादिममश्वं निरतष्ट निःशेषेण प्रकाशितवन्तः। यस्याश्वस्याग्निरानेता, वायुर्योजयिता, इन्द्रोऽभिमन्ता, गन्धर्वो रज्जुग्रहीता, सूर्यप्रकाशेन वसवः प्रकाशयितारस्तादृशोऽयमश्व इति स्तूयते। अथ तृतीयामृचमाह—

आसि यम इति। हेऽर्वन्नश्व त्वं यमाभिधोऽग्निरसि। तथाऽऽदित्योऽसि। तथा त्रितो वायुरसि। पूर्वोक्तप्रकारेण वाय्वादित्ययोरनुगृहीतत्वात्तद्रूपत्वम्। तथा गुह्येन गोप्येनाश्वमेधाख्येन कर्मणा तत्रत्येन सोमेन च समया समये प्रातःकाले विपुक्तो विशेषेण युक्तोऽसि। ईदृशस्य ते तव द्युलोके बन्धनानि बन्धनसाधनानि दामानि वणीत्येवमभिज्ञा आहुः। वणिजो हि शक्त्याधिक्येनात्युग्रमश्वं विक्रेतुं ग्रामान्तरे नयन्तस्त्रिभिर्दामभिर्बध्नन्ति। दक्षिणवामपार्श्वयोर्दामद्वयमुभौ पुरुषौ गृह्णीतः। यदा दक्षिणभागवर्तिनं द्रष्टुमुद्युङ्क्ते तदा वामभागवर्ती तमाकर्षति। तं चेद्द्रष्टुमुद्युङ्क्ते तदानीमितर आकर्षति। यदा सहसा पुरतः पलायनं करोति तदा तं वारयितुं गले बद्धमेकं दाम गृहीत्वा पृष्ठतः कश्चिदाकर्षति। तदिदं बन्धनत्रयम्। यद्वा शास्त्रसिद्धं किंचित्कारणत्रयं द्रष्टव्यम्। तदनेन बन्धनत्रयेणाधिकशक्तिरश्व इति स्तुतो भवति। अथ चतुर्थीमृचमाह—

त्रीणि त इति। यथा द्युलोके त्रयोश्वस्य बन्धनत्रयमभिज्ञा आहुस्तथाप्सु समुद्रे च। यथा वा वाजपेयेऽश्वस्तूयतामिति मन्त्रेणाश्वान्सु

स्नापयन्ति तथाऽपि पूर्वोक्तरीत्या बन्धनत्रयमपेक्षितं तथा समुद्रमध्ये स्थितायां वडवायां बन्धनत्रयमित्येवमभिज्ञा आहुः । उतापि च हेऽर्वन्नश्व ते तव यत्र यस्मिन्पितृवीर्ये परमं जनित्रमुत्तमं जन्मेत्येवंलक्षणमभिज्ञा आहुः, तस्मिंस्तृवीर्ये त्वमेव वरुणस्त्रिभिर्बन्धनैर्निवारणीयो भूत्वा मे मम छन्त्सीव कथयसीव । अयमर्थः—अश्वस्य पितृपक्षमागित्वान्मातरि स्वल्पायामपि सत्यां प्रौढश्चेदश्वो दृश्येत तस्य पिता प्रौढ इत्युत्प्रेक्षितुं शक्यत इति । अथ पञ्चमीमृचमाह—

इमा ते वाजिन्निति । हे वाजिन्नश्व ते तवैतानि दृश्यमानानि अवमार्जनानि शरीरशोधनसाधनानि लोहमयानि । यैर्लोहमयैः प्रातःकालादावश्वस्य पांस्वाद्यपनयनाय शरीरं मृज्यते घर्षणेन शोध्यते तान्यवमार्जनानि । तथा शफानां क्षुराणां सनिमुद्गातुः पाषाणबहुले मार्गे प्रक्षेप्य(प्तु)स्तव शफभेदनपरिहारार्थमिमा निधानैतानि लोहमयान्यावरणविशेषरूपाणि निधीयन्ते शफेष्विति निधानानि । राजानो हि महार्हाणां प्रौढानामश्वानां लोहमयैः साधनैः प्रतिदिनं कण्डूरपनयन्ति, शफेषु च लोहपत्राणि कीलयन्ति । किंच ते तव भद्राः सुवर्णादिखचितत्वेन कल्याणरूपा रशनाः खलीनलोहकक्ष्याः पुच्छपत्रा अत्रास्मिन्नेव देशे स्थापिता अहमद्यापश्यम् । कीदृशस्य तव, ऋतस्य सत्यस्य बहुमूल्यार्हस्येत्यर्थः । कीदृश्यो रशना इति ता विशेष्यन्ते—या रशना गोपाः पृष्ठदेशव्यथादिपरिहारेणाश्वं गोपायन्त्योऽभिरक्षन्ति उपर्यारूढं पुरुषमितः पतनादिभ्यः पालयन्ति । अथ षष्ठीमृचमाह—

आत्मानं त इति । हेऽश्व ते तवाऽऽत्मानं स्वरूपमारात्समीप एव मनसा चित्तेनाजानामभिज्ञातवानस्मि । कीदृशमात्मानम्, अवो रक्षकम् । शीघ्रगामी ह्यश्वः परसैन्यमध्येन स्वामिनं रक्षति । तथा दिवा पतयन्तमाकाशेन धावन्तम् । त्वदीयधावनवेलायां वेगातिशयेन भूमेराकर्षणं केनापि द्रष्टुं न शक्यत इत्यर्थः । यस्मादाकाशगामी तस्मादेव च पतङ्गं पक्षिसदृशम् । तथा त्वदीयं शिरोऽप्यहमपश्यम् । कीदृशं शिरः, सुगेभिर्गन्तुं शक्यैररेणुभिर्धूलिरहितैः पथिभिराकाशमार्गैर्जैहमानं शीघ्रगतियुक्तमत एव पतत्रि पक्षिसदृशम् । यदा ह्ययमश्वः प्रायेण भूमिस्पर्शं विनाऽऽकाशमार्गेण धावति तदानीं पाषाणादिरहितत्वादयं मार्गः सुगमो भूमिस्पर्शबाहुल्याभावाद्धूलिरहितश्च । तथाविधमार्गेण धावतोऽश्वस्योपरिवर्ति शिरः सुखेन द्रष्टुं शक्यते, उन्नतदेशवर्तित्वाद्धूल्यावरणाभावाच्चेति । ईदृशवेगवानश्व इति स्तुतिः । अथ सप्तमीमृचमाह—

(होमाभिधानम्)

अत्रा ते रूपमिति। हेऽश्व यदा यस्मिन्काले ते तव भोगं घृतमुद्गादिभक्षणरूपमनु मर्तो मनुष्यः परिचारक आनड्भोगं प्राप्तवान्। प्रौढेषु राजगृहादिष्वश्वघासार्थं दत्तैर्घृतमुद्गादिभिः परिचारका अपि जीवन्तीति प्रसिद्धम्। आदिदीदृशवृत्तान्तादनन्तरमेव ग्रसिष्ठोऽतिशयेन ग्रसितुकामस्त्वमोषधीश्चणकाद्या अजीगः पितोऽसि। अत्रास्मिन्नवसरे ते तव रूपमुत्तमं सर्वोत्कृष्टमित्यपश्यमहं निश्चितवानस्मि। कीदृशस्य तव, इषोऽन्नानि आ समन्तात्पदे प्राप्तुं गोर्गच्छतः। कीदृशं रूपम्, जिगीषमाणं जेतुमिच्छायुक्तम्। अयमर्थः—प्रौढराजगृहे त्वदीयभोगमनु अश्ववारा नीचाः सर्वेऽपि सम्यग्भुञ्जते। त्वं च राजाज्ञया केनाप्यनिवारितः संश्चणकादिक्षेत्रेषु स्वेच्छया गच्छसि। अस्मिन्नवसरे त्वन्मुखेन सर्वाण्यन्नानि प्राप्तुं शक्यन्ते, विजयश्च भविष्यति। एवं त्वदीयमहिमानं निश्चितवानस्मीति।

अथाष्टमीमृचमाह—

अनु त्वेति। हेऽर्वंस्त्वामनु रथः प्रवर्तते। नहि त्वया विना रथो गन्तुं शक्तः। मर्यो मर्त्योऽश्ववारस्त्वामनु जीवति। तच्च पूर्वमेवोदाहृतम्। गावोऽपि त्वामनु जीवन्ति, बालस्य तव क्षीरनवनीताद्यर्थं प्रवृद्धस्य तव घृतार्थं च गाः पोषयन्ति। कन्यानां कन्यकानां बालानां दासीनां भगः सौभाग्यं त्वामनु संपद्यते। अश्वशालापरिचारार्थं हि ता अन्नवस्त्रदानेन त्वत्स्वामिनः पोषयन्ति। व्रातासो व्राताः सेनारूपा मनुष्यसंघास्तव सख्यमनु त्वदीयं साहाय्यमनु पश्चादीयुर्जयं प्राप्नुवन्ति। देवाः प्रजापत्यादयस्ते वीर्यं त्वदीयं सामर्थ्यमनूपलक्ष्य ममिरे स्वकीयहविष्ट्वेन प्रमितवन्तः। ईदृशोऽयमश्व इति स्तुतिः। अथ नवमीमृचमाह—

हिरण्यशृङ्ग इति। अयमश्वो हिरण्यशृङ्गो हिरण्यसमानवर्णः शृङ्गस्थानीयो यत्र देशो यस्यासौ हिरण्यशृङ्गो हिरण्याङ्गित इत्यर्थः। अयो लोहवदत्यन्तदृढाः अस्याश्वस्य पादा मनोजवा मनोवृत्तिसदृशेन वेगातिशयेन युक्ताः। एतेनाश्वेनेदृशसा विनेन्द्रोऽप्यपरो निकृष्ट एवाऽऽसीत्। देवा इत्सर्वे हि देवाः स्वयमस्याश्व संबन्धि हविरद्यं हविर्भक्षणमायन्प्राप्तवन्त एतदीयमेव हविरत्तुं योग्यमिति निश्चितवन्तः। प्रथम आद्यो यः प्रजापतिरवन्तमेनमश्वमध्यतिष्ठदधिष्ठितवान्स्वकीयत्वेन स्वीकृतवान्सोऽप्येतदीयमेव हविरद्यमिति निश्चितवान्। अथ दशमीमृचमाह—

ईर्मान्तास इति । सर्वेऽप्यश्वा एवंविधाः । कीदृशा इति तदुच्यते—ईर्मान्तासः । गलभागो जघनभागश्चाश्वस्यान्तौ, तावीर्मौ प्रसृतावुन्नतौ येषां त ईर्मान्तासः । सिलिकं संकुचितं निम्नं मध्ये पृष्ठभागे येषां ते सिलिकमध्यमासः । यत्र मनुष्या आरोहन्ति स देशो निम्नः । न तु गजस्येव पृष्ठभाग उन्नतः । संशूरणासो युद्धे जयहेतुत्वेन सम्यक्शूराः । दिव्यासो ग्रामगमनादिव्यवहारनिष्पादकाः । अत्याः संततगमनशीलाः । ते च हंसा इव श्रेणिशः संघशो यतन्ते । यथा हंसाः पङ्क्तिबद्धाः संघीभूयाऽऽकाशे यतन्ते गच्छन्त्येवमश्वा अपि बहवः संहता युद्धाय प्रयतन्ते । यद्यस्मात्कारणादश्वा दिव्यं क्रीडाविजिगीषाद्यर्थमभ्रं गमनमाक्षिपुर्व्याप्तवन्तस्तस्मादश्वजातिमात्रस्यैवं प्रशस्तत्वात्स क्रतुनिष्पादकः प्रकृतोऽश्वः प्रशस्त इति किमु वक्तव्यः(व्यम्)। अथैकादशीमृचमाह—

तव शरीरमिति । हेऽर्वंस्तव शरीरं पतयिष्णु पतनशीलं शीघ्रगमनशीलमित्यर्थः । तव चित्तं वात इव वातसदृशश्च(वं च)। वायुः कीदृशः, धृजीमान्वेगवान् । तव शृङ्गाणि शृङ्गस्थानीयानि । उपरि प्रक्षिप्तान्यायुधानि विशिष्टा विशेषेण तत्र तत्र स्थितानि साधितानि । अश्वस्योपरि क्वचिदिषुधिः क्वचित्खड्ग इत्येवं बहून्यायुधानि प्राप्यन्ते । तानि च पुरुषु बहुषु अरण्येषु ग्रामेभ्यो बहिर्भूतेषु युद्धपदेशेषु जर्भुराणा परसैन्यान्यतिशयेन भरमाणानि चरन्ति प्रवर्तन्ते । अथ द्वादशीमृचमाह—

उप प्रागादिति । वाजी क्रतुद्वाराऽन्नहेतुरर्वाऽयमश्वः शसनमस्मिन्क्रतौ विशसनस्थानं प्रत्युपप्रागात्समीपं प्राप्तवान्। किं कुर्वन्, देवश्रुता मनसा दीध्यानः, देवानश्नुते प्राप्नोतीति देवश्रुत्तादृशेन निरन्तरं देवविषयेण मनसा ध्यानं कुर्वन् । अजः प्रजापतिः पुरो नीयतेऽस्मादश्वात्पूर्वमृत्विग्भिर्नीयते, प्रजापतिं पुरतो गच्छन्तमृत्विजो ध्यायन्तीत्यर्थः । यद्वा छाग एवाजः । स अश्वस्य पुरतो नीयते । अस्याश्वस्य नाभिर्नाभ्युपलक्षितं शरीरं प्रजापतिमनु नीयते । अस्याश्वस्य पश्चात्पृष्ठभागे कवयो विद्वांस ऋत्विजो रेभा यन्ति स्तुतिं कुर्वाणा गच्छन्ति । अथ त्रयोदशीमृचमाह—

उप प्रागादिति । अर्वाञ्चीडागमनवानयमश्वः परममुत्कृष्टं यत्तधस्थं शमितृभिः तद्ध स्थातुं योग्यं यत्स्थानमस्ति तदुपप्रागात्तत्समीपं प्राप्तवान् । किमर्थम्,

१ ख, घ, ङ, च, 'त्र स्थि'। २ ख, च पुरो।

(केषांचिदश्वस्तोमीयमन्त्राणामभिधानम्)

पितरं मातरं चापि प्राप्तुं, स्वर्गलोके दिव्यो यः पिता या च माता दिव्या तावुभौ प्राप्तुं देवताजन्मन इत्यर्थः। हेऽश्वाद्यास्मिन्दिने जुष्टतमोऽतिशयेन प्रीतः सन्देवान्गम्याः प्राप्नुहि। अथानन्तरं दाशुषे हविर्दत्तवते यजमानाय वार्याणि वरणीयानि फलानि अयमृत्विक्संघ आशास्ते प्रार्थयति॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे षष्ठप्रपाठके
सप्तमोऽनुवाकः॥ ७॥

(अथ चतुर्थाष्टके षष्ठप्रपाठकेऽष्टमोऽनुवाकः)।

मा नो मित्रो वरुणो अर्यमाऽऽयुरिन्द्र ऋभुक्षा मरुतः परि ख्यन्। यद्वाजिनो देवजातस्य सप्तेः प्रवक्ष्यामो विदथे वीर्याणि। यन्निर्णिजा रेक्णसा प्रावृतस्य रातिं गृभीतां मुखतो नयन्ति। सुप्राङजो मेम्यद्विश्वरूप इन्द्रापूष्णोः प्रियमप्येति पाथः। एष च्छागः पुरो अश्वेन वाजिना पूष्णो भागो नीयते विश्वदेव्यः। अभिप्रियं यत्पुरोडाशमर्वता त्वष्टेदु (१) एनꣳ सौश्रवसाय जिन्वति। यद्धविष्यमृतुशो देवयानं त्रिर्मानुषाः पर्यश्वं नयन्ति। अत्रा पूष्णः प्रथमो भाग एति यज्ञं देवेभ्यः प्रतिवेदयन्नजः। होताऽध्वर्युरावया अग्निमिन्धो ग्रावग्राभ उत शꣳस्ता सुविप्रः। तेन यज्ञेन स्वरंकृतेन स्विष्टेन वक्षणा आ पृणध्वमु। यूपव्रस्का उत ये यूपवाहाश्चषालं ये अ-

---

१ क. चाभिप्रा°।

(केषांचिदश्वस्तोमीयमन्त्राणामभिधानम्)

श्वयुपाय तक्षति । ये चार्वते पचनꣳ संभरन्त्युतो (२) तेषामभिगूर्तिर्न इन्वतु । उपप्रागात्सुमन्मेऽधायि मन्म देवानामाशा उपवीतपृष्ठः । अन्वेनं विप्रा ऋषयो मदन्ति देवानां पुष्टे चकृमा सुबन्धुम् । यद्वाजिनो दाम संदानमर्वतो या शीर्षण्या रशना रज्जुरस्य । यद्वा घास्य प्रभृतमास्ये तृणꣳ सर्वा ता ते अपि देवेष्वस्तु । यदश्वस्य क्रविषः (३) मक्षिकाऽऽश यद्वा स्वरौ स्वधितौ रिप्तमस्ति । यद्धस्तयोः शमितुर्यन्नखेषु सर्वा ता ते अपि देवेष्वस्तु । यदूवध्यमुदरस्यापवाति य आमस्य क्रविषो गन्धो अस्ति । सुकृता तच्छमितारः कृण्वन्तूत मेधꣳ शृतपाकं पचन्तु । यत्ते मात्रादग्निना पच्यमानादभि शूलं निहतस्यावधावति । मा तद्भूम्यामा श्रिषन्मा तृणेषु देवेभ्यस्तदुशद्भ्यो रातमस्तु (४) ॥

(इदुतो क्रविषः श्रिषत्सप्त च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके षष्ठप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

(अथ चतुर्थकाण्डे षष्ठप्रपाठकेऽष्टमोऽनुवाकः) ।

सप्तमेऽनुवाकेऽश्वस्तोमीयमन्त्राः केचिदुक्ताः । अश्वस्तोत्रमश्वस्तोमस्तत्प्रतिपादका अश्वस्तोमीयाः । अथाष्टमे त एवान्ये केचिदुच्यन्ते । अनुवाकभेदस्तु सांप्रदायिकोऽयज्ञसंयुक्तेषु प्रयोगेषु मन्त्रभेदार्थो वा ।

(केषांचिदश्वस्तोमीयमन्त्राणामभिधानम्)

तत्राष्टमेऽनुवाके प्रथमामृचमाह—

मा नो मित्र इति। मित्रादयः प्रसिद्धाः। एति सर्वदा गच्छन्ती+ त्यायुः। ऋभवो देवाः क्षी(क्षि)यन्ति निवसन्त्यस्मिन्निति ऋभुक्षाः प्रजापतिः। मरुतो देवान्तराणि। ते सर्वेऽपि नोऽस्मान्मा परिरुषन्मा निन्दयन्तु-(न्दन्तु)। यद्यस्माद्वाजिनो यागद्वाराऽन्नसाधनस्य देवजातस्य देवार्थमुत्पन्नस्य समेरध्यस्य वीर्याणि सामर्थ्यानि विदथेऽस्मिन्यज्ञे प्रवक्ष्यामो वयं प्रकर्षेण कथयिष्यामस्तस्मादस्मन्निन्दा न युक्तेत्यर्थः। अथ द्वितीयामृचमाह—

यन्निर्णिजेति। निर्णिजा प्रोक्षणादिकृतया शुद्धया रेक्णता सुवर्णरजतादिमणिरूपेण धनेन च प्रावृतस्य प्रकर्षेण सर्वतो वेष्टितस्य, अश्वमेधे हि चत्वार ऋत्विजः समुक्षन्तीति प्रोक्षणं हिरण्मयाः काचा इत्यादिना सुवर्णादिमणिभिरलंकारश्चाभिधीयते। अतस्तथाविधस्य संबन्धिनीं गृभीतां हस्ते स्वीकृतां रातिं हविषो दानं मुखतोऽग्रे यद्यदा नयन्ति ऋत्विजः संपादयन्ति तदानीमजो गतिमानश्वः सुपाङ् सुष्ठु प्रकृष्टान्देवान्प्राप्नुवन्नेम्यत्, मेम्यदिति हेषाशब्दस्यानुकरणम्। विश्वरूपो नानारूपः सन्निन्द्रापूष्णोरिन्द्रपूषप्रभृतीनां देवानां प्रियं पाथोऽप्येति प्रीतिकरमन्नभावं प्राप्नोति। अथ तृतीयामृचमाह—**एष छागः इति**।

वाजिनाऽन्नसाधनेनाश्वेन सह यः कश्चिदजः पुरो नीयते तस्मादश्वात्पूर्वभागे। कीदृशोऽजः, पूष्णो भागः पूषदेवताया भागस्वरूपो विश्वदेव्यो विश्वेभ्यो देवेभ्यो हितः। अभिप्रियं सर्वतः प्रीतिकरं पुरोडाशवत्स्वादुभूतमेनमजमर्वताऽश्वेन सह त्वष्टेत्वष्टैव सौश्रवसाय श्रूयते सर्वैरपि जनैः प्रीतिपूर्वकमिति श्रवोऽन्नं, सुष्ठु श्रवः सुश्रवस्तस्य भावः सौश्रवसस्तस्मै सम्यक्शोभनभावाय यद्यस्मात्कारणाज्जिन्वति प्रीणयति तस्मादयमजः पुरो नीयते। अश्वमेधप्रकरणे पौष्णमन्वञ्जित्येवं पूषदेवताकमजं विधास्यति। स पूर्वो नेतव्यः। तद्विषयोऽयं मन्त्रः। अनेन न्यायेन पूर्वमन्त्रोऽप्यजविषयो योजयितव्यः। अश्वमेधप्रकरण ऐन्द्रापौष्णमुपरिष्टादिति व्यासक्तदेवताकस्याजस्य विहितत्वान्मन्त्रे च तस्मिन्नजशब्दस्य नेम्यदिति योग्यशब्दानुकरणस्य श्रूयमाणत्वाच्च। अथ चतुर्थीमृचमाह—

यद्धविष्यमिति। यद्यत्र मानुषा ऋत्विजोऽर्धं त्रिः परिणयन्ति त्रिवारं

+ स. पुस्तके "आयुर्वायुरित्येवंरूपः क्वचित्पाठो भवितुं युक्तः" इति टिप्पणी।

(केषांचिदश्वस्तोमीयमन्त्राणामभिधानम्)

प्रदक्षिणं कुर्वन्ति । कीदृशमश्वं, हविष्यं हविषो योग्यम् । ऋतुशो देवयानमुतावृतो देवान्गच्छन्तम् । अत्रास्मिन्देशेऽजः प्रथम एति । कीदृशोऽजः, पूष्णो भागः । किं कुर्वन्, देवेभ्यो यज्ञं प्रतिवेदयन्, हे देवा यज्ञः प्रवर्तत इत्येवं देवेभ्यो ज्ञापयन् । अथ पञ्चमीमृचमाह--

होताऽध्वर्युरिति । यो यस्मिन्यज्ञे होता विद्यते, यश्चाध्वर्युरावसा आसमन्ताद्देवं गच्छति तत्र तत्रानुष्ठानाय शीघ्रं प्रवर्तत इत्यावयाः, योऽप्यग्नििन्धोऽग्नेर्दीपक आग्नीध्रः, यश्च प्रावग्राभो प्रावस्तुत्, उतापि च शंस्ता यः प्रशास्ता, यश्च सुविप्रः प्रस्तोता, एते सर्वेऽपि स्वरंकृतेन सुष्ठ्वलंकृतेनापेक्षितव्यैः संपूर्णेनेत्यर्थः । स्विष्टेन सुष्ठ्वनुष्ठितेन [तेन] यज्ञेनाश्वमेधेन वक्षणाः फल्गुवाहिनीर्घृतकूल्या आपृणध्वं हे होत्रादयो यूयं सर्वेऽप्यापूरयध्वम् ।

अथ षष्ठीमृचमाह--

यूपव्रस्का इति । ये यूपव्रस्का यज्ञार्थं यूपं वृश्चन्ति, उतापि च ये यूपवाहाश्छिन्नं यूपं यज्ञभूमौ वहन्ति, येऽप्यन्येऽश्वयूपार्थं चषालं यूपकटकं तक्षति तक्षणेन संस्कुर्वन्ति, उतो अपि च येऽप्यन्ये पुरुषा अश्वेतेऽर्थाय पचनं पाकसाधनकाष्ठं समरन्ति संपादयन्ति, तेषां सर्वेषामभिपूर्तिः संकल्पो नोऽस्मानिष्वतु प्रीणयतु । अथ सप्तमीमृचमाह--

उप प्रागादिति । सुष्ठु मदहेतुरतिहर्षकारणं फलं सुवस्तदस्मानुपागात्समीपे प्राप्नोति । मम मनसीयं फलं मे मदर्थमधायि देवैः संपादितम् । ÷ उप दीतपृष्ठः कमनीयपृष्ठोऽयमश्वो देवानामाशा देवैराशासनीयानि हवींषि उपप्रागादेवहविष्ट्वं प्राप्नोतीत्यर्थः । ऋषयो विप्रा अभिज्ञातार ऋत्विज एनमश्वमनु मदन्ति अनुकूलैः स्तोत्रैर्हर्षयन्तु । देवानां पुष्टे पुष्टयर्थं सुबन्धुं चक्रुषैनमश्वं बन्धुवदस्यन्तमियं चक्रम । अथाष्टमीमृचमाह --

यद्वाजिन इति । वाजिनोऽश्वस्य यद्दाम गलबन्धनं, यच्च संदानं पृष्ठपादे बन्धनसाधनं दाम पादसंदानादि, अश्वा गले बद्धा अपि पुनः पृष्ठपादे रज्वन्तरेण बध्यन्ते, या चार्वतोऽश्वस्य शीर्षण्या रशना शिरसि संबद्धा रज्जुः, याऽप्यन्या पुच्छलग्नाऽस्याश्वस्य रज्जुः, यद्वा यदपि आ(अस्याऽऽ)स्ये मुखे

÷ सर्वपुस्तकेषु उपेत्यधिकम् ।

१ क. याऽयमस्मिं । २ घ. ङ. °ङ्कुल्या ।

(अवशिष्टाश्वस्तोत्रमन्त्राभिधानम्)

भृतं क्षिप्तं तृणं, सर्वं ता तत्सर्वमपि देवेष्वपि प्राप्तस्य ते तव यजमानस्यास्तु विद्य-
म्। यथेह लोके सर्वसाधनसंपूर्णोऽश्वस्तवास्ति तद्वत्परलोकेऽप्यस्विति यथः। अथ नवमीमृचमाह—

यदश्वस्येति। अस्याश्वस्य कविषः कव्यं यन्मांसं मक्षिकाऽऽदा मक्षिक्षि-
क्षितवती, यद्वा यच्च रक्तं स्वरावयवनार्थं शकले स्वधितौ छेदनहेतौ शस्त्रे च
समीचलिप्तमस्ति, यदपि शमितुर्हस्तयोर्लिप्तं, यच्च तदीयेषु नखेषु लिप्तं,
श्वस्य ते त्वदीयं सर्वं ता तत्सर्वं देवेष्वप्यस्तु देवेष्वेव हुतं भवतु। यथा पूर्व-
स्मिन् नियोजनकाले नाना गलशिरःपादादिबन्धनरज्जवो देवेषु समर्पिता एवमव
शिष्टोऽपि देवेषु समर्प्यते। अथ दशमीमृचमाह—

यद्वध्यमिति। उदरस्य मध्ये यद्वध्यमर्धजीर्णपक्वं शकृदादि दुर्गन्धयुक्त-
ं वायुना सहाऽऽगच्छति, य आमस्यापक्वस्य कविषो मांसस्य गन्धो दुःख-
ऽस्ति तत्सर्वं सुकृता सुकृतं यथा भवति तथा शमितारः कृण्वन्तु। उतापि च
यं यज्ञियोऽयं शृतपाकमपाकविपाकौ परित्यज्य सम्यक्पक्वं यथा भवति तथा
वन्तु। अथैकादशीमृचमाह—

यत्ते गात्रादिति। हेऽश्वाग्निना पच्यमानात्ते तव गात्राच्छरीरावयवसका-
ाद्यदल्पमवधावति अशृतं सद्भूमौ पतति, निहतस्य नितरां हन्यमानस्य तवाग्नि
ं शूले सक्तं यद्यदङ्गमवधावति तदङ्गं भूम्यामपि मा श्रिषच्छ्लिष्टं लग्नं मा
तृणेष्वपि लग्नं मा भूत्, किंतूशद्भ्यः कामयमानेभ्यो देवेभ्यो रातं दत्तमस्तु॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे षष्ठप्रपाठकेऽ-
ष्टमोऽनुवाकः॥ ८॥

(अथ चतुर्थाष्टके षष्ठप्रपाठके नवमोऽनुवाकः)।

ये वाजिनं परिपश्यन्ति पक्वं य ईमाहुः
सुरभिर्निर्हरेति। ये चार्वतो मांसभिक्षामुपा-
सत उतो तेषामभिगूर्तिर्न इन्वतु। यचीक्षणं
मांसपचन्या उखाया या पात्राणि यूष्ण

आसेचनानि । ऊष्मण्याऽपिधाना चरूणाम-
ङ्काः सूनाः परि भूषन्त्यश्वम् । निक्रमणं
निषदनं विवर्तनं यच्च पड्बीशमर्वतः । यच्च
पपौ यच्च घासिम् (१) जघास सर्वा ता ते
अपि देवेष्वस्तु । मा त्वाऽभिध्वनयिद्धुमग्धि-
र्मोखा भ्राजन्त्यभि विक्त जघ्रिः । इष्टं वीतम-
भिगूर्तं वषट्कृतं तं देवासः प्रति गृभ्ण-
न्त्यश्वम् । यदश्वाय वासं उपस्तृणन्त्यधीवासं
या हिरण्यान्यस्मै । संदानमर्वन्तं पड्बीशं प्रिया
देवेष्वा यामयन्ति । यत्ते सादे महसा शूक-
तस्य पार्ष्ण्या वा कशया (२) वा तुतोद ।
स्रुचेव ता हविषो अध्वरेषु सर्वा ता ते ब्रह्मणा
सूदयामि । चतुस्त्रिंशद्वाजिनो देवबन्धोर्व-
ङ्क्रीरश्वस्य स्वधितिः समेति । अच्छिद्रा
गात्रा वयुना कृणोत परुष्परुरनुघुष्या वि शस्त ।
एकस्त्वष्टुरश्वस्या विशस्ता द्वा यन्तारा भवत-
स्तथर्तुः । या ते गात्राणामृतुथा कृणोमि ताता
पिण्डानां प्र जुहोम्यग्नौ । मा त्वा तपत् (३)
प्रिय आत्माऽपियन्तं मा स्वधितिस्तनुव आ
तिष्ठिपत्ते । मा ते गृध्नुरविशस्ताऽतिहायं
छिद्रा गात्राण्यसिना मिथू कः । न वा उ एत-
न्म्रियसे न रिष्यसि देवाँ इदेषि पथिभिः
सुगेभिः । हरी ते युञ्जा पृषती अभूतामुपास्था-

(अवशिष्टाश्वस्तोत्रमन्त्राभिधानम्)

वाजी धुरि रासभस्य । सुगव्यं नो वाजी
स्वाश्व्यं पुꣳसः पुत्राꣳ उत विश्वापूषꣳ रयिम् ।
अनागास्त्वं नो अदितिः कृणोतु क्षत्रं नो
अश्वो वनताꣳ हविष्मान् (४) ।

(घासिं कर्शया तपद्रयिं नव च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
षष्ठप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

अश्मन्य इमोदेनमाशुः शिशानः प्राचीं जीमूतस्य यदर्कन्दो मा नो मित्रो वरुणो ये वाजिनं नव ॥ ९ ॥

अश्मन्नूर्जं प्राचीमनु शर्म यच्छतु तेषामभिगूर्तिः षट्चत्वारिꣳशत् ॥४६॥

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
षष्ठः प्रपाठकः ॥ ६ ॥

(अथ चतुर्थकाण्डे षष्ठप्रपाठके नवमोऽनुवाकः) ।

अष्टमेऽनुवाके पूर्वानुवाकवदश्वस्तोमभिधाः केचिन्मन्त्रा उक्ताः । अथ नवमेऽवशिष्टा अश्वस्तोत्रमन्त्रा उच्यन्ते । तत्र प्रथमामृचमाह—

ये वाजिनमिति । ये पुरुषा वाजिनमेतमश्वं पक्वं पाकं प्राप्तं परिपश्यन्ति परित आगत्याऽऽदरेण पश्यन्ति, य ईं येऽप्यन्ये सुरभिः सुगन्धोऽयमश्वोऽस्माभिर्हरिष्यत्यल्पमाहरेत्याहुः, ततो अपि च ये चान्येऽपीतोऽश्वस्य संबन्धिनीं मांसभिक्षामुपासते प्रार्थयन्ते, तेषां सर्वेषामभिगूर्तिः संकल्पो न इन्वतु प्राप्नोत्वस्माकं श्रेयसे भवत्वित्यर्थः । अथ द्वितीयामृचमाह—

यच्चीक्षणामिति । मांसं पच्यते यस्यामुखायां सा मांसपचनी, तस्या उखाया नीक्षणं नितरामीक्षणमादरेण दर्शनं यदस्ति, यानि च पात्राणि यूष्णो रसस्याऽऽसेचनानि सर्वतः सेचनाधारभूतानि, चरूणां मांसादीनामपिधानाऽऽच्छादनपात्राणि ऊष्ण्योष्मरक्षणार्थानि यानि सन्ति, अङ्का मांसलक्षणेना-

---

१ क. घ. ङ. च. °कल्पः क्लृप्तं प्रा° । २ ख. च. °चकाधा° । ३ क. च. मांस-स्थालीनां । ४ ख. घ. ङ. च. °लेनाङ्केना° ।

छिन्नाः सूनाः स्वधितिवेतसशाखाद्या याः सन्ति, तानि सर्वाण्यश्वं परिभूषन्ति अश्वस्य यत्कार्यं तदेव कुर्वन्तीत्यर्थः । अथ तृतीयामृचमाह—

निष्क्रमणमिति । निष्क्रमणमश्वस्य पादप्रक्षेपस्थानं निषदनं निवासस्थानं विवर्तनं परिवर्तनस्थानं च यदस्ति, यदप्यवतोऽश्वस्य पड्बीशं पादबन्धनस्थानं पादक्षुण्णरजो वाऽस्ति, यदप्युदकं पपौ यच्च घासिं तृणादिकं जघास भक्षितवान्, ते त्वदीयं सर्वा ता तत्सर्वं देवेष्वप्यस्तु देवेष्वेव समर्पितं भवतु ।

अथ चतुर्थीमृचमाह—

मा त्वाऽग्निरिति । हेऽश्व त्वां धूमगन्धिं धूमगन्धापादकोऽग्निर्मा श्वपयित्पाकशब्देपेतं मा करोतु । काष्ठाविशेषयुक्तेन केनचिदग्निना पक्वमोदनादिकं धूमगन्धोपेतं भवति । तथा दुष्पाकेन(ण) कुशब्दं यथा भवति तथा पच्यते । तदुभयमत्र मा भूदित्यर्थः । किंच भ्राजन्त्युखा सम्यक्तप्ता स्थाली माऽभिविक्तातिपाकेनाभितो विक्तं विदग्धं मा करोतु । त्वं तु जाघ्रिराघ्राणयोग्यः सुगन्धो भ(न्धिर्भ)वेति शेषः । इष्टमत्यन्तेच्छाविषयं वीतं कान्तं रमणीयपाकमभिगूर्तं देवयोग्यमास्त्विति यजमानैः संकल्पितं वषट्कृतं वषट्कारेण प्रदत्तमग्नं देवाः प्रतिगृभ्णन्ति देवाः स्वी कुर्वन्तु । अथ पञ्चमीमृचमाह—

यदश्वायेति । हन्यमानस्याश्वस्याधस्ताद्वस्त्रमुपरिष्टाच्च किंचिद्वस्त्रं प्रसारयन्ति, तदुभयमत्र वासःशब्देनाधीवासशब्देन चोच्यते । यद्वासोऽश्वार्थमुपस्तृणन्त्यधः प्रसारयन्ति यच्चाधि(धी)वासमुपर्याच्छादयन्ति, यानि चान्यानि हिरण्यमण्यादीन्यस्मा अश्वार्थं संपादितानि, अवैन्तमवतोऽश्वस्य यत्संदानं बन्धनसाधनं दाम, यच्च पड्बीशं पादबन्धनस्थानगता रज्जुस्तानि सर्वाणि देवेषु प्रिया प्रियाणि भूत्वाऽऽयामयन्ति सर्वतः प्रसारयन्तु । अथ षष्ठीमृचमाह—

यत्ते सादे इति । हेऽश्व तव सादे गमने [महतोत्सर्पेण] शूकृतस्य शूकारो ध्वन्यनुकरणं मौढस्याश्वस्य शीघ्रागमने शूकारो जायते, तेन शूकारेण युक्तस्य शीघ्रागमनायोपर्यारूढः पार्ष्णिया स्वकीयेन पादपृष्ठभागेन हस्तधृतया कशया वा तु(यत्तु)तोद व्यथां चकार, ते त्वदीयं सर्वा ता तत्सर्वं मन्त्रेण सूदयामि जुहोमि । तत्र दृष्टान्तः—अध्वरेषु यागेषु हविःसंबन्धीनि तानि सर्वाण्याज्यादिविशेषरूपाणि स्रुचेव यथा स्रुचाऽऽज्यं जुह्वति तद्वत् । सप्तमीमाह—

१ ख. च °ण्मयादीं ।

(अवशिष्टाश्वस्तोत्रमन्त्राभिधानम्)

चतुस्त्रिं*शादिति । वाजिनोऽश्वसाधनस्य देवबन्धोर्देवविषयस्य देवार्थं वक्ष्यमानस्याश्वस्य संबन्धिनीर्वङ्क्रीर्वङ्क्षाणि पार्श्वद्वयगतान्यस्थीन्येकैकस्मिन्पार्श्वे तदद्शेत्येवं चतुस्त्रिंशत्संख्याकाः, अन्यस्य तु पशोः षड्विंशतिरेव । अतः सावधाना स्वधितिरयं समेति संगच्छताम् । यथाऽस्थिसेशोऽपि हवींषि न मिनाति तथा वियुनक्त्वी(क्ति)त्यर्थः । हे शमितारो गात्रा हृदयाद्यङ्गानि अच्छिद्रा वयुना छिद्ररहितानि यथा भवन्ति तथा कृणोत कुरुत । तत्र चायमुपायः—परुष्परनुघुष्य तत्पर्वानुक्रमेण तदीदृशमिति कथमपि ज्ञात्वा विशस्त विशसनं कुरुत । अथाष्टमी[मृच]माह—

एकस्त्वष्टुरिति । त्वष्टुर्दीप्तिमतोऽश्वस्यतूपलक्षितकालीन एको विशस्ता हिंसिता । तथा द्वा यन्तारा विशसनकाले यथेतस्ततो न चलति तथा नियामकौ द्वौ । अत एवान्यत्राऽऽम्नातम्—"अधिगुश्चापापश्च । उभौ देवानाः शमितारौ" इति । हेऽश्व ते तव गात्राणां यान्यङ्गानि ऋतुशतूपलक्षिते तत्तत्काले कृणोमि च्छिनद्मि, पिण्डानां मांसपिण्डानां मध्ये तानि तान्यङ्गानि प्रजुहोम्यग्नौ प्रकर्षेण जुहोमि । अथ नवमी[मृच]माह—

मा स्वेति । हेऽश्वापियन्तं शरीरं विसृज्य देवान्गच्छन्तं त्वां प्रिय आत्मा प्रीतिहेतुर्विग्रहो मा तपत्संतापं मा कार्षीत् । तथा स्वधितिस्ते तनुवो गात्राणि माऽऽतिष्ठिपन्मैव स्थापयतु, किमप्यङ्गमनवशेष्य सर्वं छिनात्वित्यर्थः । अविशस्ता विशसनकौशलरहितः केवलं मांसतृष्णायुक्तोऽतिहाय विशसनकौशलरहितप्रकारमतिलङ्घ्य ते गात्राणि तवाङ्गान्यसिना शस्त्रेण मिथु च्छिद्राणि मा कर्मा करोतु । अथ दशमी[मृचं]माह—

न वा उवेतादिति । शास्त्रानभिज्ञानां लौकिकानां दृष्ट्या त्वमेतत्प्रत्यक्षमेव म्रियसे शमितृभिर्हिंस्यसे च । शास्त्रदृष्ट्या तु त्वं न वा उवेतन्म्रियस एतन्मरणमेव न भवति, न च रिष्यसि नापि शमितृभिर्हिंस्यसे, किंतु सुगोभिः पथिभिः सुगममार्गैर्देवानिदेषि देवानेव प्राप्नोषि । तत्र देवेषु मध्य इन्द्रत्वं प्राप्तस्य ते हरी हरिनामकावश्वौ रथे युक्तावभूतां सर्वथा भविष्यतः । * एवं

* एवमित्यधिकम् ।

१ ख. च. हविषि । २ क. °मि तत्तच्छि° । ख. °मि उच्छि । घ, ङ, च. °मि तच्छि° ।

(अवशिष्टाश्वस्तोत्रमन्त्राभिधानम्)

तथा मरुद्रूपं प्राप्तस्य ते पृषती चित्रवर्णौ अश्वस्त्रियौ युङ्नावभूतां रथे युक्तौ भविष्यतः । इदानीं रात्रभस्य धुरि वर्तमानस्य गर्दभवद्भारवाहिनस्तव वाज्यनुपास्थास्यां वोढुं कश्चित्पौढोऽश्वः प्राप्तो भविष्यति । अथैकादशी[मृच]माह—

सुगव्यमिति । अयं वाजी नोऽस्माकं सुगव्यं कल्याणगोसमूहं स्वश्वियं कल्याणाश्वसमूहं पुंसः पुत्रान्पुंस्त्वलक्षणसंपन्नान्पुत्रान्, उतापि च विश्वायुषं विश्वं पोषायितुं रयिं धनं कृणोतु करोतु । अदितिरियं भूमिर्नोऽस्माकमनागास्त्वमपराधराहित्यं करोतु । हविष्मान्हविःस्वरूपेण निष्पन्नोऽयमश्वो नोऽस्माकं अन्नं बलं वनतां संपादयतु । तदेवमेतेषु त्रिष्वनुवाकेषु अश्वस्तोत्रप्रतिपादकत्वेनाश्वस्तोमीया मन्त्राः पञ्चविंशदाम्नाताः । अवशिष्टा तु पञ्चमकाण्डे समाम्नास्यते । तथा च सूत्रकार आह—" क्रमैरत्यक्रमीदित्येतां षट्त्रिंशीम् " इति ।

अत्र विनियोगसंग्रहः—

पञ्चविंशद्यदर्कस्तोनुवाकेषु त्रिषु श्रुताः ।
अश्वस्तोमीयहोमास्तैरिति षष्ठः समीरितः ॥

अत्र मीमांसा ।

नवमाध्यायस्य चतुर्थपादे द्वितीयाधिकरणे चिन्तितम्—

न चतुस्त्रिंशदित्येष निषेधो नियतो न वा ।
गिरापदवदाद्यः स्यान्नैवकारहतत्वतः ॥
निषेधः प्राप्तिपूर्वोऽतः प्रापकोऽत्रानुमीयते ।
निषेधप्रापकाभ्यां च चतुस्त्रिंशद्विकल्प्यते ॥

अश्वमेधे त्रयः सवनीयाः पशवः श्रुताः—" अश्वस्तूपरो गोमृगस्ते प्राजापत्याः " इति । तेष्वश्वस्य चतुस्त्रिंशद्वङ्क्रयः । तथा च मन्त्रः पठ्यते—" चतुस्त्रिंशद्वाजिनो देवबन्धोर्वङ्क्रीरश्वस्य स्वधितिः समेति " इति । वाजी गन्धर्ववाहको जातिविशेषः । अत एवान्यत्राऽऽम्नायते—" हयो देवानवहदर्वाऽसुरान्वाजी गन्धर्वानश्वो मनुष्यान् " इति । देवबन्धुर्देवानां प्रियः । स्वधितिश्छेदनहेतुः शस्त्रमित्यर्थः । एवं सति अधिगुपैषे विशेषोऽयमाम्नायते—" न चतुस्त्रिंशदिति ब्रूयात् । षट्त्रिंशतिरित्येव ब्रूयात् " इति । सोऽयं चतुस्त्रिंशद्वा-

---

१ ख. °ऽऽऽभूं° । २ ख. च. °कन्वानु° । ३ ख. च. °यमन्त्रास्तै° । ४ क. घ. ङ. °कल्पते । ५ क. °प्रैषशे° । ६ क. घ. ङ. नायं ।

(अवशिष्टाश्वस्तोत्रमन्त्राभिधानम्)

जिन इत्यादिकाया ऋचः प्रतिषेधो गिरापदनिषेधवच्चित्यो न तु विकल्पितः। यथा "न गिरा गिरेति ब्रूयादैरं क्रत्वेन्द्रियम्" इत्यत्र गिरापदनिषेधपुरःसरमिरापदे विहिते सति निषिद्धस्य नित्यनिवृत्तिः। तथा चतुस्त्रिंशन्मन्त्रनिषेधपुरःसरं षड्विंशतिमन्त्रे विहिते सति नित्यनिवृत्तिर्निषिद्धस्येति चेन्नैवम्। षड्विंशतिरित्येव ब्रूयादित्येवकारेण विधित्वप्रत्ययबाधात्। षड्विंशतिमन्त्रस्तावच्चोदकप्राप्तत्वान्न विधेयः। तस्य चतुस्त्रिंशन्मन्त्रेणाऽनुवादपरत्वे न चतुस्त्रिंशदित्यनेनाऽनुवादकं मन्त्रं प्रतिषिध्य चोदकप्राप्तस्यानूद्यतत्वेन यथापूर्वमवस्थानमनूद्यत इत्येवमर्थं सूचयितुमेवकारः प्रयुक्तः। गिरापददृष्टान्तस्तु विषमः। अप्राप्तत्वाद्गिरापदं तत्र विधीयते। तेन च विहितेन पाठप्राप्ते गिरापदे बाधिते स बाधो न गिरागिरेति निषेधेनानूद्यते। ततो दृष्टान्ते निषेधानुवादो दार्ष्टान्तिके विध्यनुवाद इति महद्वैषम्यम्। ननु विधिवाक्यस्यैवकारयुक्तस्यानुवादत्वे सति न चतुस्त्रिंशदित्यस्मिन्निषेधे क्रत्वन्तवाक्यतात्पर्याभिषिद्धस्य नित्यनिवृत्तिस्तदवस्था स्यात्। मैवम्। प्रापकस्यापि सद्भावेन निषेधप्राप्तिभ्यां चतुस्त्रिंशन्मन्त्रस्य विकल्पितत्वात्। अथोच्यते—चतुस्त्रिंशद्वाजिन इत्यसौ मन्त्रः केवलं स्वरूपेण पठितः, न त्वस्याधिगुपैषवत्प्रापकं किंचिदस्तीति। तन्न। प्रापकवचनस्य कल्पनीयत्वादन्यथा प्रतिकृत्यभावेन प्रतिषेधानुपपत्तेः। तस्मात्प्रकृतेनोपजीव्येनानुमितविधिना प्रत्यक्षनिषेधेन च समानबलतया चतुस्त्रिंशदित्यसौ मन्त्रोऽस्याधिगुपैषे विकल्प्यते॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे षष्ठप्रपाठके
नवमोऽनुवाकः॥ ९॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुंमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥

इति श्रीमद्विद्यातीर्थमहेश्वरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य
श्रीवीरबुक्कमहाराजस्याऽऽज्ञापरिपालकेन माधवाचार्येण विर-
चिते वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये
चतुर्थकाण्डे षष्ठः प्रपाठकः॥ ६॥

---

१ क. घ. ङ. °ञ्जनीयनो°।

(अथ चतुर्थाष्टके सप्तमः प्रपाठकः) ।

(तत्र प्रथमोऽनुवाकः) ।

हरिः ॐ ।

अग्नाविष्णू सजोषसेमा वर्धन्तु वां गिरः । युम्नैर्वाजेभिरा गतम् । वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे श्रावश्च मे श्रुतिश्च मे ज्योतिश्च मे सुवश्च मे प्राणश्च मेऽपानः (१) च मे व्यानश्च मेऽसुश्च मे चित्तं च म आधीतं च मे वाक्च मे मनश्च मे चक्षुश्च मे श्रोत्रं च मे दक्षश्च मे बलं च म ओजश्च मे सहश्च म आयुश्च मे जरा च म आत्मा च मे तनूश्च मे शर्म च मे वर्म च मेऽङ्गानि च मेऽस्थानि च मे परूंषि च मे शरीराणि च मे (२) ।

(अपानस्तनूश्च मेऽष्टादश च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके सप्तमप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

(अथ चतुर्थकाण्डे सप्तमः प्रपाठकः) ।

(तत्र प्रथमोऽनुवाकः) ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
परिषेचनमुख्यास्तु संस्काराः षड ईरिताः ।
वसोर्धारादयः शिष्टाः प्रोच्यन्तेऽस्मिंस्तु सप्तमे ॥

(वसोर्धारायंभिधानम्)

कल्पः—" अग्नाविष्णू सजोषसेति चतुर्गृहीतं हुत्वौदुम्बरीं स्रुचं *श्यामा-मात्रीं मृदा प्रदिग्धां पश्चादाञ्जनवतीं घृतस्य पूरयित्वा वाजश्च मे प्रसवश्च इति संततां वसोर्धारां जुहोत्या मन्त्रसमापनात् " इति ।

अत्र त्रयोदशभिरनुवाकैर्मन्त्रः समाप्यते । चतुर्गृहीतहोमसम्बन्धपाठस्तु—

अग्नाविष्णू इति । हेऽग्नाविष्णू युवां सजोषसा समानप्रीती भवेतम् । वां युवयोरिमा गिरः स्तुतिरूपा वाचो वर्धन्तु वृद्धिं प्राप्नुवन्तु । युवामपि सुष्टुतैर्धेनवोऽजिभिरन्नैश्च युक्तावागतमिहाऽऽगच्छतम् ।

अथैकादशानुवाकात्मको मन्त्र उच्यते । अनुवाकभेदस्तत्तद्यज्ञसंयुक्ते कर्मणि पृथङ्मन्त्रत्वेनानुष्ठेयत्वादुपपद्यते । तत्र प्रथमानुवाकपाठस्तु—

वाजश्च म इति । वाजोऽन्नम् । चशब्दो वक्ष्यमाणद्रव्यापेक्षया समुच्चयार्थः । मे मम कल्पतामिति पदं दशमानुवाके वक्ष्यमाणं सर्वत्रानुषज्यते । संपद्यतामित्यर्थः । प्रसवोऽन्नस्यानुज्ञानम् । प्रयतिः शुद्धिः । प्रसितिर्बन्धनपत्राविषयकौत्सुक्यम् । धीतिरन्नधारणम् । क्रतुरन्नहेतुर्यज्ञः । स्वरो मन्त्रगत उदात्तादिः । श्लोकः स्तुतिः । श्रावः श्राययितृत्वसामर्थ्यम् । श्रुतिः श्रवणसामर्थ्यम् । ज्योतिः प्रकाशः । सुवः स्वर्गः । प्राणापानव्यानाः वायुवृत्तिविशेषाः । असुस्तद्वृत्तिमान्वायुः । चित्तं मनोजन्यं ज्ञानम् । आधीतं तेन ज्ञानेन सर्वदा विषयीकृतं द्रव्यम् । वागादयश्चत्वारः प्रसिद्धाः । दक्षो ज्ञानेन्द्रियगतं कौशलम् । बलं कर्मेन्द्रियगतं सामर्थ्यम् । ओजो बलहेतुरष्टमो धातुः । सहो वैरिविषयमभिभवितृत्वम् । आयुः प्रसिद्धम् । जराऽऽयुषो वलीपलितादिपर्यन्तत्वम् । आत्मा शास्त्रप्रसिद्धः परमात्मा । तनूः शोभनसंनिवेशं वपुः । शर्म सुखम् । वर्म शरीररक्षकं कवचादि । अङ्गानि संपूर्णावयवाः । अस्थानि यथास्थानं स्थितान्यस्थीनि । परूंषि अङ्गुल्यादिपर्वाणि । शरीराणि पूर्वमनुक्ताः शरीरावयवाः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे सप्तमप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

---

* श्यामामात्रीमिति भवितव्यम् ।

---

१ ब. °मात्रां मृ° । २ ब. च. भवतम् ।

(अथ चतुर्थाष्टके सप्तमप्रपाठके द्वितीयोऽनुवाकः)।

ज्यैष्ठ्यं च म आधिपत्यं च मे मन्युश्च मे भामश्च मेऽमश्च मेऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्ष्मा च मे द्राघुया च मे वृद्धं च मे वृद्धिश्च मे सत्यं च मे श्रद्धा च मे जगच्च (१) मे धनं च मे वशश्च मे त्विषिश्च मे क्रीडा च मे मोदश्च मे जातं च मे जनिष्यमाणं च मे सूक्तं च मे सुकृतं च मे वित्तं च मे वेद्यं च मे भूतं च मे भविष्यच्च मे सुगं च मे सुपथं च म ऋद्धं च म ऋद्धिश्च मे क्लृप्तं च मे क्लृप्तिश्च मतिश्च मे सुमतिश्च मे (२) ॥

(जगच्चाद्धिश्चतुर्दश च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके सप्तमप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

(अथ चतुर्थकाण्डे सप्तमप्रपाठके द्वितीयोऽनुवाकः)।

अथ द्वितीयमाह—

ज्यैष्ठ्यं च म इति । ज्यैष्ठ्यं प्रशस्यतमत्वम् । आधिपत्यं स्वामित्वम् । मन्युभामशब्दौ क्रोधावान्तरविशेषवाचिनौ । एको मानसोऽपरोऽक्षणादिलिङ्गजन्यो बाह्यः । अमोऽप्रमेयत्वं विरोधिभिरियत्तया परिच्छेत्तुमशक्यत्वम् । अम्भः क्षौत्यमाधुर्योपेतमुदकम् । जेमा जयसामर्थ्यम् । महिमा महत्त्वं जयसंपादितधनादिसंपत्तिः । वरिमा वरणीयत्वं पूज्यत्वम् । प्रथिमा गृहक्षेत्रादिविस्तारः । वर्ष्मा पुत्रपौत्रादिशरीराणि । द्राघुया पुत्रपौत्रादिविषयं दीर्घत्वमविच्छिन्नं संवातिरित्यर्थः । वृद्धं प्रभूतमन्नं धनं च । वृद्धिर्विद्यादिगुणोत्कर्षः । सत्यं

(वसोर्धारायभिधानम्)

यथार्थभाषणम् । श्रद्धा परलोकोऽस्तीति बुद्धिः । अगज्जङ्गमौजङ्गमात्मकम् । धनं सुवर्णादि । वशः सर्वस्वाधीनत्वम् । त्विषिः शरीरकान्तिः । क्रीडाऽक्षद्यूतादिः । मोदस्तज्जन्यो हर्षः । जातं पूर्वसिद्धापत्यम् । जनिष्यमाणं भविष्यदपत्यम् । सुकृतसुकृतमूहः । सुकृतं तज्जन्यमपूर्वम् । वित्तं पूर्वलब्धम् । वेद्यमितः परं लब्धव्यं द्रव्यजातम् । भूतं पूर्वसिद्धं क्षेत्रादि । भविष्यत्सांपत्स्यमानम् । सुगं सुष्ठु गन्तव्यं बन्धुजनयुक्तमामान्तरादि । सुपथं चोरादिरहितो मार्गः । ऋद्धं वार्धितं धनादिकमनुष्ठितकर्मफलं वा । ऋद्धिरनुष्ठास्यमानसत्फलम् । कल्पं समर्थं स्वकार्यक्षमद्रव्यम् । कृप्तिः स्वकीयसामर्थ्यम् । मतिः पदार्थमात्रनिश्चयः । सुमतिर्दुर्धरराजकार्यादिनिश्चयः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे सप्तमप्रपाठके
द्वितीयोऽनुवाकः ॥ २ ॥

(अथ चतुर्थाष्टके सप्तमप्रपाठके तृतीयोऽनुवाकः) ।

शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च (१) मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे (२) ॥

---

१ क. °मात्म°।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके सप्तमप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

(अथ चतुर्थकाण्डे सप्तमप्रपाठके तृतीयोऽनुवाकः)।

तृतीयमाह—

शं च म इति। शंशब्द ऐहिकसुखवाची। मयःशब्द आमुष्मिकसुखवाची। प्रियं प्रीतिकारणं वस्तु। अनुकामोऽनुकूलत्वनिमित्तेन काम्यमानः पदार्थः। एतदुभयमैहिकमेव तारतम्योपेतम्। काम आमुष्मिकः स्वर्गादिः। सौमनसो मनःस्वास्थ्यकरो बन्धुवर्गः। भद्रं कल्याणमिह लोके रमणीयम्। श्रेयः परलोकहितम्। वस्यो निवासहेतुर्गृहादिः। यशः कीर्तिः। भगः सौभाग्यम्। द्रविणं धनम्। यन्ता नियामक आचार्यादिः। धर्ता पोषकः पित्रादिः। क्षेमो विद्यमानधनस्य रक्षणशक्तिः। धृतिर्धैर्यमापद्यपि निश्चलत्वम्। विश्वं सर्वजनानुकूल्यम्। महः पूजा। संविद्वेदशास्त्रादिविज्ञानम्। ज्ञात्रं ज्ञापयितृत्वसामर्थ्यम्। सूः पुत्रादिप्रेरणसामर्थ्यम्। प्रसूर्भृत्यादिप्रेरणसामर्थ्यम्। सीरं[1] लाङ्गलादिकृषिसाधनसंपत्तिः। लयस्तत्प्रतिबन्धानिवृत्तिः। ऋतं यज्ञादिकर्म। अमृतं तत्फलम्। अयक्ष्मं राजयक्ष्मादिप्रबलव्याधिराहित्यम्। अनामयच्ज्वराद्यल्पव्याधिराहित्यम्। जीवातुर्जीवनकारणं व्याधिपरिहारार्थमौषधम्। दीर्घायुत्वमपमृत्युराहित्यम्। अनमित्रं वैरिराहित्यम्। अभयं भयराहित्यम्। सुगं शोभनगमनं सर्वैरकण्टकताचरणमित्यर्थः। शयनं शय्योपधानादिसंपत्तिः। सुषा स्नानसंध्यावन्दनादिकः शोभनः प्रातःकालः। सुदिनं यज्ञदानाध्ययनादियुक्तं सत्कं दिनम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे सप्तमप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

---

१ क; ब. ङ. °रं गोक° ।

(वसोर्धारानामाभिधानम्)

(अथ चतुर्थाष्टके सप्तमप्रपाठके चतुर्थोऽनुवाकः)।

ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे घृतं च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं च म औद्भिद्यं च मे रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च मे विभु च (१) मे प्रभु च मे बहु च मे भूयश्च मे पूर्णं च मे पूर्णतरं च मेऽक्षितिश्च मे कूयवाश्च मेऽन्नं च मेऽक्षुच्च मे व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे गोधूमाश्च मे मसुराश्च मे प्रियंगवश्च मेऽणवश्च मे श्यामाकाश्च मे नीवाराश्च मे (२) ॥

(विभु च मसुराश्चतुर्दश च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके सप्तमप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ चतुर्थकाण्डे सप्तमप्रपाठके चतुर्थोऽनुवाकः)।

चतुर्थमाह—

ऊर्क्च म इति । ऊर्गन्नसामान्यम् । सूनृता प्रियोक्तिः । पयःप्रभृतयोऽन्नविशेषाः। पयः क्षीरम् । रसस्तत्रत्यं सारम् । घृतमधुनी प्रसिद्धे । सग्धिर्बन्धुभिः सह भोजनमित्यर्थः । तथा सपीतिः सहपानम् । कृषिवृष्टी अन्नस्य हेतुत्वेन प्रसिद्धे । जैत्रं जयशीलं तुक्षेत्रमित्यर्थः । औद्भिद्यमुद्भिदां तरुगुल्मादीनामुत्पत्तिः । रयिः सुवर्णम् । रायो मणिमुक्तादिः । पुष्टं पूर्वोक्तमेव सुवर्णमितिसमुच्चयम् । पुष्टिः शरीरपोषः । विभ्वादयोऽक्षित्यन्ता धान्यविषया उत्तरोत्तराभिवृद्धयः सप्तापि तारतम्येन द्रष्टव्याः । न केवलं पवृद्धान्येव धान्यानि किंत्वल्पान्यपीत्युच्यन्ते—कूयवाः कुत्सितयवाः । अन्नं प्रसिद्धम् । अक्षुदन्नसाध्यः

मुत्तरिहारः । व्रीहियवमाषतिलमुद्गाः प्रसिद्धाः । खल्वा मुद्गेभ्योऽपि स्थूलबीजाः । गोधूमाः प्रसिद्धाः । मसुरा मुद्गवत्सूपहेतवः । प्रियंगवः प्रसिद्धाः । अणवः सूक्ष्मशालयः । श्यामाकाः ग्राम्या धान्यविशेषाः । नीवारा आरण्याः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे सप्तमप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

(अथ चतुर्थाष्टके सप्तमप्रपाठके पञ्चमोऽनुवाकः) ।

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मेऽयश्च मे सीसं च मे त्रपुश्च मे श्यामं च मे लोहं च मेऽग्निश्च म आपश्च मे वीरुधश्च म ओषधयश्च मे कृष्टपच्यं च (१) मेऽकृष्टपच्यं च मे ग्राम्याश्च मे पशव आरण्याश्च यज्ञेन कल्पन्तां वित्तं च मे वित्तिश्च मे भूतं च मे भूतिश्च मे वसु च मे वसतिश्च मे कर्म च मे शक्तिश्च मेऽर्थश्च म एमश्च म इतिश्च मे गतिश्च मे (२) ॥

(कृष्टपच्यं चाष्टाचत्वारिंशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके सप्तमप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ चतुर्थकाण्डे सप्तमप्रपाठके पञ्चमोऽनुवाकः) ।

पञ्चममाह-

अश्मा च म इति । अश्मादयः प्रसिद्धाः । श्यामं कृष्णायसम् । लोहं कांस्यताम्रादि । अग्न्यादयः प्रसिद्धाः । ग्राम्यारण्यपशवो यज्ञेन निमित्तीभूतेन

---

१ ख. 'मित्तभू' ।

(वसोर्धाराद्यभिधानम्)

कल्पन्तां समर्था भवन्तु । वित्तं पूर्वजन्यम् । वित्तिर्भाविजन्यः । भूतमैश्वर्यादिकम् । पुत्रादिकम् । भूतिः स्वकीयमैश्वर्यादिकम् । वसु निवासतत्साधनं गवादिकम् । वसतिर्निवासाधारो गृहादि । कर्माग्निहोत्रादिकम् । शक्तिस्तदनुष्ठानसामर्थ्यम् । अर्थः प्रयोजनविशेषः । एम एतव्यं प्राप्तव्यं तुरम् । इषिरधनमिष्टप्राप्त्युपायः। गतिरिष्टप्राप्तिः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे सप्तमप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

(अथ चतुर्थाष्टके सप्तमप्रपाठके षष्ठोऽनुवाकः)।

अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे सविता च म इन्द्रश्च मे सरस्वती च म इन्द्रश्च मे पूषा च म इन्द्रश्च मे बृहस्पतिश्च म इन्द्रश्च मे मित्रश्च म इन्द्रश्च मे वरुणश्च म इन्द्रश्च मे त्वष्टा च (१) म इन्द्रश्च मे धाता च म इन्द्रश्च मे विष्णुश्च म इन्द्रश्च मेऽश्विनौ च म इन्द्रश्च मे मरुतश्च म इन्द्रश्च मे विश्वे च मे देवा इन्द्रश्च मे पृथिवी च म इन्द्रश्च मेऽन्तरिक्षं च म इन्द्रश्च मे द्यौश्च म इन्द्रश्च मे दिशश्च म इन्द्रश्च मे मूर्धा च म इन्द्रश्च मे प्रजापतिश्च म इन्द्रश्च मे (२)।

(त्वष्टा च द्यौश्च म एकविंशतिश्च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके सप्तमप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ चतुर्थकाण्डे सप्तमप्रपाठके षष्ठोऽनुवाकः) ।

षष्ठवाद-

आग्निश्च म इति । अग्न्यादयः प्रसिद्धा देवताः । तैः सर्वैः सह सप्तानामपि वेदत्वादिन्द्र एकैकया देवतया सह पठ्यते । दिक्शब्देन प्राच्याद्याश्चतस्र उच्यन्ते । मूर्धशब्देन चोर्ध्वा दिक् । ता च मुख्यत्वाभिप्रायेण पृथङ्निर्दिष्टा ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे सप्तमप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

(अथ चतुर्थाष्टके सप्तमप्रपाठके सप्तमोऽनुवाकः) ।

अꣳशुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च म उपाꣳशुश्च मेऽन्तर्यामश्च म ऐन्द्रवायवश्च मे मैत्रावरुणश्च म आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च म आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च म ऋतुग्रहाश्च (१) मेऽतिग्राह्याश्च म ऐन्द्राग्नश्च मे वैश्वदेवश्च मे मरुत्वतीयाश्च मे माहेन्द्रश्च म आदित्यश्च मे सावित्रश्च मे सारस्वतश्च मे पौष्णश्च मे पात्नीवतश्च मे हारियोजनश्च मे (२) ॥

(ऋतुग्रहाश्च चतुस्त्रिꣳशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके सप्तमप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

(वसोर्धारायभिधानम्)

(अथ चतुर्थकाण्डे सप्तमप्रपाठके सप्तमोऽनुवाकः)।

सप्तममाह—

अंशुश्च म इति। अंशादयः सोमग्रहविशेषाः सोमप्रकरणे प्रतिज्ञाः। तत्र रश्मिग्रहादर्शनाददाभ्यस्यैव ग्रहस्य गृह्यमाणत्वदर्शात् पृथक्करणं रश्मिशब्देन निर्दिश्यते। रश्मीनां तु तद्ग्रहणसाधनत्वात्। तथा च तद्ग्रहणमन्त्रः पठ्यते—"शुक्रं ते शुक्रेण गृह्णाम्यह्नो रूपेण सूर्यस्य रश्मिभिः" इति। अधिषवणशब्देन द्रोणकलशग्रहो विवक्षितः। तस्य च श्रेष्ठत्वादाधिपत्यम्। अत एव श्रूयते—"ज्येष्ठो वा एष ग्रहाणाम्" इति। प्रतिप्रस्थानशब्देन द्विदेवत्यग्रहसहभावी प्रतिनि[धि]र्ग्रहो विवक्षितः। ध्रुवाख्यस्यैव ग्रहस्यावनयनदशायां वैश्वानरशूकरपाठाच्छब्देस्थापन्नो वैश्वानरशब्देनोच्यते। आद्यो वैश्वदेवः प्रातःसवनगतः। उत्तरस्तृतीयसवनगतः। सारस्वतग्रहोऽभिषेचनीयाख्यविकृतौ द्रष्टव्यः। "सारस्वतं ग्रहं गृह्णाति" इति तत्राऽऽम्नानात्। एवं पौष्णोऽपि विकृतिगामी द्रष्टव्यः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे सप्तमप्रपाठके
सप्तमोऽनुवाकः॥ ७॥

(अथ चतुर्थाष्टके सप्तमप्रपाठकेऽष्टमोऽनुवाकः)।

इध्मश्च मे बर्हिश्च मे वेदिश्च मे धिष्णि-
याश्च मे स्रुचश्च मे चमसाश्च मे ग्रावाणश्च
मे स्वरवश्च म उपरवाश्च मेऽधिषवणे च मे
द्रोणकलशश्च मे वायव्यानि च मे पूतभृच्च
म आधवनीयश्च म आग्नीध्रं च मे हविर्धानं
च मे गृहाश्च मे सदश्च मे पुरोडाशाश्च मे
पचताश्च मेऽवभृथश्च मे स्वगाकारश्च मे (१)॥

(गृहाश्च षोडश च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थकाण्डके
सप्तमप्रपाठकेऽष्टमोऽनुवाकः॥ ८॥

---

१ ख. घ. च ज्येष्ठ°। २ ख. घ. ङ. च. °वसो।

(अथ चतुर्थकाण्डे सप्तमप्रपाठकेऽष्टमोऽनुवाकः)।

अष्टमेऽनुवाके—

इध्मश्च म इति। इध्मादीनि यज्ञाङ्गद्रव्याणि यज्ञप्रकरणे प्रतिपादितानि। बृहाः पत्नीशालादयः। पवनाः शामित्रादयः। स्वगाकारः शंयुवाकः। तेन हि यथास्वं देवतानां हविर्ग्रहणं क्रियते॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे सप्तमप्रपाठकेऽष्टमोऽनुवाकः॥ ८॥

(अथ चतुर्थाष्टके सप्तमप्रपाठके नवमोऽनुवाकः)।

अग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्यश्च मे प्राणश्च मेऽश्वमेधश्च मे पृथिवी च मेऽदितिश्च मे दितिश्च मे द्यौश्च मे शक्वरीरङ्गुलयो दिशश्च मे यज्ञेन कल्पन्तामृक्च मे साम च मे स्तोमश्च मे यजुश्च मे दीक्षा च मे तपश्च म ऋतुश्च मे व्रतं च मेऽहोरात्रयोर्वृष्ट्या बृहद्रथंतरे च मे यज्ञेन कल्पेताम् (१)।

(दीक्षाऽष्टादश च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके सप्तमप्रपाठके नवमोऽनुवाकः॥ ९॥

(अथ चतुर्थकाण्डे सप्तमप्रपाठके नवमोऽनुवाकः)।

नवमेऽनुवाके—

अग्निश्च म इति। अग्निधीयमानो वह्निः। घर्मः सवनीयः। इन्द्रायार्कवते पुरोडाशमिति विहितो यागोऽर्कः। सौर्यं चरुमिति विहितो यागः सूर्यः। प्राणाय स्वाहेति विहितो होमः प्राणः। अश्वमेधः प्रतिपत्सः। पृथिव्यादयो देवतानिरूपणाः। शक्वरीः शक्वर्यः। अङ्गुलयोऽङ्गुलिपाद्दिराद्यङ्गुलिपर्यायवचनविशेषाः।

(वसोर्धाराद्यभिधानम्)

दिशः प्राच्याद्याः । चशब्दाद्विदिशोऽपि । ताः सर्वा मे मदीयेन यज्ञेन कल्पन्तां स्वस्वव्यापारसमर्था भवन्तु । ऋगादयो मन्त्रविशेषाः । स्तोमः सामावृत्तिरूपं स्तोत्रम् । दीक्षा यजमानसंस्कारः । तपः पापक्षयार्थमनशनादि । ऋतुर्यज्ञाङ्गभूतः कालः । व्रतमेकस्तनादि । अहोरात्रयोः संबन्धिनी या वृष्टिस्तया मदीयं सस्यं कल्पतामिति शेषः । बृहद्रथंतरे सामनी, ते च मदीयेन यज्ञेन कल्पेतां स्वस्वव्यवहारसमर्थे भवेताम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे सप्तमप्रपाठके
नवमोऽनुवाकः ॥ ९ ॥

(अथ चतुर्थाष्टके सप्तमप्रपाठके दशमोऽनुवाकः)।

गर्भाश्च मे वत्साश्च मे ऽयविश्च मे ऽयवी च मे दित्यवाट् च मे दित्यौही च मे पञ्चाविश्च मे पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे तुर्यवाट् च मे तुर्यौही च मे षष्ठवाच्च मे षष्ठौही च म उक्षा च मे वशा च म ऋषभश्च (१) मे वेहच्च मेऽनड्वाञ्च मे धेनुश्च म आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पतामपानो यज्ञेन कल्पतां व्यानो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पतां श्रोत्रं यज्ञेन कल्पतां मनो यज्ञेन कल्पतां वाग्यज्ञेन कल्पतामात्मा यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम्(२) ॥

(ऋषभश्च चत्वारिंशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
सप्तमप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ चतुर्थकाण्डे सप्तमप्रपाठके दशमोऽनुवाकः) ।

दशममाह—

गर्भाश्च म इति । गर्भा वत्साश्च प्रसिद्धाः । सार्धसंवत्सरो वत्सतरूपः पुंगवरूपश्च विः । तथाविधा गौरूयवी । द्विसंवत्सर ऋषभो दित्यवाट् । तथाविधा गौर्दित्यौही । सार्धद्विसंवत्सर ऋषभः पञ्चाविः । तथाविधा गौः पञ्चावी । संवत्सरत्रयोपेत ऋषभस्त्रिवत्सः । तथाविधा गौस्त्रिवत्सा । सार्धत्रिवत्सर ऋषभस्तुर्यवाट् । तथाविधा गौस्तुर्यौही । चतुःसंवत्सर ऋषभः पष्ठवात् । तथाविधा गौः पष्ठौही । सेचनसमर्थ ऋषभ उक्षा । वन्ध्या गौर्वशा । उक्षणोऽप्यधिकवयस्क ऋषभः। गर्भधातिनी गौर्वेहत् । शकटस्य वाहकोऽनड्वान् । नवप्रसूता गौर्धेनुः । आयुरादयः प्रसिद्धाः । आत्मा शरीरम् । उक्ता आयुरादयो मदीयेन यज्ञेन कार्यक्षमा भवन्तु । यज्ञः करिष्यमाणोऽभमेधादिः । सोऽप्यनेनानुष्ठीयमानेन यज्ञेन स्वकार्यक्षमो भवतु ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे सप्तमप्रपाठके
दशमोऽनुवाकः ॥ १० ॥

(अथ चतुर्थाष्टके सप्तमप्रपाठक एकादशोऽनुवाकः) ।

एका च मे तिस्रश्च मे पञ्च च मे सप्त च मे नव च मे एकादश च मे त्रयोदश च मे पञ्चदश च मे सप्तदश च मे नवदश च म एकविꣳशतिश्च मे त्रयोविꣳशतिश्च मे पञ्चविꣳशतिश्च मे सप्तविꣳशतिश्च मे नवविꣳशतिश्च म एकत्रिꣳशच मे त्रयस्त्रिꣳशच मे चतस्रश्च मेऽष्टौ च मे द्वादश च मे षोडश च मे विꣳशतिश्च मे चतुर्विꣳशतिश्च मेऽष्टाविꣳशतिश्च मे द्वात्रिꣳशच मे षटत्रिꣳशच मे

१ स. च. °ज्ञः क्षिप्यमा ।

(वसोर्धारायभिधानम्)

चत्वारि॑शच्च मे चतु॑श्चत्वारि॑शच्च मेऽष्टा-
चत्वारि॑शच्च मे वाज॑श्च प्रस॒वश्चापि॑जश्च
क्रतु॑श्च सुव॑श्च मू॒र्धा च व्यश्नि॑यश्चाऽऽन्त्यायन-
श्चान्त्य॑श्च भौव॒नश्च॑ भुव॒नश्चाधि॑पतिश्च (२)॥

(चर्यस्नि॑शच्च व्यश्नि॑य एकादश च)।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
सप्तमप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

(अथ चतुर्थकाण्डे सप्तमप्रपाठक एकादशोऽनुवाकः)।

एकादशमाह—

एका च मे इति । एकादिशब्दाः संख्यापराः । वाजादयः सर्वे मम सन्त्विति शेषः । वाजोऽन्नम् । प्रसवस्तस्योत्पत्तिः। अपिजस्तस्यैव पुनः पुनरुत्पत्तिः । क्रतुः संकल्पो भोगादिविषयो यागो वा । सुवस्तस्योत्पत्तौ हेतुरादित्यः । अथवा वाजादयश्चैत्रादिमासानां नामविशेषाः । तदानीं ते सर्वे प्रीणन्त्विति वाक्यशेषः । चकाराः परस्परसमुच्चयार्था अनुक्तकालादिदेवतासमुच्चयार्था वा ।

यथोक्तैकादशानुवाकरूपमन्त्रसाध्यं होमं विधत्ते—

"वसोर्धारां जुहोति वसोर्मे धाराऽसादिति वा एषा हूयते घृतस्य वा एनमेषा धाराऽमुष्मिँल्लोके पिन्वमानोप तिष्ठते" [तै० का० ५ प्र० ४ अ० ८] इति । वसोर्धनस्य धारा सांतत्यं ययाऽऽहुत्या लभ्यते सेयमाहुतिर्वसोर्धारा तां जुहुयात् । तदेतदुक्तं निर्वचनं तूच्यते—यो यजमानो वसोर्धारां जुहोति स प्रथमं मम धनस्य नैरन्तर्यं भूयादित्येवं कामयते । ततस्तेनेयमाहुतिर्हूयते । तेन होमेनैनं यजमानं स्वर्गे लोके घृतस्य धारा पिन्वमाना प्रीणयन्ति सेवते । तत्र द्रव्यं विधत्ते—

"आज्येन जुहोति तेजो वा आज्यं तेजो वसोर्धारा तेजसैवास्मै तेजोऽव रुन्धे" [तै० का० ५ प्र० ४ अ० ८] इति ।

---

१ ख, च. °ते—वसोर्मे धाराऽसदित्यादिना । यो । २ ख. च. °रा प्री° ।

पुरुषादिधनसमृद्धेरपि घृतवत्तेजोरूपत्वं प्रतिपाद्यम् ।

कामयमानहेतुत्वेनापि तामाहुतिं प्रशंसति—

" अथो कामा वै वसोर्धारा कामानेवाव रुन्धे " [तै० का० ५ प्र० ४ अ० ८] इति । अन्वयव्यतिरेकाभ्यां तांतत्यं विधत्ते—

"यं कामयेत प्राणानस्यान्नाद्यं वि च्छिन्द्यामिति विग्राहं तस्य जुहुयात्प्राणानेवास्यान्नाद्यं वि च्छिनत्ति यं कामयेत प्राणानस्यान्नाद्यꣳ सं तनुयामिति संतां तस्य जुहुयात्प्राणानेवास्यान्नाद्यꣳ सं तनोति " [तै०का० ५ प्र० ४ अ० ८] इति । अस्य यजमानस्य प्राणानन्नं च विच्छिन्द्यामित्येवं द्विषन्तञ्चयुरेवं वन्धं मन्धे विगृह्य जुहुयात् । यस्तु प्राणानामन्नस्य च तांतत्यं कामयते सोऽयं संतत्यामाहुतिं जुहुयात् । अथ वाजश्च म इत्यादीन्यन्नं च मेऽक्षुच्च म इत्यतः प्राक्तनानि चतुश्चत्वारिंशदधिकशतसंख्याकानि वाक्यानि । तानि द्वादशसंघत्वेन विभज्य प्रशंसति—" द्वादश द्वादशानि जुहोति द्वादश मासाः संवत्सरः संवत्सरेणैवास्मा अन्नमव रुन्धे " [तै०का०५ प्र० ४ अ० ८] इति ।

द्वादशानां वाक्यानां समूहो द्वादशम् । तानि च द्वादशानि पुनर्द्वादशसंख्याकानि । तथा सति चतुश्चत्वारिंशदधिकशतसंख्या संपद्यते । तत्तन्मंत्रद्वादशसंख्यावा मासद्वारा संवत्सररूपत्वात्संवत्सरताभ्यमन्नं प्राप्नोति ।

अथ चतुर्थानुवाकगतानि वाक्यानि प्रशंसति—

" अन्नं च मेऽक्षुच्च म इत्याहैतद्वा अन्नस्य रूपꣳ रूपेणैवान्नमव रुन्धे " [तै० का० ५ प्र० ४ अ० ८] इति ।

अन्नमित्यादिभिर्वाक्यैर्यत्प्रतिपाद्यं तत्तर्वमन्नस्य रूपम् । क्षुदभावस्यान्नसाध्यत्वादुपरितनानां च व्रीह्यादीनामन्नसाधनत्वात् ।

अथ पञ्चमानुवाकगतवाक्यानि प्रशंसति—

" अग्निश्च म आपश्च म इत्याहैषा वा अन्नस्य योनिः सयोन्येवान्नमव रुन्धे " [तै० का० ५ प्र० ४ अ० ८] इति ।

अग्नेः पाकहेतुत्वादन्नयोनित्वम् । अपां चौषधिजनकत्वादन्नयोनित्वम् । एतन्मन्त्रपाठेनानेकप्रकारकारणसहितमन्नं प्राप्नोति ।

अथ षष्ठानुवाकगतानि वाक्यानि प्रशंसति—

" अर्धेन्द्राणि जुहोति देवता एवाव रुन्धे यत्तर्वेषामर्धमिन्द्रः प्रति तस्मादिन्द्रो देवतानां भूयिष्ठभाक्कम इन्द्रमुत्तरमाहेन्द्रियमेवास्मिन्नुपरिष्टाद्दधाति " [तै० का० ५ प्र० ४ अ० ८] इति ।

(वसोर्धारायभिधानम्)

येषां वाक्यानामर्धेऽिन्द्रः पठ्यते तान्यर्धेन्द्राणि, तेषु वाक्येष्वग्नीषोमादीनां देवतानां पूर्वार्धेष्वाम्नातत्वाद्देवताः प्राप्नोति । यस्मात्कारणात्तर्वेषां वाक्यानां परार्धमिन्द्रः पठ्यते तस्मात्कारणादयमिन्द्रो भूयिष्ठभाक्तमो भूयिष्ठं प्रभूतं हविर्भजतीति भूयिष्ठभाक्, अतिशयेन तादृशः । यस्मादेव इन्द्रमन्त्रोत्तरार्धगतं प्राह तस्मादस्मिन्यजमानेऽप्युपरिष्टाच्छिरोभागे चक्षुरादीन्द्रियं स्थापयति । तमेवार्थमयोरनुवाकयोरवस्थितानि वाक्यानि प्रशंसति—

"यज्ञायुधानि जुहोति यज्ञो वै यज्ञायुधानि यज्ञमेवाव रुन्धेऽथो एतद्वै यज्ञस्य रूपꣳ रूपेणैव यज्ञमव रुन्धे" [सं० का० ५ प्र० ४ अ० ८] इति ।

अंशदाम्यादिग्रहरूपाणि यज्ञसाधनानि साक्षाद्यज्ञनिष्पादकत्वाद्यज्ञस्वरूपाणि । ऐन्द्रवायवादिभिर्यज्ञः परम्परया निरूप्यते, न तु ग्रहैरिव साक्षान्निष्पाद्यते । तस्मात्तानि यज्ञस्य रूपम् । एतैरन्तरङ्गैर्बहिरङ्गैश्च यज्ञायुधैर्यज्ञं प्राप्नोति । अन्तिमस्य स्वगाकारवाक्यस्य तात्पर्यं दर्शयति—

"अवभृथश्च मे स्वगाकारश्च म इत्याह स्वगाकृत्यै" [सं० का० ५ प्र० ४ अ० ८] इति । स्वार्धीनत्वकरणायेत्यर्थः । नवमानुवाके पूर्वार्धगतानि वाक्यानि प्रशंसति—

"अग्निश्च मे घर्मश्च म इत्याहैतद्वै ब्रह्मवर्चसस्य रूपꣳ रूपेणैव ब्रह्मवर्चसमव रुन्धे" [सं० का० ५ प्र० ४ अ० ८] इति ।

अग्न्यादिभिर्ब्राह्मणकर्मनिष्पत्तेरेषां ब्रह्मवर्चसरूपत्वम् ।

एतस्मिन्नेवानुवाक उत्तरार्धगतानि वाक्यानि प्रशंसति—

"ऋक्च मे साम च म इत्याहैतद्वै छन्दसाꣳ रूपꣳ रूपेणैव छन्दाꣳस्यव रुन्धे"] सं० का० ५ प्र० ४ अ० ८] इति ।

ऋगादिकं छन्दसां वेदानां स्वरूपमिति प्रसिद्धम् ।

दशमानुवाके पूर्वार्धगतवाक्यानि प्रशंसति—

"गर्भाश्च मे वत्साश्च म इत्याहैतद्वै पशूनाꣳ रूपꣳ रूपेणैव पशूनव रुन्धे" [सं० का० ५ प्र० ४ अ० ८] इति ।

गर्भवत्सादीनां पशुरूपत्वं प्रसिद्धम् ।

---

१ ख. च. °ष्वग्नीषोमा° । २ ख. च. °न्द्रः प्रत्येकमुत्तरार्ध इन्द्रः प° । ३ ख. ग. ङ. च. इष्माव° । ४ ख. च. °जिष्णय° ।

एवमिमेवानुवाक उत्तरार्धगतानि वाक्यानि प्रशंसति—

"कल्पाञ्जुहोत्यकल्पस्य कल्प्यै" [तै० का० ५ प्र० ४ अ० ८] इति

आवुर्यज्ञेन कल्पतामित्यादयो मन्त्राः कल्पाः। पूर्वं यद्यद्वस्त्वकल्पं स्वस्वकार्येऽसमर्थं न भवति तस्य तस्य सामर्थ्यायायं होमः।

एकादशानुवाके पूर्वभागगतानि वाक्यानि प्रशंसति—

" युग्मदयुजे जुहोति मिथुनत्वाय" [तै० का० ५ प्र० ४ अ० ८] इति।

चतस्रश्च मेऽष्टौ च म इत्यादिकं समसंख्यारूपं युग्मम्(तृ)। एका च मे तिस्रश्च म इत्यादि विषमसंख्यारूपमयुग्मं(कृ), राशिद्वयं स्त्रीपुरुषवत्परस्परविलक्षणत्वान्मिथुनत्वाय संपद्यते। राशिद्वयेऽप्युत्तरोत्तराधिक्यं प्रशंसति—

" उत्तरावती भवतोऽभिक्राम्यै" [तै० का० ५ प्र० ४ अ० ८] इति।

एकत्वादुत्तरं त्रित्वं, तस्माच्चोत्तरं पञ्चत्वं, तथा चतुष्ट्वादुत्तरमष्टत्वम्। तस्माच्चोत्तरं द्वादशत्वम्। एवमुभयोरुत्तरावत्त्वेनाभितो व्याप्तिर्भवति।

युग्मायुग्मसंख्यावाचिशब्दानां तात्पर्यं दर्शयति—

" एका च मे तिस्रश्च म इत्याह देवछन्दसं वा एका च तिस्रश्च मनुष्यछन्दसं चतस्रश्चाष्टौ च देवछन्दसं चैव मनुष्यछन्दसं चाव रुन्धे " [तै० का० ५ प्र० ४ अ० ८] इति।

विषमसंख्यया देवानां प्रियाणि च्छन्दांसि निष्पाद्यन्ते, समसंख्यया तु मनुष्यप्रियाणि। अतस्तदुभयं प्राप्नोति। राशिद्वयेऽप्युत्तरोत्तरसंख्याबुद्धेरर्थं प्रशंसति—

"आ त्रयस्त्रिꣳशतो जुहोति त्रयस्त्रिꣳशद्वै देवता देवता एवाव रुन्ध आऽष्टाचत्वारिꣳशतो जुहोत्यष्टाचत्वारिꣳशदक्षरा जगती जागताः पशवो जगत्येवास्मै पशूनव रुन्धे " [तै० का० ५ प्र० ४ अ० ८] इति।

अस्मिन्ननुवाक उत्तरभागगतानि वाक्यानि प्रशंसति—

" वाजश्च प्रसवश्चेति द्वादशं जुहोति द्वादश मासाः संवत्सरः संवत्सर एव प्रति तिष्ठति " [तै० का० ५ प्र० ४ अ० ८] इति।

अत्र विनियोगसंग्रहः—

अग्नाविष्णू वसोर्धारामेकादशभिरादिवः।
अनुवाकैर्जुहोत्येकामाहुतिं संततां घृतात् ॥ इति।

---

१ ख. घ. 'युजं, रा'।

(वाजप्रसवीयहोमाभिधानम्)

अथ मीमांसा।

द्वादशाध्यायस्य तृतीयपादे चिन्तितम्—

मन्त्रादौ किं वसोर्धारा मन्त्रान्ते वाऽत्र संततेः।
आद्यो होमेषु संतत्या द्वादशान्तेषु तत्क्रतिः॥

अग्नौ किंचित्कर्म विहितम्—" संततां वसोर्धारां जुहोति " इति। तत्र सांतत्यं निरिछद्रत्वम्। तच्च मन्त्रकर्मणोः सहोपक्रमे सत्युपपद्यते। तस्मान्मन्त्रादौ कर्मसंनिपात इति प्राप्ते ब्रूमः—तस्मिन्वसोर्धारारूपे कर्मणि द्वादश द्वादशानि जुहोतीति श्रुतम्। द्वादशभिर्मन्त्रवाक्यैः संपाद्यमेकमाहुतिस्वरूपं द्वादशम्। तद्यथा—" वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे श्रावश्च मे श्रुतिश्च मे ज्योतिश्च मे सुवश्च मे " इत्येतैर्द्वादशभिर्मन्त्रवाक्यैरेकाऽऽहुतिर्होतव्या। एकादशोत्तराहुतयः " प्राणश्च मेऽपानश्च मे " इत्यादिभिर्निष्पाद्यन्ते। एतेषु च होमद्वादशकेषु मध्ये विलम्बाभावः सांतत्यं, न तु मन्त्रकर्मणोः सहोपक्रमः। तस्मात्पूर्वन्यायेन मन्त्रान्ते कर्मसंनिपातस्य नास्ति विघ्नः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे सप्तमप्रपाठक एकादशोऽनुवाकः॥ ११॥

(अथ चतुर्थाष्टके सप्तमप्रपाठके द्वादशोनुवाकः)।

वाजो नः सप्त प्रदिशश्चतस्रो वा परावतः। वाजो नो विश्वैर्देवैर्धनसातावि हावतु। विश्वे अद्य मरुतो विश्व ऊती विश्वे भवन्त्वग्नयः समिद्धाः। विश्वे नो देवा अवसाऽऽ गमन्तु विश्वमस्तु द्रविणं वाजो अस्मे। वाजस्य प्रसवं देवा रथेयाता हिरण्ययैः। आग्निरिन्द्रो बृहस्पतिर्मरुतः सोमपीतये। वाजेवाजेऽवत वाजिनो

(वाजप्रसवीयहोमाभिधानम्)

नो धनेषु (१) विप्रा अमृता ऋतज्ञाः । अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः । वाजः पुरस्तादुत मध्यतो नो वाजो देवाꣳ ऋतुभिः कल्पयाति । वाजस्य हि प्रसवो नन्नमीति विश्वा आशा वाजपतिर्भवेयम् । पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयो धाम् । पयस्वतीः प्रदिशः सन्तु मह्यम् । सं मा सृजामि पयसा घृतेन सं मा सृजाम्यपः (२) ओषधीभिः । सोऽहं वाजꣳ सनेयमग्ने । नक्तोषासा समनसा विरूपे धापयेते शिशुमेकꣳ समीची । द्यावाक्षामा रुक्मो अन्तर्वि भाति देवा अग्निं धारयन्द्रविणोदाः । समुद्रोऽसि नभस्वानार्द्रदानुः शंभूर्मयोभूरभि मा वाहि स्वाहा मारुतोऽसि मरुतां गणः शंभूर्मयोभूरभि मा वाहि स्वाहाऽवस्युरसि दुवस्वाञ्छंभूर्मयोभूरभि मा वाहि स्वाहा (३) ॥

(धनेष्वपो दुवस्वाञ्छंभूर्मयोभूरभि मा द्वे च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके सप्तमप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

(अथ चतुर्थकाण्डे सप्तमप्रपाठके द्वादशोऽनुवाकः) ।

पूर्वैरेकादशभिरनुवाकैर्वसोर्धाराहोम उक्तः । अथ द्वादशे वाजप्रसवीयहोम उच्यते । कल्पः—" वाजप्रसवीयं जुहोति सप्त ग्राम्या ओषधयः सप्तारण्याः

(वाजप्रसवीयहोमाभिधानम्)

पृथग्जानि हवींष्यौदुम्बरेण स्रुवेण वाजस्येमं प्रसवः सुषुव इति ग्राम्या हुत्वाऽऽरण्याञ्जु (जु)होति " इति ।

तत्र ग्राम्याणां मन्त्राः प्रथमकाण्डे सप्तमप्रपाठके दशमानुवाके समाम्नाताः । आरण्यानां मन्त्रा अत्राऽऽम्नायन्ते ।

तत्राऽऽरण्यस्य वेणुधान्यस्य होमाय प्रथमामृचमाह—

वाजो न इति । प्राच्याद्याश्चतस्रो दिश ऊर्ध्वाधोमध्यमास्तिस्र एताः सप्त प्रदिशः प्रकृष्टा दिशो वाजोऽन्नस्वरूपा अन्नप्रदा भवन्त्वित्यर्थः । तथा परावतोऽत्यन्तदूरवर्तिन्यश्चतस्रो वाऽन्येद्याद्याश्चतुःसंख्याका विदिशो विदूरस्था इवावभासन्ते । ताश्चास्माकमन्नप्रदा भवन्तु । स वाजोऽन्नमिहास्मिन्देशे धनसातौ धनप्रदेशे यज्ञे विश्वैर्देवैः प्रेरितः सन्नोऽस्मानवतु रक्षतु ।

अथ श्यामाकधान्यस्य होमाय द्वितीयामृचमाह—

विश्वे अद्येति । अद्यास्मिन्दिने विश्वे सर्वेऽपि मरुतः, तथाऽन्ये विश्वे सर्वेऽपि देवा ऊती रक्षणाय भवन्तु प्रवर्तन्ताम् । तथा विश्वे सर्वेऽप्यग्नयः समिद्धाः सम्यक्प्रज्वलिता भवन्तु । तथा विश्वे सर्वेऽपि देवा नोऽस्माकमवसा रक्षणेन निमित्तभूतेनाऽऽगमन्त्वागच्छन्तु । तथा विशं द्रविणं सर्वमपि धनमस्मे अस्मासु अस्तु भवतु । अथ नीवारहोमाय तृतीयामृचमाह—

वाजस्य प्रसवमिति । [हे देवा] वाजस्य प्रसवमस्मदीयस्यान्नस्य प्रेरणसंपादनमुद्दिश्याग्न्यादयस्त्रयो देवाः [मरुतश्च] सोमपीतये सोमपानार्थं हिरण्ययैर्हिरण्मयैः सुवर्णनिर्मितै रथैः सह यातास्मद्यागस्थानं प्राप्नुत ।

अथ जातिलहोमाय चतुर्थीमृचमाह—

वाजेवाजेऽवतेति । हे वाजिनोऽन्नसंपादका देवा वाजेवाजे तत्तदन्ननिमित्तं धनेषु धननिमित्तं च नोऽस्मानवत । विप्रा ब्राह्मणवच्छुद्धा अमृता मरणरहिता ऋतज्ञा ऋतं सत्यं यज्ञं वा जानन्तीत्यृतज्ञाः । तादृशा हे देवा अस्य मध्व इदं मधुरमन्नं पिबत । पानोपलक्षितं भोजनं कुरुत । ततो मादयध्वं हृष्टा भवत । ततस्तृप्ताः सन्तो देवयानैः पथिभिर्यात स्वं स्वं स्थानं *प्राप्नुत ।

अथ गवीधुकहोमाय पञ्चमीमृचमाह—

वाजः पुरस्तादिति । नोऽस्माकं पुरस्तात्पूर्वे वयसि उत मध्यतो मध्यमे

---

* सर्वपुस्तकेषु प्राप्नुवतेति प्रामादिकः पाठः ।

(वाजप्रसवीयहोमाभिधानम्)

वयति वाजोऽन्नं भवत्विति शेषः । किंचायं वाज ऋतुभिः कालविशेषैर्देवान्कल्पयति तत्तत्काले यष्टव्यान्देवान्संपादयति । ततो यज्ञे यष्टुं शक्यते । हि यस्माद्वाजस्यान्नस्य प्रसवः प्रेरणं समृद्धिर्विश्वा आशाः सर्वा अपि दिशो नम्रतीत्यतिशयेनावनताः करोति, अन्नसमृद्धौ सत्यां सर्वदिग्वर्तिनः प्राणिनः स्वाधीना भवन्ति, तस्माद्दर्शं वाजपतिर्भवेयम् । अथ मर्कटकाख्येषान्यहोमाय षष्ठीमृचमाह—

पयः पृथिव्यामिति । वाजसमृद्ध्यर्थं पृथिव्यां पयो जलं धामहं स्थापयामि । तथौषधीष्वपि पयो धाम् । तथा दिवि द्युलोकेऽपि पयो धाम् । अन्तरिक्षेऽपि पयो धाम् । प्रदिशः प्रकृष्टाः सर्वा दिशः पयस्वतीः सन्तु मह्यं मदर्थं जलवत्यो भवन्तु । अथ गार्मुतहोमाय कुलत्थहोमाय वा सप्तमीमृचमाह—

सं मा सृजामीति । हेऽग्ने त्वत्प्रसादान्माहं पयसा क्षीरेण संसृजामि संयोजयामि । तथा मां घृतेन संसृजामि । अपश्चौषधीभिः संसृजामि । क्षीरादिभिः संसृष्टः सोऽहं वाजमन्नं त्वदत्तं सनेयं लभेयमन्येभ्योऽहमद्याम् ।

एतैर्मन्त्रैः साध्यं होमं विधत्ते—

" अग्निर्देवेभ्योऽपाक्रामद्भागधेयमिच्छमानस्तं देवा अब्रुवन्न आ वर्तस्व हव्यं नो वहेति सोऽब्रवीद्वरं वृणै मह्यमेव वाजप्रसवीयं जुहवन्निति तस्मादग्नये वाजप्रसवीयं जुह्वति यद्वाजप्रसवीयं जुहोत्यग्निमेव तद्भागधेयेन समर्धयत्यथो अभिषेक एवास्य सः " [सं० का० ५ प्र० ४ अ० ९] इति ।

पूर्वं भागरहितोऽग्निर्भागमपेक्षमाणो देवेभ्योऽपरक्तः क्राप्यगमत् । त पुनर्देवैर्विवहनायाऽऽहूतः स्वभागत्वेन वाजप्रसवीयं होमं वव्रे । तस्मात्सर्वे यजमाना अग्नये वाजप्रसवीयं होमं जुह्वति । अतोऽत्रापि तद्धोमेनाग्निमेव स्वभागेन समर्धयति । अपि च स होमोऽस्याग्नेरभिषेकस्थानीयस्तस्मात्कर्तव्यः ।

अथ प्रथमकाण्ड आम्नातैर्वाजस्येमं प्रसव इत्यादिभिः सहात्राऽऽम्नातानां होममन्त्राणां संख्यां विधत्ते—

"चतुर्दशभिर्जुहोति सप्त ग्राम्या ओषधयः सप्ताऽऽरण्या उभयीषामवरुद्ध्यै" [सं० का० ५ प्र० ४ अ० ९] इति ।

---

१ ख. च. °ह्यहो° ।

(वाजप्रसवीयहोमाभिधानम्)

तिलमाषमौद्गियवप्रियङ्गुश्यामाकनीवारगवेधुका गोधूमा इति सप्त ग्राम्याः। वेणुश्यामाकाश्चेत्य उदाहृता आरण्याः। उभयविधधान्यसमृद्धये चतुर्दशभिर्होमः।

एकैकेन मन्त्रेणैकैकस्य होमं विधत्ते—

"अन्नस्यान्नस्य जुहोत्यन्नस्यान्नस्यावरुद्ध्यै" [तं० का० ५ प्र० ४ अ० ९] इति। अतोऽकर्मेण तत्तदन्नप्राप्त्यर्थमीदृशो होमः।

चोदकप्राप्तां जुहूं बाधितुं साधनान्तरं विधत्ते—

"औदुम्बरेण स्रुवेण जुहोत्यूर्वा उदुम्बर ऊर्गन्नमूर्जैवास्मा ऊर्जमन्नमव रुन्धे" [तं० का० ५ प्र० ४ अ० ९] इति।

ऊर्क्शब्दः स्वादुरसवाची। उदुम्बरान्नयोस्तथाविधरसोपेतत्वादूर्मूपत्वम्।

अत्र कृत्वक्रुतया धावनं निषेधति—

"अग्निर्वै देवानामभिषिक्तोऽग्निचिन्मनुष्याणां तस्मादग्निचिद्वर्षति न धावेत्" [तं० का० ५ प्र० ४ अ० ९] इति।

देवानां मध्ये यथा चीयमानोऽग्निरभिषिक्तस्तथा यजमानानां मध्येऽग्निचिदभिषिक्तः। वृष्टिश्चाभिषेकस्वरूपा। तस्माद्वर्षसमये धावनं न कुर्यात्।

प्रमादाद्धावने पुनरावृत्तिं विधत्ते—

"अवरुद्ध्य ह्यस्यान्नमन्नमिव खलु वै वर्षं यद्धावेदन्नाद्याद्धावेदुपावर्तेताद्यमेवाभ्युपावर्तते" [तं० का० ५ प्र० ४ अ० ९] इति।

हि यस्मादस्याग्निचितोऽन्नं सर्वमवरुद्धं संपादितं, वृष्टिश्चान्नहेतुत्वादन्नमेव। अतो वृष्टिमोचनपरिहाराय धावने सत्यन्नाद्यादपगच्छति। अतोऽन्नप्राप्तये पुनरप्यावर्तेत। कल्पः—"नक्तोषासेति कृष्णायै श्वेतवत्सायै पयसा हुत्वा" इति। पाठस्तु—

नक्तोषासेति। नक्तं चोषाश्च नक्तोषासा रात्रिदिवसावित्यर्थः। समनसा परस्परमेकमत्ययुक्ते विरूपे रात्रिः कृष्णा दिवसः शुक्ल इत्येवं विलक्षणरूपे समीची समीच्यावनुकूले सत्यावेकं शिशुमग्निरूपं धापयेते यजमानकर्तृकं कर्मानुष्ठानं संपादयतः। द्यावा द्युलोके क्षाम क्षितौ, अन्तस्तदुभयमध्यवर्तिन्यन्तरिक्षे विभाति रुक्मो रोचमानोऽयमग्निर्विशेषेण प्रकाशते। दीव्यन्ति व्यवहरन्तीति देवाः प्राणाः। ते च द्रविणोदा यागद्वारेण धनरूपं फलं प्रयच्छन्ति। तादृशा यजमानस्य प्राणा अग्निमेतं धारयन्धृतवन्तः।

---

१ स. च. °रेणानुकूलं फ°।

एतस्मिन्नस्ताध्यं होमं विधत्ते—

" नक्षोषातेति कृष्णायै श्वेतवत्सायै पयसा जुहोत्यक्षैवास्मै रात्रिं प्र दापयति रात्रियाऽहरहोरात्रे एवास्मै प्रत्ते काममन्नाद्यं दुहाते " [सं० का० ५ प्र० ४ अ० ९] इति ।

अयमध्वर्युरस्मै यजमानायाह्ना वत्सरूपेण रात्रिं धेनुसमां प्रदापयति पयः-समं फलं रात्र्या प्रत्तं करोति । तथैव रात्र्या वत्सरूपया धेनुसमहः प्रदापयति अन्योन्यदानायैव मन्त्रेऽस्मिन्रात्र्यहनी सह निर्दिश्येते । ते चान्योन्यं प्रत्ते सति अस्मै यजमानायाह्नाद्यरूपं कामं संपादयतः ।

यदुक्तं सूत्रकारेण—" षड्भिः पर्यायैर्द्वादश राष्ट्रभृतो जुहोत्युतापाहृतधा-मेति पर्यायमनुद्रुत्य तस्मै स्वाहेति प्रथमामाहुतिं जुहोति ताभ्यः स्वाहेत्युत्तरा-मेवमितरान्पर्यायान्विभजति भुवनस्य पत इति पर्यायाणां सप्तम्याहुतीनां चयोदश्येतेन व्याख्याता भुवनस्य पत इति रथमुखे पञ्चाऽऽहुतीर्जुहोति दश वा " इति । तत्र ऋतावाडित्यादिमन्त्रसाध्यं होमं विधत्ते—

" राष्ट्रभृतो जुहोति राष्ट्रमेवाव रुन्धे " [सं० का० ५ प्र० ४ अ० ९] इति ।

राष्ट्रभृत्संज्ञका ऋतावाडित्यादिमन्त्रास्तृतीयकाण्डे चतुर्थप्रपाठके सप्तमानु-वाके समाम्नाताः । अथ पर्यायसंख्यां विधत्ते—

" षड्भिर्जुहोति षड्वा ऋतव ऋतुष्वेव प्रति तिष्ठति " [सं० का० ५ प्र० ४ अ० ९] इति । राष्ट्रभृत्स्वेवोपरितनाहुतिषु पञ्चसंख्यापक्षं विधत्ते—

" भुवनस्य पत इति रथमुखे पञ्चाऽऽहुतीर्जुहोति वज्रो वै रथो वज्रेणैव दिशोऽभि जयति " [सं० का० ५ प्र० ४ अ० ९] इति ।

ईषाग्रं रथमुखम् । " स्फ्यस्तृतीयः रथस्तृतीयम् " इत्यत्र रथस्य वज्रत्वं स्पष्टमाम्नातम् । कल्पः—" समुद्रोऽसि नभस्वानित्यञ्जलिना त्रीणि वातनामानि जुहोति " इति । तेषु प्रथमामाह—

समुद्रोऽसीति । हे वात देवानां त्वं समुद्रोऽसि समुद्रवद्बहुलोऽसि । नभस्वा-न्स्वप्रचाराय विस्तीर्णाकाशवानार्द्रं वृष्टिजलं ददातीत्यार्द्रदानुः । शमैहिकं सुखं भावयतीति शंभूः । मय आमुष्मिकं सुखं भावयतीति मयोभूः । तादृशस्त्वं मामभि मां प्रति वाहि गच्छ, एवं संचारेण मोत्थमापादयेत्यर्थः । अथ द्वितीयामाह—

(वाजप्रसवीयहोमाभिधानम्)

मारुतोऽसीति। योऽयं बहूनां मरुतां वायुविशेषाणां गणो मारुतशब्दवाच्यस्तद्रूपस्त्वमसि। शेषं पूर्ववत्। अथ तृतीयामाह—

वस्युरसीति। अवं रक्षणमिच्छतीत्यवस्युः। दुवस्वान्परिचर्योपेतः। तादृशस्त्वमसि। शेषं पूर्ववत्। एतैर्मन्त्रैः साध्यं होमं विधत्ते—

" अग्निचितꣳ ह वा अमुष्मिँल्लोके वातोऽभि पवते वातनामानि जुहोत्यभ्येवैनममुष्मिँल्लोके वातः पवते " [सं० का० ५ प्र० ४ अ० ९] इति।

स्वर्गे लोक एतमग्निचितमभिलक्ष्य द्योत्यमान्यसौगन्ध्ययुक्तो वायुर्वाति। अतस्तत्सिद्धये समुद्रोऽसीत्यादिवातनामानि जुहुयात्। तेन होमेन वायुस्तथा पवत एव। पाठप्राप्तं त्रित्वं प्रशंसति—

" त्रीणि जुहोति त्रय इमे लोका एभ्य एव लोकेभ्यो वातमव रुन्धे " [सं० का० ५ प्र० ४ अ० ९] इति।

मन्त्रगतेन समुद्रशब्देन बाहुल्यसाम्यमुपजीव्य वातो लक्ष्यत इत्येतत्सर्वं दर्शयति—" समुद्रोऽसि नभस्वानित्याहैतद्वै वातस्य रूपꣳ रूपेणैव वातमव रुन्धे " [सं० का० ५ प्र० ४ अ० ९] इति।

अत्र वातस्यैव होतव्यद्रव्यत्वात्तद्योग्यं साधनं विधत्ते—

" अञ्जलिना जुहोति न ह्येतेषामन्यथाऽऽहुतिरवकल्पते " [सं० का० ५ प्र० ४ अ० ९] इति।

अस्य हस्तद्वयमेलनरूपेणाञ्जलिना वह्नौ वायोरुत्पादनमेवात्र होमः। यस्मादेषां वातरूपाणां होमद्रव्याणामञ्जलिव्यतिरेकेणाऽऽहुतिर्न संभवति, न खलु वातो जुह्वामवदातुं शक्यते। अत एव सूत्रकारो ब्राह्मणान्तरमुदाजहार—' नह्येतस्यावदानमस्तीति विज्ञायते " इति। तस्माद्व्यजनेनेवाञ्जलिना वह्नौ वायुं संचारयेत्। अत्र विनियोगसंग्रहः—

वाजो नः सप्तभिर्वाजप्रसवीयं जुहोति हि।
नक्तेति पयसा होमः समुद्रो वातनामभिः॥
त्रिभिर्जुहोत्यत्र मन्त्रा एकादश समीरिताः॥ इति।

अथ मीमांसा।

पञ्चमाध्यायस्य तृतीयपादे दशमाधिकरणे चिन्तितम्—

न धावेद्वर्षतीत्यादि चितौ सत्यां क्रतावुत।
आद्यश्चितेर्निमित्तत्वान्न क्रतावग्निचित्यतः॥

(अग्निचयनाभिधानम्)

इदमाम्नायते—" अग्निचिदृक्वति न धावेन्न स्त्रियमुपेयात् " इति । अन्येतान्यग्निचिद्व्रतानि चितौ निष्पन्नायां सत्यां तेदाप्रभृति प्रवर्तन्ते, न तु चितेऽग्नौ कर्मानुष्ठानं प्रतीक्षन्ते । कुतः । अग्निचित्पदे चयनस्य निमित्तत्वेनोपन्यासात् । न हि सति निमित्ते नैमित्तिकस्य विलम्बो युक्त इति प्राप्ते ब्रूमः—कर्तव्योपयोगिभिरग्नियनेन संस्क्रियते । न चानिष्पन्ने क्रतौ चयनसंस्कारः सफलो भवति । तस्मात्क्रतौ निष्पन्ने सति पश्चाच्चयनसाकल्यादयं पुरुषोऽग्निं चितवानित्यमुमर्थं-महंतीति क्रियन्ते तानि व्रतानि ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदी-यतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे सप्तमप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

(अथ चतुर्थकाण्डे सप्तमप्रपाठके त्रयोदशोऽनुवाकः)।

अग्निं युनज्मि शवसा घृतेन दिव्यꣳ सुपर्णं वयसा बृहन्तम् । तेन वयं पतेम ब्रध्नस्य विष्टपꣳ सुवो रुहाणा अधि नाक उत्तमे । इमौ ते पक्षावजरौ पतत्रिणौ याभ्याꣳ रक्षाꣳस्यपहꣳस्यग्ने । ताभ्यां पतेम सुकृतामु लोकं यत्रर्षयः प्रथमजा ये पुराणाः । चिदसि समुद्रयोनिरिन्दुर्दक्षः श्येन ऋतावा । हिरण्यपक्षः शकुनो भुरण्युर्महान्त्सधस्थे ध्रुवः (१) आ निषत्तः । नमस्ते अस्तु मा मा हिꣳसीर्विश्वस्य मूर्द्धन्नधि तिष्ठासि श्रितः । समुद्रे ते हृदयमन्तरायुर्द्यावापृथिवी भुवनेष्वर्पिते । उद्नो दत्तोदधिं मिन्त दिवः पर्जन्यादन्तरिक्षा-

---

१ क. ख. ततः ।

(अग्नियोगाभिधानम्)

पृथिव्यास्तंतो नो वृष्ट्याऽवत । दिवो मूर्धाऽसि पृथिव्या नाभिरूर्गपामोषधीनाम् । विश्वायुः शर्म सप्रथा नमस्पथे । येनर्षयस्तपसा सत्रमासतेन्धाना अग्निꣳ स्वराभरन्तः । तस्मिन्नहं नि दधे नाकं अग्निमेतं यमाहुर्मनवः स्तीर्णबर्हिषम् । तं पत्नीभिरनु गच्छेम देवाः पुत्रैर्भ्रातृभिरुत वा हिरण्यैः । नाकं गृह्णानाः सुकृतस्य लोके तृतीये पृष्ठे अधि रोचने दिवः । आ वाचो मध्यमरुहद्भुरण्युरयमग्निः सत्पतिश्चेकितानः । पृष्ठे पृथिव्या निहितो दविद्युतदधस्पदं कृणुते (३) ये पृतन्यवः । अयमग्निर्वीरतमो वयोधाः सहस्रियो दीप्यतामप्रयुच्छन् । विभ्राजमानः सरिरस्य मध्य उप प्र यात दिव्यानि धाम । सं प्र ञ्चयध्वमनु सं प्र यातामेषो देवयानान्कृणुध्वम् । अस्मिन्त्सधस्थे अध्युत्तरस्मिन्विश्वे देवा यजमानश्च सीदत । येना सहस्रं वहासि येनाग्ने सर्ववेदसम् । तेनेमं यज्ञं नो वह देवयानो यः (४) उत्तमः । उद्बुध्यस्वाग्ने प्रति जागृह्येनमिष्टापूर्ते सꣳ सृजेथामयं च । पुनः कृण्वꣳस्त्वा पितरं युवानमन्वाताꣳसीत्त्वयि तन्तुमेतम् । अयं ते योनि-

ऋत्वियो यतो जातो अरोचथाः। तं त्वानअग्न-
आ रोहाथा नो वर्धया रयिम् (५) ॥
(ध्रुवः सत्रं कृणुते यः सप्तविंशश्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके
सप्तमप्रपाठके त्रयोदशोऽनुवाकः ॥ १३ ॥

(अथ चतुर्थकाण्डे सप्तमप्रपाठके त्रयोदशोऽनुवाकः) ।

द्वादशे वाजप्रसवीयहोमोऽभिहितः । अथ त्रयोदशेऽग्नियोगोऽभिधीयते । कल्पः—" पुरस्तात्पात्रनुवाकादग्निं युनज्मीति तिसृभिरभिमृशन्नग्निं युनक्ति " इति । तत्र प्रथममाह—

अग्निं युनज्मीति । अग्निं चितमेतं वह्निं शवसा बलेन घृतेन घृतादिद्रव्ययुक्तेन कर्मणा युनज्मि रथेनाश्वमिवाहं योजयामि । कीदृशमग्निं, दिव्यं द्योतनात्मकं, सुपर्णं पक्ष्याकारं, वयसा बृहन्तं चिरकालभाविनम् । तेनाग्निना वयं यजमाना अघ्न्यस्याऽऽदित्यस्य विष्टपं तापरहितं स्थानं पतेम प्राप्नुयाम । कीदृशा वयम्, उत्तमे नाकेऽत्युत्कृष्टे स्वर्गलोके सुवोऽधिरुहाणाः सुखपापकप्रदेशमधिरोढुकामाः । अथ द्वितीयामाह—

इमौ ते पक्षाविति । पतत्रिणः पक्ष्याकारस्य ते तवाग्नेरिमौ पक्षावजरौ कदाचिदपि जीर्णौ न भवतः । हेऽग्ने याभ्यां पक्षाभ्यां त्वं रक्षांस्यपहंसि मारयसि ताभ्यां वयं सुकृतामु पुण्यकृतामेव पुरुषाणां योग्यं लोकं पतेम प्राप्नुयाम । ये पुराणा अनादिसिद्धा ऋषयो महर्षयः सन्ति ये च प्रथमजाः सृष्ट्यादावेवोत्पन्नास्तादृशा यत्र लोके निवसन्ति तं लोकं पतेम । अथ तृतीयामाह—

चिदसि समुद्रेति । हेऽग्ने त्वं चिदादिविशेषणैर्विशेषितोऽसि । चिज्जगत्येतयिता यजमानैश्चितो वा । समुद्रयोनिर्यथा समुद्रः सर्वेषां जलग्रहाणां स्थानं तथा त्वं सर्वेषां क्रतूनां स्थानम् । इन्दुः परमैश्वर्ययुक्तः । दक्षः कर्मनिष्पादनकुशलः । श्येनः पक्षिविशेषाकारः । ऋतावा सत्यवान् । हिरण्यपक्षः सुवर्णमयाभ्यां पक्षाभ्यामुपेतः । शकुनः कामनादिभेदेन कङ्कादिपक्ष्याकारः ।

---

१ ख. ङ. च. ते ।

(अग्नियोगाभिधानम्)

भुरण्युः सर्वं भरितुं क्षमः । महान्बह्वीभिरिष्टकाभिश्चितत्वात्पौढः । तथःस्थ आदित्येन सहैकत्र स्थितियोग्ये मण्डले [ध्रुवः स्थिरः]। आनिषत्तः समन्तत उपविष्टः ।

कल्पः—" यज्ञायज्ञियस्य स्तोम एकयाऽप्रस्तुतं भवत्यथ नमस्ते अस्तु मा मा हिꣳसीरिति द्वाभ्यामग्निमभिमृशति " इति । तत्र प्रथमामाह—

नमस्ते अस्त्विति । हेऽग्ने ते नमोऽस्तु । त्वं कर्मणि त्वद्यागकारिणं मा मां मा हिंसीर्मा विनाशय । त्वं विश्वस्य सर्वस्य जगतो मूर्धन्शिरोवदुत्तमे चिति-प्रदेशे श्रित आश्रितः सन्नधितिष्ठसि । अधिको भूत्वा वर्तसे । ते हृदयं त्वदीयं चित्तं समुद्रे वर्तते[1] । यद्वृष्टिद्वारेण समुद्रसमानं जलं संपादयिष्यामीत्येवं सर्वदा तवानुग्रहः। तथाऽन्तरायुस्त्वदीयचित्तस्य मध्ये सर्वेषां प्राणिनामायुस्तिष्ठति । चिरं जीवन्त्वेते प्राणिन इति यदा स्मरसि तदानीं तेषामायुर्भवत्येव । किंच भुवनेषु सर्वेषु लोकेषु निमित्तभूतेषु द्यावापृथिवी अर्पिते उपरि द्यौरधो भूमिश्च त्वया स्थापिते । एतयोर्मध्ये सर्वे लोकास्तिष्ठन्त्वित्येवं तवानुग्रहः । अथ द्वितीयामाह—

उद्नो दत्तोदधिमिति । अत्र पूजार्थमेकस्मिन्नेवाग्नौ बहुत्वमारोप्य निर्दिश्यते । हेऽग्नयो यूयमुद्नो दत्तोदकानि प्रयच्छत । उदकदाने क उपाय इति तदुच्यते—उदधिं भिन्त, उदकं धीयतेऽस्मिन्नित्युदधिर्मेघस्तं विदारयत । केभ्यो निमित्तेभ्यः, दिवोऽन्तरिक्षात्पृथिव्या लोकत्रयं निमित्तीकृत्येत्यर्थः। ततो मेघविदारणाद्भूमौ पर्जन्यादागतया वृष्ट्या नोऽस्मानवत रक्षत । पुनरप्येकत्वेनैव संबोध्योच्यते—हेऽग्ने त्वं दिवो मूर्धाऽसि द्युलोकस्य मूर्धस्थानीय आदित्यरूपोऽसि । पृथिव्या नाभिरसि नाभिवन्मध्यदेशे वर्तसे । अन्नामोषधीनां चोर्ग्रसोऽसि । त्वया हि पाके क्रियमाणे सति तत्र रसो जायते । तथा विश्वायुरसि सर्वस्य जगत आयुष्पदोऽसि । शर्म शरणभूतोऽसि । सप्रथाः सविस्तारोऽसि । पथे पुण्यलोकमार्गरूपाय तुभ्यं नमोऽस्तु । अग्नियोगमन्त्रं व्याख्यातुं प्रस्तौति—

" सुवर्गाय वै लोकाय देवरथो युज्यते यत्राऽऽकूताय मनुष्यरथ एष खलु वै देवरथो यदग्निः " [तै० का० ५ प्र० ४ अ० १०] इति ।

द्विविधो हि रथो देवरथो मनुष्यरथश्चेति । तत्र स्वर्गप्राप्तये देवरथः सज्जी

---

१ ख. घ. ङ. च. °ते । यावद्वृ° । २ क. °प्यश्लोक° ।

क्रियते । यत्र क्वापि ग्रामविशेषे गन्तुमाकूतमभिप्रायो भवति तदर्थं मनुष्यरथः सज्जी क्रियते । योऽयमत्र चीयमानोऽग्निः स एष देवरथो न तु मनुष्यरथः । इत्थं प्रस्तुत्य मन्त्रस्य तात्पर्यं दर्शयति—

"अग्निं युनज्मि शवसा घृतेनेत्याह युनक्त्येवैनꣳ स एनं युक्तः सुवर्गं लोकमभि वहति" [सं० का० ५ प्र० ४ अ० १०] इति ।

एनं देवरथरूपमग्निमनेन मन्त्रेण युनक्त्येव । स च युक्तोऽग्निरेनं यजमानं स्वर्गं प्रापयति । उक्तमन्त्रपञ्चके मन्त्रत्रयं विभज्य विनियुङ्क्ते—

"यत्सर्वाभिः पञ्चाभिर्युञ्ज्याद्युक्तोऽस्याग्निः प्रच्युतः स्यादप्रतिष्ठिता आहुतयः स्युरप्रतिष्ठिताः स्तोमा अप्रतिष्ठिताम्युक्थानि तिसृभिः प्रातःसवनेऽभिमृशति त्रिवृद्वा अग्निर्यावानेवाग्निस्तं युनक्ति यथाऽनसि युक्त आधीयत एवमेव तत्प्रत्याहुतयस्तिष्ठन्ति प्रति स्तोमाः प्रत्युक्थानि" [सं० का० ५ प्र० ४ अ० १०] इति । आदावेव मन्त्रपञ्चकेन योजने सति कालान्तरे योजयितुं मन्त्राभावादयं युक्तोऽग्निः प्रच्युतो भवेत् । प्रच्युतेऽग्नावाहुतीनां स्तोत्रशस्त्रयोश्च प्रतिष्ठा न भवेत् । अतः पञ्चाद्योक्तं मन्त्रद्वयमवशेष्य प्रातःसवने तिसृभिरभिमृशेत् । तथा सति त्रिगुणमग्निं सर्वमप्यभिमृशति । ततो यथा लोके बलीवर्दैर्युक्ते शकटे सर्वं ग्रामान्तरं नेतव्यं वस्तुजातमभिनिधीयत एवमेतस्मिन्नग्नावाहुतयः स्तोत्राणि [शस्त्राणि] च प्रतितिष्ठन्ति । अथावशिष्टं मन्त्रद्वयं विनियुङ्क्ते—

"यज्ञायज्ञियस्य स्तोत्रे द्वाभ्यामभि मृशत्येतावान्वै यज्ञो यावानग्निष्टोमो भूया स्वा अस्यात ऊर्ध्वः क्रियते यावानेव यज्ञस्तमन्ततोऽन्वारोहति" [सं० का० ५ प्र० ४ अ० १०] इति ।

यज्ञायज्ञा वो अग्नय इत्यस्यामूच्युत्पन्नं साम यज्ञायज्ञियं, तस्य स्तोत्रः संबन्धि स्तोत्रं तृतीयसवने प्रवर्तते । तस्मिन्प्रवर्तमाने सति शिष्टाभ्यां द्वाभ्यां मन्त्राभ्यामग्निमभिमृशेत् । यज्ञायज्ञियस्तोत्रान्तो हि प्रकृतिभूतोऽग्निष्टोमः । स च यावांस्तावानेवोक्थ्यातिरात्रादिः सर्वोऽपि यज्ञः । एतावदेव हि सर्वस्यापि यज्ञस्य मुख्यं शरीरम् । अस्योक्थ्यादिकृतोर्यज्ञायज्ञियस्तोत्रादूर्ध्वस्तु स्तोत्रसमूहो यः क्रियते स तु नैव क्रियते, तेनातिरिक्तेन पूर्वं विद्यमानस्य यज्ञशरीरस्य

१ ख. घ. ङ. च. मर्वं ।

(अग्नियोगाभिधानम्)

बाहुल्यमेव भवति, न तु किंचिन्नूतनं शरीरम्। एवं सति यज्ञायज्ञियस्तोत्रकालीनाभिमर्शनेनातिरिक्तेनाग्निष्टोमोक्थ्यातिरात्रादिरूपो यज्ञो यावानस्ति तं सर्वमप्यन्तकालेऽन्वारोहति कृत्स्नमपि यज्ञफलं प्राप्नोतीत्यर्थः। मन्त्रद्वित्वं दर्शयति—

"द्वाभ्यां प्रतिष्ठित्यै" [तै० का० ५ प्र० ४ अ० १०] इति।

स्तोत्रमध्य एवावान्तरकालविशेषं विधत्ते—

"एकयाऽप्रस्तुतं भवत्यथाभि मृशत्युपैनमुत्तरो यज्ञो नमत्यथो संतत्यै" [तै० का० ५ प्र० ४ अ० १०] इति।

यज्ञायज्ञियस्य स्तोत्रे एकविंशः स्तोमो विहितः। तिस्रो हि ऋच एकविंशतिसंख्यापूरणायाऽऽवर्तनीयाः। तत्र हि विंशतिस्तोत्रीयासूक्तासु याऽन्त्या (न्त्या) स्तोत्रीया तया स्तोत्रमप्रस्तुतमनुपक्रान्तं यदा भवति तदानीं मन्त्राभ्यामभिमृशेत्। एवं सत्युत्तरकालभावी यज्ञः सर्वोऽप्येनं यजमानमुपनमति। अपि च तदभिमर्शनं यज्ञनैरन्तर्याय संपद्यते।

कल्पः—"पुनश्चितिस्तिष्ठ्यर्थेषु भूयोऽवयवार्थे समृद्ध्यर्थे संतानार्थे चाभ्यवदानार्थां व्याख्यास्यामो यदीष्ट्या यदि पशुना यदि सोमेन यजेत योऽप्यस्य पुरोऽग्निरतमन्ववसाय यजेतापि वा येनर्षय इत्यग्नौ नाना मन्त्रा उत्तरेषामुपदध्यात्" इति। तत्र प्रथमामाह—

येनर्षय इति। येन स्वर्गेण निमित्तभूतेन पूर्वे महर्षयस्तपसा संतापयुक्तेनाग्निना तत्रमाततानुष्ठितवन्तः। कीदृशा महर्षयः, अग्निमिन्धानाः प्रज्वलयन्तः। सुवराभरन्तः स्वर्गमाहर्तुं समुद्यताः। अहमपि तस्मिन्लोके निमित्तभूते सति एतमग्निं निदधे स्थापयामि। यमग्निं मनवः पूर्वे मनुष्याः स्तीर्णबर्हिषं प्रस्तारितयज्ञमाहुस्तमग्निं निदध इत्यन्वयः। अथ द्वितीयामाह—

तं पत्नीभिरिति। हे देवा ऋत्विजः सर्वे वयं पत्न्यादिभिः सर्वैर्मनुष्यैरुत वा हिरण्यैर्हिरण्यादिभिः सर्वैः साधनद्रव्यैश्च सहितास्तमग्निमनुगच्छेमानुगताः सन्तः फलं प्राप्स्याम इत्याशयः। स एव स्पष्टी क्रियते—दिवः पृष्ठे स्वर्गस्योपरि नाकं दुःखरहितं स्थानं गृह्णाना ग्रहीतुकामा वयमित्यर्थः। कीदृशे दिवः

---

१ ख. च. °न्तराले°। २ ख. च. °काले वि°।

पृष्ठे, सुकृतस्य लोके सम्यगनुष्ठितस्य कर्मणः फलभूते, तृतीये पृथिवीमारभ्य गणनायां त्रिसंख्यापूरके, अधिरोचनेऽधिकत्वेन दीप्यमाने। अथ तृतीयामाह—

आ वाचो मध्यमेति। अयमग्निर्वाचो मध्यमारुहस्तोत्ररूपाया वाचः प्रतिपाद्यमर्थमारूढः स्तोत्रगतसर्वगुणयुक्त इत्यर्थः। कीदृशोऽग्निः, सुरण्युर्णग-न्तरणशीलः। सत्पतिः सतां पालकः। चेकितानोऽभिज्ञानवान्। स च पृथि-व्याः पृष्ठे भूमेरुपरि निहितः स्थापितो दविद्युतदतिशयेन द्योतते। ये तु विरो-धिनः पृतन्यवोऽस्माभिः सह कलहं कर्तुमिच्छन्ति तानधस्पदं कृणुतेऽस्माकं पादस्याधस्तादवस्थितान्करोति। अथ चतुर्थीमाह—

अयमग्निरिति। अयमग्निर्दीप्यतामस्मिन्कर्मणि प्रकाशताम्। कीदृशः, वरितमोऽतिशयेन शूरः। वयोधा वयस आयुषः स्थापयिता। सहस्रिय इष्ट-कासहस्रेण संपादितः। अप्रयुच्छन्नस्मिन्कर्मणि प्रमादरहितः। तरिरस्य जलस्य मध्ये विभ्राजमान और्वविद्युदादिरूपेण विशेषतः प्रकाशमानः। हे ऋत्विग्य-जमानास्तस्य प्रसादाद्दिव्यानि धाम स्थानानि उप प्रयात प्राप्नुत। अथ पञ्चमीमाह—

सं प्र च्यवध्वमिति। हेऽग्ने त्वं विश्वे देवा यजमानश्च सर्वे यूयं संप्रच्य-वध्वं सम्यक्प्रच्यावयत, अस्य कर्मणो विघ्नं विनाशयतेत्यर्थः। अनुसंप्रयाता-नुक्रमेण कर्मसिद्धिं प्राप्नुत। ततो देवयानान्देवलोकप्राप्तिहेतून्पथो मार्गान्कृ-णुध्वं कुरुत। सधःस्थे सहास्थितियोग्येऽस्मिन्कर्मणि सीदतोत्तरस्मिँल्लोकेऽधिकत्वेन सीदत। अथ षष्ठीमाह—

येना सहस्रमिति। हेऽग्ने देवयानो देवप्रापको यस्त्वमुत्तमः स त्वं येन व्यापारेण सहस्रं वहसि सहस्रदक्षिणाकं यज्ञं निर्वहति, तथा येन व्यापारेण सर्ववेदसं सर्वस्वदक्षिणाकं यज्ञं वहसि, तेन व्यापारेण नोऽस्मदीयमिमं यज्ञं वह देवान्प्रापय। देवयान इत्यादिकं यज्ञविशेषणं वाऽस्तु। यो यज्ञो देवान्प्राप्त उत्तमो भवति तमिमं यज्ञं वहेत्यर्थः। अथ सप्तमीमाह—

उद्बुध्यस्वाग्न इति। हेऽग्ने त्वमुद्बुध्यस्वास्मद्विषये सावधानो भव। एनं यजमानं प्रति जागृहि प्रतिदिनं जागरूकं सावधानं कुरु। अयं च त्वं च मिलित्वेष्टापूर्ते श्रौतस्मार्तं कर्मणी संसृजेथां संपादयतम्। हे यजमान त्वां पितरं

(अग्नियोगाभिधानम्)

पालकं युवानं योवनोपेतं पुनः कृण्वन्भूयो भूयः कुर्वन्नयमग्निस्त्वयि निमित्तभूते सत्येतं तन्तुं यज्ञप्रवाहमन्वाततंसीदनुक्रमेण ततोतु संपादयतु । अथाष्टमीमाह—

अयं ते योनिरिति । हेऽग्ने योऽयमिष्टकाचितिरूपप्रदेशस्ते तव योनिः स्थानं, यतो यस्या इष्टकाचितेर्जात उत्पन्नस्त्वमरोचथा दीप्तो भवसि, तं योनिं जानन्स्वकीयत्वेनावगच्छन्नारोह । अथानन्तरं नोऽस्माकं रयिं धनं वर्धय ।

एतैर्मन्त्रैः साध्यां पुनश्चितिं विधत्ते—

" प वा एषोऽस्माल्लोकाच्च्यवते योऽग्निं चिनुते न वा एतस्यानिष्टक आहुतिरव कल्पते यां वा एषोऽनिष्टक आहुतिं जुहोति स्रवति वै सा तां स्रवन्तीं यज्ञोऽनुपरा भवति यज्ञं यजमानो यत्पुनश्चितिं चिनुत आहुतीनां प्रतिष्ठित्यै प्रत्याहुतयस्तिष्ठन्ति न यज्ञः पराभवति न यजमानः " [सं० का० ५ प्र० ४ अ० १०] इति ।

अग्निं चिन्वानः पुरुषः स्वर्गाभिमुखत्वादस्माल्लोकात्प्रच्युतो भवति । एतस्य पुरुषस्येष्टकारहिते देश आहुतिर्न संभवति, भूप्रदेशस्य स्वकीयत्वाभावात् । एवं सतीष्टकारहिते प्रदेशे यामाहुतिं जुहोति सा स्रवति, यथा भिन्नभाण्डे जलं गलति तद्वत् । स्रवन्तीं तामाहुतिमनु यज्ञो नश्यति । यज्ञमनु यजमानोऽपि नश्यति । अत आहुतिप्रतिष्ठार्थं पुनश्चितिं कुर्यात् । तत आहुतियज्ञयजमानाः प्रतितिष्ठन्ति । अस्यां चितावष्टकासंख्यां विधत्ते—

" अष्टावुप दधात्यष्टाक्षरा गायत्री गायत्रेणैवैनं छन्दसा चिनुते " [सं० का० ५ प्र० ४ अ० १०] इति ।

एतच्छाखाम्नातमन्त्रानुसारेण संख्यां विधाय शाखान्तरानुसारेणान्यौ द्वौ पक्षौ विधत्ते—" यदेकादश त्रैष्टुभेन यद्द्वादश जागतेन छन्दोभिरेवैनं चिनुते " [सं० का० ५ प्र० ४ अ० १०] इति । प्रकारान्तरेण पुनश्चितिं प्रशंसति—

" नपात्को वै नामैषोऽग्निर्यत्पुनश्चितिर्यं एवं विद्वान्पुनश्चितिं चिनुत आ तृतीयात्पुरुषादन्नमत्ति " [सं० का० ५ प्र० ४ अ० १०] इति ।

न पातयति न विनाशयत्याहुतिं न स्रावयतीति पुनश्चितिरूपस्याग्नेर्नपात्क इति नामधेयम् । एवं ज्ञात्वा चितवान्पुरुषः पुत्रपौत्रपर्यन्तमन्नसमृद्धो भवति ।

पुनःशब्दतात्पर्यं दृष्टान्तेन दर्शयति—

" यथा वै पुनराधेय एवं पुनश्चितिर्योऽन्याधेयेन नर्ध्नोति स पुनराधेयमा धत्ते योऽग्निं चित्वा नर्ध्नोति स पुनश्चितिं चिनुते यत्पुनश्चितिं चिनुत ऋद्ध्यै " [सं० का० ५ प्र० ४ अ० १०] इति ।

पुनराधेयपुनश्चित्योः पूर्वमृद्ध्यभावेन पश्चादृद्धिसद्भावेन च तादृश्यम् ।

अत्र पूर्वपक्षत्वेन शाखान्तरमतमुपन्यस्यति—

" अथो खल्वाहुर्न चेतव्येति रुद्रो वा एष यदग्नियंथा व्याघ्रꣳ सुप्तं बोधयति तादृगेव तत् " [सं० का० ५ प्र० ४ अ० १०] इति ।

यथा लोके सुप्तो व्याघ्रः केनचिन्मार्गे गच्छता पुरुषेण बोधितस्तमेव बोधयितारं मारयति, एवमयं क्रूरोऽग्निः पूर्वं चितः कथंचित्पुण्यवशात्सुप्तवच्छान्तो वर्तते । स चेत्पुनश्चीयेत प्रबोधितव्याघ्रवन्मारयेत् । तस्मान्न चेतव्येयं पुनश्चितिरिति पूर्वः पक्षः । तमिमं पक्षमनादृत्य स्वपक्षमेव स्थापयति—

" अथो खल्वाहुश्चेतव्येति यथा वसीयाꣳसं भागधेयेन बोधयति तादृगेव तत् " [सं० का० ५ प्र० ४ अ० १०] इति ।

लोके धनाढ्यं प्रभुं चिरकालव्यवधानेन विस्मृतवन्तं भृत्यः पुनरभ्युपायनमानीय यथा बोधयति, स च बोधित एवाभीष्टसिद्धिं करोति, एवमयं प्रभुरग्निः पुनश्चितः सन्नभीष्टं साधयतीति चेतव्येयं पुनश्चितिः ।

तस्याः पुनश्चितेः समृद्धिहेतुत्वमुदाहरणमुखेन स्पष्टयति—

" मनुरग्निमचिनुत तेन नाऽऽर्ध्नोत्स एतां पुनश्चितिमपश्यत्तामचिनुत तया वै स आर्ध्नोद्यत्पुनश्चितिं चिनुत ऋद्ध्यै " [सं० का० ५ प्र० ४ अ० १०] इति । अत्र विनियोगसंग्रहः—

अग्नित्रयं पुरा प्रातरनुवाकात्स्पृशेदिह (?) ।
नमोद्वाभ्यां वह्निमर्शो येनाष्टाविष्टकाष्टकम् ।
पुनश्चितिरिति प्रोक्ता मन्त्रा अत्र त्रयोदश ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे तृतीयप्रपाठके त्रयोदशोऽनुवाकः ॥ १३ ॥

---

१ ख. घ. ङ. च. °दिवम् । नं° ।

(विहव्याख्येष्टकाभिधानम्)

(अथ चतुर्थाष्टके सप्तमप्रपाठके चतुर्दशोऽनुवाकः)।

ममाग्ने वर्चो विहवेष्वस्तु वयं त्वेन्धाना-
स्तनुवं पुषेम। मह्यं नमन्तां प्रदिशश्चतस्र-
स्त्वयाऽध्यक्षेण पृतना जयेम। मम देवा
विहवे सन्तु सर्व इन्द्रावन्तो मरुतो विष्णु-
रग्निः। मम न्तरिक्षमुरु गोपमस्तु मह्यं वातः
पवतां कामे अस्मिन्। मयि देवा द्रविणमा
यजन्तां मय्याशीरस्तु मयि देवहूतिः। दैव्या
होतारा वनिषन्त (१) पूर्वऽरिष्टाः स्याम
तनुवा सुवीराः। मह्यं यजन्तु मम यानि
हव्याऽऽकूतिः सत्या मनसो मे अस्तु। एनो
मा नि गां कतमच्चनाहं विश्वे देवासो अधि
वोचता मे। देवीः षडुर्वीरुरुणः कृणोत विश्वे
देवास इह वीरयध्वम्। मा हास्महि प्रजया
मा तनूभिर्मा रधाम द्विषते सोम राजन्।
अग्निर्मन्युं प्रतिनुदन्पुरस्तात् (२) अदब्धो
गोपाः परि पाहि नस्त्वम्। प्रत्यञ्चो यन्तु
निगुतः पुनस्तेऽमैषां चित्तं प्रबुधा वि नेशत्।
धाता धातृणां भुवनस्य यस्पतिर्देवꣳ सविता-
रमभिमातिषाहꣳ। इमं यज्ञमश्विनोभा बृह-
स्पतिर्देवाः पान्तु यजमानं न्यर्थात्। उरु-
व्यचा नो महिषः शर्म यꣳसदस्मिन्हवे पुरुहूतः
पुरुक्षु। स नः प्रजायै हर्यश्व मृडयेन्द्र मा(३)

(विहव्यास्त्वेष्टकाभिधानम्)

मो षु रीरिषो मा परा दाः । ये नः सपत्ना अप ते भवन्त्विन्द्राग्निभ्यामव बाधामहे तान् । वसवो रुद्रा आदित्या उपरिस्पृशं मोग्रं चेत्तारमधिराजमक्रन् । अर्वाञ्चमिन्द्रममुतो हवामहे यो गोजिद्धनाजिदश्वजिद्यः । इमं नो यज्ञं विहवे जुषस्वास्य क्रुर्मो हरिवो मेदिनं त्वा (४) ॥

(वनिषन्त पुरस्ताद्मा त्रिचत्वारिंशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके सप्तमप्रपाठके चतुर्दशोऽनुवाकः ॥ १४ ॥

(अथ चतुर्थकाण्डे सप्तमप्रपाठके चतुर्दशोऽनुवाकः) ।

त्रयोदशे पुनश्चितिरुक्ता । अथ चतुर्दशे विहव्यारूपा इष्टका उच्यन्ते । कल्पः—" ममाग्ने वर्चो विहवेष्वित्यनुवाकेन प्रतिमन्त्रमिष्टकाभिर्दक्षिणयाश्विनोत्थ्यश्मनवमा आग्नीध्रीय उपदधाति द्वादश षोडशैकविंशतिं चतुर्विंशतिं वा होत्रीय एकादश ब्राह्मणाच्छंसीये पञ्चमार्जालीयेऽष्टावष्टाव्येषु धिष्ण्येषूपदधातीति विज्ञायते " इति । तत्र प्रथमामाह—

ममाग्ने वर्च इति । हेऽग्ने विहवेषु यज्ञेषु यद्वर्चः फलं तन्ममास्तु । वयमृत्विग्यजमानास्त्वामभिमन्यानाः प्रज्वलयन्तस्तनुवं त्वदीयं शरीरं पुषेम पुष्टं कुर्मः । मह्यं यजमानाय प्राच्याद्याश्चतस्रः प्रदिशो नमन्तां वश्या भवन्तु, वश्या जना मदधीना भवन्तु । अध्यक्षेण स्वामिना त्वया सहिता वयं पृतना विरोधिसेना जयेम । अथ द्वितीयामाह—

मम देवा इति । सर्वे देवा मम विहवे मदीययज्ञे सन्तु तिष्ठन्तु । देवा एव विशेष्यन्ते—इन्द्रावन्त इन्द्रयुक्ता मरुतो मरुद्भिर्विष्णुरग्निश्चेत्येवमाद्याः । इदमुरु विस्तीर्णमन्तरिक्षं मम गोपं रक्षकमस्तु । अयं वातो वायुर्मह्यं मदर्थमस्मिन्काम्ये यज्ञफले निमित्तभूते सति पवतां संचरतु । मदीयकामं साधयित्यर्थः । अथ तृतीयामाह—

(विहव्याख्येष्टकाभिधानम्)

मयि देवा इति। एते देवा मयि यजमाने द्रविणं धनमायजन्तां सर्वतः संवाद्यन्तु। आशीराशास्यमानं फलं मय्यस्तु यजमाने सिद्धं भवतु। तथा देवहूतिर्देवानामाह्वानं च मयि भवतु। दैव्या होतारा देवसंबन्धिन ऋत्विजः पूर्वं त्वनादिसिद्धा वनिषन्तास्मद्यज्ञं संभजन्तु। वयं च तनुवा शरीरेणारिष्टा हिंसारहिताः सुवीराः शोभनपुत्रयुक्ताः स्याम भवाम। अथ चतुर्थीमाह——

मह्यं यजन्त्विति। यानि मम हव्या मदीयानि हवींषि सन्ति तानि सर्वाणि मह्यं मदर्थं दैव्या ऋत्विजो यजन्तु। मे मम मनस आकूतिर्मदीयस्य मनसः संबधी योऽयं संकल्पः साऽऽकूतिः सत्याऽस्तु। संकल्पितार्थः सिध्यात्वित्यर्थः। अहं कृतमच्चनैनः किमपि पापं मा निगां नितरां मा प्रापम्। विश्वे देवासो हे विश्वे देवा मे मदर्थमविवोचताऽधिक्यं ब्रूत यजमानानां मध्येऽयमधिक इति देवानामग्रे कथयत। अथ पञ्चमीमाह——

देवीः षडुर्वीरिति। देवीः षडुर्वीरुर्वीनाधिकाः षट्संख्याका हे देव्यः। अत एव शाखान्तरेऽन्यूपस्थाने समाम्नातम्——" षण्मोर्वीरंहसस्पान्तु द्यौश्च पृथिवी चाऽऽपश्चौषधयश्चोर्क्च सूनृता च " इति। तादृशो हे देव्यो नोऽस्मदीयमिदं कर्मोरु कृणोत विस्तीर्णं कुरुत। विश्वे देवासो हे विश्वे देवा इहैं कर्मणि वीरयध्वं वीरा भवत। विद्मं परिहरतेत्यर्थः। वयं प्रजया पुत्रादिरूपया मा हास्महि परित्यक्ता मा भूम। तथा तनूभिः पुष्टशरीरैर्मा हास्महि। हे सोम राजन्द्विषते वैरिणे मा रथाम कार्यासिद्धिं मा करवाम। अथ षष्ठीमाह——

अग्निर्मन्युमिति। अयमग्निर्मन्युं वैरिणां कोपं प्रतिनुदन्निराकुर्वन्पुरस्तादस्माकं पुरतो गच्छत्विति शेषः। हेऽग्ने त्वमदब्धः केनाप्यहिंसितो गोपा रक्षणसमर्थः सन्नोऽस्मान्परिपाहि सर्वतः पालय। तव पालने सति ते वैरिणः प्रत्यञ्चः प्रतिमुखा विमुखाः सन्तो निगुतो नितरां गमनशीलाः पलायनपराः पुनर्यन्तु भूयो भूयो यत्र क्वापि गच्छन्तु। एषां वैरिणां चित्तमन्तःकरणं प्रबुधाऽमा विनेशत्मबोधेन सह विनश्यतु। अथ सप्तमीमाह——

धाता धातृणामिति। धातृणां जगत्कर्तृणां दक्षप्रजापत्यादीनामपि धाता यः स्रष्टा भुवनस्य लोकस्य पतिः पालकश्च। तथाऽश्विनोर्भोमावश्विनौ बृहस्पतिश्चेत्येते देवा नोऽस्मदीयमिमं यज्ञं यजमानं च न्यर्थात्फलवैगुण्यलक्षणा-

---

१ क. ब. ङ. वैरिणं।

द्वैयष्ट्यात्तान्तु रक्षन्तु । कीदृशं यज्ञम्, देवं तत्तन्मन्त्रव्यवहारयुक्तं सवितारं महाफलजनकमभिषातिषाहं सापलक्षणस्याभिमातेरेरभिभवितारम् ।

अथाष्टमीमाह—

उरुव्यचा इति । पुरुभिर्बहुभिर्यजमानैर्हूत आहूतः पुरुहूत इन्द्रः । हूयते-ऽस्मिन्निति हवो यज्ञस्तस्मिन्यज्ञे स इन्द्रो नोऽस्माकं शर्म सुखं यंसद्यच्छतु । कीदृश इन्द्रः, उरुव्यचा अत्यन्तं व्याप्तो बहुदेशाधिपतिरित्यर्थः । महिषो महाञ्शौर्यादिगुणसंपन्नः । पुरुक्षु पुरुषु बहुमन्त्रेषु क्षूयते शब्द्यते प्रतिपाद्यत इति पुरुक्षुः पुरुक्षुरेव पुरुक्षु । हरिनामानावश्वौ यस्यासौ हर्यश्वः । तादृश हे इन्द्र प्रजायै पुत्रादिप्रजासिद्ध्यर्थं स त्वं नोऽस्मान्मृडय सुखय, नोऽस्मान्मा रीरिषो मा हिंसीर्मा परादा मा च तिरस्कुरु । अथ नवमीमाह—

ये नः सपत्ना इति । ये केचिन्नोऽस्माकं सपत्नाः शत्रवः सन्ति तेऽपभवन्त्वपनयनयुक्ता भवन्तु । वयं तान्सपत्नानिन्द्राग्निभ्यामनुग्रहयुक्ताभ्यां सहिता अवबाधामहे सर्वथा बाधितान्कुर्मः । वसुरुद्रादित्या देवता मामेतादृशमकः-कुर्वन्तु । कीदृशमिति तदुच्यते—उपरितनं स्वर्गं स्पृशतीत्युपरिस्पृक्वम्, उग्रं शत्रुतिरस्कारक्षमं, चेत्तारमभिज्ञातारम्, अधिराजमन्येषां सर्वेषामधिपतिम् ।

अथ दशमीमाह—

अर्वाञ्चमिन्द्रमिति । य इन्द्रो गोजितपरकीयगवां जेता, तथा यो धनजितपरकीयधनस्य जेता, योऽश्वजितपरकीयाश्वानां जेताऽस्ति, अर्वाञ्चमस्मदभिमुखं तमिन्द्रमुतोऽमुं यज्ञं निमित्तीकृत्य हवामह आह्वयामः । हे इन्द्र विहवे विविधाह्वाने सति नोऽस्मदीयमिमं यज्ञं जुषस्व सेवस्व । हरिनामकावश्वौ यस्य स हरिवान् । हे हरिव इन्द्र त्वामस्य यजमानस्य मेदिनं स्नेहवन्तं कुर्मः ।

एतैर्मन्त्रैः साध्यमुपधानं विधित्सुरादौ कानिचित्काम्यचयनानि दर्शयति ।

यदुक्तं सूत्रकारेण—"छन्दश्चितं चिन्वीत पशुकाम इति विज्ञायते तदेवैछन्दोभिश्चिनुयादित्येकं प्राकृतैरित्यपरम्" इति । तदिदं विधत्ते—

"छन्दश्चितं चिन्वीत पशुकामः पशवो वै छन्दाꣳसि पशुमानेव भवति" [सं० का० ५ प्र० ४ अ० ११] इति ।

---

१ घ. ङ. °का अश्वा य° ।

(विहव्याख्येष्टकाभिधानम्)

अग्निर्मूर्धा दिवः ककुदित्यनुवाकोक्ता नानाछन्दोयुक्तमन्त्रास्तैरेव चितो न तु यजुर्भिरिति च्छन्दश्चितस्तादृशमग्निं पशुकामश्चिनुयात् ।

यच्च सूत्रकारेणोक्तम्—" श्येनचितं चिन्वीत सुवर्गकाम इति विज्ञायते वक्षपक्षो व्यस्तपुच्छो भवति पश्चात्पाङ्दूहति पुरस्तात्पत्यङ्ङ्दूहत्येवमिव हि वयसां मध्ये पक्षनिर्णामो भवतीति विज्ञायते " इति । तदिदं विधत्ते—

" श्येनचितं चिन्वीत सुवर्गकामः श्येनो वै वयसां पतिष्ठः श्येन एव भूत्वा सुवर्गं लोकं पतति " [सं० का० ५ प्र० ४ अ० ११] इति ।

वयसां मध्ये श्येनोऽतिशीघ्रं पतितुं समर्थः । श्येन एव श्येनवच्छीघ्रगाम्येव । यदुक्तं सूत्रकारेण—" कङ्कचिदलजचिदिति श्येनचिता व्याख्यातो" इति । तदिदमुभयं क्रमेण विधत्ते—

" कङ्कचितं चिन्वीत यः कामयेत शीर्षण्वानमुष्मिँल्लोके स्यामिति शीर्षण्वानेवामुष्मिँल्लोके भवत्यलजाचितं चिन्वीत चतुःसीतं प्रतिष्ठाकामश्चतस्रो दिशो दिक्ष्वेव प्रति तिष्ठति " [सं० का० ५ प्र० ४ अ० ११] इति ।

कङ्कालजौ श्येनस्यैवावान्तरजातिभेदौ । तत्र कङ्कस्य शिरो मण्डलाकारम् । अजलस्य तु पादयोर्विशेषः । अत एव पादस्थानीयासु सीतासु द्वादशसंख्यामपोह्य चतुःसंख्यां ब्रूते । तत्र कङ्कचिता स्वर्गलोके शीर्षण्वान्सर्वेषां मध्य उन्नतशिरस्कः प्रभुर्भवतीत्यर्थः । अथालजाचिता सीताचतुष्टयादिद्वारा प्रतिष्ठां प्राप्नोति । यदप्युक्तं सूत्रकारेण—" प्रउगचितं चिन्वीत भ्रातृव्यवानिति विज्ञायते यावानग्निः सारत्निप्रादेशो द्विस्तावतीं भूमिं चतुरश्रां कृत्वा पूर्वस्थाः करणा अर्धाच्छ्रोणी प्रत्यालिखेत् " इति । तदिदं विधत्ते—

"प्रउगचितं चिन्वीत भ्रातृव्यवान्नैव भ्रातृव्यान्नुदते " [सं० का० ५ प्र० ४ अ० ११] इति । प्रउगमनोमुखं, यथा शकटस्य पश्चाद्भागो विस्तृतः पूर्वभागः संकुचितस्तद्वत् । एतेन भ्रातृव्यान्पणुदते ।

यदप्युक्तं सूत्रकारेण—" उभयतःप्रउगं चिन्वीत यः कामयेत प्रजातान्भ्रातृव्यान्नुदेय प्रति जनिष्यमाणानिति विज्ञायते यथा विमुखे शकटे" इति । तदिदं विधत्ते—" उभयतःप्रउगं चिन्वीत यः कामयेत प्रजातान्भ्रातृव्यान्नुदेय प्रति जनिष्यमाणानिति नैव जातान्भ्रातृव्यान्नुदते प्रति जनिष्यमाणान् " [सं०का०५ प्र० ४ अ० ११] इति ।

प्राक्पश्चाच्च शकटमुखसदृशमुभयतःप्रउगं तेनोत्पन्नान्भ्रातृव्यान्विनाशयति । उत्पत्स्यमानानामुत्पत्तिं प्रतिबध्नाति ।

यदप्युक्तं सूत्रकारेण—" रथचक्रचितं चिन्वीत भ्रातृव्यवानिति विज्ञायते यावानग्निः तारत्निपादेशस्तावतीं भूमिं परिमण्डलां कृत्वा " इति । तदिदं विधत्ते—" रथचक्रचितं चिन्वीत भ्रातृव्यवान्वज्रो वै रथो वज्रमेव भ्रातृव्येभ्यः प्र हरति " [सं० का० ५ प्र० ४ अ० ११] इति । रथचक्रवद्वर्तुलत्वेन चीयत इति रथचक्रचित् ।

यदप्युक्तं सूत्रकारेण—" द्रोणचितं चिन्वीतान्नकाम इति विज्ञायते द्वयानि तु खलु द्रोणानि चतुरश्राणि परिमण्डलानि च तत्र यथाकामी " इति। तदेतद्विधत्ते—" द्रोणचितं चिन्वीतान्नकामो द्रोणे वा अन्नं भ्रियते सयोन्येवान्नमव रुन्धे " [सं० का० ५ प्र० ३ अ० ११] इति । द्रोणे हि धान्यं भरन्त्यतो धान्यस्थानसहितमन्नं प्राप्नोति ।

यदप्युक्तं सूत्रकारेण—"समूह्यं चिन्वीत पशुकाम इति विज्ञायते समूहन्निवेष्टका उपदधाति" इति । तदिदं विधत्ते—

" समूह्यं चिन्वीत पशुकामः पशुमानेव भवति " [सं० का० ५ प्र० ४ अ० ११ इति । समूहमर्हतीति समूह्यः ।

यदप्युक्तं सूत्रकारेण—" परिचाय्यं चिन्वीत ग्रामकाम इति विज्ञायते मध्यमां स्वयमातृण्णां प्रदक्षिणमिष्टकागणैः परिचिनोति स परिचाय्यः " इति । तदिदं विधत्ते—" परिचाय्यं चिन्वीत ग्रामकामो ग्राम्येव भवति " [सं० का० ५ प्र० ४ अ० ११] इति ।

यदप्युक्तं सूत्रकारेण—" श्मशानचितं चिन्वीत यः कामयेत पितृलोक ऋध्नुयामिति विज्ञायते द्वयानि तु खलु श्मशानानि चतुरश्राणि परिमण्डलानि च तत्र यथाकामी" इति । तदेतद्विधत्ते—

" श्मशानचितं चिन्वीत यः कामयेत पितृलोक ऋध्नुयामिति पितृलोक एवर्ध्नोति " [सं० का० ५ प्र० ४ अ० ११] इति ।

तदेवं काम्यचयनानि समापितानि । अथ प्रकृतेर्ममाग्ने वर्च इत्यादिभिर्मन्त्रैः साध्यमुपधानं विधत्ते—

---

१ क. ख. °त्र यथा° । २ ख. च. °कामम् । इ° ।

(विहव्याख्येष्टकाभिधानम्)

" विश्वामित्रजमदग्नी वसिष्ठेनास्पर्धेतां स एता जमदग्निर्विहव्या अपश्यत्ता उपाधत्त ताभिर्वै स वसिष्ठस्येन्द्रियं वीर्यमवृङ्क्त यद्विहव्या उपदधातीन्द्रियमेव ताभिर्वीर्यं यजमानो भ्रातृव्यस्य वृङ्क्ते " [सं० का० ५ प्र० ४ अ० ११] इति । विहवशब्दोपेतैर्मन्त्रैरुपधेया इष्टका विहव्याः । उपधानदेशं विधत्ते—

" होतुर्धिष्ण्य उप दधाति यजमानायतनं वै होता स्व एवास्मा आयतन इन्द्रियं वीर्यमव रुन्धे " [सं० का० ५ प्र० ४ अ० ११] इति ।

देवाह्वानादिकस्य यजमानकार्यस्य होत्रा निष्पाद्यत्वाद्धोता यजमानस्याऽऽयतनम् । तत्र संख्यां विधत्ते—

" द्वादशोप दधाति द्वादशाक्षरा जगती जागताः पशवो जगत्यैवास्मै पशून्व रुन्धे " [सं० का० ५ प्र० ४ अ० ११] इति ।

यद्यप्यत्र मन्त्राणां दशत्वान्मन्त्रकर्मणोः समसंख्या नास्ति तथाऽपि मन्त्रावृत्त्या कर्मसंख्या पूरणीया । तत्प्रकारश्च सूचकरेण दर्शितः—"अल्पीयांसो मन्त्रा भूयांसि कर्माणि तत्र समशः प्रतिविभज्य पूर्वैः पूर्वाणि कारयेदुत्तरैरुत्तराण्यल्पीयांसि कर्माणि भूयांसो मन्त्रास्तत्र प्रतिमन्त्रं कूर्यादवशिष्टा विकल्पार्था यथायूपद्रव्याणीत्यन्तालोपो विवृद्धिर्वा " इति । अतोऽत्र पूर्वभागस्यान्तिमं पञ्चममुत्तरभागस्यान्तिमं दशमं चाऽऽवृत्त्या वर्धयित्वा संख्या पूरणीया । स्थानान्तरेषु संख्यां विधत्ते—

" अष्टावष्टावन्येषु धिष्ण्येषूप दधात्यष्टाक्षराः पशवः पशूनेवाव रुन्धे " [सं० का० ५ प्र० ४ अ० ११] इति ।

प्रशास्त्रीयपोत्रीयनेष्ट्रीयाच्छावाकीयादीन्यन्यानि धिष्ण्यानि । तत्र नवमदशममन्त्रयोर्लोपेनाष्टसंख्याऽवगन्तव्या । क्वचित्संख्यान्तरं विधत्ते—

" षण्मार्जालीये षड्वा ऋतव ऋतवः खलु वै देवाः पितर ऋतूनेव देवान्पितॄन्प्रीणाति " [सं० का० ५ प्र० ४ अ० ११] इति ।

दैविकस्य पैतृकस्य च कर्मणश्चिद्रौ कर्तव्यत्वाद्दृतूनां देवत्वं पितृत्वं च । अत्र सप्तमादीनां चतुर्णां मन्त्राणां लोपः । अत्र विनियोगसंग्रहः—

समाग्ने दशभिर्मन्त्रैर्धिष्ण्येषु यथायथम् ।
इष्टका उपधत्तेऽत्र वह्निकाण्डः समापितः ॥

अत्र मीमांसा ।

तृतीयाध्यायस्याष्टमपादे चतुर्दशाधिकरणे विचिन्तम्—

(अश्वमेधसंबन्धियाज्यानुवाक्याभिधानम्)

ममाग्न इति कस्यात्र फलं लिङ्गेन वक्तुगम् ।
श्रुत्या स्वामिनि न क्रीते लिङ्गं तत्रोपचर्यताम् ॥

ममाग्ने वर्चो विहवेष्वित्ययं* मन्त्र इष्टकाचयानाङ्गभूतोऽध्वर्युणा पठ्यते । विशिष्टं हवनं येषां यज्ञानां ते विहवास्तेषु वर्चस्तेजसोपलक्षितं यत्फलं तन्मास्त्वित्यनेन लिङ्गेन मन्त्रमुच्चारयितुरध्वर्योस्तत्फलमिति चेन्नैवम् । +अग्निं चिनुत इत्यात्मनेपदश्रुत्या, साङ्गप्रधानफलस्य यजमानगामित्वं प्रतीयते । न च परिक्रीतस्याध्वर्योर्दक्षिणातिरिक्तफलसंबन्धो न्याय्यः । तस्माच्छ्रुतिन्यायाभ्यां विरुद्धं तल्लिङ्गं यजमानपरत्वेनोपचरणीयम् । मदीययजमानस्य तद्वर्चोऽस्त्विति ह्युपचारः । तस्माद्यजमानेन पाठ्येष्वायुर्दा अग्नेऽस्यायुर्मे देहीत्यादिषु क्रियमाणानुवादिषु प्रत्यगाशीर्मन्त्रेषु श्रुतं फलं यथा याजमानं तथाध्वर्युणा पाठ्येषु करणमन्त्रेषु श्रुतमपि फलं याजमानमेव ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे सप्तमप्रपाठके चतुर्दशोऽनुवाकः ॥ १४ ॥

(अथ चतुर्थाष्टके सप्तमप्रपाठके पञ्चदशोऽनुवाकः) ।

अग्नेर्मन्वे प्रथमस्य प्रचेतसो यं पाञ्चजन्यं बहवः समिन्धते । विश्वस्यां विशि प्रविविशिवाꣳ समीमहे स नो मुञ्चत्वꣳहसः । यस्येदं प्राणन्निमिषद्यदेजति यस्य जातं जनमानं च केवलम् । स्तौम्यग्निं नाथितो जोहवीमि स नो मुञ्चत्वꣳहसः । इन्द्रस्य मन्ये प्रथमस्य प्रचेतसो वृत्रघ्नः स्तोमा उप मामुपागुः । यो वाजिषः सुकृतो हवमुप गन्ता (१) स नो

---

*न्यायमालायां ''त्ययमाहवनीयस्यान्वाधाने करणभूतो मन्त्रोऽध्व'' इति पाठः ।
+'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति न्यायमालापाठः ।

(अश्वमेधसंबन्धियाज्यानुवाक्याभिधानम्)

मुञ्चत्वꣳहसः। यः सङ्ग्रामं नयति सं वशी युधे यः पुष्टानि सꣳसृजति त्रयाणि। स्तौमीन्द्रं नाथितो जोहवीमि स नो मुञ्चत्वꣳहसः। मन्वे वां मित्रावरुणा तस्य वित्तꣳ सत्यौजसा दꣳहणा यं नुदेथे। या राजानꣳसरथं याथ उग्रा ता नो मुञ्चतमागसः। यो वाꣳ रथꣳऋजुरश्मिः सत्यधर्मा मिथुश्चरन्तमुपयाति दूषयन्। स्तौमि (२) मित्रावरुणा नाथितो जोहवीमि तौ नो मुञ्चतमागसः। वायोः सवितुर्विदथानि मन्महे यावात्मन्वद्बिभृतो यौ च रक्षतः। यौ विश्वस्य परिभू बभूवतुस्तौ नो मुञ्चतमागसः। उप श्रेष्ठा न आशिषो देवयोर्धर्मन्नास्थिरन्। स्तौमि वायुꣳ सवितारं नाथितो जोहवीमि तौ नो मुञ्चतमागसः। रथितमौ रथीनामह ऊतये शुभं गमिष्ठौ सुयमेभिरश्वैः। ययोः (३) वां देवौ देवेष्वनिशितमोजस्तौ नो मुञ्चतमागसः। यदयातं बृहतꣳसूर्यायास्त्रिचक्रेण सꣳसदमिच्छमानौ। स्तौमि देवावश्विनौ नाथितो जोहवीमि तौ नो मुञ्चतमागसः। मरुतां मन्वे अधि नो ब्रुवन्तु प्रेमां वाचं विश्वामवन्तु विश्वे। आशून्हुवे सुयमानुतये ते नो मुञ्चन्त्वेनसः। तिग्ममायुधं वीळितꣳ सहस्वद्विद्युꣳ शर्धः (४)

पृतनासु जिष्णु । स्तौमि देवान्मरुतो नाथितो जोहवीमि ते नो मुञ्चन्त्वेनसः । देवानां मन्वे अधि नो ब्रुवन्तु प्रेमां वाचं विश्वामवन्तु विश्वे । आशून्हुवे सुयमा-नूतये ते नो मुञ्चन्त्वेनसः । यदिदं माऽभिशोचति पौरुषेयेण दैव्येन । स्तौमि विश्वान्देवा-न्नाथितो जोहवीमि ते नो मुञ्चन्त्वेनसः । अनु नोऽद्यानुमतिरनु (५) इदनुमते त्वं वैश्वा-नरो न ऊत्या पृष्टो दिवि । ये अप्रथेतामभि-तेभिरोजोभिर्ये प्रतिष्ठे अभवतां वसूनाम् । स्तौमि द्यावापृथिवी नाथितो जोहवीमि ते नो मुञ्चतमꣳहसः । उर्वी रोदसी वरिवः कृणोतं क्षेत्रस्य पत्नी अधि नो ब्रूयातम् । स्तौमि द्यावापृथिवी नाथितो जोहवीमि ते नो मुञ्चतमꣳहसः । यत्ते वयं पुरुषत्रा यविष्ठा-विद्वाꣳसश्चकृमा कच्चन (६) आगः । कृधी स्वस्माꣳ अदितेरनागा व्येनाꣳसि शिश्रथो विष्वगग्ने । यथा ह तद्वसवो गौर्यं चित्पदि षिताममुञ्चता यजत्राः । एवा त्वमस्मत्प्र मुञ्चा व्यꣳहः प्रातार्यग्ने प्रतरां न आयुः (७) ॥

(गन्ता दूषयन्स्तौमि ययोः शर्धोऽनु मतिरनु चतुस्त्रिꣳशच्च) ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके सप्तमप्रपाठके पञ्चदशोऽनुवाकः ॥१५॥

(अश्वमेधसंबन्धियाज्यानुवाक्याभिधानम्)

अग्नाविष्णू ज्येष्ठयꣳ शं चोक्वांश्मा चाग्निश्चाꣳशुश्चेध्मश्चाग्निश्च घर्म गर्भा-- श्चैका च वाजो नोऽग्निं युनज्मि ममाग्नेऽग्नेमन्वे पञ्चदश ॥ १५ ॥

अग्नाविष्णू अग्निश्च वाजो नो अदब्धो गोपा एकान्नचत्वा-

रिꣳशत् ॥३९॥

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टके सप्तमः प्रपाठकः ॥ ७ ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां चतुर्थाष्टकः ॥ ४ ॥

(अथ चतुर्थकाण्डे सप्तमप्रपाठके पञ्चदशोऽनुवाकः) ।

चतुर्दशानुवाके विहव्याख्या इष्टका उक्ताः । तावतेष्टकाचयनमन्त्राः समाम्नाताः । अथ पञ्चदशेऽश्वमेधसंबन्धिन्यो याज्यानुवाक्या उच्यन्ते । अयं चानुवाकोऽस्मात्काण्डादुत्कृष्टव्यः ।

कल्पः—" अग्नयेऽहोमुचेऽष्टाकपाल इति दशहाविषं मृगारेष्टिमनुनिर्वपति समानं तु स्विष्टकृदिडमग्नेमन्वे प्रथमस्य प्रचेतस इति यथालिङ्गं याज्यानुवाक्याः" इति । तत्रोदाहृतस्य प्रथमहाविषः पुरोनुवाक्यामाह—

अग्नेमन्व इति । पञ्चजना निषादपञ्चमा वर्णास्तेभ्यो हितः पाञ्चजन्यस्तादृशं यमग्निं बहवो यजमानाः समिन्धते प्रदीपयन्ति, प्रथमस्य सृष्ट्यादावुत्पन्नस्य प्रचेतसः प्रकृष्टज्ञानवतस्तस्याग्नेर्मूर्तिं मन्वे मनसा चिन्तयामि । विश्वस्यां विशि सर्वस्यां प्रजायां प्रविविशिवांसं जाठराग्निरूपेण प्रविष्टवन्तं तमग्निमीमहे वयं प्राप्नुमः। सोऽग्निर्नोऽस्मानंहसः पापान्मुञ्चतु मुक्तान्करोतु । तत्रैव याज्यामाह—

यस्येदं प्राणन्निति । प्राणच्छ्वासोपेतं निमिषन्निमेषोपेतं यदिदं जगदेजदि कम्पते चेष्टत इत्यर्थः । तत्सर्वं यस्याग्नेरधीनं जातं पूर्वमुत्पन्नं जनमानमितः परं जनिष्यमाणं च जगत्सर्वं केवलं परनिरपेक्षं सद्यस्याधीनं तमाग्निं स्तौमि । नाशितः फलयाच्ञायुक्तोऽहं जोहवीमि पुनः पुनर्जुहोमि । शेषं पूर्ववत् ।

(अश्वमेधसंबन्धियाज्यानुवाक्याभिधानम्)

अथेन्द्रायाऽहोमुच एकादशकपाल इत्यस्य पुरोनुवाक्यामाह—

इन्द्रस्य मन्य इति। प्रथमस्य सृष्ट्यादावुत्पन्नस्य प्रचेतसः प्रकृष्टज्ञानवत इन्द्रस्य मूर्तिं मन्येऽहं मनसा चिन्तयामि। वृत्रघ्नः शत्रुघातिन इन्द्रस्योप समीपं प्राप्ताः स्तोमाः स्तोत्राणि मां यजमानमुपागुः प्राप्ताः। इन्द्रगुणकथनपराणि स्तोत्राणि मज्जिह्वायामवस्थितानीत्यर्थः। य इन्द्रो दाशुषो हविर्दत्तवतः सुकृतः सुष्ठु कर्मानुतिष्ठतो यजमानस्य हवमाह्वानं यज्ञं वोपगन्ता प्राप्स्यति।

तत्रैव याज्यामाह—

यः संग्राममिति। य इन्द्रो युधे योद्धुं वशी स्वाधीनपरिवारोपेतः संग्रामं युद्धदेशं प्रति संनयति स्वकीयां सेनां सम्यक्प्रापयति। यश्चेन्द्रः पुष्टानि संपूर्णानि त्रयाणि गवाश्वपुरुषरूपाणि संसृजति यजमानेन योजयति। शेषं पूर्ववत्।

अथ मित्रावरुणाभ्यामाग्नेयमुग्म्यां पयस्येत्यस्य पुरोनुवाक्यामाह—

मन्वे वामिति। मित्रावरुणा हे मित्रावरुणौ वां युवयोर्मूर्तिं मन्वे मनसा ध्यायामि। सत्यौजसाऽऽक्रमिबलौ दृंहणा स्तम्भयन्तौ युवां यमस्मद्वैरिणं नुदेथे निराकुरुत(य)स्तस्य वैरिणो वित्तं दुष्टबुद्धिं जानीतम्। या युवां यावुभौ राजानं दीप्तिमन्तं सरथं रथसहितमादित्यं याथो लोकोपकाराय वृष्टिमुत्पाद्यितुं प्राप्नुथः। उग्राऽनिष्टनिवारणेऽत्यन्तं तीक्ष्णौ तौ तौ युवां नोऽस्मानागसः पापान्मुञ्चतं मुक्तं कुरुतम्। तत्रैव याज्यामाह—

यो वाꣳ रथ इति। हे मित्रावरुणौ वां युवयोर्यो रथ ऋजुरश्मिरकुटिलप्रग्रहः सत्यधर्माऽवितथधारणश्च भवति सुरथो मिथुश्चरन्तं मिथ्याचारिजनन्यायकारिणं शत्रुं दूषयन्नुपयाति बाधमानः प्राप्नोति। स्तौमीत्यादि पूर्ववत्। अथ वायोसावित्र आग्नेयमुग्म्यां चरुरित्यस्य पुरोनुवाक्यामाह—

वायोः सवितारिति। यो वायुर्यश्च सविता तयोरुभयोर्विदथानि वेदनाख्यभिप्रायविशेषान्मन्महे जानीमः। यौ वायुसवितारावात्मकृत्स्वशरीरमिव बिभृतः सर्वं जगद्धारयतः। किंच यौ वायुसवितारौ रक्षतो जगत्पालयतः। किंच यौ वायुसवितारौ विश्वस्य कृत्स्नस्य जगतः परिभू परितो व्यापकौ बभूवतुस्तावित्यादि पूर्ववत्। तत्रैव याज्यामाह—

उप श्रेष्ठा न इति। श्रेष्ठाः प्रशस्ता नोऽस्मदीया आशिषः फलविशेषा

(अश्वमेधसंबन्धियाज्यानुवाक्याभिधानम्)

देवयोर्वायुसवित्रोः संबन्धिनि धर्मे कर्मण्युपास्थिरन्नुपास्थितास्तदधीना इत्यर्थः। स्तौमीत्यादि पूर्ववत्। अथाश्विभ्यामागोमुग्भ्यां धाना इत्यस्य पुरोनुवाक्यामाह—

रथीतमाविति। रथीनां रथीतमौ ये रथिनो देवाः सन्ति तेषां मध्येऽतिशयेन रथिनौ सुयमेभिः सुष्ठु नियन्तुं शक्यैरश्वैः शुभं समीचीनं देशं गमिष्ठावतिशयेन गच्छन्तावश्विनौ। +अह्वेऽहमाह्वयामि। [हे] देवावश्विनौ देवेषु सर्वेषु मध्ये ययोर्वां युवयोरोजो बलमनिशितमन्येन केनापि न तीक्ष्णीकृतं किंतु स्वभावत एव तीक्ष्णमित्यर्थः। तावित्यादि पूर्ववत्। तत्रैव याज्यामाह—

यदयातं वहतुमिति। यद्यस्मात्कारणात्सूर्यायाः सूर्यपत्न्याः स्वमातुः संसदमिच्छमानौ। सद्भावस्थानमिच्छन्तावश्विनौ युवां त्रिचक्रेण चक्रत्रययुक्तेन रथेन वहतुं वाहयितुमयातं रथस्योपरि गतवन्तौ तस्मात्कारणात्तथाविधौ देवौ स्तौमीत्यादि पूर्ववत्। अथ मरुद्भ्य एनोमुग्भ्यः सप्तकपाल इत्यस्य पुरोनुवाक्यामाह—

मरुतां मन्व इति। मरुतां मरुत्संज्ञकानां देवानां मूर्तिं मन्वेऽहं मनसा ध्यायामि। तेन च मरुतो नोऽस्मानधि ब्रुवन्तु अधिकान्ब्रुवन्तु। ते च विश्वे सर्वेऽपीमां वाचं मदीयां प्रार्थनां विश्वां सर्वामपि पावन्तु प्रकर्षेण रक्षन्तु। आशूञ्शीघ्रगामिनः(णः) सुयमान्सुष्ठु नियामकान्मरुदाख्यान्देवानूतये रक्षणाय हुव आह्वयामि। ते न इत्यादि पूर्ववत्। तत्रैव याज्यामाह—

तिग्ममायुधमिति। मरुदाख्यानां देवानामायुधं तिग्मादिविशेषणविशिष्टं तिग्मं तिक्ष्णं वीडितं दृढम्। किंच, मरुतां शर्धो बलं सहस्वत्परेषामभिभवितृ दिव्यं यथोचितव्यवहारयोग्यम्। अत एव पृतनासु परसेनासु जिष्णु जयशीलं, स्तौमीत्यादि पूर्ववत्। अथ विश्वेभ्यो देवेभ्य एनोमुग्भ्यो द्वादशकपाल इत्यस्य पुरोनुवाक्यामाह—

देवानां मन्व इति। पूर्वोक्ता मरुतां पुरोनुवाक्या, तथेयं विश्वेषां देवानां पुरोनुवाक्या योजनीया। तत्रैव याज्यामाह—

यदिदं मेति। पौरुषेयेण मनुष्यव्यापारेण दैव्येन देवव्यापारेण च संपादितं यदिदं दुःखं माऽभिशोचति, अभितो मां क्लेशयति। तस्य दुःखस्यापनोदनार्थं स्तौमीत्यादि पूर्ववत्। अथानुमत्यै चरुरित्यस्य याज्यापुरोनुवाक्ययोः प्रतीके दर्शयति—

+ ऊतये इति पदस्य व्याख्यानं स्खलितम्।

(अश्वमेधसंबन्धियाज्यानुवाक्याभिधानम्)

अनु नोऽद्येति । अनु नोऽद्यानुमतिर्यज्ञमिति पुरोनुवाक्या । अन्विदनुमते त्वं मन्यासा इति याज्या । एतच्चोभयमिदं वामास्ये हविरित्यनुवाके व्याख्यातम् ।

अथाग्नये वैश्वानराय द्वादशकपाल इत्यस्य याज्यापुरोनुवाक्ययोः प्रतीके दर्शयति—

वैश्वानरो न इति । वैश्वानरो न ऊत्या प यावितीति पुरोनुवाक्या । पृष्टो दिवि पृष्टो अग्निरिति याज्या । एतच्चोभयं वैश्वानरो न ऊत्येत्यस्मिन्ननुवाके व्याख्यातम् ।

अथ द्यावापृथिवीभ्यामश्वोमुग्भ्यां द्विकपाल इत्यस्य पुरोनुवाक्यामाह—

ये अप्रथेतामिति । ये द्यावापृथिव्यावमितेभिरोजोभिः परिच्छेत्तुमशक्येर्बलैरप्रथेतां प्रख्याते अभूताम् । किंच, ये द्यावापृथिव्यौ वसूनां धनानां प्रतिष्ठे आश्रयभूते अभवतां ते द्यावापृथिव्यौ स्तौमीत्यादि पूर्ववत् । तत्रैव याज्यामाह—

उर्वी रोदसी इति । उर्वी उर्व्यावत्यन्तं विस्तृते रोदसी रोदस्यौ हे द्यावापृथिव्यौ वरिवो धनं पूजां वा कृणोतं कुरुतम् । क्षेत्रस्य पत्नी पत्न्यौ हे द्यावापृथिव्यौ नोऽस्मानधिब्रूयातमधिकान्कथयतम् । स्तौमीत्यादि पूर्ववत् ।

अथ स्विष्टकृतः पुरोनुवाक्यामाह—

यत्ते वयमिति । हे यविष्ठ युवतमाग्ने वयमविद्वांसो ज्ञानरहिताः सन्तस्ते त्वदीयेषु पुरुत्रा पुरुषेषु यत्कच्चनाऽऽगो यं कमप्यपराधं चकृम कृतवन्तः । अदितेरखण्डनीयस्य तवास्माननागा अपराधरहितान्सुकृधि सुष्ठु कुरु । हेऽग्न एनांस्यस्मदीयानि पापानि विश्वक्सर्वथा विशिश्रथो विशेषेण श्रथितानि कुरु ।

तत्रैव याज्यामाह—

यथा ह तदिति । यजत्रा यष्टव्या वसवो जगन्निवासहेतवोऽग्निना सहिता हे देवाः पदि सितां बन्धनस्थाने स्वकीयस्य पाशस्याऽऽक्रमणेन पादे बद्धां गौर्यंचिन्नौरीमपि यां कांचिद्गौरवर्णां गाममुञ्चत बन्धान्मुक्तां कृतवन्तः । हेऽग्ने तथा ह येनैव प्रकारेण तद्बन्धमोचनं कृतमेवा त्वमेवमेव त्वमपि अस्मदस्मत्तकादाद्व्यंहो विविधं पापं प्रमुञ्च प्रकर्षेण मुक्तं कुरु । नोऽस्मदीयमायुः प्रतरामत्यधिकं यथा भवति तथा मातारि प्रतर संपादय ।

(अश्वमेधसंबन्धियाज्यानुवाक्याभिधानम्)

अत्र विनियोगसंग्रहः—

अग्नयेऽश्वहोमुचेऽष्टाकपाल इत्यादिनेरिताः ।
इष्टयोऽग्नेर्मन्वयुक्ता याज्यास्तासु ऋषादिमाः ॥
अग्नेरग्नेयके द्वी(ही)न्द्रस्यैन्द्रे मन्वे त्वनन्तरे ।
मैत्रावरुणके वायोर्वायोसावित्रके रथी ॥
आश्विने मरुतां मारुते देवा वैश्वदेविके ।
अनुद्रयोश्चाऽऽ(यं चाऽऽ)नुमते वैश्वा वैश्वानरे तथा ॥
द्यावापृथिव्यके ये तु यत्ते स्विष्टकृतीर्यते ।
अनुवाके पञ्चदशे मन्त्रा द्वाविंशतिर्मताः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे सप्तमप्रपाठके पञ्चदशोऽनुवाकः ॥ १५ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराजपरमेश्वरस्य श्रीवीरबुक्कमहाराजस्याऽऽज्ञापरिपालकेन माधवाचार्येण विरचिते वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये चतुर्थकाण्डे सप्तमः प्रपाठकः ॥७॥

(अश्वमेधसंबन्धियाज्यानुवाक्याभिधानम्)

इति श्रीमद्विद्यातीर्थमहेश्वरापरावतारस्य श्रीमद्राजाधिराज-
परमेश्वरस्य श्रीवीरबुक्कमहाराजस्याऽऽज्ञापरिपाल-
केन माधवाचार्येण विरचिते वेदार्थप्रकाशे
कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये
चतुर्थः काण्डः समाप्तः ॥ ४ ॥

मूलक्रमेण चतुर्थाष्टके—प्र० ७ अनु० ७२।
भाष्यक्रमेण चतुर्थकाण्डे—प्र० ७ अनु० ७२।
मूलक्रमेणाऽऽदितः समष्टचत्वारिंशकाः—अष्ट० ४ प्र० २६ अ० १४८।
भाष्यक्रमेणाऽऽदितः समष्टचत्वारिंशकाः—का० ४ प्र० २६ अ० १४३।

समाप्तोऽयं श्रीमत्सायणाचार्यविरचितभाष्यसमेतायाः
कृष्णयजुर्वेदीयतैत्तिरीयसंहितायाश्चतुर्थः काण्डः ॥४॥
